५. वाग्भट ने सर्वप्रथम औषध-द्रव्यों के गुणकर्म-वर्णन की व्यवस्थित पद्धति प्रचलित की। इसके पूर्व ऐसा क्रम नहीं मिलता। अष्टाङ्गहृदय के सूत्रस्थान पंचम तथा षष्ठ अध्याय में क्रमशः द्रवद्रव्यों तथा अन्नद्रव्यों का वर्णन किया गया है। षष्ठ अध्याय में ही शूकधान्य, शमीधान्य, कृतान्न, मांसवर्ग, शाकवर्ग, फलवर्ग के बाद औषधवर्ग का प्रकरण है जिसमें औषधद्रव्यों के गुणकर्म का वर्णन किया गया है। यहाँ संक्षेप में लवण, त्रिफला, त्रिकटु, पंचकोल तथा सप्त पंचमूलों का वर्णन है। इसका विस्तार अष्टाङ्गसंग्रह में मिलता है। इस पद्धति को परवर्ती निघण्टुकारों ने अपना कर विस्तार से वर्गीकृत एवं व्यवस्थित रूप में द्रव्यों का वर्णन किया।

६. द्रव्यों का वर्गीकरण शोधनादिगणसंग्रह अध्याय (सू० १५) में किया गया है। इसमें सुश्रुत का ही आधार लिया गया है, केवल एक (जीवनीय) गण चरक का है। सुश्रुत से निम्नांकित अन्तर दृष्टिगत होता है :—

(१) कुछ गणों का नामकरण परिवर्तित किया गया है यथा विदारिगन्धादि का विदार्यादि, काकोल्यादि का पद्मकादि और सालसारादि का असनादि।

(२) वत्सकादिगण नया जोड़ा गया है।

(३) सुश्रुतोक्त पिप्पल्यादि, बृहत्यादि, उत्पलादि, लाक्षादि और त्र्यूषणादिगण छोड़ दिये गये हैं।

कुल गणों की संख्या ३३ हैं :—

शोधन—४
शमन—३
द्रव्यगण—२६
———
३३

७. अग्र्यप्रकरण के द्रव्यों का उल्लेख ग्रन्थ के अन्तिम अध्याय (उ० ४०) में किया गया है। इनमें निम्नांकित विशेष रूप से अवलोकनीय है :—

मुस्ता एवं पर्पटक–ज्वर	त्रिफला-नेत्ररोग
लाजा–छर्दि	गुडूची–वातरक्त
शिलाजतु–बस्तिविकार	तक्र-ग्रहणी
आमलकी एवं हरिद्रा–प्रमेह	पुराणघृत–उन्माद
लौह-पाण्डु	ब्राह्मी–अपस्मार
पिप्पली-प्लीहारोग	लशुन–वातविकार
लाक्षा-सन्धान	नवनीत–अर्दित
गुग्गुलु–मेदोवातरोग	उष्ट्र का मूत्र और दुग्ध–उदररोग
भल्लातक–अर्श	सशुक्त आर्द्रक–अग्निमांद्य
स्वर्ण–विष	कण्टकारी–कास
रसांजन–स्थौल्य	त्रिफलागुग्गुलु–व्रण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८. रसायन-प्रकरण में गोक्षुर, वाराहीकन्द, चित्रक, सोमराजी, रसोन, बीजक, पुनर्नवा, अश्वगंधा, कृष्णतिल, भृङ्गराज का विशेष विधान है।

इसी प्रकार अन्य अंगों में भी वाग्भट की विशेषतायें हैं जिनका अवलोकन तद्विद सुधीजन समीक्षात्मक अध्ययन द्वारा कर सकते हैं।

अरुणदत्त

अष्टाङ्गहृदय की सर्वप्रसिद्ध व्याख्या सर्वाङ्ग-सुन्दरा का रचयिता अरुणदत्त मृगांकदत्त का पुत्र था जैसा कि उसने स्वयं प्रारम्भिक पद्य तथा अध्यायान्त पुष्पिकाओं में लिखा है। अरुणदत्त का उल्लेख चक्रपाणि (११वीं शती) और डल्हण (१२वीं शती) ने नहीं किया है, विजयरक्षित (१३वीं शती का पूर्वार्द्ध) और हेमाद्रि (१३वीं शती का उत्तरार्द्ध) ने किया है। अरुणदत्त ने स्वयं चन्द्रनन्दन (१०वीं शती) को उद्धृत किया है। अतः अरुणदत्त का काल १२०० ई० के लगभग (११७५–१२२५ ई०) रखा जा सकता है। सर्वाङ्ग-सुन्दरा के अतिरिक्त सुश्रुतसंहिता पर भी इसकी व्याख्या का उल्लेख मिलता है। आयुर्वेद में एक अन्य अरुणदत्त निघण्टुकार हुआ है। (देखें—मेरा 'आयुर्वेद का वैज्ञानिक इतिहास')।

अत्रिदेव विद्यालंकार

अत्रिदेव विद्यालंकार ने जितना लिखा उतना आयुर्वेद में शायद ही किसी और ने लिखा हो। अष्टाङ्गहृदय पर सर्वप्रथम हिन्दी टीका विद्योतिनी की रचना उन्होंने की जिसके बाद अन्य अनेक टीकायें इस पर लिखी गईं। अभी भी संपूर्ण ग्रन्थ पर यही एक टीका उपलब्ध है।

प्रस्तुत संस्करण

प्रस्तुत संस्करण इसी कारण इन दोनों महत्त्वपूर्ण ऐतिहासिक व्याख्याओं के साथ प्रकाशित किया जा रहा है। हिन्दी व्याख्या का युगानुरूप किञ्चित् परिमार्जन यत्र-तत्र कर दिया गया है।

आयुर्वेद के संहिताग्रन्थ प्राचीन टीकाओं के साथ-साथ हिन्दी टीका से भी समृद्ध होकर प्रकाशित किये जाँय ऐसी इच्छा मेरी ही नहीं समस्त विद्वमण्डली की रही है क्योंकि इससे प्राचीन व्याख्याओं का पुनरुज्जीवन होने के साथ हिन्दी प्रेमी पाठकों का भी मनस्तोष होगा। इस योजना में चौखम्भा संस्कृत संस्थान परिवार ने चरकसंहिता का प्रकाशन चक्रपाणिव्याख्या तथा हिन्दी टीका के साथ पहले ही कर दिया है। अब उसी क्रम में अष्टाङ्गहृदय का यह द्वितीय पुष्प पाठकों को समर्पित है। आशा है, निकट भविष्य में सुश्रुतसंहिता का भी प्रकाशन इस शैली पर होगा। इस प्रशंसनीय समारम्भ के लिए चौखम्भा ओरियन्टालिया परिवार धन्यवाद का पात्र है। श्री कपिलदेव गिरि ने बड़े परिश्रम तथा सावधानी से ग्रन्थ का संयोजन किया है, उसके लिए मेरा हार्दिक शुभाशीर्वाद है।

श्रीवल्लभाचार्य पञ्चशती जयन्ती
वैशाख कृष्ण ११, संवत् २०३५
दिनांक ३-५-७८

प्रियव्रत शर्मा
काशी हिन्दू विश्वविद्यालय, वाराणसी

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीमद्वाग्भटविरचितम्

अष्टाङ्गहृदयम्

'सर्वाङ्गसुन्दरा'-'निर्द्योतिनी' हिन्दीटीकासहितम्

अथ सूत्रस्थानम्

प्रथमोऽध्यायः

सर्वाङ्गसुन्दरा

दीप्त्या यस्येन्द्रनीलोत्पलशकलरजोनीलया नीलिताभां। लक्ष्मीमुत्तप्तभास्वत्कनकरुचिमपि स्पर्शरोमाञ्चिताङ्गीम् ॥
कालीत्याशङ्कमानः स्फुरदधरपुटश्चक्रपाणिः किलाभूद्भर्ता लोकस्य शश्वत्स भवतु भवतां भूतये पद्मनाभः ॥ १ ॥
को मत्सरिणि लोकेऽस्मिन्विद्वान्किंचिच्चिकीर्षति। किंतु कश्चिद्भवेत्साधुस्ततोऽयं मत्परिश्रमः ॥ २ ॥
श्रीमन्मृगाङ्कतनयष्टीकामष्टाङ्गहृदयस्य। श्रीमानरुणः कुरुते सम्यग्द्रष्टुः पदार्थबोधाय ॥ ३ ॥

इह हि शास्त्रारम्भे शास्त्रपरिसमाप्तये सर्व एव सभाभूषणभूता निखिलजनजनितप्रमोदसंदोहा रुचिररुचिरचितवचनचर्चितप्रबन्धाः प्रबन्धविरचनप्रवरा इष्टदेवतानमस्कारं तन्त्रकारा विदधुः। तदयमपि तन्त्रकारोऽभीष्टदेवतानमस्कारपुरःसरं तन्त्रमारिरिप्सुरिदमाह—

रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान्।
औत्सुक्यमोहारतिदाञ्जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै ॥

स०—राग आदिर्येषां ते रागादयः। आदिशब्देन द्वेषलोभादिपरिग्रहः। रुजन्तीति रोगा देहमनसी संतापयन्तीत्यर्थः ननु मनःस्थितत्वान्मन एव ते रुजन्तीति वक्तुं युक्तम्। मैवम्। देहमनोलक्षणयोर्वस्तुनोराधाराधेयभावेन स्थितत्वाद्द्वयोरपि संतापो युक्तः। यथाधेयेनायोगोलकेन संतप्तेन तदाधारस्य कटाहादेः संतापः। आधारेण च कटाहादिना संतप्तेनाधेयस्य घृतादेः संतापः। तदेवं रागादयो द्वयं रुजन्तीति न्याय्यमेतत्। तथा सततानुषक्ताः सर्वकालं प्रसृताः सहजा इत्यर्थः। अशेषकायप्रसृताः। अशेषश्चासौ कायश्चाशेषकायः तत्र प्रसृता अनुगताः। यद्वा—अशेषाश्च ते कायाश्चाशेषकायाः। सर्वाणि शरीराणि गजतुरगोरगादिसम्बन्धीनि तानि प्रकर्षेण सृता गताः। तथा न विद्यते शेषो येषां तेऽशेषाः सर्वे समूलाः। सबीजा इत्यर्थः। तथौत्सुक्यमोहारतिदाः। औत्सुक्यं विषयोत्कण्ठा ततोऽभिलाषः। मोहः कार्याकार्यानभिज्ञत्वम्। अरतिरनवस्थितिः स्थानासनादिषु। औत्सुक्यं च मोहश्चारतिश्च ता ददति ये रागादयस्त एवम्। तानेवंविधान् यो भगवान् जघान तस्मै तथाभूतायापूर्ववैद्याय नमोऽस्तु तं पूजयामीत्यर्थः। अत एवासावपूर्व आश्चर्यभूतो वैद्योऽन्यो हि यो वैद्यः स ज्वरादीनप्यचिरोत्थितान् रोगानेतद्विशेषणैरपरामृष्टान्न तथा हर्तुं समर्थः। किमुत रागादीनसाध्यलक्षणलक्षितान्। तथा चासाध्यलक्षणम्—"अनुपक्रम एव स्यात् स्थितोऽत्यन्तविपर्यये। औत्सुक्यमोहारतिकृत्" इति। यदि वा न विद्यते पूर्वो यस्मादसावपूर्वः। पूर्वेभ्यः प्रथम इत्यर्थः। अपूर्वश्चासौ वैद्योऽपूर्ववैद्य इत्यर्थः। एवंविधं चाभिमतनमस्कारश्लोकं विरचयन् ग्रन्थकृद् ग्रन्थस्य रोगोपशान्तिः प्रयोजनमिति प्रतिपादयति। तथा चाह चरकमुनिः—"धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्।" इति। एवं च धातुसाम्येन प्रयोजनेन प्रयोजनवदिदं तन्त्रम्। तथा तत्पाठात्तदर्थावबोधात्तद्विध्यनुष्ठानाच्चा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रोग्याख्यस्योपेयस्य तथाभिमतस्यायुषः परस्य पुरुषार्थस्य मोक्षाख्यस्य च परमार्थत इदमेव तन्त्रमुपायः। अस्माच्चोपायोपेयलक्षणसम्बन्धाच्च हेतुलिङ्गौषध्याख्यस्कन्धत्रयमस्याभिधेयं तेनाभिधेयेनाभिधेयवत्तन्त्रम्। एवं च ग्रन्थकृतात्र प्रयोजनसम्बन्धाभिधेया युक्त्यैवोक्ताः। इन्द्रवज्रोपेन्द्रवज्राविरचितत्वादुपजातिवृत्तम् "अनन्तरापाचितलक्ष्मशोभौ पादौ भवेतां विविधैर्विकल्पैः। यासामिमावन्ययतिप्रपञ्चौ स्मृताः स्मृतिज्ञैरुपजातयस्ताः॥" सर्वत्रैव चात्र तन्त्रेऽनुष्टुभा समानीप्रमाणीवितानादिभेदभिन्नतया विरचनं यत्पुनरवसरान्तरे वृत्तान्तरविरचनमिह तत्सलक्षणं व्यञ्जयिष्यामः 'विद्योतिनी'।

विद्योतिनी—समस्त शरीर में फैले हुये, निरन्तर संलग्न तथा उत्सुकता (विषयों के प्रति तृष्णा), मोह (अज्ञान) तथा अरति (विकलता) को देनेवाले राग, द्वेष आदि समस्त विकारों को नष्ट करने वाले अपूर्व (अद्भुत) वैद्य (महाभिषक् भगवान् बुद्ध या आदिभिषक् ब्रह्मा) को नमस्कार है।[1]

इदानीमिष्टदेवतां नमस्कृत्य शास्त्रकारस्तन्त्रमारिरिप्सुरिदमाह।

अथात आयुष्कामीयमध्यायं व्याख्यास्यामः ॥

इति ह स्माहुरात्रेयादयो महर्षयः ॥

स०—अथेति। अथशब्दोऽस्मिन्मङ्गलाधिकारानन्तर्येषु द्रष्टव्यः। मङ्गलादीनां हि शास्त्राणां तदध्येतॄणां निष्प्रतिबन्धा प्रवृत्तिरभिप्रेतार्थसाधनाय जायते। अथशब्दश्चायं मङ्गलार्थः। तथा चोक्तम् "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेनेमौ मङ्गलौ स्मृतौ॥" इति। अतोऽधिकारे। आयुष्कामीयं शास्त्रमधिक्रियते यावद्यत ऊर्ध्वं प्रतन्यते आतन्त्रपरिसमाप्तेस्तत्सर्वमायुष्कामीयं वेदितव्यम्। अत आनन्तर्ये च। नमस्कारादनन्तरमायुष्कामहितं व्याख्यास्याम इति। कथं पुनरेकस्यैव तन्त्रकारस्य व्याख्यास्याम इति बहुवचनं युज्यते। ब्रूमः। "अस्मदो द्वयोश्च" इत्येकत्वेऽपि बहुवचनविधानादभिलषन्ति युक्तमेवात्रैकस्मिन्नपि बहुवचनम्। तथा च मुनिः। आयुः। 'शरीरेन्द्रियसत्त्वात्मसंयोगाधारि जीवितम्। नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते॥" एतीत्यायुः। सततं यातीत्यर्थः। एवंविधं गत्वरस्वभावमपि हिताहारविहारसेवादिभिरहितवर्जनेन च कथमेतत् स्थिरीभवेदित्येवं कामयन्ते ये ते आयुष्कामाः। तेभ्यो हित आयुष्कामीयः। स पुनरायुर्वेदागमादिप्रकरणसमुदाय आयुष्कामयमानेनेत्यादिकः। आयुष्कामीय इति "इसुसोः सामर्थ्ये" इति षादेशः। "तस्मै हितम्" इति छः आयुष्कामीयशब्दोऽध्यायविशेषणार्थो नीलोत्पलदलवत्। बहुष्वध्यायेषु सत्सु कतममध्यायं व्याख्यास्याम आयुष्कामीयमिति। अधिकृतोऽध्ययनायेत्यध्यायस्तं व्याख्यास्यामः। विविधप्रकारेण विशेषेण वा कथयिष्यामः। आयुष्कामैः पूर्वं दृष्टत्वादस्याध्यास्यायुष्काम इति संज्ञा। अर्थगतिमधिकृतोऽध्याय इति नाम। तथा चोक्तम्—"अधिकृत्येयमध्यायनामसंज्ञा प्रतिष्ठिता" इति। तत्र पदसमुदायो वाक्यं, वाक्यसमुदायः प्रकरणं, प्रकरणसमुदायो यः सोऽध्यायोऽध्यायसमुदायः स्थानं, स्थानसमुदायस्तन्त्रमिति। विशब्दो नानार्थः। आङभिविधौ। उत्तराख्यश्चायमलंकारः तस्य हि लक्षणम्—"उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम्। क्रियते तदुत्तरं स्यात्" इत्यादि। ततोऽनेन वाक्येन शिष्यवचनमीदृशमुन्नीयते। संसारेऽस्मिन्नमी प्राणिनो नानारोगानीकाभिभूतास्त्रातारमलभमानास्त्रिवर्गाद् भ्रश्यन्ते। तत्को नु भगवन्नत्रोपायः स्यादिति कृतप्रश्नो गुरुः प्रतिजज्ञे। अथ शिष्यवचनानन्तरमतो हेतोर्यस्मादयं शिष्यः श्रुतकुलशीलादिसंपन्नो धीमेधागुणभूषणभूतो विविधैः प्रकारैराशिष्यबोधोत्पत्तेरायुष्कामीयमध्यायं व्याख्यास्यामो वर्णयिष्यामः। ननु कीदृशं तद्विविधप्रकारमाख्यानम्। ब्रूमः। पदतस्तदर्थतः प्रयोजनतश्चोद्यतः परिहारतः संबन्धाभिधेयतश्च। पदतो यथायुरितीदं पदम्। तदर्थतो यथैतीत्यायुः प्रयोजनतो यथाऽत्रैव धर्मार्थसुखसाधनम्। चोद्यतो यथा ननु कथमेतत्केवलं धर्मार्थसुखसाधनमिति वक्तुं पार्यते। यतोऽस्यायुषः कर्मैव केवलं धर्मसाधनमिति वक्तुं नो पार्यते। यतोऽस्यायुषः परिपालनार्थं विशस्ताः काकगृध्रभासादयो राजयक्ष्मचिकित्सते भोज्या इत्युक्तम्। अभक्ष्याश्चैते। श्रुतिस्मृत्योरभक्ष्यत्वेनोक्तत्वात्। एवमभक्ष्यभक्षणाद्धिंसया च पापयोगस्तद्योगाच्चाधर्मसाधनं न धर्मसाधनमिति। परिहारतो यथैवं परिहारो यज्ञाधिकारिशरीरनिमित्तं काकादीनां विशंसनं भक्षणं विधीयमानं नाधर्माय। इतरथा क्रीडार्थं क्रियमाणमधर्मायैव। तथा च काकादयोऽपि तत्साधनोपयोगाद्धर्मेण तत्फलेन संबध्यन्ते यज्ञिया इव पशवस्तदेवमायुषो धर्मसाधनत्वं स्थितम्। संबन्धाभिधेयौ तूक्तावेव। ननु सन्त्येवान्यान्यपि महर्षिप्रणीतान्यायुर्वेदतन्त्राणि किमनेन तन्त्रेण कृतेनेति। अत्र ब्रूमः। अवरतन्त्राणां सावद्यत्वादिदमुच्यते। अन्यानि हि तन्त्राणि सदोषाणि। तथा हि। यदेतत्तावद्भगवता चरकमुनिना प्रणीतं

१. परम्परागत शिष्टाचार के अनुसार इस श्लोक में आशीर्वादात्मक, नमस्कारात्मक एवं वस्तुनिर्देशात्मक तीनों ही मङ्गलाचरण समाविष्ट हैं। नमस्कार तो स्पष्ट ही है। केवल अपने रागादि रोगों का ही अन्त नहीं, समस्त प्राणिमात्र के (अशेषकाय प्रसृत) रागादि के समूल (अशेष) नाश की कामना में आशीर्वादात्मक एवं रोगनाश तथा उसके कर्ता अपूर्व वैद्य के उल्लेख द्वारा रोगनाशनोपाय का इस ग्रन्थ में वर्णन है ऐसा वस्तुनिर्देश भी है। इतना ही नहीं, रोगनाशन के उपायरूप 'अभिधेय' उसके साथ ग्रन्थ की उपेयोपाय या वाच्यवाचकसम्बन्ध, रोगनाशन एवं दीर्घायुरूप प्रयोजन तथा सुख एवं आत्यन्तिक सुख (मोक्ष) रूप फल का भी निर्देश कर ग्रन्थ के पठन में प्रवृत्ति के लिए आवश्यक अनुबन्धचतुष्टय का भी वर्णन किया गया है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तन्त्रं रत्नाकर इव गाम्भीर्यातिशययोगाद्दुर्बोधं तस्यापि सदोषतां प्रकटयन्ति वाचाटाः। तथा ह्यादौ तत्सूत्रम्। अथातो दीर्घंजीवितीयमध्यायं व्याख्यास्याम इति। अत्र दीर्घंजीवितीय इति शास्त्रादावयुक्तम्। यतो दीर्घंजीवितमन्विच्छन्नित्यस्यानुकरणं दीर्घंजीवितमिति। सोऽस्मिन्नध्यायेऽस्तीति छः तस्याध्यायानुवाकयोर्लुकि सति दीर्घंजीवितमिति प्राप्नोति। तदिदमविदितपरमार्थशब्दस्वरूपाणां वचनम्। तथाहि। अध्यायानुवाकयोरित्यादौ सूत्रे विकल्पेन चायं लुगिष्यत इति जगाद जयादित्यः। तेन लुकः पाक्षिकत्वादत्र लुक् न भवतीत्येवं युक्तमुक्तमिदम्। दीर्घशब्देन गुणोऽभिधीयते जीवितशब्देनाऽपि गुण एव। तस्माद्द्वयोरपि गुणत्वादाधाराधेयभावो न युक्तो यतो गुणाश्रयो गुणो नोक्त इति। तथा च वैशेषिकाः। निर्गुणा गुणा इति। अथ कालशब्दं लुप्तस्वरूपं निर्दिश्य दीर्घंजीवितीयशब्दो निर्दिश्यते तदा युक्तमेवैतत्। इन्द्रियोपक्रमणीयेऽध्याये छप्रत्ययोत्पत्तिः कथमेवं विधीयतां यतोऽस्मिन्नध्याय इन्द्रियोपक्रमणशब्दो नास्त्येव। एवमपामार्गतण्डुलीयेऽपामार्गतण्डुलशब्दस्याभावाच्छप्रत्ययोत्पत्तिर्दुर्लभा। तथा दिव्याम्भसो गाङ्गसमुद्रभेदः परीक्षा च नोक्ता। प्रत्युत तत्र पठ्यते। "जलमेकविधं सर्वं पतत्यैन्द्रं नभस्तलात्। तत्पतत्पतितं चैव देशकालावपेक्षते॥" इति। तथा नालिकेरोदकस्य गुणा नोक्ताः। तथाऽपक्वक्वथितक्षीरस्य स्वरूपविशेषो नोक्तः। तथा कषाये कियदौषधं किमवशेषं क्वथनीयमित्यादि च नोक्तम्। मिश्रके स्नेह एवमभ्यधादसौ। "त्रिवृतां त्रिफलां दन्तीं दशमूलं पलोन्मितम्। चतुर्गुणं जलं दत्वा" इत्यादि। तदेषामौषधानां कियन्मानमपि सलिलेनैतावता कीदृशं किमुत क्वाथनिर्यासाविति। तथा क्वथितशीततोयमपि कियता पाकेन पथ्यं भवतीति नोक्तम्। मुद्गो ग्राहीति च नोक्तम्। तथा च तत्पाठः। "कषायमधुरो रूक्षः शीतः पाके कटुर्लघुः। विशदः श्लेष्मपित्तघ्नो मुद्गस्तूक्तोत्तमोत्तमः॥" इति। तथा वास्तुकादीनां लघुत्वं नोक्तम्। तथाच तत्पाठः। "पाठासुषासठीशाकं वास्तुकं सुनिषण्णकम्। विद्याद् ग्राहि त्रिदोषघ्नं भिन्नवर्चस्तु वास्तुकम्॥" इति। तथा इक्षुवर्गे-"शत्यात्प्रसादान्माधुर्यात्पौण्ड्रकाद्वांशिको वरः" इत्यसावभ्यधात्। पौण्ड्रकश्च वांशिकाद्वर इति सुप्रसिद्धमेतत्। अत्र मतिवैभवाद्भट्टारकहरिश्चन्द्रो व्याख्याविशेषमवोचताम्। यथा पौण्ड्रकाद्वांशिकोऽवर इति। एवं चैतदुपपन्नमेव। तदेवमात्रेयस्यापि तन्त्रे यतो बहवो दोषा उद्भाव्यन्ते तत का गणना तन्त्रान्तराणाम्। तथा वेदोत्पत्तिरिति संज्ञा तन्त्रेऽस्मिन्सदोषत्वान्न कृता। तथा हि। आयुषो वेद आयुर्वेदस्तस्योत्पत्तिरायुर्वेदोत्पत्तिरिति भवितव्यम्। अत्र केचिदाहुः—आयुः शब्दलोपं कृत्वेह निर्देशः कृतः। एवमपि सति लोपस्तावदमङ्गलः। सोऽप्यायुषः स च शास्त्रादावित्यन्यार्थ्यैवैषा संज्ञा। किंच वेदोत्पत्तिरित्येतदपि तावद्वक्तुं न युज्यते। नित्यत्वादस्य वेदस्य। नित्यो ह्ययमायुर्वेदः। संतानादिनित्यत्वात्। तथा ह्यायुः संतानः सर्वप्राणिसंवेद्यशरीरापरशरीरगोमनःप्रबन्धनित्यतया नित्यः। अस्य नित्यत्वादायुर्वेदोऽपि नित्यः। नित्यत्वाच्चास्योत्पत्तिमत्त्वं वक्तुमयुक्तम्। नन्ववबोधोपदेशाभ्यामुत्पत्तिरस्योपलभ्यते। अतः प्रागुपदेशान्नासावुपलभ्यते। अत उपदेशानन्तरमुपदेशद्वारेणोपलभ्यते। तस्मादवबोधोपदेशावस्योत्पत्तिकारणत्वेन कल्पयित्वोत्पत्तिमत्त्वमस्योच्यत इति कैश्चिदूचे। नैतद्युक्तम्। यतः सतो बोधोपदेशौ स्तो नासतः। तथा चाचष्टे लोकः। अमुना गुरुणा छात्रायोपदिष्टं शास्त्रमिदमिति। सत एवोपदेशावबोधौ स्तः। तस्मान्नावबोधोपदेशावस्योत्पत्तिकारणमित्यतोऽपि हेतोर्वेदोत्पत्तिसंज्ञेत्ययुक्ता। इति संज्ञानां सावद्यत्वं निरूप्य निरवद्यायुष्कामीयसंज्ञेह तन्त्रे कृता। ययोच्चारितमात्रयैवाऽशेषस्तन्त्रार्थः प्रकाश्यते। प्रतिस्थानं च योऽध्यायः प्रथमस्तत्संज्ञया स्थानार्थः। अन्ये च येऽध्यायास्तन्त्रेऽस्मिंस्तत्संज्ञाभिर्यथास्वतन्त्रमर्थजातं प्रकाशयन्त इति।

इदमिदानीं पृच्छ्यते तन्त्रकारः। यदस्मिंस्तन्त्रे किंचिदुच्यते स्म भवद्भिस्तत्स्वबुद्धिपरिकल्पितमुत नेत्याह—

इतिशब्द एवमर्थे। यथा इति ह स्म तानाह। हशब्दोऽनुकम्पायाम्। ब्रूधातोः स्म उपपदे भूतानद्यतनपरोक्षे 'लट् स्मे' इति लट आहादेशः। अत्रेरपत्यमात्रेयः। 'इतश्चानिञः' इति ढक्। आत्रेय आदिर्येषां धन्वन्तरिप्रभृतीनां त एव महांतश्च ते ऋषयश्च महर्षयः। महत्त्वं तज्ज्ञानातिशययोगात्। तेनायमर्थोऽनेन कारणेनानुकम्पया न तु फलकांक्षया। भगवन्त आत्रेयादयो महर्षयोऽब्रुवन् नास्माभिः स्वमतिपरिकल्पितं किंचिदप्यत्रोक्तम्। केवलं दूतसंदेशवचनन्यायेन युगानुरूपः क्रममात्रोऽन्यथा कृत इत्यर्थः। तथा चास्यैव संग्रहे—"न मात्रामात्रमप्यत्र किंचिदागमवर्जितम्। तेऽर्थाः स ग्रंथसंदर्भः संक्षेपाय क्रमोऽन्यथा" इति। तदेवमागमप्रामाण्यमस्य तन्त्रस्येत्युक्तं भवति।

वि०—अब इसके आगे 'आयुष्कामीय' अध्याय का व्याख्यान करेंगे जैसा कि भगवान् आत्रेय आदि महर्षियों ने कहा था।[2]

वक्तव्य—आयुर्वेद शास्त्र के उद्देश्य दो हैं। पहला स्वस्थ पुरुष के स्वास्थ्य की रक्षा (Preventive) और दूसरा रोगी के विकार का शमन (Curative)। इन दोनों का भी लक्ष्य दीर्घजीवन की प्राप्ति (Promotive) है जिससे निर्विघ्न रूप से पुरुषार्थचतुष्टय की साधना हो सके।

इस दीर्घायु की कामना के लिये प्रथम अध्याय का अवतरण किया जाता है।

इस तन्त्र में जो कुछ भी कहा जायगा--वह पूर्व आचार्यों की परंपरा के अनुसार ही है।

---

२. अथ शब्द माङ्गलिक है। इसका दूसरा अर्थ अनन्तर (बाद में) होता है अतः 'इस (मङ्गलाचरण) के बाद आयुष्कामीय अध्याय का वर्णन करूँगा' यह स्पष्ट अर्थ होता है। 'आयुष्कामीय' शब्द से ग्रन्थ के अभिधेय का भी स्पष्ट बोध होता है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आयुः कामयमानेन धर्मार्थसुखसाधनम् ।
आयुर्वेदोपदेशेषु विधेयः परमादरः ॥ २ ॥

स०—आयुर्वेदयति ज्ञापयति प्रकृतिज्ञानरसायनदूतारिष्टाद्युपदेशादित्यायुर्वेदः । तस्योपदेशा आयुर्वेदोपदेशाः । उपदिश्यन्त आयुर्वेदार्था उपपत्तिभिरित्युपदेशा आयुर्वेदतंत्राणि । तेषु परमादरः पाठाववोधानुष्ठानरूप उत्कृष्टो यत्नः कार्यः । आयुर्वेदोपदेशेष्विति बहुवचननिर्देशादयमर्थो बोध्यते । बहुष्वायुर्वेदतंत्रेषु यत्नः कार्योऽनेकायुर्वेदावलोकनाच्चिकित्सायां वैद्यस्य न मनागपि संदेहो जायते । किं कुर्वता पुरुषेण—आयुः कामयमानेन जीवितमभिलषता । किंभूतमायुः धर्मार्थेत्यादि । ध्रियते लोकोऽनेनेति धर्मः । अर्थ्यते याच्यत इत्यर्थः । सुखं द्विविधम् । तादात्विक मात्यंन्तिकं च । तादात्विकं कियत्कालांतरास्थायित्वात्सुखावभासं न परमार्थतः सुखम् । तथा चोक्तम्—'तादात्वसुखसंज्ञेषु भावेष्वज्ञोऽनुरज्यते ।' इति । तदेतत्संज्ञामात्रेण सुखं न त्वत्यंतमिति प्रदर्शयितुं सुखसंज्ञेष्विति मुनिनोक्तम् । आत्यंतिकं सुखं मोक्षाख्यं यत्र न दुःखानां श्लेषः । तेषां साधनमुपायो धर्मार्थसुखसाधनम् ॥ २ ॥

वि०—धर्म, अर्थ और सुख का साधन आयु है; इस आयु की जिस पुरुष को कामना हो; उसे चाहिये कि वह आयुर्वेद के उपदेशों में अतिशय आदर करे ॥ २ ॥

वक्तव्य—जिससे लोक का धारण होता है, वह धर्म है; 'धारणाद्धर्मं इत्याहुः', 'धर्मो धारयति प्रजाः' अर्थात् धर्म ही प्रजा को धारण करता है; धर्म से ही अर्थ और काम होते हैं; जिन लोगों का धर्म नष्ट हो जाता है; उनका नरक में वास होता है । इसलिये धर्म की रक्षा, उसका पालन प्रत्येक व्यक्ति के लिये आवश्यक है । इस धर्म का साधन यह शरीर है ।

'अर्थ'—जिसके पास धन होता है, उससे दूसरे मांगते हैं और जिसके पास नहीं होता, वे दूसरों से मांगते हैं; जिसकी याचना होती है उसी (धन) का नाम अर्थ है ।

सुख—संसार में कई प्रकार का है; किसी के लिये पुत्र-पौत्रादि सुख है; किसी के लिये धन-दौलत सुख है; किसी के लिये स्त्री सुख है ।

सुख दो प्रकार का है—क्षणिक या तात्कालिक और आत्यन्तिक दोनों सुख आयु अर्थात् जीवन के साथ जुड़े हुए हैं । क्योंकि धर्म से पारलौकिक सुख है; अर्थ और काम से ऐहलौकिक सुख है, परन्तु आयुर्वेद से ऐहलौकिक और पारलौकिक दोनों ही प्रकार का सुख है:—

'तस्यायुषः पुण्यतमो वेदो वेदविदां मतः ।
'वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितम् ॥'

मोक्ष आत्यन्तिक सुख है ।

अथास्यायुर्वेदस्य गौरवोत्पादनायागमशुद्धिं दर्शयति—

ब्रह्मास्मृत्वाऽऽयुषो वेदं प्रजापतिमजिग्रहत् ।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान्मुनीन् ॥३॥
तेऽग्निवेशादिकांस्ते तु पृथक् तन्त्राणि तेनिरे ।

स०—ब्रह्मेत्यादि । ब्रह्माऽऽयुषो वेदं स्मृत्वा प्रजापतिं दक्षमजिग्रहद् अवबोधयत् । स्मृत्वेत्यनेनैतद्गमयति ब्रह्मणः स्मर्तृत्वमेवात्र न कर्तृत्वम् । नित्यत्वादायुर्वेदस्य नित्यत्वं चास्य प्राक् प्रत्यपादि । ग्रहेर्ण्यन्तस्यात्र बुद्ध्यर्थत्वात् प्रजापतिशब्दस्य गतिबुद्धीत्यादिना कर्मसंज्ञा । स प्रजापतिरश्विनावजिग्रहत् । तौ सहस्राक्षमिंद्रमजिग्रहतामिति वचनविपरिणामेन संबन्धः । शक्रोऽत्रिपुत्रादिकान् मुनीन् बोधयामास । अत्रिपुत्र आत्रेय आदिर्येषां धन्वंतरिनिमिकाश्यपादीनां त एवं ते चात्रेयादयोऽग्निवेशादिकानजिग्रहन् । ते त्वग्निवेशादयः षट् पृथक् प्रत्येकं तन्त्राणि शास्त्राण्यग्निवेशभेडजातूकर्णपराशरहारीतक्षीरपाणिनामाभिधेयानि तंत्राणि तेनिरे विस्तारितवंतश्चक्रुः । तन्त्र्यन्ते धार्यन्त आयुर्वेदार्था एभिरिति तन्त्राणि ।

वि०—आयुर्वेद की परंपरा—ब्रह्मा ने आयुर्वेद का स्मरण करके प्रजापति को दिया—सिखाया । प्रजापति ने अश्विनीकुमारों को; उन्होंने इन्द्र को और इन्द्र ने आत्रेय आदि मुनियों को दिया । इन मुनियों में अग्निवेश आदि ने पृथक्-पृथक् तन्त्र बनाये ।

वक्तव्य—आयुर्वेद की परंपरा अनादि काल से चली आ रही हैं अतः इसे शाश्वत कहते हैं । इसलिये ब्रह्मा ने आयुर्वेद को उत्पन्न नहीं किया अपितु उसका स्मरण किया ।

ननु यदि तैस्तन्त्राणि पुनर्युगानुरूपसंदर्भैः संगृहीतानि तत्किमिदानीमनेन शास्त्रेण कृतेनेत्याह—

तेभ्योऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः ॥ ४ ॥
क्रियतेऽष्टाङ्गहृदयं नातिसंक्षेपविस्तरम् ।

स०—तेभ्य इति । तेभ्यो ग्रंथेभ्योऽतिविप्रकीर्णेभ्यो विक्षिप्तेभ्य उच्चावचोक्तार्थतयैवेतश्चेतश्च गतेभ्योऽत एव कश्चिदेवार्थः कस्मादेव तन्त्रान्तराज्ज्ञायते । यथा शल्यचिकित्सा सुश्रुतप्रणीतात्तंत्रादेवावगम्यते न तथाग्निवेशादिकात् । ऊर्ध्वाङ्गचिकित्सा च जनकप्रणीतात्तंत्राद्यथावगम्यते न तथा सुश्रुतप्रणीतात् । अतः प्रायो बाहुल्येन सारतरोच्चयः क्रियते । उच्चीयंते संगृह्यंते विक्षिप्ताः पदार्था अनेनेत्युच्चयः । यथा वा यवादीनां बहुक्षेत्रजातानामेकस्मिन् स्थाने उच्चयो विधीयते राशीकृत्य स्थापनं तथेह सारतराणामुच्चयः । सारतरग्रहणेनैतद् द्योतयति संग्रहेणैव साराणामुच्चयः कृतः । अनेन तथा सारतराणां प्रदेशानामुच्चयः क्रियत इति । किं नाम । अष्टाङ्गहृदयमेतच्च सान्वयार्थमस्य नाम । यथा शरीरस्य सर्वावयवेभ्यः प्रधानदेशो हि हृदयं तथेदमष्टाङ्गायुर्वेदस्य प्रधानभूतत्वाद्धृदयमिव हृदयम् । तथा च तन्त्रांते वक्ष्यति । हृदयमिव हृदयमेतदित्यादि । अष्टौ च तान्यंगान्यष्टांगानि तेषां प्रत्येकं हृदयं सारतरसंग्रहणात् । कीदृशमष्टांगहृदयम् । नातिसंक्षेपविस्तरम् । संक्षेपश्च विस्तरश्च संक्षेपविस्तरौ अतिशयेन संक्षेपविस्तरौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यत्र न तन्नातिसंक्षेपविस्तरम् । अतिशब्दस्यात्र प्रत्येकं संबंधः। अतिसंक्षेपं किंचित्तन्त्रं यथा सिद्धसारादि किंचिच्चातिविस्तरं यथा संग्रहादि। इदं तु तंत्रं नातिसंक्षेपविस्तरम् । अतिसंक्षेपोक्तं स्वल्पधियां नोपकृतये। तेषां हि यथोक्तागममात्रं श्रेयो न तु वाक्यार्थपर्यालोचनादधिकः परामर्शः। अतिविस्तीर्णं तु पाठावबोधानुष्ठानैस्तेषां दुःशक्यं स्यात् । तस्मादल्पमध्योत्कृष्टबुद्धिशिष्यहितार्थं तंत्रमेतदुद्दिष्टम् ।

वि०—अष्टांगहृदय की रचना का स्वरूप—अग्निवेश आदि के बनाये शास्त्र अतिशय विस्तृत एवं विषय बिखरे होनेके कारण उन तन्त्रों में से उत्तम सार भाग एकत्रित कर न अधिक विस्तृत, न अधिक संक्षिप्त अष्टाङ्गहृदय नामक ग्रन्थ की रचना की गई है।

वक्तव्य—अष्टांगहृदय में सब विषयों का एक साथ उचित रूप से व्याख्यान किया गया है। इसी से यह ग्रन्थ अष्टांग आयुर्वेद का हृदय कहा गया है, 'हृदयमिव हृदयमेतत् सर्वायुर्वेदवाङ्मयपयोधेः ॥'

कानि पुनस्तान्यष्टांगानीत्याह—

कायबालग्रहोर्ध्वांगशल्यदंष्ट्राजरावृषान् ।
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता ॥ ५ ॥

स०—कायेति। कायश्च बालश्च ग्रहश्चोर्ध्वाङ्गं च शल्यं च दंष्ट्रा च जरा च वृषश्चेतीतरेतरद्वन्द्वः। न सर्वस्याश्चिकित्सायाः कायाश्रितत्वात् कायशब्दोऽर्थादाक्षिप्त एव तत्किमर्थं कायशब्द उपादियते। ब्रूमः। प्रकर्षो यथाभिरूपाय कन्या देयेत्यत्राभिरूपग्रहणादभिरूपतमायेति प्रतिपाद्यते तथेहाऽपि प्रकृष्टो यः कायः सम्पूर्णधातुः प्रकृष्टा च यावस्था तया युक्तस्तत्संग्रहार्थः कायशब्द उपात्तः। तथा 'चिञ् चयने' इत्यस्माद्धातोर्व्युत्पादितः कायशब्दः। चीयते प्रशस्तदोषधातुमलैरिति कायः। तदेवं सर्वशरीरोपतापकानामामपक्वाशयस्थानोद्भावानां ज्वररक्तपित्तातिसारादीनां रोगाणां यत्रोपशमयोगो निगद्यते तत्कायचिकित्सानामांगम्। बालस्य त्वसंपूर्णधातुत्वाद् यौवनावस्थकायस्य प्रथमनिर्देशः। बालदेहेऽसंपूर्णबलधातुत्वादप्रकृष्टवयोऽवस्थाप्रभावात् तच्चिकित्सांगं पृथङ्निर्दिष्टम्। तथा बालौपयिकभेषजं धात्रीदुग्धलक्षणं दुग्धोद्भवव्याधिप्रशमादिनिर्देशाच्च। नन्वेवं वृद्धस्य प्रकृष्टवयोऽवस्थाया अभावात्तद्देहे कायचिकित्सेति कथं व्यपदेशः स्यात्। अत्र ब्रूमः। भूतपूर्वगत्या वृद्धदेहेन हि प्रकृष्टतयावस्था पूर्वमनुभूता। अतो भूतपूर्वगत्या तत्र कायचिकित्सोपदेशो युक्तः। एवं ग्रहचिकित्सा नाम—यत्र देवादिग्रहगृहीतानां प्राणिनां शांतिकर्म विधीयते। यत्रोर्ध्वजत्रुगतानां रोगाणां नेत्रकर्णघ्राणादिसंश्रितानामाश्चोतनशलाकादिनोपशमो वर्ण्यते तदूर्ध्वांगचिकित्सानामांगम्। अत्र च जन्मनः प्रभृति विचारोपदेशाद्बालचिकित्सैव प्राग्वक्तुं युक्ता। किंतु कायचिकित्सा प्राधान्यात्प्रागुपन्यस्ता। ततोऽनंतरं बालचिकित्सा। बालस्य च ग्रहसंबन्धाद् ग्रहचिकित्सा। ततः शरीरस्य मूलरक्षार्थमूर्ध्वांगचिकित्सा शालाक्यं नाम। ततः शस्त्रसाधनसामान्येन शल्यचिकित्सा। पीडाकरणसमानत्वात् दंष्ट्राचिकित्सा। दंष्ट्राविषात्मिका। विषेणाशु च मरणे संभाव्यमाने रसायनोपयोगो युक्त इति रसायनचिकित्सा। अथवा विषस्य रसायनजेयत्वाद्रसायनकथनप्रस्तावः। ततोऽनंतरं वाजीकरणस्य भरणेन प्रस्तावः। तथा चाधीते ग्रंथकृत्। "वाजीकरणमन्विच्छेत्सततं विषयी पुमान्" इति। रसायनस्य पश्चादित्यर्थः। यत्राल्पदुष्टरेतसां तदाप्यायनप्रसादोपजननरूपा चिकित्सा क्रियते तद्वाजीकरणम्। एवमेतानि कायादीनि तस्यायुर्वेदस्याष्टावंगान्याहुर्वदंति। ब्रह्माऽऽत्रेयादय इति शेषः। येषु कायादिषु चिकित्सा संश्रिता व्यवस्थिता। चतुर्णां भिषगादीनां शस्तानां धातुवैकृते। प्रवृत्तिर्धातुसाम्यार्था चिकित्सेयभिधीयते। इति मुनिप्रोक्तलक्षणं नेह तंत्रकृद्व्यधत्त। चिकित्साशब्दादेवार्थस्य लब्धत्वात्। तथा च निर्देष्टुमाह। निंदाक्षमाव्याधिप्रतीकारविचारणासु सा निष्पद्यत इति। कितेर्धातोर्व्याधिप्रतीकार एवास्य व्युत्पादितत्वात् ॥ ५ ॥

वि०—आयुर्वेद के आठ अङ्ग—कायचिकित्सा, बाल (कौमारभृत्य), ग्रह (भूतविद्या), ऊर्ध्वाङ्ग (शालाक्य), शल्य, दंष्ट्रा (अगदतन्त्र), जरा (रसायन); वृष (वाजीकरण); आयुर्वेद के ये आठ अङ्ग हैं; इन आठ अङ्गों में सम्पूर्ण चिकित्सा का समावेश होता है ॥ ५ ॥

वक्तव्य-कायचिकित्सा—काय से अभिप्राय सम्पूर्ण शरीर का है; इसकी चिकित्सा कायचिकित्सा है। प्रायः रसादि संपूर्ण शरीर में फैले हैं; इनके दोष से ही ज्वर, रक्तपित्त

---

१. शल्यं, शालाक्यं, कायचिकित्सा, भूतविद्या, कौमारभृत्यम्, अगदतन्त्रं, रसायनतन्त्रं, वाजीकरणतन्त्रमिति।

(१) तत्र शल्यं नाम—विविधतृणकाष्ठपाषाणपांशुलोहलोष्ठास्थिबालनखपूयास्रावदुष्टव्रणान्तर्गर्भशल्योद्धरणार्थं, यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थं च।

(२) शालाक्यं नाम—ऊर्ध्वं जत्रुगतानां श्रवणनयनवदनघ्राणादिसंश्रितानां व्याधीनामुपशमनार्थम्।

(३) कायचिकित्सा नाम—सर्वाङ्गसंश्रितानां व्याधीनां ज्वररक्तपित्तशोषोन्मादापस्मारकुष्ठमेहातिसारादीनामुपशमनार्थम्।

(४) भूतविद्या नाम—देवासुरगन्धर्वयक्षरक्षः पितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्म बलिहरणादि-ग्रहोपशमनार्थम्।

(५) कौमारभृत्यं नाम—कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं, दुष्टस्तन्यग्रहसमुत्थानां च व्याधीनामुपशमनार्थम्।

(६) अगदतन्त्रं नाम—सर्पकीटलूतामूषिकादिदष्टविषव्यञ्जनार्थं, विविधविषसंयोगोपशमनार्थं च।

(७) रसायनतन्त्रं माम—वयः स्थापनमायुर्मेधाबलकरं रोगापहरणसामर्थ्यं च।

(८) वाजीकरणतन्त्रं नाम—अल्पदुष्टक्षीणविशुष्करेतसामाप्यायनप्रसादोपचयजननिमित्तं प्रहर्षजननार्थं च ॥ ६ ॥

(—सुश्रुत, सू० १।४-१२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदि सब विकार होते हैं। अथवा काय शब्द का अर्थ अग्नि है—इसकी जिसमें चिकित्सा है, वह कायचिकित्सा है। कौमारभृत्य—बालकों का धारण-पोषण जिस शास्त्र में हो। भूतविद्या—जिसमें दैवव्यपाश्रय चिकित्सा का वर्णन है; शालाक्य—इस चिकित्सा में मुख्यतः चिकित्सा शलाका से की जाती है; अथवा गले से ऊपर के सब अवयवों में आँख मुख्य है—आँख के नष्ट होने से मनुष्य के लिये दिन और रात में कोई अन्तर नहीं रहता उसके लिये सब अन्धेरा होता है, और आँख के रोग सबसे अधिक हैं, उन रोगों में शलाका का उपयोग होता है—इसीलिये कहा है 'शलाका पटलवेधनी, तस्याः कर्म शालाक्यम्'। शल्यचिकित्सा—का अर्थ शल्य से सम्बन्धित चिकित्सा से है; शल का अर्थ हिंसा करना है; उससे सम्बन्धित शास्त्र शल्यशास्त्र है। दंष्ट्राचिकित्सा—से अभिप्राय विषचिकित्सा से है। जराचिकित्सा—से अभिप्राय रसायन से है; रसायन का अपना लाभ-'लाभोपायो हि शस्तानां रसादीनां रसायनम्।'-अर्थात् प्रशस्त रस आदि धातुओं के लाभ का उपाय ही रसायन है; शरीर के रस आदि धातु उत्तम रहे तो जरा बुढ़ापा नहीं आती। वृषचिकित्सा—से अभिप्राय वाजीकरण से है। वाज का अर्थ शुक्र है, वह जिसमें रहता है, वह वाजी है; और जिस चिकित्सा से अवाजी (शुक्ररहित) को वाजी (शुक्रवाला) किया जाता है; वह वाजीकरण है।

कायस्य दोषधातुमलसमुदायत्वात्तानेव दोषादीन् निर्दिदिक्षुराह—

वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः ॥ ६ ॥

स०—वायुरिति। चः समुच्चये। कफो दोषमध्ये समुच्चीयते। इत्यनेन प्रकारेण समासतः संक्षेपात् त्रयो दोषाः। ननु प्रस्तुतत्वादिह धातुसंज्ञया वातादयो निर्देष्टुं न्याय्या न दोषसंज्ञया। अस्त्येवैतत् किंतु रसादिदूषणपूर्वकमेषां विकारकरणे सामर्थ्यमिति प्रदर्शनार्थं दोषसंज्ञया ते निर्दिष्टा न धातुसंज्ञया। नह्येते धातुरूपा जातु विरुद्धत्वं कुर्वते देहधारणवर्धकत्वात्। एते मुनिनापि चरकेण पूर्वं दोषसंज्ञयैव निर्दिष्टाः। तथा च यद्ग्रंथः। वायुः पित्तं कफश्चोक्तः शरीरे दोषसंग्रह इति। वातपित्तकफा दोषास्त्रय एव समासत इत्येवं निर्देशे कर्तव्ये यदेषां पृथग्विभक्त्या निर्देशः कृतः स प्रधानत्वख्यापनार्थः। बहुवचनादेव त्रित्वे लब्धे त्रिग्रहणं नियमार्थम्। त्रय एव दोषा न चतुर्थोऽस्तीति। तंत्रांतरीया हि चतुर्थं दोषमीहंते। तेषां ह्ययमभिप्रायः। यथा दोषाणां स्थानलक्षणकार्यविकारचिकित्साद्युपदेशस्तथा रक्तस्यापि। तत्र स्थानं सर्वदेहव्यापित्वेऽपि प्लीहयकृती। लक्षणं च पद्मेंद्रगोपहेमादीत्यादि। कार्यं देहस्योत्पत्तिस्थिती। विकारो विसर्पप्लीहादि। चिकित्सा सिराव्यधादिकं कर्मेति। तदेतदसारम्। वातादयो ह्यस्य सतः कथं दोषत्वं कर्तुं पारयंति। यतः प्राधान्यादन्वर्थनामत्वाच्च वातादीनामेव दोषत्वं न रसादीनाम्। वातादयो हि स्वातंत्र्यात्प्रधानाः। दूषयंतीति दोषा इति तेषामेव चानुगतार्था संज्ञा प्रवृत्ता। रसाद्यास्तु पारतंत्र्यादप्रधानाः। ते च वातादिभिर्दूष्यंत इति दूष्याः। तस्माद्रक्तस्य दूष्यत्वं न दोषत्वम्। यद्येवं वातादीनामन्योन्यदूषणाद्दूष्यत्वं स्यात्। पित्तेन हि श्लेष्मा दूष्यत इति दृश्यते। यथा पांडुरोगनिदाने। पित्तप्रधाना इत्यारभ्य यावत् श्लेष्मत्वग्रक्तमांसानि प्रदूष्येत्यादि। तदत्र श्लेष्मा पित्तेन दूष्यते तथा श्लेष्मवद्रक्तस्याऽपि दोषत्वप्रसंग इति यो मन्येत तं प्रति ब्रूमः। विषम उपन्यासः। वातादयो हि सर्वदैव रसादीन् दूषयंति नतु रसादयः कदाचिदपि वातादीन् दूषयंति। वातादीनां तु मध्याद्यदि कश्चिद्दूष्यति स तेषामन्यतमेन। तथा च प्रकृतिलक्षणे वातप्रकृतेः पित्तप्रकृतेश्च यथा लक्षणं दृश्यते नैवं रक्तप्रकृतेः। तथा च तंत्रकारेण ज्वरादयो वातादिविशेषणविशिष्टा एवोक्ताः। यथा वातज्वरोऽयं पित्तज्वरोऽयं श्लेष्मज्वरोऽयम्। न तु रक्तज्वरोऽयमिति निर्दिष्टः। येऽपि रक्तजा विकारा विसर्पादयस्तेष्वपि घृतदग्धन्यायेन व्यपदेशो बोध्यः। यथा घृतस्यांतर्हितेनाग्निना दग्धो घृतदग्ध इत्युच्यते तद्वद्रक्तस्थैर्वातादिभिर्दोषैर्जातो रक्तजोऽयमित्युच्यते। यत्र क्वचिद्रक्तस्य दोषसंज्ञाकुष्ठचिकित्सितादौ दृश्यते सा संज्ञामात्रेणैव नासावनुगतार्था। तस्य दूष्यत्वेनैव प्रवृत्तिः। तथा चैवं पुरीषादीनामपि संज्ञामात्रेण व्यवहारो दृश्यते। यथा न घृतं बहुदोषाय देयं यन्न विरेचनं तेन दोषायेत्यादि। अत्र पुरीषस्य दोषत्वमुक्तम्। तथोदरचिकित्सिते चरकस्य ज्वरचिकित्सिते वा अस्य। दोषेण भस्मनेवाग्नौ छन्नेऽन्नं न विपच्यते। तस्मादादोषपचनाज्ज्वरितानुपवासयेदिति। तदेवं वातादयस्त्रय एव दोषा न रक्तमिति स्थिरमेतत्समासतो विस्तरतस्तु संसर्गसन्निपातक्षयसमतादिभेदभिन्नास्तारतम्यपरिकल्पनया च कल्प्यमाना आनंत्यं यांति ॥ ६ ॥

वि०—संक्षेप में तीन दोष हैं-वायु, पित्त और कफ ॥६॥

वक्तव्य—ये वायु-पित्त-कफ शरीर को दूषित करते हैं इसीलिये दोष कहलाते हैं। रोगों के कारण दो प्रकार के हैं—अन्तरङ्ग और बहिरङ्ग। इनमें अन्तरङ्ग कारण दोष और दूष्य के भेद से अर्थात् दूषित करने वाला और दूषित होने वाला-इस भेद से फिर दो प्रकार का है। इसमें दूषित करने वाला कारण-अर्थात् दोष संक्षिप्त रूप में वायु-पित्त-कफ भेद से तीन प्रकार का है। विस्तार रूप में वायु-प्राणादि भेद से; पित्त-भ्राजक आदि भेद से; कफ-आश्लेषक आदि भेद से अनेक प्रकार का है।

वायु—'वा' गतिगन्धनयोः-इस धातु से बनता है; शरीर में जिससे गति मिलती है, उसका नाम वायु है। पित्त शब्द-'तप' सन्तापे' धातु से बने है; शरीर में जिससे उष्णता होती है, वह पित्त है। कफ शब्द का पर्याय श्लेष्मा है—जो 'श्लिष'-आलिङ्गने' धातु से बनता है; अर्थात् जो एक परमाणु को दूसरे परमाणु से शरीर में चिपटाये रखता है।

विकृताऽविकृता देहं घ्नन्ति ते वर्त्तयन्ति च।
ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः ॥ ७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—विकृताः स्वभावप्रच्युता देहं घ्नंति। देहपदमत्र जीवितोपलक्षणार्थम्। जीवितेन विना कुर्वंतीत्यर्थः। अविकृता पुनर्देहं वर्तयंति प्रापयंति। विकृतानां दोषाणां प्रागुपन्यासस्तेषां प्रागुपन्यासस्तेषां प्रकृत्यवस्थाने नित्यं भिषजा यत्नवता भाव्यमिति सूचनार्थम्। अन्यथा महान्प्रत्यवायः स्यात्।

इदानीमेषां व्यापिनामपि विशिष्टस्थानं विवक्षुराह—

अधश्च मध्यश्चोर्ध्वं चाधोमध्योर्ध्वानि तानि संश्रय आश्रयो येषां तेऽधोमध्योर्ध्वसंश्रयाः। हृच्च नाभिश्च हृन्नाभी तयोर्हृन्नाभ्योस्ते वातादयो व्यापिनोऽपि सर्वशरीरचरा अपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः। विशेषेणेति वाक्यशेषः। किमिदं वाक्यशेषत्वं नाम। उच्यते। यस्मिन् खलुपदेऽनुच्चार्यमाणेऽर्थगतिं पश्यंत्याचार्यास्तच्छेषमित्युच्चारणकाले तेन विनाऽभिधेयसिद्धेर्व्याख्याकाले तु मंदबुद्धिव्युत्पत्तये व्याचक्षते। तत्र नाभेरधो वायोः स्थानम्। हृन्नाभ्योर्मध्ये पित्तस्य। हृदयादूर्ध्वं कफस्य। ननु हृन्नाभ्योरिति कथं निर्देशो यावता प्राण्यंगत्वादेकवद्भावे सनपुंसकमिति नपुंसकत्वे हृन्नाभि इति प्राप्नोति। अत्र ब्रूमः। प्राण्यंगानां समाहार एव द्वंद्व इत्यस्य प्रायिकत्वान्नैकवद्भावस्तदभावाच्च तदाश्रयं नपुंसकत्वं न भवति। तथा चोक्तम्। सर्वत्र द्वंद्वो विभाषयैकवद्भवतीति। दृश्यते चाऽन्यत्रापि। यथा च रुद्रभट्टः। कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते इत्यादि। तथाऽस्यैव ग्रंथकृतः शिरःपृष्ठोरसां भूमिरिति। तथा जानुजंघोरुकट्यंसहस्तपादांगसंधिषु। तथा वायुसंध्यस्थिमज्जस्वित्यादि। तस्माद्धृन्नाभ्योरिति प्रयोगो न्याय्य एव ॥ ७ ॥

वि०—ये वात-पित्त-कफ यदि विकृत हो जायें तो शरीर का नाश करते हैं, और यदि ये अविकृत रहें हो शरीर को टिकाये रखते हैं। ये तीनों यद्यपि सारे शरीर में व्याप्त हैं, तथापि मुख्यतः हृदय एवं नाभि के निचले भाग में वायु का, हृदय और नाभि के मध्य भाग में पित्त का और हृदय एवं नाभि के ऊपर के भाग में कफ का स्थान है ॥ ७ ॥

वक्तव्य—वात-पित्त कफ-सम्पूर्ण शरीर में व्याप्त हैं; यथा-'न हि वातं शिराः काश्चिद्, न पित्तं केवलं तथा। श्लेष्माणं वा वहन्त्येता अतः सर्ववहाः स्मृताः ॥' (सु. शा. अ. ७।१६) इसी प्रकार चरक में 'सर्वशरीरचरास्तु वातपित्तश्लेष्माणः सर्वस्मिञ्छरीरे कुपिताऽकुपिताः शुभाशुभानि कुर्वन्ति'। सारे शरीर में व्याप्त होने पर भी इनका स्थान-विभाग शरीर में है-यथा-'तेषां त्रयाणामपि दोषाणां शरीरे स्थानविभागा उपदेक्ष्यन्ते, तद्यथा-बस्तिः, पुरीषाधानं, कटिः, सक्थिनी, पादावस्थीनि, पक्वाशयश्च वातस्थानानि, तत्रापि पक्वाशयो विशेषेण वातस्थानम्। स्वेदो रसो लसीका रुधिरमामाशयश्च पित्तस्थानानि; तत्राप्यामाशयो विशेषेण पित्तस्थानम्। उरः शिरो ग्रीवा पर्वाण्यामाशयो मेदश्च श्लेष्मस्थानानि; तत्राप्युरो विशेषेण श्लेष्मस्थानम् ॥' (चरक० सू० अ० २०।८।)

इन वायु-पित्त-कफ की उपमा वायु, सूर्य और चन्द्र से दी गयी है; जिस प्रकार वायु, सूर्य और चन्द्र इस संसार को धारण कर रहे हैं, उसी प्रकार ये वातादि शरीर को धारण करते हैं; और जिस प्रकार वायु सूर्य एवं चन्द्र की विषम गति से अशुभ होता है; वैसे ही इन वातादि के विकृत होने से शरीर में विकार होता है; इसी से कहा है—'विसर्गादानविक्षेपैः सोमसूर्यानिला यथा। धारयन्ति जगद्देहं कफपित्तानिलास्तथा ॥' सुश्रुत में कहा है—'वातपित्तश्लेष्माण एव देहसम्भवहेतवः। तैरेवाव्यापन्नैरधोमध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यतेऽगारमिव स्थूणाभिस्तिसृभिः, अतश्च त्रिस्थूणमाहुरेके। त एव च व्यापन्नाः प्रलयहेतवः ॥' (सु. सू. अ. २१।३।)

अप्येषां सकलकालव्यापिनामपि नियतकालत्वं दर्शयन्नाह—

वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात्।

स०—वयश्चाऽहश्च रात्रिश्च भुक्तं च वयोऽहोरात्रिभुक्तानि तेषां क्रमाद्यथासंख्यं ते वातादयोऽन्तमध्यादिगा भवंति। अंतश्च मध्यश्चादिश्चांतमध्यादयस्तेषु गच्छंतीत्यंतमध्यादिगाः। अन्यत्रापि दृश्यत इति डः। तेनायमर्थो वयसः मनुष्यायुषोऽन्तः पश्चिमो भागो वायोः कोपकालः। मध्यो भागः पित्तस्य। आद्यो भागः कफस्यैवमह्नो रात्रेश्च योज्यम्। भुक्तमाहारस्तस्यांते जठराग्निसंयोगवशाद्रसानां जीर्णप्रायावस्था वायोः कोपकालः। मध्यो विदाहावस्था पित्तस्य। आद्यावस्था तु यस्यां मधुरीभाव आहारस्य तत्र कफस्य कोपकालः। यद्यपि चाहारस्य जठराग्निसंयोगवशाद्बह्व्योऽपि सूक्ष्मा अवस्थाः संभाव्यंते तथाप्येतासामेव सुतरामुपयोगित्वादिह निर्देशः। तथा हि। एता एव तिस्रोऽवस्थाः स्वकर्म दर्शयंति। वक्ष्यति हि। आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत्। फेनीभूतं कफं यातं विदाहादम्लतां ततः। पित्तमामाशयात्कुर्याच्च्यवमानं च्युतं पुनः। अग्निना शोषितं पक्वं पिंडितं कटुमारुतमिति।

वि०—आयु, दिन, रात और भोजन इनके अन्त में वायु और मध्य में पित्त तथा आदि में कफ होता है।

वक्तव्य—वय का अर्थ आयु है; आयु की वृद्धावस्था में वायु की अधिकता रहती है; युवावस्था में पित्त की और बाल्यावस्था में कफ की अधिकता रहती है; इसी प्रकार दिन के अन्त भाग में (सायंकाल) वायु की, मध्याह्न में पित्त की और प्रातःकाल में कफ की प्रधानता है। रात्रि के पश्चिम काल में वायु की, मध्य रात्रि में पित्त की और प्रारम्भ काल में कफ की प्रचुरता रहती है। भोजन के जीर्ण हो जाने पर वायु की; भोजन की पच्यमानावस्था में पित्त की और भोजन के पश्चात् तुरन्त कफ की अधिता रहती है।

अधुनाऽग्निस्वरूपं प्रस्तौति—

तैर्भवेद्विषमस्तीक्ष्णो मन्दश्चाग्निः समैः समः ॥ ८ ॥

स०—तैश्च वातादिभिः पुंसो यथाक्रमेणाग्निर्विषमस्तीक्ष्णो मन्दश्च भवेत्। वातादयश्च समुदिता एव शरीरजनने समर्था इत्यवश्यं सर्वैरेव भवितव्यम्। इह तु य एकस्य व्यपदेश-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तत्रोत्कर्षो द्रष्टव्यः। वातोत्कर्षेण विषमः पित्तोत्कर्षेण तीक्ष्णः कफोत्कर्षेण मंद इति। समैर्हान्युत्कर्षवर्जितैः समः। लक्षणमेषामंगविभागे शारीरे वक्ष्यति। यः पचेत्सम्यगेवान्नमित्यारभ्य यावच्चिरात्पचेदिति। यत्र तु द्वयोर्दोषयोरुत्कर्षस्तत्र सद्वैद्येन स्वधिया कल्प्यम्। यथा वातपित्तयोरुत्कर्षे वायोर्योगवाहित्वात्तीक्ष्णः। एवं वातकफयोरुत्कर्षे मंदः। कफपित्तयोस्तूत्कर्षे आहारविशेषवशात्कदाचित्तीक्ष्णः कदाचिन्मंद इति ॥ ८ ॥

वि०—दोषों का अग्नि से सम्बन्ध—वात के कारण अग्नि विषम, पित्त के कारण तीक्ष्ण और कफ के कारण मन्द होती है। वात-पित्त-कफ के सम होने से अग्नि भी सम होती है ॥८॥

वक्तव्य—अग्नि का रूप सुश्रुत में कहा है—'जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः। सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥' उसी से गीता में कहा है—'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥' इस अग्नि को प्रदीप्त करने वाला और बुझाने वाला वायु ही है। वायु के अपने स्वभाव एवं क्रिया के चंचल, अस्थिर और विषम होने से अग्नि भी चंचल, अस्थिर और विषम रहती है; अर्थात् कभी तो अन्न भली प्रकार पचता है, और कभी नहीं पचता; कभी भूख खूब लगती है, और कभी नहीं लगती। इसीसे कहा है—'यः कदाचित् सम्यक् पचति; कादिदाध्मानशूलोदावर्त्तातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा पचति-सविषमः।' (सु. सू. अ. ३५।२४) यह विषम अग्नि वायु से होती है—'यथा-वातलानां तु वाताभिभूतेऽग्न्यधिष्ठाने विषमा भवन्त्यग्नयः ॥' चरकः वि. अ. ६।१२। इस विषम अग्नि से रोग भी वातजन्य ही होते हैं और इस की चिकित्सा भी वातनाशक उपायों से होती है; यथा—विषमें स्निग्धाम्ललवणैः क्रियाविशेषैः प्रतिकुर्वीत।' जिस प्रकार चूल्हे में जलती अग्नि को यदि वायु लग रही हो तो कभी तो अग्नि चूल्हे में जलती है और कभी बाहर जलती है, इससे कभी तो पाक होता है और कभी नहीं होता।

तीक्ष्णाग्नि—पित्त के कारण होती है; क्योंकि पित्त स्वयं अग्नि है; जैसा कि—'न खलु पित्तव्यतिरिक्तोऽग्निरुपलभ्यते; आग्नेयत्वात्, पित्ते दहनपचनादिष्वभिप्रवर्त्तमानेऽग्निवदुपाचारः क्रियते; अन्तरग्निरिति। क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगात्।' (सु. सू. अ. २१।९)। पित्तलानां तु पित्ताभिभूते ह्यग्न्यधिष्ठाने तीक्ष्णा भवन्त्यग्नयः। चरकः (वि० अ० ६।१२।) जिनमें अग्नि कम होती है; उनमें अग्नि वर्धक औषध देकर अग्नि-पित्त को बढ़ाते हैं; और जिनमें पित्त की अधिकता होती है; उनमें अग्नि को कम करने वाले साधनों से पित्त को कम किया जाता है; उदाहरणार्थ-जैसे चूल्हे में यदि आग तेज हो गई हो तो अग्नि को बाहर खींचकर या वहीं पर ठण्ढा पानी डालकर उसको कम किया जाता है: इसी प्रकार पित्त को कम करने के लिये विरेचन या शीत उपचार करते हैं।

इसी से सुश्रुत में कहा है—'तीक्ष्णे मधुरस्निग्धशीतैर्विरेकैश्च (प्रतिकुर्वीत); एवमेवात्यग्नौ ॥' (सु. सू. अ. ३३।२६)

मन्दाग्नि—कफ के कारण होती है; क्योंकि कफ स्वयं मन्द तथा अग्नि के विपरीत है; इसी से कहा है—'श्लेष्मा मधुरशीतलः' (सु. सू. अ. २१।१३।) इस के कारण थोड़ा भोजन भी देर में पचता है; यथा-यस्त्वल्पमप्युपयुक्तमुदर-शिरोगौरवं कासश्वासप्रसेकच्छर्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः ॥' इसीसे चरक में कहा है = 'श्लेष्मलानां तु श्लेष्माभिभूतेऽग्न्यधिष्ठाने मन्दा भवन्त्यग्नयः (चरक. वि. अ. ६।१२।) जिस प्रकार राख या भस्म से ढँपी अग्नि अन्न का जल्दी परिपाक नहीं करती, उसी प्रकार कफ से आवृत्त अग्नि भोजन को नहीं पचाती। जिस प्रकार राख को हटाने के लिये वायु की जरूरत होती है; उसी प्रकार अग्नि को प्रदीप्त करने के लिये वायुवर्धक कटु तिक्त-कषाय रसों का उपयोग अग्नि को बढ़ाने के लिये किया जाता है; इसी से कहा है—'मन्दे कटु-तिक्त-कषायैर्वमनैश्च प्रतिकुर्वीत ॥'

समाग्नि—वात, पित्त और कफ के समान होने से अग्नि भी समान होती है; यथा—'तत्र समवातपित्तश्लेष्मणां प्रकृतिस्थानां समा भवन्त्यग्नयः' ॥ चरक। अर्थात् यदि चूल्हे में जलती हुई आग पर वायु का असर ठीक हो रहा हो और उसके ऊपर राख आदि नहीं पड़ी हो और आग तेज भी नहीं हो; तो भोजन ठीक समय पर भलीभाँति पक जायेगा और जलेगा भी नहीं। इसी प्रकार शरीर में यदि वात-पित्त-कफ समान हैं, तो अग्नि भी समान रहती है। इसी से संग्रह में कहा है 'यामैश्चतुर्भिर्द्वाभ्यां च भोज्यभैषज्ययोः समे। पाकोऽग्नौ, युक्तयोर्द्राक्च तीक्ष्णे मन्दे पुनश्चिरात् ॥" अर्थात् समाग्नि भोजन और औषध का परिपाक क्रमशः चार और दो याम में करती है; तीक्ष्ण अग्नि उससे भी जल्दी और मन्दाग्नि और भी देर में पाक करती है, विषय अग्नि कभी करती है और कभी पाक नहीं करती। इसी से सुश्रुत ने कहा है—'यो यथा-कालमुपयुक्तमन्नं सम्यक् पचति स समः समैर्दोषैः ॥' (सु. सू. अ. ३५।२१४।)

अग्निचातुर्विध्यमुक्त्वा तदाश्रयस्य कोष्ठस्य चातुर्विध्यं विवक्षुराह—

कोष्ठः क्रूरो मृदुमध्यो मध्यः स्यात्तैः समैरपि।

स०—तैर्वातादिभिर्यथाक्रमं क्रूरमृदुमध्यलक्षणः कोष्ठो भवति। वातोत्कर्षेण क्रूरः। पित्तोत्कर्षेण मृदुः। कफोत्कर्षेण मध्यः। समैः पुनरेतैर्हान्युत्कर्षवर्जितैर्मध्य एव कोष्ठः। क्रूरादीनां तु लक्षणं वमनविरेचनविधौ वक्ष्यति। ननु समैर्वातादिभिः कथं मध्यकोष्ठता स्यादिति। ब्रूमः। समानां वातादीनां मध्ये द्वयोर्वातपित्तयोः स्वं स्वं क्रूरकोष्ठत्वमृदुकोष्ठत्वलक्षणाख्यं च विरुद्धं कर्म युगपत्कर्तुं न घटते। तृतीयस्तु सम एव कफः सोऽनयोर्मध्ये मध्यमां वृत्तिमाश्रित्य स्थितो नैकेनापि सह विरुध्यते। अतएव तत्कार्यं मध्यकोष्ठतालक्षणं ते वातपित्ते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निषेद्धुं नैव घटेते। एवं च तेनावश्यमात्मीयं मध्यकोष्ठतालक्षणं कर्म कर्तव्यं यतो वातकर्मणः क्रूरकोष्ठतालक्षणस्य पित्तकर्मणो मृदुकोष्ठतालक्षणस्य च विरुद्धत्वात्। अतो मध्यकोष्ठतैव समैर्वातादिभिर्न्याय्या। इयांस्तु विशेषः। पूर्वो यो मध्यकोष्ठः सोऽवश्यं प्रमाणाधिकेन कफेन जन्यते। मध्यः स्यात्तैः समैरपीति समग्रहणलिंगात्। इतरस्तु मध्यकोष्ठः समदोषमध्यस्थितेन समेनैव स्वप्रमाणस्थितेन श्लेष्मणा भवतीत्यनया रीत्या हेतुभेदादन्यत्वम्। तथा मध्यकोष्ठयोर्लक्षणभेदोऽपि दृश्यते। यथा। श्लेष्माधिकश्छर्द्यते हि दुःखं विरिच्यते मंदकफस्तु सम्यगिति। तदयमत्रार्थः। श्लेष्माधिके मध्यकोष्ठे न सम्यग् विरेचित्वं समकफे तु मध्यकोष्ठे सुविरेचित्वमिति।

वि०—कोष्ठ—वायु के कारण मनुष्य का कोष्ठ क्रूर होता है; पित्त के कारण मृदु और कफ के कारण मध्यम होता है। वात—पित्त–कफ की समानता से भी मध्यम कोष्ठ होता है।

वक्तव्य—सुश्रुत में मृदु, मध्यम और क्रूर तीन कोष्ठ बताये हैं, यथा—'तत्र मृदुः, क्रूरो मध्यम इति त्रिविधः कोष्ठो भवति। तत्र बहुपित्तो मृदुः, स दुग्धेनापि विरेच्यते, बहुवातश्लेष्मा क्रूरः स दुर्विरेच्यः; समदोषो मध्यमः, स साधारणः।' इसमें कफ को योगवाही माना है, यथा–'वातोल्बणा स्याद् ग्रहणी, क्रूरकोष्ठस्य देहिनः। पित्तला मृदुकोष्ठस्य योगवाही तयोः कफः॥ वात-कफ से क्रूर; वात-पित्त या कफ-पित्त अथवा वात-पित्त-कफ से मृदु कोष्ठ होता है। सुश्रुत ने वात-कफ की अधिकता से जो क्रूरकोष्ठ कहा है वह संसर्गपरक है; ऐसा हेमाद्रि का मत है।

इदानीं प्रकृतिस्वरूपं प्रस्तौति—

शुक्रार्त्तवस्थैर्जन्मादौ विषेणेव विषक्रिमेः॥ ९॥
तैश्च तिस्रः प्रकृतयो हीनमध्योत्तमाः पृथक्।
समधातुः समस्तासु श्रेष्ठा, निन्द्या द्विदोषजाः॥ १०॥

स०—तैश्च वातादिभिस्तिस्रः प्रकृतयः पृथग्भवेयुर्हीनमध्योत्तमाः। प्रकृतिः शरीरस्वरूपम् शुक्रार्तवस्थैरिति शुक्रं पितुर्द्वित्रिर्बिन्दुकावस्थं रेतः। ऋतौ भवमार्तवं मातुर्द्वित्रिबिंदुकावस्थं शोणितम्। शुक्रं चार्तवं च तत्र तिष्ठन्तीति शुक्रार्तवस्थास्तैस्तथाविधैर्जन्मादौ गर्भाधानकाले जन्मप्रारंभे गर्भादावित्यर्थः। ननु च यदा वातादयोऽधिकाः शुक्रार्तवे तिष्ठंति तदा कुतः शरीरस्य निष्पत्तिर्भवतीति। ततश्च यो दोषाणामधिको भावः सैव विकृतिः। तत्कथं दोषा आधिक्यं प्राप्ताः प्रकृतेः कारणतामुत्संहते। विकृतत्वान्न हि विकृतिः कदाचित्प्रकृतेः कारणमिति वक्तुं युज्यते। कारणसदृशेन च कार्येण भवितव्यमित्याशंक्य सपरिहारं दृष्टान्तमाह। विषेणेव विषक्रिमेरिति। यथा विषेण जीवितनाशहेतुनास्य विषक्रिमेर्जन्म प्रकृतिसंभवो दृश्यते। तथा एतैर्दूषणस्वभावैरपि हि प्रमाणाधिकैर्दोषैः शुक्रार्तवस्थैरेव जन्मादौ शरीरस्य निष्पत्तिर्भवतीति। वातोत्कर्षेण हीना। पित्तोत्कर्षेण मध्यमा। कफोत्कर्षेणोत्तमा। सर्वासु प्रकृतिषु मध्ये या समधातुः प्रकृतिः सा समा श्रेष्ठोत्तमा चतुर्थी। समा धातवो यस्याः। धातुशब्दो दोषपर्यायः। धारणाद्धातव इति वचनात्। या मिश्रदोषजास्तिस्रः प्रकृतयस्ता निंद्या गर्हणीयाः अनारोग्यास्पदत्वात्। वातपित्तजा वातश्लेष्मजा पित्तश्लेष्मजा इति॥ ९–१०॥

वि०—प्रकृति का वर्णन—जिस प्रकार विष से विषकृमि उत्पन्न हो जाता है; उसी प्रकार जन्म के समय में शुक्र और आर्त्तव में स्थित-वात-पित्त-कफ से मनुष्यों की तीन प्रकृतियाँ बन जाती हैं। ये प्रकृतियाँ वायु के कारण हीन, पित्त के कारण मध्यम और कफ के कारण से उत्तम होती हैं। और जब वात-पित्त-कफ ये तीनों धातु समान होते हैं; तो सम प्रकृति होती है, यह इन-सब में श्रेष्ठ है। दो दोषों के संसर्ग से बनी अर्थात् वात-कफ, वात-पित्त; और पित्त-कफ-जन्य प्रकृतियाँ निन्दित होती हैं॥ ९–१०॥

वक्तव्य—जिस प्रकार विष के मारक होने पर उससे भी कृमि उत्पन्न हो सकता है; इसी प्रकार दूषित वातादि रोगोत्पत्ति करते हुए भी प्रकृति को बना सकते हैं। यह प्रकृति पिता के शुक्र तथा माता के आर्त्तव (बीज) के कारण बनती है। जैसा कि कहा है—'शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः। प्रकृतिर्जायते तेन॥' (सु. शा. अ. ४।६३)। इनमें कफ के सात्त्विक होने से उत्तम वायु के कारण हीन और पित्त से मध्यम प्रकृति होती है। इनमें समधातु समप्रकृति श्रेष्ठ है, जैसा कि चरक में कहा है—'समवातपित्तश्लेष्माणं ह्यरोगमिच्छन्ति भिषजः। यतः प्रकृतिश्चारोग्यम्, आरोग्यार्था च भेषजप्रवृत्तिः सा चेष्टरूपा, तस्मात् सन्ति समवातपित्तश्लेष्माणः॥' (चरक वि. अ. ६।१३)।

प्रकृति शब्द यहाँ पर जन्मजात स्वभाव को बताने के लिये हैं; वास्तव में यह प्रकृति शब्द वाञ्छित स्वभाव के अर्थ में नहीं है, इससे चरक में कहा है 'न खलु सन्ति वातप्रकृतयः, पित्तप्रकृतयः, श्लेष्मप्रकृतयो वा। तस्य तस्य किल दोषस्याधिक्यात् सा सा दोषप्रकृतिरुच्यते मनुष्याणां, न च विकृतेषु दोषेषु प्रकृतिस्थमुत्पद्यते तस्मान्नैताः प्रकृतयः सन्ति; सन्ति तु खलु वातलाःपित्तलाःश्लेष्मलाश्च; अप्रकृतिस्थास्तु ते ज्ञेयाः॥' (चरक वि. अ. ६।१३)

इनमें भी जो मिश्रप्रकृतियाँ हैं, वे अनारोग्य होने से गर्हित हैं। प्रकृतियाँ मनुष्यों को हानि तो नहीं पहुँचाती, परन्तु वातप्रकृति को वातजन्य, पित्तप्रकृति को पित्तजन्य, और कफप्रकृति को कफजन्य रोग विशेषरूप में और प्रायः होते हैं। इसी से चरक में कहा है–'वातलाद्याः सदाऽऽतुराः।' मानस प्रकृतियों को सात्त्विक या महाप्रकृति कहते हैं।

कई आचार्य प्रकृति को पाञ्चभौतिक अर्थात् पञ्चभूतों से बनी मानते हैं। उनकी दृष्टि से प्रकृति—पार्थिव, आप्य, तैजस,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायव्य और आकाशीय इस प्रकार से है। जैसा कि सुश्रुत में कहा है-'प्रकृतिमिह नराणां भौतिकीं केचिदाहुः; पवन-दहन तोयैः कीर्त्तितास्तास्तु तिस्रः। स्थिरविपुलशरीरः पार्थिवश्च क्षमावान्। शुचिरथ चिरजीवी नाभसः खैः महद्भिः॥' (सु. शा. अ. ४।८०)

सब मिलकर सात दोषज प्रकृतियाँ होती हैं—यथा-'सप्त प्रकृतयो भवन्ति दोषैः पृथग्, द्विशः, समस्तैश्च।' इन प्रकृतियों में केवल शुक्र और शोणित के अतिरिक्त गर्भ को बनाने वाले दूसरे भाव भी कारण हैं; यथा-'शुक्रासृग्गर्भिणी-भोज्यचेष्टागर्भाशयर्त्तुषु। यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता॥' इसी प्रकार चरक में 'मातृतः पितृत आत्मतः सात्म्यतो रसतः सत्त्वत इत्येतेभ्यो भावेभ्यः, समुदितेभ्यो गर्भः सम्भवति।' (चरक शा. अ. ४।४)

तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः।

स०—तत्रेति निर्धारणे। तत्र तेषु दोषेषु मध्येऽनिलो वायू रूक्षो लघुः शीतः खरो मृदुः सूक्ष्मः स्रोतः प्रचारित्वात्। चलो गमनशीलो नैकत्र तिष्ठतीति। नन्वनुष्णाशीतो वायुः काणादैः पठितः। इह योगवाहानुज्ञानादनुष्णाशीत एवेष्यत इति। योगवाहः परं वायुः संयोगादुभयार्थकृत्। दाहकृत्तेजसा युक्तः शीतकृत्सोमसंश्रयादिति। तथा। पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत्। दाहः पित्तयुत इति। उच्यते। सत्यमेतदनुष्णाशीत एव वायुः। तस्य योगवाहित्वेऽपि तावन्मात्राद्दाहोदयाच्छैत्यं स्वाभाविकं न विनश्यति। शीत-गुणव्यावर्णने चेदं प्रयोजनमुष्णेनायमुपशाम्यतीति प्रति-पत्त्यर्थम्।

वि०—वायु के गुण—वायु—रूक्ष, लघु, शीत, खर, सूक्ष्म और चञ्चल है।

वक्तव्य—रूक्ष-स्नेह के विपरीत, लघु-गुरु के विपरीत, शीत-उष्ण के विपरीत, खर-कर्कश, सूक्ष्म होने से सूक्ष्म-स्रोतों में जानेवाला, चंचल-अस्थिर। सुश्रुत में कहा है—'अव्यक्तो व्यक्तकर्मा च रूक्षः शीतो लघुः खरः। तिर्यग्गो द्विगुणश्चैव रजोबहुल एव च॥ अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट्। आशुकारी मुहुश्चारी पक्वाधानगुदालयः॥' चरक में-'वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविशदः।' (च. वि. अ ८।९८)। इन गुणों से युक्त वायु शरीर में भी इन्हीं गुणों को करती है।

इसके अतिरिक्त वायु का स्पर्श वैशेषिकदर्शन में अनुष्णाशीत मानते हैं। आयुर्वेद में इसके लिये योगवाही गुण वायु में माना है; जैसा कि—'योगवाही परं वायुः संयोगादुभयार्थकृत्। दाहकृत्तेजसा युक्तः, शीतकृत्सोम-संश्रयात्॥' (चरक चि. अ. ३।३८)। 'पवने योगवाहित्वा-च्छीतं श्लेष्मयुते भवेत्। दाहः पित्तयुते॥' अ. हृ. नि. अ. २।४८॥ शीत गुण कहने से यही अभिप्राय है कि उष्ण से वायु का शमन होता है।

पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम्॥ ११॥

स०—सस्नेहमीषत्स्निग्धम्। स शब्द ईषदर्थे। यथा। सतिक्ता याससर्करा। एवमीषत्स्नेहो यस्य तत्सस्नेहम्। तीक्ष्णं शीघ्रकारि मंदविपरीतं सूचीव भिनत्ति। उष्णं लघु। विस्रं दुर्गन्धि मत्स्यामगंधि। सरं व्याप्तिशीलं सरणशील-मूर्ध्वाधः प्रवर्तते न स्थिरमास्ते शकृद्विस्रंसि। द्रवं च॥ ११॥

वि०—पित्त के गुण—पित्त-ईषत् स्निग्ध, तीक्ष्ण, उष्ण, लघु, विस्र, सर और द्रव है॥ ११॥

वक्तव्य—तीक्ष्ण-शीघ्रकारी, मन्द के विपरीत; विस्र—दुर्गन्धि, मछली के समान कच्ची गन्ध वाला, सर—बहने वाला। चरक में—'पित्तमुष्णं तीक्ष्णं द्रवमम्लं कटुकं च॥' पित्त विदग्धावस्था में अम्ल है; वैसे कटु है; जैसा कि सुश्रुत में—'पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च। उष्णं कटु सरं चैव विदग्धं चाम्लमेव च॥'

स्निग्धः शीतो गुरुर्मन्दः श्लक्ष्णो मृत्स्नः स्थिरः कफः।

स०—स्निग्धगुणयोगात्स्निग्धः शीतोऽनुष्णो गुरुर्लघुर्न भवति। मंदश्चिरकारी तीक्ष्णविपरीतः। श्लक्ष्णोऽपरुषः। मृत्स्नो मृद्यमानोऽङ्गुलिग्राही पिच्छिलगुणयुक्तः चकचकाय-मानः। स्थिरो व्याप्तिशीलः। एवं तद्गुणयोगात् गुणगुणिनो-रभेदोपचाराद्वातादयो गुणतो निर्दिष्टाः।

वि०—कफ के गुण—कफ-स्निग्ध, शीतल, गुरु, मन्द, श्लक्ष्ण, मृदु और स्थिर है।

वक्तव्य—स्निग्ध—स्नेहमार्दवकृत् स्निग्धो बलवर्णकर-स्तथा।' शीतल-'ह्लादनः स्तम्भनः शीतो मूर्च्छातृट्स्वेददाह-जित्।' गुरु-'सन्धानः श्लेष्मलो गुरुः। मन्द-देर में काम करने वाला। श्लक्ष्ण-चिकना, मृत्स्न-मृदु। स्थिर-न फैलने वाला। चरक में—श्लेष्मा हि स्निग्ध-श्लक्ष्ण-मृदु-मधुर-सार-सान्द्र-मन्द-स्तिमित-गुरु-शीत-पिच्छिलाच्छः॥' सुश्रुत में—'श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च। मधुरस्त्वविदग्धः स्याद् विदग्धो लवणः स्मृतः॥ (सु. सू. अ. २१।१५)।

एषां च मिश्रीभूतानां तन्त्रव्यवहारार्थं संज्ञाद्वयमाह—

संसर्गः सन्निपातश्च तद्द्वित्रिक्षयकोपतः॥१२॥

स०—एतदुक्तं भवति। द्वयोः स्वप्रमाणाधिकयोः क्षीण-संयोगः संसर्गः। त्रयाणां दोषाणां वृद्धानां योर्वा क्षीणानां वा संयोगः सन्निपातः॥ १२॥

वि०—क्षीण हुए या कुपित हुए-दो दोषों का मिलना संसर्ग है, और क्षीण हुए या कुपित हुए तीन दोषों का मिलना सन्निपात है॥ १२॥

वक्तव्य—संसर्ग का अभिप्राय दो दोषों का मिलना और सन्निपात का अर्थ-तीन दोषों का मिलना है। इन अवस्थाओं में, क्षीणावस्था में, कुपितावस्था में मिश्रण होना ही आचार्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

को यहाँ अपेक्षित है। एक दोष बढ़ा हो, दूसरा क्षीण हो या एक साम्यावस्था में हो और दूसरा असाम्यावस्था में हो— इसकी विवेचना दोषभेदीय अध्याय में की जायेगी।

दोषानुक्त्वा धातव उच्यन्ते—

रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः।

सप्त दूष्याः—

स०—रसादयः सप्त धातुसंज्ञाः शरीरधारणाद्धातवस्ते च दूष्याः। वातादिभिर्दूष्यंत इति दूष्याः। यस्माद्वातादीनां दूषणस्वभावत्वाद्या दोषसंज्ञा सान्वर्थसंज्ञा। दूषयन्तीति दोषाः। अतोऽवश्यं ते दूष्यमपेक्षन्ते। कर्म विना कर्तुः क्रियाया असंभवात्। कर्तारं विना कर्मणो न कर्मत्वम्। एवं दोषैर्विना रसादीनां दूष्यनाम न पतति। तैर्विनाऽपि वातादीनां दोषनाम न। तस्मात्परस्परापेक्षत्वादनयोर्दूष्यदोषयोर्दूष्यत्वेन च संज्ञालाभः।

वि०—दोषों को कह कर दूष्यों को कहते हैं—रस, रक्त, मांस, मेद अस्थि, मज्जा और शुक्र ये सात धातुयें हैं, इनको दूष्य कहते हैं।

वक्तव्य—धातु-शरीर का धारण करने से इनको धातु कहते हैं; और वात आदि दोषों से दूषित होने के कारण इन को दूष्य कहते हैं।

ओज सभी धातुओं का सार है और उसके द्वारा भी शरीर-धारण किया जाता है; यथा—'तत्र रसादीनां शुक्रान्तानां धातूनां यत् परं तेजस्तत् खलु ओजः, तदेव बलमित्युच्यते-स्वशास्त्रसिद्धान्तात्।' (सु. सू. अ. १५।१९)। शरीर का धारक होने पर भी उसको जो धातु नहीं कहा उसका मुख्य कारण यही है कि अन्य धातु शरीर का धारण और पोषण दोनों करते हैं जबकि ओज केवल धारण करता है, पोषण नहीं।

मला मूत्रशकृत्स्वेदादयोऽपि च ॥ १३ ॥

स०—मूत्रशकृदादयो मला उच्यन्ते। अपिचेतिशब्दाद् दूष्याश्चेति। न केवलं रसादय एव दूष्या यावन्मलास्तेऽपि धात्वादिभिर्दूष्यन्त इति। एवं च रसादीनां दूष्यसंज्ञा धातुसंज्ञा च। तथा विण्मूत्रादीनां मलसंज्ञा दूष्यसंज्ञा चेति दोषधातुमलनिर्देशेन देहो व्याख्यातः। तथा चोत्तरग्रंथे दोषधातुमला मूलं सदा देहस्येति ॥ १३ ॥

वि०—मूत्र, शकृत् (पुरीष), स्वेद आदि मल हैं ॥१३॥

वक्तव्य—ये शरीर को मलिन करते हैं, इसी से इन को मल कहते हैं। खाये हुए अन्न से जहां शरीर का पोषक रस उत्पन्न होता है, वहाँ इसके किट्ट भाग से मल बनता है। यथा—'तत्राहारप्रसादाख्यो रसः किट्टञ्च मलाख्यमभिनिर्वर्त्तते। किट्टात् स्वेद-मूत्र-पुरीष-वात-पित्त-श्लेष्माणः कर्णाक्षिनासिकाऽऽस्यलोमकूपप्रजननमलाः केश-श्मश्रु-लोम-नखादयश्चावयवाः पुष्यन्ति।' (चरक. सू. अ. २८)। इनके निकलने के मार्ग-'द्वे अधः सप्त शिरसि खानि स्वेदमुखानि च। मलायनानि बाध्यन्ते दुष्टैर्मात्राधिकैर्मलैः ॥ मलवृद्धिं गुरुतया लाघवान्मलसंक्षयम्। मलायनानां बुध्येत सङ्गोत्सर्गादतीव च ॥' (च. सू. अ. ७।४२ ४३)। इन मलों में मूत्र और शकृत्-अन्न के मल हैं। कफ-रस का, पित्त रक्त का, नासिका आदि छिद्रों का मल मांस का; रोमकूपों से निकलने वाला स्वेद-मेद का मल; नख-रोम अस्थि के मल; नेत्र और त्वचा का स्नेह मज्जा का मल है, शुक्र निर्मल है।

तस्य च देहस्य यथा सन्ततं केनचिदुपायेन परिपालनं निष्पद्यते तमुपायं दर्शयितुमाह—

वृद्धिः समानैः सर्वेषां विपरीतैर्विपर्ययः।

स०—सर्वेषां दोषधातुमलादीनां शरीराश्रितानां समानैस्तुल्यसद्भावैर्वृद्धिः स्वप्रमाणाधिक्यम्। विपरीतैर्विशिष्टतयाऽव्यवस्थितैर्विपर्ययः क्षयः। अयनमयोगतिर्विपरीता गतिविपर्ययोऽपचयः। सामान्यविशेषैर्द्रव्यगुणकर्मभेदेन त्रिप्रकारोऽधिगच्छति। तथा चाहुः। सर्वेषां सर्वदा वृद्धिस्तुल्यद्रव्यगुणक्रियैः। भावैर्भवति भावानां विपरीतैर्विपर्ययः। द्रव्यतो यथोक्तं रक्तमापद्यते रक्तेन मांसं मांसेन पार्थिवम्। तथा सलिलात्मकं पयस्तदात्मकमेव श्लेष्ममाणमभिवर्धयति। तद्वत्क्षीरजातं घृतं शुक्रं तथा जीवंतीकाकोल्यादयः सोमात्मानो द्रव्यविशेषाः सौम्यधात्वेककारणानि स्नेहबलपुंस्त्वौजांसि मरीचपंचकोलभल्लातकादयो बुद्धिमेधान्यादीन् संवर्धयंति। गुणतश्चोचमोचखर्जूराणि पार्थिवानि द्रव्यतो निर्दिष्टान्यपि श्लेष्माणमुदकात्मकमभिवर्धयंति। स्निग्धगुरुशीतादिगुणसामान्यात्। कर्मापि त्रिविधं कायवाङ्मनोव्यापारात्मकम्। तत्र कायिकानि धावनलंघनप्लवनादीनि चलत्वसामान्याद्वायोर्वृद्धये। वाचिकानि भाषाध्ययनगेयादीनि। मानसं मनोव्यापारश्चिंताकामशोकभयानि। तान्यपि मनसः क्षोभणहेतुत्वाद्वायोर्वृद्धिकराणि। तथा संतापक्रूरत्वसामान्यात्क्रोधेर्ष्यादि पित्तस्य। स्वप्नालस्यशय्यासुखादीनि स्थैर्यसामान्यात्कफस्येति। विपर्ययस्तु क्षयाय। यथाह। द्रव्यतो गवेधुकान्नं कर्शनीयानां तत्र वातात्मिकया गवेधुकया पार्थिवानां मांसादीनां कृशिमा क्रियते। तथा तैजसेन क्षारेण श्लेष्मणः। गुणतो यथा। आरनालमौदकं श्लेष्माणं तद्विपरीतैर्लघुरूक्षोष्णतीक्ष्णविशदगुणैः क्षपयति। कर्मतो निद्रालस्यसौमनस्यानि सपरिस्पंदं वातमपरिस्पंदस्वभावतयाऽपचिन्वंति। तथा परिस्पंदरूपाश्चिताव्यवायव्यायामा मंदपरिस्पंदवैपरीत्यात्कफमिति।

वि०—इन सब दोष, दूष्य और मलों की समान कारणों से वृद्धि होती है, और विपरीत कारणों से ह्रास होता है।

वक्तव्य—इनमें जो जिसके समान होता है, वह उसको बढ़ाता है; यथा-रक्त से रक्त बढ़ता है; मांस से मांस बढ़ता है और विपरीत से ह्रास होता है; इसीसे कहा है—'सर्वेषां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वदा वृद्धिस्तुल्यद्रव्यगुणक्रियैः । भावैर्भवति भावानां विपरीतैर्विपर्ययः ॥' इसी प्रकार चरक में–'सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम् ।' सुश्रुत में–'तत्रापि (रसादिक्षयेऽपि) स्वयोनिवर्धनद्रव्योपयोगः (प्रतीकारः) ।' द्रव्य से वृद्धि-रक्त-रक्त से बढ़ता, मांस-मांस से बढ़ता है; कर्म से वृद्धि-दौड़ने कूदने आदि से वायु बढ़ती है; बोलने गाने से वायु बढ़ती है; गुण से वृद्धि–केला-खजूर आदि द्रव्य अपने गुण से कफ को बढ़ाते हैं—क्योंकि ये स्निग्ध, गुरु, शीत हैं। द्रव्यों से क्षय-गवेधुक (थई-गुजराती) पार्थिव होने पर भी रूक्ष होने से शरीर को कृश करता है। इसी से कहा है—'गवेधुकान्नं कर्शनीयानां श्रेष्ठतमः'। कर्म से निद्रा, आलस्य, मन की प्रसन्नता, ये अगतिशील होने से गतिमान वायु को शान्त कर देते हैं। गुण से-काञ्जी-अपने उष्ण और रूक्ष गुण से जलीय श्लेष्मा को कम करती है।

वर्णितमेव वृद्धिः समानैः क्षयो विपरीतैरिति। तौ तु वृद्धिक्षयौ यतो वाय्वादीनां भवतस्तत्प्रत्यायनार्थमाह—

रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ॥१४॥
षड् द्रव्यमाश्रितास्ते तु यथापूर्वं बलावहाः ।

स०—स्वाद्वादयः षड्रसा रसनेंद्रियग्राह्यत्वाद्रसास्ते च रसा द्रव्यं पंचभूतात्मकमाश्रिता यथापूर्वं च बलावहाः । यो यः पूर्वो यथापूर्वं बलावहा बलप्रापकाः । बलमावहंति प्रापयंतीति यावत् । तस्मात्सर्वेभ्यो मधुरो रसः प्रकर्षेण देहिनां बलकरः कषायस्तु सर्वेभ्यो जघन्यबलावहः । तत्र स्वादुर्मधुरो घृतगुडादिः । अम्लोऽम्लिकामातुलुंगादिः । लवणः सैंधवादिः । तिक्तो भूनिम्बादिः । ऊषणः कटुको मरीचादिः । कषायो हरीतक्यादिः । स्वादुर्मधुरपर्यायः । ऊषणः कटुकपर्यायः यथा त्र्यूषणं त्रिकटुकमुच्यते । कषाय एव कषायको यथा कटुरेव कटुकः । षडिति षडेव न न्यूना अधिका वा । यद्यपि ते रसा गुणाः स्वाद्वादिभेदतस्तथा संसर्गतस्तथाऽनुरसतस्तारतम्यपरिकल्पनावशतोऽपि भिद्यमानरूपा अपि षट्त्वं नातिवर्तंते ॥ १४ ॥

वि०—रस—छ रस हैं; यथा—स्वादु (मधुर); अम्ल, लवण, तिक्त, ऊषण (कटु) और कषाय। ये छ रस द्रव्य में आश्रित हैं, और ये रस पूर्व क्रम से अधिक बल देने वाले हैं ॥ १४ ॥

वक्तव्य—साधर्म्य और वैधर्म्य या वृद्धि और क्षय को बताने के लिये द्रव्य के धर्मों को कहते हैं-ये धर्म-रस, प्रभाव वीर्य, विपाक और गुण के भेद से पाँच प्रकार के हैं। इनमें—'रस'-रसना-इन्द्रिय के ग्राह्य होने से रस कहा जाता है; जैसा कहा है—'रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा। निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः ॥' अर्थात् रस रसना का विषय है; इसका आरम्भक द्रव्य जल और पृथ्वी हैं और इसके बनने तथा विशिष्टता में पञ्च महाभूत कारण हैं। इन छः रसों में पूर्व क्रम से बलाधिक्य है; अर्थात् सब रसों में अधिक बल देने वाला मधुर रस है; उससे उतर कर अम्ल, फिर लवण, फिर तिक्त, फिर कटु और सबसे कम बल देने वाला कषाय रस है। इनमें घी-गुड़ आदि मधुर रस, इमली, काञ्जी आदि अम्ल; सैन्धव आदि लवण; चिरायता, नीम आदि तिक्त; मिर्च, कालीमिर्च, सोंठ, पीपल ऊषण (कटुरस); आम की गुठली-जामुन आदि कषाय रस हैं।

तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम् ॥१५॥
कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ।

स०—तत्र तेषु रसेषु मध्य आद्यास्त्रयः स्वाद्वम्ललवणा मारुतं घ्नन्ति शमयंति अन्ये तु तिक्तोषणकषायास्तमेव चानिलं कुर्वते कोपयन्ति । तिक्तादयस्त्रयस्तिक्तोषणकषायाः कफं घ्नन्ति प्रशमयन्ति । अन्ये मधुराम्ललवणास्तमेव कफं कुर्वते । कषायतिक्तमधुराः पित्तं घ्नंति । अन्ये स्वम्ललवणकटुकास्तदेव पित्तं कुर्वते । तेनेदमुक्तं भवति । मधुरो वातपित्तघ्नः श्लेष्मकरः । अम्लो वातं हंति कफपित्ते जनयति । लवणो मारुतं हंति कफपित्ते तु कुरुते । तिक्तः कफपित्ते नाशयति वातं तु जनयति । ऊषणः कफं नाशयति वातपित्ते तु जनयति । कषायः कफपित्ते हंति वातं तु करोतीति ॥ १५ ॥

वि०—रसकर्म—इनमें पहले तीन रस अर्थात् मधुर, अम्ल और लवण-ये रस वायु का शमन करते हैं; और, तिक्त, कटु और कषाय-ये तीन रस कफ का शमन करते हैं। कषाय, तिक्त, मधुर- ये तीन रस-पित्त का शमन करते हैं। इनसे बाकी रहे रस वात, पित्त, कफ को बढ़ाते हैं; अर्थात्–तिक्त, कटु, कषाय वायु को बढ़ाते हैं; मधुर, अम्ल और लवण कफ को; अम्ल, लवण और कटु-ये रस पित्त को बढ़ाते हैं ॥ १२ ॥

वक्तव्य—मधुर-रस वात-पित्तनाशक, कफकारक है। इसी प्रकार अम्ल रस-वातनाशक, कफ पित्तकारक। लवण रस-वातनाशक, कफ-पित्तकारक । तिक्तरस-कफ-पित्तनाशक, वातकारक। कटु-कफनाशक, वात-पित्तकारक। कषाय-कफ-पित्तनाशक और वायुकारक है। इसी से चरक में कहा है—'तत्र दोषमेकैकं त्रयस्त्रयो रसा जनयन्ति; त्रयस्त्रयश्चोपशमयन्ति। तद्यथा—कटुतिक्तकषाया वातं जनयन्ति; मधुराम्ललवणास्त्वेनं शमयन्ति; कट्वम्ललवणाः पित्तं जनयन्ति; मधुरतिक्तकषायास्त्वेनं शमयन्ति । मधुराम्ललवणाः श्लेष्माणं जनयन्ति; कटुतिक्तकषायास्त्वेनं शमयन्ति ॥'

ये रस किस प्रकार से दोषों को बढ़ाते एवं शमन करते हैं-इसके लिये चरक में बताया है कि–'रसदोषसन्निपाते तु ये रसा यैर्दोषैः समानगुणाः समानगुणभूयिष्ठा वा भवन्ति, ते तानभिवर्धयन्ति, विपरीतगुणा विपरीतगुणभूयिष्ठा वा शमयन्त्यभ्यस्यमाना इति । एतद्व्यवस्थाहेतोः षट्त्वमुपदिश्यते रसानां परस्परेणासंसृष्टानां, त्रित्वं च दोषाणाम् ॥' (चरक वि. अ. १७) ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एषां च रसानामाश्रयो द्रव्यं तच्च त्रिप्रकारमित्याह—

शमनं कोपनं स्वस्थहितं द्रव्यमिति त्रिधा ॥ १६ ॥

स०—इत्यनेन प्रकारेण शमनादिभेदेन त्रिधा त्रिप्रकारं द्रव्यम्। अन्येन प्रकारेण द्विधाऽथवाऽनेकधा। इतिशब्दः प्रकारार्थेऽभिहितः। यत्तु वातादीन् दोषान् शमयति तच्छमनम्। यथा तैलं घृतं माक्षिकम्। तत्र तैलं स्नेहोष्ण्यगौरवयोगाद्वातं तद्विपरीतगुणं शमयति। सर्पिर्माधुर्यशैत्यमांद्यगुणयोगात्तद्विपरीतगुणं पित्तम्। मधु च रौक्ष्यतैक्ष्ण्यकषाययोगात्तद्विपरीतगुणं कफम्। यद्वातादीन् दोषान् रसादीन्धातून् मूत्रादीन्मलांश्च कोपयति तत्कोपनम्। यथा यवकपटलमाषमत्स्यासमूलकसर्षपमंडकदधिकिलाटविरुद्धमत्स्यपयः प्रभृति। दोषादीनां मलपर्यन्तानां स्वप्रमाणस्थितानां साम्यानुवृत्तिहेतुर्यद्द्रव्यं तत्स्वस्थेभ्यो हितम्। यच्च स्वास्थ्यानुवृत्तिं करोति। ऋतुचर्याध्याये सेव्यत्वेनोक्तम्। तथा मात्राशितीयाध्याये रक्तशालिषष्टिकयवगोधूमजांगलमांसजीवंतीशाकदिव्योदकक्षीरादि। तथा यदूर्जस्करं रसायनवाजीकरणं सर्वदा शीलनीयत्वेन निर्दिष्टम् ॥ १६ ॥

वि०—द्रव्य के भेद—द्रव्य; शमन करने वाला: कुपित करने वाला और स्वस्थ के लिये हितकारी—इस प्रकार से तीन प्रकार का है ॥ १६ ॥

वक्तव्य—यहां पर यद्यपि द्रव्य तीन प्रकार का कहा गया है; परन्तु वास्तव में ये तीन भेद द्रव्य के प्रभाव के हैं—किसी द्रव्य का प्रभाव शमन करने वाला होता है; किसी का कुपित करने वाला और किसी का स्वास्थ्य के लिये हितकारी होता है। इनमें शमन द्रव्य—कुपित वातादि का शमन करता है; जैसे तेल स्नेहन, उष्ण और गुरु होने से अपने से विपरीत गुण वाली वायु का शमन करता है। घी-मधुर, शीत और मन्द गुण होने से अपने से विपरीत गुण वाले पित्त का शमन करता है; मधु रूक्ष, तीक्ष्ण, कषाय होने से अपने से विपरीत गुण कफ का शमन करता है। जो द्रव्य वातादि दोष, रसादि धातुओं तथा मूत्रादि मलों को कुपित करता है; वह कोपन द्रव्य है यथा-यवक, माष, मछली, मूली, सरसों आदि। दोषों से लेकर मलपर्यन्त सब धातुओं को उनके अपने प्रमाण में जो स्थित रहने देता है—वह स्वास्थ्य के लिये हितकारी है; यथा—लाल चावल, साठी, जौ आदि।

हेमाद्रि की मान्यता है कि यह द्रव्यों के प्रभाव का वर्णन है। जो द्रव्य प्रभाव से वातादि का शमन करता है, वह शमन द्रव्य है; यथा—मधुर एवं शीतल होने पर भी जीवन्ती कफ का शमन करती है। रस एवं विपाक दोनों में कटु, गुरु एवं स्निग्ध होने पर भी लहसुन कफ और वात का शमन करता है। कोपन द्रव्य—गुरु, उष्ण, स्निग्ध एवं मधुर भी फाणित (राब) वायु को कुपित करता है; इन्हीं गुणों वाला उबद पित्त और कफ को कुपित करता है। स्वस्थहित द्रव्य—गुरु, मधुर, रूक्ष और शीत गुण वाला जौ स्वस्थ पुरुष में पित्त का नाश नहीं करता। गुरु, मधुर, स्निग्ध और शीत दुग्ध भी स्वस्थ पुरुष में कफ को नहीं बढ़ाता। आगे कहेंगे-'रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम् ॥'

तस्य वीर्यमाह—

उष्णशीतगुणोत्कर्षात्तत्र वीर्यं द्विधा स्मृतम्।

स०—तत्र तस्मिन् द्रव्ये वीर्यं द्विविधम्। विंशतेर्गुणानां मध्याद्द्वावुष्णशीतौ तदुत्कर्षाद्वीर्यमिति सर्वायुर्वेदप्रसिद्धौ द्वावेव गुणौ शीतोष्णौ वीर्यकरणहेतू। वीर्यं शक्तिः। उष्णगुणोत्कर्ष उष्णगुणातिशय एव कश्चिदुष्णवीर्याख्यां लभते। तथा शीतगुणोत्कर्षः शीतगुणातिशय एव शीतवीर्याख्याम्। यद्यपि नानागुणकमपि द्रव्यं तथाप्यग्नीषोमात्मकत्वाज्जगतो द्विधैव वीर्यम्।

वि०—वीर्य—उष्ण और शीत इन दो गुणों की उत्कर्षता से वीर्य दो प्रकार का है।

वक्तव्य—यद्यपि कुछ लोग शीत, उष्ण, गुरु, लघु, स्निग्ध, रूक्ष, और मृदु, तीक्ष्ण ये आठ वीर्य मानते हैं; 'तीक्ष्णं रूक्षं मृदु स्निग्धं लघूष्णं गुरु शीतलम्। वीर्यमष्टविधं केचित् केचिद् द्विविधमाश्रिताः ॥' (च. सू. अ. २६) तथापि शक्ति की उत्कर्षता से वीर्य दो प्रकार का ही है शीत और उष्ण, क्योंकि संसार आग्नेय और सौम्य है 'अग्नीषोमीयत्वाज्जगतः। शक्ति के उत्कर्ष का नाम ही वीर्य है; शक्ति का उत्कर्ष होने से कार्य हो सकता है; इसी से चरक में कहा है-'वीर्यं तु क्रियते येन या क्रिया। नावीर्यं कुरुते किंचित्, सर्वा वीर्यकृताः क्रियाः ॥' बिना वीर्य के या शक्ति के कोई काम नहीं कर सकता।

द्रव्यविपाकमाह—

त्रिधा विपाको द्रव्यस्य स्वाद्वम्लकटुकात्मकः ॥ १७ ॥

स०—विपाकस्त्रिविधः सर्वद्रव्याणां परिणामकालाभावी कार्यानुमेयो जाठराग्निसंबंधाद्रसस्य स्वरूपांतरप्रादुर्भावः। स त्रिधैव। रसषट्त्वेऽपि न षोढा। तेन किंचित्स्वादुपाकं किंचिदम्लविपाकं किंचित्कटुविपाकं द्रव्यम्। तत्र मधुरलवणयोर्मधुरो विपाकः। अम्लस्याम्लः। तिक्तकटुकषायाणां कटुकः। स च कार्यानुमेयः। तथा च वक्ष्यति—'जाठरेणाग्निना योगाद्यदुदेति रसांतरम्। रसानां परिणामांते स विपाक इति स्मृतः ॥' अतएव सोपसर्गः पाकशब्द उपात्तः। विशिष्टः पाको विपाको न पाकमात्रस्वरूपः। तथा च भट्टारकचरकमुनी—'रसो विपाके द्रव्याणां विपाकः कर्मनिष्ठया। वीर्यं यावदधीवासान्निपाताच्चोपलभ्यते।' एवं कर्मनिष्ठानुमत एकरूपावस्थो जाठराग्निसंयोगाद्यो रसानां रसांतरोद्भवः स एव विपाको न यो जाठराग्निसंयोगमात्राद्रसानामनेकावस्थः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राङ्मधुरोऽनंतरं स एव पच्यमानोऽम्लस्ततो विपच्यमानः स एव कटुविपाकः ॥ १७ ॥

वि०—विपाक—तीन प्रकार का है; स्वादु, अम्ल और कटु ॥१७॥

वक्तव्य—विपाक का अर्थ परिपाक के बाद उत्पन्न दूसरा रस है—यह जठराग्नि की सहायता से होता है; जैसा कि कहा है—'जाठरेणाग्निना योगाद् यदुदेति रसान्तरम्। रसानां परिणामान्ते स विपाक इति स्मृतः॥' विपाक का अर्थ विशिष्ट पाक है अर्थात् इस पाक के उपरान्त फिर कोई पाक नहीं होता। इसीलिये चरक मुनि ने कहा है—'रसो निपाते द्रव्याणां विपाकः कर्मनिष्ठया। वीर्यं यावदधीवासान्निपाताच्चोपलभ्यते॥' कर्म की निष्ठा से विपाक का ज्ञान होता है।

कोई आचार्य प्रत्येक रस का विपाक मानते हैं; और सुश्रुत ने मधुर और कटु दो ही प्रकार का विपाक माना है—यथा-'द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः। निर्वर्तन्तेऽधिकास्तत्र पाको मधुर उच्यते॥ तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु। निर्वर्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते॥' (सु. सू. अ. ४०)। अम्लपाक को स्वीकार न करने में युक्ति दी है कि-'पित्तं हि विदग्धमम्लतामुपैति।' (सु. सू. अ. ४०)।

कटु-तिक्त-कषाय रस का कटु विपाक, अम्लरस का अम्ल; और मधुर तथा लवण रस का मधुर विपाक होता है।

द्रव्यस्य गुणानाह—

गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिराः।
गुणाःससूक्ष्मविशदा विंशतिः सविपर्ययाः॥ १८॥

स०—तत्र द्रव्ये गुर्वादयो दश गुणाः सविपर्यया विंशतिर्ज्ञेयाः। एषां क्रमाद्विपरीता लघुतीक्ष्णोष्णरूक्षखरद्रवकठिनसरस्थूलपिच्छिलाः। गुरुस्तद्विपर्ययो लघुः। मंदस्तद्विपर्ययस्तीक्ष्णः। हिमस्तद्विपर्ययस्तीक्ष्णः। हिमस्तद्विपर्यय उष्णः। स्निग्धस्तद्विपर्ययो रूक्षः। श्लक्ष्णस्तद्विपर्ययः खरः। सांद्रस्तद्विपर्ययो द्रवः। मृदुस्तद्विपर्ययः कठिनः। स्थिरस्तद्विपर्ययः सरः। सूक्ष्मस्तद्विपर्ययः स्थूलः। विशदस्तद्विपर्ययः पिच्छिलः॥ १८॥

वि०—गुण-गुरु, मन्द, हिम, स्निग्ध, श्लक्ष्ण, सान्द्र, मृदु, स्थिर, सूक्ष्म और विशद; ये दस तथा इनके विपरीत दूसरे दस—अर्थात् कुल बीस गुण हैं॥ १८॥

वक्तव्य—विपरीतगुण-लघु, तीक्ष्ण, उष्ण, रूक्ष, खर, द्रव, कठिन, सर, स्थूल और पिच्छिल ये दस गुण हैं। इनमें-द्रव्य की बृंहण कर्म में जो शक्ति है, उसका नाम गुरु; लंघन में लघु; शमन में मन्द; शोधन में तीक्ष्ण, स्तम्भन में हिम; स्वेदन में उष्ण; क्लेदन में स्निग्ध; शोषण में रूक्ष; रोपण में श्लक्ष्ण; लेखन में खर; प्रसादन में सान्द्र; विलोडन में द्रव; श्लथन में मृदु; दृढ़ करने में कठिन; धारण में स्थिर; प्रेरण में चल; विवरण में सूक्ष्म; संवरण में स्थूल; क्षालन में विशद और लेपन में पिच्छिल।

इन गुणों के अतिरिक्त व्यवायी, विकासि, आशुकारी आदि कुछ दूसरे गुण भी स्थान-स्थान पर मिलते हैं; यथा—तीक्ष्णोष्ण-रूक्षसूक्ष्माम्लव्यवाय्याशुकरं लघु। विकासि विशदं मद्यमोजसोऽस्माद् विपर्ययः॥' (चरक सू. अ. २७।२१३) इसी प्रकार-कषायं कफपित्तघ्नं किञ्चित्तिक्तं रुचिप्रदम्। हृद्यं सुगन्धि विशदं लवलीफलमुच्यते॥' इन अतिरिक्त गुणों का इन्हीं बीस गुणों में अन्तर्भाव होता है। यथा—व्यवायी का द्रव में; विकासी का खर में; आशुकारी का चल में; प्रसन्न का स्थूल में अन्तर्भाव होता है। स्वादु, शीत, मन्द, स्निग्ध, पिच्छिल, गुरु-ये अम्ल, उष्ण, तीक्ष्ण, रूक्ष, विशद, लघु—इनके विपरीत गुण हैं। सुगन्ध और दुर्गन्ध तो मन्द और तीक्ष्ण हैं। जैसा कि सुश्रुत में—'सुगन्धो रोचनो मन्दः।' दुर्गन्धो विपरीतोऽस्मात्।' शुचि और विमल-विशद के भेद हैं। अदृष्ट मलों के प्रक्षालन में जो शक्ति है, वह शुचित्व है। दृष्ट मलों के प्रक्षालन में जो शक्ति है, उसका नाम विमल है। शिव-परिणाम में हितकारी। मृष्ट-जिह्वा के लिये प्रिय। वस्तुतः ये गुण नहीं गुण के कार्य हैं। संग्रह में—'इन्द्रियार्था व्यवायी च विकासी चापरे गुणाः। सत्वं रजस्तमश्चेति त्रयः प्रोक्ता महागुणाः॥'

रोगकारणमाह—

कालार्थकर्मणां योगा हीनमिथ्यातिमात्रकाः।
सम्यग्योगश्च विज्ञेयो रोगारोग्यैककारणम्॥१९॥

स०—कालः शीतोष्णवर्षलक्षणस्त्रिविधः। अर्थाः शब्दस्पर्शरसरूपगंधा महाभूतगुणाः। तथाचागमः। अर्थाः शब्दादयो ज्ञेया गोचरा विषया गुणाः। कर्म क्रिया कायवाङ्मनश्चेष्टा। कालश्चार्थश्च कर्म च तानि कालार्थकर्माणि तेषां योगाः संबंधाः। कालार्थकर्मणां योगाः। किंभूताः हीनमिथ्यातिमात्रकास्तथा सम्यग्योगश्चेति। ये कालादीनां योगा हीनमिथ्यातिमात्रकास्ते रोगैककारणम्। तेषामेव यः सम्यग्योगः स आरोग्यैककारणं प्रधानकारणमिति। एकशब्दः प्रधानवचनो यथैकः पार्थो धनुर्धरः। कालस्य हीनयोगः स्वरूपहानिः। अतियोगः स्वरूपातिशयः। मिथ्यायोगः स्वरूपाद्वैपरीत्यम्। यथा हीनशीतता हीनोष्णता हीनवर्षता हीनयोगे। यथाऽतिशैत्यमत्यौष्ण्यमतिवर्षणमतियोगे। यथा शीतकालावसरेऽत्यौष्ण्यमुष्णकालावसरे शीतं वर्षाकालेऽवृष्टिर्मिथ्यायोगे। एतद्योगत्रयं रोगकारणम्। सम्यग्योगो यथास्वरूपस्थितिरारोग्यकारणम्। अर्थानां पुनः स्वेन स्वेनार्थेनेंद्रियस्य हीनः संयोगो हीनयोगः। अत्यंतसंयोगोऽतियोगः। पुरुषानभिमतादिनार्थजातेनेंद्रियस्य योगो मिथ्यायोगः। एते त्रयो रोगकारणम्। यथास्वं सम्यग्योग आरोग्यकारणम्। कायादिकर्मणो हीनप्रवृत्तिर्हीनयोगः। अतिप्रवृत्ति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रतियोगः। वेगोदीरणादिकं सामिभुक्तभाषणादिकं राग-द्वेषादिकं यथास्वमुत्तरत्र वक्ष्यमाणं मिथ्यायोगः। सर्वेषां समा प्रवृत्तिः समयोगः। तेन हीनादयो योगास्त्रयो रोगकरणम्। सम्यग्योगस्त्वारोग्यकारणम् ॥ १९ ॥

वि०—रोग और आरोग्य का कारण—काल, अर्थ और कर्म-इनका हीनयोग, मिथ्यायोग और अतियोग-रोग का कारण है तथा इनका सम्यग् योग आरोग्य का कारण है ॥ १९ ॥

वक्तव्य—काल का अर्थ परिणाम है—काल हर समय बदलता रहता है; इसीलिये सुश्रुत में कहा है—'सूक्ष्मां कलामपि न लीयते।' यही काल-शीत, उष्ण और वर्षा भेद से तीन प्रकार का है। इनमें काल का अपने स्वभाव से कम होना हीनयोग है; काल का स्वभाव से विपरीत होना मिथ्यायोग; काल का स्वभाव से अधिक होना अतियोग है। अर्थ—का अभिप्राय शब्दादि पाँच विषयों से है; यथा 'अर्थाः शब्दादयो ज्ञेया गोचरा विषया गुणाः।'—इनमें इन्द्रियों का अपने विषय के साथ थोड़ा सम्बन्ध होना—हीनयोग, अनुचित संयोग होना-मिथ्यायोग और अधिक संयोग होना-अतियोग है। चेष्टा का अभिप्राय कायिक, वाचिक और मानसिक कर्म से है यथा—कर्मों का कम करना हीनयोग, अनुचित रूप में करना-मिथ्यायोग, अधिक करना-अतियोग है। ये तीनों रोग के कारण हैं।

चरक ने एक 'प्रज्ञाऽपराध कारण माना है—जिसके कारण से ही मनुष्य हीनयोग, मिथ्यायोग या अतियोग करता है। यथा—'बुद्ध्या विषमविज्ञानं विषमं च प्रवर्त्तनम्। प्रज्ञाऽपराधं जानीयाद् मनसो गोचरं हि तत् ॥' (च० शा० १)

काल, अर्थ और कर्म इनका सम्यग्योग आरोग्य का कारण है—'सुखहेतुः समस्त्वेकः समयोगस्तु दुर्लभः'।

रोगारोग्ये कैरुच्येते इत्याह—

रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता।

स०—दोषाणां वातादीनां स्वप्रमाणादेकस्य द्वयोस्त्रयाणां वा वृद्धिः क्षयो वा रुजाकरत्वाद्रोग एव वैषम्यं विषमता स्वरूपाच्च्यवः ततः कार्यकारणयोरभेदेन पठितो रोग इति। दोषाणां साम्यं स्वरूपादप्रच्युतिः समभागोऽरोगताऽऽरोग्यं स्वास्थ्यमिति यावत्।

वि०—रोग और आरोग्य का लक्षण—दोषों की विषमता का नाम रोग है; दोषों की समता का नाम अरोगता (आरोग्य) है।

वक्तव्य—रोग-शब्द का अर्थ-पीडा करना है; विषमता का अर्थ-वास्तविक स्वरूप का नष्ट होना है; यह क्षय और वृद्धि भेद से दो प्रकार का है। इसीसे चरक में कहा है—'विकारो धातुवैषम्यम्; साम्यं प्रकृतिरुच्यते। सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ॥'

निजागन्तुविभागेन तत्र रोगा द्विधा स्मृताः ॥ २० ॥

स०—तत्र तयो रोगारोग्ययो रोगा द्विधा निजागंतुभेदेन। निजा वातादिदोषजन्मानः। आगंतवो बाह्यहेतवः। तथा चाचार्यवचनम्। निजास्त्रिदोषोत्था बाह्यहेतुजास्त्वागंतवः। अनयोरियान्विशेषः। निजे रोगे वातादयः पूर्वं वैषम्यं गत्वा पश्चाद् व्यथामभिनिर्वर्तयंति। आगंतवः पुनः पूर्वमेवोत्पद्यंते अनंतरं तत्र वातादयः कुप्यंतीति। अनेनोभयस्य निजागंतुभेदभिन्नस्य व्याधेश्चेतः संतापकरत्वं बोद्धव्यम् ॥ २० ॥

वि०—रोग दो प्रकार के हैं—एक निज-जो शरीर के भीतर वातादि-वैषम्य से उत्पन्न होते हैं; और दूसरे-आगन्तुज-जो अभिघात आदि बाहरी कारणों से अकस्मात् उत्पन्न होते हैं ॥ २० ॥

वक्तव्य—निज और आगन्तु-ये दो प्रकार की रोग की प्रकृति है, जैसा कि चरक में कहा है—'द्विविधा पुनः प्रकृतिरेषाम्-आगन्तुनिजविभागात्।' इन दोनों में भेद—'आगन्तुर्हि व्यथापूर्वं समुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति; निजे तु वातपित्तश्लेष्माणः पूर्वं वैषम्यमापद्यन्ते जघन्यं व्यथामभिनिर्वर्त्तयन्ति ॥'

यत एवं देहमनसी रोगाधिष्ठानत्वेन स्थिते न केवलो देहो नापि केवलं मनस्तस्मादतोऽनन्तरमिदमाह—

तेषां कायमनोभेदादधिष्ठानमपि द्विधा।

स०—तेषां निजागंतुकानां विकाराणां रोगाणां कायमनोभेदेन द्विविधमधिष्ठानं स्थानम्। ज्वरास्रपित्तकासादीनां कायो मदमूर्च्छासंन्यासप्रभृतोन्मादापस्माररागद्वेषादीनां मनः। अधितिष्ठंत्यस्मिन्निस्यधिष्ठानम्। कायः शरीरम्। मनश्चेतः।

वि०—रोगों का अधिष्ठान—इन रोगों के अधिष्ठान (आश्रयस्थान) दो हैं—शरीर और मन।

वक्तव्य—जैसा चरक में भी कहा है—'द्विविधं चैषामधिष्ठानं मनः शरीरविशेषात्।' इनमें शारीरिक रोग-वात, पित्त और कफ-इन दोषों से उत्पन्न होते हैं।

ननु कायिकानां रोगाणामुत्पत्तौ हेतवो वातादयो दोषाः प्रकुपिता उक्ताः मानसानां च रोगाणां को हेतुरतदर्थमाह—

रजस्तमश्च मनसो द्वौ च दोषावुदाहृतौ ॥ २१ ॥

स०—मनश्चेतस्तस्य रजस्तमसी दोषावुपप्लवावविद्यासंभवौ। अत्र च प्राधान्यादादौ रजो निर्दिष्टम्। चशब्दः पवनादीनामप्युपसंग्रहार्थः। यस्मात्तेऽपि मनः संश्रित्य विकुर्वते। समये हि षडुन्मादा भवंति वातपित्तकफसन्निपातादिद्विविधनिमित्ता उदाहृता इत्युदाहरणमात्रमुद्देशमात्रं वचनमात्रमत्रायुर्वेदशास्त्रे। रजस्तमसोर्न साकल्येन व्याकरणमनिलादीनामिव। ते खल्वत्र स्वभावस्थानादिभिः प्रकारैरशेषमुक्ता न तु रजस्तमसी ॥ २१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—मन के दोष—रज और तम ये दो मन के दोष कहे गये हैं ॥ २१ ॥

वक्तव्य—रज और तम मन को दूषित करते हैं। कहा भी है—सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गुरु वरणकमेव तमः, प्रदीपवच्चार्थतो वृत्तिः ॥' (सांख्यकारिका)

रोगोपहतशरीरज्ञानोपायमाह—

दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम्।

स०—रोगोऽस्यास्तीति रोगी व्याधितः तं दर्शनादिभिः परीक्षेत। दर्शनेन दृष्ट्या कासमेहाद्यार्तेषु पीतशुक्लवर्णसंस्थानप्रमाणोपचयच्छायाविण्मूत्रच्छर्दितादिकम्। स्पर्शनेन हस्तकायस्पर्शेन ज्वरगुल्मविद्रध्याद्यार्तम्। तथा शीतोष्णस्तब्धस्पंदे श्लक्ष्णखरस्पर्शादिकं च। प्रश्नेन पृच्छया शूलारोचकच्छर्दिप्रदर्दत्वं सुच्छंददुश्छंदत्वं मृदुक्रूरकोष्ठतां स्वप्नदर्शनमभिप्रायं जन्मामयप्रवृत्तिनक्षत्रद्विष्टेष्टसुखदुःखानि चेत्यातुरमुखात्परीक्षेत।

वि०—रोगिपरीक्षा के उपाय—रोगी की परीक्षा—दर्शन, स्पर्शन और प्रश्न से होती है।

वक्तव्य—दर्शन—दृष्टि से देखकर; स्पर्शन—हाथ द्वारा शरीर का स्पर्श करके; प्रश्न—रोगी से पूछ कर रोग का परिज्ञान होता है।

सुश्रुत ने दर्शन, स्पर्श और प्रश्न इनको एकीय मत बता कर इनका खण्डन किया है। वह षड्विध उपाय मानते हैं—पाँच ज्ञानेन्द्रिय और प्रश्न। त्रिभिरेतैर्विज्ञानोपायै रोगाः प्रायशो वेदितव्या इत्येके; तत्तु न सम्यक्, षड्विधो हि रोगाणां विज्ञानोपायः, तद्यथा पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति ॥' (सु. सू. अ. १०।४)।

रोगविशेषाधिगमोपायमाह—

रोगं निदानप्राग्रूपलक्षणोपशयाप्तिभिः ॥ २२ ॥

स०—रोगं निदानादिभिः पञ्चभिः परीक्षेत। निदानं कारणं हेतुरित्यनर्थान्तरम्। तच्चासन्नविप्रकृष्टभेदेन द्विधा। आसन्नमपि द्विविधम्। आसन्नात्यासन्नभेदेन। आसन्नं रूक्षलघुशीतादिद्रव्योपयोगः। अत्यासन्नं तु यतः समनंतरमेव रोगोत्पत्तिः। यथा वातादयो दोषाः क्रुद्धाः। विप्रकृष्टं यदादिकाले ज्वरादीनां तथा हविःप्राशादि मेहकुष्ठादीनाम्। तेनैवंविधमर्थजातमेवंत्रिधस्य रोगस्य हेतुत्वेनोपदिष्टमेवं विधश्चोत्पन्नोऽतो निदानाज्ज्ञायते रोगः। प्राग्रूपं पूर्वरूपं भविष्यतो व्याधेरप्रकाशितदोषविशेषाधिष्ठितस्य लक्षणमुद्बुभूषुर्ज्वरादिरामयो वातादिदोषविशेषेणालिङ्गितरूपाभासो येनावभास्यते यथायथमल्पत्वाद्यदव्यक्तव्यक्तमस्फुटं लिङ्गं तत्प्राग्रूपम्। लक्षणं पुनस्तदेव प्राग्रूपाद्विलक्षणम्। येन सकलदोषविशेषालिङ्गितः स्फुटलिङ्गो व्याधिर्लक्ष्यते लक्ष्यते। उपशयः सुखानुबन्ध्याहाराद्युपयोगः। एवंविधेनाहारादिकेन हि तस्य पीडा नाभूदेवंविधेन चाभूदत उपशयाज्ज्ञायतेऽयं रोग इति। स व्याधिसात्म्यः स्वास्थ्यहेतुः सुखावहः। आप्तिर्निर्वृतिः सम्प्राप्तिरागतिर्जातिरित्यनर्थान्तरम्। एवं दुष्टेनैवं स्थानस्थितेनैवमनुगतेनानया कल्पनयैवंमार्गेण दोषेणेति परिकल्पनमत आप्त्याज्ञायतेऽयं रोग इति ॥ २२ ॥

वि०—रोगपरीक्षा के उपाय—निदान, प्रागूरूप, रूप, लक्षण, उपशय और आप्ति (सम्प्राप्ति) से रोग को जानना चाहिये ॥ २२ ॥

वक्तव्य—निदान—रोगोत्पादक हेतु; यह दो प्रकार का है; एक सन्निकृष्ट अर्थात् समीपवर्त्ती और दूसरा विप्रकृष्ट अर्थात् दूरवर्ती। वह उपशय तथा इनमें सन्निकृष्ट कारण-रूक्ष-लघु, शीतादि द्रव्य का उपयोग। विप्रकृष्ट यथा-प्रमेह रोग को उत्पन्न करने वाले आहार-बिहार का चिरकाल से अभ्यास।

प्राग्रूप—रोग की उत्पत्ति से पहले के लक्षण—रोग एक राजा है; जिस प्रकार राजा की सवारी में कुछ लोग राजा के आगे चलते हैं; कुछ साथ में चलते हैं, और कुछ पीछे चलते हैं, उसी प्रकार रोग में भी जो लक्षण रोग के आगे चलते हैं; वे प्राग्रूप या पूर्वरूप; जो लक्षण रोग के साथ चलते हैं, वे रूप और जो लक्षण रोग के पीछे चलते हैं, वे उपद्रव होते हैं। यह प्राग्रूप दो प्रकार का है—सामान्य और विशेष; जैसा आगे कहेंगे 'श्रमोऽरतिर्विवर्णत्वम्।' इत्यादि। ये ज्वर के सामान्य पूर्वरूप हैं; और जम्भाई का अधिक आना, यह वातज्वर का विशेष पूर्वरूप है।

उपशय—सुखानुबन्धी-आहार-औषध आदि का उपयोग। इस रोग में इस आहार से या इस औषध से आराम होता है वह उपशय तथा इस औषध या इस आहार से नहीं होता, वह अनुपशय कहलाता है। यथा-तेल मलने से सन्धिवात शान्त होता है किन्तु आमवात बढ़ता है। इस साधन का उपयोग गूढ-लक्षणों वाले रोग की परीक्षा में क्रियावाला है, 'गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां परीक्षेत।'

आप्ति—इसके पर्य्याय-सम्प्राप्ति, आगति और जाति है; रोग किस प्रकार उत्पन्न हुआ; किस प्रकार आगे चला और किस प्रकार से सम्पूर्ण रूप में दिखाई दिया। यह विकार सम्प्राप्ति है।

उपशयादिप्रसङ्गे च देशकालावप्युपयुज्येते। अतस्तावपि पठति—

भूमिदेहप्रभेदेन देशमाहुरिह द्विधा।

स०—इहास्मिन्नायुर्वेदशास्त्र आचार्या द्विविधं द्विप्रकारं देशमाहुः कथयन्ति—भूमिभेदेन देहभेदेन च।

वि०—देश—आयुर्वेद में देश दो प्रकार का है—भूमि और देह।

चरक में भी कहा है—'देशस्तु भूमिरातुरश्च। आतुरस्तु खलु कार्यदेशः।'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूमिदेश उच्यते—

जाङ्गलं वातभूयिष्ठमानूपं तु कफोल्बणम् ॥ २३ ॥
साधारणं सममलं त्रिधा भूदेशमादिशेत् ।

स०—भूदेशं पुनस्त्रिधा त्रिप्रकारमादिशेत् । तत्र जाङ्गलो देशोऽल्पोदकतरुपर्वतत्वेन वक्ष्यमाणलक्षणो वातभूयिष्ठो वातप्रचुरः । तत्र जातौषधिखगपुरुषमृगादयो वातप्रधाना भवन्ति, प्रचुरोदकवृक्षो यो निर्वातो दुर्लभातपः सोऽनूप इति । स च कफप्रधानः । तज्जाश्चौषध्यादयः स्निग्धा भवन्ति । साधारणः पुनरुभयलक्षणो मध्यपतितो व्यामिश्ररूपः । स च सममलो वातादिसमदोषः । अत्र दोषा एव मलशब्देनोक्ताः । वक्ष्यति हि । देहस्य मलिनीकरणादाहारमलत्वाच्च मलाः ॥ २३ ॥

वि०—भूमिदेश—तीन प्रकार का है; यथा-जांगल इसमें वायु की प्रधानता रहती है; दूसरा आनूपदेश-इसमें कफ की प्रधानता रहती है; और तीसरा साधारण देश-इसमें वातादि समान रूप में रहते हैं ॥ २३ ॥

वक्तव्य—यहाँ पर शरीर को मलिन बनाने से वातादि दोषों को मल शब्द से कहा है। यथा—'देहस्य मलिनी-करणादाहारमलत्वाच्च-मलाः ॥' (संग्रह. सू. अ. २०) देह-देश प्रकृति भेद से अनेक प्रकार का होता है। भूमि-देश के लिये चरक में—'त्रिविधः खलु देशः—जाङ्गलः, आनूपः साधारणश्चेति। तत्र जाङ्गलः पर्याकाशभूयिष्ठः·······वातपित्त-बहुलः। अथानूपः·········पवनकफप्रायो ज्ञेयः। अनयोरेव द्वयोर्देशयोः·········साधारणगुणयुक्तः साधारणो ज्ञेयः ॥' (चरक क. अ. १।८) साधारण भूमि के लिये सुश्रुत में 'सर्व-लक्षणसम्पन्ना भूमिः साधारणी स्मृता ।' (सु. सू. अ. ३६।१४)

भेषजस्य सम्यग्योगहेतुं कालमाह—

क्षणादिर्व्याध्यवस्था च कालो भेषजयोगकृत् ॥ २४ ॥

स०—कालो द्विविधः क्षणादिलक्षणो व्याध्यवस्था लक्षणश्च । भेषजस्यौषधस्य योगं करोति । तदर्थसम्पादनसामर्थ्यं करोतीत्यर्थः । भेषजस्य योगो भेषजयोगः तं करोति । क्षणादिः प्रसिद्धः । आदिग्रहणाल्लवत्रुटिमुहूर्तयामाहोरात्रपक्ष-मासर्त्वयनसंवत्सराणां परिग्रहः । क्षणादिकालस्योदाहरणम् । यथा—"पूर्वाह्णे वमनं देयं मध्याह्ने तु विरेचनम् । मध्याह्ने किंचिदावृत्ते वस्तिं दद्याद्विचक्षणः ॥" व्याध्यवस्था साम-निराममृदुमध्यतीक्ष्णत्वात्तत्तद्योग्यौषधविसृष्टिः । यथा—"लङ्घनं स्वेदनं कालो यवागूस्तिक्तको रसः । मलानां पाचनानि स्युर्यथावस्थं क्रमेण वा ॥" यथा—"ज्वरे पेयाः कषायाश्च सर्पिः क्षीरं विरेचनम् । ष्यहं वा षडहं युंज्याद्वीक्ष्यदोषबला-बलम् ॥" यथा—"मृदुज्वरो लघुर्देहश्चलिताश्च मला यदा । अचिरज्वरितस्यापि भेषजं योजयेत्तदा ॥" अस्यामवस्थायां दत्तमौषधमारोग्याय भवति ॥ २४ ॥

वि०—काल—काल दो प्रकार का है; एक क्षणादि और दूसरा व्याधि की अवस्था, इनका उपयोग औषध के प्रयोग में किया जाता है ॥ २४ ॥

वक्तव्य—काल का अर्थ समय है; औषध के देने में समय का विचार किया जाता है; यह काल संवत्सर और रोगी की अवस्थाभेद से दो प्रकार का है, इसी को नित्यग अर्थात् सांवत्सरिक और आवस्थिक या अवस्थाजन्य कहा जाता है। सांवत्सरिक काल-अयन भेद से दो प्रकार का है तथा शीत-उष्ण और वर्षा के भेद से तीन प्रकार का है; ऋतु भेद से छः प्रकार का है; मास भेद से बारह प्रकार का है; पक्ष भेद से चौबीस प्रकार का है; प्रहर आदि के भेद से अनेक प्रकार का है। इसी सांवत्सरिक काल को क्षणिक भी कहते हैं। इसके काष्ठा, कला, नाडिका, मुहूर्त्त, अहोरात्र, पक्ष, मास, ऋतु, अयन और वर्ष भेद हैं। औषध में इसका विचार—'पूर्वाह्णे वमनं देयं मध्याह्ने तु विरेचनम्। मध्याह्ने किंचिदावृत्ते वस्तिं दद्याद् विचक्षणः ॥' इसके अतिरिक्त प्राग्भक्त, अभक्त आदि का भी विचार है।

रोगी की अवस्था—'आतुरावस्थास्वपि तु कार्याकार्यं प्रति कालाकालसंज्ञा; तद्यथा-अस्यामवस्थायामस्य भेषजस्याकालः; कालः पुनरन्यस्येति ।' जैसे—नवज्वर में कषाय नहीं देना चाहिये; छः दिन के पीछे ज्वर में कषाय-कल्पना देनी चाहिये। यथा—'ज्वरे पेयाः कषायाश्च सर्पिः क्षीरं विरेचनम्। ष्यहं वा षडहं युञ्ज्याद्वीक्ष्य दोषबलाबलम् ॥' इसी से भट्टारक चरक मुनि ने कहा है—'नह्यतिपतितकालमप्राप्तकालं वा भेषजमुपयुज्यमानं यौगिकं भवति; कालो हि भैषज्य-प्रयोगपर्याप्तिमभिनिर्वर्त्तयति ॥' (चरक वि. अ. ८।१३७)

तच्चौषधं द्विप्रकारमाह—

शोधनं शमनं चेति समासादौषधं द्विधा ।

स०—यत्किञ्चिज्जगत्यौषधं सम्भवति तदनेकप्रकारं सम्भवदपि द्वैरूप्यानतिक्रमाच्छोधनशमनलक्षणात् समा-सात्संक्षेपतो द्विधेत्युक्तम् । एकं शोधनरूपमपरं शमनरूप-मिति । शोधनं यत् कुपितान् दोषान् बहिर्निःसार्य रोगोप-शमनं करोति । शमनं यत्स्वस्थानस्थितानामेव साम्यहेतुः ।

वि०—औषध के दो भेद—संक्षेप से औषध दो प्रकार का है—शोधन और शमन।

वक्तव्य—जो औषध दोषों को शरीर से बाहर करता है, वह शोधन औषध है; और जो औषध दोषों को शरीर से बाहर नहीं करता, अपितु शरीर में ही शान्त कर देता है; वह शमन औषध है। वस्तुतः शोधन और शमन दोनों लंघन हैं किन्तु यहाँ बृंहण औषध का भी शमन-औषध में ही अन्तर्भाव होता है। इनमें से दोष की अत्यन्त अधिकता में शोधन औषध देना चाहिए, दोष के अल्प, अधिक या क्षीण होने पर शमन-औषध देनी चाहिये।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

औषधमुक्तं तस्य विषयमाह—

शरीरजानां दोषाणां क्रमेण परमौषधम् ॥ २५ ॥
बस्तिर्विरेको वमनं तथा तैलं घृतं मधु ।

स०- शरीरजानां वातादीनां क्रमेण यथासंख्येन परिपाट्योद्देशनिर्देशेन परमौषधं प्रधानौषधं वस्त्यादिवमनांतं शोधनरूपं तैलादिमध्वंतं शमनरूपम् । तेन वातस्य वस्तिर्गुदप्रणिधेयस्नेहक्काथादि परमौषधम् । पित्तस्य विरेको मुखपीतं गुदमार्गेणांतःस्थितस्य निःसारणं परमौषधम् । कफस्य वमनं मुखेन पीतं तेनैव दोषस्य निःसारणं परमौषधमिति शोधनरूपेण दोषाणामौषधम् । तैलादि तु शमनस्वरूपेणौषधम् । तथेति क्रमेणैव वातस्य तैलं पित्तस्य घृतं कफस्य माक्षिकं परमौषधम् । प्रधानमौषधमिति यावत् ॥ २५ ॥

वि०—परमौषध—वातादि शारीर दोषों के लिए प्रधान शोधन औषध-क्रम से—वात के लिये बस्ति; पित्त के लिये विरेचन और कफ के लिये वमन है। इसी प्रकार वात के लिए प्रधान शमन औषध तैल, पित्त के लिए प्रधान शमन औषध घृत; और कफ के लिए प्रधान शमन औषध मधु है ॥ २५ ॥

कायादिदेशमाश्रित्य सर्वत्र सममेव शरीरजातानां दोषाणां क्रमेण परमौषधमुक्तम् । अथ मानसयोर्दोषयोः किंतत्परमौषधं स्यादिति तदर्थमाह—

धीधैर्यात्मादिविज्ञानं मनोदोषौषधं परम् ॥ २६ ॥

स०—मनोदोषयो रजस्तमसोः रोगविघ्नकारि धैर्यादिकं परमौषधम् । धीश्च धैर्यं चात्मादिविज्ञानं च तत्तथाविधम् । तत्र धीर्बुद्धिर्बाह्याध्यात्मिकानां भावानां हिताहितपरिच्छेदविभागकारिणी । धैर्यं धृतिश्चेतसः स्थिरत्वमचापलम् । येन प्रतिषिद्धेषु न प्रवर्तते अहितेषु च न सीदति । आत्मविज्ञानं योगाभ्याससमाधिना परमात्मस्वरूपविज्ञानम् । आदिग्रहणाज्ज्ञानविज्ञानस्मृतिदेशकालादीनां परिग्रहः । मनोदोषसमुत्थकामादिजरोगार्थः परशब्दो विशेषणत्वेन निर्दिष्टः ॥ २६ ॥

वि०—मानसिक दोषों के लिए उत्कृष्ट औषध—धी, धृति और आत्मा आदि का ज्ञान करना है ॥ २६ ॥

वक्तव्य—धी अर्थात् बुद्धि—जिसके द्वारा मनुष्य सबको यथार्थ देखता है। धृति-धैर्य-जो-नियमन-नियन्त्रण करती है—'धृतिस्तु नियमात्मिका।' चरक में कहा है—'मानसं प्रति भैषज्यं त्रिवर्गस्यान्ववेक्षणम् । तद् विद्यसेवा विज्ञानमात्मादीनां च सर्वशः ॥' (च. सू. अ. ११।४७)

एवं तावदनेन सकलचिकित्सितमुक्तं, तच्च पादचतुष्टययुक्तं कार्यकरं तदर्थमाह—

भिषग् द्रव्याण्युपस्थाता रोगी पादचतुष्टयम् ।
चिकित्सितस्य निर्दिष्टं, प्रत्येकं तच्चतुर्गुणम् ॥ २७ ॥

स०—चिकित्सितस्य रोगोपशमलक्षणस्य । पादचतुष्टयमंगचतुष्टयमुक्तं प्रत्येकं तच्चतुर्गुणमेवं षोडशगुणं चिकित्सितं भेषजं भिषजो भाषन्ते । भिषग्वैद्यः । तस्य प्राधान्यादग्रे निर्देशः । तथा चागमः—"योक्ता प्रयोक्ता शास्ता च प्रधानो भिषगत्र तु ॥" तथा संग्रहेऽपि—"यद्वैद्ये विगुणे पादा गुणवंतोऽप्यनर्थकाः । सपादहीनानप्यार्तान् गुणवान्यश्च यापयेत् ॥ चिकित्सायास्तमेवातः प्रधानं कारणं विदुः ।" द्रव्याण्यौषधानि । उपस्थाता परिचारकः । रोगी आतुरः । एतत्पादचतुष्टयं निर्दिष्टमाचार्येण ॥ २७ ॥

वि०—चिकित्सा पाद—चिकित्सा के चार पाद हैं; वैद्य; औषध; परिचारक और रोगी । इन चारों में प्रत्येक के चार गुण हैं ॥ २७ ॥

वक्तव्य—पाद अर्थात् पैर; चार पैर होने से इसके गिरने का भय नहीं; चिकित्सा में पूर्ण सफलता की आशा इन चार पादों से रहती है। इन चारों पादों के फिर चार पाद (गुण) हैं इस प्रकार से चिकित्सा सोलह गुण वाली है; इसी से कहा है—'चतुष्पादं षोडशकलं भेषजमिति भिषजो भाषन्ते।' कारणं षोडशगुणं सिद्धौ पादचतुष्टयम् । विज्ञाता शासिता योक्ता प्रधानं भिषगत्र तु ॥' (चरक)। इन चारों में मुख्य वैद्य ही है, क्योंकि उसके बिना ये तीनों पाद निरर्थक हैं, और वैद्य योग्य हो तो इन निरर्थक पादों से भी काम निकाल लेता है। इसी से संग्रह में कहा है—'यद् वैद्ये विगुणे पादा गुणवन्तोऽप्यनर्थकाः । स पादहीनानप्यार्त्तान् गुणवान् यश्च यापयेत् । चिकित्सायास्तमेवातः प्रधानं कारणं विदुः ॥'

तेषां गुणानाह—

दक्षस्तीर्थात्तशास्त्रार्थो दृष्टकर्मा शुचिर्भिषक् ।

स०—दक्षः कर्मणि चतुरः । तीर्थादुपाध्यायाद्विहितागमादात्तो गृहीतः शास्त्रार्थो येन स तीर्थात्तशास्त्रार्थः । आगमप्राप्तशास्त्रस्वरूपः । बहुशो दृष्टं कर्म येन चिकित्सालक्षणं स दृष्टकर्माऽभ्यस्तकर्मा शतशश्चिकित्सितरोगः । शुचिः कायवाङ्मनोव्यापारैर्मलीमसैरपरामृष्टोऽलिप्सावानर्थोपजीविकाहेतोर्न करोति परं धर्मोपार्जनेनेति शुचिः ।

वि०—वैद्य के गुण—वैद्य को दक्ष, तीर्थात्तशास्त्रार्थ, दृष्टकर्मा और शुचि होना चाहिये।

वक्तव्य—दक्ष-चतुर; तीर्थात्तशास्त्रार्थ-उपाध्याय से शास्त्र के अर्थ को पूर्ण रूप से ग्रहण किया हुआ; दृष्टकर्मा-बहुत बार जिसने कर्म को-चिकित्सा कर्म को देखा हो; शुचि-कायिक, मानसिक और वाणी के दोषों से रहित, अर्थात् अन्दर और बाहर से पवित्र; इस प्रकार का वैद्य होना चाहिये। दक्ष—वैद्य को लोकव्यवहार में निष्णात होने के साथ-साथ अपने कार्य में भी चतुर होना जरूरी है; अर्थात् उत्तम सूझ—बूझवाला हो। तीर्थात्तशास्त्रार्थ—भली प्रकार पढ़े

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचार्य से शास्त्र के अर्थ को उत्तमता से समझे। चरक में कहा है—'पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं सर्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं क्लेशक्षमं शिष्यवत्सलमध्यापकज्ञानसमर्थं चेति। एवं गुणो ह्याचार्यः सुक्षेत्रमार्त्तवो मेघ इव सस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति॥' (च. वि. अ. ८।४) दृष्टकर्मा—कर्म-चिकित्सा कर्म को भली प्रकार देखा हुआ होना चाहिये। जो मनुष्य इस ज्ञान से रहित होते हैं, वे पूर्ण सफलता प्राप्त नहीं कर सकते। इसलिए कहा है—'यस्तु केवलशास्त्रज्ञः कर्मस्वपरिनिष्ठितः। स मुह्यत्यातुरं प्राप्य प्राप्य भीरुरिवाहवम्॥ यस्तु कर्मसु निष्णातो धाष्ट्यच्छास्त्रबहिष्कृतः। स सत्सु पूजां नाप्नोति वधं चार्हति राजतः॥ उभावेतावनिपुणावसमर्थौ स्वकर्मणि। अर्धवेदधरावेतावेकपक्षाविव द्विजौ॥' (सु. सू. अ. ३।४८-५०) शुचि—वैद्य को अन्तः और बाह्य से सदा पवित्र होना चाहिये। पवित्रता के लिए 'नीचनखरोम्णा शुचिना शुक्लवस्त्रपरिहितेन'''अनुद्धतवेशेन सुमनसा कल्याणाभिव्याहारेणाकुहकेन बन्धुभूतेन भूतानां वैद्येन विशिखाऽनुप्रवेष्टव्या॥' रोगी अपने सगे-सम्बन्धी सबसे शङ्कित रहता है; परन्तु वैद्य के ऊपर विश्वास रखकर अपना जीवन उसको सौंप देता है; इसलिए वैद्य को अपने गुणों को बढ़ाने में एवं रोगी के कष्टों को दूर करने में सदा तत्पर रहना चाहिये।

औषधमपि चतुर्विधम्—

बहुकल्पं बहुगुणं सम्पन्नं योग्यमौषधम्॥ २८॥

स०—बहवः कल्पा यस्मिन् भवन्ति स्वरसक्वाथचूर्णाद्यास्तद्बहुकल्पं व्याधीनां निवारणक्षमं न तु लवणवदेककल्पम्। तद्धि सुखमुपयुज्यते। नानाशक्तयो हि सत्त्वाः। बहवो गुणा यस्य गुरुमन्दादयस्तद्बहुगुणम्। अथवा यदनेकरोगविनाशनसमर्थम्। सम्पन्नं संपत्तियुक्तं न विपन्नम्। प्रशस्तभूमिदेशजातम्। तथा च ग्रंथः—"धन्वसाधारणे देशे समे सन्मृत्तिके शुचौ। श्मशानचैत्यायतनश्वभ्रवल्मीकवर्जिते। इति।" प्रशस्तभूमिदेशजातादिगुणयुक्तम्। अथवा पाकसंस्कारादियुक्तम्। योग्यं दातुं यद्यत्राऽर्हति तच्च योग्यम्। व्याधिदेशकालदोषदूष्यदेहवयोबलादीन् ज्ञात्वा युज्यते दीयत इति तद्योग्यं रोगस्य रोगिणश्च॥ २८॥

वि०—औषध के गुण—अनेक कल्पना के योग्य; अनेक गुण वाली; सम्पन्न और योग्य औषध उत्तम है॥ २८॥

वक्तव्य—बहुकल्पम्-जिस औषध की स्वरस, क्वाथ, चूर्ण आदि बहुत-सी कल्पनायें बनाई जा सकें। बहुगुण-जिस औषध में गुरु, मन्द आदि बहुत-से गुण हों; बहुत स्थानों पर काम में आ सके। सम्पन्न—सम्पत्तियुक्त-दूषित न हो; अर्थात् कृमि, पानी, अग्नि आदि से दूषित न हो। योग्यता—जिस रोग के लिए उपयोग में औषध आ रही है; उस रोग को दूर करने की उसमें योग्यता होनी चाहिये। इसी से कहा है—'बहुता तत्र योग्यत्वमनेकविधकल्पना। सम्पच्चेति चतुष्कोऽयं द्रव्याणां गुण उच्यते॥' सुश्रुत में—'प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम्। युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम्॥ दोषघ्नमग्लानिकरमविकारि विपर्यये। समीक्ष्य दत्तं काले च भेषजं पाद उच्यते॥' यदि औषध उत्तम-उपर्युक्त गुणवाला होगा तो अवश्य रोगी के रोग को नष्ट कर सकेगा।

उपस्थातापि चतुर्विधः—

अनुरक्तः शुचिर्दक्षो बुद्धिमान् परिचारकः।

स०—अनुरक्तो दृढभक्त आतुरस्य। शुचिः कायवाङ्मनोव्यापारैर्दुष्टैरपरामृष्टः। दक्षः सर्वचेष्टासु चतुरः। बुद्धिमान् विशिष्टया बुद्ध्या युक्तः। प्रवीण इति यावत्।

वि०—परिचारक के गुण—रोगी में स्नेह रखने वाला, पवित्र, चतुर, और समझदार परिचारक होना चाहिए।

वक्तव्य—सेवा करने वाले को स्वामी में स्नेह-ममता होनी चाहिए, तभी वह मन लगाकर सेवा कर सकता है। उसको अन्दर और बाहर से पवित्र-ईमानदार होना चाहिए, साथ ही अपने कार्य में दक्ष-प्रवीण होना आवश्यक है। इसके अतिरिक्त समझदार हो, बुद्धि का उपयोग करनेवाला हो। इसीलिए चरक में कहा है 'उपचारज्ञता दाक्ष्यमनुरागश्च भर्त्तरि। शौचं चेति चतुष्कोऽयं गुणाः परिचरे जने॥' (च. सू. अ. ९।८) सुश्रुत में—स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे। वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः॥'

रोग्यपि चतुर्विधः—

आढ्यो रोगी भिषग्वश्यो ज्ञापकः सत्त्ववानपि॥२९॥

स०—आढ्यो धनवान्। भिषग्वश्यो वैद्यायत्तस्तदुक्तकारी। ज्ञापको निदानादीनामावेदको वैद्यं रोगाहारविहारादीनामन्वयव्यतिरेकं बोधयितुं समर्थः। सत्त्ववान् धैर्ययुतो मोहवर्जितः। धैर्येण प्रायश्चित्तवच्चिकित्सां करोति। अपिः संभावनार्थे॥ २९॥

वि०—रोगी के गुण—रोगी-वैद्य के उपदेशों को भी ध्यान में रक्खे। वैद्य के अधीन रहने वाला; रोग को बता सकने वाला, तथा—धैर्यशाली होना चाहिए॥ २९॥

वक्तव्य—रोगी को ऐसा होना आवश्यक है कि वह चिकित्सा के लिए सब साधन जुटा सके। इसी से कहा है—'अनेन विधिना राजा राजमात्रोऽथवा पुनः। यस्य वा विपुलं द्रव्यं स संशोधनमर्हति॥' (चरक सू. अ. १५।१८) वातव्याधि के लिए तो स्पष्ट कहा है—'कालेन महताऽव्यानां यत्नात् सिध्यन्ति वा न वा'॥ इसलिए सुश्रुत में—'आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि। आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते॥' भिषग्वश्य-रोगी को वैद्य के वश में रहने वाला होना चाहिए; अर्थात् वैद्य जैसा बताये वैसा करे-मनमानी न करे। ज्ञापक-रोग का सम्पूर्ण विवरण-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अपनी शिकायतें वैद्य को बता सके; वैद्य के प्रश्नों का उत्तर दे सके। सत्त्ववान् का अर्थ धैर्यशाली हो; अर्थात् क्लेश को सहन कर सके; रोग या औषध से उत्पन्न कष्ट को सहन कर सके। ऐसा न होने पर औषध बरतना मुश्किल होता है।

इसके अतिरिक्त, चरक ने 'स्मृति' एक और गुण रोगी का कहा है। यथा—'स्मृतिर्निर्देशकारित्वमभीरुत्वमथापि च। ज्ञापकत्वं च रोगाणामातुरस्य गुणाः स्मृताः ॥' रोगी की स्मृति ठीक होनी चाहिए। वह भूल न जाये, पिछला इतिहास रोग का बता सके। साधनसंपन्न, (चि. अ. ३) रोगी को डरपोक नहीं होना चाहिए; क्योंकि विषाद से रोग बढ़ता है; इसीसे सुश्रुत में कहा है-'सुहृदो विक्षिपन्त्याशु कथाभिर्व्रणवेदनाः। आश्वासयन्तो बहुशः स्वनुकूलाः प्रियंवदाः' ॥ (सु. सू. अ. १९।८)

सुखसाध्यादिकस्य व्याधिचतुष्टयस्य लक्षणमुच्यते—

(साध्योऽसाध्य इति व्याधिर्द्विधा, तौ तु पुनर्द्विधा।
सुसाध्यः कृच्छ्रसाध्यश्च, याप्यो यश्चानुपक्रमः ॥)
सर्वौषधक्षमे देहे यूनः पुंसो जितात्मनः।
अमर्मगोऽल्पहेत्वग्ररूपरूपोऽनुपद्रवः ॥ ३० ॥
अतुल्यदूष्यदेशर्तुप्रकृतिः पादसम्पदि।
ग्रहेष्वनुगुणेष्वेकदोषमार्गो नवः सुखः ॥ ३१ ॥

स०—सर्वौषधक्षमे देहे उत्पन्नो व्याधिः सुखसाध्यः सुखोपायः। तथा च ग्रंथः—'सुखसाध्यः सुखोपायः कालेनाल्पेन साध्यते।' सर्वाण्यौषधानि यः क्षमते सहते तीक्ष्णमध्यमृदुरूपाणि नानादेशजानि शमनानि तथा शोधनरूपाणि तथा विषक्षारादीनि। यूनः वयस्यस्य तरुणस्येत्यर्थः। पुंसो न स्त्रियाः। पुंग्रहणं स्त्रीनिवृत्त्यर्थम्। यतस्तस्याः सर्वदा भीरुत्वमबुद्धिमत्त्वं चातो यथोक्तानुरूपगुणाभावः। सा तु यस्मात्तीक्ष्णोष्णौषधानि न सहते सौकुमार्यादियोगात्। जितात्मनोऽलोलुपस्य। जित आत्मा येन। विषयाभिलाषं परिहरतः। अमर्मगोऽमर्मस्थः मर्माणि शिरोहृदयबस्तिप्रभृतीनि तेषु गच्छतीति मर्मगः न मर्मगोऽमर्मगो हृत्कंठादिपीडाकरणासमर्थः। अल्पहेत्वग्ररूप इति। हेतुश्चाग्ररूपं च रूपं तानि हेत्वग्ररूपरूपाण्यल्पानि हेत्वग्ररूपरूपाणि यस्य स तथाविधः। हेतुर्निदानम्। अग्ररूपं पूर्वरूपम्। रूपं लक्षणम्।, एतान्यल्पानि यस्य। अनुपद्रव इति। न विद्यते उपद्रवो यस्योत्पन्नस्य व्याधेरनन्तरं जायते योऽन्यो व्याधिर्न तल्लक्षणभूतोऽप्रधानो न यथास्वलक्षणस्तदुपक्रमनिरोधकः स उपद्रवः। तथा चागमः—"व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः। उपक्रमविघाती च स ह्युपद्रव उच्यते ॥" अतुल्यदूष्यदेशर्तुप्रकृतिरिति। दूष्यश्च देशश्च ऋतुश्च प्रकृतिश्च ता दूष्यदेशर्तुप्रकृतयः। अतुल्या दूष्यदेशर्तुप्रकृतयो यस्य। अतुल्या न सदृशाः। यथा दूष्ये मेदोमज्जादावनूपदेशे शीतर्तावातुरो वातप्रकृतिस्तस्य कुपितं पित्तं सुखसाध्यमिति। अतुल्यदूष्यो यथा श्लेष्मणा शीतेन रक्तमूष्णं दूषितम्। अतुल्यदेशो व्याधिर्यथा—अनूपदेशे पित्तसंभूतः। अतुल्यर्तुर्यथा—शरदि कफोद्भवः। अतुल्यप्रकृतिर्यथा—पित्तप्रकृतेः श्लेष्मोद्भवो व्याधिः नन्वतुल्यदूष्यदेशर्तुप्रकृतित्वादसौ कृच्छ्रसाध्यो यथा वा याप्यो न सुखसाध्योऽनेकसुखोपक्रमसाध्यत्वात्। यतो दूष्यादीनामतुल्यत्वात्परस्परमन्य एवोपक्रमः। एकसुखोपक्रमः सुखसाध्यो व्याधिः। अत एव साध्ययाप्यपरित्याज्या मेहाः श्लेष्मपित्तवातोत्थाः समासमक्रियतया महात्ययतयापि चेत्येवं निर्दिशति। अत्रोच्यते। तथा प्रभावत्वात्प्रमेहाख्यस्य व्याधेर्यदुत श्लेष्मप्रमेहः समक्रियत्वात्साध्यः। पित्तप्रमेहो विषमक्रियत्वाद्याप्यः। महात्ययत्वाच्च वातप्रमेहः प्रत्याख्येयः। किंचातुल्यदूष्यदेशर्तुप्रकृतित्वान्महारंभो निष्प्रत्यनीको व्याधिर्जायतेऽतोऽसौ न सुखसाध्यः। कुत्रचिद्व्याधौ तुल्यदूष्यादिरपि सुखसाध्यत्वेन ज्यायान्। तथा च ग्रन्थः—"ज्वरे तुल्यर्तुदोषत्वं प्रमेहे तुल्यदूष्यता। रक्तगुल्मे पुराणत्वं सुखसाध्यस्य हेतवः ॥" पादसंपदि भिषगादीनां चतुर्णां पादानां संपत्समृद्धिस्तस्यां सत्यामंगचतुष्टये परिपूर्णे सति। ग्रहेष्वनुगुणेष्विति। ग्रहाः सूर्यादयस्तेष्वनुगुणेष्वनुकूलराशिस्थितेषु शोभनस्थानगतेषु सत्सु। एकदोषमार्ग इति। दोषश्च मार्गश्च दोषमार्गम्। एकं दोषमार्गं यस्य स तथोक्तः। दोषो वातादिः। मार्गस्त्रिविधः शाखादिर्वक्ष्यमाणो बाह्याभ्यंतरमध्यभेदेन। तेनैकेन वातादीनामन्यतमेन दोषेण यो जातो न द्वाभ्यां त्रिभिर्वा तथैकेनापि मार्गेण बाह्येन मध्येनाभ्यंतरेण वा जातो नवो न जरठः। अचिरोत्पन्न इत्यर्थः। यस्माद्वत्सरातीता व्याधयोऽसाध्याः। स तथाविधो व्याधिः सुखेन साध्यते। तथा च ग्रंथः-'सुखसाध्यः सुखोपायः कालेनाल्पेन साध्यते' ॥ ३०-३१ ॥

वि०—चार प्रकार के रोग—साध्य और असाध्य भेद से रोग दो प्रकार के हैं। ये दोनों रोग फिर दो-दो प्रकार के हैं; यथा—साध्य रोग-सुखसाध्य और कृच्छ्रसाध्य भेद से दो प्रकार का है। और असाध्य भी याप्य और अनुपक्रम (प्रत्याख्येय) दो प्रकार का होता है। इनमें सुखसाध्य रोग-रोगी का शरीर सब प्रकार की ओषधियों को सहन कर सके; रोगी युवा हो; पुरुष हो; संयमी हो; रोग मर्म स्थान में न गया हो; थोड़े कारणों से पैदा हुआ हो; रोग के पूर्व रूप और लक्षण कम हों, रोग में किसी प्रकार का उपद्रव न हो; दूष्य, देश, ऋतु और प्रकृति-ये चारों पृथक्-पृथक् रूप से असमान हों; चिकित्सा के चारों पाद गुणशाली हों; सूर्य आदि ग्रह अनुकूल हों—रोग एक दोषवाला और एक मार्गवाला हो; रोग नया हो; तो रोग सुखसाध्य होता है ॥ ३०-३१ ॥

वक्तव्य—चिकित्सा का उद्देश्य रोगी को स्वस्थ करने का होता है। इसमें चिकित्सा में प्रवृत्त होने से पूर्व वैद्य को देखना पड़ता है कि यह रोग साध्य है या असाध्य क्योंकि असाध्य रोग की चिकित्सा करने में—उसे 'अर्थविद्यायशो'

Digitized by Madhuban Trust, Delhi

हानिमुपक्रोशमसंग्रहम् । प्राप्नुयान्नियतं वैद्यो योऽसाध्यं समुपाचरेत् ॥' (चरक सू. अ. १०।८) ये हानियाँ होती हैं। इसलिए कहा है—'साध्यासाध्यविभागज्ञो ज्ञानपूर्वं चिकित्सकः । काले चारभते कर्म, यत्तत् साधयति ध्रुवम् ॥' इसलिए चिकित्सा में प्रवृत्त होने से पूर्व चिकित्सक को रोग की साध्यता एवं असाध्यता का निश्चय करना जरूरी है।

यह साध्यासाध्य दो प्रकार का है; यथा—'सुखसाध्यं' मतं साध्यं कृच्छ्रसाध्यमथापि च । द्विविधं चाप्यसाध्यं स्याद्याप्यं यच्चानुपक्रमम् । साध्यानां त्रिविधश्चाल्प-मध्यमोत्कृष्टतां प्रति । विकल्पो; न त्वसाध्यानां नियतानां विकल्पना॥' (च. सू. अ. १०।९-१०) इनमें—

सुखसाध्य रोग—(१) रोगी का शरीर सब प्रकार के औषध को सहन करनेवाला हो; इसी से कहा है—'तत्र वयःस्थानां दृढानां प्राणवतां सत्त्ववतां च सुचिकित्स्या व्रणा एकस्मिन् वा पुरुषे यत्रैतद् गुणचतुष्टयं तस्य सुखसाधनीयतमाः ।' (सु.सू. अ. २३।३) (२) रोगी को युवा होना चाहिए—इसीसे कहा है-'तत्र वयःस्थानां प्रत्यग्रधातुत्वादाशु व्रणा रोहन्ति ।'—इसके विपरीत गर्भिणी, बालक और वृद्ध में रोग कष्टसाध्य होते हैं। (३) रोगी को पुरुष-लिङ्ग होना चाहिए—स्त्री में या नपुंसक में भीरुता होने से रोग असाध्य या कष्टसाध्य होते हैं, यथा—'तत्र साध्या अपि व्याधयः प्रायेणैषां दुश्चिकित्स्यतमा भवन्ति । तद्यथा-श्रोत्रिय-नृपति-स्त्री-बाल-वृद्ध-भीरु''' इत्यादि । इनमें स्त्रियों के रोग विशेष कर भीरुता तथा लज्जा के कारण असाध्य होते हैं। जैसे—'पारतन्त्र्यादवैशारद्यात् सततमुपचारानुरोधाद् वा वेगानुदीर्णानुपरुन्धत्याः ।' (४) रोगी को संयमी होना चाहिए—असंयमी मनुष्य पथ्य का पालन नहीं कर सकता; इसीलिए आतुर पाद में 'भिषग् वश्यः' शब्द दिया है। (५) रोग मर्म स्थान में न पहुँचा हो। यथा 'दशैवायतनान्याहुः प्राणा येषु प्रतिष्ठिताः । शङ्खौ, मर्मत्रयं, कण्ठो रक्तं शुक्रौजसी गुदम् ॥' इनमें मर्मत्रय हृदय, बस्ति; शिर हैं, इन मर्मों में रोग न पहुँचा हो। (६) थोड़े कारणों से उत्पन्न हो। (७) थोड़े पूर्वरूप वाला हो। (८) थोड़े लक्षणों वाला हो-(९) रोग में उपद्रव न हो-अर्थात् रोग के उत्तरकालजन्य दूसरी व्याधि नहीं हो। (१०) दूष्य-रक्तादि, देश-आनूप आदि, ऋतु वसन्त आदि, प्रकृति-वातादि, ये रोग के समान न हों, अर्थात् दूष्य-मेद, मज्जा आदि में, आनूप देश में, शीतऋतु में, वातप्रकृति रोगी में कुपित पित्त सुखसाध्य है। अतुल्य दूष्य यथा—शीत कफ से उष्ण प्रकृति रक्त दूषित हो; अतुल्य देश में यथा—आनूप देश में पित्तजन्य रोग; अतुल्य ऋतु यथा—शरद में कफजन्य रोग सुखसाध्य है। (११) चिकित्सा के चारों पाद सम्पूर्ण होने पर रोग सुखसाध्य होता है। इसीसे कहा है—'कारणं षोडशगुणं सिद्धौ पादचतुष्टयम् ।' 'चतुष्पादं षोडशकलं भेषजमिति भिषजो भाषन्ते' ॥ (चरक सू. अ. ९।३) 'एते पादाश्चिकित्सायाः कर्मसाधनहेतवः ॥' (सु. सू. अ. ३४।१६) (१२) ग्रहों के अनुकूल होने पर रोग साध्य होता है; सूर्यादि ग्रह जब अनुकूल हों तब रोग सुखसाध्य है; । (१३) दोष एकमार्गगामी हो तो सुखसाध्य है-दोष-वातादि; मार्ग-तीन प्रकार का है—शाखा; मर्मास्थिसन्धियाँ और कोष्ठ; इनमें शाखा का मार्ग रोग का बाह्य मार्ग है; बस्ति, हृदय आदि मर्म तथा अस्थिसंधियाँ मध्यम मार्ग हैं, और महास्रोत, आभ्यन्तर रोगमार्ग है। इनमें एकमार्ग का रोग सुखसाध्य है। (१४) रोग नूतन उत्पन्न हुआ हो, पुराना न हुआ हो, तो वह साध्य है; एक साल पुराना होने पर रोग असाध्य या कष्टसाध्य हो जाता है। इन सब लक्षणों से सम्पूर्ण रोग सुखसाध्य है: अर्थात् थोड़े ही उपाय से और जल्दी ही शान्त होता है। यथा—'सुखसाध्यः सुखोपायः कालेनाल्पेन साध्यते ॥'

चरक में—'हेतवः पूर्वरूपाणि रूपाण्यल्पानि यस्य च । न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत् ॥' न च कालगुणैस्तुल्यो न देशो दुरुपक्रमः। गतिरेका नवत्वं च रोगस्योपद्रवो-न च ॥ दोषश्चैकः समुत्पत्तौ देहः सर्वौषधक्षमः । चतुष्पादोपपत्तिश्च सुखसाध्यस्य लक्षणम् ॥' (च. सू. अ. १०।११-१३)

कृच्छ्रसाध्यं व्याधिमाह—

शस्त्रादिसाधनः कृच्छ्रः सङ्करे च ततो गदः ।

स०—यो गदो रोगः शस्त्रादिसाधनः शस्त्रादिभिः साध्यते स कृच्छ्रसाध्यः कृच्छ्रप्रतीकारो महद्भिरुपायैः साध्यतेः तथा चिरेण । तथा च ग्रंथः—"कृच्छ्रैरुपायैः कृच्छ्रैस्तु महद्भिश्च चिरेण च ।" आदिग्रहणेन क्षाराग्निकर्मविषलेपादयो गृह्यन्ते। तथा संकरे च ततः पूर्वोक्तात्साध्यलिंगात्संकीर्णत्वे सति यो गद उत्पन्नः सोऽपि कृच्छ्रसाध्यः। चशब्दः समुच्चये । ततस्तस्मादुक्तसाध्यलक्षणाद्यः संकरे द्वित्रिविपर्यये सति स्थितः। तथा च युवा आतुरः किंतु न विजितात्मा विजितात्मा वा किंतु रोगो मर्मस्थानगः। सर्वौषधक्षमे देहे न जातः किंतु वृद्धः। कदाचिद्युवा न सर्वौषधक्षमो देहः। एवमनया दिशा सर्वमप्यूह्यम् ।

वि०—कृच्छ्रसाध्य रोग—जो रोग शस्त्र-क्षार-अग्नि से साध्य होते हैं; तथा जिन रोगों में मिश्रित दोष होते हैं, वे कष्टसाध्य हैं।

वक्तव्य—जो रोग कठिनाई से; बहुत उपायों से और देर में अच्छा होता है; वह कष्टसाध्य है, यथा-'कृच्छ्रैरुपायैः कृच्छ्रस्तु महद्भिश्च चिरेण च ॥' (संग्रह. सू. अ. २)। चरक में 'निमित्तपूर्वरूपाणां रूपाणां मध्यमे बले। कालप्रकृतिदूष्याणां सामान्येऽन्यतमस्य च ॥ गर्भिणीवृद्धबालानां नात्युपद्रवपीडितम् । शस्त्रक्षाराग्निकृत्यानामनवं कृच्छ्रदेशजम् ॥ विद्यादेकपथं रोगं नातिपूर्णचतुष्पदम् । द्विपथं नातिकालं वा कृच्छ्रसाध्यं द्विदोषजम् ॥'

हेमाद्रि की मान्यता है कि—संकर तीन प्रकार का है; अल्प, मध्यम और बहुविपर्यय। इसमें अल्पविपर्यय में रोग

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कष्टसाध्य, मध्यमविपर्यय में कृच्छ्रतर और बहुविपर्यय में अतिशय कष्टसाध्य होता है।

याप्योऽत उच्यते—

शेषत्वादायुषो याप्यः पथ्याभ्यासाद्विपर्यये ॥ ३२ ॥

स०—बाहुल्येन विपर्यये साध्यलक्षणविपरीतत्वे सत्यायुषो जीवितस्य शेषत्वादक्षीणत्वान्मारयितुमसमर्थपथ्यैराहारविहारैर्याप्यो यापनीयो नासौ प्रत्याख्येयः। एतावानेवास्य प्रत्याख्येयाद्व्याधेर्विशेषो यदायुःशेषत्वं याप्यस्य व्याधेरायुःशेषमात्रं वर्जयित्वा यदन्यत्तत्सर्वं समानं प्रायेणास्य च प्रत्याख्येयस्य व्याधेः। कस्य विपर्यये सति प्रकृतत्वात्सुखसाध्यस्य। पथ्यैराहारविहारैरभ्यसनमभ्यासः पुनःपुनः करणं तस्माद्धिताहारविहारसेवनाद्याप्यः। स च चिकित्सायामल्पं सुखं दत्त्वा पुनः सोऽल्पेनैव हेतुना प्रतीयते। तथा च ग्रन्थः—"दत्त्वाल्पं सुखमल्पेन हेतुना स प्रजायते। याति नाशेषतां रोगः कर्मजो नियतायुषः। प्रपतन्निव विष्कम्भैर्धार्यस्तत्रातुरो हितैः" ॥ ३२ ॥

वि०—याप्यरोग—सुखसाध्य लक्षणों के विपरीत होने पर—पथ्य-आहार-विहार के अभ्यास से अर्थात् बार-बार बरतने से आयु के शेष होने पर रोग याप्य होता है।

वक्तव्य—याप्य के लिये—सुश्रुत में 'यापनीयं विजानीयात् क्रिया धारयते तु यम्। क्रियायां तु निवृत्तायां सद्य एव विनश्यति॥ प्राप्तक्रिया धारयति याप्यव्याधितमातुरम्। प्रपतिष्यदिवागारं विष्कम्भः साधु योजितः॥' (सु.सू.अ. २३।१०-११) अर्थात् गिरते हुए मकान को टेका देकर जैसे रोक दिया जाता है; उसी प्रकार क्रिया-चिकित्सा से जो रोग शान्त रहता है; वह याप्य है। इसी से चरक में कहा है—'शेषत्वादायुषो याप्यमसाध्यं पथ्यसेवया। लब्धाल्पसुखमल्पेन हेतुनाऽऽशु प्रवर्त्तकम्॥' इस प्रकार के रोग प्रायः निम्न लक्षणों से युक्त होते हैं। 'गम्भीरं बहुधातुस्थं मर्मसन्धिसमाश्रितम्। नित्यानुशायिनं रोगं दीर्घकालमवस्थितम्॥ विद्याद् द्विदोषजम्॥'

प्रत्याख्येय उच्यते—

अनुपक्रम एव स्यात्स्थितोऽत्यन्तविपर्यये।
औत्सुक्यमोहारतिकृद् दृष्टरिष्टोऽक्षनाशनः॥ ३३ ॥

स०—न विद्यत उपक्रमः प्रतीकारो यस्य सोऽनुपक्रमोऽचिकित्स्यः। प्रत्याख्येय इति यावत्। कोऽसावनुपक्रमो योऽत्यंतविपर्यये स्थितः योऽर्थाद्याप्यलक्षणादवशिष्टायुःशेषरूपादत्यंतविपर्यये स्थितः सर्वक्रियापथातिक्रांतो मज्जाशुक्रादिगंभीरधातुगतो मर्मसंधिसमाश्रितः सोऽनुपक्रम एवाचिकित्स्यः। साधयितुमशक्यत्वाद्। तथौत्सुक्यादिकृदपि। औत्सुक्यं च मोहश्चारतिश्च ताः करोतीत्यौत्सुक्यमोहारतिकृत्। औत्सुक्यं गर्वादिविषयोत्कंठा। मोहो वैचित्त्यं चित्तनाशोऽज्ञानम्। अरतिरसुखं न कुत्रचिदवस्थितिः स्थानासनादिष्वनिर्वृतिश्चेतसः। एतावतो यः करोति सोऽनुपक्रमः। तथा दृष्टरिष्टोऽक्षनाशनः दृष्टं रिष्टं मरणख्यापकं चिह्नं यस्मिन् स दृष्टरिष्टः तथाऽक्षनाशन इति। अक्षाणींद्रियाण्युच्यन्ते। चक्षुरादीन्यपि नाशयति सोऽक्षनाशनः इन्द्रियोपरोधी रोगोऽनुपक्रमो यः शीघ्रमिंद्रियविघातकृत्। एवं पुरा परीक्ष्य व्याधिचिकित्सामारभेत। अन्यथाऽवश्यं स्वार्थादिहानिमवाप्नुयाद्वैद्यः। तथा च ग्रन्थः—"व्याधिं पुरा परीक्ष्यैवमारभेत ततः क्रियाम्। स्वार्थविद्यायशोहानिमन्यथा ध्रुवमाप्नुयात्" ॥ ३३ ॥

वि०—असाध्य—जो रोग सुखसाध्य के लक्षणों के अतिशय विपरीत लक्षणों से युक्त हो; जिसमें उत्सुकता-विषयोत्कण्ठा; मोहचित्तनाश, और अरति-बेचैनी हो; मृत्युसूचक चिह्न जिस रोग में स्पष्ट हो; चक्षु आदि इन्द्रियाँ जिसमें नष्ट हो जायें—वह असाध्य है। ॥ ३३ ॥

वक्तव्य—असाध्य के लिये चरक में—'तद्वत्, प्रत्याख्येयं त्रिदोषजम्। क्रियापथमतिक्रान्तं सर्वमार्गानुसारिणम्॥ औत्सुक्यारतिसंमोहकरमिन्द्रियनाशनम्॥ दुर्बलस्य सुसंवृद्धं व्याधिं सारिष्टमेव च॥' (चरक सू. ११।२०)।

साध्यलक्षणयुक्तोऽप्यातुरो नोपक्रमणीय इति दर्शयति—

त्यजेदार्तं भिषग्भूपैर्द्विष्टं तेषां द्विषम् द्विषम्।
हीनोपकरणं व्यग्रमविधेयं गतायुषम्॥ ३४ ॥
चण्डं शोकातुरं भीरुं कृतघ्नं वैद्यमानिनम्।

स०—एवंविधमार्तमातुरमुपक्रम्यमपि त्यजेत्परिहरेत्। भिषग्भूपैर्द्विष्टं भिषग्भिस्तथा भूपै राजभिर्द्विष्टम्। वैद्या राजानश्च यं द्विषंति। तथा तेषां द्विषं शत्रुं भिषग्भूपान्यो द्वेष्टि तमपि त्यजेत्। द्विषं शत्रुं चात्मनः। हीनोपकरणमिति। उपकरणविकलं हीनचिकित्सांगम्। व्यग्रं कार्यबहुलमन्यकार्यापेक्षिणं कार्यांतरासक्तचेतसम्। अविधेयं भिषजः तदाज्ञां यो न करोति तमपि त्यजेत्। गतायुषं परिक्षीणजीवितम्। चंडं सहसापकारकरणबुद्धिं क्रूरकर्माणम्। शोकातुरं स्त्र्यादिविरहोत्थेन शोकेन क्षुधार्तम्। भीरुं सभयम्। कृतघ्नं यः कृतोपकारोऽप्यपकारं करोति। वैद्यमानिनम् अवैद्योऽपि यो वैद्यमिवात्मानं मन्यते नैवौषधं करोति मूढस्तमपि त्यजेत्॥३४॥

वि०—चिकित्सा के अयोग्य रोगी—वैद्य और राजाओं से जो द्वेष करता है, अथवा वैद्य या राजा जिससे द्वेष करते हैं; जो द्वेषी है, जिसके पास चिकित्सा के साधन नहीं; जो काम में फँसा है-जिसे अवकाश नहीं; वैद्य की आज्ञा को जो नहीं मानता-मनमानी करता है; जिसकी आयु समाप्त हो गई हो; क्रोधी, शोक में डूबे; डरपोक; किये हुये को न मानने वाले; जो वैद्य न होते हुए भी अपने को वैद्य मानता हो; इस प्रकार के रोगियों की चिकित्सा वैद्य न करे ॥ ३४ ॥

वक्तव्य—चरक में (१) 'दोषावसेचनमन्यद्वा भेषजं प्राप्तकालमप्यातुरस्य नैवंविधस्य कुर्यात्। तद्यथा-अनपवादप्रतीकारस्याधनस्यापरिचारकस्य वैद्यमानिनश्चण्डस्यासूयक-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्य तीव्राधर्मरुचेरति क्षीणबलमांसशोणितस्यासाध्यरोगोपहतस्य मुमूर्षुलिङ्गान्वितस्य चेति ॥ एवंविधं ह्यातुरमुपचरन् भिषक् पापीयसाऽयशसा योगमृच्छति ॥' (चरक वि. अ. ३।४५) (२) 'चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च। सद्राजभिषजां द्विष्टस्तद्द्विष्टः शोकपीडितः ॥ यादृच्छिको मुमूर्षुश्च विहीनः करणैश्च यः। वैरी वैद्यविदग्धश्च श्रद्धाहीनः सुशङ्कितः ॥ भिषजामविधेयाश्च नोपक्रम्या भिषग्विदा। एतानुपचरन् वैद्यो बहून् दोषानवाप्नुयात् ।' (चरक सुश्रुत में-कितव, दुर्बल; व्याधिगोपक, कृपण, इनकी भी चिकित्सा का निषेध किया गया है। उपर्युक्त मनुष्यों की चिकित्सा करने में धर्म, अर्थ, काम और यश-इनकी हानि होती है; इसलिये इनकी चिकित्सा का निषेध है।

एवं च प्रथमेऽध्याये सकलतंत्रार्णवस्य तात्पर्यं व्याख्यातमनन्तरं सुखस्मरणार्थमध्यायनामसंग्रह उच्यते—

तन्त्रस्यास्य परं चातो वक्ष्यतेऽध्यायसंग्रहः ॥ ३५ ॥

स०—तन्त्र्यन्ते धार्यन्तेऽनेनायुर्वेदार्था इति तन्त्रम्। अध्यायानां संग्रहः संक्षेप एकत्र राशीकरणमतोऽनन्तरं सुखस्मरणाय मया वक्ष्यते ॥ ३५ ॥

वि०—इसके आगे इस तन्त्र के अध्याय-संग्रह की व्याख्या करेंगे।

वक्तव्य—प्राचीन शास्त्रों में यह परिपाटी है कि वे प्रथम अध्याय में या प्रकरण के अन्त में अथवा ग्रन्थ के अन्त में ग्रन्थ के अध्यायों का नामकीर्त्तन, अपना परिचय आदि बातों को लिख देते हैं। इससे यह लाभ है कि ग्रन्थ की नियम-वस्तु का परिचय प्रारम्भ में हो जाता है। यथा—'स्वे स्वे स्थाने यथास्वं च स्थानार्थं उपदेक्ष्यते। सविंशमध्यायशतं शृणु नाम क्रमागतम् ॥' (चरक) (२) 'बीजं चिकित्सितस्यैतत् समासेन प्रकीर्तितम्। सविंशमध्यायशतमस्य व्याख्या भविष्यति ॥' (सुश्रुत)

आयुष्कामदिनर्त्वीहारोगानुत्पादनद्रवाः।
अन्नज्ञानान्नसंरक्षामात्राद्रव्यरसाश्रयाः ॥ ३६ ॥
दोषादिज्ञानतद्भेदतच्चिकित्साद्व्युपक्रमाः।
शुद्ध्यादिस्नेहनस्वेदरेकास्थापननावनम् ॥ ३७ ॥
धूमगण्डूषदृक्सेकतृप्तियन्त्रकशस्त्रकम्।
शिराविधिः शल्यविधिः शस्त्रक्षाराग्निकर्मिकौ ॥ ३८ ॥
सूत्रस्थानमिमेऽध्यायास्त्रिंशत्—

स०—इमे पूर्वोक्तास्त्रिंशदध्यायाःसूत्रस्थानमुक्तम्। आयुष्कामश्च दिनर्त्वीहे च रोगानुत्पादनं च द्रवश्चेति द्वंद्वः। ईहा चर्या चेष्टेत्येकोऽर्थः। तेन आयुष्कामीयो दिनचर्या ऋतुचर्या रोगानुत्पादनीयो द्रवद्रव्यविज्ञानीयोऽन्नस्वरूपविज्ञानीयोऽन्नसंरक्षा मात्राशितीयो द्रव्यादिविज्ञानीयो रसभेदीयो दोषादिविज्ञानीयो दोषभेदीयो दोषोपक्रमणीयो द्विविधोपक्रमणीयः शोधनादिगणसंग्रहः स्नेहविधिः स्वेदविधिर्वमनविरेचनविधिर्वस्तिविधिर्नस्यविधिर्धूमविधिर्गंडूषविधिराश्चोतनांजनविधिस्तर्पणपुटपाकविधिर्यंत्रविधिः शस्त्रविधिः सिराव्यधविधिः शल्याहरणविधिः शस्त्रकर्मविधिः क्षाराग्निकर्मविधिः। सूचनात्सूत्रम् सूच्यतेऽनेन सकलस्तंत्रार्थं इति सूत्रस्थानं सकलस्य तंत्रस्य शिरःस्थानीयम् ॥ ३६-३८ ॥

वि०—इस ग्रन्थ में छः स्थान है' इनमें प्रथम सूत्रस्थान-तीस अध्यायों का है—यथा-आयुष्कामीय, दिनचर्या, ऋतु-चर्या, रोगानुत्पादनीय, द्रवद्रव्य विज्ञानीय, अन्नस्वरूप-विज्ञानीय; अन्नरक्षा, मात्राशितीय, द्रव्यादि-विज्ञानीय, रस-भेदीय, दोषादि-विज्ञानीय, दोषभेदीय, दोषोपक्रमणीय, द्विविधोपक्रमणीय, शोधनादि-संग्रह, स्नेहविधि, स्वेदविधि, वमन-विरेचन-विधि, नस्यविधि, धूमपान-विधि, गण्डूषादि, विधि, आश्च्योतनाञ्जन-विधि, तर्पण-पुटपाक-विधि, यन्त्र-विधि, शस्त्रविधि, शल्याहरण-विधि, सिराव्यधविधि, शस्त्र-कर्म-विधि, क्षाराग्निकर्मविधि ॥ ३६-३८ ॥

वक्तव्य—सूत्र स्थान के नामकरण के विषय में कहा है—'यथा सुमनसां सूत्रं संग्रहार्थं विधीयते। संग्रहार्थं तथाऽर्थानामृषिणा संग्रहः कृतः ॥' (चरक सू. अ. ३०।८९) अथवा सूचना के कारण इस स्थान को सूत्र स्थान कहते हैं—यथा 'सूचनात्सूत्रम्-सूच्यतेऽनेन सकलतन्त्रार्थं इति सूत्रस्थानम्'-यहां पर ग्रन्थ के सब विषय पिरोये जाते हैं, अर्थात् जो आगे कहना है उन सब विषयों को यहां पर संक्षेप में सब रूप में कह दिया जाता है। यह स्थान इस तन्त्र का शिर है, यथा—'श्लोकस्थानं समुद्दिष्टं तन्त्रस्यास्य शिरः शुभम्। श्लोकार्थः संग्रहार्थश्च श्लोकस्थानमतः स्मृतम्। चतुष्कानां महार्थानां स्थानेऽस्मिन् संग्रहः कृतः ॥'

अधुना शारीरमुच्यते। शारीरं शारीरस्थानमुच्यते। किंस्थानमध्यायसंग्रहः—

—शारीरमुच्यते।
गर्भावक्रान्तितद्व्यापदङ्गमर्मविभागिकम् ॥ ३६ ॥
विकृतिर्दूतजं षष्ठम्—

स०—तत्र गर्भावक्रांतिशारीरम्। तस्य व्यापत् तस्येति-गर्भपरामर्शः गर्भव्यापच्छारीरम् अंगविभागं शारीरम्। मर्मविभागं शारीरम्। विकृतिविज्ञानं शारीरम्। दूतविज्ञानीयं शारीरम्। एवमेते षडध्यायाः शारीरस्थानम् ॥ ३९ ॥

वि०—शारीर स्थान—गर्भावक्रान्ति, गर्भव्यापद्-विधि, अङ्गविभाग, मर्मविभाग, विकृतिविज्ञानीय और दूतादि-विज्ञानीय ये छ अध्याय शारीर स्थान में हैं ॥ ३९ ॥

वक्तव्य—शरीर से सम्बन्धित स्थान-शारीर स्थान हैं; इस स्थान की मुख्यता के लिये चरक में 'शारीरं सर्वथा सर्वं सर्वदा वेद यो भिषक्। आयुर्वेदं स कार्त्स्न्येन वेदलोक-सुखप्रदम् ॥' (चरक शा. अ. ६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निदानमुच्यते—

—निदानं सार्वरोगिकम् ।
ज्वरासृक्श्वासयक्ष्मादिमदाद्यर्शोऽतिसारिणाम् ॥४०॥
मूत्राघातप्रमेहाणां विद्रध्याद्युदरस्य च ।
पाण्डुकुष्ठानिलार्तानां वातास्रस्य च षोडश ॥४१॥

स०—सर्वरोगनिदानम् । ज्वरनिदानम् । रक्तपित्तकासनिदानम् । श्वासहिक्कानिदानम् । राजयक्ष्मादिनिदानम् । मदात्ययादिनिदानम् । अर्शोनिदानम् अतिसारग्रहणीदोषनिदानम् । मूत्राघातनिदानम् । प्रमेहनिदानम् । विद्रधिवृद्धिगुल्मनिदानम् । उदरनिदानम् । पाण्डुशोफविसर्पनिदानम् । कुष्ठश्वित्रकृमिनिदानम् । वातव्याधिनिदानम् । वातशोणितनिदानम् । इत्येवं षोडशाध्याया निदानस्थानम् ॥ ४०-४१ ॥

वि०—निदानस्थान—सब रोगों से सम्बन्धित है यथा—ज्वर निदान, रक्तपित्त-कास निदान, श्वास-हिक्का निदान, राज-यक्ष्मा निदान, मदात्यय निदान, अर्शोनिदान, अतिसार-ग्रहणीदोषनिदान, मूत्राघात निदान, प्रमेहनिदान, विद्रधि-वृद्धि-गुल्मनिदान, उदरनिदान, पाण्डु-शोफ-विसर्प निदान, कुष्ठ-श्वित्र-कृमि निदान, वातव्याधिनिदान, वातशोणित निदान-ये सोलह अध्याय निदान में हैं ॥ ४१ ॥

चिकित्सितमुच्यते—

चिकित्सितं ज्वरे रक्ते कासे श्वासे च यक्ष्मणि ।
वमौ मदात्ययेऽर्शःसु, विशि द्वौ, द्वौ च मूत्रिते ॥४२॥
विद्रधौ गुल्मजठरपाण्डुशोफविसर्पिषु ।
कुष्ठश्वित्रानिलव्याधिवातास्रेषु चिकित्सितम् ॥४३॥

द्वाविंशतिरिमेऽध्यायाः—

स०—चिकित्सितस्थानं द्वाविंशतिरध्यायाः । ज्वरचिकित्सितम् । रक्तपित्तचिकित्सितम् । कासचिकित्सितम् । श्वासहिक्काचिकित्सितम् । राजयक्ष्मचिकित्सितम् । छर्दिहृद्रोगतृष्णाचिकित्सितम् । मदात्ययचिकित्सितम् । अर्शश्चिकित्सितम् । अतीसारचिकित्सितम् । ग्रहणीचिकित्सितम् । मूत्राघातचिकित्सितम् । प्रमेहचिकित्सितम् । विद्रधिवृद्धिचिकित्सितम् । गुल्मचिकित्सितम् । उदरचिकित्सितम् । पांडुरोगचिकित्सितम् । श्वयथुचिकित्सितम् । विसर्पचिकित्सितम् । कुष्ठचिकित्सितम् । श्वित्रकृमिचिकित्सितम् । वातव्याधिचिकित्सितम् । वातशोणितचिकित्सितम् । इमे द्वाविंशतिरध्यायाश्चिकित्सितस्थानम् अत ऊर्ध्वं कल्पस्थानम् ॥ ४२-४३ ॥

वि०—चिकित्सास्थान-ज्वरचिकित्सा, रक्तपित्तचिकित्सा, कासचिकित्सा, श्वास-हिक्काचिकित्सा, राजयक्ष्मचिकित्सा, छर्दि-हृद्रोग-तृष्णाचिकित्सा, मदात्ययचिकित्सा, अर्शश्चिकित्सा, अतीसारचिकित्सा, ग्रहणीदोषचिकित्सा, मूत्राघातचिकित्सा, प्रमेहचिकित्सा, विद्रधि-वृद्धिचिकित्सा, गुल्मचिकित्सा, उदर-चिकित्सा, पाण्डुरोग-चिकित्सा, श्वयथु-चिकित्सा, विसर्प-चिकित्सा, कुष्ठचिकित्सा, श्वित्र-कृमि-चिकित्सा, वातव्याधि चिकित्सा, वातशोणित चिकित्सा, ये बाइस अध्याय चिकित्सास्थान में हैं ॥ ४२-४३ ॥

—कल्पसिद्धिरतः परम् ।
कल्पो वमेर्विरेकस्य तत्सिद्धिर्बस्तिकल्पना ॥४४॥
सिद्धिर्बस्त्यापदां षष्ठो द्रव्यकल्पः—

स०—अत्र कल्पे वमनकल्पः विरेचनकल्पः वमनविरेचनव्यापत्सिद्धिः । बस्तिकल्पः । बस्तिव्यापत्सिद्धिः । षष्ठो भेषजकल्पः । इत्येवं षडध्यायाः कल्पसिद्धिस्थानम् ॥ ४४ ॥

वि०—कल्पसिद्धि स्थान—इसके आगे कल्प-सिद्धि स्थान है, इसमें वमनकल्प, विरेचन कल्प, वमन-विरेचन व्यापत् सिद्धि, बस्तिकल्प, बस्ति-व्यापत्-सिद्धि और भेषज कल्प-ये छः अध्याय हैं ॥ ४४ ॥

अत उत्तरं अतोऽस्मात्कल्पसिद्धिस्थानादूर्ध्वमुत्तरतंत्रम् ।

—अत उत्तरम् ।
बालोपचारे तद्व्याधौ तद्ग्रहे, द्वौ च भूतगे ॥४५॥
उन्मादेऽथ स्मृतिभ्रंशे, द्वौ द्वौ वर्त्मसु सन्धिषु ।
दृक्तमोलिङ्गनाशेषु त्रयो, द्वौ द्वौ च सर्वगे ॥४६॥
कर्णनासामुखशिरोव्रणे, भङ्गे भगन्दरे ।
ग्रन्थ्यादौ क्षुद्ररोगेषु गुह्यरोगे पृथग्द्वयम् ॥४७॥
विषे भुजङ्गे कीटेषु मूषकेषु रसायने ।
चत्वारिंशोऽनपत्यानामध्यायो बीजपोषणः ॥४८॥

स०—बालोपचरणीयः । बालामयप्रतिषेधः । बालग्रहप्रतिषेधः । भूतविज्ञानीयः । भूतप्रतिषेधः । उन्मादप्रतिषेधः । अपस्मारप्रतिषेधः । वर्त्मरोगविज्ञानीयः । वर्त्मरोगप्रतिषेधः । संधिसितासितरोगविज्ञानीयः । संधिसितासितप्रतिषेधः । दृष्टिरोगविज्ञानीयः । तिमिरप्रतिषेधः । लिङ्गनाशनप्रतिषेधः । सर्वाक्षिरोगविज्ञानीयः । सर्वाक्षिरोगप्रतिषेधः । कर्णरोगविज्ञानीयः । कर्णरोगप्रतिषेधः । नासारोगवि० । नसारोगप्र० । मुखरोगवि० । मुखरोगप्र० । शिरोरोगविज्ञा० । शिरोरोगप्र० । व्रणविज्ञानीयप्रति० । सद्योव्रणप्रति० । भगप्रति० । भगंदरप्रति० । ग्रंथ्यर्बुदश्लीपदादिवि० । ग्रंथ्यर्बुदादिप्रति० । क्षुद्ररोगवि० । क्षुद्ररोगप्र० । गुह्यरोगवि० । गुह्यरोगप्रति० । विषप्रति० । सर्पविषप्र० । कीटलूतादिविषप्र० । मूषिकालर्कविष० । रसायनाध्यायः । वाजीकरणाध्यायः । इति । एवमेते चत्वारिंशदध्याया उत्तरतंत्रम् । तदिति । बालस्य परामर्शः । द्वौ द्वाविति । वर्त्मनि द्वौ संधौ द्वौ यथासंख्येन । त्रय इति दृक्तमोलिंगनाशेषु प्रत्येकमेकैकः । ग्रंथ्यादिक्षुद्ररोगगुह्यरोगेषु पृथग्द्वयं प्रत्येकं द्वौ द्वौ । अनपत्यानामप्रजानां पुंसां चत्वारिंशोऽध्यायो बीजपोषणः शुक्रवृद्धिहेतुरिति ॥ ४५-४८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्यध्यायशतं विंशं षड्भिः स्थानैरुदीरितम् ॥ ४८ ॥

स०—इत्येवमनेन प्रकारेण सविंशमध्यायशतं षड्भिः स्थानैः सूत्रशारीरनिदानचिकित्साकल्पसिद्ध्युत्तरतन्त्रैरुदीरितमिति भवेत् ॥ ४८ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वाङ्गसुन्दराख्यायां सूत्रस्थान आयुष्कामीयोऽध्यायः प्रथमः ॥ १ ॥

वि०—इसके आगे उत्तर स्थान है। इसमें-बालोपचरणीय, बालामय-प्रतिषेध, बालग्रह-प्रतिषेध, भूतविज्ञानीय, भूत-प्रतिषेध, उन्माद प्रतिषेध, अपस्मार प्रतिषेध, वर्त्मरोग विज्ञानीय, वर्त्मरोग प्रतिषेध, सन्धिसितासितरोग विज्ञानीय, सन्धिसितासितरोग प्रतिषेध, दृष्टिरोग विज्ञानीय, तिमिर प्रतिषेध, लिङ्गनाश प्रतिषेध, सर्वाक्षिरोग विज्ञानीय, सर्वाक्षिरोग प्रतिषेध; कर्णरोगविज्ञानीय, कर्णरोग प्रतिषेध, नासारोग विज्ञानीय, नासारोग प्रतिषेध, मुखरोग विज्ञानीय, मुखरोग प्रतिषेध, शिरोरोग विज्ञानीय, शिरोरोग प्रतिषेध, व्रण प्रतिषेध, सद्योव्रण प्रतिषेध, भङ्ग प्रतिषेध, भगन्दर प्रतिषेध, ग्रन्थि-अर्बुद-श्लीपदादि विज्ञानीय; ग्रन्थि-अर्बुद-श्लीपदादि प्रतिषेध, क्षुद्ररोग विज्ञानीय, क्षुद्ररोग प्रतिषेध, गुह्यरोग विज्ञानीय, गुह्यरोग प्रतिषेध, विषप्रतिषेध, कीटलूतादिविषप्रतिषेध, मूषिकालर्कविषप्रतिषेध, रसायनाध्याय और वाजीकरण अध्याय—इस प्रकार चालीस अध्यायों का उत्तरस्थान है।

वक्तव्य—उत्तर का अर्थ-पिछला-अवशिष्ट भाग है; इसी को काश्यपसंहिता में 'खिलस्थान' शब्द से कहा है। सुश्रुत के उत्तर तन्त्र में शल्य से बचे शालाक्य, कायाचिकित्सा आदि के रोगों का वर्णन है; और चरक संहिता में-उत्तर तन्त्र का नाम मिलता है; यथा-'तस्मादेताः प्रवक्ष्यन्ते विस्तरेणोत्तरे पुनः'। परन्तु वह मिलता नहीं। इस ग्रन्थ के उत्तर तन्त्र में प्रथम पांच अध्यायों में कौमारभृत्य और भूतविद्या का तथा अन्तिम छः अध्यायों में विषतन्त्र, रसायन और बाजीकरण का समावेश कर दिया है—जिससे कि यह सम्पूर्ण आठ अङ्गों का प्रतिपादक हो गया है।

इति श्रीवैद्यपतिसिंहगुप्तसूनुवाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने आयुष्कामीयो नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

अथातो दिनचर्याऽध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—अथेति सर्वेष्वध्यायेषु मंगलार्थः। मांगलिको ह्याचार्यः। प्रत्यध्यायारंभे मंगलार्थमथशब्दं प्रयुंक्ते। दिने दिने चर्या दिनचर्या। दिनस्य वा चर्या दिनचर्या। चरणं चर्या। उभयलोकहितमाहारचेष्टितं प्रतिदिने यत्कर्तव्यं तमध्यायं व्याख्यास्यामः। प्रस्तुतादायुष्कामीयादध्यायादनंतरं कोऽस्य संबंधः। उच्यते। यस्मादायुष्कामेण पुरुषेण यत्प्रधानमायुष्यं तदासेव्यं प्रथमतस्तदन्यान्यपि यान्यायुष्याणि। अतः प्रथमं तावदाचारप्रधानेन भवितव्यम्। यत आचारादायुर्लभ्यत इत्याचार्याः। यद्यप्यत्र रात्रिचर्याऽपि विहिता तथाऽपि प्राधान्याद्दिनचर्याऽस्मिन्नध्याये निर्दिष्टा। अतो दिनचर्याध्यायोऽयमुच्यते।

वि०—अब इसके आगे 'दिनचर्या' नामक अध्याय का व्याख्यान करेंगे—जैसा कि भगवान् आत्रेय आदि महर्षियों ने कहा था।

वक्तव्य—आयुष्कामीय अध्याय के उपरान्त आचार का वर्णन आवश्यक है; क्योंकि आयु के लिये आचार अत्यावश्यक है; यथा-'आचाराल्लभते ह्यायुः' इसलिये आचार को बताने के लिये दिनचर्या अध्याय का व्याख्यान आयुष्कामीय के उपरान्त किया है। 'आचार' शब्द से आहार और विहार भी ग्रहण होता है। इनमें विहार दो प्रकार का है; नियत काल और अनियत काल। नियत काल विहार दो प्रकार का है; दैनन्दिन अर्थात् प्रतिदिन करने योग्य और आर्त्तव अर्थात् प्रत्येक ऋतु से सम्बन्धित। इस अध्याय में दिन सम्बन्धी विहार का वर्णन है; दिन व रात को भी दिन कहते है, अतः रात्रिचर्या का भी व्याख्यान इसी में है। चरण अर्थात् कर्त्तव्य को ही 'चर्या' कहते हैं।

अस्मिंस्तंत्रे आयुःपालनं प्रकृतम्। तद्द्विविधम्। स्वस्थवृत्तमातुरवृत्तं च। तत्र मंगलत्वात् स्वल्पवक्तव्यत्वादातुरोपयोगित्वाच्च स्वस्थवृत्तमेवादावुच्यते।

ब्राह्मे मुहूर्त्त उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः।

स०—रात्रेश्चतुर्दशो मुहूर्तो ब्राह्मो मुहूर्तो विषुवति समरात्रिदिने काले द्विघटिकालक्षणः। मुहूर्तस्य चेह द्विघटिकोपलक्षणार्थत्वात्सर्वस्मिन् काले रात्रेश्चतुर्घटिकावशेषे समुत्थानं कार्यमिति स्थितम्। स्वस्थो नीरोगः कल्पः स आयुषो यथोपचरितस्य जीवितस्य रक्षार्थं ब्राह्मे मुहूर्त उत्तिष्ठेदभ्युत्थानं कुर्यात्। मुहूर्तो नाडिकाद्वयम्। ब्रह्म ज्ञानं तदर्थमध्ययनाद्यपि ब्रह्म तस्य योग्यो मुहूर्तो ब्राह्मः पश्चिमयामस्य नाडिकाद्वयं तस्मिन् ब्राह्मे मुहूर्त उत्तिष्ठेत्। किंभूतः। स्वस्थोऽनातुरः। 'समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।' इति स्वस्थलक्षणम्। किमर्थमुत्तिष्ठेत्। रक्षार्थमायुषो जीवितस्य। तदा ह्युत्तिष्ठतो व्याध्यलक्ष्याद्यभाव एवायुषो रक्षा भवति। आतुरेण धातुसाम्यार्थं स्वप्तव्यमेव।

वि०—स्वस्थ पुरुष आयु की रक्षा के लिये ब्राह्म मुहूर्त्त में उठे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—इस आयुर्वेद तन्त्र में आयु की रक्षा मुख्य उद्देश्य है। यह स्वस्थ और रोगी दोनों के लिए पालनीय है। मङ्गल की दृष्टि से तथा इसमें वर्णित बहुत सा विषय रोगी के लिये भी उपयोगी होने से प्रथम स्वस्थ पुरुष के लिये आचार कहते हैं। इसमें प्रातः उठने का समय ब्राह्म मुहूर्त्त है—यह समय रात्रि का पश्चिम भाग है। इस समय में नीरोग पुरुष उठे। रोगी के लिए यह नियम नहीं; इसी से संग्रह में कहा है 'ब्राह्मे मुहूर्त्ते उत्तिष्ठेज्जीर्णाजीर्णं निरूपयन्'—अर्थात् भोजन के जीर्ण होने पर उठे और अजीर्ण होने पर न उठे क्योंकि अजीर्ण रोगी के लिये बिना भोजन किये दिन में सोना उत्तम है; यथा—'रसशेषे शयीत च'—सुश्रुत। 'दिवास्वप्नं प्रकुर्वीत सर्वाजीर्णप्रशान्तये'। इसलिये नीरोग पुरुष उठे। ब्राह्म अर्थात् ब्रह्म सम्बन्धी, ब्रह्म अर्थात् ज्ञान इससे सम्बन्धित मुहूर्त्त—प्रभातकाल। चूँकि शरीर-बुद्धि-मन सब ताजे होते हैं, थकान मिटी होती है, अतः भोर में जो याद किया जाता है वह स्मरण रहता है। इसी से चरक में कहा है-'कल्यः कृतक्षणः प्रातरुत्थायोपव्यूषं कृत्वाऽऽवश्यकमुपस्पृश्योदक……नमस्कृत्य समे शुचौ देशे सुखोपविष्टो मनःपुरःसराभिर्वाग्भिः सूत्रमनुक्रामन् पुनः पुनरावर्त्तयेद् बुद्धया सम्यगनुप्रविश्यार्थतत्त्वम्' (चरक वि. अ. ८)। इसलिये इस ब्राह्म मुहूर्त्त में आयु की रक्षा के लिये मनुष्य को उठना चाहिये। चूँकि इस समय उठने से नित्यकर्म करने का समय मिलने पर रोग नहीं होता जिससे आयु की रक्षा होती है।

शरीरचिन्तां निर्वर्त्य कृतशौचविधिस्ततः ॥ १ ॥

अर्कन्यग्रोधखदिरकरञ्जककुभादिजम् ।

प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम् ॥ २ ॥

कनीन्यग्रसमस्थौल्यं प्रगुणं द्वादशाङ्गुलम् ।

भक्षयेद् दन्तपवनं दन्तमांसान्यबाधयन् ॥ ३ ॥

स०—शरीरस्य चिंता शरीरचिंता जीर्णाजीर्णनिरूपणादिका तां निर्वर्त्य ततो मूत्रपुरीषादेः कृतशौचविधानस्ततोऽनन्तरं दन्तधावनमर्कादिकं भक्षयेत्। संग्रहेऽप्युक्तम्—'ब्राह्मे मुहूर्ते उत्तिष्ठेज्जीर्णाजीर्णं निरूपयन्।' इत्यादि। अर्कः सूर्याह्वः। न्यग्रोधो यक्षावासः। खदिरो गायत्री। करंजश्चिरिबिल्वः। ककुभोऽर्जुनः। आदिग्रहणेन मालतीकरवीरादिग्रहः। कथं भक्षयेत्। दंतानां मांसान्यबाधयन्नपीडयन्। प्रातः प्रत्युषसि भुक्त्वा दंतधावनकाष्ठरसं भक्षयित्वा। मृद्वग्रं कूर्चिताग्रम्। तथा कषायकटुतिक्तकम्। रसत्रयेण ह्यनेन मुखवैशद्यारोचकश्लेष्मापनयाः सम्यक् संपद्यंते। अर्काद्युपादानादेव कषादित्वे लब्धे कषायादिग्रहणं संग्रहादिगृहीतस्य संग्रहार्थं स्पष्टार्थं च। अर्कादिग्रहणमुदाहरणार्थं ज्ञेयम्। संक्षेपविवक्षया न दंतधावनस्य गणसंग्रहः। द्वादशाद्यंगुलप्रमाणत्वं श्लेष्मातकाद्यनिष्टदन्तधावननिषेधश्च तंत्रांतरोक्तमपि नेहोक्तम्। सुश्रुतेनोक्तम्—"अजग्धमनुपक्लिष्टं षडष्टद्वादशांगुलम्। प्रदेशनीमुखसमं मृदु स्याद्दंतधावनम्" ॥ १-३ ॥

वि०—शरीर की चिन्ता (जीर्णाजीर्णता आदि) का पूरा विचार करके मलोत्सर्ग करे। उसके उपरान्त आक, वट, खैर; करञ्ज और अर्जुन आदि वृक्षों की कषाय, कटु-तिक्त रस वाली दातुन—जिसका अग्रभाग कोमल हो; उस दातुन को प्रातः और भोजन के बाद भी चबाये। यह दातुन कनिष्ठिका अङ्गुलि के समान मोटी, सीधी तथा लम्बाई में बारह अङ्गुल होनी चाहिये। दातुन करते समय मसूड़ों को किसी प्रकार की हानि नहीं पहुँचानी चाहिये ॥ १-३ ॥

वक्तव्य—शरीर का विचार कर प्रातःकाल उठे अर्थात् स्वस्थ होने पर प्रातः उठकर अपना हित सोचे कि मुझे क्या करना है। जैसा कहा है-'ब्राह्मे मुहूर्त्ते उत्थाय चिन्तयेदात्मनो हितम्। नक्तं दिनानि मे यान्ति कथम्भूतस्य सम्प्रति। दुःखभाग् न भवत्येवं नित्यं सन्निहितस्मृतिः ॥' इसके बाद मूत्र-मल त्याग करे। मूत्र-मल के त्याग से शुद्ध होकर दातुन करे। यह दातुन आक आदि वृक्षों की हो। इसमें मुख्य गुण ये होने चाहिये। (१) दातुन का रस कषाय, कटु, तिक्त अर्थात् कफनाशक होना चाहिये; अर्थात् मधुर, अम्ल और लवण रस नहीं होना चाहिये-जैसा कहा है-'स्वाद्वम्ललवणं शुष्कं सुषिरं पूति पिच्छिलम्। पालाशमासनं दन्तधावनं पादुके त्यजेत् ॥' (२) दातुन का अग्रभाग कोमल होना चाहिये, सूखा या कड़ा नहीं होना चाहिये। (३) कनीष्ठिका अङ्गुली के समान मोटी होनी चाहिये, बहुत मोटी या पतली दातुन की कूँची ठीक नहीं बनेगी। मोटी दातुन से मसूड़े छिलने का भय है। (४) दातुन सीधी-सरल होनी चाहिये, टेढ़ी-मेढ़ी नहीं। (५) दातुन की लम्बाई बारह अङ्गुल होनी चाहिये जिससे पकड़ने में सुगमता रहे और पीछे से इसको चीर कर जिह्वा भी साफ की जा सके।

दातुन करने की विधि—दातुन करते समय मसूड़ों को किसी प्रकार की हानि नहीं होनी चाहिये; इसलिये एक एक दाँत को सीधा-खड़े रूप में रगड़ना चाहिये, आड़ा नहीं। इसमें ऊपर के दाँत नीचे को; और नीचे के दाँत ऊपर को रगड़ने चाहिये। इसीसे सुश्रुत में कहा है, एकैकं घर्षयेद् दन्तं मृदुना कूर्चकेन च। दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् ॥' दातुन के साथ मञ्जन-चूर्ण बरतने का भी सुश्रुत ने विधान किया है; साथ ही दातुन का चुनाव दोष और ऋतु के अनुसार करना चाहिये अर्थात् मुख का जो स्वाद हो उससे विपरीत रस वाली दातुन चुननी चाहिये। वायु के कारण मुख का स्वाद कषाय; पित्त के कारण कटु और कफ के कारण मधुर रहता है; इसलिये इसके विरुद्ध रस वाली दातुन चुननी चाहिये। इसी प्रकार वर्षा में वायु, शरद में पित्त और हेमन्त में कफ की अधिकता होती है; इसलिये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इसका विरोधी रस लेना चाहिये। इसी से सुश्रुत में कहा है—'अवेक्ष्यर्तुं च दोषं च रसं वीर्यं च योजयेत्। कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः॥ निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा। मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा॥'

दातुन के साथ चूर्ण या मञ्जन भी करने का विधान है; यह विधान सुश्रुत और अष्टाङ्गसंग्रह में है। इसके लिये त्रिकटु या तेजोवती (तेजवल) का चूर्ण बरतना चाहिये। इसके अतिरिक्त सैन्धव नमक और सरसों का तेल भी उत्तम है। इसके उपयोग से 'तद्दौर्गन्ध्योपदेहौ तु श्लेष्माणं चापकर्षति। वैशद्यमन्नाभिरुचिं सौमनस्यं करोति च॥' मुख की शुद्धता होती है।

इसके उपरान्त जीभ को साफ करना चाहिये। जीभ को साफ करने के लिये दातुन को चीर कर जीभ का मैल बाहर निकाल देना चाहिये। सुश्रुत में इसके लिये लकड़ी या सुवर्ण-चाँदी आदि की जीभी बनाने का उपदेश किया है; ये जीभी कोमल और चिकनी होनी चाहिये; इससे जीभ का मल दूर करे यथा—'जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च। तन्मलापहरं शस्तं मृदु श्लक्ष्णं दशाङ्गुलम्।'

दन्तधावन का निषेध—

नाद्यादजीर्णवमथुश्वासकासज्वरार्दिती।
तृष्णाऽऽस्यपाकहृन्नेत्रशिरःकर्णामयी च तत्॥४॥

स०—अजीर्णादीनां द्वंद्वः। एतानि विद्यन्ते यस्येति 'अत इनिठनौ'इति इनिः। एवं तृष्णास्येत्यादौ द्वंद्वादिनिश्च। तद्दंतधावनमजीर्णी न भक्षयेत्। एवं वमथ्वादीनां मत्वर्थीयांतानां सम्बन्धो योज्यः॥ ४॥

वि०—दातुन का निषेध—अजीर्ण, वमन, श्वास-कास, ज्वर और अर्दित रोगी, दातुन न करे। तृष्णा, मुखपाक, हृदय, नेत्र, शिर और कर्ण रोगी भी दातुन न करे॥ ४॥

वक्तव्य—सुश्रुत में भी इन्हीं अवस्थाओं में निषेध किया है; यथा—'न खादेद्गलताल्वोष्ठजिह्वारोगसमुद्भवे। अथास्यपाके श्वासे च कासहिक्कावमीषु च॥' इन अवस्थाओं में दातुन करने से रोग के बढ़ने की सम्भावना रहती है। इसके सिवाय 'दुर्बलोऽजीर्णभक्तश्च मूर्च्छार्त्तो मदपीडितः। शिरोरुजाऽऽर्त्तस्तृषितः श्रान्तः पानक्लमान्वितः। अर्दिती कर्णशूली च दन्तरोगी च मानवः॥' भी दातुन न करे।

सौवीराञ्जन (सुर्मा) के गुण—

सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत्।

स०—ततो, दन्तधावनभक्षणानंतरं सौवीराख्यमंजनं भजेत्। कस्मात् यतो हितमक्ष्णोः।

वि०—अञ्जन कर्म—नित्य प्रति आँखों में सौवीराञ्जन लगाना हितकारी है, अतः इसे लगाये।

वक्तव्य—सुश्रुत में सौवीराञ्जन के स्थान पर स्रोतोऽञ्जन बताया है; यथा—'मतं स्रोतोऽञ्जनं श्रेष्ठं विशुद्धं सिन्धुसम्भवम्। दाहकण्डूमलघ्नं च दृष्टिक्लेदरुजापहम्॥' अर्थात् स्रोतोऽञ्जन सिन्धु नदी से उत्पन्न हुआ है। सौवीराञ्जन के लिये भी चक्रपाणि ने कहा है कि 'सुवीरानदीभवं सौवीरम्' अर्थात् सुवीरा नदी से उत्पन्न अञ्जन सौवीर है। वास्तव में ये दोनों एक ही हैं; अर्थात् सौवीराञ्जन भी सिन्धु नदी से उत्पन्न होता है। इस देश में आज तक आँख में अञ्जन का रिवाज है। मुसलमान प्रायः नित्य अञ्जन करते हैं; इस देश के लोग अच्छे वीर होते हैं; इसलिये इस देश को 'सुवीर' और नदी को 'सुवीरा' कहा है। इस अञ्जन को नित्य प्रति करे। इस अञ्जन के करने से-आँखों में जलन एवं पलकों में मैल नहीं होती, जैसा कि संग्रह में कहा है—लोचने तेन भवतो मनोज्ञे सूक्ष्मदर्शने। व्यक्तत्रिवर्णे विमले सुस्निग्धघनपक्ष्मणी॥' अञ्जन करने से आँख के रोग नहीं होते।

रसाञ्जन की विधि—

चक्षुस्तेजोमयं तस्य विशेषाच्छ्लेष्मतो भयम्॥५॥
योजयेत्सप्तरात्रेऽस्मात्स्रावणार्थं रसाञ्जनम्।

स०—अस्मात्कारणात्स्रावणार्थे सप्तरात्रे सति रसांजनं दार्वीक्वाथसमुद्भवाख्यं योजयेत्। यस्माच्चक्षुस्तेजोमयमाग्नेयम्। यद्यपि पंचमहाभूतात्मकं सर्वमपि तथापि बाहुल्येन व्यपदेशात्तेजोमयमुच्यते। अत एव तद्रूपाण्यालोचयति। तथा च लोके कश्चिदाह—नरपतिरेतीति। न चासौ नराणामेव पतिः किंतर्हि नारीणामपीति। तस्य चक्षुषो वातपित्ताभ्यामपि भयमस्ति विशेषेण तु कफाद्भयं ततो रसांजनं योजयेत्॥ ५॥

वि०—आँख तेजोमय है; इसलिये उसे विशेषकर कफ से भय है; अतः कफ को बहाने के लिये सात रात पीछे (एक बार) आँखों में रसांजन का प्रयोग करना चाहिये॥ ५॥

वक्तव्य—शरीर में सब देवताओं का वास है; इसमें आँख सूर्य का प्रतिनिधि है; जिस प्रकार सूर्य सबको देखता है; या सूर्य के प्रकाश से सब दीखता है; उसी प्रकार आँख से मनुष्य देखता या आँख सब देखती है; इसी से कहा है—'सूर्यश्चक्षुषा'-सुश्रुत; इसलिये चक्षु को तेजोमय माना है; और उसको कफ से भय है; क्योंकि ये दोनों विरोधी हैं। कफ का अर्थ जल है; शिरोभाग में कफ की अधिकता है।

रसाञ्जन—इसका प्रयोग सप्ताह में एक बार करना चाहिये। रसांजन—'दार्वीक्वाथमजाक्षीरपादं पक्त्वा यदा घनम्। तदा रसाञ्जनाख्यं तन्नेत्रयोश्च प्रयोजयेत्'॥ अर्थात् दारुहल्दी के क्वाथ में चतुर्थांश बकरी का दूध मिलाकर पकाकर उसे रसक्रिया से घन बना लेना चाहिये। यह आँखों के लिये उत्तम है; जैसा कि कहा है 'रसाञ्जन कटुश्लेष्मविषनेत्रविकारनुत्'॥ आजकल भी दुखती आँख में रसौत का

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लेप करते हैं और रसौत को मधु में या पानी में मिलाकर आँख में बूँद भी डालते हैं।

अंजन का लाभ—'यथा हि कनकादीनां मणीनां विविधात्मनाम्। धौतानां निर्मला शुद्धिस्तैलचेलकचादिभिः॥ एवं नेत्रेषु मर्त्यानामञ्जनाश्च्योतनादिभिः। दृष्टिनिराकुला भाति निर्मले नभसीन्दुवत्'॥ अर्थात् जिस प्रकार मलिन स्वर्ण आदि की तेल, कपड़ा और बालों से शुद्धि की जाती है; उसी प्रकार आँखों को निर्मल बनाया जाता है। यह निर्मलता अंजन, आश्च्योतन आदि से की जाती है। आश्च्योतन के लिये आँवले का पानी उत्तम है।

नस्यादि सेवन विधि—

ततो नावनगण्डूषधूमताम्बूलभाग्भवेत् ॥ ६ ॥

स०—नावनादीनां नस्यादिविधिषु गुणा वक्ष्यमाणा विधानं च। तांबूलस्य तु वैशद्यारुचिहरत्वसौगंध्यादिगुणा प्रसिद्धा एव। नावनादीनां तांबूलांतानां द्वंद्वः। ततोऽञ्जनादनंतरं नावनगण्डूषधूमतांबूलानि भजते यः स एवंविधो भवेत्। 'भजो ण्विः' इति ण्विः॥ ६॥

वि०—अञ्जन के उपरान्त नावन (नस्य), गण्डूष, धूमपान और ताम्बूलचर्वण क्रमशः करे॥ ६॥

वक्तव्य—अञ्जन के पीछे नावन अर्थात् नस्य लेवे। नस्य के लिये अणुतैल का विधान है, अणुतैल-शिर के प्रत्येक अणु में नासा के द्वारा पहुँच जाता है: क्योंकि नासा शिर का द्वार है—'द्वारं हि शिरसो नासा तेन तद् व्याप्यहन्ति तान्'॥ (चरक. सि. अ. ९।८८)। नस्य की विधि आगे सूत्रस्थान में आयेगी—वहीं पर अणुतैल का विधान है। गण्डूष से अभिप्राय मुख में असञ्चारी द्रव की मात्रा से है; द्रव की जो मात्रा मुख में दायें-बायें फेरी जाये वह कवल है। इसके लिये तैल विशेषतः तिल या सरसों का उत्तम है। इसीसे चरक में कहा है—'न शूल्यन्ते न चाम्लेन हृष्यन्ते भक्षयन्ति च। परानपि खरान् भक्ष्यांस्तैलगण्डूषधारणाद्'॥

ताम्बूल—पान का रिवाज प्राचीन काल से है। इससे मुख की विशदता होती है। इसी से कहा है 'पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च मानवे। द्विपत्रमेकं पूगं च सचूर्णखदिरं च तत्'॥ प्राचीनकाल से पान के बीड़े की प्रथा सत्कार रूप में प्रचलित है; घर से निकलते समय पान खाकर जाते हैं; अतिथि के सत्कार में पान दिया जाता है।

रोगविशेष में ताम्बूल का निषेध—

ताम्बूलं क्षतपित्तास्ररूक्षोत्कुपितचक्षुषाम्।
विषमूर्च्छामदार्तानामपथ्यं शोषिणामपि ॥ ७ ॥

स०—क्षतं विद्यते येषां ते क्षताः। अर्शआदित्वादच्। एवं पित्तास्राः। उत्कुपितमभिष्यन्नं चक्षुरेकं द्वे वा येषां ते। ये च क्षताश्च पित्तास्राश्च रूक्षाश्चोत्कुपितचक्षुषश्च तेषामपथ्यमहितम्। तथा विषार्तानां मूर्च्छार्तानां मदार्तानां शोषिणां चेत्यपिशब्दस्यार्थः। शोषिणो राजयक्ष्मिणः॥ ७॥

वि०—जिन मनुष्यों को क्षत (उरःक्षत, क्षतकास) हो, रक्तपित्त रोगी, रूक्ष प्रकृति; जिनकी आँखें दुःखती हों (अभिष्यन्द हो); जो विष-मद-मूर्च्छा से पीड़ित हों, या जिनको शोष रोग हो—उनके लिये ताम्बूल भक्षण अपथ्य है।

वक्तव्य—सुश्रुत में कहा है—'रक्तपित्तक्षतक्षीणतृष्णामूर्च्छापरीतिनाम्। रूक्षदुर्बलमर्त्तानां न हितं मुखशोषिणाम्॥' इसलिये शोष शब्द से मुखशोष तथा राजयक्ष्मा दोनों ग्रहण करना चाहिये। क्षत से अभिप्राय उरःक्षत से है। ताम्बूल-कटु, उष्ण और तिक्त है; जैसाकि कहा है 'ताम्बूलं कटुतिक्तमुष्णमधुरं क्षारं कषायान्वितं, वातघ्नं कृमिनाशनं कफहरं दुर्गन्धिनिर्णाशनम्। वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनं, ताम्बूलस्य सखे त्रयोदश गुणाः स्वर्गेऽपि ते दुर्लभाः॥' इसलिये पित्त-वृद्धि की अवस्थाओं में इसको नहीं खाना चाहिये।

तदेतत्सर्वं विधाय भोजनासन्ने कालेऽभ्यंग आचरणीय इत्याह—

अभ्यङ्गमाचरेन्नित्यं, स जराश्रमवातहा।
दृष्टिप्रसादपुष्ट्यायुःस्वप्नसुत्वक्त्वदार्ढ्यकृत् ॥ ८ ॥

स०—अभ्यंगं नित्यं सततमाचरेत्। नित्यग्रहणं चोपलक्षणार्थम्। एकद्वित्रिदिनांतरमपि यथोचितमाचरतोऽपि न दोषः। सोऽभ्यंग आचर्यमाणो जरां च श्रमश्च वातश्च तान् हंतीति क्विप्। तथा दृष्टीत्यादि। दृष्टेः प्रसादो वैमल्यं दृष्टिप्रसादः। शोभना चासौ त्वक् तस्या भावः सुत्वक्त्वम्। दृढस्य भावो दार्ढ्यम्। दृढादिभ्यः ष्यञ्। दृष्टिप्रसादादीनां द्वंद्वः। तानि करोति योऽभ्यंगः स एवम्॥ ८॥

वि०—अभ्यंग—प्रतिदिन शरीर पर अभ्यङ्ग (तैलमर्दन) करे; इससे बुढ़ापा, थकान और वायु नष्ट होती है। दृष्टि निर्मल होती है; शरीर पुष्ट होता है; आयु बढ़ती है; नींद भली प्रकार आती है; त्वचा निर्मल तथा झुर्रियों रहित एवं शरीर दृढ़ होता है॥ ८॥

वक्तव्य—चरक में अभ्यङ्ग के लिये कहा है—'स्नेहाभ्यङ्गाद् यथा कुम्भश्चर्म स्नेहविमर्दनात्। भवत्युपाङ्गदक्षश्च दृढः क्लेशसहो यथा॥ तथा शरीरमभ्यङ्गाद् दृढं सुत्वक् च जायते। प्रशान्तमारुताबाधं क्लेशव्यायामसंसहम्॥ स्पर्शनेऽभ्यधिको वायुः स्पर्शनं च त्वगाश्रितम्। त्वच्यश्च परमोऽभ्यङ्गस्तस्मात्तं शीलयेन्नरः॥ (चरक सू. अ. ५)। यह तैल ऋतु के अनुसार होना चाहिये; यथा-'अथ जातान्नपानेच्छो मारुतघ्नैः सुगन्धिभिः। यथर्तुसंस्पर्शसुखैस्तैलैरभ्यङ्गमाचरेत्॥' अभ्यङ्ग लोम के अनुकूल करना चाहिये; इसमें अधिक जोर की जरूरत नहीं। धूप में या मालिश करने से तैल शरीर में जल्दी लीन होता है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तैलाभ्यङ्ग के गुण—

शिरःश्रवणपादेषु तं विशेषेण शीलयेत् ।

स०—तमभ्यंगं शिरः श्रवणपादेषु विशेषेणातिशयेन शीलयेदभ्यसेदिति वचनाच्चावश्यं न तथा सर्वशरीरेऽभ्यंगः कार्यो यथैतेषु शिरःश्रवणपादेषु । अत्र च पूर्ववदेकत्वाभावः ।

वि०—अभ्यङ्ग को शिर, कान और पैरों में विशेष करके बरते ।

वक्तव्य—अभ्यङ्ग कान, शिर और पैरों पर विशेष रूप से करना चाहिये । इसी से चरक में कहा है 'नित्यं स्नेहार्द्रशिरसः शिरःशूलं न जायते । न खालित्यं न पालित्यं न केशाः प्रपतन्ति च ॥ बलं शिरःकपालानां विशेषेणाभिवर्धते । दृढमूलाश्च दीर्घाश्च कृष्णाः केशा भवन्ति च ॥' कर्ण में तेल डालने के लिये—'नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णतर्पणात् । न कर्णरोगा वातोत्था न मन्याहनुसंग्रहः ॥' पैर के अभ्यङ्ग के लिये—'खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः । सद्य एवोपशाम्यन्ति पादाभ्यङ्गनिषेवणात् ॥ न सिरास्नायुसंकोचः पादाभ्यङ्गेन पादयोः ॥' पैर पर तेल लगाने से खरता (ऐंठन), शुष्कता नहीं आती—इसलिये इस पर नित्यप्रति बरते । शिर और कान के रोगों से रक्षा के लिये शिर और कानों में तैल डालना प्रतिदिन आवश्यक है ।

तैलाभ्यङ्ग का निषेध—

वर्ज्योऽभ्यङ्गः कफग्रस्तकृतसंशुद्ध्यजीर्णिभिः ॥ ९ ॥

अथैतदपवादमाह—

स०—अभ्यंगो वर्ज्यो वर्जनीयः । कफग्रस्तेन कृतसंशुद्धिनाऽजीर्णिना च ॥ ९ ॥

वि०—अभ्यङ्ग का निषेध—कफ से पीड़ित; वमन-विरेचन से जिसने शरीर का शोधन किया हो और अजीर्ण रोगी को (उस दिन) अभ्यङ्ग नहीं करना चाहिये ॥ ९ ॥

वक्तव्य—सुश्रुत ने तरुणज्वर में भी अभ्यङ्ग का निषेध किया है; यथा 'तरुणज्वर्यजीर्णी च नाभ्यक्तव्यः कथञ्चन । तथा वान्तो विरिक्तश्च निरूढो यश्च मानवः ॥ पूर्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा । शेषाणां तदहः प्रोक्ता अग्निसादादयो गदाः ॥' ज्वर में चन्दनादि तैल, अष्टकटूवर तैल, लाक्षादि तैल आदि मलते हैं; वे सब जीर्णज्वर में ही उपयोगी हैं । इसी से चरक में कहा है—'स्नेहाभ्यङ्गान् प्रदेहांश्च सस्नेहान् सावगाहनान् । विभज्य शीतोष्णकृतान् दद्याज्जीर्णज्वरे भिषक् । तेनाशु प्रशमं याति बहिर्मार्गगतो ज्वरः । लभन्ते सुखमङ्गानि बलं वर्णश्च जायते ।' इस प्रकार करने से वायु और पित्त की शान्ति जीर्णज्वर में होती है । कफ से पीड़ित व्यक्ति में तैल के अभ्यङ्ग के कारण पुष्टि होने से और भी कफवृद्धि होती है ।

व्यायाम से लाभ—

लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदसः क्षयः ।
विभक्तघनगात्रत्वं व्यायामादुपजायते ॥ १० ॥

स०—शरीरायासजननं कर्म व्यायामः । तस्मात्पंच गुणाः लाघवादयो निष्पद्यन्ते । विभक्तानि विभागेन स्थितानि घनानि गात्राणि यस्य स विभक्तघनगात्रस्तस्य भावस्तत्त्वमिति ॥ १० ॥

वि०—व्यायाम के लाभ—व्यायाम से शरीर में हलकापन; कार्यों में शक्ति; अग्नि में तीक्ष्णता और मेद का नाश होता है । व्यायाम से शरीर के अङ्ग विभक्त, पृथक्-पृथक् उपचित एवं दृढ़ हो जाते हैं ॥ १० ॥

वक्तव्य—व्यायाम का लक्षण—'शरीरायासजननं कर्म व्यायामसंज्ञितम्' । जिस कार्य से शरीर में थकान का अनुभव हो उसका नाम व्यायाम है । व्यायाम को अपनी आधी शक्ति से करना चाहिये, अर्थात् माथे पर या कक्षा में जब पसीना अनुभव हो उस समय व्यायाम करना छोड़ देना चाहिये । इस व्यायाम से मांसपेशियाँ अलग-अलग दृढ़ बनती हैं । पेट और छाती अलग दीखते हैं—चर्बी घट जाती है । व्यायाम अभ्यङ्ग करके करना चाहिये इससे तैल भली प्रकार शरीर में प्रविष्ट हो जाता है—'न चास्ति सदृशं तेन किञ्चित् स्थौल्यापकर्षणम् । न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात् ॥ न चैनं सहसाऽऽक्रम्य जरा समधिरोहति । व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् ॥ विदग्धमविदग्धं वा निर्दोषं परिपच्यते' । साथ ही शक्ति से अधिक करने पर लाभ के बदले हानि हो जाती है । इसलिये शक्ति से कम ही व्यायाम करना चाहिये ।

इदानीं येनासौ न कार्यस्तं दर्शयति—

वातपित्तामयी बालो वृद्धोऽजीर्णी च तं त्यजेत् ।

स०—वातपित्तामयी बाल आषोडशाद्वर्षाद् वृद्धः सप्ततेरूर्ध्वमजीर्णी च तं जह्यात् ।

व्यायाम के अयोग्य मनुष्य—

वि०—व्यायाम का निषेध—वात-पित्तरोगी; बालक (१६ वर्ष तक), वृद्ध (७० वर्ष के उपरान्त), और अजीर्णरोगी को व्यायाम नहीं करना चाहिये ।

वक्तव्य—व्यायाम से वायु और पित्त की वृद्धि होती है; वृद्धावस्था में भी वायु बढ़ी होती है; और अजीर्ण रोगी के लिये दिन में सोना उत्तम है; 'दिवास्वप्नं प्रकुर्वीत सर्वाजीर्णप्रशान्तये'—इसलिये इनमें व्यायाम का निषेध है । बालक अपना स्वाभाविक व्यायाम दौड़धूप करता है उसके लिये कुश्ती आदि अधिक जोर का व्यायाम का ही निषेध है ।

व्यायाम की योग्यता और उसका समय—

अर्धशक्त्या निषेव्यस्तु बलिभिः स्निग्धभोजिभिः ॥
शीतकाले वसन्ते च मन्दमेव ततोऽन्यदा ।

स०—तुरवधारणे । बलवद्भिः पुरुषैः स्निग्धभोजिभिरर्धशक्त्यैव निषेव्यो व्यायामः । प्राक् श्रमाद्व्यायामवर्जनं कार्यमित्यर्थः । कदासौ विधातव्य इत्याह—हेमन्ते शिशिरे वसंते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च सेव्यः। शीतवसंताभ्यामन्यदा मंदमेव सेव्यः। मंदमिति क्रियाविशेषणम्। क्रियाविशेषणानां कर्मत्वं नपुंसकलिंगता च वक्तव्येति ॥ ११ ॥

वि०—व्यायाम का सेवन बलवान् एवं स्निग्ध भोजन करने वाले पुरुषों को शीतकाल और वसन्त में आधी शक्ति से करना चाहिये और ग्रीष्म, वर्षा, शरद् इनमें आधी शक्ति से भी थोड़ा ही करना चाहिये ॥ ११ ॥

वक्तव्य—व्यायाम नित्यप्रति करना चाहिये, सब ऋतुओं में करना चाहिये, शीतकाल अर्थात् हेमन्त, शिशिर और वसन्त ऋतु में अपनी आधी शक्ति के अनुसार व्यायाम करना चाहिये, शेष तीन ऋतुओं में ग्रीष्म-वर्षा और शरद् में थोड़ा करना चाहिये। आधी शक्ति का लक्षण-'हृदि स्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते। व्यायामं कुर्वतो जन्तोस्तद् बलार्धस्य लक्षणम् ॥'—सुश्रुत। इसी से कहा है कि 'प्राक् श्रमाद् व्यायामवर्जो स्यात् ॥' अर्थात् थकान होने से पहले ही व्यायाम को छोड़ देवे। ग्रीष्म, वर्षा में वायु का सञ्चय एवं प्रकोप का काल होने के कारण इसमें व्यायाम कम करने का विधान है, हेमन्त और वसन्त में कफ के सञ्चय एवं प्रकोप काल होने से व्यायाम करने के लिए उत्तम है।

व्यायाम के पश्चात् कर्तव्य—

तं कृत्वाऽनुसुखं देहं मर्दयेच्च समन्ततः ॥ १२ ॥

स०—तं व्यायामं कृत्वा अनुसुखं यथा शरीरे बाधा न स्यात्तथा देहं मर्दयेत्। समंततः परितः ॥ १२ ॥

वि०—व्यायाम करने के उपरान्त सम्पूर्ण शरीर का सुखपूर्वक मर्दन करे ॥ १२ ॥

वक्तव्य—सुखपूर्वक मलने से शरीर की थकान मिटती है; जिस प्रकार घोड़े की मलाई होने पर वह श्रम को भूल जाता है; उसी प्रकार शरीर मलने से थकान दूर हो जाती है। मालिश से शरीर की थकान जो व्यायाम से हुई होती है; वह मिटती है। यह मालिश धीमे-धीमे इस प्रकार होनी चाहिये जिससे शरीर को कष्ट न पहुँचे। इसी से सुश्रुत में कहा है 'व्यायामस्विन्नगात्रस्य पद्भ्यामुद्वर्त्तितस्य च। व्याधयो नोपसर्पन्ति सिंहं क्षुद्रमृगा इव'॥ सु. चि. अ. ४२।४३ ॥

अतिव्यायाम तथा जागरण आदि से हानि—

तृष्णा क्षयः प्रतमको रक्तपित्तं श्रमः क्लमः।
अतिव्यायामतः कासो ज्वरश्छर्दिश्च जायते ॥ १३ ॥

स०—अतिव्यायामतस्तृष्णादयो भवन्ति। तृष्णेति पृथक् पदम्। तेन तृष्णादीनां पदानामकृतसमासानां निर्देशो दोषदेशाद्यनुरोधेनैकस्य द्वयोस्त्रिचतुराणां बहुतराणां सर्वेषां चातिव्यायामव्यापत्त्वद्योतनार्थः ॥ १३ ॥

वि०—अति व्यायाम से हानि—अति मात्रा में व्यायाम करने से प्यास, क्षय, प्रतमकश्वास; रक्तपित्त, थकान, क्लम, कास, ज्वर और वमन उत्पन्न होते हैं ॥ १३ ॥

वक्तव्य—क्षय—राजयक्ष्मा। प्रतमक—तमकश्वास भेद यथा—'ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकं तु तम्' ॥ श्रम-कर्मेन्द्रियों का अपने कार्यों में असामर्थ्य। क्लम—ज्ञानेन्द्रियों का अपने कार्यों में असामर्थ्य।

अतिव्यायामप्रसंगेनातिजागरादीनामपि व्यापदो दर्शयति—

व्यायामजागराध्वस्त्रीहास्यभाष्यादिसाहसम्।
गजं सिंह इवाकर्षन् भजन्नति विनश्यति ॥ १४ ॥

स०—व्यायामादीनां भाष्यांतानां द्वंद्वः। तान्यादीर्यस्य साहसस्य धनुराकर्षणादेस्तदेवम्। अयथाबलमारंभः साहसं तद्भजन्सेवमानो विनश्यति। क इव। सिंह इव गजमतिमहावर्त्माणमाकर्षन्नाक्रामन्यथा विनश्यति तथाऽयथाबलमारंभेण व्यायामादिना नरो मार्यत इति ॥ १४ ॥

वि०—व्यायाम; रात्रि-जागरण, मुसाफिरी (पैदल चलना), स्त्रीसङ्ग, हास्य, भाष्य (बोलना) आदि साहसिक कार्य (बल से अधिक कार्य)—इनको अत्यधिक मात्रा में-शक्ति से अधिक करने पर मनुष्य नष्ट हो जाता है; जिस प्रकार कि शेर अपने से अधिक बलवान् हाथी को खींचता हुआ नष्ट हो जाता है।

वक्तव्य—सिंह जैसा बलवान् पशु भी हाथी को खींचते हुए जिस प्रकार नष्ट हो जाता है; उसी प्रकार मनुष्य अपनी शक्ति से अधिक व्यायाम, रात्रि-जागरण, मुसाफिरी, स्त्रीसङ्ग, हास्य, बोलना आदि साहसिक कार्य करने से नष्ट हो जाता है। इसलिये ये कार्य सदा अपनी शक्ति के अनुसार करने चाहिये।

उबटन से लाभ—

उद्वर्तनं कफहरं मेदसः प्रविलायनम्।
स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम् ॥ १५ ॥

स०—उद्वर्तनस्य कफहरादयश्चत्वारो गुणाः ॥ १५ ॥

वि०—उद्वर्त्तन—उद्वर्त्तन (उबटन) कफ का नाश करने वाला; मेद को बिलीन करने वाला; अङ्गों को स्थिर करने वाला होता है और त्वचा को अतिशय निर्मल बनाता है ॥ १५ ॥

वक्तव्य—उद्वर्तन—कषाय आदि चूर्ण या कल्क से शरीर की मालिश करना। यह उद्वर्त्तन रूक्ष और स्निग्ध भेद से दो प्रकार का है-यथा स्थौल्य-चिकित्सा में चरक—'रूक्षाण्युद्वर्त्तनानि च' और कृशता की चिकित्सा में उसी ग्रन्थ में—'स्निग्धमुद्वर्त्तनं स्नानम्' ॥ इसीलिए सुश्रुत में-'उद्वर्त्तनं वातहरं कफमेदो-विलायनम्'। इसके लिए सरसों का चूर्ण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दूध में मिलाकर अथवा चने का बेसन तैल में अथवा दही की मलाई और तैल मिलाकर उबटन करना चाहिये। इस उबटन क्रिया से लोमकूप खुलते हैं-इससे शरीर के अङ्ग स्थिर होते हैं और त्वचा में निर्मलता आती है।

स्नान के गुण—

दीपनं वृष्यमायुष्यं स्नानमूर्जाबलप्रदम्।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित्॥ १६॥

स०—स्नानं दीपनं वृष्यमायुष्यं च भवति। ऊर्जा उत्साहः। बलं प्राणनम्। एते प्रददाति करोति यत्तदेवम्। कंडूवित्यादि। कंडूवादीनां द्वन्द्वः। एतान् जयति स्नानस्य प्रभावादायुष्यत्ववृष्यत्वदीपनत्वानि बोद्धव्यानि। अथवा स्नानेन प्रहर्षो भवति। हर्षणत्वाच्च वृष्यत्वम्। तथा च वक्ष्यति—"यत्किंचिन्मधुरं स्निग्धं बृंहणं बलवर्धनम्। मनसो हर्षणं यच्च तत्सर्वं वृष्यमुच्यते॥" इति। यथा स्नानं जाठराग्नेर्बहिर्निर्गतानि रोमकूपाश्रितान्यर्चींषि रुद्ध्वाऽन्तर्नयति ततश्चाग्नेः प्रबलत्वं कुर्वद् दीपनं संपद्यते। यथा शीतकाले शीतानिलस्पर्शसंरुद्धस्य जाठराग्नेः प्रबलत्वम्। बालादित्यस्तु व्याचष्टे। स्नानेन भ्राजकाख्यं त्वगाश्रितं पित्तमतः प्रविशदूष्माणं संवर्धयति तेन तद्दीपनम्। अत एव परिषेके जलमुष्णमिष्यते। यस्माच्छीतं निर्वापयति तेजो न देहस्यांतः प्रवेशयति। शीतकाले यच्छीतानिलस्पर्शसंरुद्धस्याग्नेः प्रबलत्वं तत्काल एव तस्मिन् कालस्वाभाव्यादिति बोद्धव्यम्। तथा चान्यतौ शीते सति मंदाग्नित्वमेव दृश्यते। यथा वर्षास्वग्निमांद्यादेवांतर्बहिर्वह्निसंधुक्षणं भोजनं समुपदिष्टम्। तथा च मुनिः—व्यक्ताम्ललवणस्नेहं वातवर्षाकुलेऽहनि।' विशेषशीत इत्यादि॥१६॥

वि०—स्नान—स्नानकर्म अग्निदीपक; वृष्य, आयुवर्धक, ऊर्जा (उत्साह) बढ़ाने वाला और बलदायक है। कण्डू (खुजलाहट), मल (त्वचा का मल), थकान, पसीना, तन्द्रा, प्यास, दाह और पाप को दूर करने वाला है॥१६॥

वक्तव्य—वृष्य-मन की प्रसन्नता करने से वृष्य है 'यत्किञ्चिन्मधुरं स्निग्धं बृंहणं बलवर्धनम्। मनसो हर्षणं यच्च तत्सर्वं वृष्यमुच्यते'॥ स्नान करने से रोमकूप की अग्नि अन्दर चली जाती है' यथा—(१) 'बाह्योऽङ्गसेकैः शीताद्यैरूष्माऽन्तर्याति पीडितः। नरस्य स्नातमात्रस्य दीप्यते तेन पावकः॥' (२) 'स्नानेन भ्राजकाख्यं त्वगाश्रित पित्तमन्तः प्रविश्यदूष्माणं संवर्धयति। तेन तद्दीपनम्।' स्नान—उत्साह एवं बलदायक है। स्नान से कण्डू (खुजलाहट); त्वचा की मलिनता, थकान, पसीना, तन्द्रा, प्यास, दाह एवं पाप नष्ट होता है॥ १६॥

उष्ण जल से स्नान की विधि और निषेध—

उष्णाम्बुनाऽधःकायस्य परिषेको बलावहः।
तेनैव तूत्तमाङ्गस्य बलहृत्केशचक्षुषाम्॥ १७॥

स०उष्णांबुनाऽधःकायस्य परिषेको बलावहः प्राणकृत्। तेनैवोष्णोदकेनवोत्तमांगस्य शिरसः परिषेको विधीयमानः केशचक्षुषां बलहृत्। प्राण्यंगानां समाहार एव द्वंद्व इत्यस्य प्रायिकत्वात्केशचक्षुषामित्युपपन्नमेव॥ १७॥

वि०—गरम पानी से शरीर के निचले भाग का परिषेक करना बलदायक है। उसी गरम पानी से उत्तमाङ्ग (शिर) का परिषेक करने से बालों और आँखों का बल नष्ट होता है।

वक्तव्य—नाभि से निचले भाग में गरम पानी से परिषेक करे और शिर पर शीतल जल का परिषेक, कई आचार्य ग्रीवा से नीचे गरम पानी का व्यवहार करने को कहते हैं। हेमाद्रि का कहना है कि एक समय में शीत और उष्ण इन दोनों प्रकार का पानी नहीं बरतना चाहिये क्योंकि इससे क्रिया-संकर होने का भय है। परन्तु गरम पानी से बालों को हानि पहुँचती है, जिस प्रकार कि गरम पानी से पौधों की जड़ को नुकसान होता है; इसलिए गरम पानी बाल-शिर एवं आँखों के लिए उत्तम नहीं है;। संग्रह में जो 'नानाप्लुत्य शिरः स्नायान्न जलेऽल्पे न शीतले' पाठ है, वह अतिशय शीतल जल के निषेध के लिये है। सुश्रुत में—'उष्णेन शिरसः स्नानमहितं चक्षुषः सदा। शीतेन शिरसा स्नानं चक्षुष्यमिति निर्दिशेत्'।

स्नानं येषामपथ्यं तान् दर्शयितुमाह—

स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्॥ १८॥

स०—नेत्रे चास्यं च कर्णौ च तत्र रोगाः। अर्दितं च नेत्रास्यकर्णरोगाश्चातिसारश्च ते विद्यन्ते येषां त एवम्। तेषु गर्हितमहितम्। एवं शेषेषु योज्यम्। अर्दितादीनां द्वंद्वस्ततो मतुप्। तेनार्दितादिमत्सु गर्हितमिति योज्यम्। एवं शेषेष्वपि॥ १८॥

स्नान के अयोग्य मनुष्य—

वि०—स्नान का निषेध—अर्दित रोगी, नेत्ररोगी, मुखरोगी, कर्णरोगी, अतिसार रोगी, आध्मान, पीनस एवं अजीर्ण में तथा भोजन करके तुरन्त स्नान करना निन्दित है॥ १८॥

वक्तव्य—इन अवस्थाओं में स्नान करने से रोगवृद्धि की आशङ्का रहती है।

भोजन तथा मल-मूत्रोत्सर्ग की व्यवस्था—

जीर्णे हितं मितं चाद्यान्न वेगानीरयेद्बलात्।
न वेगितोऽन्यकार्यः स्यान्नाजित्वा साध्यमामयम्॥१९॥

स०—जीर्णे सम्यक्परिणते पूर्वे आहारे अद्याद्भुंजीत। किमद्यात्। हितं पथ्यम्। मितं मात्रया युक्तम्। पथ्यमपि ह्यतिमात्रं वा भुक्तं दोषाय स्यादतो मितम्। न वेगादित्यादि। वातविण्मूत्रादीनां संबंधिनो वेगाननुन्मुखीभूतानपि बलात्प्रेरयेन्न प्रवर्तयेत्। न वेगित इत्यादि। संजातवातविण्मूत्रवेगस्तमकृत्वा नान्यकार्यः स्यात्। नान्यकार्यं कुर्यादित्यर्थः। नाजित्वेत्यादि। साधयितुं शक्यः साध्यस्तं रोगमजित्वा नान्यकार्यः स्यादिति योज्यम्। स ह्युपेक्षितो दुःसाध्यो साध्यो वा स्यात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

साध्यशब्दोपादानादसाध्यामयप्रतिपन्नो न नान्यकार्यश्चिकित्सानैष्फल्यादिति द्योतयति ॥ १९ ॥

वि०—भोजनविधान—पूर्व कृत आहार के जीर्ण (पच जाने पर) हो जाने पर हितकारी भोजन-मात्रा के अनुसार खाये। मल-मूत्रादि के अप्रवृत्त वेगों को बलपूर्वक प्रेरित न करे। मल-मूत्रादि का वेग उपस्थित होने पर उनका त्याग किये बिना दूसरे कार्य न करे। साध्य रोग को शान्त किये बिना दूसरा काम न करे—अर्थात् पहले रोग को शान्त करे ॥ १९ ॥

वक्तव्य—भोजन-पूर्व आहार के जीर्ण होने पर करे, इसी लिये चरक में कहा है, 'जीर्णेऽश्नीयात्'; भोजन मात्रा में करे—'मात्राशी स्यात्'; भोजन हितकारी हो; 'हिताशी-स्यात्'। यहाँ पर भोजन के विषय में संक्षेप में कहा है। इसी प्रकार मल-मूत्रादि के सम्बन्ध में भी संक्षेप में कहा है जैसा कि चरक में कहा है 'न वेगितोऽन्यकार्यः स्यात्'। साध्य रोग की चिकित्सा में उपेक्षा नहीं करनी चाहिये क्योंकि रोग पीछे बढ़कर मृत्यु का कारण बनता है; यथा-'अणुर्हि प्रथमं भूत्वा रोगः पश्चाद् विवर्धते। स जातमूलो मुष्णाति बलमायुश्च दुर्मतेः॥ तस्मात् प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा। भेषजैः प्रतिकुर्वीत य इच्छेत् सुखमात्मनः' ॥ चरक. सू. अ. ११।

सुखसाधन धर्म की प्रशंसा—

सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः।
सुखं च न विना धर्मात्तस्माद्धर्मपरो भवेत् ॥ २० ॥

स०—सर्वभूतानामशेषप्राणिनां यस्मात्सुखार्थाः प्रवृत्तयः कर्माणि। मता अभिप्रेताः सुखं च शर्माख्यं धर्माद्विना न भवति तस्मात्कारणाद्धर्मपरो धर्मप्रधानः स्यात्। धर्मादिति पृथग्विनेति पंचमी ॥ २० ॥

वि०—सब प्राणियों की सब प्रवृत्तियां सुख के लिये होती हैं, और सुख बिना धर्म के नहीं मिलता; इसलिये मनुष्य को धर्मपरायण होना चाहिये ॥ २० ॥

वक्तव्य—धर्म से आरोग्य तथा ऐहलौकिक तथा पारलौकिक सुख प्राप्त होता है।

मित्र और शत्रु के प्रति आचरण—

भक्त्या कल्याणमित्राणि सेवेतेतरदूरगः।

स०—कल्याणे शुभकर्मणि मित्राणि सहाया उपदेशादिना कल्याणमित्राणि तानि भक्त्या अदंभमतिः सन् भजेत्। इतराणि कल्याणमित्रापेक्षयेतराणि पापमित्राणि तेभ्यो दूरगस्तद्वर्जनपरः। सत्संगो हि दृष्टादृष्टानर्थकरः। दूरग इत्यस्माद् दूर स्थितः ॥ २१ ॥

वि०—कल्याण करने वाले मित्रों पर श्रद्धा रखकर चले और जो कल्याण नहीं करने वाले हैं; उनसे दूर रहे; उनसे बचे।

दशविध पापों की समीक्षा—

हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृते ॥ २१ ॥
सम्भिन्नालापं व्यापादमभिध्यां दृग्विपर्ययम्।
पापं कर्मेति दशधा कायवाङ्मानसैस्त्यजेत् ॥ २२ ॥

स०—हिंसा प्राण्युपघातः। स्तेयं चौर्यम्। अन्यथाकामो निषिद्धकामसेवा पशुस्त्रीगमनादि। एतत्त्रिविधं कायिकं पापं कर्म। पैशुन्यं परेषां भेदकृद्वचनम्। परुषममृदुवचनम्। अनृतमसत्यवचनम्। संभिन्नालापोऽसंबद्धप्रलपनम्। चतुर्विधमेतद्वाचिकम्। व्यापादः प्राण्युपघातचिंता। अभिध्या परगुणाद्यसहिष्णुता। दृग्विपर्ययं शास्त्रदृष्टिवैपरीत्यं नास्तिकत्वादित्रिविधमेतन्मानसम्। तदेतद्धिंसादि दशधा पापं कर्म कायवाङ्मानसैस्त्यजेन्न कुर्यादित्यर्थः ॥ २१-२२ ॥

वि०—दश तरह का पाप कर्म—हिंसा (प्राणियों को मारना); स्तेय (चोरी), अन्यथाकाम (अगम्य-स्त्री-गुरुजन आदि की स्त्री-के साथ मैथुन करना); पैशुन्य (चुगुली); परुष (कठोर वचन); अनृत (झूठ बोलना), सम्भिन्न प्रलाप (असम्बद्ध बोलना), व्यापाद (दूसरे को हानि पहुँचाना); अभिध्या (दूसरे के गुण को न सहसकना—ईर्ष्या अथवा दूसरे के धन को लेने की इच्छा); दृग्विपर्यय (नास्तिकता या आप्त वाक्यों में अश्रद्धा करना) ये दश प्रकार के पापकर्म हैं; इन पापकर्मों को शरीर, वाणी, और मन तीनों से छोड़ देना चाहिए ॥ २१-२२ ॥

वक्तव्य—इनमें से प्रथम तीन कायिक, बाद के चार वाचिक और अन्त के तीन मानस पाप हैं।

मनुष्य का कर्त्तव्य—

अवृत्तिव्याधिशोकार्तानुवर्तेत शक्तितः।

स०—न विद्यते वृत्तिर्येषां तानवृत्तीन्। शक्त्या यथासामर्थ्यमनुकूलं गच्छेत्। तथा व्याधिना शोकेन चार्तांश्च।

वि०—अवृत्ति जीवन के साधन का अभाव वाले), व्याधि (रोग); शोक (इष्ट-वियोग-जन्य दुःख)-इनसे पीडित व्यक्तियों की सहायता में यथाशक्ति प्रयत्न करे।

आत्मवत्सततं पश्येदपि कीटपिपीलिकम् ॥ २३ ॥

स०—कीटान् पिपीलिकांश्चात्मवत्पश्येत्। स्वशरीरतुल्यानित्यर्थः। किमु सतोऽसाधून्वा। कीटपिपीलिकमप्यात्मवत्पश्येदित्यपिशब्दस्यार्थः। कीटपिपीलिकामिति क्षुद्रजंतवइत्येकत्वम् ॥ २३ ॥

वि०—कीड़ा-मकोड़ा, चिऊँटा आदि क्षुद्र जन्तु को भी अपनी तरह-निरन्तर देखे; उनको भी किसी प्रकार का कष्ट न देवे ॥ २३ ॥

वक्तव्य—कहा भी है—'श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्। आत्मनः प्रतिकूलानि परेषां न समाचरेत्'॥ इसी प्रकार—'मातृवत्परदारेषु, परद्रव्येषु लोष्टवत्। आत्मवत् सर्वभूतेषु यः पश्यति स पश्यति' ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्चयेद् देवगोविप्रवृद्धवैद्यनृपातिथीन् ।

स०—देवादीनां द्वंद्वः । देवादीनर्चयेत् । वृद्धाज्ञानवृद्धाः शीलतपोवृद्धाश्च । नृपो राजा । अतिथिरसमानग्रामी वैश्वदेवांते समुपस्थितः ।

वि०—देवता, गाय, ब्राह्मण, वृद्ध (ज्ञान, शील एवं तपसे वृद्ध), वैद्य, राजा और अतिथि की पूजा करे-इनका सम्मान करे।

विमुखान्नार्थिनः कुर्यान्नावमन्येत नाक्षिपेत् ॥ २४ ॥

स०—अर्थिनो याचकान्प्रत्याख्यानेन विमुखान्न कुर्यात्। नावमन्येत नावमानयेन्न च परुषवचनादिना क्षिपेत् परिभवेत् ॥ २४ ॥

वि०—याचकों को खाली न जाने देवे; उनका तिरस्कार न करे; उनसे कठोर वचन न कहे, उनको झिड़के भी नहीं।

उपकारप्रधानः स्यादपकारपरेऽप्यरौ ।

स०—अरौ शत्रावपकारपरेऽपि सत्युपकारप्रधानः स्यात्। ननु रिपुरपकारक एव तत्किमपकारपर इति विशेषणेन। तथा च माघः। उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा। उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः। नहि सर्वदैवारिरपकारं कर्तुं शक्यः स्यात् किं तर्हि कदाचिदेव। हेत्वधीनत्वादपकारकारित्वस्य। वातादिदोषवत्। यथा वातादयो दोषा दूषणस्वभावा अपि सन्तः कदाचिद्विकारकत्वे समर्था भवन्ति कदाचिन्नैव। दोषत्वं सर्वदैव तेषाम्। तस्मादपकारपर इति युक्तं विशेषणम्। अपकारिण्युपकारकृत्स्यात् किं पुनरुपकारक इत्यपिशब्दार्थः।

वि०—अपकार करनेवाले शत्रु के प्रति भी मुख्य रूप से उपकार करने वाला होना चाहिए।

वक्तव्य—पञ्चतंत्र में कहा है 'उपकारिषु यः साधुः साधुत्वे तस्य को गुणः। अपकारिषु यः साधुः स साधुः सद्भिरुच्यते' ॥

सम्पद्विपत्स्वेकमना, हेतावीर्ष्येत् फले न तु ॥ २५ ॥

स०—संपत्सु विपत्सु चैकमनाः समचित्तः। संपत्सु विषक्तेन विपत्सु विषादादिना न भाव्यमित्यर्थः। हेताविल्यादि। हेतौ कारणे ईर्ष्येत्। यथा। अयमेवं श्रुतत्यागादिगुणवान् कस्मादहमप्येवं न भवेयम्। फले नतु परकीये शोभने फले वस्त्रालंकारादिके नेर्ष्येत् ॥ २५ ॥

वि०—सम्पत्ति और विपत्ति में एक रहना चाहिए। कारण में इर्ष्या करे, उसके फल में ईर्ष्या न करे ॥ २५ ॥

वक्तव्य—गीता में भगवान् ने कहा है—'सुखदुःखे समे कृत्वा' इसी प्रकार 'सम्पत्तौ च विपत्तौ च महतामेकरूपता। उदेति सविता रक्तो रक्त एवास्तमेति च ॥' सम्पत्ति और विपत्ति में बुद्धिमान् को एक समान रहना चाहिए।

मनुष्य की उन्नति देखकर उससे ईर्ष्या उसकी उन्नति के कारण में करनी चाहिए फल में ईर्ष्या नहीं रखनी चाहिये।

काले हितं मितं ब्रूयादविसंवादि पेशलम् ।

स०—काले प्रस्तावे। हितं पथ्यम्। मितं न बहु अविसंवादि सत्यम्। पेशलं मनोज्ञं ब्रूयात्।

वि०—मनुष्य समय पर हितकारी, परिमित. सत्य और मधुर बोले।

वक्तव्य—'सत्यं ब्रूयात, प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्।' अयोग्य स्थान पर प्रयुक्त औषध भी विष का काम कर देती है; इसलिए हितकारी, परिमित शब्दों में, सत्य वचन, मधुर भाषा में और समय पर कहे।

पूर्वाभिभाषी, सुमुखः, सुशीलः, करुणामृदुः ॥ २६ ॥
नैकः सुखी, न सर्वत्र विश्रब्धो, न च शङ्कितः ।

स०—पूर्वाभिभाषी पूर्वालापी स्यात्। सुमुखो गतभ्रुकुटिः। सुशीलः शोभनस्वभावः। तथा करुणया मृदुरार्द्रसन्तानो मातेव पुत्रे। एकोऽद्वितीयः सन्मुखी न स्यात्। तथा च भगवान् व्यासः। मायाचारे मायया वर्तितव्यमिति। तथा सर्वत्र मित्रस्वजनादिष्वपि शंकितोऽविश्वस्तो न स्यात्तेषां वैमुख्यदोषप्रसंगभयात् ॥ २६ ॥

वि०—मिलने पर स्वयं पहले बोलना-कुशल-मङ्गल पूछना चाहिए। प्रसन्न-मुख, उत्तम स्वभाव का होना चाहिए। करुणा मृदु-माता जिस प्रकार पुत्र पर करुणा भाव रखती है, वैसा होना चाहिये। अर्थात् सामर्थ्य होने पर भी कृपालु होने के कारण दूसरे के अपकार को सहने की क्षमता होनी चाहिये। अकेला ही सुख का अनुभव न करे;-सब में विभक्त करके सुख का अनुभव करे। सब स्थानों पर या सभी व्यक्ति का विश्वास न करे और न सब स्थानों पर या सभी व्यक्ति में शङ्काशील रहे।

वक्तव्य—मित्र के मिलने पर प्रथम कुशल-मङ्गल स्वयं पूछे। गीता में कहा है—'भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्'। इसलिये सुख का उपभोग बाँट के करना चाहिये, और दुःख का भोग अकेला ही करना चाहिये। मनुष्य को सब स्थानों पर शङ्काशील नहीं होना चाहिये; और न सब स्थानों पर अविश्वासी होना चाहिये।

न कश्चिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुम् ॥२७॥
प्रकाशयेन्नापमानं न च निःस्नेहतां प्रभोः ।

स०—आत्मनः शत्रुं कंचिदपि न प्रकाशयेत्। तत्प्रकाशनाद्धि भेदः स्यात्। नात्मानं कस्यचिद्रिपुं प्रकाशयेत्। पूर्वोक्तादेव हेतोः। अपमानमसत्कारं कस्यचिन्न प्रकाशयेत्। प्रभोः स्वामिनः संबंधिनीं निःस्नेहतां न प्रकाशयेत्। तत्प्रकाशनादसौ प्रभुर्जातावसरैर्भेदकैः सुतरां निःस्नेहीक्रियते ॥ २७ ॥

वि०—अमुक का मैं शत्रु हूँ; यह किसी को न बताये और मेरा वह शत्रु है, यह भी किसी को न बताये। अपने पर हुए अपमान की बात किसी से न कहे। स्वामी की अकृपा का भी किसी से जिक्र न करे ॥ २७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—ऐसा करने से लोगों को हानि पहुँचाने का अवसर मिल जाता है; इससे ऐसा न करे।

लोकप्रिय होने का निर्देश—

जनस्याशयमालक्ष्य यो यथा परितुष्यति ॥ २८ ॥
तं तथैवानुवर्तेत पराराधनपण्डितः।

स०—जनस्याशयमालक्ष्य लोकस्य अभिप्रायं बुद्ध्वा परिच्छिद्य यो जनो यथा परितुष्यति तथा तेनैव प्रकारेण दानप्रियवचनादिना तमनुवर्तेताराधयेत्। कीदृशो भूत्वा। पराराधने पंडितस्तज्ज्ञः ॥ २८ ॥

वि०—दूसरों को प्रसन्न करने में कुशल पुरुष को मनुष्य के अभिप्राय को समझ कर जो मनुष्य जैसे प्रसन्न होता है उसके साथ उसी प्रकार का वर्ताव करना चाहिए ॥ २८ ॥

वक्तव्य—इससे ही सफलता संसार में होती है।

इन्द्रियों का निग्रह—

न पीडयेदिन्द्रियाणि न चैतान्यतिलालयेत् ॥२९॥

स०—इंद्रियाणि रसनादीनि कदन्नाशनादिना न पीडयेन्न निगृह्णीयात्। न चैतानीद्रियाण्यतिलालयेदतिशयेन विलासयेत् ॥ २९ ॥

वि०—इन्द्रियों को न तो बहुत दबाकर रक्खे और न बहुत अधिक विलास में डाले ॥ २९ ॥

वक्तव्य—इन्द्रियों के न तो वश में हो और न इनको बिलकुल दबा ही देवे; न अयोग करे और न अतियोग करे। क्योंकि दोनों अवस्थाओं में विपरीत प्रभाव की आशङ्का है।

कार्यारम्भ विधान—

त्रिवर्गशून्यं नारम्भं भजेत्तं चाविरोधयन्।

स०—त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्गस्तेन शून्यं रहितमारंभमुद्यमं न भजेन्न कुर्यात्। कथं भजेत्। तं च त्रिवर्गमविरोधयन्परस्परमविरोधयन्।

वि०—धर्म, अर्थ और काम से रहित कोई कार्य न करे; और धर्म, अर्थ एवं काम का सेवन परस्पर अविरोधी रूप से करे—इनमें एक दूसरे का विरोध न हो, इस प्रकार—धर्म, अर्थ, काम का सेवन करे।

अनुयायात्प्रतिपदं सर्वधर्मेषु मध्यमाम् ॥ ३० ॥

स०—सर्वधर्मेषु मध्यमां प्रतिपदं प्रतिपत्तिमनुयायात् सर्वेष्वाचारेषु मध्यमं मार्गमनुवर्तेत। नैकत्रासक्तिं कुर्यादित्यर्थः ॥ ३० ॥

वि०—सब धर्मों में (सब आचारों में) मध्यम मार्ग (मध्यस्थता) का अनुसरण करे अर्थात् किसी के प्रति आसक्ति न रखे ॥ ३० ॥

नीचरोमनखश्मश्रुर्निर्मलाङ्घ्रिमलायनः।
स्नानशीलः सुसुरभिः सुवेषोऽनुल्बणोज्ज्वलः ॥ ३१ ॥

स०—नीचान्यदीर्घाणि लोमनखश्मश्रूणि यस्य स एवंभूतो भवेत्। लोमानि बाहूरुप्रभृतिषु रोमाणि केशाश्चोच्यंते। तथा च हृषेर्लोमस्वित्यत्र सूत्रे विवृतम्। लोमानि मूर्धजान्यंगजानि चेह गृह्यन्त इति। नीचलोमादिकफलं च मुनिनोक्तम्। पौष्टिकं धन्यमायुष्यं शुचि रूपविराजनम्। केशलोमनखादीनां कृन्तनं संप्रसाधनमिति। तथांघ्री पादौ। मलायनानि घ्राणकर्णादीनि। निर्मलान्यंघ्रिमलायनानि यस्य स एवम्। अस्य च फलम्। मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम्। पादयोर्मलमार्गाणां शौचादानमभीक्ष्णशः। स्नानं शीलयति स्नानशीलो नित्यस्नायी स्यात्। तथा सुसुरभिः सुगंधिः। शोभनो जीर्णमलिनवस्त्रादिविवर्जितो वेषो यस्य स सुवेषः। अनुल्बणोऽनुद्धतः स चासावुज्ज्वलश्चानुल्बणोज्ज्वलः। अनुद्धतवेषः स्यादुज्ज्वलश्चेत्यर्थः ॥ ३१ ॥

वि०—रोम, नख और दाढ़ी-मूँछ कटवाकर रखना चाहिये। पैर और नाक, कान आदि मल के स्थानों को स्वच्छ रखना चाहिये। नित्य प्रति स्नान करे। सुगन्ध-इत्र आदि का धारण करने वाला होना चाहिये। सुन्दर, उज्ज्वल एवं अनुद्धत वेष वाला होना चाहिये ॥ ३१ ॥

वक्तव्य—नख और बाल अपवित्र वस्तु हैं। इनमें अनेक प्रकार के मलिन पदार्थों का संचय हो सकता है, अतः इनको यथासम्भव छोटे ही रखना चाहिये; जैसा कि चरक में कहा है 'पौष्टिकं धन्यमायुष्यं शुचि रूपविराजनम्। केशलोमनखादीनां कृन्तनं सम्प्रसाधनम् ॥' इसी प्रकार पैरों के लिये-'मेध्यं पवित्रमायुष्यलक्ष्मीकलिनाशनम्। पादयोर्मलमार्गाणां शौचादानमभीक्ष्णशः ॥' वेष-भूषा भी सभ्यतापूर्ण होनी चाहिए।

धारयेत्सततं रत्नसिद्धमन्त्रमहौषधीः।

स०—धारयेदित्यादि। रत्नानि मणयो वज्रपद्मरागादयः। सिद्धमंत्रोपराजितादिः। महौषधिः सहदेवादिका। रत्नादीनां द्वंद्वः। रत्नादि बाहुग्रीवादिषु सततं सदैव धारयेत्।

वि०—निरन्तर-रत्न (मरकत, वज्र आदि), सिद्ध मन्त्र (अपराजित आदि), और महौषधि (सहदेवी आदि) को धारण करे।

वक्तव्य—ऐसा करने से विष का भय तथा ग्रह-बाधा नहीं होती है। जैसा चरक में-'धार्यं गरमणिर्याश्च वरौषध्यो विषापहाः ॥' (चरक चि. अ. २३।२५१)

सातपत्रपदत्राणो विचरेद्युगमात्रदृक् ॥ ३२ ॥

स०—युगमात्रदृग्विचरेद्भ्रमेत्। युगं हस्तचतुष्टयं तत्पश्यति यः स एवम्। एवं कुर्वन्संमुखमागच्छद्भिर्गवाश्वादिभिर्न पद्भ्यते। तथा सहातपत्रेण छत्रेण पदत्राणेन पदाधारपर्यायेण यो वर्तते स एवम्। पादत्रच्छत्रयोश्च गुणा उक्ताः। मारुतस्यानुलोम्याय खुदस्तंभश्रमापहम्। अन्वर्थसंज्ञं पादत्रं बलदृक्शुक्रचक्षणम्। वर्ण्यं नेत्रहितं छत्रं वातवर्षातपापहमिति ॥३२॥

वि०—छाता और जूता धारण करके चार हाथ इधर-उधर देख-कर चले ॥ ३२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—'मारुतस्यानुलोम्याय खुडस्तम्भश्रमापहम्। अन्वर्थसंज्ञं पादत्रं बलदकृशुक्रकारणम् ॥ वर्ण्यं नेत्रहितं छत्रं वातवर्षातपापहम् ॥'

निशि चात्ययिके कार्ये दण्डी मौली सहायवान्।

स०—रात्रौ चात्ययिके कार्ये दंडी सन् विचरेत्। दंडेन सर्पादीनामुत्त्रासनमपि चोक्तम्। स्खलतः संप्रतिष्ठानं शत्रूणां च निषेधनम्। अवष्टंभनमायुष्यं भयघ्नं दंडधारणमिति। मौली शिरोवेष्टनयुक्तः। अनेनोपरि पततां पतंगकीटादिमूत्रपुरीषादीनां रक्षा। तथा सहायवान्। अनेनापि चित्तावष्टंभ; दंडशब्दादत इनिठनाविती निः। मौलिशब्दाच्च व्रीह्यादित्वात्तस्य ह्याकृतिगणत्वमिति केचित्। आत्ययिक इति। अत्ययः कृच्छ्रं तस्मिन् भवमित्यध्यात्मादित्वाट्ठञ्।

वि०—(सामान्यतः रात में बाहर नहीं जाना चाहिए) और रात में कोई आवश्यक कार्य आ पड़ने पर यदि जाना पड़े तो दण्ड लेकर, शिर पर पगड़ी बांधकर, सहायक के साथ जाना चाहिये।

चैत्यपूज्यध्वजाशस्तच्छायाभस्मतुषाशुचीन् ॥३३॥
नाक्रामेच्छर्करालोष्टबलिस्नानभुवो न च।

स०—चैत्यस्तु विशिष्टदेवताधिष्ठितो लोकप्रसिद्धो वृक्षविशेषः। बुद्धालय इत्यन्ये। पूज्यो गुरुपुत्रादिः। ध्वजश्चिह्नम्। शस्ता ब्राह्मणादयः। एषां छायाः। तथा भस्म भूतिः। तुषो धान्यादित्वक्। अशुचिर्विट्। यद्वा उच्छिष्टं वस्तु। तदेतन्नाक्रामेत्। शर्कराः सूक्ष्मपाषाणाकृतिर्मृत्खंडिका। तथा लोष्टं मृत्पिंडादिखंडः। बलिर्देवताद्यर्चनम्। स्नानं प्रसिद्धम्। बलिश्च स्नानं च बलिस्नाने तयोर्भुवौ बलिस्नानभुवौ। शर्करा लोष्टं च बलिस्नानभुवौ च ता नाक्रामेत् ॥ ३३ ॥

वि०—चैत्य (ग्राम का पूजास्थल), पूज्य (पूजा के योग्य गुरु पिता आदि); ध्वजा, शस्त (ब्राह्मण आदि) इनकी छाया को न लांघे। भस्म (राख का ढेर), तुष (धान्य की भूसी), अशुचि (मल-मूत्र-जूठ आदि), शर्करा (कंकड़), मिट्टी के ढेले, बलिभूमि (जहाँ बलि दी गई हो), स्नान भूमि (जहाँ पर स्नान किया हो) इनको भी नहीं लांघे ॥ ३३ ॥

नदीं तरेन्न बाहुभ्यां, नाग्निस्कन्धमभिव्रजेत् ॥३४॥
सन्दिग्धनावं वृक्षं च नारोहेद् दुष्टयानवत्।

स०—नदीं तरंगिणीं दोर्भ्यां न तरेत्। अग्निस्कंधमभि अग्निराशेरभिमुखं न व्रजेत्। सन्दिग्धा चासौ नौश्च तां नारोहेन्नोच्चलेत्। संदिग्धायाः शिथिलबंधनत्वाज्जर्जरत्वादतिभाराक्रांतत्वात्पारगमनं प्रति संदेहः। चेति समुच्चये। वृक्षं च नारोहेत्। कथम्। दुष्टयानवत्। यथा दुष्टयानारोहणमपि चोक्तयानया निषिद्धम् ॥ ३४ ॥

वि०—बाहुओं के बल पर ही अर्थात् तैरकर नदी को पार न करे, अग्निस्कन्ध (आग के ढेर) के सामने न जाये; दुष्ट-घोड़े आदि सवारी की भांति डूबने की सम्भावना वाली नाव पर या गिरने वाले वृक्ष पर भी न चढ़े ॥ ३४ ॥

नासंवृतमुखः कुर्यात्क्षुतिहास्यविजृम्भणम् ॥ ३५ ॥

स०—नासंवृतास्यः क्षुत्यादीन्कुर्यात्। हस्तादिना मुखं पिधाय कुर्यादित्यर्थः। क्षुतिश्छिक्का। हास्यं हसनम्। विजृम्भणं जृम्भिका। एषां समाहारद्वन्द्वः ॥ ३५ ॥

वि०—मुख को बिना ढांपे-छींकना, हँसना या जम्भाई लेना उचित नहीं ॥ ३५ ॥

वक्तव्य—बिना ढँके छींकने आदि से दूसरों पर थूक आदि के छींटे पड़ सकते हैं तथा मुख में मक्खी आदि भी चली जा सकती है।

नासिकां न विकुष्णीयान्नाकस्माद्विलिखेद् भुवम्।
नाङ्गैश्चेष्टेत विगुणं नासीतोत्कटकश्चिरम् ॥ ३६ ॥

स०—नासां न विकर्षेत्। मलोत्सारणमात्रं तु कार्यमेवेति विशब्देन द्योतयति। अकस्मात्कारणं विना भुवं पृथ्वीं न विलिखेन्नोत्कर्षेत्। अङ्गैर्हस्तपादादिभिर्विगुणमननुगुणं यथा भवति तथा न चेष्टेत न व्याप्रियेत। उत्कटकं स्थितमवस्थानं यस्य स एवंभूतो नासीत। चिरं न तिष्ठेदित्यर्थः। अर्शोरोगाद्युत्पत्तेः ॥ ३६ ॥

वि०—नाक को न कुरेदे; बिना मतलब के जमीन को न खोदे। अङ्गों से टेढ़े-विकृत रूप (तोड़-मरोड़कर) चेष्टा न करे। उत्कटक (उत्कट-उकड़ू) आसन से देर तक न बैठा रहे।

देहवाक्चेतसां चेष्टाः प्राक् श्रमाद्विनिवर्तयेत्।
नोर्ध्वजानुश्चिरं तिष्ठेन्नक्तं सेवेत न द्रुमम् ॥ ३७ ॥
तथा चत्वरचैत्यान्तश्चतुष्पथसुरालयान्।
सूनाटवीशून्यगृहश्मशानानि दिवाऽपि न ॥ ३८ ॥

स०—देहादीनां द्वन्द्वः। एषां सम्बंधिनीश्चेष्टाः क्रियाः श्रमात्खेदात् पूर्वं विनिवर्तयेत्। तावद्धनुराकर्षादिकुर्याद्यावन्नातीव श्रमः स्यादित्यर्थः। तथा ऊर्ध्वे जानुनी यस्य स ऊर्ध्वजानुश्चिरं नासीत। नक्तं रात्रौ द्रुमं तरुं न सेवेत। तदाश्रितकीटमूत्रशकृदादिपातरक्षार्थम्। चत्वरं त्रिपथम्। अन्ये त्वाहुः। यत्र प्रदेशे नगरनिवासिनो ग्राम्याः वा समेत्य नानाविधाः कथाः कुर्वंति स चत्वर उच्यते। चत्यांतश्चैत्यसमीपः। चतुष्पथं मार्गचतुष्टयसंगमः। सुरालयो देवगृहम्। एतांश्च नक्तं न सेवेत। सूना वध्यस्थानम्। अटवी निर्जनो देशः। शून्यगृहमुज्जटभवनम्। श्मशानं पितृवनम्। तानि दिवाऽपि न सेवेत। अपिशब्देन रात्रौ नितरामसेवनमाह ॥ ३७-३८ ॥

वि०—शरीर में थकान उत्पन्न होने से पहले ही शरीर, वाणी और मन की चेष्टाओं से विरत हो जाये, घुटनों को उठा कर देर तक न बैठे। रात्रि में वृक्ष के नीचे न रहे। इसी प्रकार-चत्वर (चौपाल-जहां गांव के लोग एकत्रित होकर

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गप-शप करते हैं); चैत्य के समीप; चतुष्पथ (चौराहा), मन्दिर; सूना (वधस्थान); अटवी (निर्जन देश); शून्यगृह और श्मशान इनका दिन में भी सेवन न करे ॥ ३७-३८ ॥

सर्वथेक्षेत नादित्यं, न भारं शिरसा वहेत् ।
नेक्षेत प्रततं सूक्ष्मं दीप्तामेध्याप्रियाणि च ॥ ३९ ॥

स०—आदित्यं सर्वथोद्यंतमस्तं यान्तं प्रतिमागतं जलादर्शादिषु प्रतिबिंबितमुपरक्तं राहुग्रस्तं वा नेक्षेत । तथा भारं शिरसा न च वहेन्न नयेत् । प्रततमविरतं सूक्ष्मवस्तु नेक्षेत । दीप्तं चामेध्यं चाप्रियं चातिप्रततं नेक्षेत । ननु तर्हि सर्वथा नेक्षेतेत्यनेन कोऽर्थो यतो रविरपि दीप्तो दीप्तग्रहणेनैवास्य दर्शननिषेधः सिद्धः । सत्यमेवैतत् किन्तु सर्वप्रकारमादित्यं नेक्षेत । दीप्तं त्वनवरतं नेक्षेतेति ॥ ३९ ॥

वि०—सूर्य की ओर कभी भी न ताके। भार को शिर पर न उठाये । निरन्तर-सूक्ष्म या चमकदार, अपवित्र तथा अप्रिय वस्तुओं को न देखे ॥ ३९ ॥

वक्तव्य—संग्रह में सूर्य के दर्शन के लिये 'नोद्यन्तमस्तमायान्तं तपन्तं प्रतिमागतम् । उपरक्तं च भास्वन्तं वाससा वा तिरोहितम् ॥' इस प्रकार सूर्य का दर्शन निषिद्ध है ।

मद्यविक्रयसन्धानदानादानानि नाचरेत् ।

स०—विक्रयो विनिमयः । इयत्प्रमाणमधुनेदं दीयत इति । सन्धीयते येन तत्सन्धानमनेकद्रव्यसम्भारो येन तन्मद्यं यथावत्प्रमाणेन सन्धीयते । दानं यथाशास्त्रं स्वस्वनिवृत्तिः परस्वत्वापादनम् । आदानं च यथाशास्त्रमेव परस्माद्ग्रहणम् । एतेषां द्वंद्वः । ततो मद्यशब्देन षष्ठीसमासः । मद्यविक्रयादीनि नाचरेत् । द्विजविषयं चैतद्वाक्यमिति बोध्यम् । सर्वस्य तु निषेधात् क्रयादिव्यवहारोच्छेदः स्यात् ।

वि०—मद्य का बेचना; मद्य का सन्धान (बनाना-तैयार करना); मद्य का दान देना या मद्य का लेना न करे ।

त्याज्य कर्म—

पुरोवातातपरजस्तुषारपरुषानिलान् ॥ ४० ॥
अनृजुः क्षवथूद्गारकासस्वप्नान्न मैथुनम् ।
कूलच्छायां नृपद्विष्टं व्यालदंष्ट्रिविषाणिनः ॥ ४१ ॥
हीनानार्यातिनिपुणसेवां विग्रहमुत्तमैः ।
सन्ध्यास्वभ्यवहारस्त्रीस्वप्नाध्ययनचिन्तनम् ॥ ४२ ॥
शत्रुसत्रगणाकीर्णगणिकापणिकाशनम् ।
गात्रवक्त्रनखैर्वाद्यं हस्तकेशावधूननम् ॥ ४३ ॥
तोयाग्निपूज्यमध्येन यानं धूमं शवाश्रयम् ।
मद्यातिसक्तिं विश्रम्भस्वातन्त्र्ये स्त्रीषु च त्यजेत् ॥४४॥

स०—त्यजेदिति क्रिया वक्ष्यमाणा । पुरःशब्दस्य वातातपाभ्यां प्रत्येकं सम्बन्धः । पुरोवातः पूर्वदिगागतो वातः । पुर आतपः पूर्वातपः । पुरोवातादीन्पञ्च त्यजेत् । अनृजुर्विषमस्थितशरीरः । क्षवथ्वादीन् षट् त्यजेत् । अनृज्विति क्रियाविशेषणमिति केचिद्व्याचक्षते । अन्नमत्र शाल्यादि । कूलं वप्रस्तच्छायां त्यजेत् । तत्र हि तिष्ठतस्तत्पाताद्भयं स्यात् । नृपद्विष्टं राज्ञोऽप्रियं त्यजेत् । व्यालो दुष्टहस्त्यादिः । दंष्ट्रिणः सर्पाद्याः । विषाणिनो गवाद्यास्तांस्त्यजेत् । हीनाः कुलशीलवित्तादिभिर्न्यूनाः । अनार्या असाधवः । अतिनिपुणा अतिगणनापरास्तेषां सेवां त्यजेत् । उत्तमैरिति सहार्थे गम्यमाने तृतीया । उत्तमैः सह विग्रहं त्यजेत् । सन्ध्यास्वभ्यवहारादीन्पञ्च त्यजेत् । शत्रुसत्रेत्यादि । शत्र्वशनं त्यजेत् । सत्रं यज्ञस्तस्याशनं त्यजेत् । ऋत्विगादीन् वर्जयित्वाऽन्यस्य हि तदशनं निषेधति । तथाहि । यज्ञांते तदुद्भूतपापोपशमनाय प्रायश्चित्तं श्रूयते । गणाः कथकचारणादयस्तैराकीर्णं व्याप्तमशनं त्यजेत् । गणिका वेश्या तस्याः संबंध्यशनं त्यजेत् । तदशनाद्धि तत्पापसंक्रमणं स्यात् । पणिकः पणोपजीवी । नौद्व्यच इति ठन् । पणिको हि पापीयानिंदितपण्यादिविक्रीणानः प्रशंसतीत्यादिहेतोः । गात्रेत्यादि । गात्राण्यंगानि तैस्तथा वक्त्रेण नखैश्च वाद्यं त्यजेत् । हस्तावधूननं केशावधूननं च त्यजेत् । अवधूननं कंपनम् । तोयेत्यादि । मध्यशब्दः प्रत्येकं युज्यते । तोययोर्द्वयोर्मध्येन यानं त्यजेत् । न यायादित्यर्थः । एवमग्न्योर्मध्येन । तथा पूज्ययोर्मध्येन । समासकरणात्तोयाग्न्योस्तोयपूज्ययोरग्निपूज्ययोरपि मध्येन न यायादिति बोद्धव्यम् । तथा धूमं शवाश्रयं शवोद्भूतं त्यजेत् । मद्येत्यादि । मद्येऽतिसक्तिरतिसेवा तां त्यजेत् । स्त्रीषु योषासु विश्रंभं विश्वासं स्वातंत्र्यं च त्यजेत् ॥ ४०-४४ ॥

वि०—सामने या पूर्वदिशा की वायु; सामने की धूप; धूल; ओस और तेज कठोर वायु इनसे अपने को बचाये। शरीर को विषम स्थिति में रखकर छींक, उद्गार, कास, नींद लेना, भोजन और मैथुन न करे। नदी के किनारे के वृक्ष की छाया का आश्रय न लेवे । राजा जिससे द्वेष रखता हो, ऐसे आदमी के साथ मैत्री न करे। हिंसक पशु, दंष्ट्री-साँप आदि और सींगवाले-भैंस आदि से बचे । अपने कुल, शील या वित्त आदि से हीन; अनार्य-असाधु और अति निपुण-जो बहुत बारीकी छानते हों (बहुत ही बारीक हिसाब करते हों) उनकी सेवा न करे । अपने से श्रेष्ठों के साथ लड़ाई न करे। सन्ध्याकाल में भोजन करना, स्त्री-सङ्ग, नींद लेना, पढ़ना और मनन नहीं करना चाहिये । शत्रु का भोजन; यज्ञ का भोजन; गण का भोजन-पञ्चायती भोजन; आकीर्ण-(योग्य-अयोग्य का जहाँ विचार न हो) भोजन, वेश्या का भोजन, पणिक-सूदखोर पुरुषों का भोजन नहीं करना चाहिये। अङ्गों से-मुख से-या नखों से वाद्ययंत्र का काम नहीं लेना चाहिये। हाथ या बालों को हिलाना नहीं चाहिये । पानी, अग्नि और पूज्य-इनके बीच में से सवारी पर न जावे। शव-सम्बन्धी (चिता के) धुएं से बचे। मद्य में बहुत आसक्ति न रक्खे। स्त्रियों में अति विश्वास न करे और स्त्रियों को अधिक स्वच्छन्द न करे ॥ ४०-४४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—यज्ञ का अन्न ऋत्विज् आदि को छोड़कर दूसरों के लिये निषिद्ध है। गण का अर्थ भिन्न-भिन्न किया है। यथा-अरुणदत्त ने कथक, चारणादि किया है। इनसे आकीर्ण अन्न न खाये। हेमाद्रि में गण का अर्थ बहुत मिलित मनुष्य (समूह) किया है; और आकीर्ण का अर्थ योग्यायोग्य विचार रहित किया है। साधारणतः सारे गाँव से चन्दा माँगकर जो भोजन किया जाता है; ऐसा अन्न शुद्ध नहीं, उसका त्याग करना चाहिये क्योंकि इसमें हीन कार्य करने वालों का भी अंश होता है। जल-अग्नि और पूज्य इनके बीच से सम्मान एवं सावधानी की दृष्टि से जाना निषिद्ध है-जैसे कि दो व्यक्तियों के बीच से जाना असभ्यता है, साथ ही इसमें खतरा भी रहता है।

लोकाचार का पालन—

आचार्यः सर्वचेष्टासु लोक एव हि धीमतः ।
अनुकुर्यात्तमेवातो लौकिकेऽर्थे परीक्षकः ॥ ४५ ॥

स०—हि यस्माद्धीमतो बुद्धियुक्तस्य सर्वचेष्टासु निःशेषव्यापारेषु लोक एवाचार्य उपदेष्टाऽतोऽस्माद्धेतोस्तमेव लोकं लौकिकेऽर्थे परीक्षकः पुरुषोऽनुकुर्यात् । यथा लोको व्यवहरति तथा व्यवहियादित्यर्थः ॥ ४५ ॥

वि०—बुद्धिमान मनुष्य के लिये सब क्रियाओं में लोक (समाज) ही आचार्य है; उससे ही सीखे। परीक्षक (विचारक) मनुष्य लौकिक व्यवहार में लोक का ही अनुकरण करे ॥ ४५ ॥

वक्तव्य—तैत्तिरीयोपनिषद् में आचार्य विद्यासमाप्ति पर शिष्य को उपदेश करता है 'अथ यदि ते कर्मविचिकित्सा वा वृत्तिविचिकित्सा वा स्याद्, ये तत्र ब्राह्मणाः संमर्शिनो युक्ता अयुक्ता, अलूक्षा, धर्मकामाः स्युः, यथा ते तत्र वर्त्तेरन्, तथा तत्र वर्त्तेथाः। अथाभ्याख्यातेषु ये तत्र ब्राह्मणाः संमर्शिनो युक्ता अयुक्ता अलूक्षा धर्मकामाः स्युः, यथा ते तेषु वर्त्तेरन् तथा तेषु वर्त्तेथाः॥' तैत्तिरीय ११-लोक से मनुष्य सीखता है; इसी से युधिष्ठिर ने कहा-'श्रुतयो विभिन्नाः स्मृतयो विभिन्ना, नैको मुनिर्यस्य वचः प्रमाणम्। धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥

सद्वृत्त के लक्षण—

आर्द्रसन्तानता त्यागः कायवाक्चेतसां दमः ।
स्वार्थबुद्धिः परार्थेषु पर्याप्तमिति सद्व्रतम् ॥४६॥

स०—आर्द्रसन्तानता सर्वसत्त्वेषु कृपालुत्वम्। त्यागो दानम्। कायवाक्चेतसां त्रयाणां दम उपशमः । परार्थेषु परप्रयोजनेषु स्वार्थबुद्धिः। यथा यः परार्थः अयमेव स्वार्थः इत्युभयलोकहितत्वम् इत्येवंप्रकारं सद्व्रतं पर्याप्तम्। समाप्तमित्यर्थः। सत् शोभनं च तद्व्रतं च सद्व्रतम् ॥ ४६ ॥

वि०—संक्षेप में धर्मसार—आर्द्रसन्तानता (अतिशय करुणा या सब प्राणियों में दयाभाव); त्याग, शारीरिक, वाचिक और मानसिक चपलता का निग्रह (शान्ति); दूसरे के कार्यों में स्वार्थबुद्धि (दूसरे के कार्य को अपना ही कार्य समझना) ये चारों सम्पूर्ण सद्व्रत (सज्जनों का धर्म) हैं ॥ ४६ ॥

वक्तव्य—इन चारों धर्मों में सब धर्मों का समावेश हो जाता है।

दिन-रात का विवेचन—

नक्तंदिनानि मे यान्ति कथम्भूतस्य सम्प्रति ।
दुःखभाग् न भवत्येव नित्यं सन्निहितस्मृतिः ॥४७॥

स० नक्तंदिनानि रात्रिदिनानि संप्रतीदानीं कथंभूतस्य कीदृशस्य सतो मे मम यांति। एवं नित्यं सन्निहितस्मृतिः सन् पुमान् दुःखभाङ् न भवति ॥ ४७ ॥

वि०—मेरे दिन और रात कैसे बीतते हैं; इसकी सदा स्मृति बनाये रखनेवाले को कभी दुःख नहीं होता ॥ ४७ ॥

वक्तव्य—जो मनुष्य सदा दिन-रात में अपनी दिनचर्या, रात्रिचर्या का प्रतिदिन समीक्षण करता है, उस मनुष्य को कभी दुःख नहीं होता।

आचार-पालन का परिणाम—

इत्याचारः समासेन, यं प्राप्नोति समाचरन् ।
आयुरारोग्यमैश्वर्यं यशो लोकांश्च शाश्वतान् ॥४८॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुवाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने दिनचर्या नाम द्वितीयोऽध्यायः ॥ २ ॥

स०—इति समाप्तौ। समासेन संक्षेपेण तावदयमाचारः पूर्वोक्तो यं समाचरन्ननुतिष्ठन्नायुरादीन् प्राप्नोति । तथा लोकान् भूर्भुवःस्वःप्रभृतीन् शाश्वतान्नित्यान्। ननु शाश्वतशब्दो न युक्तः। यतः शश्वच्छब्दस्य कालवाचित्वात् कालाट्ठञिति ठञ् प्राप्नोति। तथा अव्ययानां च सायंप्रातिकाद्यर्थमुपसंख्यानमिति टिलोपश्च प्राप्नोति। नैतदस्ति। नस्तद्धित इत्यत्र सूत्रे ह्युक्तम्। शाश्वत इत्यादौ तु टिलोपो नेष्यते। कालादिति योगविभागाच्चाणिति। तस्माच्छाश्वतशब्दो न्याय्य एवेति॥४८॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वाङ्गसुन्दराख्यायां सूत्रस्थाने द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

वि०—उपसंहार—यह आचार संक्षेप में कह दिया है; इसका पालन करने से निरन्तर आयु, आरोग्य, ऐश्वर्य (अप्रतिहतशक्ति); यश तथा शाश्वत लोक (स्वर्ग) मिलता है ॥ ४८ ॥

वक्तव्य—शाश्वतलोक के लिये भगवान् ने कहा है 'यद् गत्वा न निवर्त्तन्ते तद् धाम परमं मम'-जहाँ जाकर मनुष्य लौटता नहीं अर्थात् पुनर्जन्म नहीं होता वही मेरा उत्तम गृह (स्वर्ग) है। ऐश्वर्य का अर्थ सम्पन्नता है; साथ ही योगियों

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

का अष्टविध ऐश्वर्य भी है—यथा—'आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया। दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्॥' (चरक शा. अ. १।१३९) ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का
दिनचर्या नामक दूसरा अध्याय समाप्त हुआ।

तृतीयोऽध्यायः

दिनचर्याध्यायादनंतरमृतुचर्याया उपोद्धातः। पूर्वाऽध्याये सामान्येन दिनचर्योपदिष्टा। ऋतुबिशेषवशाच्चाहारविहार-सेवनप्रतिपादनार्थमृतुचार्याया आरम्भ इत्याह—

अथात ऋतुचर्याऽध्यायं व्याख्यास्यामः। इति ह स्माहुरात्रेयादयो महर्षयः।

स०—पूर्ववद्व्याख्येयम् ॥ १ ॥

वि०—अब इसके आगे ऋतुचर्या नामक अध्याय का व्याख्यान करेंगे-जैसा कि महर्षि आत्रेय आदि ने कहा था।

षड्ऋतु-वर्णन—

मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षड्तवः स्मृताः।
शिशिरोऽथ वसन्तश्च ग्रीष्मो वर्षाशरद्धिमाः ॥ १ ॥
शिशिराद्यैस्त्रिभिस्तैस्तु विद्यादयनमुत्तरम्।
आदानं च तदादत्ते नृणां प्रतिदिनं बलम् ॥ २ ॥

स०—मासैरित्यादिना कालोपवर्णनमाह-ननु कालो-पवर्णनं दिनचर्यायां कस्मान्न कृतम्। उच्यते। ऋतुगौरवो-द्भावनार्थम्। ऋतवो हि विशेषेणोपयोगिनो विप्रतिपत्तेश्च। यथैके चातुर्मासिकमृतुं कृत्वा शीतोष्णवृष्टिलक्षणान् हेमन्त-ग्रीष्मवर्षाख्यांस्त्रीनृतूनिच्छंति। अपरे तु द्विमासिकान् शिशिर-वसन्तग्रीष्मवर्षाशरद्धेमन्तलक्षणान् षड्तूनिति। द्वे संख्ये येषां ते द्विसंख्यास्तैर्द्विसंख्यैः माघ आद्यो येषां फाल्गुनादीनां त एवम्। तैर्द्विसंख्यैर्माघाद्यैर्मासैः क्रमात्परिपाट्या षड्तवः स्मृताः। के त इत्याह—शिशिराद्याः शिशिरवसन्तग्रीष्मवर्षा-शरद्धेमन्ताः। उपचारादेव षट्त्वे लब्धे षड्ग्रहणं परमतक्षेपा-र्थम्। तथा केचित् त्रय एव ऋतव इति मन्यन्ते। तैस्तु ऋतु-भिस्त्रिभिः शिशिरादिभिरुत्तरायणं विद्याज्जानीयात्। अयन-मुत्तरं सवितुरुत्तरमार्गप्रतिपत्तिरुत्तरायणम् आदानं तज्जानी-यात्। आदानमिति चान्वर्थमिति प्रतिपादयति। तदा तस्मिन् काले नृणां प्रतिदिनमन्वहं बलमादत्ते सारं गृह्णाति। कोऽसौ। प्रकृतत्वादादित्यः ॥ १-२ ॥

वि०—माघ से प्रारम्भ करके दो-दो मासों को मिलाने पर क्रमशः-शिशिर, वसन्त; ग्रीष्म, वर्षा, शरद् और हेमन्त ये छः ऋतुएँ कही जाती हैं। उनमें से शिशिर, वसन्त और ग्रीष्म इन तीन ऋतुओं को उत्तरायण जानना चाहिये। इसी को आदान कहते हैं। इस काल में (सूर्य) प्रतिदिन मनुष्यों का बल लेता है ॥ १-२ ॥

वक्तव्य—ऋतु का विचार भारत में मास, राशि और ऋतु के अपने स्वरूप के अनुसार किया गया है—यथा—'मास-राशि-स्वरूपाख्यमृतोर्यल्लक्षणत्रयम्। यथोत्तरं भजेच्चर्यां तत्र तस्य बलादिति'। यथा राशि के अनुसार-मीन और मेष-वसन्त; वृष और मिथुन-ग्रीष्म; कर्क एवं सिंह-वर्षा; कन्या और तुला-शरत्, वृश्चिक तथा धनु-हेमन्त; मकर और कुम्भ-शिशिर। मास के अनुसार सुश्रुत मत से भाद्रपद एवं आश्विन-वर्षा; कार्तिक-मार्गशीर्ष-शरत्; पौष और माघ-हेमन्त; फाल्गुन तथा चैत वसन्त, वैशाख तथा ज्येष्ठ-ग्रीष्म; आषाढ़ तथा श्रावण प्रावृट्, अथवा पूर्वोक्त क्रम से माघ एवं फाल्गुन-शिशिर; चैत एवं वैशाख-वसन्त; ज्येष्ठ और आषाढ़-ग्रीष्म, श्रावण-भाद्रपद-वर्षा; आश्विन एवं कार्तिक-शरद्, मार्गशीर्ष तथा पौष-हेमन्त।' इनमें मास-लक्षण से राशि-लक्षण

---

१. प्राचीन आचार्यों ने माघ से प्रारम्भ कर शिशिर आदि छः ऋतुओं का तथा फाल्गुन से प्रारम्भ कर वसन्त आदि छः ऋतुओं का वर्णन किया है। इस प्रकार एक-एक मास का अन्तर पड़ जाता है। किन्तु प्रथम वर्णन प्राकृतिक आधार पर है और ऋतुचर्या में इसी का महत्त्व है। दूसरा क्रम संशोधनपरक है। दूसरा अन्तर ऋतुओं के नाम के सम्बन्ध में है। यथा-कहीं कहीं प्रावृट् और वर्षा ये दो भेद वर्षा के वर्णित हैं किन्तु शीत ऋतु में केवल एक हेमन्त ऋतु का उल्लेख है। इसके विपरीत कहीं-कहीं शीत ऋतु के दो भेद हेमन्त और शिशिर तथा केवल एक वर्षा ऋतु का वर्णन है। यह भेद भी क्रमशः संशोधन तथा प्रकृति के आधार पर ही है। दूसरे हमारा देश बहुत विस्तीर्ण है। भौगोलिक आधार पर भी ऋतुओं में अन्तर आता है। इसलिये दक्षिण और पूर्वी भाग जहां वर्षा अधिक होती है वहाँ प्रावृट् और वर्षा ये दो ऋतुएँ होती हैं। शीत काल में केवल हेमन्त ऋतु होती है तथा उत्तरी और पश्चिमी भाग जहाँ वर्षा कम होती है और ठंढक अधिक होती है वहाँ केवल एक वर्षा ऋतु तथा हेमन्त और शिशिर ये दो शीत-ऋतुएँ होती हैं।

'भूयो वर्षति पर्जन्यो गङ्गाया दक्षिणे तटे।
अतः प्रावृट् च वर्षाश्च ऋतू तत्र प्रकल्पितौ ॥
तस्या एवोत्तरे देशे हिमवद्विन्ध्यसंकुले।
भूयः शीतमतस्तत्र हेमन्तशिशिरावुभौ ॥'

(इति काश्यपः)

चान्द्र मास की अपेक्षा सौर (राशि) मास (जिसका वर्णन ऊपर किया गया है) अधिक स्थिर होता है। और मास के अनुसार ही होने के कारण अंगरेजी मास के आधार पर भी ऋतुओं का विचार अधिक स्थिर होता है। देश के विभिन्न भागों में वर्षा, ठंढक और गर्मी भी भिन्न-भिन्न समय से प्रारम्भ होती है। इसलिये लाक्षणिक ऋतुओं का भी वर्णन मिलता है और वस्तुतः यही सबसे अधिक महत्त्व का होता है।

मासराशिस्वरूपाख्यमृतोर्यल्लक्षणत्रयम्।
यथोत्तरं भजेच्चर्यां तत्र तस्य बलादिति ॥

(अ. सं. सू. अ. ४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बलवान है; और राशि लक्षण से स्वरूप-लक्षण बलवान है। इन्हीं लक्षणों के अनुसार वर्षा के प्रारम्भकाल को प्रावृट्काल माना है। यथा सुश्रुत ने—आषाढ़ श्रावण से प्रावृट् मानी है—काश्यप ने कहा है 'भूयो वर्षति पर्जन्यो गङ्गाया दक्षिणे तटे। अतः प्रावृट् च वर्षाश्च ऋतू तत्र प्रकल्पितौ'।

कोई-कोई आचार्य चार-चार मासों से वर्षा, ग्रीष्म और शीत तीन ऋतु मानते हैं। मुख्य ऋतु ये ही हैं। इन ऋतुओं से दो अयन-मार्ग सूर्य के होते हैं। एक उत्तरायण और दूसरा दक्षिणायन। उत्तरायण में सूर्य का बल अधिक होता है; और दक्षिणायन में सूर्य का बल कम होता है; उत्तरायण में सबल होने से मनुष्यों का बल सूर्य ग्रहण करता है; इसलिये मनुष्यों में दुर्बलता आ जाती है और इसे आदान काल कहते हैं और दक्षिणायनकाल में सूर्य का बल घटा होता है, और चन्द्रमा का बल बढ़ा होता है, इसलिये मनुष्यों बल बढ़ जाता है; अतः इसे विसर्ग कहते हैं। यह प्रकृति के अपने स्वभाव से ही होता है।

दोषों के संचय, प्रकोप और प्रशम को लक्ष्य में रखकर ही शिशिर आदि छः ऋतुएँ चरक एवं खरनाद आदि ने कही हैं।

कया युक्त्या बलमादत्त इत्याह—

तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षा मार्गस्वभावतः।
आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः ॥ ३ ॥
तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात्।
तस्मादादानमाग्नेयम्—

स०—आदित्यश्च पवनाश्चादित्यपवनास्ते तस्मिन् काले यस्मात्सौम्यान् गुणान् भुवः संबंधिनः क्षपयंति विनाशयंति। कीदृशास्ते अत्यर्थमतिशयेन तीक्ष्णाश्चोष्णाश्च रूक्षाश्चात्यर्थ-तीक्ष्णोष्णरूक्षाः। कस्मादेवंविधास्त इत्याह। मार्गस्वभावतो वर्त्मस्वाभाव्यात्। स च स्वभावः पर्यनुयोगमर्हति। मार्ग उष्णांशोरुत्तरदिग्गमनम्। यतश्चादित्यपवना रूक्षास्ततस्तित-क्तादयो रसा बलिनो भवन्ति। क्रमादित्यनेन यथासंख्यमत्र बोधयति। तेन तिक्तः शिशिरे वसन्ते कषायो ग्रीष्मे कटुको व्यवतिष्ठते न सर्वे तिक्तादय एकैकस्मिन्नृताविति। तिक्त इत्याद्यसमासकरणं ज्ञापनार्थम्। तिक्तादिरेकैको बली भवति। द्वौ तु स्वप्रमाणावस्थितौ। नैवतौ पृथग्भूय तिक्तादेर्बल-वत्त्वमित्यर्थः। यत एवं भूमेः सौम्यगुणहानिर्वर्धनं च रूक्षाण रसानां तस्मात्कारणादादानमाग्नेयम् ॥ ३ ॥

बल का उपचयापचय काल—

वि०—उस समय (आदान काल में) मार्ग के स्वभाव के कारण[1] सूर्य एवं वायु अतिशय तीक्ष्ण, रूक्ष और उष्ण होने के कारण पृथिवी के सौम्य गुण को कम करते हैं। सौम्य गुणों के कम होने से क्रमशः तिक्त, कषाय और कटु रस इस समय बलवान होते हैं; इसलिये आदानकाल आग्नेयकाल है ॥ ३ ॥

—ऋतवो दक्षिणायनम् ॥ ४ ॥
वर्षादयो विसर्गश्च यद्बलं विसृजत्ययम्।

स०—त्रयो वर्षादय ऋतवो दक्षिणायनं भगवतो दिवाकरस्य दक्षिणदिग्गमनम्। स च कालो विसर्गाख्यः। यद्यस्माद्बलमयं कालो विसृजति ददाति दक्षिणायनाख्यस्त-स्माद्विसर्गोऽन्वर्थसंज्ञः कालः ॥ ४ ॥

वि०—वर्षा आदि तीन ऋतुएँ दक्षिणायन हैं; और यह विसर्गकाल कहलाता है क्योंकि इसमें बल का विसर्ग होता है ॥ ४ ॥

वक्तव्य—वर्षा, शरद् और हेमन्त ये तीन ऋतुएँ सूर्य का दक्षिणायन है; इसलिये यह विसर्ग-अर्थात् छोड़ने का समय है। इस समय में सूर्य प्रथम आदान काल में ग्रहण किये रस को छोड़ता है।

वस्तुतः ठंडक, गर्मी और वर्षा इन लक्षणों के अनुशार शीत उष्ण और वर्षा ये तीन ही ऋतुएँ होती हैं किन्तु इन तीनों में दो-दो के बीच के काल में जब कि पूर्व ऋतु के लक्षण कम होने लगते हैं और आने वाली ऋतु के कुछ लक्षण आरम्भ हो जाते हैं—तीन और ऋतुओं (प्रावृट्, शरद् और बसन्त) की कल्पना की जाती है। यथा—हेमन्तो, ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणा-स्त्रय ऋतवो भवन्ति। तेषामन्तरेष्वितरे साधारणलक्षणास्त्रयः प्रावृट्-शरद्वसन्ताः। (च. वि. अ. ८)

१. मार्गस्वभाव—पृथिवी स्वभावतः वर्ष में छः मास तक अपनी धुरी के साथ दक्षिण की ओर, शेष छः मास उत्तर की ओर झुकती है। जब सूर्य मकर राशि में आता है तब से सूर्य के मिथुन राशि में रहने तक पृथ्वी क्रमशः दक्षिण की ओर झुकती रहती है तथा उत्तरी भू-भाग क्रमशः सूर्य के समीप आता जाता है जिससे सूर्य की उष्ण किरणों का प्रभाव भी उसी क्रम से उन पर बराबर बढ़ता जाता है और शीत कम होता जाता है। सूर्य की ऊष्मा से जलीयांश का शोषण होने से पृथ्वी और वायु में नमी की कमी होती है और उष्णता तथा रूक्षता बढ़ती जाती है। इस समय सूर्य के उत्तरी भू-भाग के समीप जाने से उत्तरायण और इस काल में सौम्यांश का शोषण होने से यह आदान काल कहलाता है।

इसके विपरीत कर्क राशि में सूर्य के पहुँचने के साथ पृथ्वी उत्तर की ओर झुकने लगती है; सूर्य उत्तरी भू-भाग से दूर और दक्षिण भू-भाग के समीप जाने लगता है अतः क्रमशः उष्णता की कमी और शीत की उत्तरोत्तर वृद्धि होने से तथा वायुमण्डल में स्थित जलीयांश के संगठित होने से वर्षा होती है। पृथ्वी में सौम्यांश की पुनः वृद्धि होती है; वनस्पतियों एवं प्राणियों की पुष्टि होती है। इस काल में विसर्ग अर्थात् त्याग होता है अतः इसे विसर्गकाल तथा सूर्य के दक्षिणी भू-भाग के समीप होने से दक्षिणायन कहते हैं।

यह परिवर्तन काल प्रभाव से स्वभावतः होता है; इसीलिये चरक ने कहा है—'कालस्वभावमार्गपरिगृहीता।' (च. सू. अ.)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौम्यत्वादत्र सोमो हि बलवान् हीयते रविः ॥ ५ ॥
मेघवृष्ट्यनिलैः शीतैः शान्ततापे महीतले ।
स्निग्धाश्चेहाम्ललवणमधुरा बलिनो रसाः ॥ ६ ॥

स०—हि यस्मादत्र विसर्गाख्ये काले सौम्यत्वात् सोमभूयिष्ठत्वात् सोमो बलवान् । तदाश्रितरात्रिवृद्धिदर्शनात् । हीयते रविस्तदाश्रितदिनहान्युपलब्धेर्हीनशक्तिः संपद्यते । कदा । महीतले भूपृष्ठे शांततापे सति । कैर्मेघवृष्ट्यनिलैः । शीतरित्युपलक्षणार्थम् । विसर्गकालत्वान्मृदुभिः स्निग्धैरपीति । अत एव स्निग्धा रसा अम्ललवणमधुरा बलिनो भवन्ति । अत्रापि क्रमादित्यनुवर्तते । पूर्ववच्च व्याख्येयम् ॥ ५-६ ॥

वि०—इस समय सोम (चन्द्रमा) बलवान होता है; और सूर्य का तेज कम होता रहता है । बादल, वृष्टि और शीतवायु से भूमि का ताप शान्त हो जाता है, इसलिये इस काल में अम्ल, लवण और मधुर ये स्निग्ध रस बलवान होते हैं ॥ ५-६ ॥

वक्तव्य—काल और कर्क आदि राशि मार्ग के कारण सूर्य का तेज इस विसर्ग काल में प्रतिदिन कम होता जाता है । तेज के कम होने से चन्द्रमा का बल बढ़ता जाता है; जिससे वर्षा में अम्ल रस, शरद् में लवण रस और हेमन्त में मधुर रस क्रमशः बढ़ता जाता है; जिससे मनुष्यों का बल भी बढ़ता है । (श्लोक ३ की टिप्पणी देखें)

शीतेऽग्र्यं वृष्टिघर्मेऽल्पं बलं मध्यं तु शेषयोः ।

स०—शीतस्वभावकाले हेमन्तशिशिराख्ये नृणामग्र्यं बलं भवति । वृष्टिश्च घर्मश्च तस्मिन्वृष्टिघर्मे वर्षाग्रीष्माख्ये कालेऽल्पम् । तुरवधारणे । शेषयोः शरद्वसंतऋत्वोर्मध्यमेव बलम् । ननु वसंत आदानकालत्वादत्यर्थतीक्ष्णोष्णरूक्षैरादित्यपवनैः शोष्यमाणेषु बलवृद्धिहेतुषु भवः सौम्येषु गुणेषु कथं मध्यबलत्वमिति । ब्रूमः । वर्षादिष्वृतुषु बलमुपचितं क्रमेणैवापचीयते । यथा कृष्णपक्षे चन्द्रः । तस्माद्दीर्घकालानुवृत्तं बलं वसन्ते क्रमेणैवापचीयते इति मध्यबलत्वं युक्तम् । अनेनैव हेतुना शिशिरेऽग्र्यबलत्वम् । यतः सकलेन विसर्गेण कालेन यदुपचितमतिशयेन बलं तत् शिशिरे क्रमाच्चात्रादानकालेऽपचीयमानमपि बलं न हीनं लक्ष्यते । यथा कृष्णपक्षादौ चन्द्रः क्षीयमाण इति युक्तमुक्तं शीतेऽग्र्यं बलमिति । बसन्ते च मध्यं बलमित्यवददिह शास्त्रकृत्

वि०—शीत ऋतु (हेमन्त और शिशिर) में मनुष्य का बल श्रेष्ठ होता है; बरसात और ग्रीष्म में न्यून बल होता है; और शेष (शरद् एवं वसन्त) ऋतुओं में मध्यम बल होता है ।

वक्तव्य—यदि बल का तीन भाग माना जाय तो हेमन्त-शिशिर में तीनों भाग से बल पूर्ण होता है; प्रावृट् और ग्रीष्म में दो भाग से कम अर्थात् केवल एक भाग (हीन) बल होता है; और शरद् एवं वसन्त में एक भाग से कम (मध्य) बल होता है अर्थात् दो भाग रहता है केवल एक भाग कम होता है ।

हेमन्त ऋतु में जठराग्नि का प्राबल्य—

बलिनः शीतसंरोधाद्धेमन्ते प्रबलोऽनलः ॥ ७ ॥
भवत्यल्पेन्धनो धातून् स पचेद्वायुनेरितः ।
अतो हिमेऽस्मिन्सेवेत स्वाद्वम्ललवणान् रसान् ॥८॥

स०—किल विसर्गाभिनवबलत्वात्पुमान् बली भवति । तस्य बलिनः पुंसो हेमंते काले शीतसंरोधाद्धेतोरनलोऽग्निर्बली भवति । यतः सर्वतः स्रोतोरोधाज्जाठरोऽग्निरांतरैरेव स्वैरर्चिभिरभिवर्धते । वर्धितश्चासौ भुक्तमाहारं सम्यक्पचति । पक्वाच्चाहाराद्बलमभ्यधिकं जायते । हेमंते हेमंततौ । द्योतयति अस्मिन्नेव काले शीतसंरोधात् । तथा ह्यन्यर्तुजेन शीतेनाग्निसादो भवति । यथा वर्षासु । तत्र हि वृष्टिवाताभ्यां भवति शीतं न चाग्निदीप्तिः । तथा चाष्टांगसंग्रहे । वृष्टिवाताकुलेत्वह्नि भोजनं क्लेदवातजित् । परिशुष्कं लघु स्निग्धमुष्णाम्ललवणं भजेदिति । इह पुनरनेकरूपगौरवयुक्तं भोजनं शस्यते । वक्ष्यति हि । अतो हिमेऽस्मिन्नित्यारभ्य यावद्रसान् स्निग्धान्पलं पुष्टमित्यादि । तथोक्तम् । ऊष्मा बहिः प्रतिहतो हिमशीतवातैरंतःशरीरविवरं प्रतिपद्यमानः । स्वस्थानपिंडितवपुर्भवति प्रचंडः शीतेऽनिलानलहरो विधिरिष्यतेऽत इति । तथा यद्यपि तत्र सत्त्वशरीरेत्यारभ्य यावत्तथोर्जस्करयोगजमित्यादिना ग्रंथेनाहारो युक्तिजस्यैकस्यैव बलस्य हेतुरित्युक्तो ग्रंथकृता । तथाऽपि युक्त्या निरूप्यमाणः सहजकालजयोरपि बलयोराहार एव हेतुत्वात्तथा ह्याहारं विना शरीरमेव न स्यात् । तदनया युक्त्या त्रिविधमपि बलमाहारजमपि बोद्धव्यम् । ननु यदि प्रबलोऽनलो भवति ततः किमित्याह । अल्पेंधन इत्यादि । अल्पमिंधनमाहाराख्यं यस्य सोऽल्पेंधनः सन् सोऽनलो धातून्रसादीन्पचेत् । कीदृशः वायुनेरितः वातोद्दीपितः । अस्मादनंतरोक्ताद्धेतोरल्पेंधनत्वे सति धातुपाकः स्यात् । अतः अस्मिन् हिमे शीते स्वाद्वम्ललवणाख्यान् रसान् सेवेत । नान्यर्तुसंभवे हिम इत्यस्यार्थस्य द्योतनाय हिम इत्युक्तम् ॥ ७-८ ॥

वि०—बलवान पुरुष में शीत के कारण अवरुद्ध होने से ऊष्मा के बाहर न निकलने से जठराग्नि प्रबल हो जाती है । वह जठराग्नि थोड़ी इन्धन वाली होने पर वायु के द्वारा प्रेरित होकर धातुओं का भी परिपाक करती है; इसलिये हेमन्त कालमें मधुर, अम्ल और लवण रसों का सेवन करना चाहिये । ॥ ७-८ ॥

वक्तव्य—हेमन्त काल में मार्गशीर्ष और पौष दो मास होते हैं । इस ग्रन्थ में ऋतु-विभाग मास की दृष्टि से किया गया है; इसलिये ऋतुचर्या का प्रारम्भ हेमन्त को बनाने वाले मास से किया है; तथा सब मासों में मार्गशीर्ष मास उत्तम भी है; 'मासानां मार्गशीर्षोऽहम् ।' इस ऋतु में शीत के कारण त्वचा संकुचित होने से शरीर से ऊष्मा बाहर नहीं निकलती;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इसीलिये शरीर के अन्दर ही पिण्डित हो जाती है। पिण्डरूप में होने से प्रबल भी होती है; अग्नि प्रबल होने से परिपाक अच्छा होता है जिससे धातुओं की पुष्टि और बल की वृद्धि होती है। अग्नि को प्रबल करने में वायु भी कारण है; क्योंकि शीत से वायु बढ़ती है; यथा—'वातप्रकोपणानि खलु रूक्षलघुशीतदारुणखरविशद……' (चरक सू. अ. १२।७)। हेमन्त में वायु और कफ बढ़ते हैं; यथा-'पित्तं शाम्यति तच्छैत्याद् वायुः श्लेष्मा च चीयते ॥' इस बढ़ी वायु का बल पाकर अग्नि और भी बढ़ कर जब पूरा इन्धन (आहार) नहीं पाती, तब धातुओं को पचाना आरम्भ करती है। इसीसे कहा है 'ऊष्मा बहिः प्रतिहतो हिमशीतवातैरन्तः शरीरविवरं प्रतिपद्यमानः । स्वस्थानपिण्डितवपुर्भवति प्रचण्डः शीतेऽनिलानलहरो विधिरिष्यतेऽतः ॥' धातुओं का पालन हो और शरीर में वायु न बढ़े इसलिये मधुर, अम्ल, लवण रसों का सेवन करे; क्योंकि जहाँ ये वायुशामक हैं वहाँ पचने में गुरु भी हैं— यथा 'लघूनि ही द्रव्याणि वाय्वग्नि-गुणबहुलानि भवन्ति; पृथिवी-सोमगुणबहुलानीतराणि, गुरूणि पुनरग्निसन्धुक्षणस्वभावानि ॥' इसलिये गुरु रस खाने चाहिये। सुश्रुत में तिक्त कटु रस के सेवन के लिये जो कहा है, वह कफ को बढ़ने न देने के लिये है-यथा 'हेमन्ते लवणक्षारतिक्ताम्लकटुकोत्कटम् । ससर्पिस्तैलमहितमशनं हितमुच्यते ।' इससे कफ अधिक बढ़ने नहीं पाता।

हेमन्तऋतुचर्या—

दैर्घ्यान्निशानामेतर्हि प्रातरेव बुभुक्षितः।
अवश्यकार्यं सम्भाव्य यथोक्तं शीलयेदनु ॥ ९ ॥
वातघ्नतैलैरभ्यङ्गं मूर्ध्नि तैलं विमर्दनम्।
नियुद्धं कुशलैः सार्द्धं पादाघातं च युक्तितः ॥ १० ॥

स०—एतर्हि एतस्मिन्काले बुभुक्षितः प्रातरेव प्रत्युषसि नान्यकाले यत्किंचिद्दिनातिक्रांतौ सत्यामवश्यं कार्यं मूत्रोत्सर्गादिकं दिनचर्योक्तं च संभाव्य संपाद्य यथोक्तं यथानिर्दिष्टमनु पश्चाद्वातघ्नतैलाभ्यंगादिकं शीलयेत् । यद्यपि बुभुक्षितोऽवश्यकार्यं संभाव्य यथोक्तं शीलयेदित्युक्तं तथापि बुभुक्षितेन न तथान्यत्कार्यं यथा भोजनम् तथा चोक्तम्—"आहारकाले संप्राप्ते यो न भुङ्क्ते बुभुक्षितः । तस्य सीदति कायाग्निर्निरिंधन इवानलः ॥" इति । तस्मादौचित्याद्बुभुक्षितेनाहारः कार्य इति वेद्यम् । नन्वन्यस्मिन्नपि काले बुभुक्षितस्यैवाहारानुज्ञानाद्बुभुक्षितग्रहणं न कार्यम् । युक्तमाह भगवान्। किंत्वस्मिन्काले जाठराग्निच्छायानुकारी भवति। ततोऽस्य जाठराग्नेरिवोपचारो युक्तः । यथा—"मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत् । निरिंधनोंऽतरं लब्ध्वा यथैनं न विपादयेत् ॥" इति अबुभुक्षितस्यैव भोजनाधिकारित्वमिति भ्रांतिनिरासायेह बुभुक्षितग्रहणम् । निशानां दैर्घ्यादिति विशिष्टकालोपलक्षणार्थं कृतम् । यदात्र हेमंते शर्वर्यो दीर्घा जायंते तदैव विधिः सर्वोऽनुष्ठेयो न प्रारब्धमात्र एवास्मिन्निति । नन्वत्र सेवेत शीलयेद्भजेदित्येकार्थाभिधायीनि बहूनि क्रियापदानि किं निर्दिष्टान्येकेनैवार्थाधिगतेः । अत्र ब्रूमः । कार्यान्तरसूचनार्थमेतत्पदत्रयम् । तथाहि । अतो हिमेऽस्मिन्सेवेतेत्यत्र यः सेवेतशब्दः सः इदं द्योतयति । स्वाद्वम्ललवणरसाः पवनविजयार्थमस्मिन् काले नितरामुपयोक्तव्याः । न कादाचित्क एषामस्मिन्नृतावुपयोगो विधेय इति । अत एव वातघ्नतैलाभ्यंगादेः पृथगेषां रसानामुपन्यासः । यथोक्तं शीलयेदित्यत्र यः शीलयेदित्येष शब्दः स वातघ्नतैलादेः सर्वस्व तुल्यकक्षतां द्योतयति । तथा प्रावाराजिनेत्यादौ यो भजेच्छब्दः स सकलस्याहारविहारशीलनस्य शयनविधेश्च तुल्यतां प्रथयति । तथा च वक्ष्यति—"आहारशयनाब्रह्मचर्यैर्युक्त्या प्रयोजितैः । शरीरं धार्यते नित्यमागारमिव धारणैः ॥" इति । वातघ्नतैलैरभ्यंगं शीलयेत् । तैलस्य सर्वस्यैव वातघ्नत्वाद्वातघ्नेति विशेषणमतिशयप्रतिपादनार्थम् । तेन बलातैलादिभिरिति बोध्यम् । मूर्ध्नि तैलं शिरोऽभ्यंगादि । विमर्दनं शरीरसंवाहनमेतदौचित्यादभ्यक्तः सन् शीलयेत् । कुशलैस्तद्विद्भिः सार्धं नियुद्धं बाहुयुद्धं शीलयेत् । पादाघातं पादेन विमर्दनम् । युक्तित इत्यनेनार्धशक्त्यैव शीलनं द्योतयति । बाहुयुद्धपादाघातयोश्चानभ्यक्तस्यैव शीलनं युक्तम् ॥ ९-१० ॥

वि०—रात्रियों के लम्बी होने से भूखा होते हुए भी प्रातःकाल में ही शौचादि प्रथम कहे आवश्यक कार्य सम्पूर्ण करके वातघ्न तैलों से अभ्यङ्ग, शिर पर तेल लगाना; विमर्दन, मल्लों के साथ बाहुयुद्ध (कुश्ती), और युक्तिपूर्वक पाँव से मर्दन ये पीछे से करे ॥-१० ॥

वक्तव्य—हेमन्त काल में रात्रियाँ लम्बी होती हैं; इसलिये प्रातःकाल भूख लगती है; उस समय तुरन्त भोजन न करे; अपितु प्रातःकाल में शीघ्र ही अपने आवश्यक शौचादि कार्य पूर्ण करे। उसके उपरान्त बलातैल आदि वातनाशक तैलों से सम्पूर्ण शरीर पर अभ्यङ्ग करे, शिर पर तैल लगाये; और फिर विमर्दन-अर्थात् हाथों से दबाना। (शरीर का संवाहन) करे। इसके उपरान्त; होशियार पहलवानों के साथ जोर करे, कुश्ती आदि युक्ति से अर्थात् आधी शक्ति से करे, पादाघात अर्थात् पैरों से शरीर को दबवाये—(जिससे थकान दूर हो जाये।)

हेमन्त ऋतु में स्नान, भोजनादि व्यवस्था—

कषायापहृतस्नेहस्ततः स्नातो यथाविधि।
कुङ्कुमेन सदर्पेण प्रदिग्धोऽगुरुधूपितः ॥ ११ ॥
रसान् स्निग्धान् पलं पुष्टं गौडमच्छसुरां सुराम्।
गोधूमपिष्टमाषेक्षुक्षीरोत्थविकृतीः शुभाः ॥ १२ ॥
नवमन्नं वसां तैलं, शौचकार्ये सुखोदकम्।
प्रावाराजिनकौशेयप्रवेणीकौचवास्तृतम् ॥ १३ ॥
उष्णस्वभावैर्लघुभिः प्रावृतः शयनं भजेत्।
युक्त्याऽर्ककिरणान् स्वेदं पादत्राणं च सर्वदा ॥ १४ ॥

स०—कषायेण रोध्रादिनाऽपहृतोऽपनीतः स्नेहो यस्य स एवम् । ततोऽनंतरं यथाविधि शास्त्रोदितेन विधानेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्नातः। कुंकुमेन काश्मीरेण प्रदिग्धोऽनुलिप्तः। दर्पः कस्तूरिका तेन सह वर्तते यत्कुंकुमं तदेवम्। तथाऽगुरुणा जोंगकेन धूपितः। रसान्मांसरसान् स्निग्धान् भजेत्। मांसरसानां स्निग्धत्वेऽपि स्निग्धानिति विशेषणमतिशयद्योतनार्थम्। पलं मांसं पुष्टं मेदुरं भजेत्। तथा गुडस्येदं गौडं तन्मद्यम्। तथाऽच्छसुरां सुरामंडं मदिरां च भजेत्। अन्नेन कषायद्रव्यश्च या क्रियते सा सुरा भण्यते। ननु द्विधैव सुरा सेव्यत्वेनेहाभीष्टा तत्सुराशब्द एव निर्देष्टुं न्याय्यः। तस्मिन्हि सामान्यपदे निर्दिष्टे द्विधैव सुरा निर्दिष्टा भवति। सत्यमेतत्। किंत्वच्छसुरां नितरां भजेन्न तथा सुरामिति ज्ञापनार्थं द्वयोरुपादानम्। अत एवाच्छसुरामिति पूर्वं निर्दिष्टम्। गोधूमेत्यादि। गोधूमश्च पिष्टं च माषश्च इक्षुश्च क्षीरं च तान्येवम्। गोधूमपिष्टमाषेक्षुक्षीरेभ्य उत्थानं यासां विकृतीनां ता एवम्। उत्पूर्वात्तिष्ठतेः सुपीति योगविभागाद्भावे कः। उदः स्थास्तंभोः पूर्वस्येति सस्य तकारः। गोधूमपिष्टमाषेक्षुक्षीरोत्थाश्च ता विकृतयश्च ताः शुभा रम्या भजेत्। तथा नवमपुराणमन्नं तथा वसां भजेत्। शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता। तथा तैलं भजेद्भक्षयेत्। अभ्यंगस्तु प्रागनुज्ञात एव। शौचकार्ये शौचक्रियायां सुखोदकमुष्णोदकं भजेत्। प्रावारः कार्पासो रोमवान् घनः पटस्तूलपटकादिः। अजिनं सुखस्पर्शरोमचर्म। कौशेयं पट्टवसनम्। प्रवेणी सूचीबाणाख्यो वस्तुविशेषः। कौचवं रांकववस्त्रभेदः। तवरक इत्यन्ये। इतैरास्तृतं दत्तप्रतिच्छदपटं शयनं भजेत्। कीदृक् शयनं भजेत्। उष्णस्वभावै रोमशिकारल्लिकाप्रायैः प्रावृतः प्रकर्षेणाच्छादितः। तथा अर्ककिरणान्भजेत्। कथम्। युक्त्या सम्यग्योगलक्षणया। अतिसेविता हि ग्लान्यादीन्कुर्युः। तथा स्वेदं भजेत्। युक्त्यैवेत्यत्रापि योज्यम्। अतिसेवितो हि स्वेदो ग्लान्यादीन् जनयेत्। पादत्राणं च पादुकादिकं सर्वदा भजेत् ॥ ११-१४ ॥

वि०—इसके उपरान्त चूर्ण आदि के उद्वर्तन से स्नेह को दूर करके विधिपूर्वक स्नान करे। फिर कस्तूरी-मिश्रित केशर का शरीर पर लेप करके; अगरु का धूप देवे। फिर स्निग्ध मांसरसों और मेदुर मांस को खाये एवं गुड़ से बने पदार्थ, प्रसन्ना या सुरा को पीये। गेहूँ, पिट्ठी, उरद, गन्ने के रस और दूध से बने सुन्दर पदार्थों को खाये। नूतन अन्न, वसा तथा तल का सेवन करे। शरीर के शोधन में सुहाता गरम (गुनगुना) पानी बरते। प्रावार, अजिन, कौशेय, प्रवेणी, कौचव इनसे ढँके हुए बिस्तर पर गरम एवं लघु (हल्के) वस्त्रों से ढक कर सोये। युक्ति (मात्रा) से सूर्य की किरणों और स्वेद का सेवन करे तथा जूते या खड़ाऊँ आदि का सदा उपयोग करे ॥ ११-१४ ॥

वक्तव्य—कषाय (उबटन) का उपयोग केवल स्नेह ही दूर करने के लिये करे, अधिक नहीं, विधिपूर्वक स्नान—स्नान में गरम पानी बरतना, 'अभ्यङ्गोत्सादने मूर्धतैलं जेन्ताकमातपम्' ॥ यहाँ पर जेन्ताक का अर्थ सर्वाङ्गोष्णोदक स्नान किया है; अर्थात् शीतकाल में सब अङ्गों में गरम पानी से स्नान करे-इसके लिये कहा है 'अतिशीताम्बु शीते च श्लेष्मामारुतकोपनम् ॥' शरीर में वायु का कोप शीत से न हो, इसलिये कस्तूरी-मिश्रित केशर का शरीर पर लेप करे और अगरु का धुआँ देवे। यह तो बाह्य उपचार हुआ। अन्तः उपचार में सर्दी से बचने के लिये स्निग्ध मधुर रसों को तथा अतिशय स्निग्ध मांसरसों को; पुष्ट मेदुर मांस को-बहुत मेदवाले मांस को खाये; सुरा को पिये; और जो यह सेवन न कर सके वह गेहूँ, उड़द, गुड़ आदि से बने घृतबहुल पदार्थ खाये। साथ ही साथ शरीर के शोधन में गुनगुना पानी बरते; परन्तु पीने में ठण्डा पानी ही बरते। नूतन अन्न से अभिप्राय-जिस अन्न को एक साल नहीं हुआ; ऐसा अन्न बरते। प्रावार-रुई का बना रुँएदार घन वस्त्र। अजिन-चर्म-मृगछाला आदि का बना। कौशेय-रेशमी वस्त्र। प्रवेणी-ऊन का सूए से बुना वस्त्र-जैसा भोटिये पहनते हैं। कौचव-इसके स्थान पर 'कुथक' पाठ भी है-जिसका अर्थ कम्बल है। कौचव का अर्थ-राङ्कव वस्त्र भेद भी दिया है। सूर्य की किरणों का युक्ति से सेवन करे-अर्थात्-'सेवेत पृष्ठतस्त्वर्कं जठरेण हुताशनम्।' स्वेदविधि भी युक्तिपूर्वक मात्रा से करे तथा गरमी से बाहर आने पर एकदम शीत से बचाये क्योंकि इससे हानि की सम्भावना है, जैसा कि स्वेद अध्याय में कहा है—'निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमुपस्पृशेथाः, अपगतसन्तापक्लमस्तु मुहूर्त्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीथाः' ॥ (चरक सू. १३।४६)

हेमन्त ऋतु में संभोग्य स्त्री—

पीवरोरुस्तनश्रोण्यः समदाः प्रमदाः प्रियाः।
हरन्ति शीतमुष्णाङ्ग्यो धूपकुङ्कुमयौवनैः ॥ १५ ॥

स०—ऊरू च स्तनौ च श्रोणिश्च ऊरुस्तनश्रोणि। पीवरं पीनमूरुस्तनश्रोणि यासां ता एवंभूताः प्रमदा विलासिन्यः शीतं हरंति नुदंति। पीनत्वेनातिकार्श्यमत्र निषिध्यते। तथा चाह। ग्राम्यधर्माधिकारे त्यजेदतिकृशामिति। किंभूताः। सह मदेन यौवनोद्भूतेन सुरादिपानजेन कामोद्रेककारिणा वा वर्तंते समदाः। तथा प्रिया वल्लभाः शीतं हरंति। किंभूताः उष्णांग्यो धूपकुंकुमयौवनैरगुर्वादिधूपेनोष्णांग्यः। तथा कुंकुमानुलेपनेनोष्णांग्यः तथा यौवनोष्मणा सहजेनोष्णांग्य इति योज्यम् ॥ १५ ॥

वि०—पुष्ट ऊरु, स्तन एवं श्रोणी वाली, मद वाली, प्रिय, धूप, केशर एवं यौवन के कारण उष्ण अङ्गों वाली स्त्रियाँ शीत को हरती हैं ॥ १५ ॥

हेमन्त में प्रशस्त गृह—

अङ्गारतापसन्तप्तगर्भभूवेश्मचारिणः।
शीतपारुष्यजनितो न दोषो जातु जायते ॥ १६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—अंगाराणां तापोऽगारतापस्तेन संतप्तं च तद्-गर्भेऽभ्यंतरे भूवेश्म च तत्तस्मिश्चरति नित्यं यस्तस्यांगारताप-संतप्तगर्भभूवेश्मचारिणः पुंसो यतः शीतपारुष्यजनितो दोषो दुःखं न जातु कदाचिज्जायते ततोऽगारतापसंतप्तगर्भभूवेश्म-चारी स्यादिति भावः ॥ १६ ॥

वि०—अङ्गारों की गरमी से गरम किए हुए; तथा भूमि के नीचे के घरों में रहने वाले व्यक्तियों में शीत के पारुष्य (कठोरता) के कारण उत्पन्न दोष कभी भी उत्पन्न नहीं होते। अर्थात् निवात-उष्ण गृह में रहे ॥ १६ ॥

शिशिरऋतुचर्या—

अयमेव विधिः कार्यः शिशिरेऽपि विशेषतः।
तदा हि शीतमधिकं रौक्ष्यं चादानकालजम् ॥ १७ ॥

स०—अयमेव हैमंतो विधिः पूर्वोक्तः शिशिरे च विशेष-तोऽतिशयेन कार्यः। कुत इत्याह। यस्मात्तस्मिन् काले शीत-मधिकं भवति। कालस्वाभाव्यात्। तथा आदानकालाज्जात-मादानकालजं च रौक्ष्यं भवति। ततो हेतुद्वयाद्विशेषेण हैमं-तिको विधिः सेव्यः। हेमंते रसान् स्निग्धान् शीलयेदित्युक्तम्। शिशिरे तानतिशयेन शीलयेत्। एवं सर्वेष्वपि हैमंतिको विधिर्योजनीयः। आदानकालजमित्यनेनैतद्द्योतयति। आदानकाल एव रौक्ष्यस्य कारणं नान्यत्। अत एव हेमंते शीतेऽपि रौक्ष्यं नास्त्येवेति। आदानस्य च प्रारंभमात्रत्वम्। एवं शिशिरस्य संभव इति शिशिरे किंचिदेव रौक्ष्यं वेद्यम्। ननु यथा रौक्ष्यमादानकालजे तथौष्ण्यमपि। तथा चोक्तम्। तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षा इति। एवं चौष्ण्यसद्भावाच्छी-तस्य हेमंततो हानिः प्राप्ता न त्वाधिक्यम्। कथं तदा हि शीतमधिकमिति। ब्रूमः। रौक्ष्यस्य द्वौ हेतू। एकस्तावद्भगव-द्दिवाकरकरैर्जगतः स्नेहादानम्। द्वितीयस्त्वग्नेः कालः। तदेवं रौक्ष्येणोभयहेतुजेन शिशिरे काले वाताः शीतस्वभावा आहि-ताधिकशक्तयो जायंते हैमंतेभ्यो मारुतेभ्यः। तथाविधाश्चोष्णे-नादानकालप्राधान्यादप्राप्तबलेन शिशिरे नाभिभूयंते। अनभिभूताश्च शीतस्वभावत्वाच्च शीतमेव वर्धयंति। अतो युक्तं शीताधिक्यं शिशिर इति ॥ १७ ॥

वि०—शिशिरचर्या—विशेष कर यही विधि शिशिर में भी बरतनी चाहिये क्योंकि शिशिर में शीत अधिक होता है; तथा आदानकालजनित रूक्षता भी होती है ॥ १७ ॥

वक्तव्य—शीत काल होने से तथा आदानकालजन्य रूक्षता होने के कारण इस ऋतु में हेमन्त की विधि विशेष रूप में बरतनी चाहिये। इसी से कहा है 'स्वभावशैत्याद् रौक्ष्याच्च वातकोपाद् बलक्षयात्। विधिर्विशेषात् स्निग्धोष्णः शिशिरे हैमनो मतः।''

संप्रति वसंतचर्यां विवक्षुरिदमाह—

कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः।
हत्वाऽग्निं कुरुते रोगानतस्तं त्वरया जयेत् ॥ १८ ॥
तीक्ष्णैर्वमननस्याद्यैर्लघुरूक्षैश्च भोजनैः।
व्यायामोद्वर्तनाघातैर्जित्वा श्लेष्माणमुल्बणम् ॥ १९ ॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः।
पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक् ॥ २० ॥
सहकाररसोन्मिश्रानास्वाद्य प्रिययाऽर्पितान्।
प्रियाऽऽस्यसङ्गसुरभीन् प्रियानेत्रोत्पलाङ्कितान् ॥
सौमनस्यकृतो हृद्यान्वयस्यैः सहितः पिबेत्।
निगदानासवारिष्टसीधुमार्द्वीकमाधवान् ॥ २२ ॥
शृङ्गबेराम्बु साराम्बु मध्वम्बु जलदाम्बु च।

स०—यस्मात् शिशिरे मधुरस्निग्धादिनाऽऽहारेण काल-स्वाभाव्याच्च श्लेष्मा संचितोऽतिशयेन स्त्यानत्वादतिकुपितो वसंते ऋतावर्कांशुतापितः सूर्यप्रभाभिर्विलायितो द्रवस्वरूप-त्वाज्जलमिव विपरीतं जाठराग्निं हत्वा हि यस्माद्रोगान्वि-कारान् कुरुते जनयति। अतोऽस्मात्कारणात्तं कफं त्वरया शीघ्रमेव जयेत्। दोषानिति केचित्पठंति। अर्कतापित इत्यनेनैव सिद्धे अंशुशब्दोऽत्र रश्मीनां पटिमानं सूचयति न तथा शीते। तत्र हि धूमधूम्ररजोमंदा इत्यधिरोगकैर्वर्जयेत्। तीक्ष्णै-र्वमननस्य विरेकादिभिरुपक्रमेत्। तथा लघूनि रूक्षाणि च यानि भोजनानि तैश्च। तथा व्यायामश्चोद्वर्तनं च आघातश्च तैश्च कफं जयेदिति। चशब्दो लुप्तनिर्दिष्टः। ततः कफ-मुल्बणमुद्धतं जित्वाऽनंतरं स्नातोऽनुलिप्तः समालब्धः कर्पूर-चंदनागुरुकुंकुमैः। तथा पुराणं च तद्यवगोधूमं च तथा क्षौद्रं माक्षिकं तथा जांगलं च तच्छूल्यं भटित्रं च तत्तानि भुंक्ते पुराणयवगोधूमक्षौद्रजांगलशूल्यभुक्। शूल्य इति शूलात्पाक इति यः। एवंविधः सन् वयस्यैर्मित्रैः सहित आसवादीन् पिबेत्। किंभूतान्। निर्गदान् निर्दोषान्। पिबेदिति वक्ष्य-माणेन संबंधोऽत्र दीपकत्वात्। आसवो यो द्रव्याण्यासुत्य क्रियते। उक्तं च—"मद्याकाराधिकद्रव्यमदिराद्यैः कृतस्तु यः। सोऽरिष्टः स्यादासवस्तु द्रव्याण्यासुत्य यः कृतः॥" इति। सीधुरिक्षुरसोद्भवः। मार्द्वीकं मृद्वीकारसोद्भवम्। माधवो मधुना संस्कृतः। किंभूतानासवादीन्। सहकाररसोन्मिश्रान् प्रियया आस्वाद्य किंचित्पीत्वाऽर्पितान् ढौकितान्। तथा प्रियास्यसंगेन सुरभीन् सुगंधीन्। तथा प्रियानेत्राण्येवोत्पलानि तैरंकितान् संजातशोभान्। तथा सौमनस्यकृतश्चित्तप्रसादकृतः। तथा हृद्यान् हृदयाय हितान्। तथा शृङ्गबेराम्बु शुंठीक्वथितजलं पिबेत्। तथा सारः असनचंदनादिजस्तेन क्वथितमंबु पिबेत्। तथा मधुना युक्तमंबु मध्वंबु। जलदेन मुस्तया च क्वथितमंबु पिबेत्। वेति समुच्चये ॥ १८-२२½ ॥

वसन्तऋतुचर्या—

वि०—वसन्तचर्या—शिशिर में सञ्चित कफ वसन्त में सूर्य की किरणों की गरमी से पिघलकर अग्नि को नष्ट करते हुए रोगों को उत्पन्न करता है; अतः उस कफ को तीक्ष्ण वमन, नस्य आदि लघु एवं रूक्ष भोजन, व्यायाम, उद्वर्तन और

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आघात से जल्दी से जीते। इस प्रकुपित कफ को जीत कर, स्नान करके; कपूर, चन्दन, अगरु और केशर का शरीर पर लेप करे और पुरातन जौ, पुरातन गेहूँ, मधु तथा जाँगल मांस, या शूल-संस्कृत मांस, भोजन में लें। प्रिया से अर्पित किये, आम्ररस से सुगन्धित, आस्वादित (जिनको प्रिया स्त्री ने स्वयं चख कर दिये हों; तथा प्रिया के मुख के सङ्ग के कारण सुगन्धित बने;), प्रिया के कमल रूपी नेत्रों से प्रतिबिम्बित (पीते समय प्रिया देख रही हो); मन को प्रसन्न करने वाले; हृदय के लिये उत्तम या सुस्वादु, निर्दोष, आसव, अरिष्ट, सीधु, मार्द्वीक और माधव को वयस्यों के साथ पिये। सोंठ का पकाया जल; साराम्बु (असन आदि का पकाया जल); मधु का शर्बत; नागरमोथे से सिद्ध जल पिये॥ १८-२२ १/२ ॥

वक्तव्य—वसन्त ऋतु में कफ का प्रकोप होता है; इस ऋतु में प्रायः कफ के रोग होते हैं। इस ऋतु की चर्या दो प्रकार की हैं—एक शोधनी और दूसरी शमनी। इनमें संचयपूर्वक अवस्था में शोधन चिकित्सा; और दूसरे (अचयज) में शमनी चिकित्सा करनी चाहिये। इनमें चयपूर्वक जो है; वह अपथ्यजन्य है क्योंकि पूर्व ऋतु में अपथ्य सेवाजन्य है। इसी से कहा है—'दोषप्रकोपो द्विविधः, पथ्यापथ्यनिमित्तजः। तत्रापथ्यनिमित्तो यः स संशोधनमर्हति। पथ्यजः शमनीयश्च प्राय आगन्तुजश्च यः' ॥ इसलिये प्रथम कफ की शोधन चिकित्सा कही गयी है—इसके लिये तीक्ष्ण वमन, तीक्ष्ण नस्य आदि दिये हैं। यह कफ शिशिर में कुपित नहीं होता; क्योंकि इस ऋतु में इतनी गरमी नहीं होती। इसी से कहा है—'हेमन्ते निचितः श्लेष्मा शिशिरेऽपि न कुप्यति। आहारैश्च गुरुस्निग्धैर्भृशमेवोपचीयते ॥' परन्तु वसन्त में सूर्य की प्रबलता से कफ पिघलकर फैलता और प्रकुपित होता है।

इसके उपरान्त शमन चिकित्सा करे—इसके लिये व्यायाम, उद्वर्त्तन (रूक्ष), आघात-पैरों से, मर्दन-दाबना; ये करे। निगदान्—निर्दोष, देश काल आदि से अदूषित। आसव अरिष्ट='मद्याकराधिकद्रव्यमदिराद्यैः कृतस्तु यः। सोऽरिष्टः स्यादासवस्तु द्रव्याण्यासुत्य यः कृतः॥' सीधु-इक्षुरस से बना। मार्द्वीक-द्राक्षा रस से बनाया। माधव-मधु से बनाया। साराम्बु-असन आदि वृक्षों के सार का पानी-यह कफनाशक है; यथा प्रमेह में—'शनैर्मेहिनं खदिरकषायम् नीलमेहिनं शालसारादिकषायम्। मध्वम्बु-मधु योगवाही तथा स्थौल्यनाशक है; तथा-सुश्रुत में—'मधुनो योगवाहित्वाद् मेहहरत्वाच्च। स्थौल्य चिकित्सा में 'प्रयोगो माक्षिकस्य च' (चरक सू. २१।२२)

वसन्तस्य मध्याह्ने सेवनीयं स्थानम्—

दक्षिणानिलशीतेषु परितो जलवाहिषु ॥ २३ ॥
अदृष्टनष्टसूर्येषु मणिकुट्टिमकान्तिषु।
परपुष्टविघुष्टेषु कामकर्मान्तभूमिषु ॥ २४ ॥
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत्सुखी ॥ २५ ॥

स०—काननेषूपवनेषु स्थितो मध्याह्नं गमयेदतिवाहयेत्। अह्नो मध्यो मध्याह्नः। संख्याविसायेत्यादिज्ञापकात्पूर्वापरेत्यादिना एकदेशिसमासः। अह्नोऽह्न एतेभ्य इत्यह्नादेशः। कथम्। गोष्ठ्यां क्रीडायां कथा गोष्ठीकथास्ताभिश्चित्राभिः कमनीयाभिर्व्यवहारसंबंधिनीभिरित्यर्थः। कीदृशः सन्। सुखी रागद्वेषादिरहितः। किंभूतेषु काननेषु दक्षिणदिक्प्रवृत्तैरनिलैः शीतानि तेषु दक्षिणानिलशीतेषु। तथा परितः समंताज्जलं नित्यं वहंति यानि तेषु। आभीक्ष्ण्ये णिनिः। तथा क्वचित्प्रदेशेऽदृष्ट ईषद्दृष्टः क्वचिदतिघनत्वान्नष्टो न दृश्यते सूर्यो येषूपवनेषु तान्येवं तेषु। तथा मणीनां वज्रमरकतादीनां कुट्टिमानि विशिष्टा भुवस्ताभिः कांतिः शोभा येषां तान्येवं तेषु। तथा परपुष्टैः कोकिलैर्विघुष्टेषु कृतशब्देषु तथा कामस्य कर्मान्ताः कामकर्मांता मदनव्यापाराः। अंतशब्दोऽत्र प्रशंसावचने। यथोद्भटस्य वचनम्। वनांतदेवतावेण्य इति। कामकर्मांतनिमित्तभूमयो येषां वनानां तान्येवं तेषु। विचित्राणि नानारूपाणि पुष्पाणि येषां ते तथाविधा वृक्षा येषां तान्येवं तेषु। सुष्ठु गंधो येषां तेषु। गंधस्येदितीत्समासांतः। अस्मिन्काले कफोपचयदोषभयात् ॥ २३-२५ ॥

वसन्त के मध्याह्न में सेवनीय स्थान—

वि०—जो जंगल या बाग दक्षिण दिशा की वायु से शीतल बने हुए हों; जिनके चारों ओर जल बह रहा हो; जिनमें सूर्य कहीं थोड़ा दीख रहा हो, और कहीं बिलकुल न दीखता हो-छिपा हो; जिनकी भूमि मणियों के फर्श के समान सुन्दर हो; जहाँ पर कोयल की कुहुक सुनाई देती हो; जिनमें मदनव्यापार के योग्य प्रशस्त भूमि हो; नाना प्रकार के पुष्प एवं वृक्षों से सुगन्धित हो, चित्र-विचित्र गप-शप एवं कथाओं के साथ सुखी मनुष्य मध्याह्न काल बिताये ॥२३-२५॥

वक्तव्य—वसन्त में दक्षिण दिशा की कामोद्दीपक वायु बहती है। यथा-'वाति कामिजनानन्दजननोऽनङ्गदीपनः। दम्पत्योर्मानभिदुरो वसन्ते दक्षिणोऽनिलः ॥' 'दक्षिणानिलसंवीताः सुमुखाः पल्लवोज्ज्वलाः' (सु. सू.) अदृष्टनष्टसूर्येषु-जहाँ पर सूर्य कहीं दीखता हो, और कहीं छिप गया हो (धूपछाँह)। कामकर्मान्तभूमिषु-मदनव्यापारः-अन्तन्ति बध्नन्ति-स्वसौन्दर्यगोत्तरोत्तरं वर्द्धयन्ति-अथवा-कामकर्मान्तो मदनव्यापारः। जैसा कि कुमारसम्भव में-'मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः। शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥' अर्थात्—जहाँ की भूमि मदनव्यापार के लिये उत्तम हो। गोष्ठी-लोकवार्त्ता कथा-शास्त्रवार्त्ता।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

वसन्त में वर्ज्य पदार्थ—

गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत् ।

स॰—गुरुशीतादींस्त्यजेत् । ननु लवणमपि श्लेष्माणं करोति तत्कस्मादिह न निषिद्धम् । अतो ब्रूमः । लवणः पूर्वं कफमम्लमधुराविव न करोति किं तर्हि निधने चिरंतनसंचितं स्रुतिरूपं श्लेष्माणं विधत्ते विष्यंदित्वात् । न च लवणस्य मधुरादेरिव बहुतरस्य प्रयोगः प्रसिद्धः किंतह्यल्पस्यैव । तस्माल्लवणस्यात्रानिषेध एव न्याय्यः ।

वि॰—(वसन्त ऋतु में) गुरु, शीतल पदार्थ; दिन में सोना; स्निग्ध-अम्ल और मधुर वस्तुओं को छोड़ देना चाहिये ।

वक्तव्य—लवण भी कफवर्धक है; परन्तु अम्ल और मधुर की तरह नहीं है; अतः उसका उल्लेख यहाँ नहीं किया है ।

अधुना ग्रीष्मचर्यामुपदिदिक्षुराह—

तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत् ॥ २६ ॥
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्धते ।
अतोऽस्मिन्पटुकट्वम्लव्यायामार्ककरांस्त्यजेत् ॥२७॥

स॰—यद्यस्यात्तीक्ष्णांशुर्भास्करोऽतितीक्ष्णा अंशवः करा यस्य स एवंभूतः सन् ग्रीष्मे संक्षिपतीव जगत्स्नेहमित्यत्रानुक्तमप्यर्थाल्लभ्यते । केचित्तु स्नेहमर्कोऽतितीक्ष्णांशुरिति पठंति । स्नेहस्तेजोबलं सारमित्येकोऽर्थः । त स्नेहमर्कः संक्षिपतीव यत्संबंधः संहरतीव पिबतीव । इवशब्देनैतत्सूचयति—हेतुप्रत्ययपरतंत्रेषु सर्वभावेषु न कश्चित्कश्चित्तद्बुद्धिपूर्वकं संहरति । परमार्थतो बलहानिकृत्त्वादेषाम् । अतोऽस्मात्कारणादस्मिन् ग्रीष्मकाले पट्वादींस्त्यजेत् ॥ २६-२७ ॥

ग्रीष्मऋतुचर्या—

वि॰—ग्रीष्म ऋतु—ग्रीष्म ऋतु में अति तीक्ष्ण किरणों वाला सूर्य संसार के स्नेह को नष्ट करता है; जिससे प्रतिदिन श्लेष्मा घटती जाती है; और वायु बढ़ती है । इसलिये इस ऋतु में लवण, कटु तथा अम्ल रस, व्यायाम और सूर्य की किरणों का त्याग करना चाहिये ॥ २६-२७ ॥

वक्तव्य—लवण कटु और अम्ल रस आग्नेय हैं अतः इनसे पित्त की वृद्धि और बल की हानि होती है ।

किमत्र सेव्यमित्याह—

भजेन्मधुरमेवान्नं लघु स्निग्धं हिमं द्रवम् ।

स॰—मधुरमेवान्नं भजेत् । बाहुल्येन मधुरमन्नं सेव्यं न तथाऽन्यरसजातमित्येवकाराल्लभ्यते । तथा लघु स्निग्धं हिमं द्रवं चेति । चशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः ।

ग्रीष्म ऋतु में भोजनादिव्यवस्था—

वि॰—सेवनीय—ग्रीष्म ऋतु में मधुर, लघु, स्निग्ध और शीतल एवं द्रव पदार्थ सेवन करना चाहिये[1] ।

सामान्येन भोजनमुक्त्वा विशेषमाह—

सुशीततोयसिक्ताङ्गो लिह्यात्सक्तून् सशर्करान् ॥ २८ ॥

स॰—सक्तून् सशर्करान् लिह्यात् । सुष्ठु शीतं सुशीतं च तत्तोयं च तेन सिक्तमाप्लुतमंगं कायो यस्य स एवं भूतः सन् ॥ २८ ॥

वि॰—अतिशय शीतल जल से स्नान करके शर्करामिश्रित सत्तू खाये ॥ २८ ॥

वक्तव्य—स्नान और सत्तू-श्रमहर हैं । सत्तू के लिये—'समघृतसक्तुप्राशाभ्यासो वृष्योदावर्त्तहराणां (श्रेष्ठतमः) ।' इसी प्रकार 'तर्पयन्ति नरं सद्यः पीता सद्योबलाश्च ते ॥' (चरक सू. अ. २७।२५८) सत्तु को घोलकर लेह्य या पेय बनाकर उपयोग में लाना चाहिये; खाना उचित नहीं जैसा कि चरक ने कहा है 'न छित्वा द्विजैर्भक्षयेत् ।'

मद्यं न पेयं पेयं वा स्वल्पं, सुबहुवारि वा ।

स॰—अस्मिन्काले मद्यं न पेयम् । पेयं वा स्वल्पमिति । वातश्लेष्मप्रकृतिना वातक्षयार्थमन्यर्तुवद्बहु न पेयं किं तर्हि स्वल्पमेव पातव्यम् । सुबहुवारि वेति पित्तश्लेष्मप्रकृतिना मद्योचितेन श्लेष्मप्रतिक्रियार्थं पित्तप्रतीकारमपीच्छता सुबहुवारि तन्मद्यं पेयमित्यत्रानुक्तोऽप्येवमर्थाद्विषमविभागो बोध्यः । अन्यथा निषेधविध्योर्विरोधः स्यात् ।

वि॰—ग्रीष्म ऋतु में मद्य नहीं पीना चाहिये; पीने की आदत हो, या पीना ही हो तो थोड़ा और बहुत पानी मिलाकर पीवे ।

उक्तविध्यतिक्रमे दोषमाह—

अन्यथा [1]शोषशैथिल्यदाहमोहान् करोति तत् ॥२९॥

स॰—तन्मद्यमन्येन प्रकारेण पीतं सत् शोफादीन् करोति । शोफः श्वयथुः । शैथिल्यमंगानामनैष्ठुर्यम् । दाहः सर्वांगीणस्तापः । मोहोऽज्ञानं जंतोः ॥ २९ ॥

वि॰—ऐसा न करने से वह मद्य शरीर, में शोष, शिथिलता, दाह और मोह प्राप्त करता है ॥ २९ ॥

कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः ।

स॰—कुंदः पुष्पविशेषः । इन्दुश्चंद्रः । तयोर्द्वंद्वः । कुंदेंदुवद्धवलं शुक्लं शालिं जांगलैः पलैर्मांसैः सहाश्नीयादद्यात् । 'क्षुण्णस्मितः स्मृतः शाली रक्तो व्रीहिरुदाहृतः' ।

---

१. ग्रीष्म ऋतु में सूर्य पृथ्वी के अधिक समीप होता है और अपनी तीक्ष्ण किरणों से आग बरसाता हुआ संसार की प्रायः सभी वस्तुओं के स्नेह का शोषण करता है जिससे अत्यधिक दुर्बलता और बेचैनी होती है अतः स्निग्ध और मधुर आहार हितकर होता है; किन्तु अग्नि की दुर्बलता होती है अतः लघु और तरल आहार ही अधिक उपयोगी होता है ।

१. शोष के स्थान पर शोथ भी पाठ है; सर्वांगसुन्दराकार ने शोफ माना है । मद्यपान से शोथ, खासकर आंत्र तथा यकृत में, और परम्परया सर्वांगशोथ को भी उत्पन्न करता है ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—कुन्द पुष्प (मोगरा-गुजराती) तथा चन्द्रमा के समान शुभ्र शालिधान्य को जांगल मांस के साथ खाये।

पिबेद्रसं नातिघनं रसालां रागषाडवौ ॥ ३० ॥
पानकं पञ्चसारं वा नवमृद्भाजने स्थितम्।
मोचचोचदलैर्युक्तं साम्लं मृन्मयशुक्तिभिः ॥ ३१ ॥
पाटलावासितं चाम्भः सकर्पूरं सुशीतलम्।

स०—रसं नातिघनं पिबेत्। रसशब्देनादिलोपाख्यया तंत्रयुक्त्या मांसरस उच्यते। तथा रसालां मर्जिकाख्यां पिबेत्। तथा रागखांडवौ पानकं च पंचसाराख्यम्। एतेषां च लक्षणं तंत्रान्तर उक्तम्। यथा—"सितामध्वादिमधुरा रागास्त त्राच्छकांतयः। ते साम्लाः खांडवा लेह्याः पेयाश्चांशुक-गालिताः॥ स्वाद्वम्लपटुकटूवाद्याः प्रलेहास्तत्र खांडवाः। गुडदाडिममांसाद्या रागाश्चांशुकगालिताः॥ हृद्या वृष्या रुचिकरा ग्राहिणो रागखांडवाः" इति। तथा—"द्राक्षामधूक-खर्जूरकाश्मर्यः सपरूषकाः। तुल्यांशैः कल्पितं पूतं शीतं कर्पूरवासितम्॥ पानकं पंचसाराख्यं दाहतृष्णानिवर्तकम्।" अन्यत्र चोक्तम्। यथा—"गुडदाडिमादियुक्ता विज्ञेया राग-खांडवाः। त्रिजातमरिचाद्यैस्तु संस्कृताः पानकास्तथा॥" इति। कीदृशं पानकं पिबेदित्याह। नवं च यन्मृद्भाजनं तत्र स्थितम्। तथा मोचं कदलीफलं, चोचं पनसफलं तयोर्दलानि तैर्युक्तम्। तथा साम्लम्। तिन्तिडीकादियोगात् खांडवरसानु-गतम्। केचित्तु क्षीरं घृतपिप्पलीशशिमाक्षिकशर्करोपेतं पंच-सारं पानकमित्याहुः। केन पिबेदित्याह। मृन्मयशुक्तिभिः। पाटलया वासितं सुरभीकृतं तथा सकर्पूरं सुशीतलं चांभः पिबेत्। मृन्मयशुक्तिभिरित्यत्रापि योज्यम्। सुश्रुते चोक्तम्—"परिपेलवया तुल्यास्तथा गुग्गुलुमुस्तकाः। चूर्णिताः शशि-नोपेता नवभाजनधूपनम्॥ कुष्ठमुस्तकसंयुक्तैः पेलवोशीर-वालकैः। मृदिता मृत्सु पिष्टैस्तैः खदिरांगारपाचिताः॥ सहकाररसाभ्यक्ताश्चंपकोत्पलवालकैः। पद्मकुंजककुंदैश्च यथा-लाभादिवासिताः॥ श्रेष्ठः सलिलवासोऽयं स्मृतः सर्वर्तुको बुधैः" ॥ ३०-३१ ॥

वि०—ग्रीष्म ऋतु में उत्पन्न मांसरस जो ज्यादा गाढ़ा न हो, पीना चाहिये। रसाला, राग, षाडव, पानक और पंचसार मिट्टी के नये पात्र में रखकर केले और दालचीनी और नारियल के टुकड़े मिला कर, (अनारदाने) से खट्टा करके मिट्टी की बनी सिप्पियों से खाये। पाटला पुष्प से सुवासित कर्पूर-मिश्रित अतिशय शीतल जल पीये ॥३०-३१॥

वक्तव्य—ग्रीष्म ऋतु में द्रव भोजन की दृष्टि से पतला मांसरस पसन्द किया है। रसाला—'अर्धाढकं सुचिरपर्युषितस्य दध्नः, खण्डस्य षोडशपलानि शशिप्रभस्य। सर्पिष्पलं मधु पलं मरिचं द्विकर्षं, शुण्ठ्याः पलार्धमपि चार्धपलं चतुर्णाम्॥ सूक्ष्मे पटे ललनया मृदुपाणिघृष्टा, कर्पूरधूलिसुरभीकृतपात्रसंस्था। एषा वृकोदरकृता रसना रसाला, याऽऽस्वादिता भगवता मधु-सूदनेन॥' इस प्रकार बनाई शिखरणी को 'रसाला' कहते हैं। राग = रायता; षाडव का लक्षण—'युतमिक्षुविकारेण कथितं चूतजं फलम्। घृतशुण्ठीतिलयुतं विज्ञेयो घनषाडवः॥ स्पष्टाम्लमधुरोऽस्पष्टकषायलवणोषणः। अतिक्तः षाडवः कोलकपित्थाद्युपबृंहितः॥' इसी प्रकार 'सितामध्वादिमधुरा रागास्तत्राच्छकान्तयः। ते साम्ला षाडवा लेह्या पेयाश्चांशुक-गालिताः॥ स्वाद्वम्लपटुकटूवाद्या रागा अंशुकगालिताः। हृद्या वृष्या रुचिकरा ग्राहिणो रागषाडवाः॥' पानक—शर्बत; पञ्चसार पानक—मधु आदि पाँच द्रव्यों से बना शर्बत; यथा—'मधुखर्जूरमृद्वीकापरूषकसिताऽम्भसा। अन्यो वा पञ्च-सारेण सघृतैर्लाजवस्तुभिः'॥ अथवा—'द्राक्षामधुकखर्जूर-काश्मर्यैः सपरूषकैः। तुल्यांशैः कल्पितं पूतं शीतं कर्पूर-वासितम्॥ पानकं पञ्चसाराख्यं दाहतृष्णानिवर्त्तकम्॥' मिट्टी के नये पात्र में रखने से ये अधिक ठण्डे होते हैं। अम्ल-अनारदाने से खट्टे बनाये। मिट्टी की बनी सिप्पियों (चम्मच) से पिये; जिससे ठण्डा रहे। पीने के पानी को पाटला से सुवासित करे—दूषित पानी को उत्तम करने के लिये-'नागचम्पकोत्पलपाटलापुष्पप्रभृतिभिश्चाधिवासनमिति।' इससे पानी की विकृत गन्ध मिट जाती है। पात्र के लिये 'सौवर्णे राजते ताम्रे कांस्ये मणिमयेऽपि वा। पुष्पावतंसे भौमे वा सुगन्धि सलिलं पिबेत्॥' (सु. सू. अ. ४५।१३)।

ग्रीष्म ऋतु में रात्रिभोजन व्यवस्था—

शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत् ॥
ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम् ॥ ३२ ॥

स०—माहिषं क्षीरं ससितं सशर्करं रजन्यां रात्रौ पिबेत् किंभूतम्। चन्द्रेण नक्षत्रैश्च शीतलम्। रजन्यां रात्रावाकाशे शैत्यार्थं स्थापितमित्यर्थः। किं कुर्वन् पिबेत्। भक्षयन् भक्ष्यान् भुंजन्। कीदृशान्। शशांककिरणान् कर्पूरनाडिकाख्यान् ॥ ३२ ॥

वि०—रात में शशांककिरण में पक्व भक्ष्य पदार्थों को खाते हुए, चन्द्रमा एवं नक्षत्र से शीतल बने, शर्करा-मिश्रित भैंस का दूध पिये ॥ ३२ ॥

वक्तव्य—भैंस का दूध गाय के दूध से अधिक शीतल है; यथा—'महिषीणां गुरुतरं गव्याच्छीततरं पयः।' साथ में अधिक स्नेह वाला है। शशाङ्ककिरण यथा—'तालीसचूर्ण-वटकाः, सकर्पूरसितोपलाः। शशाङ्ककिरणाख्यास्तु भक्ष्या रुचिकराः परम्॥' अधिक ठण्डा करने के लिये रात्रि में खुले में रखना चाहिये।

ग्रीष्म के मध्याह्न में सेवनीय स्थान—

अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु ॥ ३३ ॥
वनेषु माधवीश्लिष्टद्राक्षास्तबकशालिषु।
सुगन्धिहिमपानीयसिच्यमानपटालिके ॥ ३४ ॥
कायमाने चिते चूतप्रवालफललुम्बिभिः।
कदलीदलकह्लारमृणालकमलोत्पलैः ॥ ३५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कोमलैः कल्पिते तल्पे हसत्कुसुमपल्लवे ।
मध्यंदिनेऽर्कतापार्त्तः स्वप्याद्धारागृहेऽथवा ॥ ३६ ॥
पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि ।

स०—अभ्रमाकाशं कषंत्युल्लिखंत्यत्युच्चतयाऽभ्रंकषाः महांतश्च शालाश्च तालाश्च महाशालतालाः । अभ्रंकषाश्च ते महाशालताश्च तै रुद्धः स्थगित उष्णरश्मिर्दिनकरो येषु वनेषु तेषु मध्यंदिने मध्याह्नेऽर्कतापार्तः सन् स्वप्याच्छयीत । वनेष्विति । माधव्यो लताविशेषा अतिमुक्तकाख्यास्तासु श्लिष्टा माधवीश्लिष्टाः द्राक्षायास्तबका गुच्छका द्राक्षास्तबकाः । माधवीश्लिष्टाश्च ते द्राक्षास्तबकाश्च तैः शालितुं श्लाघितुं शीलं येषां वनानां तानि माधवीश्लिष्टद्राक्षास्तबकशालीनि तेषु वनेषु । कायमाने वेण्वादिनिष्पादिते गृहविशेषे । कीदृशे सुगंधि च तद्धिमं च तत्सुगंधिहिमपानीयम् । पटानां वस्त्राणामालिः पंक्तिः । पटालिः । सुगंधिहिमपानीयेन सिच्यमाना पटालिर्यस्मिन्स सौसुगंधिहिमपानीयसिच्यमानपटालिकस्तस्मिंस्तथाविधे कायमाने । तथा प्रवालाः किसलयानि । फलानां लुंबयस्स्तबकाः । प्रवालाश्च फललुंबयश्चः प्रवालफललुंबयः । चूतानां प्रवालफललुंबयस्ताभिश्चिते परितो व्याप्ते । तल्पे शयने कल्पिते । कैः । कदलीदलादिभिः । कदल्या रंभाया दलानि पत्राणि । कह्लारं सौगंधिकम् । मृणालं बिसम् । कमलं पद्मम् । उत्पलं कुमुदम् । एतेषां द्वंद्वः तैः कदलीदलादिभिः कोमलैः सुकुमारस्पर्शैः कल्पिते रचिते । किंभूते । कुसुमानि च पल्लवाश्च कुसुमपल्लवा यत्र तस्मिन् धारागृहेऽथवा स्वप्यादित्यनुवर्तते । धारागृहमविरतममलजलधाराः पतंति यत्र । पुस्तस्त्रीस्तनहस्तास्यैः प्रवृत्तमुशीरवारि यत्र तस्मिन् । पुस्तो दार्वादिमय्याः स्त्र्याद्याकृतेरुपादानकारणं यद्वस्तु तदुच्यते ॥ ३३–३६ ॥

वि०—मध्याह्न में आकाश को छूने वाले अति ऊंचे महाशाल, ताड़ आदि के वृक्षों के कारण जहाँ पर सूर्य की किरणें न पहुँच सकें; माधवी लता से लिपटे द्राक्षा के गुच्छों से शोभित कुञ्जों या लतामण्डपों में अथवा सुगन्धित, शीतल पानी से सिञ्चित परदों वाले, रेवटी (टेण्ट) में. आम के पल्लव एवं फलों के गुच्छों से युक्त, कोमल केले के पत्ते, कल्हार (सौगन्धिक), मृणाल (बिस), कमल और उत्पल इनसे बनाई शय्या पर; फूलों की पंखड़ियाँ जहाँ पर हँस रही हों; ऐसे धारागृहों में—सूर्य की गर्मी से दुखी मनुष्य सोये । इन धारागृहों में—मिट्टी या लकड़ी की बनी पुतलियों के स्तन हाथ, मुख में से खस के पानी की धार निकल रही हो ॥ ३३–३६ ॥

ग्रीष्म की रात्रि में सेवनीय स्थान—

निशाकरकराकीर्णे सौधपृष्ठे निशासु च ॥ ३७ ॥
आसना—

स०—निशासु च रात्रिषु सौधपृष्ठे हर्म्यतले आसना स्थितिः । कार्येत्यध्याहार्यम् । तत्रासीतेत्यर्थः । किंभूते सौधपृष्ठे । निशाकरः शीतांशुस्तस्य करा गभस्तयस्तैराकीर्णे व्याप्ते ॥ ३७ ॥

वि०—रात्रि में चन्द्रमा की चाँदनी से व्याप्त मकान की छत पर सोये—वहीं रात बिताये ॥ ३७ ॥

—स्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः ।
निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः ॥ ३८ ॥
जलार्द्रास्तालवृन्तानि विस्तृताः पद्मिनीपुटाः ।
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः ॥ ३९ ॥
कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः ।
मनोहरकलालापाः शिशवः सारिकाः शुकाः ॥ ४० ॥
मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः ।
जङ्गमा इव पद्मिन्यो हरन्ति दयिताः क्लमम् ॥ ४१ ॥

स०—स्वस्थचित्तस्य रागाद्यनुपहतमनसो जलार्द्राः क्लमं हरंति । एवं तालवृंतादयो योज्याः । अंतर्दीपकत्वादस्य । तस्य च कीदृशस्य । चंदनार्द्रस्य चंदनेनानुलिप्तस्य । तथा मालिनः स्रग्विणः । तथा निवृत्तं कामतंत्रं पुष्पधन्वपरिच्छेदो यस्य । तथा सुष्ठु सूक्ष्मे तनुनी स्वच्छे वाससी यस्य स एवम् । जलार्द्राः पानीयकृतार्द्राः शाटिकाः । तालवृंतानि मयूरपिच्छादिकृतानि तालवृंताकृतीनि व्यजनानि । तथा विस्तृता महांतः पद्मिनीपुटा नलिनीपत्राणि बीजनार्थम् । तथोत्क्षेपाः मयूरपिच्छादिकृता व्यजनविशेषाः । ते च किंभूताः । मृदुरुत्क्षेपो येषु ते मृदूत्क्षेपाः । जलवर्षी हिमोऽनिलो येषु मृदूत्क्षेपेषु ते जलवर्षिहिमानिलकाः । शीतजलाभ्युक्षितैरेतैर्वातिः कार्य इत्यर्थः । कर्पूरेत्यादि । मालाशब्दः प्रत्येकं प्रयुज्यते । स्फटिककर्पूरग्रथिता माला मल्लिकालाश्चेत्यर्थः । तथा हारा मुक्तादामानि । किंभूताः—सह हरीचंदनेन सहरिचंदनाः । यच्छेदे लोहितमतिसुगंधं सुष्ठ शीतवीर्यं च तद्धरिचंदनमुच्यते । मनोहरेत्यादि । मनोहरो रम्यः कलो मधुर आलापो येषां ते मनोहरकलालापाः । शिशवो बालकाः । तथा सारिकाः शरारयः । शुकाः कीरः । मृणालेत्यादि । मृणालान्यतिकोमलानि बिसानि वलयाः । कटकानि यासां या दयिता योषितः । किंभूताः । कांता रम्याः । तथा प्रफुल्लैर्विकसितैः कमलैरुज्ज्वलाः शोभिता एवंभूताश्च । उत्प्रेक्ष्यंते । जंगमाः संचारिण्य इव पद्मिन्यः । क्लमं हरंतीति योज्यम् । स्वस्थचित्तस्येति प्राधान्यख्यापनार्थं प्रागुपात्तम् । स्वस्थचित्तस्यैव ते जलार्द्रादयः क्लमं हरंति न तथोपतप्तमनसः । चित्तायत्ता हि सर्वभावनां शुभाशुभवृत्तयः । तथा च स्निग्धमधुरोऽप्याहार उपयुक्तः सुखशय्यादिरपि विहारः सेवितः शोकाविष्टचेतसो न तथा शरीरस्य पुष्टिमादधाति । अत एव शोकः शोषणानामित्यष्टसंग्रहे प्रोक्तम् । तथा रूक्षोऽप्याहारस्तथाविधो विहारश्च सेवितो निर्वृत्तमनसः पुष्टिमेवादधाति न कार्श्यम् । तथाचोक्तम् । निर्वृत्तिः पुष्टिहेतूनामिति । सुश्रुते च क्लमस्य लक्षणमुक्तम् । योऽनायासश्रमो देहे प्रवृद्धः श्वासवर्जितः । क्लमः स इति विज्ञेयमिंद्रियार्थप्रबाधक इति ॥ ३८–४१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—स्वस्थ चित्त वाले पुरुष की थकान को मिटाने वाली वस्तुयें—चन्दन का लेप लगाये, माला धारण किये, सम्भोग से निवृत्त; अतिशय महीन वस्त्र को धारण किये; स्वस्थ चित्त वाले पुरुष के थकान को; पंखे; पानी से भीगे कमलिनी के विशाल पत्र, ऊपर को निकलने वाले धीमे-धीमे फव्वारे; सजल शीतल वायु; कपूर और चमेली की बनी माला; हरिचन्दन के साथ बनी मालायें; मनोहर-सुन्दर बोलने वाले बालक, तोता और मैना; अतिशय कोमल कमलनाल के कड़े पहनी हुई, खिले हुए कमल के समान उज्ज्वल (शोभित) चलती-फिरती पद्मिनी के समान-स्त्रियाँ दूर करती हैं ॥ ३८-४१ ॥

इदानीं वर्षाचर्यां निर्दिदिक्षुरिदमाह—

आदानग्लानवपुषामग्निः सन्नोऽपि सीदति ।
वर्षासु दोषैर्दुष्यन्ति तेऽम्बुलम्बाम्बुदेऽम्बरे ॥ ४२ ॥
सतुषारेण मरुता सहसा शीतलेन च ।
भूबाष्पेणाम्लपाकेन मलिनेन च वारिणा ॥ ४३ ॥
वह्निनैव च मन्देन, तेष्वित्यन्योन्यदूषिषु ।
भजेत्साधारणं सर्वमूष्मणस्तेजनं च यत् ॥ ४४ ॥

स०—आदानमुक्तम् । तेनादानाख्येन कालेन ग्लानं सक्लमं वपुः शरीरं येषां पुरुषाणां त आदानग्लानवपुषस्तेषामपचितधातूनामग्निरप्यपचितः सन्नो मंदः सन् पुनर्वर्षासु सीदति हानिं याति । अपिशब्दः पुनरर्थे । अनेकार्थत्वान्निपातानाम् । वर्षास्विति नित्यबहुत्वाद्बहुवचनम् । केन सीदतीत्याह । कालस्वभावाद्दोषैर्वातपित्तश्लेष्मभिर्दुष्टैरित्यनुक्तमप्यर्थाद्गम्यते । यतोऽग्निसादहेतुत्वमदुष्टानां तेषां न संभवति । तस्माद्दुष्टैर्दोषैरग्निः सीदतीत्यर्थाल्लभ्यते । ते दोषा दुष्यंति । कदा अंबरे वियत्यंबुलंबांबुदेऽबुना लंबा अतिनिर्भरत्वादंबुलंबा ईदृशा अंबुदा मेघा यस्मिन्नेवंविधे । अनेन च विशेषणेनास्य कालस्य स्वरूपमुपलक्षयंत्याचार्याः यदैवंविधो वर्षाकालः संपद्यते तदैवैते दोषा दुष्यंति स्वकर्मण्ययोग्याः संपद्यंते न वर्षाकालमात्रेऽनासादितस्वरूपे । तथा सतुषारेण सजलकणेन मरुता पवनेन सहसा ग्रीष्मतापसंतापानंतरमेव शीतले नाभ्यंतरो वायुर्दुष्यति । तथा भुवो बाष्प ऊष्मा भूबाष्पस्तेन । तथा कालस्वाभाव्यादम्लपाकेन वारिणा पित्तं दुष्यति । तथा मलिनेन वारिणा लूतादितन्तुविण्मूत्रेत्यादिकलुषेण वर्षाजलेन कालस्वाभाव्याच्चातिशयेन मंदत्वं गतेनाग्निना श्लेष्मा दुष्यति । तदैतदेवमस्मिन्काले वातपित्तश्लेष्माणो युगपत्कालस्वाभाव्याद्दुष्यंति । नन्विह त्रयाणामपि दोषाणां कोपोऽनुज्ञायते । वक्ष्यति तु । चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिष्विति । तदिमे वचसी परस्परं व्याघ्नाते । अत्रोच्यते । नानयोर्वाक्ययोर्मिथो विरोधः संभाव्यते । यस्मादिह दुष्यंतीत्युक्त्या स्वस्था एव दुष्टिं प्राप्ता विषादिस्पृष्टद्रव्यवत्कार्यकरणेऽसमर्था जायंते इत्युक्तम् । चयप्रकोपप्रशमा इत्यत्र च प्रकर्षेण कोपः स्थानांतरगतिलक्षणो गदितः । तदेवमस्मिन् काले वायोः कदाचिद् दुष्टत्वं स्यात् कदाचित्कोपश्चेति वचनाभ्यामेताभ्यां प्रत्यपादि । पित्तश्लेष्मणोस्तु दुष्टत्वमात्रमेवेति न किंचिदत्रासमंजसम् । इति प्रकारे । अन्योन्यं दूषयितुं शीलं येषां वातादीनां त एवं तेष्वनेन प्रकारेण परस्परं दूषणस्वभावेषु सत्सु भजेत् । साधारणं सर्वं यत्किंचिद्वातादीनां युगपत् प्रशमनं तत्सर्वं सेवेत । यच्चोष्मणो जाठराग्नेस्तेजनमुद्दीपनं तद्भजेत् । उष्मणस्तेजनस्यात्र च शब्दयुक्तस्योपादानं प्राधान्यख्यापनार्थम् । अग्निर्हि सर्वभावानां प्रधानम् । तथा च वक्ष्यति । शांतेऽग्नौ म्रियते युक्ते चिरं जीवत्यनामयः । रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यत इति । तस्मादग्न्युत्तेजनार्थं यत्नः कार्य इति भावः भजेदिति क्रियापदं दीपकत्वाद्भोजनं त्वतिदुर्दिन इति यावत्सर्वेषु योज्यम् ॥ ४२-४४ ॥

वर्षाऋतुचर्या—

वि०—वर्षाचर्या—आदान काल होने से अपचित धातुवाले शरीरों में पहले से ही मन्द अग्नि दूषित वातादि दोषों से और भी मन्द हो जाती है, क्योंकि वर्षाकाल में जब आकाश पानी में भरे बादलों से घिरा होता है, तब तुषारमिश्रित शीतल वायु के एकदम से चलने के कारण, पृथ्वी के बाष्प से, अम्लपाक वाले और मलिन पानी से, तथा काल स्वभाव के कारण मन्दवह्नि से, कफ के दूषित होने से; वातादि दोष एक दूसरे को दूषित करने लगते हैं; उस समय साधारण विधि अर्थात् मध्य रूप में तथा जो वस्तु अग्नि को प्रदीप्त करने वाली हो उसका सेवन करे ॥ ४२-४४ ॥

वक्तव्य—चरक में कहा है—'भूबाष्पान्मेघनिष्यन्दात् पाकादम्लाज्जलस्य च । वर्षास्वग्निबले हीने कुप्यन्ति पवनादयः ॥' अग्नि के मन्द होने से तीनों दोष कुपित होते हैं; इसी से कहा है—'शान्तेऽग्नौ म्रियते, युक्ते चिरञ्जीवत्यनामयः । रोगी स्याद विकृते; मूलमग्निस्तस्मान्निरुच्यते ॥' इस ऋतु में तुषारमिश्रित शीतल वायु से वायु; पृथ्वी के बाष्प तथा पानी के अम्लपाक से पित्त और वह्नि के मन्द होने से कफ दूषित होते हैं; इसलिये साधारण विधि बरते—जो सर्वथा अनुकूल हो ।

किं तत्साधारणमिति तदुदाहरणार्थमाह—

आस्थापनं शुद्धतनुर्जीर्णं धान्यं रसान् कृतान् ।
जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम् ॥ ४५ ॥
मस्तु सौवर्चलाढ्यं वा पञ्चकोलावचूर्णितम् ।
दिव्यं कौपं शृतं चाम्भो भोजनं त्वतिदुर्दिने ॥ ४६ ॥
व्यक्ताम्ललवणस्नेहं संशुष्कं क्षौद्रवल्लघु ।

स०—शुद्धा तनुर्यस्य स एवं भूतः कृतविरेकादिः सन्नास्थापनं निरूहं भजेत् । तथा जीर्णं धान्यं पुराणयवगोधूमादिकम् । तथा रसान् मांसरसान् । किंभूतान् । कृतान् स्नेहशुंठ्यादियुतान् । तथा जांगलं पिशितं हरिणैणादिकं मांसम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथा यूषान् मुद्गदाडिमादिकृतान्। तथा मधु मार्द्वीकमरिष्टं द्वयमप्येतच्चिरंतनं पुराणं नतु नवमग्निमांद्यभयात्। मस्तु सौवर्चलाढ्यमत्तलवणसंयुक्तम् । वेति समुच्चये। किंभूतं मस्तु। 'पिप्पलीपिप्पलीमूलचव्यचित्रकनागराः' पंचकोलं तेनावचूर्णितम् । तथा दिव्यमाकाशजं तथा कौपं तथा शृतं क्वथितं चांभः पिबेत्। चः समुच्चये। दिवि भवं दिव्यम्। दिगादित्वाद्यत्। कूपे भवं कौपम्। प्राग्दीव्यतोऽण्। अतिदुर्दिने वातवर्षाकुलेऽहनि व्यक्ताः प्रधाना अम्ललवणस्नेहा यत्र तद्भोजनं भजेत्। तथा संशुष्कं शुष्कप्रायम्। तथा क्षौद्रवत्समाक्षिकम्। तथा लघु। ननु वातलं मध्विति। वक्ष्यति। पवनश्चात्र कुप्यतीत्युक्तम्। अतो माक्षिकस्यात्रोपयोगो न युक्तः। अत्रोच्यते। देहधातवोऽस्मिन् काले क्लेदमुपयांति। ततश्च क्लेदसंरक्षण एवोपक्षीणप्रभावत्वान्मधु मरुत्कोपं विधातुमसमर्थम्। तस्मान्मधूपयोगो न्याय्य एव ॥ ४५-४६ ॥

वर्षा ऋतु की भोजनादि व्यवस्था—

वि०—साधारण उपचार—वमन, विरेचन आदि से शरीर का शोधन करके आस्थापन वस्ति लेवे। पुरातन धान्य (जौ, गेहूँ आदि), स्नेह, शुण्ठी आदि से संस्कृत मांसरसों को; जांगल पशुओं का मांस; मूंग आदि के यूष, मधु, पुरातन अरिष्ट; एवं प्रचुर सौवर्चल नमक मिश्रित अथवा पञ्चकोल (पिप्पली, पिप्पलीमूल; चव्य, चित्रक और सोंठ) से मिश्रित मस्तु (दही का पानी) पिये। आकाश-वर्षा का पानी, या कुएँ का पकाया जल पिये। (वायु और वर्षा वाले) अति दुर्दिन में स्पष्ट अम्ल, लवण एवं स्नेहयुक्त, शुष्कप्राय भोजन में मधु मिला कर खाये तथा लघु भोजन करे ॥ ४५-४६ ॥

वक्तव्य—वर्षा ऋतु में योगवाही होने से, मधु उत्तम है; यथा—'वातलं वातकोपेऽपि वर्षासु मधु शस्यते ॥'

अथाऽत्र काले यादृशः पुरुषः स्यात्तं दर्शयति—

अपादचारी सुरभिः सततं धूपिताम्बरः ॥ ४७ ॥
हर्म्यपृष्ठे वसेद्बाष्पशीतशीकरवर्जिते ।

स०—पादाभ्यां चरति नित्यं पादचारी नैव यः सोऽपादचारी यानयायी स्यात्। तथा सुरभिः शोभनगंधयोगात्। स्नानशीलः ससुरभिरित्यनेनैवास्योक्तत्वात्सुरभिग्रहणमतिशयार्थम्। तथा सततमविरतं धूपितेऽम्बरे यस्य स एवम्। तथा हर्म्यपृष्ठे धवलगृहतले वसेत् तिष्ठेत्। कीदृशे। वाष्पश्च शीतं च शीकरश्च तैर्वर्जिते ॥ ४७ ॥

वर्षा ऋतु में विशेष नियम—

वि०—वर्षा ऋतु में मनुष्य पैदल न चले, अपितु घोड़े आदि सवारी से यात्रा करे; सुरभि गन्ध धारण करे और नित्यप्रति वस्त्रों को धूप देवे। मकान के उपरी तल्ले पर जहाँ बाष्प, शीत और शीकर (जलकण) न पहुँच सकें; वहाँ रहे ॥ ४७ ॥

नदीजलोदमन्थाहःस्वप्नायासातपांस्त्यजेत् ॥ ४८ ॥

स०—तथा नदीजलादीन्पंच त्यजेत्। उदकालोडिता सक्तवः ससर्पिष्का उदमंथवाच्या जलावचारीसंज्ञाः। तदत्र काले सात्म्यत्वात्सक्तवस्तक्रादिसंयोगाच्चात्यंतमनिष्टाः। पानीयसंयोगात्तु वातला प्रकृष्टवातले काले नाभीष्टा एव। मुनिना त्वेवमुक्तम्। उदमंथं दिवास्वप्नमवश्यायं नदीजलम्। व्यायाममातपं चैव व्यवायं चात्र वर्जयेदिति ॥ ४८ ॥

वि०—अपथ्य—नदी का जल; उदमन्थ (पानी में घोले सत्तू); दिन में सोना; परिश्रम और धूप से बचे ॥ ४८ ॥

वक्तव्य—चरक में भी कहा है—'उदमन्थं दिवास्वप्नमवश्यायं नदीजलम्। व्यायाममातपं चैव व्यवायं चात्र वर्जयेत्'।

अधुना शरच्चर्यां विवक्षुराह—

वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः ।
तप्तानां सञ्चितं वृष्टौ पित्तं शरदि कुप्यति ॥ ४९ ॥
तज्जयाय घृतं तिक्तं विरेको रक्तमोक्षणम् ।

स०—वर्षासु शीतं वर्षाशीतं वर्षाशीतमुचितं सात्म्यं यस्य तदेवंविधमंगं वपुर्येषां ते वर्षाशीतोचितांगा नरास्तेषा सहसैव झटित्येव शरदि जातायामर्करश्मिभिर्भानुभाभिस्तप्तानां सतां पित्तं कुप्यति। किंभूतम्। वृष्टौ संचितं वर्षासु वृद्धिं गतम्। यतश्चैवं ततश्च तज्जयाय तिक्तं घृतं कुष्ठचिकित्सितोक्तं योज्यमिति वाक्यशेषः। यदि वा तिक्तैर्द्रव्यैः साधितम्। तथा विरेको योज्यः। तथा रक्तमोक्षणं च सर्वोपक्रमेभ्यः पित्ते विरेकस्य ज्यायस्त्वादिह पूर्वमुपन्यासः। तथा ह्याह। विरेचनं पित्तहराणामिति। ततो रक्तमोक्षणं पित्ताधारत्वाद्रक्तस्य। विरेचनांगत्वाच्च तज्जयाय घृतं तिक्तमिति घृतस्य पूर्वमुपन्यासः न ह्यस्निग्धस्य विरेचनप्राप्तिरस्ति। तथा च वक्ष्यति। स्नेहस्वेदावनभ्यस्य कुर्यात्स्वेदावनभ्यस्य कुर्यात्संशोधनं तु यः। दारु शुष्कमिवानामे शरीरं तस्य दीर्यत इति। तथा विरिक्तस्य स्रुतरक्तस्य च पवनप्रकोपभयम्। कालस्वाभाव्याच्च पित्तकोपभयम्। तदेतत्परिहर्तुं। तथा पुष्ट्यर्थमग्निसंधुक्षणार्थं च तिक्तघृतोपयोगः कार्यः। इत्यनेन कार्यकारणत्वेन प्राधान्याच्च तिक्तघृतस्य पूर्वमुपन्यासः। असमासकरणं च ज्ञापनार्थम्। नैतानि सर्वाण्यवश्यं तिक्तघृतादीनि तदा कार्याणि। किं तर्हि देशाद्यनुरोधात्कदाचित्पित्तविजयाय तिक्तं घृतं कदाचिद्विरेकः कदाचिद्रक्तमोक्षः कदाचिद् द्वयं कदाचित्सकलान्येवेति। विरेकस्तु पित्तविजयार्थमवश्यं शरदि कार्यः। तथा वसंते श्लेष्मविजयाय वमनम्। वर्षासु च पवनविजयाय वस्तिः। अत एव प्राङ्निर्दिष्टं वसंते च वमनं वर्षासु चास्थापनं शरदि विरेक इति ॥ ४९ ॥

शरद् ऋतुचर्या—

वि०—शरद्चर्या—वर्षाकालीन शीत जिनके अङ्गों को सात्म्य बन गया है; ऐसे पुरुषों में—सूर्य की किरणों से सहसा ही गरम होने पर वर्षा में सञ्चित पित्त शरद् ऋतु में कुपित हो जाता है। इस पित्त को शान्त करने के लिये, तिक्त घृत; विरेचन और रक्तमोक्षण करना चाहिये ॥ ४९ ॥

शरद् में भोजनादि व्यवस्था—

तिक्तं स्वादु कषायं च क्षुधितोऽन्नं भजेल्लघु ॥ ५० ॥
शालिमुद्गसिताधात्रीपटोलमधुजाङ्गलम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—क्षुधितोऽन्नं भोजनं तिक्तादिगुणयुक्तं भजेत्। क्षुधितग्रहणमतिबुभुक्षितप्रतिपादनार्थम्। अक्षुधितस्य भोजनाधिकाराभावात्। किं तत्तिक्तादिगुणयुक्तमित्याह। शालीत्यादि। शाल्यादीन् सप्त भजेत्॥ ५०॥

वि०—भूख लगने पर तिक्त, मधुर, कषाय रस वाले, (पित्त-शामक), शालि, मूंग, चीनी, आँवला, परवल, मधु और जांगल मांस आदि लघु अन्न का भोजन करे॥ ५०॥

शरद् में हंसोदक का प्राशस्त्य—

तप्तं तप्तांशुकिरणैः शीतं शीतांशुरश्मिभिः॥ ५१॥
समन्तादप्यहोरात्रमगस्त्योदयनिर्विषम्।
शुचि हंसोदकं नाम निर्मलं मलजिज्जलम्॥ ५२॥
नाभिष्यन्दि न वा रूक्षं पानादिष्वमृतोपमम्।

स०—समंतात्सर्वतः सूर्यप्रभाभिरहनि तप्तं क्वथितं च चंद्रकिरणैर्निशि शीतीकृतम्। तथा अगस्त्योदयेन निर्विषीकृतम्। तथा शुचि पवित्रम्। वर्षासु ह्यशुचीत्युक्तम्। तच्च हंसोपभोग्यतया हंसवदतिनैर्मल्याद्धंसोदकं नाम तंत्रकारैरायुर्वेदशास्त्रे संज्ञितम्। तथा निर्मलमकलुषम्। तथाऽमलत्वात् पित्तश्लेष्माणौ जयतीति मलजित्। अगस्त्योदयनिर्विषशब्देन विशेषणेनैतत्प्रतिपादयति। तथा यदंतरिक्षप्रभवं सरस्तडागादिस्थं जलं तदेव प्रायेण शरद्येवंगुणं वेद्यं न कूपादिप्रभवम्। तस्य सदा निर्विषत्वात्। तथा चांतरिक्षप्रभवमेव पठ्यते। लूतादितन्तुविण्मूत्रविषं संश्लेषदूषितमिति। तच्च नाभिष्यंदि न श्रुतिरूपश्लेष्मकारि नवा रूक्षं न वातप्रकोपकारि। वाशब्दश्चशब्दस्यार्थेऽत्र। यतस्तप्तांशुकिरणैस्तप्तम्। यतश्च शीतांशुतारकाकरैः शीतं प्रह्लादितमित्थं स्नेहरौक्ष्ययोरंतरे। वर्तमानं पानादिष्वमृतोपमम्। आदिशब्देन स्नानावगाहयोर्ग्रहः। कुपितदोषशमनादकुपितदोषसाम्यानुवृत्तिहेतुत्वाच्चामृततुल्यमेतज्जलं भजेदित्यर्थः। अत्रोष्णांशुग्रहणमग्नितापनिवृत्त्यै। किरणग्रहणं साक्षात्तत्स्पर्शसंभावनार्थम्। दवपलाशादिभिरास्तृतमपि रविस्तापयति न तु तत्तथा गुणवत्। अतः किरणग्रहणेन तद्व्यवधानव्युदासं करोति। न च सर्वं दिनं सूर्यकिरणैस्तापः संभवति। चंद्रकरैस्तु सर्वां रात्रिं कथमिव स्यात्। यतः सकलचंद्रमसः पौर्णमास्यामेव सर्वस्यां रात्र्यां संभवो नान्यत्र। तस्माच्छीतं चंद्रकिरणै रात्र्यामिति नैतद्युक्तम्। अत्रोच्यते। विमले व्योमनि यथैव रविचंद्रौ यथाकालमव्याहतस्वरूपप्राप्तौ पथ्यतां जलस्यापादयतस्तद्वन्नक्षत्राण्यपि। तस्मान्नक्षत्रैरपि शीतं चंद्रेणेव श्रेष्ठमेव भवत्युदकम्। एवं च तदेवमवगच्छ। अन्यथैतद्वाक्यमयुक्तमिव स्यात्। चरकमुनिनाप्यनेनैवाऽभिप्रायेण नक्षत्रग्रहणं नाकारि। यथा 'दिवा सूर्यांशुसंतप्तं निशि चंद्रांशुशीतलम्।' इति। अष्टांगसंग्रहेऽप्युक्तम्। दिवा दिवाकरकरैर्निशाकरकरैर्निशीति। अत्र सकलस्याहोरात्रस्य रविशशियोगाय दिवानिशाग्रहणमन्यथैतदनर्थकं स्याद्व्यभिचाराभावात्॥ ५१-५२॥

वि०—सम्पूर्ण रूप से दिन में सूर्य की किरणों से गरम और रात में चन्द्रमा की किरणों से शीतल हुआ, अगस्त्य के उदय से निर्विष बना; पवित्रजल हंसोदक है। यह मलरहित; वातादि मल को जीतने वाला होता है; (यह जल हंस के समान श्वेत-निर्मल होता है)। यह हंसोदक न तो अभिष्यन्द करता है, और न रूक्ष है; पीने आदि कार्यों में अमृत के समान है।

वक्तव्य—शीतांशु शब्द रात्रि की ज्योत्स्ना का उपलक्षण मात्र है; इससे अमावास्या में भी हंसोदक रहेगा, क्योंकि सूर्य और चन्द्रमा के समान दूसरे नक्षत्रों का भी प्रभाव पड़ता है।

चन्दनोशीरकर्पूरमुक्तास्रग्वसनोज्ज्वलः॥ ५३॥
सौधेषु सौधधवलां चन्द्रिकां रजनीमुखे।

स०—चंदनं चोशीरं च कर्पूरश्च मुक्ताश्च स्रजश्च वसनानि च तैरुज्ज्वलः शोभनः सन् सौधेषु धवलगृहपृष्ठेषु चंद्रिकां ज्योत्स्नां भजेत्। कदा। रजनीमुखे प्रदोषे। परतस्तु निदाघ इव न सेव्या अवश्यायभयात्। अवश्यायो ह्यत्र परिहार्यः॥ ५३॥

शारदीय सन्ध्या सेवन विधि—

वि०—रात्रि के प्रथम प्रहर में ही चन्दन, खस, कर्पूर, मोती की माला तथा श्वेत वस्त्रों से उज्ज्वल बनकर प्रासाद की छत पर श्वेत चन्द्रिका का सेवन करे॥ ५३॥

वक्तव्य—रात्रि के प्रथम भाग में ही चन्द्रिका का उपयोग करे; ग्रीष्म की भाँति सारी रात न बैठे, ओस के भय से।

व्यासेन ऋतुचर्यामुक्त्वा समासेनाह—

तुषारक्षारसौहित्यदधितैलवसाऽऽतपान्॥ ५४॥
तीक्ष्णमद्यदिवास्वप्नपुरोवातान् परित्यजेत्।

तथा चाह—

स०—तुषारादीन् दश परित्यजेत्। तुषारोऽवश्यायः। क्षारो यवक्षारादिः। सौहित्यं तृप्तिः। तीक्ष्णं च तन्मद्यं च तीक्ष्णमद्यम्। पुरोवातः पूर्वदिग्गतो वातः॥ ५४॥

शरद् में वर्ज्य वस्तु—

वि० अपथ्य—ओस, यवक्षार आदि क्षार, पेट भर कर खाना, दही, तैल, वसा, धूप, तीक्ष्ण, मद्य, दिन में सोना और पूर्व दिशा की वायु इन से बचे॥ ५४॥

शीते वर्षासु चाद्यांस्त्रीन् वसन्तेऽन्त्यान् रसान्भजेत्॥ ५५॥
स्वादुं निदाघे, शरदि स्वादुतिक्तकषायकान्।
शरद्वसन्तयो रूक्षं शीतं घर्मघनान्तयोः॥ ५६॥
अन्नपानं समासेन विपरीतमतोऽन्यदा।

स०—शीते हेमन्तशिशिरयोर्वर्षासु चाद्यांस्त्रीन् स्वाद्वम्ललवणाख्यान् रसान् भजेत्। वसन्ते चांत्यांस्त्रीन तिक्तकटुकषायानभजेत्। स्वादुं निदाघे, ग्रीष्मे मधुरं भजेत्। शरदि स्वादुतिक्तकषायान्भजेत्। शरद्वसंतयो रूक्षमन्नपानं समासेन भजेत्। अतो विपरीतं स्निग्धमन्यदा हेमन्तशिशिरग्रीष्मवर्षासु। शीतमन्नपानं घर्मघनांतयोर्भजेत्। अतो विप

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शीतमुष्णमन्नपानमन्यदा हेमन्तशिशिरवर्षावसंताख्ये काले भजेत् ॥ ५५-५६ ॥

संक्षिप्त षट् ऋतुचर्या—

वि०—शीत ऋतु (हेमन्त और शिशिर) और वर्षा में-मधुर-अम्ल-लवण-इन तीन रसों का सेवन करे। वसन्त में पिछले तीन अर्थात् तिक्त-कटु-कषाय रसों का सेवन करे। ग्रीष्म ऋतु में मधुर रस का तथा शरद् ऋतु में-मधुर, तिक्त और कषाय रस का सेवन करे। शरद एवं वसन्त में रूक्ष खान-पान का सेवन करे, और शेष-ग्रीष्म, वर्षा, शिशिर और हेमन्त में स्निग्ध भोजन का सेवन करे। ग्रीष्म और शरद ऋतु में शीतल खान-पान लेना चाहिये; और वर्षा, वसन्त, हेमन्त, शिशिर में उष्ण खान-पान बरतना चाहिये। यह संक्षेप से विभिन्न ऋतुओं में अन्नपान का विधान है ॥ ५५-५६ ॥

संप्रति सेव्यत्वेनोपदिष्टस्याहारस्यापवादमाह—

नित्यं सर्वरसाभ्यासः स्वस्वाधिक्यमृतावृतौ ॥ ५७ ॥

स०—नित्यं सर्वदा सर्वेषां षण्णामपि रसानामभ्यासः शीलनं कार्यमिति वाक्यशेषः। सर्वरसाभ्यासो बलकारणमिति वचनात्। नन्वेवं सति यथर्तुसेव्यत्वेन रसनियमो यः पूर्वं कृतः स विरुद्धो नेत्याह—स्वस्वेत्यादि। ऋतावृताविति वीप्सायां द्वित्वम्। स्वं च स्वं च स्वस्वं तस्याधिक्यं भूयस्त्वं कार्यमिति शेषः। यथा शीते वर्षासु चाद्यांस्त्रीनित्युक्तम्। तदेतेषु ऋतुष्वेते रसा भूयसोपयोक्तव्याः। नत्वेत एवेत्यर्थः। तथा समधातुं प्रति समे देशे वैषम्यनियमो वेद्यः। अन्यत्र तु जांगलेऽनूपे देशे विषमधातोश्च धातुसाम्योत्पादनार्थं देश-देहानुगुणमन्यर्तुविधानमन्यस्मिन्नप्यृतावनुष्ठेयमेव ॥ ५७ ॥

वि०—सब ऋतुओं में सब रसों का अभ्यास (सेवन) करना चाहिये; परन्तु प्रत्येक ऋतु में उस ऋतु के अपने-अपने रस को अधिक मात्रा में सेवन करना चाहिये ॥ ५७ ॥

वक्तव्य—इसी से चरक में कहा है—'सर्वरसाभ्यासो बलकराणाम्, एकरसाभ्यासो दौर्बल्यकराणाम् ।' इसलिये सब ऋतुओं में सब रसों का अभ्यास करना चाहिये।

किमन्यस्मिन्नृतौ प्राप्ते पूर्वर्तुचर्या सहसैव त्याज्याऽन्या च सेव्या नेत्याह—

ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः।
तत्र पूर्वो विधिस्त्याज्यः सेवनीयोऽपरः क्रमात् ॥५८॥
असात्म्यजा हि रोगाः स्युः सहसा त्यागशीलनात्।

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिताया-
मष्टाङ्गहृदयसंहितायां सूत्रस्थाने ऋतुचर्या
नाम तृतीयोऽध्यायः ॥ ३ ॥

स०—ऋत्वोः शिशिरवसंतयोर्ग्रीष्मप्रावृषोरित्यादिकयोरंत्यश्चादिश्च यौ सप्ताहौ तावृतुसन्धिरिति स्मृत उच्यते। तत्र सप्ताहद्वयलक्षणे ऋतुसन्धौ पूर्वः पूर्वर्तुसम्बन्धी विधिस्त्याज्यः। अपर एष्यदृतुसम्बन्धी सेवनीयः। कथम्। क्रमात्क्रमेण पादेनापथ्यमभ्यस्तमित्यादिना। सप्तानामह्नां समाहारः सप्ताहः। सप्ताहश्च सप्ताहश्च सप्ताहौ। "राजाहःसखिभ्यष्टच्" इति टच् समासांतः। "न संख्यादेः समाहारे" इत्यह्नादेशनिषेधः। यत्सहसा त्यागशीलनादसात्म्यादनुचिताज्जाता असात्म्यजा रोगाः स्युः। ततः सहसा त्यागशीलनं न कार्यमिति शेषः ॥ ५८½ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचिताया-
मष्टांगहृदयटीकायां सर्वाङ्गसुन्दराख्यायां
तृतीयोऽध्यायः संपूर्णः ॥ ३ ॥

ऋतु-संधि—

वि०—ऋतुसन्धि—वर्त्तमान ऋतु का अन्तिम सप्ताह और अग्रिम ऋतु का प्रथम सप्ताह—ये चौदह दिन ऋतुसन्धि कहे जाते हैं। इनमें पूर्व ऋतु की विधि क्रमशः छोड़नी चाहिये, और आने वाली ऋतु की विधि क्रमशः ग्रहण करनी चाहिये। सहसा विधि को छोड़ने से असात्म्यजन्य रोग उत्पन्न होते हैं ॥ ५८½ ॥

वक्तव्य—क्रम अर्थात्-'प्रक्षेपापचये ताभ्यां क्रमः पादांशिको भवेत्।' अर्थात्-ऋतुसन्धि से प्रथम दिन पूर्व आहार के तीन पाद और उत्तरीय आहार का एक पाद। दूसरे दिन पहला ही आहार करे। तीसरे दिन पहले दिन की भांति। चौथे दिन पूर्व आहार के दो पाद और उत्तरीय आहार के दो पाद। पांचवें, छठे दिन भी प्रथम दिन की भांति। सातवें दिन चौथे दिन की तरह। आठवें दिन पूर्व आहार का एक भाग और उत्तरीय आहार के तीन भाग। नवम-दशम-एकादश दिन में चौथे दिन की भांति। बारहवें दिन-आठवें दिन की भांति। तेरहवें दिन अग्रिम ऋतु का सम्पूर्ण आहार। चौदहवें दिन आठवें दिन का आहार-उसके आगे अग्रिम ऋतु का ही आहार करे। इसका लाभ-'क्रमेणापचिता दोषाः क्रमेणोपचिता गुणाः। सन्तो यात्यपुनर्भावमप्रकम्प्या भवन्ति च ॥'

सुश्रुत में दिन-रात में भी ऋतु के लक्षण माने हैं। यथा-'तत्र पूर्वाह्णे वसन्तस्य लिङ्गम्, मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकम्, शारदमर्धरात्रे, 'प्रत्यूषसि हेमन्तमुपलक्षयेत्।' वस्तुतः यह वर्णन औपचारिक एवं स्वल्पकालिक है अतः पूर्वोक्त ऋतुओं में वर्णित दोषसंचय आदि से विरोध नहीं समझना चाहिए। इसका उल्लेख इस ग्रन्थ में भी संक्षेप में किया जा चुका है। (पृ. ४ श्लो. ८)

असात्म्यज—जो अभ्यास के विपरीत सेवन से उत्पन्न होते हैं; जिसे पानी लगना या ऋतु-परिवर्त्तनजन्य कहते हैं यथा ग्रीष्म ऋतु का अतिसार।[1]

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का ऋतुचर्या नामक तीसरा अध्याय समाप्त हुआ।

---

१. सात्म्य का अर्थ है जो अपने अनुकूल हो—'सात्म्यं नाम तद्यदात्मन्युपशेते' तथा जो प्रतिकूल होता है उसे 'असात्म्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थोऽध्यायः

स्वस्थवृत्तिप्रवृत्तस्य वेगाधारणशीलस्य च स्वास्थ्यसंभवः। अतो वेगधारणप्रतिषेधेन या रोगानुत्पत्तिस्तामधिकृत्याध्याय आरभ्यते—

अथातो रोगानुत्पादनीयाध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—व्याख्याऽत्र प्रथमाध्यायवद्बोद्धव्या। रोगाणामनुत्पादोऽनुत्पादनं तस्मै हितो रोगानुत्पादनीयः। उपदर्शनमिदं निदर्शनाख्यम्। तंत्रयुक्त्या चोत्पन्नरोगोपशमप्रदर्शनाद्रोगोपशमनीयोऽपि वातादिरोधोत्थानां रोगाणामुपशमस्याप्युपदेशात्। तथा च वक्ष्यति—"अनुत्पत्त्यै समासेन विधिरेष प्रदर्शितः। निजागंतुविकाराणामुत्पन्नानां च शांतये॥" इति॥

अब इसके आगे रोगानुत्पादनीय नामक अध्याय का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था।[1]

वेगान्न धारयेद्वातविण्मूत्रक्षवतृट्क्षुधाम्।
निद्राकासश्रमश्वासजृम्भाऽश्रुच्छर्दिरेतसाम्॥ १॥

स०—वातादीनां वेगान्न धारयेत्। सर्वत्र द्वंद्वसमासः। क्षवश्छिक्का। श्रमेण श्वासः श्रमश्वासः॥ १॥

वेगावरोधन निषेध—

वि०—मनुष्य-वात (ऊर्ध्ववात एवं अधोवात), पुरीष, मूत्र, छींक, प्यास; भूख, निद्रा, कास, श्रमजनित श्वास, जम्भाई, अश्रु, वमन और शुक्र-इन तेरह वस्तुओं के उपस्थित (बहिर्गमनोन्मुख) वेगों को न रोके॥ १॥

वक्तव्य—सुश्रुत में 'अधश्चोर्ध्वं च भावानां प्रवृत्तानां स्वभावतः न वेगान् धारयेत् प्राज्ञो वातादीनां जिजीविषुः॥ वातविण्मूत्रजृम्भाऽश्रुक्षवोद्गारवमीन्द्रियैः। व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते॥' अश्रु—चाहे आनन्द के हों और चाहे शोकजन्य हों।

वातस्य प्राधान्यात्तद्रोधजात्रोगान् पूर्वं निदर्शयन्नाह—

अधोवातस्य रोधेन गुल्मोदावर्तरुक्क्लमाः।
वातमूत्रशकृत्सङ्गदृष्ट्यग्निवधहृद्गदाः॥ २॥

स०—अधोवातस्य रोधेन गुल्मादयो जायंते। ऊर्ध्ववातस्योद्गाररूपस्य रोधात् सुखसाध्या अरुच्यादयः। अत एवाधोवातरोधाद्ये रोगा अतिप्रत्यपायरूपा गुल्मादयोऽत्र ते पूर्वं निर्दिष्टाः। उदावर्तोऽर्शोनिदाने वक्ष्यते। रुक् पीडा। क्लमो ग्लानिः। वातमूत्रशकृत्सर्गो वातादीनामप्रवृत्तिः। दृष्टेरग्नेश्च वधो नाशः। हृद्गदो हृद्रोगः॥ २॥

अधोवायु के अवरोध से रोग—

वि०—अधोवायु के रोकने से गुल्म, उदावर्त्त, कोष्ठशूल, क्लम (ग्लानि), वात (अपान वायु), मूत्र और मल का अवरोध, दृष्टिवध (दृष्टि-दौर्बल्य), अग्निनाश और हृदय के रोग होते हैं॥ २॥

वक्तव्य—सुश्रुत में—शिरोरुजा, श्वास, हिक्का, कास, प्रतिश्याय, गलग्रह; कफ-पित्त का प्रसार तथा मुख से मल का आना-ये लक्षण अधिक दिये हैं।

[स्नेहस्वेदविधिस्तत्र वर्तयो भोजनानि च।
पानानि वस्तयश्चैव शस्तं वातानुलोमनम्]'[1]॥

स०—तत्र वातोत्थे विकारे स्नेहः कर्तव्यः, स्वेदः कर्तव्यः। फलवर्तयः कार्याः। वातहराणि भोजनानि कार्याणि। पानानि सुखोष्णोदकपानानि कार्याणि। वस्तयश्च कार्याः। यत्किंचिद्वातानुलोमनं तच्छस्तम्।

वि०—[वातजन्य विकार होने पर स्नेहन तथा स्वेदन विधि करना चाहिये एवम् फलवर्त्ति; वातनाशक भोजन, किञ्चित् गर्म जल का पान, वस्ति-कर्म तथा जो भी वात का अनुलोमन करने में योग्य हों उन सबों का प्रयोग करना उचित है।]

शकृतः पिण्डिकोद्वेष्टप्रतिश्यायशिरोरुजः।
ऊर्ध्ववायुः परीकर्तो हृदयस्योपरोधनम्॥ ३॥
मुखेन विट्प्रवृत्तिश्च पूर्वोक्ताश्चामयाः स्मृताः।

स०—शकृतो रोधेन पिंडिकोद्वेष्टादयो जायन्ते। उद्वेष्टनमिवोद्वेष्टः। पिंडिकयोरुद्वेष्टः पिंडिकोद्वेष्टः। पिंडिका जंघाकाण्डस्य पश्चिमे भागे पिंडाकृतिं कठिनं मांसम्। तत्रोद्वेष्टनेनेव रुग्भवतीत्यर्थः। प्रतिश्यायः पीनसः। चः समुच्चये। न केवलमेत एव यावत्पूर्वोक्ता गुल्मादयश्च स्मृताः॥ ३॥

पुरीष वेग को रोकने से रोग—

वि०—पुरीष के वेग को रोकने से-पिण्डलियों में ऐंठन, प्रतिश्याय, शिरदर्द, वायु का ऊपर को जाना, परिकर्त्तिका

कहते हैं। चरक आदि आचार्यों ने ऋतुसात्म्य, देशसात्म्य, व्याधिसात्म्य, जातिसात्म्य, प्रकृतिसात्म्य और अभ्याससात्म्य तथा उनके विपरीत उतने ही असात्म्यों का भी वर्णन किया है। यहाँ प्रसंगाव अभ्यासासात्म्य ही अपेक्षित है।

१. वस्तुतः यह भी स्वस्थवृत्ताध्याय ही है। दूसरे और तीसरे अध्याय में नियतकालीन विहार से सम्बन्ध रखने वाले स्वस्थवृत्त का वर्णन कर अब इस अध्याय में अनियतकालिक विहार का वर्णन करेंगे। यह अनियतकालिक विहार पाँच प्रकार का होता है :—(१) वेगधारण, (२) वेगोदीरण, (३) शोधन, (४) बृंहण, (५) भूतादि का स्पर्श न करना। इन पाँचों के उचित त्याग और उपयोग से रोगों की उत्पत्ति नहीं होती एवं अनुचित रूप में सेवन करने से हानि या रोग की उत्पत्ति होती है। अतः स्वस्थ व्यक्तियों को इनका उपयोग या त्याग कब उचित या अनुचित है इसी का वर्णन इस अध्याय में होने से इसे रोगानुत्पादनीय अध्याय संज्ञा दी गयी है।

१. अयं चरकोद्धृत (सू० अ० १३) पाठः क्वचिन्नोपलभ्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(कर्त्तनवत् पीड़ा), हृदय का अवरोध: मुख से पुरीष का आना और पूर्वोक्त-वातरोधजन्य-गुल्म, उदावर्त्त आदि रोग होते हैं ॥ ३ ॥

अङ्गभङ्गाश्मरीवस्तिमेढ्रवङ्क्षणवेदनाः ॥ ४ ॥
मूत्रस्य रोधात्पूर्वे च प्रायो रोगाः—

स०—मूत्रस्य रोधादंगभंगादयो जायन्ते । अंगानां भंगः स्फोटनमिवांगभंगः । बस्त्यादीनां वेदनया सम्बन्धः । मेढ्ं शिश्नम् । पूर्वे च प्रायो रोगा अश्वोवातशकृन्निरोधजास्तेऽपि मूत्रस्य रोधाज्जायन्ते, प्रायोग्रहणाद्वातादिरोधजाः केचिदेवोत्पद्यंते केचिन्नेति बोधयति ॥ ४ ॥

मूत्रवेग रोकने से रोग—

वि०—मूत्र के उपस्थित रोग को रोकने से-अंगों का टूटना, पथरी, वस्ति. मेहन (शिश्न) और वंक्षण में वेदना होती है । वात और मलरोधजन्य रोग भी प्रायः होते हैं ॥४॥

वक्तव्य—सुश्रुत में मूत्र कठिनाई से आना, मूत्र का थोड़ा आना, मुष्क में वेदना, नाभि प्रदेश तथा शिर में दर्द होना, वस्ति में आध्मान (फुलाव), तीव्र शूल जो कि शूल के चुभने के समान होता है; ये लक्षण अधिक हैं । वंक्षण से अभिप्राय मूत्राशय के पार्श्वों का प्रदेश है ।

—तदौषधम् ।
वर्त्यभ्यङ्गावगाहाश्च स्वेदनं बस्तिकर्म च ॥ ५ ॥

स० तदौषधं तेषां वातादिरोधजानां रोगाणामौषधं चिकित्सितं भवति । किं तदित्याह-वर्तिर्मदनफलादिकृता गलवर्तिसंज्ञा । अभ्यंगोऽभ्यंजनम् । अवगाहो वातहरद्रव्यसाधिते द्रवे द्रोण्यां निहिते पायुदेशस्यावस्थापनम् । स्वेदनं स्वेदः । वस्तिकर्म मलप्रवृत्तये वस्तिविधौ वक्ष्यमाणम् ॥ ५ ॥

वि०—इनकी चिकित्सा—वात, पुरीष और मूत्र के वेगावरोध से उत्पन्न दोषों की चिकित्सा फलवर्त्ति, अभ्यङ्ग, अवगाहन, स्वेदन और वस्ति कर्म है ॥ ५ ॥

वक्तव्य—वर्ति-फलवर्त्ति, यथा—'श्यामाफलादिभिः कुष्ठकृष्णालवणसर्षपैः । धूममाषवचाकिण्वक्षारचूर्णगुडैः कृताम् ॥ कराङ्गुष्ठनिभां वर्तिं यवमध्यां निधापयेत् । अभ्यक्तस्विन्नगात्रस्य तैलाक्तां स्नेहिते गुदे ॥' (चरक सि. अ. ७) अभ्यङ्ग-वातहर तैलों से यथा-प्रसारणी तैल या नारायण तैल; अवगाहन-तैल या गरम पानी में गोता लगाना या बैठना; स्वेदन-वातहर द्रव्यों से और वस्ति कर्म-मलप्रवृत्ति के लिये करे ।

पुरीषरोधोत्थेष्वन्यमप्यसाधारणमुपक्रममाह—
अन्नपानं च विड्भेदि विड्रोधोत्थेषु यक्ष्मसु ।

स०—पुरीषवेगधारणजेषु यक्ष्मसु रोगेषु विशः पुरीषस्य भेदि भेदकमन्नपानं यावकमस्तुवास्तुकादिकमौषधम् । चशब्दात्पूर्वोक्तं वर्त्यादि च ।

मलवेग रोकने से उत्पन्न रोग का उपाय—

वि०—(विशेषतः) पुरीष रोधजन्य रोगों में पुरीष भेदी अन्न-पान देना चाहिये ।

वक्तव्य—यव के बने पदार्थ, उड़द, बथुआ, कांजी आदि पुरीषभेदक कहे गए हैं ।

मूत्रजेषु तु पाने च प्राग्भक्तं शस्यते घृतम् ॥ ६ ॥
जीर्णान्तिकं चोत्तमया मात्रया योजनाद्वयम् ।
अवपीडकमेतच्च संज्ञितम्—

स०—मूत्ररोधजेषु पुनः प्राग्भक्तं भक्तभोजनात्पूर्वं घृतं पाने शस्यते । जीर्णांतिकंघृतं च शस्यते । कथम् । उत्तमया मात्रयाऽहोरात्रजरणलक्षणया । योजनाद्वयमेतच्चावपीडकमुच्यते । योजनयोर्द्वयं योजनाद्वयं प्राग्भक्तस्नेहयोजना जीर्णांतिकस्नेहयोजना च । तत्र प्राग्भक्तं यत्र घृतपानसमनंतरं भक्तं भुज्यते । जीर्णांतिकं यत् ह्यस्तनेऽन्ये जीर्णे घृतं प्रयुज्यते । प्रदेशांतरेष्वपीडकशब्देन योजनाद्वयमेतदस्मिंस्तंत्रे वेद्यम् । तथा च वक्ष्यति । रसैः कोष्णैश्च सर्पिर्भिरवपीडकयोजितैः । तथाऽष्टांगावतारे मूत्रोदावर्तचिकित्सायाम् । अवपीडकसर्पिश्च विशेषान्मूत्रजे गद इति । ननु वेगधारणेन बाहुल्येन मरुत एव कोपः । तथा च वक्ष्यति । ततश्च नैकधा प्रायः पवनो यत्प्रकुप्यति । पवनविजये च तैलं यथा वरं न तथा घृतमतस्तैलस्यैवावपीडकयोजनमत्रोचितं न सर्पिषः । अत्रोच्यते । तैलस्य वातजितोऽपि बद्धविट्काल्पमूत्रस्वभावत्वादत्रायोग्यं पानम् । तथा च । तैलं स्वयोनिवदित्यारभ्य यावद्बद्धविट्कमिति । स्वयोनिवदित्युक्तेश्चाल्पमूत्रत्वम् । तथा च वक्ष्यति । उष्णस्त्वच्यो हिमस्पर्शः केश्यो बल्यस्तिलो गुरुः । अल्पमूत्र इति । तदेवं तैलस्य बद्धविट्काल्पमूत्रस्वभावतया तदीयोऽवपीडको मूत्ररोधोत्थेषु रोगेष्वौषधत्वेन युक्तोऽपि न सर्पिष इव युक्तः ॥ ६ ॥

मूत्रवेग रोकने से उत्पन्न रोग का उपाय—

वि०—मूत्ररोध-जन्य रोगों में भोजन से पूर्व घृतपान करना प्रशस्त है, और रात्रि के भोजन के जीर्ण होने पर उत्तम मात्रा में घृत पान करायें; इन दोनों योजनाओं की अवपीडक संज्ञा है ॥ ६ ॥

वक्तव्य—उत्तम मात्रा-स्नेह की जो मात्रा दिन-रात में जीर्ण होती है, वह उत्तम मात्रा है; घृत की इन दो योजनाओं का नाम अवपीडन है । भोजन से पूर्व अल्प मात्रा में देना यह एक योजना, और भोजन के जीर्ण होने पर उत्तम मात्रा में देना यह दूसरी योजना । इसीलिये आगे कहेंगे 'अवपीडकसर्पिश्च विशेषान्मूत्रजे गदे' । तैल वातशामक होने पर भी मल को बांधने वाला तथा मूत्र को कम करने वाला होने से इन रोगों में प्रशस्त नहीं है क्योंकि उसका गुण वही होता है जो उष्ण पदार्थ का जिससे तेल निकला हो 'तैलं स्वयोनिवत्' जैसा कि आगे कहेंगे —'उष्णस्त्वच्यो हिमः स्पर्शे केश्यो बल्यस्तिलो गुरुः । अल्पमूत्रः ।' इसलिये घृतपान बताया है ।

—धारणात्पुनः ॥ ७ ॥
उद्गारस्यारुचिः कम्पो विबन्धो हृदयोरसोः ।
आध्मानकासहिध्माश्च हिध्मावत्तत्र भेषजम् ॥ ८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—पुनरपि व्यतिरेके। उद्गारस्य धारणादरुच्यादयो भवन्ति। उरो वक्षस्तस्याधो हृदयं तयोर्विबंधो हृदयं तयोर्विबंधोऽतस्तंभ इव। तत्र तेषु रोगेषु हिध्मावद्भेषजम्। श्वासहिध्माचिकित्सिते हिध्मायाश्चिकित्सितं वक्ष्यति ॥७-८॥

डकार रोकने से रोग—

वि०—उद्गार (ऊर्ध्ववात) के रोकने से-अरुचि, कम्प, हृदय और छाती में रुकावट; आध्मान; कास और हिक्का होता है; इसमें हिक्का की तरह चिकित्सा करे ॥ ७-८ ॥

वक्तव्य—हिक्का की चिकित्सा-'यत्किंचित् कफवातघ्नमुष्णं वातानुलोमनम्। भेषजं पानमन्नं वा तद्धितं श्वासहिक्किने॥' (च. चि अ. १८।१४७)

शिरोऽर्तीन्द्रियदौर्बल्यमन्यास्तम्भार्दितं क्षुतेः।
तीक्ष्णधूमाञ्जनाघ्राणनावनार्कविलोकनैः ॥ ९ ॥
प्रवर्तयेत्क्षुतिं सक्तां स्नेहस्वेदौ च शीलयेत्।

स०—क्षुतेः क्षवथोर्धारणाच्छिरोऽर्त्यादयः स्युः। दुर्बलस्य भावो दौर्बल्यम्। गुणवचनेत्यादिना ष्यञ्। इन्द्रियाणां दर्शनादीनां दौर्बल्यं विषयग्रहणाशक्तित्वमिन्द्रियदौर्बल्यम्। ननु च पूरणगुणेत्यादिना समासप्रतिषेधेन भवितव्यम्। अत्रोच्यते। य एव गुणशब्दा गुणिनावच्छिन्ना गुणमात्रे वर्तंते कदाचिद् गुणिन्यपि त एव प्रतिषेधस्य विषयाः। यथा पटस्य शुक्लो गुडस्य मधुर इत्यादयः। ते तु गुणमात्र एव वर्तंते न गुणिनि ते समासस्य। यथा पटहशब्दः पुत्रस्पर्शः कन्यारूपं द्राक्षारसश्चन्दनगन्ध इत्यादयः। तथेंद्रियदौर्बल्यमित्यादावपि भावप्रत्ययांतस्य व्यतिरेककारणत्वाद् गुणाभिधायित्वमेव। तस्मादेवमादौ तत्स्थैश्च गुणैः षष्ठी समस्यत इति समासः। तस्यायमर्थः। तेषु गुणेष्वेव तिष्ठन्तीति तत्स्थाः। एतदुक्तं भवति। गुणा एव ये गुणा वर्तंते न द्रव्यात्मनि तैः सह षष्ठी समस्यते। शुक्लादिशब्दानां तु कदाचिद्द्रव्यवृत्तित्वात्सामानाधिकरण्येनापि वृत्तिर्दृष्टा। यथा शुक्लः पट इति। गुणवृत्तित्वात् वैयधिकरण्येनापि। यथा पटस्य शुक्ल इति। तदेषां प्रतिषेधविषयत्वम्। पटहशब्दादीनां तु तत्स्थत्वात्समासविषयत्वमिति स्थितम्। नन्वेवं सति बलाकायाः शौक्ल्यमित्यत्रापि पूर्वोक्तान्न्यायात्समासः प्राप्नुयात्। अत्रोच्यते भाष्यकारवचनान्न भविष्यति। स हि गुणवचनग्रहणमेव कस्मान्न क्रियत इत्युक्त्वाऽभ्यधात्। बलाकायाः शौक्ल्यमित्यत्रापि यथा स्यादिति। समासस्यात्राभावः। गदितं वातव्याधिनिदाने। क्षुतिं सक्तामप्रवर्तमानां तीक्ष्णधूमादिभिः प्रवर्तयेत्। तीक्ष्णधूमो धूमपानविधौ वक्ष्यते। तीक्ष्णं चांजनमक्षिरोगेषु। तीक्ष्णाघ्राणं यन्नासया मरीचादिग्रहणम्। तीक्ष्णं नावनं तस्य विधौ वक्ष्यति। स्नेहश्च स्वेदश्च तौ च शीलयेदभ्यसेत्। क्षुतिः क्षुतम्। सुश्रुते चोक्तम्। प्राणापानौ समौ स्यातां मूर्ध्नि स्रोतःपथे स्थितौ। नस्तः प्रवर्तते शब्दः क्षुतं तच्च विनिर्दिशेत्॥ ९ ॥

छींक रोकने से रोग—

वि०—छींक के उपस्थित वेग को रोकने से-शिर में दर्द, आँख आदि इन्द्रियों में दुर्बलता; मन्यास्तम्भ और अर्दित रोग होता है।

चिकित्सा—रुकी हुई छींक को प्रवृत्त करने के लिये-तीक्ष्ण धूम, तीक्ष्ण अञ्जन; तीक्ष्ण घ्राण (गंध सूँघना), नावन (नस्य) सूर्य की ओर देखना यह सब करे; स्नेहन और स्वेदन भी करे ॥ ९ ॥

वक्तव्य—छींक का लक्षण—प्राणोदानौ समौ स्यातां मूर्ध्नि स्रोतःपथे स्थितौ। नस्तः प्रवर्त्तते शब्दं क्षुतं तच्च विनिर्दिशेत्॥' (सु. शा. अ ४)। इसमें घृत भोजन के उपरान्त देना चाहिये। यथा—'योऽयं वातघ्नमन्नं च घृतं चोत्तरभक्तिकम्'॥

शोषाङ्गसादबाधिर्यसम्मोहभ्रमहृद्गदाः ॥ १० ॥
तृष्णाया निग्रहात्तत्र शीतः सर्वो विधिर्हितः।

स०—तृष्णाया निग्रहान्निरोधाच्छोषादयो भवन्ति। तत्र तृष्णाया रोधजेषु विकारेषु सर्वः शीतो विधिः स्नानान्नपानादिको हितः॥ १० ॥

प्यास रोकने से रोग—

वि०—प्यास के रोकने से मुखशोष, अङ्गों में शिथिलता, बहरापन, मूर्च्छा, चक्कर आना और हृदय के रोग होते हैं; इसमें सम्पूर्ण शीतल विधि बरतनी चाहिये ॥ १० ॥

वक्तव्य—चरक में-'शीततर्पणमिष्यते' चिकित्सा कही है; अर्थात्—सत्तू का मन्थ अथवा द्राक्षा; खर्जूर इनको पानी में घोल कर मन्थ बना कर देवे।

अङ्गभङ्गारुचिग्लानिकार्श्यशूलभ्रमाः क्षुधः ॥ ११ ॥
तत्र योज्यं लघु स्निग्धमुष्णमल्पं च भोजनम्।

स०—क्षुध इति। निग्रहादित्यनुवृत्तिः। निग्रहापेक्षया षष्ठी। एवं निद्राया इत्यत्रापि योज्यम्। क्षुधो बुभुक्षाया निग्रहादंगभंगादयः षड् भवन्ति। सामान्येनापि शूलशब्दनिर्देशे पक्वाशयगतः शूलो गृह्यते। क्षुद्वेगनिग्रहेणानिवारणः प्रभंजनः कुप्यति। तस्यावस्थानं पक्वाशये। वक्ष्यति हि। पक्वाशयकटीत्यारभ्य यावत्पक्वाधानं विशेषत इति। तत्र क्षुधो निग्रहे भोजनं लघु स्निग्धमुष्णमल्पं च योज्यम्॥ ११ ॥

भूख रोकने से रोग—

वि०—भूख के रोकने से—अङ्गों का टूटना, अरुचि, ग्लानि, कृशता, शूल और चक्कर आना होता है। इसमें लघु, स्निग्ध, उष्ण अल्प और मात्रा में भोजन देना चाहिये ॥११॥

निद्राया मोहमूर्धाक्षिगौरवालस्यजृम्भिकाः ॥ १२ ॥
अङ्गमर्दश्च, तत्रेष्टः स्वप्नः संवाहनानि च।

स०—निद्राया निग्रहान्मोहादयो भवन्ति। तत्र निद्रावेगरोधोत्थे विकारे स्वप्न इष्टः। संवाहनानि स्वल्पपादिमर्दनानि च॥ १२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निद्रा रोकने से रोग—

वि०—निद्रा के उपस्थित वेग को रोकने से-मूर्च्छा शिर में भारीपन, आँखों पर आलस्य, जम्भाई का आना; और अङ्गों का टूटना होता है। इसमें नींद लेना और संवाहन (चापी) उत्तम है ॥ १२ ॥

कासस्य रोधात्तद्वृद्धिः श्वासारुचिहृदामयाः ॥ १३ ॥
शोषो हिध्मा च, कार्योऽत्र कासहा सुतरां विधिः।

स०—कासस्य कासवेगस्य रोधात्तद्वृद्धिः तस्य कासस्य वृद्धिराधिक्यं स्यात्। तथा श्वासादयः। तत्र कासचिकित्सितोक्तः सुतरामतिशयेन विधिः कार्यः ॥ १३ ॥

खाँसी रोकने से रोग—

वि०—कासवेग के रोकने से-कास की अधिकता होती है; अरुचि और हृदय के रोग होते हैं; एवं श्वास और हिक्का होती है; इसमें कासनाशक विधि सम्पूर्ण रूप से बरतनी चाहिये ॥ १३ ॥

वक्तव्य—चरक में कासवेग का अवरोध नहीं पढ़ा; सुश्रुत में भी कासवेग को नहीं गिना। तेरह उदावर्त्तों में उद्गार को चरक, सुश्रुत में गिना है; परन्तु यहाँ उद्गार को ऊर्ध्ववात में लेकर कास को अलग गिना है।

गुल्महृद्रोगसम्मोहाः श्रमश्वासाद्विधारितात् ॥ १४ ॥
हितं विश्रमणं तत्र वातघ्नश्च क्रियाक्रमः।

स०—श्रमेणाध्वव्यायामादिना साहसेन सद्यो जातः श्वासः श्रमश्वासः। तस्माद्विधारिताद्वेगरोधाद्गुल्मादयः स्युः। तत्र विश्रमणं हितम्। वातघ्नश्च क्रियाक्रमो हितः ॥ १४ ॥

श्वास रोकने से रोग—

वि०—श्रमजनित श्वास को रोकने से—गुल्म, हृदय के रोग और मूर्च्छा होती है। इस अवस्था में आराम लेना और वातनाशक उपचार करना चाहिये ॥ १४ ॥

जृम्भायाः क्षववद्रोगाः सर्वश्चानिलजिद्विधिः ॥ १५ ॥

स०—जृंभाया रोधात् क्षुतिवद्रोगाः। तत्र सर्वा च वातघ्नक्रिया हितेति शेषः। जृंभा मुखविकासो गात्रविनामः ॥ १५ ॥

जँभाई रोकने से रोग—

वि०—जृम्भा के रोकने से छींक के रोकने के समान रोग होते हैं; इसमें वातनाशक विधि पूर्णतः करनी चाहिये[1] ॥१५॥

पीनसाक्षिशिरोहृद्रुङ्मन्यास्तम्भारुचिभ्रमाः।
सगुल्मा बाष्पतस्तत्र स्वप्नो मद्यं प्रियाः कथाः ॥१६॥

स०—बाष्पतोऽश्रुणो विधारितात् पीनसादयो भवन्ति। पीनसो नासास्रावः। अक्षिशिरोहृदां रुजा सम्बन्धः। सशब्दश्चार्थे। गुल्माश्चेत्यर्थः। तत्र स्वप्नादिका चिकित्सा ॥ १६ ॥

आँसू रोकने से रोग—

वि०—बाष्प (अश्रु) के वेग को रोकने से-पीनस, अक्षिरोग, शिरोरोग, मन्यास्तम्भ, अरुचि, भ्रम और गुल्म रोग होते हैं; इसमें नींद लेना, मद्य तथा प्रसन्नता पैदा करने वाली मनोहर कथाओं को सुनना लाभप्रद होता है ॥१६॥

विसर्पकोठकुष्ठाक्षिकण्डूपाण्ड्वामयज्वराः।
सकासश्वासहृल्लासव्यङ्गश्वयथवो वमेः ॥१७॥

स०—वमेश्छर्दिषो विधारिताया विसर्पादयः स्युः। कोठो लोहितं कठिनं च मंडलम्। अक्षिकंड्वादीनामामयेन सम्बन्धः ॥ १७ ॥

वमन रोकने से रोग—

वि०—वमन के उपस्थित वेग को रोकने से—विसर्प, कोठ, कुष्ठ, आँख के रोग, कण्डू, पाण्डु, ज्वर, कास, श्वास, जी मचलाना, व्यङ्ग और श्वयथु होते हैं ॥ १७ ॥

व्यङ्ग—मुख पर काली झांई या चकत्ते पड़ना।

गण्डूषधूमानाहारा रूक्षं भुक्त्वा तदुद्वमः।
व्यायामः स्रुतिरस्रस्य शस्तं तात्र विरेचनम् ॥ १८ ॥
सक्षारलवणं तैलमभ्यङ्गार्थं च शस्यते।

स०—तत्र गंडूषादयः शस्ताः। अनाहारोऽभोजनम्। एतेषां द्वन्द्वः। तथा रूक्षं भुक्त्वा तस्य रूक्षस्योद्वमश्छर्दनम्। एवं प्राणो वायुः स्वमार्गं प्रत्येति ततो व्यायामाद्यत्र शस्तम्। तथा क्षारलवणाभ्यां युक्तं तैलमभ्यंगार्थे शस्यते हितं भवति ॥ १८ ॥

वि०—चिकित्सा—गण्डूष, धूमपान; उपवास करना, रूक्ष अन्न खाकर उसी अन्न का वमन करना, व्यायाम, रक्तमोक्षण और विरेचन इसमें प्रशस्त है। मालिश के लिये यवक्षार और लवण से मिला तैल उत्तम है ॥ १८ ॥

वक्तव्य—गण्डूष के लिये गरम पानी या आर्द्रक का रस और मधु या नमक मिलाकर प्रयुक्त करे। रूक्ष अन्न, यथा—चना आदि जो भाड़ में भूना हो।

शुक्रात्तत्स्रवणं गुह्यवेदनाश्वयथुज्वराः ॥ १९ ॥
हृद्व्यथामूत्रसङ्गाङ्गभङ्गवृद्ध्यश्मषण्ढताः।

स०—शुक्राद्विधारितात्तस्य शुक्रस्य स्रवणम्। तथा गुह्यवेदना पायुवेदना वृषणशूलम्। तथा श्वयथुः प्रकृतत्वाद् गुह्य एवेति योज्यम्। वृद्धवर्धर्मं। अश्मशब्देनाश्मरी कथ्यते। षंढता स्त्रीगमनाशक्तित्वम् ॥ १९ ॥

शुक्रस्खलन के वेग रोकने से रोग—

वि०—शुक्र के उपस्थित वेग को रोकने से शुक्र का स्रवण; गुह्य वेदना (मेहन तथा वृषणों में दर्द), शोथ, ज्वर,

---

[1] जृम्भा का लक्षण—
'पीत्वैकमनिलोच्छ्वासमुद्वेष्टन् विवृताननः।
यन्मुञ्चति सनेत्रास्रं स जृम्भ इति संज्ञितः ॥'
आलस्य का लक्षण—
'सुखस्पर्शप्रसंगित्वं दुःखद्वेषणलोलता।
शक्तस्य चाप्यनुत्साहः कर्मस्वालस्यमुच्यते ॥' सुश्रुत।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हृदय में पीड़ा, मूत्र का अवरोध, अङ्गों का टूटन; वृद्धि, पथरी और नपुंसकता होती है ॥ १९ ॥

वक्तव्य—चरक में कहा है—'शुक्रवेगनिरोधः षाण्ढ्यकराणाम् (श्रेष्ठतमः)'—उपस्थित शुक्र का रोकना अतिशय हानिकारक है।

ताम्रचूडसुराशालिवस्त्यभ्यङ्गावगाहनम् ॥ २० ॥
बस्तिशुद्धिकरैः सिद्धं भजेत्क्षीरं प्रियाः स्त्रियः ।

स०—तत्र ताम्रचूडादिकं भजेत्। तथा बस्तिशुद्धिकरैः कूष्मांडादिभिः सिद्धं क्षीरं भजेत्। प्रियाश्च कांताः प्रियत्वेन हिता इति शेषः। निरनुबन्धेन रभसेन प्रवर्तते शुक्रम् ॥ २० ॥

वि०—चिकित्सा—मुर्गा, सुरा, शालि, बस्ति, अभ्यङ्ग और अवगाहन इनका सेवन करे। बस्ति का शोधन करने वाले (कूष्मांड, यवक्षार आदि) द्रव्यों से सिद्ध दूध का पान करे तथा प्रिय स्त्रियों का सेवन करे ॥ २० ॥

वक्तव्य—पञ्चतृण मूल से सिद्ध दूध पीने को देना चाहिये। प्रेयसी होने से शुक्र स्वयं जल्दी प्रवृत्त होता है। यथा—'प्रवर्त्तनी स्त्री शुक्रस्य रेचनं बृहतीफलम्'—स्त्री शुक्र को प्रवृत्त कराने वाली है।

वेगरोधिनो ये न चिकित्स्यास्तान्दर्शयन्नाह—

तृट्शूलार्तं त्यजेत् क्षीणं विड्वमं वेगरोधिनम् ॥ २१ ॥

स०—तृट् च शूलं च ताभ्यामार्तमतिपीडितं तथा क्षीणं क्षीणदेहं वेगरोधिनं च त्यजेन्न चिकित्सेत्। तथा विशं यो वमति तं च वेगरोधिनं त्यजेत् ॥ २१ ॥

असाध्य रोग—

वि०—वेगरोधजन्य रोगों की असाध्यता-जो वेगरोधी रोगी प्यास एवं शूल से पीड़ित हो; जिसके धातु क्षीण हो गये हों; और जो पुरीष का वमन करता हो; उसकी चिकित्सा न करे ॥ २१ ॥

अथ किमेते रोगा वेगोदीरणधारणाद्भवन्ति नेत्याह—

रोगाः सर्वेऽपि जायन्ते वेगोदीरणधारणैः ।

स०—सर्वेऽपि रोगा जायन्ते न केवलं पूर्वोक्ता एव। वेगानां पुरीषादिसम्बन्धिनां यान्युदीरणान्यनागतानां प्रवर्तनानि तैः। तथा तेषामेवागतानां यानि विधारणान्यनुत्सर्गलक्षणानि तैः। अत्रेयं युक्तिः। वेगोदीरणधारणं नाम वायोः कर्म तस्य क्रियावत्त्वात्। तेन च वेगोदीरणधारण लक्षणेन स्वकर्मणा स एव वायुः कोप्यते। स कुपितः सर्वानेव विकारान् जनयति। तथा चोक्तम्। शाखागताः कोष्ठगताश्च रोगा मर्मोर्ध्वसर्वावयवांगजाश्च। ये संति तेषां नतु कश्चिदन्यो वायोः परं जन्मनि हेतुरस्ति। विट्श्लेष्मपित्तादिमलायनानां विक्षेपसंहारकरः स यस्मादिति।

वेगरोधजन्य सर्व रोग—

वि०—अनुपस्थित वेगों को प्रवृत्त करने और उपस्थित वेगों को रोकने से ही सब रोग उत्पन्न होते हैं।

वक्तव्य—उदीरणम्—अनुपस्थित वेगों को बलपूर्वक उन्मुख करना—प्रवृत्त करना, उदीरण है। और जो प्रवृत्त हो रहे हैं, उनका रोकना—ये दोनों ही सब रोगों के कारण हैं; क्योंकि इनसे वायु का प्रकोप होता है; और वायु ही सब रोगों का कारण है; यथा—'शाखागताः कोष्ठगताश्च रोगा मर्मोर्ध्वसर्वावयवाङ्गजाश्च। ये सन्ति तेषां न तु कश्चिदन्यो वायोः परं जन्मनि हेतुरस्ति ॥ इसीलिए सुश्रुत में कहा है कि—'सर्वेष्वेतेषु विधिवदुदावर्त्तेषु कृत्स्नशः वायोः क्रिया विधातव्याः स्वमार्गप्रतिपत्तये ॥' (सु. उ. अ. ५५)।

निर्दिष्टं साधनं तत्र भूयिष्ठं ये तु तान् प्रति ॥ २२ ॥
ततश्चानेकधा प्रायः पवनो यत्प्रकुप्यति ।
अन्नपानौषधं तस्य युञ्जीतातोऽनुलोमनम् ॥ २३ ॥

स०—तत्र तेषु वेगोदीरणधारणोत्थेषु सर्वेषु मध्याद्ये तु भूयिष्ठं बाहुल्येन भवन्ति गुल्मोदावर्तादयस्तान् प्रति वर्त्यभ्यंगेत्यादिना साधनं निर्दिष्टं चिकित्सोक्ता। ततश्च वेगोदीरणधारणादनेकधा वायुर्यस्मात्कुप्यति। अतोऽस्माद्धेतोस्तस्यानुलोमनं मार्गयोजकमन्नपानौषधं युंजीत। यद्यपि वेगोदीरणधारणात्सर्वे रोगा जायंते इत्युक्तम्। तथापि यथा वेगधारणाच्चिरकालभाविनः सप्रत्यया रोगा भवन्ति न तथोदीरणात्। अत एव तन्त्रकारोऽब्रोबातस्य रोधेनापि रोगा भवन्ति। शक्तो रोधादमी भवन्तीत्युवाच। ननु तदुदीरणादमी रोगा भवन्तीति। प्रायोग्रहणं क्वचित् कफादेरपि प्रकोप इति समापादयति। तथा च वमिनिग्रह उक्तम्। विसर्पकोठ कुष्ठाक्षीत्यादि। तत्र गंडूषधूमानाहार इत्यादिचिकित्सा। न चैवंरूपो विधिर्वायावुपदिश्यते तस्मात्प्रायोग्रहणम् ॥२२-२३॥

वि०—वेग धारण से जो रोग प्रायः होते हैं; उनके लिये चिकित्सा कह दी है, विशिष्ट वेगों को रोकने से वायु अनेक प्रकार से प्रायः कुपित होता है (और अनेक प्रकार के विकारों को उत्पन्न कर सकता है)। इसलिये वेगरोधजनित विकारों में वायु का अनुलोमन करने वाला खानपान एवं औषध बरतना चाहिये ॥ २२-२३ ॥

वक्तव्य—सब उदावर्तों में मुख्यतः वायु की ही चिकित्सा करनी चाहिये। अनुलोमन—वायु को अपने मार्ग में प्रवृत्त करना।

यदि वेगरोधाद्रोगा जायन्ते तर्हि लोभादीनामपि नरकादिहेतूनां वेगा न धार्या इति प्राप्ते सतीदमाह—

धारयेत्तु सदा वेगान् हितैषी प्रेत्य चेह च ।
लोभेर्ष्याद्वेषमात्सर्यरागादीनां जितेन्द्रियः ॥ २४ ॥

स०—तुशब्दोऽवधारणे। सदा सर्वकालं लोभेर्ष्यादीनां वेगान् धारयेदेवं हितैषी यः पुरुषः स्वहितमिच्छन्। क्व। प्रेत्य चेह च परलोके तथेहलोके च। किंभूतः सन्। जितानि दांतानींद्रियाणि मनःषष्ठानि चक्षुरादीनि विषयाणामनभिलाषुकतया येन स जितेन्द्रियः। जितेंद्रियशब्देन लोभादि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेगविधारण उपायं दर्शयति। जितेन्द्रिय एवैतान् धारयितुं शक्तो नान्य इत्यर्थः। द्वेषो वैरम्। मात्सर्यं परगुणासहिष्णुत्वम्। रागः प्रीतिः। आदिशब्देनाभिध्यादिपरिग्रहः। प्रेत्येह चेति कर्तव्ये द्विश्चकारकरणं रागादीनां वेगविधारणेन प्रेत्येह वाऽस्मिन् लोके तुल्यकष्टत्वज्ञापनार्थम्। अन्यथा प्रेत्येत्यस्य पूर्वनिर्देशाद्भूयसेषां रागादीनां विधारणं प्रेत्य न तथेह लोके। पश्चान्निर्दिष्टत्वात् ॥ २४ ॥

रोकने योग्य वेग—

वि०—धारणीय वेग—इस लोक और परलोक में हित चाहने वाला मनुष्य जितेन्द्रिय बनकर सदा लोभ, ईर्ष्या, द्वेष, मात्सर्य, राग आदि वेगों को रोके ॥ २४ ॥

वक्तव्य—चरक में भी कहा है—'इमांस्तु धारयेद् वेगान् हितार्थी प्रेत्य चेह च। साहसानामशस्तानां मनोवाक्कायकर्मणाम् ॥ लोभशोकभयक्रोधमनोवेगान् विधारयेत्। नैर्लज्ज्येर्ष्याऽतिरागाणामभिध्यायाश्च बुद्धिमान् ॥'

ईर्ष्या—दूसरे के उत्कर्ष को न सहना। राग—विषयासक्ति। मात्सर्य—दूसरे के शुभ के साथ द्वेष।

अन्यच्च हितैषी किं कुर्यादित्याह—

यतेत च यथाकालं मलानां शोधनं प्रति।
अत्यर्थसञ्चितास्ते हि क्रुद्धाः स्युर्जीवितच्छिदः ॥२५॥

स०—मलानां वातपित्तश्लेश्मपुरीषादीनां यथाकालं शोधनं प्रति यतेत यत्नं कुर्यात्। यो यस्य मलस्य शोधनकालः स तस्मिन्काले शोधनीय इत्यर्थः। किमर्थं मलानां शोधनं कार्यमित्याह। अत्यर्थेत्यादि। यस्मात्ते मला अत्यर्थसंचिता अतिशयेन स्वस्थाने वृद्धिं गताः कुतोऽप्याहारविहाररूपात् कोपहेतोः क्रुद्धाः कुपिताः सन्तः कदाचिज्जीवितच्छिदः स्युर्भवेयुः। तस्मात्ते शोधनीयाः। अत्यर्थसंचितग्रहणेनैतद्द्योतयति। यदि ते मला अत्यर्थसंचिताः स्युस्तदैव तेषामन्योपक्रमेभ्यः शोधनाख्य उपक्रमो ज्यायान्। लंघनपाचने तूपक्रममात्रे ॥ २५ ॥

वातादि मलों का यथाकाल शोधन—

वि०—मलों के शोधन के लिये यथासमय प्रयत्न करता रहे। क्योंकि ये मल अतिशय संचित होने पर क्रुद्ध होकर जीवन को नाश करने वाले हो सकते हैं ॥ २५ ॥

वक्तव्य—मल-वात, पित्त, कफ, मल आदि; इनके शोधन का यत्न करना चाहिये। क्योंकि समय पर शोधन न करने से ये अतिशय संचित हो जाते हैं—बढ़ जाते हैं; और बढ़ने से क्रुद्ध होते हैं; और कुपित होने पर मारक भी बन जाते हैं; इसलिये इनका समय पर शोधन करना चाहिये। शोधन का समय पैंतीसवें श्लोक में कहा है।

तदेवैतच्चेतसि कृत्वा दोषा इत्यादिग्रंथं ग्रंथकृदुवाच—

दोषाः कदाचित्कुप्यन्ति जिता लङ्घनपाचनैः।
ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः ॥ २६ ॥

स०—दोषा वातादयो लंघनपाचनैर्जिताः सन्त प्रकृतिं प्रापिताः कदाचित्कस्मिन्नपि काले कुप्यन्ति। ये पुनः संशोधनैः शुद्धास्तेषां न पुनरुद्भव उत्थानं भवति ॥ २६ ॥

संशोधन का महत्व

वि०—वातादि दोष-लंघन, पाचन आदि से प्रकृति में लाने पर शायद कभी कुपित हो सकते हैं; परन्तु जो दोष संशोधन द्वारा शुद्ध कर दिये गये (बाहर निकाल दिये गये); फिर उनकी उत्पत्ति नहीं होती ॥ २६ ॥

वक्तव्य—लंघन-'यत् किंचिल्लाघवकरं देहे तल्लंघनं स्मृतम्'। पाचन—'पचत्यामं न वह्निञ्च कुर्याद् यत् तद्धि पाचनम्'। 'लंघन और पाचन का उपयोग मध्यम दोष वाले के लिये है; यथा-'लंघनपाचने तु मध्यबलदोषाणां, लंघनपाचनाभ्यां हि सूर्यसंतापमारुताभ्यां पांशुभस्मावकिरणैरिव चानतिबहूदकं मध्यबलो दोषः प्रशोषमापद्यते। बहुदोषाणां पुनर्दोषावसेचनमेव कार्यं, न ह्यभिन्ने केदारसेतौ पल्वलाप्रसेकोऽस्ति-तद्वद्दोषाद्यसेचनम्।' चरक। जो वस्तु शरीर से बाहर कर दी गई है; वह फिर वापिस नहीं आती; और जो शरीर में ही रह गई है; वह कभी भी कुपित होकर विकार कर सकती है[1]।

यथाक्रमं यथायोगमत ऊर्ध्वं प्रयोजयेत्।
रसायनानि सिद्धानि वृष्ययोगांश्च कालवित् ॥ २७ ॥

स०—कालविद्यो वैद्यः सोऽतः संशोधनपूर्वं रसायनानि प्रयोजयेत्। कालशब्दो देशबलशरीराहारसात्म्यसत्वप्रकृतीनामुपलक्षणार्थः। नहि कालमात्रविद्रसायनप्रयोगं सम्यग्विधापयितुं शक्तः। किंभूतानि रसायनानि। सिद्धानि बहुशो दृष्टप्रत्ययानि ब्राह्मवासिष्ठादीनि। कथं योजयेदित्याह। यथाक्रमं यथायोगमित्यनेन रसायनं वाजीकरणोक्तं स्मारयति। तत्रैष रसायनक्रमः। हरीतकीमामलकं सैंधवं नागरं वचामित्यारभ्य यावदित्थं संस्रुतकोष्ठस्य रसायनमुपाचरेत्। एतदुक्तं भवति। यद्यप्येवं वमनविरेचनास्थापनानुवासननावनैः पंचभिरपि कर्मभिः संस्रुतोर्ध्वाधःसकलकायस्तथाप्येष रसायनीयो भूयः शरीरसंस्कारः करणीयस्तत्पूर्वकत्वात् तस्य। अत एव संशुद्धदेहोऽयमिति कृत्वा त्रिवृद्दंत्यादीन्विरेचनारम्भकानुपदिशति। तथा वाजीकरणेऽप्याह। अथ स्निग्धविशुद्धानां निरूहान्सानुवासनान्। घृततैलरसक्षीरशर्कराक्षौद्रसंयुतान्। योगविद्योजयेत्पूर्वं क्षीरमांसरसाशिनम्। ततो पाजीकरान् योगानिति। तथा यथायोगं यो यस्य युज्यते दातुमित्यर्थः। तथेदं रसायनं वातप्रकृतेर्योग्यमिदं पित्तप्रकृतेरिदं श्लेष्मप्रकृतेरित्यादि। तथाऽमुष्मिन् देशेऽमुष्मिन् काले वाऽमुष्मिन्वयस्यमुष्मिन् देहे रसायनं योग्यमिदमिति यथायोगार्थः। एवं वृष्ययोगेऽपि योज्यम्। अत्र

१. 'दोषाणां च द्रुमाणां च मूलेऽनुपहते सति।
रोगाणां प्रसवानां च गतानामागतिर्ध्रुवा॥' (च. सू. अ. १९।२१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च रसायनानि। वातातपिकानि योजयेन्न कुटीप्रावेशकानि। स्वस्थवृत्ताधिकारत्वात्तद्विधानस्य ॥ २७ ॥

शोधन के पश्चात् रसायन प्रयोग—

वि०—संशोधन के उपरान्त काल को समझने वाला वैद्य क्रम के अनुसार तथा योग के अनुसार सिद्ध रसायनों तथा वृष्य योगों का प्रयोग करे ॥ २७ ॥

वक्तव्य—काल को पहचानने वाला; काल दो प्रकार का है—नित्यग और आवस्थिक; अर्थात् ऋतु की दृष्टि से और रोगी एवं रोग की अवस्था की दृष्टि से विचार कर देवे। यथाक्रम—जैसा कि रसायन योगों का क्रम है; यथा—'हरीतकीमामलकं सैन्धवं नागरं वचाम्।'—यहां से लेकर-'इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत् ॥' यथायोग[1]—जैसा जिस योग में विधान हो; यथा-'जीर्णे पयः सर्पिरोदन इत्याहारः।' (सु. चि. अ. २७।११) सिद्धानि-जिनका फल देखा हुआ है। वृष्ययोग-वाजीकरणोक्त योग।

भेषजक्षपिते पथ्यमाहारैर्बृंहणं क्रमात्।
शालिषष्टिकगोधूममुद्गमांसघृतादिभिः ॥ २८ ॥
हृद्यदीपनभैषज्यसंयोगाद्रुचिपक्तिदैः।
साभ्यङ्गोद्वर्तनस्नाननिरूहस्नेहबस्तिभिः ॥ २९ ॥

स०—भेषजेन क्षपिते नरे शोधनकर्षिते सत्याहारैर्भोज्यैः बृंहणं हितं क्रमान्न सहसैव। कैराहारैरित्याह—शाल्यादिभिः। किंभूतैः। हृद्यानि च तानि दीपनानि भैषज्यान्यौषधानि च शुंठीपिप्पल्यार्द्रकत्वगेलादीनि तैः संयोगो मिश्रितस्तस्माद् हृद्यदीपनभैषज्यसंयोगाद्रुचिपक्तीर्दृदत्यभिलाषपाकानुत्पादयंति ये शाल्यादयस्तै रुचिपक्तिदैराहारैर्बृंहणं भेषजक्षपिते पथ्यम्। किंभूतैराहारैः साभ्यंगेत्यादि। सहाभ्यंगादिभिर्वर्तत इति साभ्यंगादिभिश्चेत्यर्थः। स्नेहबस्तिरनुवासनम् ॥ २८-२९ ॥

पथ्यादि विधि—

वि०—जो मनुष्य औषध के कारण क्षीण हुआ हो उसका क्रमशः शाली, सांठी, गेहूँ, मूंग, मांस, घृत आदि जो हृदय के लिये प्रिय और अग्निदीपक, ओषधियों के संयोग से रुचिकर और अग्निवर्धक हों—उनके आहार से तथा अभ्यङ्ग; उबटन, स्नान, निरूह एवं स्नेहबस्तियों के प्रयोग से बृंहण करना उत्तम है ॥ २८-२९ ॥

वक्तव्य—मनुष्य दो प्रकार से क्षीण होता है; एक-सद्यःक्षीण और दूसरा-चिरक्षीण[2]। इनमें सद्यःक्षीण मनुष्य तुरन्त पुष्ट होता है; और चिरक्षीण देर में पुष्ट होता है। इनमें सद्यःक्षीण के अन्दर ही औषधक्षीण का अन्तर्भाव होगा।

एवं कृते पुरुषः किं प्राप्नोतीत्याह—

तथा स लभते शर्म सर्वपावकपाटवम्।
धीवर्णेन्द्रियवैमल्यं वृषतां दैर्घ्यमायुषः ॥ ३० ॥

स०—तथा तेन प्रकारेण पूर्वं शोधनं ततो बृंहणं ततो रसायनप्रयोग इत्येवंरूपेण संशोधनादिसेवी पुरुष शर्म स्वास्थ्यं लभते। तथा सर्वेत्यादि। सर्वे च ते पावकाश्च सर्वपावकास्तेषां पाटवं शक्तिं लभते। तत्र सौम्याग्नेयवायव्याः पंचोष्माणः सनाभसाः पंचमहाभूताग्नयो धात्वग्नयः सप्त त्रयोदशो जाठराग्निरिति। धीवर्णेत्यादि। धीवर्णयोश्चक्षुरादींद्रियाणां च वैमल्यं लभते। तथा वृषतां स्त्रीगमनसामर्थ्यं लभते। तथा दैर्घ्यमायुषो जीवितस्याधिक्यं लभते ॥ ३० ॥

पूर्वोक्त क्रम का सुपरिणाम—

वि०—इस प्रकार करने से सुख मिलता है, सब अग्नियां प्रदीप्त होती हैं; बुद्धि, वर्ण, इन्द्रियों में निर्मलता आती है; वृषता तथा दीर्घायु प्राप्त होती है ॥ ३० ॥

वक्तव्य—तेरह अग्नियां-यथा पांच 'सौम्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ॥' धात्वग्नि सात हैं; और तेरहवीं जाठराग्नि। वृषता-सम्भोग शक्ति।

अधुनाऽऽगंतुरोगान्सोपक्रमान्निर्दिशति—

ये भूतविषवाय्वग्निक्षतभङ्गादिसम्भवाः।
रागद्वेषभयाद्याश्च ते स्युरागन्तवो गदाः ॥ ३१ ॥

स०—भूतानि च विषं च वायुश्चाग्निश्च क्षतं च भंगश्चेति द्वन्द्वः। त आदिर्येषामांगतुकरोगहेतूनां त एवं तेभ्यः संभवो येषामागन्तुकगदानां ज्वरादीनां ते भूतादिसम्भवा आगन्तवो रोगाः स्युः। आगंतुहेतुप्रभवत्वादागंतवो गदा उच्यंत

१. यथायोग—रसायन के अनेक योग हैं उनमें से देश, काल, शरीर, प्रकृति, आयु एवं लक्षण आदि की दृष्टि से जिस व्यक्ति के लिए जो उपयोगी हो उसका प्रयोग करें।

२. प्राणियों में क्षीणता कारणानुसार अकस्मात् या धीरे-धीरे होती है। अकस्मात् क्षीण व्यक्ति को सद्यःक्षीण और धीरे-धीरे क्षीण को चिरक्षीण कहते हैं। इन दोनों की क्षीणता दूर करने के लिए क्रमशः सद्यःतर्पण और तर्पणाभ्यास द्वारा बृंहण कराना उचित और आवश्यक भी होता है जैसा कि चरक ने लिखा है—

'तेषां संतर्पणं तज्ज्ञैः पुनराख्यातमौषधम्।
यत्तदात्वे समर्थं स्यादभ्यासे वा यदिष्यते ॥
सद्यःक्षीणो हि सद्यो वै तर्पणेनोपचीयते।
नर्ते संतर्पणाभ्यासाच्चिरक्षीणस्तु पुष्यति ॥'
(च. सू. २३)

वमन, विरेचनादि औषधों से संशोधन द्वारा दोषों के साथ कुछ धातुओं का भी क्षय होता और उस क्षीणता को दूर करने के लिए संतर्पण या बृंहण आवश्यक होता है। यतः इसमें अकस्मात् क्षीणता होती है अतः उसके लिए सद्यःतर्पण का प्रयोग आवश्यक प्रतीत होता है किन्तु संशोधन के कारण कोष्ठ क्षुब्ध और अग्नि अस्थिर होने से केवल आहार से संतर्पण करना चाहिए न कि रसायनादि औषधों से और आहार भी क्रमशः (संसर्जन क्रम से) देना चाहिए। यथा—
'पेयां विलेपीमकृतं कृतं च यूषं रसं द्विस्त्रिरथैकशश्च।
क्रमेण सेवेत विशुद्धकायः प्रधानमध्यावरशुद्धिशुद्धः ॥' (च. सि. १)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्यर्थः । न केवलमेत एव गदा रागद्वेषभयाद्याश्चागंतवो गदाः स्युः ॥ ३१ ॥

आगन्तु रोग—

वि०—आगन्तु रोग—जो रोग भूत, विष, वायु और अग्नि के कारण या क्षत के लगने से, टूटने आदि से उत्पन्न होते हैं तथा राग, द्वेष या भय आदि से जो रोग उत्पन्न होते हैं वे आगन्तु रोग हैं ॥ ३१ ॥

वक्तव्य—भूत—ग्रहादि। वायु—झंझावातादि। आदि शब्द से श्रम या शोकादि; ये आगन्तुज रोग पीछे वातादि से सम्बन्धित हो जाते हैं; यथा—'आगन्तुरन्वेति निजं विकारम्।' (च. सू. २०)

अधुना एषां चिकित्सां निर्दिशति—

त्यागः प्रज्ञापराधानामिन्द्रियोपशमः स्मृतिः।
देशकालात्मविज्ञानं सद्वृत्तस्यानुवर्तनम् ॥ ३२ ॥
अथर्वविहिता शान्तिः प्रतिकूलग्रहार्चनम्।
भूताद्यस्पर्शनोपायो निर्दिष्टश्च पृथक् पृथक् ॥ ३३ ॥
अनुत्पत्त्यै समासेन विधिरेष प्रदर्शितः।
निजागन्तुविकाराणामुत्पन्नानां च शान्तये ॥ ३४ ॥

स०—प्रज्ञाया अपराधा असाध्वाचरणानि तेषां त्यागः। तथेंद्रियाणां चक्षुरादीनामुपशमो रूपादिविषयेऽतिप्रवृत्तानां संशमनमशुभरूपे वा विषये प्रवृत्तानां संयमनमलोलुपतेत्यर्थः। तथा स्मृतिरतीतार्थानुस्मरणम्। तथा देशेत्यादि। देशादीनां विज्ञानम्। देशो जांगलादिः। कालः शीतादिः। आत्मा च वातप्रकृत्यादिः। एषां विज्ञानमवबोधः तथा च सतां वृत्तं चरितं सद्वृत्तं तस्यानुवर्तनमनुष्ठानम्। निजानामागंतूनां च विकाराणामनुत्पत्त्यै रोगाणामनुत्पादनाय समासेन संक्षेपेण विधिरेष त्यागः प्रज्ञापराधानामित्यादि सद्वृत्तस्यानुवर्तनमित्येवं प्रदर्शितः सम्यगुक्तः। उत्पन्नानामित्यादि। चः समुच्चये। न केवलं निजागन्तूनां रोगाणामनुत्पत्त्यै विधिरेष प्रोक्तः। यावदुत्पन्नानां जातानां च शांतये विधिः प्रोक्तः ॥ ३२-३४ ॥

आगन्तु रोगों का प्रतिकार—

वि०—रोगों की चिकित्सा—प्रज्ञापराध का परित्याग, इन्द्रियों की शान्ति; स्मृति; देश-काल और आत्मा का ज्ञान; सद्वृत्त का पालन; अथर्ववेद में कहा शान्ति, प्रतिकूल ग्रह का पूजन; भूतादि स्पर्श से वचने की पृथक्-पृथक् कही विधि, निज एवं आगन्तुक रोगों को न उत्पन्न होने देने के लिये तथा उत्पन्न रोगों की शान्ति के लिये यह विधि संक्षेप में कही गई है ॥ ३२-३४ ॥

वक्तव्य—प्रज्ञापराध—प्रज्ञा = बुद्धि, उसका दोष; यथा—'धीधृतिस्मृतिविभ्रष्टः कर्म यत् कुरुतेऽशुभम्। प्रज्ञाऽपराधं तं विद्यात् सर्वदोषप्रकोपणम्' ॥ इन्द्रियों की शान्ति—अतियोग, मिथ्यायोग और अयोग से बचना, यथा—'नेन्द्रियाण्यतिपीडयेत्; न चैतानतिलालयेत्।' स्मृति—याददाश्त—'स्मर्त्तव्यं हि स्मृतौ स्थितम्'—अर्थात् ऐसा करने से पहले मुझे ऐसा हुआ था अब वैसा न करूं। देश—जांगलादि। आत्मविज्ञान—अपनी प्रकृति का ज्ञान। सद्वृत्त—सज्जनों का आचरण।

अथ मलानां शोधनकालानाह—

शीतोद्भवं दोषचयं वसन्ते
विशोधयन् ग्रीष्मजमभ्रकाले।
घनात्यये वार्षिकमाशु सम्यक्
प्राप्नोति रोगानृतुजान्न जातु ॥ ३५ ॥

स०—शीतशब्देन हेमन्तशिशिराख्यावृतू द्वावपि गृह्येते। तत्रोद्भवो जन्म यस्य दोषचयस्यासौ शीतोद्भवो दोषचयः। तं वसन्ते विशोधयन्निर्हरन् ग्रीष्मजमभ्रकाले वर्षाकाले दोषचयं विशोधयंस्तथा वार्षिकं घनात्यये शरदि चाशु यथोक्तं कालमनुल्लंघयन् सम्यग्यथावत्त्रिविधमपि दोषचयं विशोधयन्नृतुजान् रोगान् न जातु कदाचित्प्राप्नोत्यासादयति। वसन्ते विशोधयन्नित्यत्र वसन्तप्रारंभ एव चैत्रे मासि विशोधयन्निति बोध्यम्। प्रत्यवायभयात्। तथाहि। ऋतुद्वयसंचितस्य दोषचयस्य विशोधनमक्रियमाणं रोगानीकं कुर्यात्। घनात्यये वार्षिकमित्यत्रात्यंतघनविनाशे शरत्पश्चिमे भागे विशोधयेदिति बोध्यम्। वार्षिको हि दोषचय एकर्तुज एव। तस्माद्विश्रब्धं कृत्वा साधारणे कार्तिके मासि स विशोधयितुं युक्तः। अपि चोग्रहेमन्तशिशिरकालजो दोषचयो वसन्ते शोधयितव्यः। तस्मादाश्वयुजे मासि वार्षिको दोषचयो यदि विशोध्येत तदानीमतितरां बहुरग्रे दोषचयः स्यात्कालस्य बहुत्वात्। ग्रीष्मजमभ्रकाल इत्यत्र कालग्रहणेन वर्षाप्रारंभमात्र एवेति बोध्यम्। तथा च शास्त्रकारो वक्ष्यति। श्रावणे कार्तिके चैत्रे मासि साधारणे क्रमात्। ग्रीष्मवर्षाहिमचितान्वाय्वादीनाशु निर्हरेत् ॥ ३५ ॥

रोगों से बचने का उपाय—

वि०—मलों का शोधनकाल—शीतकाल में उत्पन्न दोषसमूह का वसन्त में शोधन करे; ग्रीष्म ऋतु में उत्पन्न दोषसमूह का वर्षा काल में शोधन करे। वर्षा में उत्पन्न दोषसमूह का शरद् ऋतु में भली प्रकार शोधन करे। इस प्रकार करने से ऋतुजन्य रोग कभी भी नहीं होते ॥ ३५ ॥

वक्तव्य—अरुणदत्त टीकाकार की मान्यता है कि वसन्त में शोधन चैत्र मास में और शरद् ऋतु में शोधन शरद् ऋतु के पिछले भाग में करना चाहिये। क्योंकि शीत ऋतु में दोषसंचय हेमन्त और शिशिर दो ऋतुओं का है, और वर्षा में एक ही ऋतु का है। इसलिये विश्वास के साथ कार्तिक मास में शोधन करे। परन्तु इसमें इतनी ही आपत्ति है कि जो दोषसमूह पहले मास में विकार नहीं कर सका, वह दूसरे में क्या करेगा और फिर उसके पीछे तो हेमन्त में पित्त की शान्ति ही है। परन्तु आगे जो पाठ दिया है यथा—'श्रावणे कार्त्तिके चैत्रे मासि साधारणे क्रमात्। ग्रीष्मवर्षाहिमचिता-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न्वाय्वादीनाशु निर्हरेत्' ॥ इस पाठ से अरुणदत्त का अर्थ मिलता है।

नित्यं हिताहारविहारसेवी
समीक्ष्यकारी विषयेष्वसक्तः।
दाता समः सत्यपरः क्षमावा-
नाप्तोपसेवी च भवत्यरोगः ॥ ३६ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने रोगानुत्पादनीयो नाम चतुर्थोऽध्यायः ॥ ४ ॥

स०—नित्यं सदैव हिताहारविहारौ सेवते तच्छीलो यः स एवंभूतो नरः। तथा समीक्ष्यकारी विमृश्यविधायी। इदं कृत्वेदं सम्पद्यते इदं च कृत्वैतत्संपद्यते एवं बुद्ध्वा शुभं करोत्यशुभं वर्जयति। तथा विषयेषु शब्दादिष्वसक्तोऽलोलुपः। तथा दाता त्यागी त्यागवान्। तथा समः सर्वेषु भूतेषु समचित्तः। तया सत्यपरोऽवितथवाक्। तथा क्षमावान्। यः शक्तोऽपि कृतापराधं दंडेनानुरूपेण नी योजयति। तथाऽऽप्तानुपसेवते तच्छीलो यः स आप्तोपसेव चारोगो भवति। न केवलं प्राक्तनविध्यनुष्ठानेनारोगः संपद्यते यावदाप्तोपसेवी चेति चशब्दार्थः। येषां त्रिकालममलं ज्ञानमव्याहतं सदा। आप्ताः शिष्टाश्च विबुधास्तेषां वाक्यमसंशयमित्याप्तलक्षणमिति। उपजातिवृत्तम् ॥ ३६ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां चतुर्थोऽध्यायः ॥ ४ ॥

वि०—सारांश—सदैव हित आहार, हितविहार का सेवन करने वाला; सोच विचार कर कर्तव्य करने वाला; विषयों में न फंसा; दान करने वाला, सब प्राणियों में तथा सब अवस्थाओं में समबुद्धि; सत्य निष्ठा वाला; क्षमाशील तथा आप्त पुरुषों का सेवन करने वाला मनुष्य निरोगी होता है ॥ ३६ ॥

वक्तव्य—आप्त-'येषां त्रिकालममलं ज्ञानमव्याहतं सदा। आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयम् ॥' संग्रह में इतना अधिक है—

अर्थेष्वलभ्येष्वकृतप्रयत्नं कृतादरं नित्यमुपायवत्सु।
जितेन्द्रियं नानुतपन्ति रोगास्तत्कालयुक्तं यदि नास्ति दैवम् ॥
कालोऽनुकूलो विषया मनोज्ञा धर्म्या क्रिया कर्म सुखानुबन्धि।
सत्त्वं विधेयं विशदा च बुद्धिर्भवन्ति धीरस्य सदा सुखाय ॥

इस प्रकार विद्योतिनी टीका में रोगानुत्पादनीय नामक चौथा अध्याय समाप्त हुआ।

पञ्चमोऽध्यायः

अथ द्रवद्रव्यविज्ञानीयस्तस्यायं संबंधः। नित्यं हिताहारविहारसेवीत्युक्तम्। तौ चाहारविहारौ दिनचर्यर्तुचर्ययोर्यद्यपि नियमितौ तथापि न भवत्यलं हिताहितस्वरूपविज्ञानम्। एवं हि तत्रावादीत्। गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत्। तथा। व्यक्ताम्ललवणस्नेहं संशुष्कं क्षौद्रवल्लघुः। तथाऽनंतरातीतेऽप्यध्याये जगाद। अन्नपानं च विड्भेदीति। तदियता वाक्येन न तज्ज्ञायते किं पुनस्तद्गुरु शीतं किं लघु किं स्निग्धोष्णं किं शकृद्भेदनमिति। तस्मादाहारद्रव्यस्वरूपमतः परं प्रतन्यते। तत्रापि पंचवर्गस्वभावत्वेनाल्पवक्तव्यत्वात्प्राग्द्रवद्रव्यविज्ञानीयस्वरूपं निर्देष्टुं युक्तमन्नस्य द्रवस्वभावत्वेन भूयस्त्वादित्याह—

अथातो द्रवद्रव्यविज्ञानीयमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—अपामेवायं स्वाभाविको गुणो यत् द्रवत्वम्। अतो यानि कानिचिद् द्रवरूपाणि द्रव्याणि तानि सर्वाण्यम्मयान्येव क्षीरदध्यादीनि तदर्थं द्रवद्रव्यशब्दः सामान्येन सर्वद्रवव्यक्तिपरिग्रहार्थः शास्त्रकृता प्रयुक्तः। द्रवाणि च तानि द्रव्याणि च द्रवद्रव्याणि तेषां विज्ञानमवबोधस्तस्मै हितो द्रवद्रव्यविज्ञानीयोऽध्यायस्तं व्याख्यास्यामः प्रथयिष्यामः।

वि०—अब इसके आगे द्रवद्रव्यविज्ञानीय अध्याय का व्याख्यान करेंगे-जैसा कि आत्रेय आदि महर्षियों ने कहा था।

अथ तोयवर्गः।

प्राधान्याच्च पानीयस्य प्रागुपदेशः। तथा चाष्टांगसंग्रहेऽन्नपानप्रकरणेऽध्यगीष्ट। अन्नपाने तु सलिलमेव श्रेष्ठम्। सर्वरसयोनित्वात्सर्वभूतसात्म्याज्जीवनादिगुणयोगाच्च। तथात्रैवाध्यैष्ट। पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयमित्यादि। तथा चात्रैवाध्यसंग्रहेऽपि तदेव प्रागुपनीतं श्रेष्ठमुदकमासां श्वासतस्तंभनक्लेदनानामिति बहुगुणत्वाच्चांतरिक्षस्थजलस्य प्रागुपन्यासो युक्त इत्याह—

जीवनं तर्पणं हृद्यं ह्लादि बुद्धिप्रबोधनम्।
तन्वव्यक्तरसं मृष्टं शीतं लघ्वमृतोपमम् ॥ १ ॥
गङ्गाम्बु नभसो भ्रष्टं स्पृष्टं त्वर्केन्दुमारुतैः।
हिताहितत्वे तद्भूयो देशकालावपेक्षते ॥ २ ॥

स०—जीवनमोजोविवृद्धिकरणम् सौम्यधातुवर्धनमित्यन्ये। तर्पणं क्लमहृत्। हृद्यं हृदयाय हितं न तु हृदयस्य प्रियं हृद्यमिति व्याख्येयम्। एवं हि व्याख्यायमानेऽम्लेहृद्यानामित्यग्र्याणां मध्ये तत्पाठं मुनिर्नैवाकरिष्यत्। यस्मात्किंचिद् द्रव्यं कस्यचित्प्रियं भवति न सर्वं सर्वस्य। तस्मात् हृदयाय हितं हृद्यमिति बोध्यम्। तथा ह्लादि आह्लादकरम्। तथा बुद्धेः प्रबोधनम्। यावन्मात्रा यस्य शेमुषी सा तस्य स्फुटप्रतिभासा तद्योगाद्भवतीत्यर्थः। तनु स्वच्छम्। अव्यक्त-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रसमनभिव्यक्तषड्रसमित्यर्थः। मृष्टमित्यास्वादसुखम्। संति हि भूरिरसशर्कराक्काथचूर्णवटकादीन्यव्यक्तरसानि न तु कात्स्न्येंन तानींदियप्रसादप्रीतिकराणि। तथा। अनुरसबाहुल्यात्पृथगपि द्रव्याण्यभयामलकादीन्यव्यक्तरसानि न तु पुनस्तानि तथा मनः प्रीणयंति। पानीयस्य चाव्यक्तरसस्याप्याश्रयवशात्कषायत्वस्वादुत्वादि भवत्येव। तथा चाष्टांगसंग्रहेऽपठत्। श्वेते कषायं तत्स्वादु कृष्णे तिक्तं च पांडुर इत्यादि। मृष्टं शुद्धमिति न व्याख्येयम्। तथा च मुनिः। शीतं शुचि शिवं मृष्टं विमलं लघु षड्गुणम्। प्रकृत्या दिव्यमुदकमिति। अत्र हि मृष्टविमलयोर्द्वयोरुपादाने पौनरुक्त्यं स्यात्। तस्मान्मृष्टशब्दोऽत्र मनःप्रीणनार्थः। तथा शीतं वीर्येण स्पर्शेन च। तथा लघु गुणयुक्तम्। तथा। अमृतोपमम्। यथा किलामृतं त्रिदोषघ्नत्वधातुसाम्यकृत्वविषार्तिजित्वादिगुणैरशेषैर्युक्तं तथैतज्जलमपीत्यर्थः। तथा चोक्तं संग्रहे। सूर्योद्वृत्तप्रयुक्तत्वाल्लघु वातकफापहम्। शैत्यजीवनसौम्यत्वैः पित्तरक्तविषार्दिजिदिति। तथा नभसो भ्रष्टमंतरिक्षात्पतितमात्रं वस्त्रातिगृहीतं गांगं जलमीदृग्गुणं भवति। तु पुनरर्थे। रविचन्द्रानिलैः स्पृष्टं संबंद्धं सत्पुनः पथ्यापथ्यत्वे देशकालावपेक्षते। देशो विषयः, पात्रमाश्रय इति पर्यायाः। तत्र किमनूपदेशे जांगले वा तत्पतितं तथा किमसितश्वेताद्यन्यतमे वेति देशानुवर्तनम्। तथा शीते किं वोष्णेऽथवा वर्षाख्ये पतितमिति कालानुवर्तनम्। रविचंद्रानिलैरिति समस्तनिर्देशो यदा समस्तैरेतैः स्पृष्टं न तु व्यस्तैस्तदा हिताहितत्वे देशाद्यपेक्षत इति द्योतयति। सद्योवस्त्रादिगृहीतस्य जलस्य तु न सर्वैरेतैर्योगः सभवतीति तत्प्रायेण हितमेव ॥ १-२ ॥

गाङ्गोदक के गुण—

वि०—गाङ्ग जल—जीवन (ओजोवर्धक), तृप्तिकारक, हृदय के लिये उपयोगी, आह्लादकारक, बुद्धि को विकसित करने वाला, स्वच्छ, अव्यक्तरस, मृष्ट (स्वादु), शीतल, लघु और अमृत के समान है। आकाश से गिरने पर यही जल जब सूर्य, चन्द्र और वायु के संसर्ग में आ जाता है, तब पथ्य एवं अपथ्य के विचार में देश और काल की अपेक्षा करता है[1] ॥ १-२ ॥

वक्तव्य—आहार दो प्रकार का है, द्रव और अद्रव (ठोस)। इनमें द्रववर्ग पाँच प्रकार का है, यथा—'तोयक्षीरेक्षुतैलानां वर्गैर्मद्यस्य च क्रमात्'। इनमें भी जल का अधिक उपयोग है, यथा—'अनुपाने तु सलिलमेव श्रेष्ठम्, सर्वरसयोनित्वात्, सर्वभूतसात्म्यात्, जीवनादिगुणयोगाच्च'। इसी प्रकार 'पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम् ॥' 'श्रेष्ठमुदकमाश्वासनस्तम्भनक्लेदनानाम् ॥'

यह जल दो प्रकार का है, दिव्य और भौम। इनमें दिव्य जल चार प्रकार का है—धार, कार, हैम और तौषार। इनमें धार दो प्रकार का है—गाङ्ग अर्थात् गङ्गासम्बन्धी और दूसरा सामुद्र—समुद्रसम्बन्धी। इनमें पहले गङ्गा जल के गुण कहे हैं। पीछे भौम जल के गुण हैं। भूमिजल के गुणों में देश एवं काल का प्रश्न रहता है, यथा—श्वेते कषायं, तत्स्वादु कृष्णे, तिक्तं च पाण्डुरे।' देश शब्द से पात्र का भी ग्रहण हो जाता है। काल की अपेक्षा, यथा—'तत्र वर्षासु आन्तरिक्षमौद्भिदं वा सेवेत, महागुणत्वात्। शरदि सर्वप्रसन्नत्वात्। हेमन्ते सारसं ताडागं वा। वसन्ते कौपं प्रास्रवणं वा। ग्रीष्मेऽप्येवम् प्रावृषि चौण्डयमनभिवृष्टं सर्वं चेति ॥' देह की अपेक्षा भी किसी को हित और किसी को अहित तथा प्रायः दिन में हितकारी, रात्रि में अहितकारी; भोजन के मध्य में हितकारी, भोजन के आदि और अन्त में हितकारी हैं।

नन्वाकाशात्पततस्तल्लक्षणमंतरेण गांगमिदमिति न ज्ञायत इत्याह—

येनाभिवृष्टममलं शाल्यन्नं राजते स्थितम्।
अक्लिन्नमविवर्णं च तत्पेयं गाङ्गम्—

स०—येनांबुनाऽभिवृष्टमाभिमुख्यतः सिक्तं शाल्यन्नं राजतस्थितमक्लिन्नमक्लेदयुतमविवर्णं च भवति तद्गांगं जलं पेयमित्युपलक्षणार्थम्। स्नानावगाहयोरपि तत्पथ्यमेव। रजतस्य रूप्यस्य विकारो राजतम्। प्राणिरजतादिभ्योऽञ्।

गाङ्गोदक का लक्षण—

वि०—गाङ्ग जल की परीक्षा—बरसात के जिस बरसे जल से चाँदी के पात्र में रखा निर्मल शालि अन्न (भात,), क्लेद रहित और विवर्णता रहित होता है, यह गाङ्ग जल है और पेय है।

वक्तव्य—यह परीक्षा मुहूर्त्त मात्र ही करनी चाहिये यथा—'शाल्योदनपिण्डमकुथितमविदग्धं रजतभाजनोपहितं वर्षति देवे बहिः कुर्वीत। स यदि मुहूर्त्तं स्थितस्तादृश एव भवति, तदा गाङ्गं पततीति अवगन्तव्यम् ॥' (सु.सू.अ. ४५७)

---

१. जैसा कि 'मार्गस्वभावतः' की टिप्पणी (पृ० २७) में निर्दिष्ट है—सूर्य की ऊष्मा से पृथ्वी का जलीयांश वाष्परूप में उड़कर वायुमंडल में व्याप्त हो जाता है। जब वायुमण्डल वाष्प से संतृप्त हो जाता है और शीत के सम्पर्क से वाष्प संगठित होकर जलकण या बिन्दु रूप में परिणत होकर गुरुता को प्राप्त होता है तब वह वर्षा रूप में पृथ्वी पर गिरता है। वाष्परूप में ऊपर उठने से जल में घुले अन्य सेन्द्रिय या निरिन्द्रिय पदार्थ नीचे ही रह जाते हैं और जब वह वाष्प पुनः जलरूप में नीचे आता है तो अतिस्वच्छ रहता है। किन्तु नीचे गिरते समय यदि मार्ग में वायुमण्डल में धूल आदि निरिन्द्रिय या जीवाणु आदि सेन्द्रिय पदार्थों के सम्पर्क में आता है तब वह पुनः दूषित हो जाता है। ध्यान रहे कि गर्मी के दिनों में वायुमण्डल में धूल आदि अधिक रहते हैं अतएव वर्षा ऋतु के आरम्भ में जल में इनके मिलने की अधिक सम्भावना रहती है। इसी से कहा है 'आर्तवं प्रथमं च यत्।' पृथ्वी पर गिरने पर पुनः जैसी भूमि में जल गिरता या रहता है वहाँ के खनिजलवण तथा अन्य सेन्द्रिय या निरिन्द्रिय द्रव्य उसमें घुल या मिल जाते हैं। इसी से उसके गुणों में विभिन्नता तथा सदोषता भी आती है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यथा ॥ ३ ॥

सामुद्रं, तन्न पातव्यं मासादाश्वयुजाद्विना ।

स०—अन्यथा सामुद्रमिति । एतल्लक्षणविपर्ययेण येनांऽबुना सिक्तं शाल्यन्नं विवर्णं मलिनं क्लिन्नं भवेत्तत्सामुद्रम् । तच्च न पातव्यम् । अत्रापि पाननिषेध उपलक्षणार्थः । स्नानावगाहावपि ह्यनेन न कार्यौ । समुद्रस्य क्षारान्वयत्वात्क्लेदनादियोगः । ननु सामुद्रमित्युक्तम् । यतः समुद्रशब्दस्य धूमादिपाठाद्धूमादिभ्यश्चेति वुञा भवितव्यमिति केचित् । नैवम् । धूमादिभ्यश्चेत्यत्रैव गणे पठ्यते समुद्रान्नावि मनुष्ये च वुञ् । सामुद्रिकी नौः सामुद्रिको मनुष्यः । अन्यत्र त्वणेव । सामुद्रं जलमिति । तस्मान्न्याय्यमेवैतत् । एवं सामुद्रो मणिरित्यादयो वेद्याः । अथ किं सदैव तन्न पातव्यं नेत्याह मासादित्यादि । आश्वयुजमंतरेणैतन्न पातव्यम् । आश्वयुजे तु मासि कालस्वाभाव्यात्तत्पथ्यमेवेति भावः । सुश्रुतस्त्वधीते—गांगमाश्वयुजे मासि प्रायो वर्षति तोयदः । तदुपाददीतेत्यादि ॥ ३ ॥

सामुद्र जल का लक्षण—

वि०—अन्यथा वह सामुद्र पानी है, इस पानी को आश्विन मास के विना नहीं पीना चाहिये ॥ ३ ॥

वक्तव्य—सुश्रुत में कहा भी है—'सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गवद् भवति' ॥

ऐन्द्रमम्बु सुपात्रस्थमविपन्नं सदा पिबेत् ॥ ४ ॥
तदभावे च भूयिष्ठमान्तरिक्षानुकारि यत् ।
शुचिपृथ्वसितश्वेते देशेऽर्कपवनाहतम् ॥ ५ ॥

स०—ऐंद्रमांतरिक्षं जलं गांगं सुपात्रस्थं शोभने भाजने राजतादौ स्थितमविपन्नमदूषितमनिष्टं पिबेत् । न मलिनाशुचि जुगुप्सितपात्रस्थम् । तदभावे तस्यैंद्रस्याभावे भूयिष्ठं बाहुल्येनांतरिक्षमैंद्रं जलं यदनुकरोति स्वच्छादिगुणैः सदृशं तत्पिबेत् । तदेवाह । शुचीश्चासौ पृथ्वसितश्वेतश्च तस्मिन् देशे यज्जलं स्थितम् । तथा अर्कपवनाभ्यामाहतमासमंतात् क्रांतमीदृशमांतरिक्षानुकारि स्यादिति भावः ॥ ४-५ ॥

गाङ्गोदक के अभाव में पेय जल—

वि०—अन्तरिक्ष का जो जल अच्छे पात्र में रखा हो, और जो दूषित न हुआ हो, उस जल को सदा पिये। आन्तरिक्ष जल के अभाव में-जो जल गुणों में अधिकतः आन्तरिक्ष जल के समान हो; पवित्र, विस्तीर्ण, काली या श्वेत पृथ्वी वाले स्थान का हो तथा जिस स्थान पर सूर्यरश्मि और वायु पूर्ण रूप से पहुँचती हो, उस जल को सब ऋतुओं में पिये ॥ ४-५ ॥

वक्तव्य—संग्रह में—'खातधौतशिलापृष्ठवस्त्रादिभ्यः स्रुतं जलम् । हेममृन्मयपात्रस्थमविषं तत् सदा पिबेत् ॥'

इदानीं तादृशं जलं न पेयं तद्दर्शयति—

न पिबेत्पङ्कशैवालतृणपर्णाविलास्तृतम् ।
सूर्येन्दुपवनादृष्टमभिवृष्टं घनं गुरु ॥ ६ ॥

अधुना आंतरिक्षं यन्न पेयं तदाह—

फेनिलं जन्तुमत्तप्तं दन्तग्राह्यतिशैत्यतः ।
अनार्तवं च यद्दिव्यमार्तवं प्रथमं च यत् ॥ ७ ॥
लूतादितन्तुविण्मूत्रविषसंश्लेषदूषितम् ।

स०—पङ्कः कर्दमः । शैवालः शैवालम् । तृणं खटः । पर्णं पत्रम् । आविलं चास्तृतं चाविलास्तृतं पंकादिभिराविलास्तृतं पंकाद्याविलास्तृतम् । यथासंभवमत्र सम्बन्धः । तेन पंकेनाविलं कलुषं शैवालादिभिरास्तृतं संछादितमिति बोध्यम् । तथा सूर्येन्दुपवनैरदृष्टमनासेवितं न पिबेत् । तथा । अभिवृष्टं तत्कालपतितान्यवर्षमिश्रीभूतं कालांतराविश्रांतम् । खरनादे चैवमुक्तम् । वार्षिकं तदहर्वृष्टं भूमिस्थमहितं जलम् । व्युष्टं त्रिरात्रं तच्चैव प्रसन्नममृतोपममिति । तथा घनमस्वच्छम् । तथा गुरु । तथा फेनिलं फेनवत् । तथा जन्तुमत्कीटयुक्तम् । तथा तप्तमुष्णम् । तथा अतिशैत्यतोऽतिजाड्याद्दन्तग्राहि दन्तान् गृह्णाति कार्याक्षमान् करोति तच्छीलं न पिबेदिति प्रतिपदं योज्यम् । इत्ययं प्रायो भूमिष्ठतोयस्य निषेधः । यद्दिव्यं जलमार्तवं न भवति तच्च न पिबेत् । ननु सर्वमेव दिव्यं जलमार्तवम् । कालस्य ऋतुरूपत्वात् । ऋतौ च भवमार्तवम् । एवं च न किंचिदनार्तवं सम्भवति । उच्यते । अनार्तवं न पिबेत् । अर्थादार्तवं पिबेदित्युक्तं भवति तदत्र सामान्योक्तावपि विशिष्टो दिव्यस्य ऋतुर्बोध्यो वर्षाख्यो यस्मिन् काले दिव्यं जलं पेयत्वेनाभ्यनुज्ञायते । यथा वर्षासु दिव्यनादेयेत्यादि । अन्यर्तुभवं त्वनार्तवत्वान्न पेयम् । अत्र च वर्षारूप ऋतुश्चातुर्मासिकोऽभिप्रेतः । अत एवाश्वयुजे मासि दिव्यं जलं पेयत्वेनानुजज्ञे । अन्यथा ह्यनार्तवत्वात्तदपेयमेव स्यात् । आर्तवं प्रथमं च यत् । न केवलमनार्तवं न पिबेत् । यावदार्तवमपि प्रथमं न पिबेत् । कुतो हेतोरित्याह—लूतादीत्यादि । लूता आदिर्येषां ते लूतादयः क्षुद्रजंतवः प्राणिविशेषास्तेषां तन्तुविण्मूत्रविषाणि तन्तुः सूत्राकारविशेषो लालेत्यन्ये । तेषां लूतादितन्तुविण्मूत्रविषाणां संश्लेषः संपर्कस्तेन दूषितं यतस्ततस्तदार्तवमपि न पेयम् । केचित्त्वेवं व्याख्यानयन्ति । आर्तवं प्रथमं च यत्तन्न पेयं लूतादिजंत्वादि च न पेयमिति । संग्रहे चाध्यगीष्ट । घनवस्त्रपरिस्रावैः क्षुद्रजंत्वभिरक्षणम् । व्यापन्नस्यास्य तपनमग्न्यर्कायसपिंडकैः ॥ पर्णीमूलबिसग्रन्थिमुक्ताकतकशैवलैः । वस्त्रगोमेदकाभ्यां वा कारयेत्तत्प्रसादनम् ॥ पाटलाकरवीरादिकुसुमैर्गंधनाशनमिति ॥ ६-७ ॥

अपेय जल—

वि०—अपेय जल—कीचड़, सेवाल, तिनके, पत्ते, इनसे मलिन या आच्छादित, सूर्य, चन्द्रमा और वायु की पहुँच से रहित, नूतन बरसा हुआ, घन (घट्ट या मलिन), भारी, झागदार, कीड़ों वाला, धूप से गरम, बहुत ठण्डा होने से दाँतों को जड़ बना देने वाला तथा ऋतु के बिना बरसा हुआ एवं ऋतु में भी जो पहले पहल बरसा हो, मकड़ी आदि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथा वस्त्र आदि के तन्तु, मल, मूत्र, विष संपर्क से जो जल दूषित हुआ हो, वह जल पीने के अयोग्य है ॥ ६-७ ॥

वक्तव्य—'वार्षिकं तदहर्वृष्टं भूमिष्ठमहितं जलम् । व्युष्टं द्विरात्रं तच्चैव प्रसन्नममृतोपमम् ॥' इसलिये दूसरे दिन बरसात का जल पीना चाहिये । पानी के दोष को अगस्त्य नक्षत्र प्रायः दूर करता है । इसी से ज्योतिःशास्त्र में–'सलिलममरपाङ्ग्योज्झितं यद् घनपरिवेष्टितमूर्तिभिर्भुजङ्गैः । फणजनितविषाग्निसम्प्रदुष्टं भवति, शिवं तदगस्त्यदर्शनेन ॥' (बृ. सं. अ. १२।१२) इसीलिये हंसोदक पानी में कहा है कि 'अगस्त्येनाविषीकृतम्' (च. सू. अ. ६।४६) । तन्तु का अर्थ–कपड़े के या वृक्ष के तन्तु के सिवाय मकड़ी के तन्तु, विन्मूत्र आदि भी टीकाकारों ने दिया है ।

इदानीं नदीर्निरूपयन्नाह—

पश्चिमोदधिगाः शीघ्रवहा याश्चामलोदकाः ॥ ८ ॥
पथ्याः समासात्ता नद्यो विपरीतास्त्वतोऽन्यथा ।

स०—नद्यः समासात्संक्षेपतः पथ्या हिताः । का इत्याह । या पश्चिमंमुदधिं समुद्रं गच्छंतीति पश्चिमोदधिगाः । अन्यत्रापि दृश्यत इति डः । तथा शीघ्रवहा वेगवत्यः । तथाऽमलोदका निर्मलसलिलाः । एवं त्रिविशेषण विशिष्टाः पथ्याः । अतोऽन्यथा पुनरन्यथा विपरीतलक्षणास्ता विपरीता अपथ्याः ॥ ८ ॥

नदियों का पथ्यापथ्य जल—

वि०—नदी-जल—नदियाँ जो पश्चिम समुद्र में गिरती हैं, तेज बहती हैं और जिनका पानी निर्मल है; इन तीन गुणों वाली नदियाँ सामान्य रूप से पथ्य हैं, और इन गुणों से विपरीत-गुणों वाली नदियाँ अपथ्य हैं ॥ ८ ॥

वक्तव्य—बरसात के पानी के अभाव में पेय पानी आठ स्थानों से मिलता है; यथा 'कौपसारसताडागचौण्ड्यप्रास्रवणौद्भिदम् । वापीनदीतोयमिति तत्पुनः स्मृतमष्टधा ॥' नदी के जल में उपर्युक्त तीनों गुण होने पर ही वह पथ्य होता है ।

उपलास्फालनाक्षेपविच्छेदैः खेदितोदकाः ॥ ९ ॥
हिमवन्मलयोद्भूताः पथ्यास्ता एव च स्थिराः ।
कृमिश्लीपदहृत्कण्ठशिरोरोगान् प्रकुर्वते ॥१०॥

स०—हिमवांश्च मलयश्च हिमवन्मलयौ ताभ्यामुद्भूताः । संजाताः पथ्याः किं सर्वा एव नेत्याह । उपलेत्यादि । उपला नामास्फालनमुपलास्फालनं तेनाक्षेपः क्षोभस्तेन विच्छेदा विश्लेषा उपलास्फालनाक्षेपविच्छेदास्तैः खेदितं जातक्षोभमुदकं यासां ताः खेदितोदका या हिमवन्मलयोद्भूतास्ता एव पथ्याः । यास्त्वेवंभूता न भवन्ति ता अपथ्याः । स्थिरा इति । ता एवाऽवहन्त्यः सत्यः कृम्यादीन् कुर्वते । हृच्च कण्ठश्च शिरश्च तेषां रोगाः कृमयश्च श्लीपदं च हृत्कण्ठशिरोरोगाश्चेति द्वन्द्वः । मुनिरपि हिमवत्प्रभवानां पथ्यत्वमाह । कृष्णात्रेयसुश्रुतौ त्वपथ्यत्वमाहतुः । अत एवायं ग्रन्थकारो युक्त्या मतद्वयमपि संगिरमाणो विशेषणमुपन्यस्तवानुपलास्फालनाक्षेपविच्छेदैः खेदितोदका इति । तेन या एवंविधा भवन्ति ता न पथ्या इति ॥ ९-१० ॥

वि०—हिमालय और मलयाचल से उत्पन्न होने वाली जिन नदियों का पानी पत्थरों से टकराने के कारण विक्षोभित होकर जाता है, ऐसे पानी वाली नदियाँ पथ्य हैं; और इन्हीं नदियों का पानी जब स्थिर बन जाये, तब वह कृमि, श्लीपद, हृदयरोग, कण्ठरोग और शिरोरोगों को उत्पन्न करता है ॥ ९-१० ॥

वक्तव्य—पत्थरों से टकराने के कारण पानी लघु हो जाता हैं । यही नदियाँ जब स्थिर रहती हैं—तब रोगोत्पादक हैं । चरक में हिमालय से उत्पन्न नदियों को जो पथ्य कहा है, उसका कारण पानी का पत्थरों से टकराना है; और सुश्रुत ने जो इन नदियों को रोगोत्पादक कहा है, वह इन नदियों के पानी को स्थिर मान कर कहा है ।

प्राच्यावन्त्यपरान्तोत्था दुर्नामानि, महेन्द्रजाः ।
उदरश्लीपदातङ्कान्, सह्यविन्ध्योद्भवाः पुनः ॥ ११ ॥
कुष्ठपाण्डुशिरोरोगान्, दोषघ्न्यः पारियात्रजाः ।
बलपौरुषकारिण्यः, सागराम्भस्त्रिदोषकृत् ॥ १२ ॥

स०—प्राच्यादिजा नद्यो दुर्नामान्यर्शांसि कुर्वते । प्राच्या गौडाः । आवन्तयो मालवाः । अपरान्ताः कौंकणाः । महेंद्रजा नद्य उदरादीन् कुर्वते । सह्यविंध्यपर्वतोत्थाश्च पुनः कुष्ठादीन् कुर्वते । पारियात्रे जाता दोषघ्न्यो भवन्ति ॥ ११-१२ ॥

वि०—पूर्व अवन्ती तथा पश्चिम देश से उत्पन्न होने वाली नदियाँ अर्श रोग को उत्पन्न करती हैं । महेन्द्र पर्वत से उत्पन्न होने वाली नदियाँ उदर रोग और श्लीपद रोग को उत्पन्न करती हैं । सह्याद्रि और विन्ध्याचल से उत्पन्न नदियाँ कुष्ठरोग, पाण्डुरोग और शिरोरोग को उत्पन्न करती हैं । पारियात्र पर्वत से उत्पन्न नदियां दोषनाशक, बल एवं पौरुष देनेवाली हैं । समुद्र का जल त्रिदोषकारक है ॥ ११-१२ ॥

वक्तव्य—प्राच्य का अर्थ गौड़, अवन्ती–उज्जैन, चरक में पारियात्र पर्वत से उत्पन्न नदियों को अपथ्य कहा है; उसमें हेमाद्रि की मान्यता है कि 'दरीजा' (पर्वत की गुहा में से उत्पन्न) नदियां अपथ्य हैं; तडागजन्य पथ्य हैं । इसमें प्रमाण उन्होंने दिया है कि 'तडागजं दरीजं च तडागाख्यसरिज्जलम् । बलारोग्यकरं तत्स्याद्दरीजं दोषलं मतम् ॥' यही कारण चक्रपाणि ने भी सुश्रुत-चरक के विरोध को मिटाने में माना है ।

विद्यात्कूपतडागादीन् जाङ्गलानूपशैलतः ।

स०—आदिशब्देन संग्रहोक्ता गृह्यन्ते । यथा । कौपसारसताडागचौंड्यप्रास्रवणौद्भिदम् । वापीनदीतोयमिति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्पुनः स्मृतमष्टधा। कौपं स्वादु त्रिदोषघ्नं लघु पथ्यं च सर्वदा। क्षारं तु कफवातघ्नं दीपनं पित्तकृत्परम्। कषायबहुलं श्लेष्मपित्तघ्नं वातकृच्च तत्। तृष्णाघ्नं सारसं बल्यं कषायमधुरं लघु। औद्भिदं स्वादु पित्तघ्नं दीपनं गुरु किंचन। सारं च कटु वाप्यंबु पित्तघ्नं कफवातजित्। लध्वल्पदोषं सुस्वादु नववापीष्ववार्षिकम्। अनभिष्यंदि नादेयं कटुकं कफपित्तजित्। विशदं वातलं रूक्षमनवस्थितलाघवम्। सुश्रुते चैषां लक्षणमुक्तम्। तथा। भूम्युत्खातसमुद्भूतमिंद्रनीलसमप्रभम्। विमलं मधुरास्वादं कौपं जलमुदाहृतम्। नद्याः शैलवराद्वापि स्रुतमेकांतसंस्थितम्। कुमुदांभोजसंछन्नं वारि सारसमुच्यते। प्रशस्तभूमिभागस्थे नैकसंवत्सरोषितम्। कषायमधुरास्वादं ताडागं सलिलं स्मृतम्। स्वयंशीर्णशिलाश्वभ्रे नीलोत्पलनिभं जलम्। लतावितानसंछन्नं बुधैश्चौंडेयमुच्यते। शैलसानुसमुद्भूतं स्पृष्टं वातहिमातपैः। लघु शीतामलं स्वादु स्मृतं प्रास्रवणं जलम्। विदार्य भूमिमुद्भूतं महत्या धारया स्रवत्। यज्जलं वेदितव्यं तदौद्भिदं स्वादु शीतलम्। पाषाणैरिष्टकाभिर्वा बद्धा स्याद्या तु कूपवत्। वापी सा खलु विज्ञेया कृतसोपानपंक्तिका। नद्यां शैलप्रसूतायां गोमेदकमणिप्रभम्। प्रशस्तभूमिभागस्थं जलं नादेयमुच्यत इति। पौषादिद्वितयेष्वष्टं विशेषेण क्रमाज्जलम्। सरस्तडागयोः कूपांचड्योः प्रस्रवणौद्भिदोः। कूपेंद्रयोः कूपचुंडयोः सर्वपथ्यं ततः परम्। तदेतान् कूपादीन् जांगलानूपशैलान् समाश्रित्य जातान् विद्यात्। जांगलादिदेशजान् यथायोगं लघून् गुरूंश्च जानीयादित्यर्थः। तत्र जांगलदेशे कूपादीनां सप्तानां बहूदकसम्बन्धाभावाल्लघुत्वं वेद्यम्। आनूपे तु बहूदकसम्बन्धाद्गुरुत्व वेद्यम्। शैले तूदकाल्पतया लघुतरत्वं वेद्यम्। तथा च संग्रहे धन्वानूपमहीध्राणां सामीप्याद्गुरुलाघवमिति।

कूपादि का जल

वि०—कूपादि का जल— कूएँ, तड़ाग आदि के जल का गुण-दोष जाङ्गल, आनूप या पर्वत के अनुसार समझना चाहिये। अर्थात् जांगल, आनूप या पर्वत में जैसा गुण-दोष होगा, वैसा ही वहाँ के पानी में होगा।

वक्तव्य—इसी से संग्रह में कहा है—'धन्वानूपमहीध्राणां सामीप्याद् गुरु लाघवम्। नदीकूपतडागोद्भिद्-वाप्यादिषु विशिष्यते। आनूपे गौरवादम्बु शैले धन्वनि लाघवात्॥' जांगल देश का पानी लघु, आनूप देश का पानी; भारी, पर्वतीय पानी लघु है।

इदानीं केषांचिज्जलपाननिषेधमाह—

नाम्बु पेयमशक्त्या वा स्वल्पमल्पाग्निगुल्मिभिः ॥१३॥
पाण्डूदरातिसारार्शोग्रहणीशोषशोथिभिः।
ऋते शरन्निदाघाभ्यां पिबेत्स्वस्थोऽपि चाल्पशः ॥१४॥

स०—अल्पाऽग्न्यादिभिरंबु न पेयम्। सर्वथैषां जलपाननिषेधप्रत्यवायमाशंकमान इदमाह। अशक्त्या वा पिपासामसहिष्णुभिरत्यल्पं स्वल्पं पेयम्। यावन्मात्रेण प्रत्यवायो न भवति तावदेव पेयमित्यर्थः। अल्पाग्नयश्च गुल्मिनश्चेति द्वन्द्वः। पांड्वादीनां सप्तानां द्वन्द्वः। ततो मत्वर्थीय इनिः। शरन्निदाघाभ्यामन्तरेण स्वस्थोऽप्यल्पशः पिबेत् किं पुनरातुरः। संग्रहे त्वेवमुवाच। काममल्पमशक्तौ तु पेयमौषधसंस्कृतम्। पाषाणरूप्यमृद्धेमजाततापार्कतापितम्। पानीयमुष्णं शीतं वा त्रिदोषघ्नं तृडर्तिजिदिति ॥ १३-१४ ॥

जल पीने के अयोग्य रोगी—

वि०—जिनकी अग्नि मन्द हो; गुल्म रोगी, पाण्डुरोगी, उदर रोगी, अतिसार, अर्श-ग्रहणी-शोष एवं शोथ रोगी को पानी नहीं पीना चाहिये। परन्तु यदि प्यास रोकी ही न जा सके, अतिशय अशक्ति हो, तब थोड़ा पानी पीना चाहिये। शरद् और ग्रीष्म ऋतु को छोड़ कर स्वस्थ मनुष्य को भी थोड़ा-थोड़ा ही पानी पीना चाहिये ॥ १३-१४ ॥

वक्तव्य—संग्रह में कहा है 'काममल्पमशक्तौ तु पेयमौषधसंस्कृतम्। पाषाणरूप्यमृद्धेमजतुतापार्कतापितम्। पानीयमुष्णं शीतं वा त्रिदोषघ्नं तृडर्त्तिजित्॥' पानी को पकाकर पीना उत्तम है। विशेष अवस्थाओं में औषध के साथ षडङ्ग पानीय विधि से पकाना चाहिये, अर्थात् एक तोला औषध लेकर चौसठ तोला पानी में पकाये, जब आधा रह जाय तब पीने को देना चाहिये।

समस्थूलकृशा भुक्तमध्यान्तप्रथमाम्बुपाः।

स०—समाश्च स्थूलाश्च कृशाश्च समस्थूलकृशाः। मध्यं च अंतश्च प्रथमश्च मध्यान्तप्रथमाः। भक्तस्य मध्यान्तप्रथमाः भक्तमध्यान्तप्रथमाः। तेषु कालेषु येऽम्बु पिबन्ति ते भक्तमध्यांतप्रथमांबुपाः, यथाक्रमं समाः स्थूलाः कृशाश्च भवन्तीत्यर्थः। भक्तमध्येऽम्बु पीतं धातुसाम्यं समानतां करोति। भक्तांते तु पीतमामाशये कफवृद्धिं विदधत्स्थौल्यमाधत्ते। भक्तादौ च पीतं निरिंधनमग्निं तेजःप्रतिपक्षतयाऽवश्यमवसादयति। मन्दोऽग्निश्च सम्यगाहारं पक्तुमशक्तो भवति। आहारस्य च सम्यगपाकान्न तथा पुष्टिरिति कृशत्वे युक्तिः। तथा च संग्रहे। भक्तस्यादौ जलं पीतमग्निसादं कृशांगताम्। अन्ते करोति स्थूलत्वमूर्ध्वमामाशयात्कफम्। मध्ये मध्यं गतं साम्यं धातूनां जरणं सुखम्।

भोजन के समय जलपान से गुणावगुण—

वि०—भोजन के मध्य में पानी पीने से शरीर समान रहता है, भोजन के अन्त में पानी पीने से शरीर में स्थूलता आती है, भोजन के प्रारम्भ में पानी पीने से शरीर में कृशता आती है।

वक्तव्य—संग्रह में कहा है-'भुक्तस्यादौ जलं पीतमग्निसादं कृशाङ्गताम्। अन्ते करोति स्थूलत्वमूर्ध्वं चामाशयात्कफम्। मध्ये मध्याङ्गतां साम्य धातूनां जरणं सुखम्॥'

शीतं मदात्ययग्लानिमूर्च्छाच्छर्दिश्रमभ्रमान् ॥ १५ ॥
तृष्णोष्णदाहपित्तास्रविषाण्यम्बु नियच्छति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—शीतमम्बु मदात्ययादीन्नियच्छति पराकरोति। मदात्ययो मद्योत्थो रोगः। ग्लानिः क्लांतिः। मूर्छा मोहः। छर्दिर्वमिः। श्रमः खेदः। भ्रमोऽनवस्थितिः। तथा तृष्णादीनि नियच्छति। एवं गुणमप्यामं क्वचिन्नेष्यते। तथा चोक्तं संग्रहे। अनवस्थितदोषाग्नेर्व्याधिक्षीणबलस्य च। नाल्पमप्याम मुदकं हितं तद्धि त्रिदोषकृत् ॥ १५ ॥

शीतल जल के गुण—

वि०—शीतल जल मदात्यय, ग्लानि, मूर्च्छा, वमन, थकान, चक्कर आना, प्यास, गरमी, जलन, पित्तरक्त और विष इनको नष्ट करता है ॥ १५ ॥

वक्तव्य—शीतल जल में इतने गुण होने पर भी कुछ अवस्थाओं में यह निषिद्ध है; यथा—'अनवस्थितदोषाग्नेर्व्याधिक्षीणबलस्य च। नाल्पमप्याममुदकं हितं, तद्धि त्रिदोषकृत् ॥' (संग्रह सू. अ. ६)

अधुनोष्णांबुगुणानाह—

दीपनं पाचनं कण्ठ्यं लघूष्णं वस्तिशोधनम् ॥ १६ ॥
हिध्माध्मानानिलश्लेष्मसद्यःशुद्धिनवज्वरे।
कासामपीनसश्वासपार्श्वरुक्षु च शस्यते ॥ १७ ॥

स०—दीपनादिगुणयुक्तमुष्णमंबु भवति। बस्तिशब्देन तात्स्थ्यान्मूत्रं गृह्यते तेन मूत्रशोधनमित्यात्रार्थो बोध्यः। हिध्माऽध्मानादिषु च शस्यते। कासश्च आमश्च पीनसश्च श्वासश्च पार्श्वरुक् च तासु च शस्यते। आमोऽपक्व आहार इत्यर्थः। केचित्त्वामपीनस इति पीनसविशेषणमामशब्दमाहुः। तैरजीर्णं उष्णाबु नोक्तं स्यात्। अजीर्णे चालसकादिरूपे जलमुष्णमिष्यत एव ॥ १६-१७ ॥

गरम जल के गुण—

वि०—उष्णोदक-गरम पानी-अग्निदीपक, पाचन करने वाला, कण्ठ के लिये हितकारी, लघु तथा मूत्राशयशोधक है; हिक्का, आध्मान, वात, कफ, सद्यःशुद्धि (जिस दिन वमनादि शोधन कर्म किया हो) के बाद, नव ज्वर, कास, आम, पीनस, श्वास और पार्श्वशूल में प्रशस्त है ॥१६-१७॥

वक्तव्य—गरम पानी के प्रकार और गुण—'क्षीणपादत्रिभागार्धदेशर्तुगुरुलाघवात्। क्वथितं फेनरहितमवेगममलं हितम् ॥' चरक में ज्वर में गरम पानी के लिये कहा है—'ज्वरो ह्यामाशयसमुत्थः, प्रायो भेषजानि चामाशयसमुत्थानां विकाराणां पाचनवमनापतर्पणसमर्थानि भवन्ति; पाचनार्थं च पानीयमुष्णं तद्धि तेषां पीतं वातमनुलोमयति; अग्निं चोदर्यमुदीरयति; क्षिप्रं जरां गच्छति; श्लेष्माणं परिशोषयति; स्वल्पमपि च पीतं तृष्णाप्रशमनायोपकल्पते।' (च. वि. अ. १। ४०) जिस पानी का एक भाग कम हो, वह पित्त में; आधा भाग कम हुआ हो, वह वायु में, और तीन भाग कम हुए हों वह कफ में देना चाहिए। गरम करने से पानी हल्का हो जाता है।

अधुना क्वथितशीतलं निर्दिदिक्षुराह—

अनभिष्यन्दि लघु च तोयं क्वथितशीतलम्।
पित्तयुक्ते हितं दोषे, व्युषितं तत्त्रिदोषकृत् ॥ १८ ॥

स०—अनभिष्यंदि न श्लेष्मकारि। लघुगुणयोगोऽम्भसोऽस्त्येव। पुनर्लघुत्वकथनमग्निसंस्कारवशाल्लघुतरत्वप्रतिपत्त्यर्थम्। अथवा। आधारवशादक्वथितमंभो लघ्वपि यद्गुरु सम्पन्नं तदपि क्वथितशीतलं लघु भवति। शीतलत्वादभिष्यंदित्वं यत्तोयस्य प्राप्तं तत्क्वथितशीतलत्वे चाऽस्य निषिद्धम्। मदात्ययादिहंतृत्वं तु यच्छीतलत्वसामान्यात्तदस्यास्त्येव। न केनचिन्निषेद्धुं संभाव्यते। पित्तयुक्त इत्येकवचनमविवक्षितम्। तेन वातपित्ते पित्तश्लेष्मणि सन्निपाते च यत्र पित्तयोगः पित्ताधिकत्वं दृश्यते तत्रैव क्वथितशीतलं हितम्। संग्रहोक्तं च क्वथनलक्षणं संक्षेपाभिप्रायेणेह नोक्तम्। यथा। क्षीणपादत्रिभागार्धं देशर्तुगुरुलाघवात्। क्वथितं फेनरहितमवेगमलं हितमिति। अस्यार्थः शिष्यव्युत्पत्त्यै दर्श्यते। धन्वसाधारणानूपेषु देशेषु क्रमशः क्षपितचतुर्भागत्रिभागार्धसलिलमधिश्रपयेत्। जांगलो हि देशोऽनिलानलाभ्यां भूयिष्ठमधिष्ठितस्तेनात्र तोयं लाघवादाशु विशुद्धिं प्राप्नोति। आनूपस्तु भूमिसोमगुणबहुलस्तत्र गुरुत्वादिगुणयोगाच्चिरेण विशुद्धिमश्नुते। एवं साधारणो देशश्चिंत्यः। तथा। ऋतुष्वपि यथायोगमयमेव क्रमो बोध्यः। सुश्रुतेनोक्तम्। यत्क्वथ्यमानं निर्वेगं निष्फेनं निर्मलं लघु। चतुर्भागावशिष्टं तु तत्तोयं कफरोगनुत्। तत्पादहीनं पित्तघ्नं हीनमर्धेन वातनुदिति। संग्रहोक्तमेव ग्रन्थमिमं केचिदत्राऽपि पठन्ति। तथा। पानीयं नतु पानीयं पानीयेऽन्यप्रदेशजे। अजीर्णे क्वथितं चामे पक्वे जीर्णेऽपि नेतरत्। शीते विधिरयं तप्ते त्वजीर्णे शिशिरं त्यजेत्। अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम्। प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषत इति। अन्यप्रदेशजे पानीयेऽजीर्णे पानीयं जलं न पेयम्। एतदुक्तं भवति। पानीये पीते तज्जरणांतं यावद्विजातीयं जलं न पेयमिति। अन्यप्रदेशज इति। कोऽर्थः। कौपे पीते ताडागं न पेयम्। ताडागे पीते कौपं न पेयम्। एवं सर्वत्र चिंत्यम्। तथा आमेऽपक्वे जलेऽजीर्णे क्वथितं च जलं न पेयम्। कथिते पीते जीर्णेऽपि नेतरन्नामं जलं यावन्न भुंक्ते तावत्सजातीयमपि न पेयमित्यर्थः। शीते विधिरयम् कथितशीत एतद्विधानमित्यर्थः। तुरवधारणे। तप्तेऽजीर्णं एव शिशिरं त्यजेत्। जीर्णे तु शीतं पिबेदित्यर्थः। अतियोगेनातिबाहुल्येन तृष्यतस्तृष्णावतोऽपि प्रयोजितमुपयुक्तं सर्वस्यापि नरस्य श्लेष्मपित्ततां याति। ज्वरितस्य विशेषतो यत आमे नाग्नौ बहिष्कृते ज्वरस्योत्पत्तिः। आमस्य च पानीयं वर्धकमिति। संक्षेपतयाल्पोपयोगित्वाच्चाऽवश्यायादिगुणा ग्रन्थकृता नोक्ताः। तांश्चाऽत्र शिष्यहिताय ब्रूमः। रूक्षस्तनुरवश्यायः शीतो वातास्रकोपनः। पानतृड्दाहपितास्रकुष्ठोरुस्तम्भमेहजित्। ग्रीष्मे तु सर्वजन्तूनां स्पर्शनादिषु शस्यते। पद्मिन्यंबु च पित्तघ्नं कफकृद्विरसं गुरु। हिमं तु शीतलं रूक्षं दारुणं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूक्ष्ममेव च ॥ कफं न संदूषयति न पित्तं न च मारुतम् । तथाऽश्मवर्षप्रलये हिमाद्रुपांतरं गुणैः ॥ चराचराणामहितं तुषारं त्वग्निनाशनम् । वैकारं लघु सक्षारं श्लेष्मघ्नं वह्निदीपनम् ॥ केदारं मधुरं प्रोक्तं विपाके गुरु दोषलम् । तद्वत्पाल्वलमुद्दिष्टं विपाके दोषलं तु तत् ॥ अनेकदोषमानूपं वार्यभिष्यंदि गर्हितम् । एभिर्दोषैरसंयुक्तं निरवद्यं तु जांगलम् ॥ पाके विदाहि तृष्णाघ्नं प्रशस्तं प्रीतिवर्धनम् । दीपनं स्वादु शीतं च तोयं साधारणं लघु ॥ चन्द्रकान्तभवं रक्षोविषपित्तज्वरापहम् । रत्नाकरसमुत्थं च सर्वदोषकरं मतमिति ॥ १८ ॥

क्वथित शीतल जल के गुण—

वि०—गरम करके ठण्डा किया पानी—अनभिष्यन्दी तथा लघु होता है एवं पित्त युक्त विकारों में हितकारी है। उबाल कर ठण्डा किया पानी बासी होने या अधिक देर तक रखने पर त्रिदोषकारक[1] हो जाता ॥ १८ ॥

वक्तव्य—पित्तयुक्त वात, पित्त और कफ और सन्निपात में जहां पित्त की अधिकता हो वहां इस पानी को देना चाहिये। पानी को उबालने के लिये सुश्रुत में 'यत्क्वाथ्यमानं निर्वेगं निष्फेनं निर्मलं लघु। चतुर्भागावशिष्टं तु तत्तोयं कफरोगनुत्। तत्पादहीनं पित्तघ्नं हीनमर्धेन वातनुत् ॥'

संग्रह में कुछ श्लोक दिये हैं; 'पानीयं न तु पानीयं पानीयेऽन्यप्रदेशजे। अजीर्णे क्वथितं चामे पक्वे जीर्णेऽपि नेतरत् ॥ शीते विधिरयं तप्ते त्वजीर्णे शिशिरं त्यजेत्। अतियोगेन सलिलं तृष्यतोऽपि प्रयोजयेत्। प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः।' अर्थात् एक स्थान (नदी, कुआँ आदि) का जल पीने के बाद जब तक पहले पिये हुए जल का पाचन न हो जाय दूसरे स्थान का जल नहीं पीना चाहिए; इसी प्रकार ठंडा जल के बाद पाचन के पूर्व गरम जल नहीं पीना चाहिए। किन्तु गर्म जल के बाद उसका पाचन हो जाने पर भी बिना कुछ खाये दूसरा जल नहीं पीना चाहिए। तथा शीत (शृतशीत) जल में भी पाचन हो जाने के बाद ही शीत (बिना पकाया) जल पिये। प्यास तीव्र होने पर भी विशेषतः ज्वर में अत्यधिक मात्रा में जल पीने से श्लेष्मपित्त विकार उत्पन्न हो जाता है।

नारिकेलोदकं स्निग्धं स्वादु वृष्यं हिमं लघु।
तृष्णापित्तानिलहरं दीपनं बस्तिशोधनम् ॥ १९ ॥

स०—नालिकेरांतःस्थितमुदकं स्निग्धं स्वादु वृष्यं हिमं च भवति। एवंभूतमपि प्रभावाल्लघु भवति। तथा तृष्णाविहरं दीपनं मूत्रशोधनं च भवति ॥ १९ ॥

नारिकेल जल के गुण—

वि०—नारियल के जल का गुण—नारियल का पानी स्निग्ध, स्वादु, वृष्य, शीतल, लघु, तृष्णा, पित्त और वायुनाशक, अग्नि-दीपक और मूत्राशय-शोधक है ॥ १९ ॥

इदानीं युक्त्याऽप्यसंग्रहं निर्दिशति—

वर्षासु दिव्यनादेये परं तोये वरावरे।

स०—प्रावृष्यांतरिक्षं जलं परमत्यंतं पथ्यम्। नदीसंभवं त्वपथ्यमिति तोयवर्गः।

आन्तरिक्ष जल के गुण—

वि०—वर्षा ऋतु में आन्तरिक्ष जल श्रेष्ठ है, और नदी का जल निकृष्ट है।

वक्तव्य—चरक में 'आन्तरिक्षमुदकानाम्'—यह कहकर सबसे श्रेष्ठ बताया है।

अथ दुग्धादिवर्गः।

परिशेषेभ्यो वर्गेभ्यः प्राग्बहुजनोपयोगितयोपकारित्वेनाजन्मसात्म्येन प्राधान्यात्पयःसंज्ञासामान्यात्पयस इव जीवनादिगुणयोगाच्च तोयवर्गादनु क्षीरसर्गः प्रक्रम्यते। तत्रादीनां मूलकारणत्वात्क्षीरस्य प्रागुपादानम्। तथा। जीवनीयानां रसायनानां चाग्रेसरत्वात्। तथा चाष्टांगसंग्रहे। क्षीरं जीवनीयानां क्षीरघृताभ्यासो रसायनानामित्यादि।

[गव्यं माहिषमाजं च कारभं स्त्रैणमाविकम्।
ऐभमैकशफं चेति क्षीरमष्टविधं मतम् ॥]
स्वादुपाकरसं स्निग्धमोजस्यं धातुवर्धनम् ॥ २० ॥
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम्।
प्रायः पयः—

स०—पयः क्षीरं प्रायः स्वादुपाकरसादियुक्तं भवति। पाकश्च रसश्च पाकरसौ। स्वादू पाकरसौ यस्य तदेवम्। ओजसे हितमोजस्यम्। धातून् वर्धयति धातुवर्धनम्। वृष्यं शुक्रकरमतिशयेनेति बोध्यम्। धातुवर्धनत्वादेव शुक्रकरत्वमात्रस्य सिद्धेः प्रायोग्रहणात्कदाचित्क्षीरं नैवं भवति। तथा चोष्ट्रीक्षीरमीषद्रूक्षोष्णलवणं पठ्यते। अजाक्षीरं च लघु। आविकमुष्णमैकशफमुष्णं साम्ललवणं चेति। तस्मात्प्रायोग्रहणं कृतम्। स्वादुपाकरसत्वादेव क्षीरस्य स्निग्धवृष्यादयो गुणा लब्धा एव किं पुनरेतैरुद्दिष्टैरिति केचित् तान् ब्रूमहे। मधुररसादिकेभ्योऽपरे स्निग्धवृष्यादयो गुणा बहुतराः क्षीरस्य विद्यंत इति ज्ञापनार्थं ते स्निग्धादयो गुणाः पुनरुद्दिष्टाः। महाभूतानां हि संयोगादिविशेषात्कदाचिद्रससहचरिता एव गुणा द्रव्यमभिनिविशंते ये रसे समाधाय वर्ण्यंते। यथा मधुर आयुष्यादिगुणाः। अम्लेऽग्निदीप्तिकृदादयः। केचिच्च रसमनपेक्ष्यैव द्रव्ये निविशंते। यथा मधुररसद्रव्ये मकुष्टतंडुलीयादौ रूक्षादयो गुणाः। तथाहि स्निग्धादीनां तत्रोपलंभः प्राप्तो मधुररसाश्लिष्टत्वात्। तस्मान्मकुष्टादिद्रव्यं मधुररससहचरोक्तेन गुणौघेन संयुक्तं वक्तुं युक्तम्। अन्यथा तु कृतं षड्रसगुणस्वरूपवर्णनमनर्थमेव स्यात्। तस्मादयमत्र विषयविभागो ज्ञेयः। केचिद्गुणा रससहचरिता द्रव्ये निवसन्ति। यद्वशात्तद्द्रव्यं रसगुणाननुवर्तते। ईदृशं च

१. त्रिदोषकृत्—तीनों दोषों को करता है; यथा—'कालस्वभावात् वह्निगुणभ्रंशात्, अम्लविपाकाच्च ॥' चक्रपाणि ने—'शृतं तोयं दिवा रात्रौ गुरु रात्रिशृतं दिवा ॥' ऐसा कहा है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विशेषमुद्दिश्य तन्त्रकृद्भिर्मधुरादिरसानां स्निग्धादिगुणा वर्णिता वेद्याः। केचित्तु रसनिरपेक्षा एव द्रव्ये निवसन्ति। अत एव तद्द्रव्यं रसगुणान्नानुवर्तते। अस्मिंस्तु विषये रसगुणवर्णनं नोक्तमेव वेद्यम्। तस्मात्क्षीरस्य स्निग्धादियोगात्स्वादुपाकरसत्वे सत्यपि स्निग्धादिगुणवर्णनम्। एवं चोभयथा क्षीरस्य स्निग्धादिगुणयोगादधिकाः स्निग्धादयो ये गुणास्तेऽस्य संतीत्यवगच्छ। अयमेव च व्यवहारोऽन्यत्राऽप्येवंविधे शाल्यादौ द्रव्ये विशेषः। ननु स्वादुः पटुश्च मधुरमम्लोऽम्लं पच्यते रस इति वक्ष्यते। ततश्च स्वादुरसत्वादेव स्वादुपाकत्वं लब्धं तत्किं पाकग्रहणेन। भणामः। शालिपिष्टमयं सर्वं गुरुभावाद्विदह्यत इत्युक्तं तदेवं क्षीरं गुरुगुणयुक्तमपि विदाहावस्थायां चिरं न तिष्ठति। प्रागेव स्वादुपाकतां यातीतीममर्थं ज्ञापयितुं पाकग्रहणम्। स्त्रीणां चाहाररस एवापत्यस्नेहात्क्षीराय संपद्यते। तथा च दारुवाहिः। स्त्रीणामपत्यजाद्धर्षाद्रसः स्नेहाय कल्पते। स्नेहाद्रसः क्षरत्येवं हृदयात्क्षीरमेत्यत इति। गव्यस्य च पूर्वतरमुपादानं सर्वक्षीरेभ्यो ज्यायस्त्वात्तथा माहिषमपि तक्रादि गोरसशब्देन प्रथितमिति ॥ २० ॥

दूध के भेद—

वि०—[दूध—दूध आठ प्रकार का होता है। जैसे-गाय, भैंस, बकरी; ऊंटनी, स्त्री (मनुष्य), भेड़, हथिनी और एक खुरवाली घोड़ी या गधी का।]

दूध के साधारण लक्षण—

वि०—प्रायः सभी दूध मधुर विपाक, मधुर रस, स्निग्ध; ओज के लिये हितकारी; धातुवर्धक; वात-पित्तशामक; वृष्य; कफकारक, गुरु एवं शीतल है ॥ २० ॥

वक्तव्य—दूध आठ प्रकार का है यह पहले कहा जा चुका है। उनमें चूंकि ऊंट का दूध नमकीन होता है; इसलिये आचार्य ने प्रायः शब्द दिया है। स्त्रियों में दूध बच्चे के स्नेह के कारण बनता है; यथा—'स्त्रीणामपत्यजाद्धर्षाद् रसः क्षीराय कल्पते। स्नेहाद्रसः क्षरत्येवं हृदयात्क्षीरमेत्यतः ॥'

अत्र गव्यं तु जीवनीयं रसायनम् ॥ २१ ॥
क्षतक्षीणहितं मेध्यं बल्यं स्तन्यकरं सरम्।
श्रमभ्रममदालक्ष्मीश्वासकासातितृट्क्षुधः ॥ २२ ॥
जीर्णज्वरं मूत्रकृच्छ्रं रक्तपित्तं च नाशयेत्।

स०—एषु क्षीरेषु मध्ये गव्यं पुनः क्षीरं जीवनीयमतिशयेनेति बोद्धव्यम्। जीवनीयमात्रस्यौजस्यामित्यनेनैव क्षीरसामान्यलक्षणेनोक्तत्वात्। ओजस्यं हि जीवनीयमुच्यते। तथा। ह्योजःक्षये जीवनीयानामौषधानामुपयोगो निर्दिष्टः। यथा। ओजः क्षीतकोपादिभिरित्युक्त्वानन्तरमुवाच जीवनीयौषधक्षीररसाद्यास्तत्र भेषजमिति। अत्र च क्षीरं जीवनीयत्वेन गृहीतमपि पुनरुक्तं प्राधान्यख्यापनार्थम्। तथा च मुनिः। प्रवरं जीवनीयानां क्षीरमुक्तं रसायनमिति। रसवीर्यविपाकानां श्रेष्ठानां लाभोपायो रसायनम्। तथा चोक्तम्। लाभोपायो हि शस्तानां रसादीनां रसायनमिति। तथा क्षतक्षीणहितम्। क्षीणाय हितम्। क्षीणः क्षीणधातुः। तथा मेधा धारणाशक्तिस्तस्यै हितं मेध्यम्। उगवादिभ्यो यदिति यत्। एवं बल्यम्। तथा स्तन्यकरम्। कृञो हेतुताच्छील्येति हेतौ टः। स्त्रीणां स्तन्यकरणे हेतुरित्यर्थः। तथा सरम्। श्रमादींश्चैकादश नाशयेत् ॥ २१-२२ ॥

गोदुग्ध के गुण—

वि०—गाय का दूध—गाय का दूध जीवनीय (जीवन के लिये उपयोगी); रसायन (प्रशस्त धातुओं को उत्पन्न करने वाला); क्षतक्षीण रोगी के लिये हितकारी, मेधावर्धक, बलवर्धक, दूध को बढ़ाने वाला एवं मृदु रेचक है। थकान, चक्कर आना, मद, अलक्ष्मी, श्वास, कास, अतिप्यास, भूख, जीर्णज्वर, मूत्रकृच्छ्र और रक्तपित्त इन रोगों को नष्ट करता है ॥ २१-२२ ॥

वक्तव्य—गाय के दूध और ओज के गुण समान होने से गाय का दूध जीवनीय है; इसी से चरक में कहा है—'तदेवं गुणमेवौजःसामान्यादभिवर्धयेत्। प्रवरं जीवनीयानां क्षीरमुक्तं रसायनम् ॥' इसमें भी गाय के रंग के भेद से, उसके प्रसव की संख्या के भेद से दूध में अन्तर आ जाता है। यथा 'तरुणीनां गवां दुग्धं मधुरं च रसायनम्। त्रिदोषनाशनं चैव वृद्धाया दुर्बलं मतम् ॥ सगर्भायाः समुद्दिष्टं त्रिमासोर्ध्वं च पित्तलम्। क्षारं च मधुरं चैव मतं वै शोषकारकम् ॥ भावप्रकाश में—'कृष्णाया गोर्भवेद् दुग्धं वातहारि गुणाधिकम्। पीताया हरते पित्तं तथा वातहरं भवेत्। वष्कयिण्यास्त्रिदोषघ्नं तर्पणं बलकृत्पयः ॥

हितमत्यग्न्यनिद्रेभ्यो गरीयो माहिषं हिमम् ॥ २३ ॥

स०—महिष्या इदं माहिषं क्षीरमत्यग्निभ्योऽनिद्रेभ्यश्च हितम्। तथा गरीयो गुरुतरम्। तथा हिमं शीतवीर्यम्। मुनिरप्याह। महिषीणां गुरुतरं गव्याच्छीततरं पयः। स्नेहादूनमनिद्राय हितमत्यग्नये च तदिति। खरनादे चोक्तम्। गव्यं स्नेहोत्तमं क्षीरं गव्याच्च पयसः पयः। यथोत्तरं स्नेहहीनमौरभ्रच्छागमाहिषम्। जांगलानूपशैलेषु चरन्तीनां यथोत्तरम्। पयो गुरुतरं वत्सो यथा तासां प्रवर्तनमिति। गुरु शीततरं गव्यान्माहिषं स्वल्पनलं पयः। चतुर्थभागस्नेहोनं पित्तघ्नं च विशेषत इति। यच्च रविगुप्तः सिद्धसारे व्यध्यगीष्ट। गव्यात् स्निग्धं गुरुतरं माहिषं स्वप्नकृत्पय इति। तद् बुधैश्चिन्त्यम्। सर्वमतविरुद्धत्वात् ॥ २३ ॥

भैंस के दूध के गुण

वि०—भैंस का दूध—भैंस का दूध गाय के दूध से गुरु तथा शीतल है और तीक्ष्णाग्नि एवं अनिद्रा वाले पुरुषों के लिये हितकारी है ॥ २३ ॥

वक्तव्य—सुश्रुत में—'महाभिष्यन्दि मधुरं माहिषं वह्निनाशनम्। निद्राकरं शीततरं गव्यास्स्निग्धतरं गुरु ॥' (सु.सू. अ. ४।५५) इसी प्रकार खरनाद ने कहा है—'गव्यं स्नेहोत्तमं क्षीरं गव्याच्च पयसः पयः। यथोत्तरं स्नेहहीनमौरभ्रच्छागमाहिषम् ॥ जाङ्गलानूपशैलेषु चरन्तीनां यथोत्तरम्। पयो गुरु-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तरं वत्सो यथा तासां विवर्धते ॥ गुरु शीततरं गव्यान्माहिषं स्वप्नलं पयः । चतुर्थभागस्नेहोनं पित्तघ्नं च विशेषतः ॥ गाय का दूध स्नेह (प्रभाव) की दृष्टि से उत्तम है; परन्तु मात्रा की दृष्टि से भैंस के दूध में घी अधिक है । भैंस के स्नेह से बकरी के दूध में स्नेह का भाग $\frac{1}{4}$ कम है; बकरी से भेड़ के दूध में $\frac{1}{4}$ स्नेह प्रभाव की दृष्टि से कम है ।

अल्पाम्बुपानव्यायामकटुतिक्ताशनैर्लघु ।
आजं शोषज्वरश्वासरक्तपित्तातिसारजित् ॥ २४ ॥

स०—आजं छागलं क्षीरं लघु भवत्यल्पांबुपानादिभिर्हेतुभूतैः । स्वल्पांबुपानादित्वं चाजानां स्वभावोऽन्यासां तु देशसात्म्यापेक्षया । यद्येवं स्वभावादेवाल्पांबुपानादेर्गम्यमानत्वादेतदुपन्यासो व्यर्थ एव । अत्रोच्यते । ज्ञापनार्थमिदम् । ज्ञापयति । यदा अजा अप्यव्यायामा गुर्वशनादि कुर्युस्तदा तासामप्यन्यथा क्षीरं भवेत् । एवं च गवादीनामप्याहारादिवशाद्गुरुलघुत्वं चिन्त्यमिति । तेन प्रदोषेऽपराह्णे यद्गृहीतं पयस्तदपेक्षयौषसम् प्रभाते यद्गृहीतं तद्गुरु । चेष्टारहितत्वात् । रात्रौ हि प्राणिनां न कदाचिच्चेष्टा भवति । अत औषसं गुरु । दिवा च धावनप्लवनादिकया चेष्टया प्रादोषं लघु । अनया च दिशा सर्वमपि चिन्त्यम् । अत एव संग्रहे यदुक्तम् । पिण्याकाग्लाशिनीनां तु गुर्वभिष्यंदि तद्भृशमिति । तदेतेनैवोक्तप्रायत्वान्नेहोक्तम् । शोषेत्यादि । शोषादीनां द्वन्द्वः । तान् जयतीत किम् । शोषजित् एवं ज्वरजिदित्यादि ॥ २४ ॥

बकरी के दूध के गुण

वि०—बकरी का दूध—थोड़ा पानी पीने से, व्यायाम करने से, कटु-तिक्त भोजन करने से, बकरी का दूध लघु है । यह दूध शोष, ज्वर, श्वास, रक्तपित्त और अतिसार नाशक है ॥२४॥

वक्तव्य—रक्तपित्त में चरक—'छागं पयः स्यात् परमं प्रयोगे गव्यं शृते पञ्चगुणे जले वा ॥' (च. चि. अ. ४।८३) अतिसार में-'आजेन पयसा पेयाः सरक्ते मधुसंयुताः ।' (सु. चि. अ. ४०।१२४) दूध के गुरु लघु होने में कारण पशु के आहार, व्यायाम आदि भी हैं, इसी से संग्रह में कहा है—'पिण्याकाग्लाशिनीनां तु गुर्वभिष्यन्दि तद् भृशम् । अचेष्टया च प्रादोषाद् गरीयः स्मृतमौषसम् । व्याख्यातोऽनेन लघिमा चेष्टावत्प्रकृतिष्वपि ॥' (सं. सू. अ. ६) ।

ईषद्रूक्षोष्णलवणमौष्ट्रकं दीपनं लघु ।
शस्तं वातकफानाहकृमिशोफोदरार्शसाम् ॥ २५ ॥

स०—औष्ट्रकमुष्ट्राणां क्षीरं लघु । तथा ईषन्मनाग्रूक्षोष्णं तथा दीपनं भवति । तथा वातादीनां शस्तम् । वातादिषु पथ्यमित्यर्थः । औष्ट्रकमित्युष्ट्राद्वुञिति वुञ् । प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमित्युष्ट्रीशब्दादाप ॥ २५ ॥

ऊँटनी के दूध के गुण—

वि०—ऊँटनी का दूध—थोड़ा रूक्ष, उष्ण, नमकीन, अग्निदीपक, लघु, वात-कफ जन्य रोगों में, आनाह, कृमि, शोफ, उदर और अर्श रोग में हितकारी है ॥ २५ ॥

मानुषं वातपित्तासृगभिघाताक्षिरोगजित् ।
तर्पणाश्च्योतनैर्नस्यैः—

स०—मानुषीणां क्षीरं वातपित्तासृगभिघाताक्षिरोगजिद्भवति वातश्च पित्तं चासृक् चाभिघातश्चेति द्वन्द्वः । तैरक्षिरोगस्तं जयति यत्तदेवम् । नस्यव्यवहारादिना । तर्पणादीनि स्वे स्वेऽध्याये वक्ष्यमाणानि ।

स्त्रीदुग्ध के गुण—

वि०—स्त्री का दूध—वात-पित्त-रक्त, एवं अभिघात से उत्पन्न अक्षि रोगों को तर्पण, आश्च्योतन और नस्य से शान्त करता है ।

वक्तव्य—तर्पण-नेत्र का भरना । आश्च्योतन-नेत्र का सेचन । चरक में-'जीवनं बृंहणं सात्म्यं स्नेहनं मानुषं पयः । नावनं रक्तपित्तस्य तर्पणं चाक्षिरोगिणाम् ॥' (च. सू. अ. २७।२२०)

केन प्रयोगेणेत्याह—

—अहृद्यं तूष्णमाविकम् ॥ २६ ॥
वातव्याधिहरं हिध्माश्वासपित्तकफप्रदम् ।

स०—आविकं क्षीरमुष्णवीर्यं भवति । तथा अहृद्यं हृदयायाहितं भवति तथा वातव्याधिहरम् । तथा हिक्कादिप्रदम् । आविकमित्यविशब्दात्स्वार्थे कप्रत्ययान्तात्तस्येदमित्यण् ॥ २६ ॥

भेड़ी के दूध के गुण—

वि०—भेड़ी का दूध—अप्रिय, उष्ण, वातव्याधिनाशक, हिक्का, श्वास, पित्त एवं कफ को उत्पन्न करता है ॥ २६ ॥

वक्तव्य—खरनाद ने कहा है-'स्वाद्वम्लपाकं स्निग्धोष्णं गुरु पित्तकफोल्बणम् । आविकं बृंहणं क्षीरं हिक्काश्वासानिलापहम् ।' यहाँ पर कफ-पित्तजन्य हिक्का, श्वास को करता है; और वातजन्य हिक्का को नष्ट करता है, यह हेमाद्रि का मत है। इसीसे सुश्रुत में 'पथ्यं केवलवातेषु श्वासे चानिलसम्भवे ।'

हस्तिन्याः स्थैर्यकृद्—

स०—हस्तिन्याः क्षीरं स्थैर्यकृद्भवति ।

हथिनी के दूध के गुण—

वि०—हथिनी का दूध—शरीर को अतिशय दृढ़ करता है।

—बाढमुष्णं त्वैकशफं लघु ॥ २७ ॥
शाखावातहरं साम्ललवणं जडताकरम् ।

स०—एकः शफो नखो यासां वडवादीनां ता एकशफास्तासामिदमैकशफं क्षीरं बाढमतिशयेनोष्णं भवति । तथा शाखासु बाहूरुप्रभृतिषु यो वातस्तं हरतीति । शाखावातहरम् । हरतेरनुद्यमनेऽजित्यच् । तथा साम्ललवणमीषद्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ल्लमीषल्लवणं च। तथा जडताकरमंगजाड्यकरणहेतुः। कृञो हेत्वित्यादिना हेतौ टः॥ २७॥

घोड़ी आदि के दूध के गुण—

वि०—एकशफ (घोड़ी, गधी) का दूध—अतिशय उष्ण, लघु, शाखाओं की वायु को नष्ट करने वाला, थोड़ा अम्ल और नमकीन है, एवं अङ्गों में जकड़ाहट उत्पन्न करता है॥ २७॥

वक्तव्य—शाखा-हाथ-पैर अथवा त्वचा से युक्त रक्तादि धातु-बाह्य रोग-मार्ग।

पयोऽभिष्यन्दि गुर्वामं, युक्त्या शृतमतोऽन्यथा ॥२८॥

स०—आममक्कथितं पयोऽभिष्यंदि श्लेष्मप्रकोपि तथा गुरु भवति। अत आमादन्यथा विपरीतं युक्त्या शृतं भवति। अनभिष्यंदि लघु च। पूर्वावस्थामपेक्ष्योच्यते। युक्तिर्योग उपायः। खरनादे च क्षीरस्य श्रवणे युक्तिः स्पष्टं कृत्वा निर्दिशिता। विना तु वनितास्तन्यमाममेव हितं पयः। अर्धोदकं क्षीरशिष्टमामाल्लघुतरं शृतमिति॥ २८॥

कच्चे दूध के गुण—

वि०—कच्चा दूध—अभिष्यन्दी और गुरु है; और युक्ति-पूर्वक पकाया दूध अनभिष्यन्दी और लघु है॥ २८॥

वक्तव्य—दूध के पकने में युक्ति-'अर्धोदकं क्षीरशिष्टमामाल्लघुतरं शृतम्। स्यान्निर्जलं शृतं द्वित्रिचतुरष्टांशशेषितम्। यथा शृततमं सारं गुरु बल्यतमं पयः॥' स्त्री का दूध कच्चा ही बरता जाता है, यथा- तदेवोक्तं लघुतरमनभिष्यन्दि वै शृतम्। वर्जयित्वा स्त्रियाः स्तन्यमाममेव हि तद्धितम्॥' सुश्रुत।

भवेद् गरीयोऽतिशृतं धारोष्णममृतोपमम्।

स०—अतिशयेन क्कथितं कवलभोज्यमिव संजातगरीयो गुरुतरं भवेत्। खरनादे चोक्तम्। स्यान्निर्जलं शृतं द्वित्रिचतुरष्टांशशेषितम्। तथा शृततमं सारं गुरु बल्यतमं पयः। सुश्रुते चोक्तम्। शृतशीतं तु पित्तघ्नं शृतोष्णं कफवातजित्। त्यजेद्विवर्णं ग्रथितं विरोधं विरसं पटु। रक्तपित्तप्रशमनी वृष्या संतानिका गुरुरिति। खरनादे चोक्तम्। धारोष्णात् सर्वशः क्षीरात् शृतं गुरुतरं भवेदिति। धारोष्णममृतोपमं निर्दोषत्वात्।

पके और धारोष्ण दूध के गुण—

वि०—बहुत गरम किया (औंटाया) दूध अतिशय गुरु होता है, और धारोष्ण दूध अमृत के समान है।

अधुना दधिगुणान्निरूपयति—

अम्लपाकरसं ग्राहि गुरूष्णं दधि वातजित्॥ २९॥
मेदःशुक्रबलश्लेष्मपित्तरक्ताग्निशोफकृत्।
रोचिष्णु शस्तमरुचौ शीतके विषमज्वरे॥ ३०॥
पीनसे मूत्रकृच्छ्रे च, रूक्षं तु ग्रहणीगदे।
नैवाद्यान्निशि नैवोष्णं वसन्तोष्णशरत्सु न॥ ३१॥
नामुद्गसूपं नाक्षौद्रं तन्नाघृतसितोपलम्।
न चानामलकं नापि नित्यं नो मन्दमन्यथा॥ ३२॥
ज्वरासृक्पित्तवीसर्पकुष्ठपाण्डुभ्रमप्रदम्।

स०—अम्लौ पाकरसौ यस्य तदेवंभूतं दधि भवति। तथा ग्राहि स्तंभनम्। तथा चोक्तम्। भेदि यत्पिंडितान् भावान् शकृदादीन् भिनत्ति तत्। विपरीतमतो ग्राहि तच्च स्तंभनमुच्यत इति। तथा गुरूष्णं वातजिच्च। मेदआदीनां द्वंद्वः। तान् करोति यत्तदेवम्। रोचत इति रोचिष्णु। न रोचत एव केवलम्। अरोचकमपि व्यावर्तयतीति शस्तमरुचौ। रोचते हि घृतपूरादि न त्वरुचिं जयति। अरुचिघ्नं पटोलपत्रं तन्न रोचते। तथा ह्यत्रैव पठिष्यति। तिक्तः स्वयमरोचिष्णुररुचिमित्यादि। रोचिष्णुत्वादेवोच्चावचव्यंजनपरिवृतैर्मांसमंडकादिभिरपि सहितस्यापि दध्न्यभिलाष उत्पद्यत एव। अतएव चैतदाहारांतेऽभ्यवहरंति। शीतक इति विषमज्वरविशेषणम्। शीतकारित्वं तु वाते श्लेष्मणि तत्संसर्गे च यद्यपि त्रितये संभवति तथापि वातजिद्वातज एव विषमज्वरे दधि प्रयोज्यम्। न संसर्गे वा वातोल्बणे। तथा हि शीतज्वर एवोक्तम्। अग्न्यनग्निकृतान्स्वेदान्स्वेदि भेषजभोजनमिति। पीनसे शस्तमिति कथमविशेषेणोक्तम्। यतश्चत्वारः पीनसा वातपित्तकफसन्निपातजा इति। वक्ष्यते। तत्र दध्नो वाताधिक एव युक्तत्वं न शेषेषु। अत्र संचक्ष्महे। परिपाकात्पीनसस्योपशांतिः परिपाककरं च दध्युष्णत्वात्। अथवा पूर्ववत्सामान्योक्तावपि यत्र योग्यताऽस्य वातिके तेनैतदुपकल्प्यताम्। अनुक्तेष्वपि हि सामान्योपक्रमो वस्तुवशाद्विशेषष्वेव विपरिणमति। तथा ह्यत्रवोपरिष्टाद्दुग्धकर्मसु व्यतीतम्। श्रमभ्रममदालक्ष्मीश्वासकासातितृट्क्षुधः। जीर्णज्वरं मूत्रकृच्छ्रं रक्तपित्तं च नाशयत्। तदेतन्न च सर्वेष्वेव कासश्वासकृच्छ्रास्रपित्तेषु पयः कार्मुकमिति। तथा ग्रहणीरोगे तद्रूक्षं शस्तम्। अनेन च हेतुना दध्नः प्रकृतिस्थस्य स्निग्धत्वं युक्त्यैवोक्तम्। यतो ग्रहण्यां रूक्षमुद्धृतसारमुद्दिष्टम्। निशि नैव कदाचिदद्यात्। नैवाद्यान्निशि नैवोष्णमित्येवकाराच्चात्यंतिकनिषेधाद्दिवा भुंजीतेत्यर्थादवगम्यते। नैवोष्णमग्न्यादितापात्तप्तं तथा वसंतग्रीष्मशरत्सु न भोज्यम्। अन्यतमेऽप्यन्यर्तावपि मुद्गसूपादीनामन्यतमेन रहितं न भोज्यम्। तत्र घृतसितोपलयोः समासेनैतयोरेव योगेन पथ्यत्वमिच्छन्ति। मुद्गसूपादीनां तु मिश्रीभावो दध्ना जन्यमानस्य दोषस्य प्रतिबन्धार्थं कल्प्यते। रक्तपित्तवत्। यथा समीरणोल्बणेऽस्रपित्ते तित्तिर्यादीनामौष्ण्यमुदुंबरादिरसेन प्रतिबध्यन्ते। नित्यमिति। यद्युपशेते शरीरस्थं तथाप्युदर्करोगावहत्वान्न शीलनीयम्। अत एवान्नपानविधावतिदोषशीलत्वादस्य निषेधं करोति। तथा च वक्ष्यति। किलाटदधिकूर्चिकेत्यादि। नामन्दमिति। दुग्धावस्थां व्यतीत्य दध्यवस्थामसंप्राप्तमंतरावर्ति मंदकमित्युच्यते। तस्मिन् सत्यपि स्नेहे परिणतिविशेषेण कालात्मना स्रोतसामत्यंतोपलेपकृतो दोषत्रयकोपोऽपि भवतीत्यतीव वर्जनीयमेव। मंदकनिषेधश्चोपलक्षणार्थः। तेन मद्यादीनप्यप्राप्तरसान्नोपयुंजीतेत्यवगंतव्यम्। अन्यथेत्यादि। प्रशब्द एवं द्योतयति। विधिभ्रष्टं दधि निषेव्यमाणं प्रकर्षेण ज्वरासृ-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विपत्तादीन् प्रददाति। ननु शुक्रकृत्त्वबलवर्धनत्वाद्दीपनत्वमनुपपन्नम्। शुक्रकृद्बलवर्धनानि हि द्रव्याणि प्रायेण गुरूणि भवन्ति। अतो दध्येवंगुणं सत्कथमग्निकृत्स्यात्। अत्राचक्ष्महे। अम्लत्वादुष्णवीर्यत्वाच्च युक्तमेव। यतो रसविपाकाभ्यामम्लं वीर्येणोष्णं च दध्यतोऽग्निकृत्त्वमस्मिन्नुपपन्नमिति। ननु शुक्रकरत्वं दध्नो न युक्तम्। यतोऽम्लपाकरसं दधीत्यधीतमाचार्येणाम्लश्च शुक्रनाशनस्तस्माच्छुक्रकृत्त्वमयुक्तम्। अत्राचक्ष्महे। स्निग्धत्वबृंहणत्ववातघ्नत्वबल्यत्वैः शुक्रकृत्त्वमुपपन्नमेव। तथा च वक्ष्यति। किंचिद्रसेन कुरुते कर्म पाकेन चापरम्। गुणांतरेण वीर्येण प्रभावेणैव किंचनेति। वातजिदित्यनेन नार्थः। यानि खलु द्रव्याणि बल्यस्निग्धगुरूष्णयुक्तानि तानि वातघ्नान्येव दृष्टानि। तस्माद्वातजिदिति न वाच्यम्। नैवम्। सक्तुमद्यसूर्यतापमंदकादिषु व्यभिचारात्। तथा हि। सक्तवो वातला वृष्या रूक्षा बलकराश्च। मार्द्वीकादिमद्यं हर्षणत्वाद्वृष्यं वातलं च। तथा च वक्ष्यति। मनसो हर्षणं यच्च तत्सर्वं वृष्यमुच्यत इति। मद्यं च मात्रापीतं हर्षणं भवति। तथा मुनिः। हर्षमूर्जप्रदं पुष्टिमारोग्यं पौरुषं परम्। युक्त्या पीतं करोत्याशु मद्यमिति सूर्यतापश्चोष्णोऽपि सन्मारुतस्य वृद्धये। तथा च मुनिः। कटुतिक्तातिरूक्षशीतलघूनीत्यारभ्य यावद्वातातपौ भयं शोको हेतुर्वातार्शसामिति। मंदकं च स्निग्धाम्लगुरुगुणयुक्तमपि त्रिदोषकरम्। तथा च मुनिः। त्रिदोषं मंदकमिति। त्रिषु च दोषेष्वंतर्भूतः पवन इति चैवं व्यभिचारदर्शनाद्वातजिदित्युक्तम्। क्षीरस्य च दध्यात्मना परिणमतोऽनभिव्यक्ताम्लाभिव्यक्ताम्लात्यम्ललक्षणास्तिस्रोऽवस्थाः संपद्यन्ते। तत्र मन्दजातमनभिव्यक्ताम्लम्। सम्यग्जातमभिव्यक्ताम्लम्। अतिजातमत्यम्लम्। तत्र मन्दजातं त्रिदोषकृत्वाच्चिषिद्धम्। सम्यग्जातस्यैते पूर्वोक्ता गुणाः। किंचिद्धीनाश्चात्यम्लस्य। तथा सुजातेऽत्यम्ले च दध्नि सरमंडौ स्तः। तत्र दध्न उपरिभागः सरः। अधो मंडः। एतद्गुणाश्च लाघविकत्वान्नेहोक्ताः। मुनिना च दर्शिताः। त्रिदोषं मंदकं जातं वातघ्नं दधि शुक्रलम्। सरः श्लेष्मानिलघ्नस्तु मंडः स्रोतोविशोधनः। श्लेष्मपित्तरक्तकृत्त्वं चाम्लपाकरसोष्णवीर्यत्वादेवावगम्यते। यत्तु साक्षादेतेषामुपादानं तत्प्रकर्षार्थम्। अन्येभ्योऽम्लद्रव्येभ्यो दध्येतान्यतिशयेन करोतीति नैवाद्यान्निशीत्यादौ ग्रंथे चैकस्मिन्नकारे कर्तव्ये यदनेकनकारकरणं तच्छास्त्रनिषिद्धदधिभक्षणादतिप्रत्यवायज्ञापनार्थम्। चरकोक्तमंगल्यगुणो नेहोक्तश्चिकित्सायामनुपयोगित्वात्। अत एव सर्पिरादीनां मंगल्यानामपि चरकेऽपि मंगलत्वं नावादीदिति। सुश्रुते तु दध्नो विशेषगुणा उक्ताः। यथा। दध्याजं कफपित्तघ्नं लघुपाके विषापहम्। दुर्नामश्वासकासेषु हितमग्नेश्च दीपनम्। विपाके मधुरं वृष्यं रक्तपित्तप्रणाशनम्। बलासवर्धनं स्निग्धं विशेषाद्दधि माहिषम्। विपाके कटुकं क्षारमम्लं भैष्ट्रकं दधि। वातार्शांसि च कुष्ठानि कृमीन् हंत्युदराणि च वातघ्नं कफकृत्स्निग्धं विशेषान्न च पित्तकृत्। कुर्याद्भक्ताभिलाषं च दधिमस्तु परिश्रुतम्। शृतक्षीराच्च यज्जातं गुणवद्दधि तत्स्मृतम्। वातापित्तहरं रुच्यं धात्वग्निबलवर्धनम्। दधि त्वसारं रूक्षं तु ग्राहि विष्टंभिवातलम्। दीपनीयं विशेषेण सकषायं रुचिप्रदमिति। केवलमपि स्वरूपं कदाचिद्दधि भुंजीतेत्यर्थाद्दवगम्यते। अन्यथा केवलस्य गुणकथनं निष्फलमेव स्यादिति केचिदाहुः॥ २९-३२॥

दही के गुण—

वि०—दही के गुण—दही विपाक और रस में अम्ल, ग्राही, गुरु, उष्ण एवं वातनाशक है। मेद-शुक्र-बल-कफ-पित्त-रक्त और अग्नि को बढ़ाता और शोफ को उत्पन्न करता है। भोजन में रुचिदायक है अतः अरुचि में उत्तम है, शीतज्वर, विषमज्वर, पीनस और मूत्रकृच्छ्र में उत्तम है। ग्रहणी रोग में रूक्ष दधि (जिसमें से स्नेह भाग निकाल लिया हो) उत्तम है।

दही रात में नहीं खाना चाहिये; गरम दही नहीं खाना चाहिए तथा वसन्त, ग्रीष्म और शरद में दही नहीं खाना चाहिये। मूंग की दाल के बिना, मधु के बिना, घी और शर्करा के बिना, आँवले के बिना तथा प्रतिदिन दही नहीं खाना चाहिये। एवं मन्द दही (जो पूरी तरह नहीं जमा) नहीं खाना चाहिये। इस विधि के विपरीत दही खाने पर ज्वर, रक्तपित्त, विसर्प, कुष्ठ, पाण्डु और भ्रम उत्पन्न होते हैं॥ २९-३२॥

वक्तव्य—दही के सर (मलाई) के गुण—'त्रिदोषं मन्दकं जातं वातघ्नं दधि शुक्रलम्। सरः श्लेष्मानिलघ्नस्तु मण्डः स्रोतोविशोधनः॥' सर-मलाई; मण्ड-नीचे का भाग। भोजन में रुचि करने के लिये षड्यूष में दही को बरतते हैं। दूध के समान गाय, भैंस आदि के दही के गुणों में भी अन्तर दूसरे ग्रन्थों में वर्णित है।

तक्रं लघु कषायाम्लं दीपनं कफवातजित्॥ ३३॥
शोफोदरार्शोग्रहणीदोषमूत्रग्रहारुचीः।
प्लीहगुल्मघृतव्यापद्गरपाण्ड्वामयाञ्जयेत्॥ ३४॥

स०—तक्रं लघु कषायाम्लं दीपनं कफवातजिच्च भवति। तथा शोफादीनेकादश जयेत्। घृतस्यापि पानाद्व्यापद्रोगो घृतव्यापत्। गरः कृत्रिमो विषविशेषः। सुश्रुते चोक्तम्। नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले। न मूर्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके। शीतकालेऽग्निमांद्ये च कफोत्थेष्वामयेषु च। मार्गे विरोधे दुष्टे च वायौ तक्रं प्रशस्यते। तथोक्तम्। तक्रमामं कफं कोष्ठे हंति कंठे करोति च। पीनसश्वासकासादौ सिद्धमेवोपयोजयेदिति। मंदजातं मरुत्कोपि रूक्षाभिष्यंदि दुर्जरम्। अतिजातं भृशाम्लौष्ण्यतैक्ष्ण्यात्पित्तकरं परम्। दोषघ्नमुद्धृतस्नेहं सस्नेहमपि शोफजित्। वातेऽम्लं सैंधवोपेतं स्वादु पित्ते सशर्करम्। हितं पथ्यं कफे साम्लं व्योषसौवर्चलान्वितम्। तक्राल्लघुतरो मंडो दुर्जरा तक्रकूर्चिकेति॥ ३३-३४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तक्र के गुण—

वि०—तक्र (मट्ठा) के गुण—तक्र लघु, कषाय, अम्लरस, अग्निदीपक और कफ तथा वात नाशक है। शोफ, उदर, अर्श, ग्रहणी रोग, मूत्र और अरुचि को नष्ट करता है। प्लीहा, गुल्म, घृतजन्य रोग, गर (कृत्रिम) विष और पाण्डु रोग को शान्त करता है ३३-३४

वक्तव्य—तक्र के भेद–'ससरं निर्जलं घोलं, तक्रं पादजलान्वितम् । अर्धोदकमुदश्वित्स्यान्मथितं सरवर्जितम् ॥ घोलं पित्तानिलहरं, तक्रं दोषत्रयापहम् । उदश्वित्श्लेष्मलं चैव, मथितं कफपित्तनुत्' ॥ ग्रहणी रोग के लिये तक्र—'तक्रं तु ग्रहणीदोषे दीपनं ग्राहि लाघवात् । श्रेष्ठं मधुरपाकित्वान्न च पित्तं प्रकोपयेत् ॥ कषायोष्णं विकासित्वाद् रौक्ष्याच्चैव कफे हितम् । वाते स्वाद्वम्लसान्द्रत्वात् सद्यस्कमविदाहि तत्' ॥ तक्र को सैन्धव, हींग के साथ मधुर रूप में लेना चाहिये, खट्टा तक्र हानिकारक है, यथा—'शशिकुन्दसमुज्ज्वलशङ्खनिभं, युवतीकरनिर्मितनिर्मथितम् । घृतसैन्धवहिङ्गुयुतं मधुरं पिब तक्रमहो नृप रोगहरम् ॥'[1]

तद्वन्मस्तु सरं स्रोतःशोधि विष्टम्भजिल्लघु ।

स०—मस्तुं तद्वत्तक्रवद्गुणैर्वेद्यम् । तथा सरं तथा स्रोतःशोधि तथा विष्टंभजित् । सुश्रुते चोक्तम् । तृष्णाक्लमहरं मस्तु लघु स्रोतोविशोधनम् । अम्लं कषायानुरसमवृष्यं कफवातजित् । आह्लादनं प्रीणनं च भिनत्त्याशु मलं च तत् । बलमावहति क्षिप्रं तथा भक्तस्य रोचनम् ।

दही के तोड़ के गुण—

वि०—मस्तु (दही का तोड़ पानी) भी तक्र के समान है, किन्तु मलों का अनुलोमक, स्रोतों का शोधन करने वाला, विष्टम्भजित् (वायु का अनुलोमक) और लघु होता है।

नवनीतं नवं वृष्यं शीतं वर्णबलाग्निकृत् ॥ ३५ ॥
सङ्ग्राहि वातपित्तासृक्क्षयार्शोर्दितकासजित् ।

स०—नवनीतं नवं नवोद्धृतं लघुं वृष्यं च तथा शीतं शीतवीर्यं बलवर्णाग्निकरं तथा संग्राहि वातादिजिच्च । संग्रहे चोक्तम् । शीतं स्वादु कषायाम्लं नवनीतं नवोद्धृतमित्यादि ॥ ३५ ॥

नवनीत के गुण—

वि०—मक्खन—दही से ताजा निकाला मक्खन वृष्य, शीतल, वर्ण, बल और अग्नि को बढ़ाने वाला एवं संग्राही है; वात, पित्त, रक्त, क्षय, अर्श, अर्दित और कासनाशक है ॥३५॥

क्षीरोद्भवं तु संग्राहि रक्तपित्ताक्षिरोगजित् ॥ ३६ ॥

स०- क्षीरोद्भवं तु क्षीरादेव जातं मथित्वा तन्नवनीतं संग्राहि रक्तपित्ताक्षिरोगजिच्च भवति ॥ ३६ ॥

दूध के मक्खन के गुण—

वि०—जो मक्खन दूध में से निकाला गया है, वह संग्राही, रक्तपित्त और नेत्ररोगनाशक है ॥ ३६ ॥

वक्तव्य—मक्खन दो प्रकार का है, क्षीरोद्भव और दधिमथनोद्भव। प्रथम को लोक में मक्खन और दूसरे को नवनीत या नैनू कहते हैं। इसी प्रकार घी भी दो प्रकार का है।

शस्तं धीस्मृतिमेधाग्निबलायुःशुक्रचक्षुषाम् ।
बालवृद्धप्रजाकान्तिसौकुमार्यस्वरार्थिनाम् ॥ ३७ ॥
क्षतक्षीणपरीसर्पशस्त्राग्निग्लपितात्मनाम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥ ३८ ॥
स्नेहानामुत्तमं शीतं वयसः स्थापनं परम् ।
सहस्रवीर्यं विधिभिर्घृतं कर्मसहस्रकृत् ॥ ३९ ॥

स०—घृतं धीप्रभृतीनामग्निग्लपितात्मांतानां शस्तम् । धीर्वस्तुग्रहणशक्तिः । स्मृतिरतीतविचारशक्तिः । प्रजार्थिनां शस्तम् । प्रजाऽपत्यं तदर्थिनाम् । शुक्रस्य सफलताकरमित्यर्थः । तथा वातादिघ्नम् । तथा स्नेहानां तैलादीनामुत्तमं श्रेष्ठम् । तथा शीतम् । वयसः स्थापनं जरया विना वयसः स्थापनमित्यर्थः । सहस्रवीर्यमिति । सहस्रशब्दोऽनेकार्थः । अनेकशक्तीत्यर्थः । कथं विधिभिर्योगसंस्कारादिभिर्घृतमनेकशक्ति संपद्यते । येन द्रव्येण प्रयुज्यते संस्क्रियते वा तच्छक्तिमेवाऽनुरुध्यते । अथवा तत्संयोगाच्छक्त्यंतरमन्यदारोहति । अत एव हेतोः सहस्रशब्दोऽनेकार्थः । अन्यथा द्रव्याणामानंत्यात्कथं दशशतवाची सहस्रशब्द उपपद्यते । अन्ये त्वेवं व्याचक्षते । सहस्रशब्दो दशशतसंख्यावाच्येव । सहस्रवाक्यं हि सर्पिरुक्तं न सहस्रपाक्यात्परेण । तत्र चेदं सहस्रपाक्यत्वे प्रयोजनम् । पाकसहस्रं यावदस्य संस्कारोऽनुवर्तते नातःपरम् । अन्यथा सहस्रपाकात्परेण किमिति पाको नोक्तः । तस्मादासहस्रं पाकानां शक्त्यन्तराण्यारोहन्ति पाका न ततः परेणेति । तथा कर्मसहस्रकृदनेककार्यकृत् ॥ ३७–३९ ॥

घृत के गुण—

वि०—घी के गुण—घी धी, स्मृति, मेधा, अग्नि, बल, आयु, शुक्र, आँख, बालक और वृद्ध इनके लिये उत्तम है। प्रजा (सन्तान), कान्ति, सुकुमारता एवं स्वर की चाह वालों के लिये प्रशस्त है। क्षतक्षीण, विसर्प, शस्त्र, अग्नि (अग्निदग्ध) इनसे दुखी (निराश हुए) व्यक्तियों के लिये उत्तम है। वात, पित्त, विष, उन्माद, शोष; अलक्ष्मी और ज्वरनाशक है। सब स्नेहों में घी श्रेष्ठ है, शीतल है, वय को स्थिर रखने (रसायन) में श्रेष्ठ है। घी अनेक शक्तिवाला है। (योग, संस्कार, पान, अभ्यङ्ग, अनुवासन आदि विधियों से) विधिपूर्वक देने पर हजारों कार्य करता है ॥ ३७–३९ ॥

वक्तव्य—सब स्नेहों में घी को उत्तम माना है, क्योंकि घी संस्कार[1] का अनुवर्तन कर लेता है, दूसरे स्नेह इस

१. वातेऽम्लं सैन्धवोपेतं स्वादु पित्ते सशर्करम् ।
पिबेत्तक्रं कफे चापि व्योषक्षारसमन्वितम् ॥

१. नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्तते ।
यथा सर्पिरतः सर्पिः सर्वस्नेहोत्तमं मतम् ॥ (च. नि. १)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकार उत्तमता से अनुवर्तन नहीं करते, यथा—'सर्पिस्तैलं वसा मज्जा सर्वे स्नेहोत्तमा मताः । एषु चैवोत्तमं सर्पिः संस्कारस्यानुवर्तनात' । च० सू० अ० १३।१३

चरक ने दूध-घी के अभ्यास को रसायनों में श्रेष्ठ माना है—'क्षीरघृताभ्यासो रसायनानाम्' ।

मदापस्मारमूर्च्छायांशिरःकर्णाक्षियोनिजान् ।
पुराणं जयति व्याधीन् व्रणशोधनरोपणम् ॥ ४० ॥

स०—पुराणमिति च बहुकालं पंचदशादिवर्षस्थितं घृतं मदादीन् व्याधीन् जयति । व्रणानां शैथिल्यादीन् शोधयति । तथा व्रणान् रोपयति । संग्रहे चैवमभ्यधैष्ट । व्रणशोधनरोपणम् । पूर्वोक्तांश्चाधिकान्कुर्याद्गुणांस्तदमृतोपमम् । तद्वच्च घृतमंडोऽपि रूक्षतीक्ष्णस्तनुस्तु स इति ॥ ४० ॥

पुराने घृत के गुण—

वि०—पुराण घृत—पुराना घी मद, अपस्मार, मूर्च्छा, शिरो-रोग, कर्णरोग, नेत्ररोग और योनिरोगों को नष्ट करता है यह व्रण का शोधन और रोपण करता है ॥ ४० ॥

वक्तव्य—'उग्रगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम् । लाक्षारसनिभं शीतं प्रपुराणमतः परम्' ॥ घृतमण्डः—विलीनघृतस्योपरितनो घनीभूतभागः ।' संग्रह में—'तद्वच्च घृतमण्डोऽपि रूक्षस्तीक्ष्णस्तनुस्तु सः' ॥

सामायतः दस वर्षों तक रक्खे घी को पुराण घृत कहते हैं, उसके बाद वह प्रपुराण कहलाता है । सुश्रुत ने ग्यारह से सौ वर्षों तक पुराने घी को कुम्भघृत तथा उसके आगे महाघृत कहा है—'एकादशशतञ्चैव वत्सरानुषितं घृतम् । रक्षोघ्नं कुम्भसर्पिः स्यात् परतस्तु महाघृतम् ॥ सु. सू. ४५

बल्याः किलाटपीयूषकूर्चिकामोरणादयः ।
शुक्रनिद्राकफकरा विष्टम्भिगुरुदोषलाः ॥ ४१ ॥

स०—किलाटादयो बल्यास्तथा शुक्रादिकरास्तथा विष्टंभिनो गुरवो दोषलाश्च स्युः । आदिग्रहणात्तक्रपिंडकक्षीरशाकयोर्ग्रहणम् । वह्निनाशकत्वं चैषां बल्यत्वेन शुक्रकृत्वेन विष्टंभिदोषलत्वेनाऽवगतमेवेति वह्निनाशना इति ग्रन्थकृता नेह कृतम् । संग्रहे तु स्पष्टार्थं कृतमेव । तत्र किलाटोऽल्पक्षीरो बहुना तक्रेण कृतः । पीयूषः सद्यःप्रसूतायाः क्षीरकृतः । कूर्चिका दधितक्रकृता किलाटिका । मोरणः क्षीरसदृशः किलाटिकापीडन उत्तरापथे प्रसिद्धः ॥ ४१ ॥

किलाट के गुण—

वि०—किलाट, पीयूष, कूर्चिका, मोरण (ट) आदि भक्ष्य-बलकारक, शुक्र एवं निद्राकारक, कफकारक, विष्टम्भी, गुरु और दोषों को करने वाले हैं ॥ ४१ ॥

वक्तव्य—किलाट-थोड़े से दूध में बहुत दही या तक्र मिलाकर बनाया जाता है । 'स्वल्पक्षीरो बहुना तक्रेण कृतः' (अरुणदत्त) । पीयूष-तुरन्त प्रसूता गाय का दूध जब तक साफ नहीं होता । कूर्चिका (छेना) दही या तक्र से दूध को फाड़ने पर घन भाग को कूर्चिका कहते हैं । मोरण (ट) फटे दूध का द्रव भाग मोरण (ट) । अथवा प्रसूता गाय का सात दिन के पश्चात् का दूध मोरण है; यथा—'सप्तरात्रात्परं क्षीरमप्रप्रसन्नं च मोरणम् ।' सुश्रुत में तक्रकूर्चिका के भी गुण दिये हैं ।; यथा—'ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका ।' दोषलाः का अर्थ आमकारक है, आम का सञ्चय करने वाले हैं ।

गव्ये क्षीरघृते श्रेष्ठे निन्दिते चाविसम्भवे ।

स०—गोसंभवे क्षीरघृते श्रेष्ठे । आविके च निंदिते गर्हिते । घृतस्य च क्षीरविकारोपलक्षणार्थत्वाद्धितक्रमस्त्वादीनामपि गव्यानां श्रेष्ठत्वमेव वेद्यम् । अत एवाविसंभवानां दधितक्रादीनामधमत्वमेव वेद्यं न क्षीरघृतयोरेव । अत एव संग्रहे सुस्पष्टं कृत्वोक्तम् । विद्याद्दधिघृतादीनां गुणदोषान्यथा पयः । अस्य ह्ययमर्थः । घृतादीनां पयोगुणान्विद्यात । यथा शब्दस्य पदार्थानतिवृत्त्यर्थेऽस्याव्ययीभावः । तेनैतदुक्तं भवति । यथा स्वादुपाकरसमित्यादिना सामान्येन क्षीरगुणा उक्तास्तद्वद्दध्यादीनामपि सामान्येनैव गुणा उक्ता । विशेषाभिलाषे तु दध्यादीनां सत्स्वपि सामान्यगुणेषु प्रकृतिभूतं यत्क्षीरं तद्गुणोच्चयोऽपि ग्राह्य इति । खरनादे तूक्तम् । दध्यादीनां तु तज्जानां सामान्ये गुणकर्मणी । तथा स्वात्स्वादपि क्षीराद्दध्यादीनां विशेषणम् । गव्यमिति गोपयसोर्यदिति यत् । बाहुल्येन क्षीरनिर्देशात्क्षीरवर्गोऽयम् । दधिनवनीतादीनां तु तद्विकारभूतत्वादिति क्षीरवर्गः ।

गौ के दूध तथा घृत की श्रेष्ठता—

वि०—दूध और घी गाय के श्रेष्ठ हैं, भेड़ के दूध और घी निन्दित हैं ।

वक्तव्य—दधि, घृत आदि के गुण-दोषों को इनके दूध के अनुसार ही समझना चाहिए । संग्रह में कहा भी है—विद्याद्दधिघृतादीनां गुणदोषान् यथा पयः ॥' चरक में—'गव्यं सर्पिः सर्पिषां, गोक्षीरं क्षीराणां श्रेष्ठतमे । आविकं सर्पिः सर्पिषाम्, अविक्षीरं क्षीराणाम् अपथ्यतमत्वेनाप्रकृष्टतमे भवन्ति ॥'

अथेक्षुवर्गः ।

क्षीरवर्गादनंतरमिक्षुवर्ग आरभ्यते । गुणक्रियातुल्यत्वात् । तथाहीक्षुरपि क्षीरवत्सरगुरुस्निग्धबृंहणादिगुणकर्मा—

इक्षोः सरो गुरुः स्निग्धो बृंहणः कफमूत्रकृत् ॥४२॥
वृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसो रसः ।

स०—इक्षो रसः सरत्वादिगुणयुक्तः । तथा कफमूत्रकृत् । सरः शकृद्भेदी कथ्यते । तथा गुर्वी सरा च पालंक्येत्युक्तवानंतरमुक्तवान् । पालंक्यावत्स्मृतश्चंचुः स तु संग्रहणात्मक इति चंचुशाकस्य संग्रहणेन गुणेन सरत्वं बाधितमिति । अत्र स्निग्धबृंहणवृष्यमधुरादिगुणेन युक्तं च द्रव्यं प्रायः पवनहंतृ दृष्टम् । अतोऽस्यापीक्षुरसस्य मारुतजित्वं वेद्यम् । ग्रंथकृता तु स्पष्टं कृत्वा नोक्तम् । भुक्ते हि समीरणकृत्त्वमस्य दृष्टम् । तथा संग्रहे वृष्यः शीतः पवनजिद्भुक्ते वातप्रकोपन इति । खरनादेऽप्युक्तम् । मारुताऽऽध्मानजनश्चक्षुष्यो बृंहणो रस इति ॥ ४२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गन्ने के रस का गुण—

वि०—गन्ने का रस—मृदुरेचक, गुरु, स्निग्ध, बृंहण, कफकारक एवं मूत्रल, वृष्य, शीतल, रक्त-पित्तनाशक, मधुर-विपाक और मधुररस है ॥ ४२ ॥

वक्तव्य—मधुर होने पर भी शीतल होने के कारण इक्षुरस वायु का प्रकोप करता है; इसी से खरनाद ने 'मारुताध्मान-जननश्चक्षुष्यो बृंहणो रसः ॥' लिखा है। लोक में इसीलिये आर्द्रक मिलवाकर पीते हैं, जिससे वायु का प्रकोप न हो।

सोऽग्रे सलवणो, दन्तपीडितः शर्करासमः ॥ ४३ ॥

स०—स च रसोऽग्र इक्षुप्रांते जातः सलवणः। सुश्रुते चोक्तम्—अतीव मधुरो मूले मध्ये मधुर एव च। अग्रे त्वक्षिषु विज्ञेयं इक्षूणां लवणो रस इति। पाषाणादिसंक्षुण्णस्येक्षोः सद्य एव यो रस उत्पद्यते। तस्यैते यथोक्ता गुणवेद्या नान्यथा पीडितस्येक्षुरसस्य। यंत्रदंतादिपीडितस्याऽन्यथा शास्त्रकृता गुणो निर्दिश्यते। दंतपीडितः शर्करासम इति ॥ ४३ ॥

वि०—इक्षु अग्रिम भाग में ईषल्लवण होता है; दाँतों से चूसकर पीने पर शर्करा के समान गुण करता है ॥ ४३ ॥

वक्तव्य—सुश्रुत में—'अतीव मधुरो मूले मध्ये मधुर एव च। अग्रेऽक्षिषु च विज्ञेय इक्षूणां लवणो रसः ॥' सु. उ. ४५।-१५६। 'मध्यकाण्डे सुमाधुर्यमिक्षोर्मूलाग्रपर्वसु। माधुर्यं साम्ल-लवणं विदाही तेन यान्त्रिकः ॥'

यांत्रिकस्त्वन्यगुण एवेत्याह—

मूलाग्रजन्तुजग्धादिपीडनान्मलसङ्करात्।
किञ्चित्कालं विधृत्या च विकृतिं याति यान्त्रिकः ॥४४॥
विदाही गुरुविष्टम्भी तेनासौ—

स०—मूलं चाग्रं च जंतुजग्धादयश्च मूलाग्रजंतुजग्धाद-यस्तेषां तथाविधानामिक्षूणां पीडनं तस्मान्मूलाग्रजंतुजग्धादि-पीडनात्तथा मलसंकरान्मलमिश्रणात्तथा किंचित्कालं विधृत्या च यांत्रिके रसे स्वल्पकालं विधृतिविलंबश्च दृष्टः। तदेतैः कारणैर्यांत्रिको रसो विकृतिं याति स्वाभावान्यथात्वं प्राप्नोति। तथा गुरुरधिकं गुरुः संपद्यते। अविदाही विदाही। अविष्टंभी विष्टंभीत्येवंविधाऽस्य विकृतिः। यांत्रिकस्य च रसस्य बाहुल्येन लोके मूलादिसहितस्य पीडनात्कालविलंबोपलब्धेश्च ग्रंथकृदेवं समवोचत्। अत एव हेतुनिर्देशोऽत्र कृतो हेत्वभावात्कार्या-भावप्रतिपत्तिज्ञापनार्थमिति। तेन यदि निपुणधीभिर्मूलादि-रहितः पीड्यते तदा विकृतिं न यास्येवेत्यर्थः। विदाहीत्यादि। यतो विकृतिं याति तेन हेतुनाऽसौ यांत्रिको विदाह्यादिगुणः संपद्यते। विदाही जठराग्नि संयोगाद्यः पाकं गच्छन्मध्यमाया-मेवावस्थायां विदह्यमानः पित्तं कुर्वंश्चिरकालमवतिष्ठते न द्रागेव जरां याति गुरुत्वादथवा वस्तुस्वभावात्स विदाहगुण-युक्तोक्त्या वितन्यते। तस्माद्गुरुस्वाभावाद्विदाही कथितः। तथा चोक्तं धान्वंतरे। शालिपिष्टमयं सर्वं गुरुभावाद्विदह्यत इति ॥ ४४ ॥

वि०—यांत्रिक-रस—मूलभाग, अग्रभाग, कृमि आदि से खाये हुए भाग आदि सब के एक साथ में पिसने से; (यन्त्र में लगे जंग या तैल के मैल आदि) मलों के मिलने से; और कुछ काल तक पड़े रहने के कारण कोल्हू का रस बिगड़ जाता है। इस लिये यह रस विदाह करनेवाला, गुरु और विष्टम्भी होता है ॥ ४४ ॥

—तत्र पौण्ड्रकः।
शैत्यप्रसादमाधुर्यैर्वरस्तमनु वांशिकः ॥ ४५ ॥

स०—तत्र तेषु रसेषु मध्ये पौंड्रको रसो वरः सर्वेक्षु-रसेभ्यः श्रेष्ठः। कथं शैत्यादिभिर्हेतुभूतैः। शीतस्य भावः शैत्यम्। गुरुवचनेत्यादिना ष्यञ्। प्रसादः प्रसन्नत्वम्। माधुर्यं स्वादुता। तमनुवांशिकः। हीनार्थेऽनुशब्दस्य कर्मप्रवचनीय-युक्त इति द्वितीया। शैत्यादिभिः पौंड्रकाद्धीनो वांशिक इत्यर्थः ॥ ४५ ॥

वि०—पौण्डा—शीतल, निर्मलता और मधुरता की दृष्टि से सब में श्रेष्ठ है; बाँस गन्ना पौण्डे से हीन होता है ॥ ४५ ॥

शतपर्वककान्तारनैपालाद्यास्ततः क्रमात्।
सक्षाराः सकषायाश्च सोष्णाः किञ्चिद्विदाहिनः ॥४६॥

स०—शतपर्वकादयस्ततो वांशिकात्क्रमादुत्तरोत्तरं शैत्यादिभिर्हीनाः। ते च शतपर्वकादय ईषत्क्षारत्वेन युक्ता ईषत्कषायरसा ईषदुष्णाः, किंचिद्विदाहिनश्च ॥ ४६ ॥

वि०—बाँस गन्ने के बाद शतपर्वक, कान्तार, नैपाल आदि क्रम से हीन होते हैं; ये ईषत्क्षारयुक्त, ईषत्कषायरस, कुछ उष्ण और थोड़ा विदाह करने वाले होते हैं ॥ ४६ ॥

फाणितं गुर्वभिष्यन्दि चयकृन्मूत्रशोधनम्।

स०—फाणितं क्षुद्रगुडीभूतइक्षुरसो गुरुः। अतिशयेने-त्यर्थाद्बोध्यम्। गुरुत्वमात्रस्येक्षुरसेऽप्युक्तत्वात्। अभिष्यंदि तथा चयकृत् त्रिदोषकरं मूत्रशोधनं मूत्रमतिवाहयति। तंत्रान्तरे चोक्तम्। रूक्षं मधूकपुष्पोत्थं फाणितं वात्तपित्तकृत्। कफघ्नं मधुरं पाके कषायं बस्तिदूषणम् ॥

फाणित (राब) के गुण—

वि०—फाणित (राब)—गुरु, अभिष्यन्दि, त्रिदोषकारक और मूत्रल है।

वक्तव्य—गन्ने के रस की विकृतियाँ पाँच हैं, यथा—'फाणितगुडमत्स्यण्डीखण्डशर्कराः।' फाणित (राब), गुड़, मत्स्यण्डी (गीली खांड), खण्ड (खांड या मियाना), शर्करा, (शक्कर या चीनी)।

नातिश्लेष्मकरो धौतः सृष्टमूत्रशकृद् गुडः ॥ ४७ ॥
प्रभूतकृमिमज्जासृङ्मेदोमांसकफोऽपरः।

स०—गुडो धौतः संस्कारवशान्निर्मलो नातिश्लेष्मकरः। किंचित्कफकर इत्यर्थः। मूत्रं च शकृच्च मूत्रशकृत। सृष्टं बहिः क्षिप्तं मूत्रशकृद्येन स एव गुडः। अपर इति धौताद्विशुद्धा-दन्यः। समल इति यावत्। प्रभूताः कृमिमज्जासृङ्मेदोमांस-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कफा यस्य स एवम्। कारणे कार्योपचारद्गुडोऽप्येवमुक्तः। यथाऽनुपोदकं पादरोग इति । प्रभूतकृम्यादीन्करोतीत्यर्थः ॥ ४७ ॥

गुड़ के गुण—

वि०—अच्छी प्रकार निर्मल किया गुड़ कफ को थोड़ा बढ़ाता है; मूत्र और मल को बाहर निकालता है। अशुद्ध गुड़ कृमि, मज्जा, रक्त, मेद; मांस और कफ को प्रचुर मात्रा में उत्पन्न करता है ॥ ४७ ॥

वक्तव्य—गुड़ चार प्रकार का है—धौत, अधौत, पुरातन और नूतन।

हृद्यः पुराणः पथ्यश्च, नवः श्लेष्माग्निसादकृत् ॥४८॥

स०—गुड इत्यनुवर्तते। पुराणो गुडो हृदयाय हितः। तथा पथ्यः। अंतर्मध्यबहिर्मार्गाय हितः। नवो गुडः श्लेष्माणमग्निसादं करोति ॥ ४८ ॥

वि०—पुराना गुड़—हृदय के लिये प्रिय और पथ्य (स्वास्थ्यहित) है। नूतन (जिसे एक साल नहीं हुआ) गुड़ कफ और अग्निमान्द्य उत्पन्न करता है ॥ ४८ ॥

वृष्याः क्षीणक्षतहिता रक्तपित्तानिलापहाः।
मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तमाः ॥ ४९ ॥

स०—मत्स्यंडिकादयस्त्रयो वृष्यास्तथा क्षीणक्षतहिता रक्तपित्तानिलापहाश्च तथा क्रमेण गुणवत्तमाः। धौतगुडादपि मत्स्यंडिका गुणकारी निर्मलतरत्वात् । ततोऽपि खंडो गुणवत्तरः। खंडादपि शर्करा गुणवत्तमा निर्मलतमत्वात्। गुणवत्तमेति गुणवतीशब्दस्य तमप्प्रत्यये पुंवद्भावोऽत्र पक्षे च वक्तव्य इति पुंवद्भावः ॥ ४९ ॥

शक्कर, मिश्री आदि के गुण—

वि०—मत्स्यण्डिका, खण्ड और सिता–ये वृष्य, क्षीणक्षतरोगी के लिये हितकारी, रक्त-पित्त और वायुनाशक हैं तथा उत्तरोत्तर गुणों में श्रेष्ठ हैं ॥ ४९ ॥

वक्तव्य—सुश्रुत में कहा भी है–'यथा यथैषां वैमल्यं मधुरत्वं तथा तथा। स्नेहगौरवशैत्यानि सरत्वं च तथा तथा ॥'

तद्गुणा तिक्तमधुरा कषाया यासशर्करा।

स०—तद्गुणेति। शर्करासमा यासशर्करा यवासशर्करेति या लोके प्रसिद्धा तिक्तमधुरकषायरसा च। केचित्त्वाचक्षते। दुरालभारसेन या क्रियते।

जवासे के शक्कर (तुरंजबीन) का गुण—

वि०—यास-शर्करा—शर्करा के समान गुण वाली, तिक्त, मधुर और कषाय रस है।

दाहतृट्छर्दिमूर्च्छासृक्पित्तघ्न्यः सर्वशर्कराः ॥५०॥

स०—इत्येताश्चान्याश्च दाहादिनाशनाः । ग्रंथांतरे चोक्तम् । यथा यथाऽऽसां वैमल्यं मधुरत्वं यथा यथा। स्नेहलाघवशैत्यादिसरत्वं च तथा तथेति ॥ ५० ॥

अन्य शर्करा के गुण—

वि०—सब प्रकार की शर्करायें—प्यास, जलन, वमन, मूर्च्छा एवं रक्त-पित्तनाशक हैं ॥ ५० ॥

अधुना वरावरत्वं निर्धारयति—

शर्करेक्षुविकाराणां फाणितं च वरावरे।

स०—इक्षुविकाराणां मध्ये शर्करा फाणितं च क्रमेण वरावरे भवतः। शर्करा श्रेष्ठा फाणितमवरम्।

शर्करा और फाणित का अन्तर—

वि०—गन्ने से बनी वस्तुओं में शर्करा सबसे श्रेष्ठ है और राब सबसे निकृष्ट है।

शर्करायोनिप्रसंगेन मधुनोऽपि गुणानाह—

चक्षुष्यं छेदि तृट्श्लेष्मविषहिध्मास्रपित्तनुत् ॥ ५१ ॥
मेहकुष्ठकृमिच्छर्दिश्वासकासातिसारजित् ।
व्रणशोधनसन्धानरोपणं वातलं मधु ॥ ५२ ॥
रूक्षं कषायमधुरं, तत्तुल्या मधुशर्करा।

स०—मधु चक्षुषे हितम्। तथा छेदि। उभयथाऽऽश्चोतनव्रणलेपादावुपयुक्तम् । तथाऽभ्यवहारविषयेऽपि । तैक्ष्ण्याद्यो देहे विहितान् भावान् छिनत्ति विभजति स छेदीति कथ्यते। तथा तृडादिनुत् मेहादिजिदिति च । प्रायेणाऽभ्यवहारविषय एव। व्रणानां शोधनं संधानं रोपणं च। शोधनं यत्पूयपैच्छिल्यादिप्रेरकम्। संधानं यद् द्वौ व्रणौ चैकीकरोति। रोपणं सुप्रसिद्धम्। एतच्च कार्यं बाह्यविषयमेवाऽस्य वेद्यम्। तथा वातलमेतच्चास्य बाह्योपयोगेनाभ्यंतरोपयोगेन च। अन्ते व्यस्तश्रुतत्वात्। चक्षुष्यं छेदीत्यादिनास्य मधुनः कर्मनिर्देशः । रूक्षं कषायमधुरमित्यनेनास्य स्वरूपनिर्देशः। लाघवाच्चात्र ग्रंथकारेणैतद्भेदादि नोक्तम्। तथा ह्ययमेव तंत्रकारः संग्रहे मधुनो भेदानाख्यत्। तथा। भ्रामरं पैत्तिकं क्षौद्रं माक्षिकं तद्यथोत्तरम्। तत्र स्याद्भ्रामरं शुक्लं घृतवर्णं तु पैत्तिकम्। क्षौद्रं तु कपिलं विद्यात्तैलाभं माक्षिकं मतम्। भ्रामरं तर्पणं स्वादु त्रिदोषं पैत्तिकं विदुः। वरं च गुर्वभिष्यंदि क्षौद्रं रूक्षं मनाग्गुरु। माक्षिकं लघ्वपवनं मधुरं शस्यते व्रणे। गरीयः स्वाद्वभिष्यंदि नवं जीर्णमतोऽन्यथा। मंदः पुराणान्मधुनस्तीक्ष्णो रूक्षो लघुस्तनुरिति। तथा संग्रहे कटुपाकित्वगुरुत्वशैत्यविषान्वयत्वविरुद्धोपक्रमत्वयोगवाहित्वादीन् गुणानवोचत्। योगवाहित्वं च विवदन्ते बहुविदः। तत्र केचिदेवं समगिरंत। यद्द्रव्यं द्रव्यांतरेण संयुज्यात्मीयं स्वभावं हित्वा संयुक्तद्रव्यस्वभावमेवानुवर्तते तद्योगवाहीति। नचैतद्युक्तम्। यतो यद्येवं योगवाहिता निश्चीयते तदानीं योगवाहिद्रव्योपयोगो निरर्थकः स्यात्। तथाहि। योगवाहिद्रव्यमंतरेणापि यत्स्वभावं द्रव्यं प्रागासीत् तत्स्वभावमेव योगवाहिद्रव्ये युक्तमपि। तस्मादसदेतद्योगवाहिलक्षणमिति। केचित्त्वेवं प्रतिजानीते। यद्द्रव्यं द्रव्यांतरेण युक्तमन्यस्य द्रव्यस्य शक्त्युत्कर्षमुत्पादयति तद्योगवाहीति। तदप्यसम्यक्। यस्मादेवमभ्युपगम्यमाने बहूनि द्रव्याणि योगवाहीनि स्युः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथा च मध्वादेरपि द्रव्यस्य किंचिद्द्रव्यं समानगुणस्य शक्त्युत्कर्षं कुर्वदेव दृष्टम्। तत्कथं मध्वादेरेव योगवाहित्वमुच्यते नापरस्येति। तदेतदपि लक्षणमसच्छुतत्वादलक्षणम्। अपरे त्वेवमाहुः। यद्द्रव्यं द्रव्यांतरेण तुल्यगुणेनापि युक्तं सत्तद्गुणाननुवर्तते स्वं च कार्यं तदविरुद्धं किंचित्करोति तद्योगवाहि। द्रव्यम्। भृत्यवत्। यथा भृत्यः स्वामिकार्यमत्यजन् स्वकार्यमपि शरीरयात्रादिकं स्वाम्यविरुद्धं करोति तथैव मधु मदनफलसंयुक्तं वमनकार्यं करोति नतु वमननिवारणं मधुकार्यम्। एवं मधु हरीतकीसंयोगाद्विरेचनकार्यमेव करोति न मधुकार्यं स्तम्भनरूपमिति। ये तत्रैवं प्रतिपन्ना मदनफलादेः शक्त्युत्कर्षस्तथाविधोऽस्ति येन मधुसंबन्धिकार्यमवधूय स्वं कार्यं करोति ते चैवं चोदयन्तो भवन्तीति वंचनीयाः। यतः स्तम्भनद्रव्येणान्येन येन केनचित्संयुक्तस्य सुधाक्षीरस्यापि शक्तिः किंचिदपहीयमाना दृष्टा मधुनापि स्तम्भनस्वभावेना प्यस्य नापहीयते मनागपि। अतो मध्वादेरेव योगवाहित्वं नान्यस्य। अपि चान्यदा योगवाहि द्रव्यं त्रिवृतादि मदनफलेन युक्तं सद्विरेचनं वमनं चोभयकार्यं कुर्वद्दृष्टं न केवलं वमनमेव न विरेचनमेव तस्मान्मध्वादेरेव योगवाहित्वमिति स्थितमेतत्। तत्तुल्येति। मधुसमा गुणैर्मधुशर्करा ॥ ५१-५२ ॥

अथ मधुवर्गः।

मधु के गुण—

मधु के गुण—मधु आँखों के लिए उपयोगी, छेदन गुण वाला, प्यास, कफ, विष, हिक्का और रक्तपित्तनाशक, प्रमेह, कुष्ठ, कृमि, वमन, श्वास, कास और अतिसारनाशक, व्रणशोधक, व्रणसन्धायक, व्रण को भरनेवाला, वायुकारक, रूक्ष, कषाय और मधुर है। मधु-शर्करा के गुण मधु के समान हैं ॥ ५१-५२ ॥

वक्तव्य—मधु उत्पादक मक्खियों के भेद से चार या आठ प्रकार का है। यथा—'भ्रामरं पौत्तिकं क्षौद्रं माक्षिकं च यथोत्तरम्। तत्र स्याद् भ्रामरं शुक्लं घृतवर्णं तु पौत्तिकम्॥ क्षौद्रं तु कपिलं प्रोक्तं तैलाभं माक्षिकं स्मृतम्। भ्रामरं तर्पणं स्वादु त्रिदोषं पौत्तिकं विदुः। वरं च गुर्वभिष्यन्दि क्षौद्रं रूक्षं मनाग्गुरु। माक्षिकं लध्वपवनं मधुरं शस्यते व्रणे॥' छेदि—संहत हुए कफादि को टुकड़े-टुकड़े करके निकालने वाला। सन्धान—जोड़ने वाला। वातलम्—शुद्ध मधु हो तो वातकारक है, परन्तु वातनाशक वस्तुओं से मिला मधु हो तो वातशामक है। वायु और मधु दोनों योगवाही हैं, इसी से चरक में 'नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु।' स्थूल और कृश दोनों की चिकित्सा में मधु बरता जाता है। योगवाही द्रव्य भृत्य के समान कार्य करता है, अर्थात् जिस प्रकार भृत्य स्वामी का कार्य करता हुआ अपनी शरीरयात्रा-कार्य को भी साथ-साथ करता रहता है; उसी प्रकार योगवाही द्रव्य जिस द्रव्य के साथ मिलता है उसके कार्य को तथा अपने कार्य को भी करता है।

मधु-शर्करा—मधु को पात्र में रखने से जब उसका द्रव भाग शुष्क हो जाता है; तब जो भाग मधु का बचता है, वह दानेदार मधु-शर्करा है। इसी से हेमाद्रि ने 'वह्निपाकात्कालपाकाद्वा शर्करारूपतां गतं मधु मधुशर्करा।'

उष्णमुष्णार्तमुष्णे च युक्तं चोष्णैर्निहन्ति तत् ॥ ५३ ॥
प्रच्छर्दने निरुहे च मधूष्णं न निवार्यते।
अलब्धपाकमाश्वेव तयोर्यस्मान्निवर्तते ॥ ५४ ॥

स०—तन्मधु उष्णमुपयुक्तं सन्निहंति मारयति तथोष्णार्तं प्रतप्तं पुरुषं निहंति। उष्णे च काले देशे चोपयुक्तमुष्णैराहारादिभिश्च युक्तं सन्निहंति। तच्च मधु प्रच्छर्दने वमने तथा निरुहे च उष्णं न निवार्यते न निषिध्यते। यस्मात्कारणात्तयोर्वमिनिरूहयोरलब्धपाकमपक्वमेवाशु निवर्तते बहिरागच्छति। इतीक्षुवर्गः ॥ ५३-५४ ॥

उष्ण मधु के गुण—

वि०—गरम किया मधु, गरमी-धूप आदि से पीड़ित मनुष्य में दिया मधु, उष्ण समय में दिया मधु, उष्ण आहार के द्रव्यों (उष्ण स्पर्शवाले) के साथ प्रयुक्त मधु मारक (हानिकारक) होता है ॥ ५३-५४ ॥

वक्तव्य—मधु के साथ उष्णता का मेल नहीं है, यथा—'आमे सोष्मा क्रिया कार्या, सा मध्वामे विरुध्यते।' मधु—नाना प्रकार के पुष्पों से सञ्चित होने के कारण विषैले पुष्पों का भी योग सम्भव है तथा उसको बनाने वाली मक्खियाँ स्वयं सविष होती हैं अतः मधु में विष संसर्ग होता है और उष्णिमा से विष बढ़ता है, विष में उष्णिमा का निषेध है।

अपवाद—वमनकार्य में और निरूह वस्ति में उष्ण मधु का निषेध नहीं है, क्योंकि इन दोनों अवस्थाओं में पाक बिना हुए ही वह मधु शीघ्र ही वापिस निकल आता है अर्थात् इन अवस्थाओं में मधु का पाक नहीं होता, इसलिये हानि नहीं है।

सर्पिषोऽनन्तरं स्नेहसामान्यात्तैलवर्गो वक्तव्ये गुडस्य समानरसवीर्यविपाककर्मत्वात् प्रायेण चाहारद्रव्येषु भक्ष्यभोज्येष्वस्यैव तैलेभ्यः सारभोजनादिक्षुवर्गोऽत्रानिर्दिष्टः। भूरिभोजनोपयोगितया च मद्यात्प्राक् तैलवर्गो वक्तव्य इत्याह—

तैलं स्वयोनिवत्तत्र मुख्यं तीक्ष्णं व्यवायि च।
त्वग्दोषकृदचक्षुष्यं सूक्ष्मोष्णं कफकृन्न च ॥५५॥
कृशानां बृंहणायालं स्थूलानां कर्शनाय च।
बद्धविट्कं कृमिघ्नं च संस्कारात्सर्वरोगजित् ॥५६॥

स०—सर्वं तैलं स्वकारणसमगुणं भवति। यतो यदभिनिर्वृत्तं तत्स्वरूपमेवेत्यर्थः। तत्र तैलेषु मध्ये मुख्यं तिलोद्भवं यत्तैलं तत्तीक्ष्णं मन्दविपरीतम्। तथा व्यवायि व्याप्तिशीलम्। तथा त्वग्दोषकृत्पानाभ्यासेन त्वचं दूषयति। अचक्षुष्यं चक्षुषे हितं न भवति। सूक्ष्मं सूक्ष्मस्रोतोगामि। उष्णमुष्ण-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वीर्यम् । स्वयोनिवदित्यतिदेशात्कफकृत्त्वं प्राप्तमित्याह । कफकृन्न च कफं न करोति । संग्रहेऽप्युक्तम् । मेध्यस्तिलः स्पर्शशीतो मेध्यं तैलं खलो हिमः । तस्यैव श्लेष्मकर्तृत्वं न तैलस्य खलस्य चेति । पानकस्त्वायुर्वेदावतारेऽभिजगे । विपाके कटुकं तैलं वातघ्नं कफपित्तकृदिति । ननु च तैलमिति कथमस्य मुख्यं नाम । यतो यथा तिलस्य विकारः स्नेहस्तैलमित्युच्यते । तथैरंडादीनामपि यो विकारः स्नेहः सोऽपि तैलमित्युच्यते । मुनिरप्याह । अतैलमपि तैलमेव कृत्वोपदेक्ष्यते तैलप्राधान्यात्स्नेहप्राधान्यादिति यावत् । सामानाधिकरण्यप्रयोग एवोपपन्नः । यथा कौसुम्भं तैलमैरंडं तैलमिति अत्रोच्यते । तिलस्येदं वस्तु तैलमित्यन्वर्थता तिलोद्भवस्यैव तैलस्य संभवति न कौसुम्भादीनाम् । अपि च । कौसुम्भं तैलमित्यादौ तैलशब्दः कांडादिव्यवच्छेदपरः संभाव्यते । यथा कौसुम्भं तैलं न पत्रं कांडं चेति । इदं तैलं तैलमित्यत्र तु सामानाधिकरण्येन यदि तैलशब्दो निर्दिश्यते ततः पूर्वस्मात्तैलशब्दात्स्नेहाभिधायिनोऽधिकमर्थांतरं न वक्ति । नन्वत्राऽपि तैलशब्दः कस्मात्कांडादिव्यवच्छेदपरो न भवतीति चेत् । वयं ब्रूमः । रूढिरूपत्वात्तैलशब्दस्य स्नेहविषय एव तैलशब्दो रूढो न कांडपत्रादिविषये तिलस्य हि कांडं पत्रं वा न तैलमित्युमुच्यते किं तर्हि तिलपत्रं तिलकांडमिति । अत एव तैलशब्दोच्चारणस्य समनन्तरं स्नेहविषयैव धीर्जायते न पत्रकांडादिविषया । तस्मादस्यैवैतन्मुख्यं नाम युक्तम् । संस्कारानुवर्त्तित्वेन सर्वरोगजित्वाचास्य मुख्यत्वम् । तथा चोक्तम् । संस्कारात्सर्वरोगजिदिति । कुसुम्भादीनां तिलशब्दस्य च स्नेहनार्थवाच्ये विकारे स्नेहे तैलप्रत्यये सति सुकुम्भतैलमेरण्डतैलं तिलतैलमिति रूपं भवति । कृशानां पुंसां बृंहणाय बृहत्त्वायालं पर्याप्तं स्थूलानां च कर्शनायालम् । ननु कथमेकस्माद्वस्तुनो विरुद्धकार्यद्वयं कृशत्वबृंहणत्वरूपं स्यादिति ब्रूमः । कृशानां तावत्स्रोतांसि संकोचमायांति संकुचितस्रोतसां च नराणां तैलमन्तरेणाऽन्यानि द्रव्याणि बृंहणगुणयुक्तान्यपि न तथा प्रवेष्टुं समर्थानि भवन्ति । तैलं पुनः संकुचितानि स्रोतांसि तीक्ष्णादिभिर्गुणैर्झटित्येवं प्रविश्य शोधयति । स्रोतः शुद्ध्या च शरीरपुष्टिः । तथा च वक्ष्यति । स्रोतःसु तत्र शुद्धेषु रसो धातूनुपैति यः । तेन तुष्टिर्बलं वर्णः परं पुष्टिश्च जायत इति । तस्मात्कृशानां बृंहणायालमित्युपपन्नम् । तथा स्थूलानां सूक्ष्मस्रोतोगामित्वात्सर्वस्रोतःसु तैलं प्रविश्य तीक्ष्णोष्णादिगुणयोगान्मेदः क्षपयति तत्क्षपणाच्च कर्शनं संपद्यत इति स्थूलनां कर्शनाय चेत्युपपन्नम् । स्नेहादिगुणयोगात्तैलस्य बृंहणत्वसामर्थ्ये सिद्धे सति कृशानां बृंहणायालं स्थूलानां कर्शनाय चेत्युक्तं ज्ञापनार्थम् । यदित्थंभूतं तीक्ष्णादिगुणयुक्तमन्यदपि तत्कृशानां बृंहणायालं स्थूलानां कर्शनाय चेति । बद्धेत्यादि बद्धा विट् येन तद्बद्धविट्कम् । कप्समासांतः । ग्रंथितपुरीषमित्यर्थः । तथा कृमिघ्नम् । संस्कारादित्यादि । विशिष्टद्रव्यकृतसंस्कारमाश्रित्याशेषरोगजित् ॥ ५५-५६ ॥

अथ तैलवर्गः ।

तैल के सामान्य गुण

वि०—सब तैल अपने मूल द्रव्य के गुण वाले होते हैं- इनमें तिलतैल मुख्य है । यह तिलतैल तीक्ष्ण, व्यवायी है; (अन्तः प्रयोग के अभ्यास से) त्वग्दोष करने वाला, आँखों के लिये अहितकारक, सूक्ष्म, उष्ण है और कफकारक नहीं है । कृश पुरुषों का बृंहण करने में और स्थूल पुरुषों को कृश करने के लिये भी समर्थ है । मल को बाँधने वाला, कृमिनाशक है । संस्कार से सब रोगों को शान्त करता है ॥ ५५-५६ ॥

वक्तव्य—चरक में-'अतैलमपि तैलमेव कृत्वोपदेक्ष्यते, तैलप्राधान्यात् ।' सुश्रुत में-'निष्पत्तेस्तद्गुणत्वाच्च तैलत्वमितरेष्वपि' अर्थात् तिलों से तैल निकलता है ।[1] यह 'तैल' शब्द दूसरे द्रव्यों के स्नेह में भी प्रयुक्त होता है; यथा एरण्ड का तैल, सरसों का तैल । इनमें जिस द्रव्य से तैल निकलता है उस द्रव्य के गुण उस तैल में होते हैं । इन तैलों में तिल का तेल मुख्य है । यह तीक्ष्ण है, व्यवायी है, अर्थात् पहले शरीर में फैलकर पीछे से इसका पाचन होता है । त्वग्दोषकृत्-यह अन्तःपान में त्वचा को दूषित करता है । शिवदास जी ने 'त्वग्दोषहृदचक्षुष्यम्' जो पाठ दिया है, वहाँ अभ्यंग—बाह्योपचार से यह त्वग्दोषनाशक है । सूक्ष्म स्रोतों में जाने वाला है । स्निग्ध होने पर भी कफकारक नहीं है; यथा—'मेध्यस्तिलः स्पर्शशीतो मेध्यं तैलं खलो हिमः । तस्यैव श्लेष्मकर्तृत्वं न तैलस्य खलस्य वा ॥'

कृश पुरुषों को स्थूल करने में कारण—कृश पुरुषों के स्रोत संकुचित होते हैं; इन संकुचित स्रोतों को तैल अपने तीक्ष्ण आदि गुणों से तुरन्त खोल देता है; जिस प्रकार सूखा चमड़ा तैल लगाने से कोमल बन जाता है ।

स्थूल पुरुषों को कृश करने में कारण—तैल अपने सूक्ष्म गुण से स्रोतों में पहुँचकर मेद को कम करता है; इससे स्थूलता कम होती है । संस्कार से सब रोगों को शान्त करता है; अर्थात् ओषधियों के गुणों को अपने अन्दर ले लेता है । इसी से कहा है—'तैलं वातश्लेष्मप्रशमनानां श्रेष्ठतमम् ॥'

सतिक्तोषणमैरण्डं तैलं स्वादु सरं गुरु ।
वर्ध्मगुल्मानिलकफानुदरं विषमज्वरम् ॥ ५७ ॥
रुक्शोफौ च कटीगुह्यकोष्ठपृष्ठाश्रयौ जयेत् ।

स०—एरण्डतैलमीषत्तिक्तं कटु भवति तथा स्वादु मधुरं तथा सरं गुरु च । वर्ध्मेत्यादि । वर्ध्मादीन् जयेत् । कटीगुह्यकोष्ठपृष्ठस्थितौ रुक्शोफौ जयेत् ॥ ५७ ॥

१. विषान्वयत्वेन विषपुष्पेभ्योऽपि यतो मधु ।
कुर्वंते ते स्वयं यच्च सविषा भ्रमरादयः ।
गुरुरूक्षकषायत्वाच्छैत्याच्चाल्पं हितं मधु ॥
(संग्रह. सू. अ. ६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एरण्ड तैल के गुण—

वि०—एरण्ड का तैल—ईषत् तिक्त, ईषत्कटु, मधुर, विरेचक, गुरु, वर्ध्म (मुष्कवृद्धि), गुल्म, वात, कफ, उदर-रोग और विषमज्वर नाशक है। कटि, गुह्य भाग, कोष्ठ और पीठ के दर्द और शोथ को नष्ट करता है ॥ ५७ ॥

तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डोद्भवं त्विति ॥५८॥

स०—तच्च तीक्ष्णोष्णपिच्छिलं विस्रं च भवति। लोहितैरंडतैलं त्वतिशयेन तीक्ष्णादियुक्तम् ॥ ५८ ॥

रक्त एरण्डतैल के गुण

वि०—लाल एरण्ड का तैल—अति तीक्ष्ण, अति उष्ण, अति पिच्छिल और अति विस्र गन्धवाला है ॥ ५८ ॥

कटूष्णं सार्षपं तीक्ष्णं कफशुक्रानिलापहम्।
लघु पित्तास्रकृत् कोठकुष्ठार्शोव्रणजन्तु जित् ॥ ५९ ॥

स०—सर्षपाणामिदं सार्षपं तैलं कटूष्णं च भवति। तथा तीक्ष्णं कफशुक्रानिलापहं च। अपपूर्वाद्धंतेरन्येष्वपि दृश्यत इति डः। तथा च लघु पित्तास्रं च करोति तथा कोठादीन् जयति ॥ ५९ ॥

सरसों के तेल का गुण—

वि०—सरसों का तेल—कटु, उष्ण, तीक्ष्ण, कफ, शुक्र और वायुनाशक है; लघु, पित्त-रक्तविकार, कोठ, कुष्ठ, अर्श, व्रण और जन्तु (कृमि) नाशक है ॥ ५९ ॥

आक्षं स्वादु हिमं केश्यं गुरु पित्तानिलापहम्।

स०—अक्षाणां बिभीतकानामिदमाक्षं तैलं मधुरादिगुणयुक्तं पित्तानिलहृच्च।

बहेड़े के तेल का गुण—

वि०—बहेड़े का तैल—मधुर, शीतल, बालों के लिये हितकारी, गुरु, पित्त और वायुनाशक है।

नात्युष्णं निम्बजं तिक्तं कृमिकुष्ठकफप्रणुत् ॥ ६० ॥

स०—निंबोद्भवं तैलमतिशयेनोष्णं न भवति तथा तिक्तं तथा कृमिकुष्ठकफनाशनमतिशयेन ॥ ६० ॥

नीम के तेल का गुण—

वि०—नीम की निम्बोली का तेल—थोड़ा गरम, तिक्त, कृमि, कुष्ठ और कफनाशक है ॥ ६० ॥

उमाकुसुम्भजं चोष्णं त्वग्दोषकफपित्तकृत्।

स०—अतसीजं कुसुंभजं च तैलमुष्णवीर्यं भवति तथा त्वग्दोषकफपित्तानि करोति।

अलसी और कुसुम्भ तेल के गुण—

वि०—अलसी और कुसुम्भ के तेल—उष्ण वीर्य, त्वग्दोषकारक, कफ एवं पित्त को बढ़ाते हैं।[1]

स्नेहप्रसंगादिदमप्याह—

वसा मज्जा च वातघ्नौ बलपित्तकफप्रदौ ॥ ६१ ॥
मांसानुगस्वरूपौ च विद्यान्मेदोऽपि ताविव।

स०—वसा तु रूपेण शुद्धमांसस्य स्नेहः। मज्जा धातुः। तौ वातनाशनौ तथा मांसानुगस्वरूपौ यस्य प्राणिनः संबंधि मांसं तत्सदृशरूपौ। मेदोऽपि ताविव वसामज्जासदृशस्वरूपं विद्यात्। संक्षेपतया चायं तैलवर्ग इहोक्तः। तथा च संग्रहेऽधिकमप्युक्तम्। दन्तीमूलकरक्षोघ्नकरञ्जारिष्टशिग्रुजम्। सुवर्चलेंगुदीपीलुशंखिनीनीपसंभवम्। सरलागुरुदेवाह्वशिंशपासारजन्म च। तुवरारुष्करोत्थं च तीक्ष्णं कट्वम्लपित्तकृत्। अर्शःकुष्ठकृमिश्लेष्मशुक्रमेदोऽनिलापहम्। करंजनिंबजे तिक्ते नात्युष्णे तत्र निर्दिशेत्। कषायतिक्तकटुकं सारलं व्रणशोधनम्। भृशोष्णतीक्ष्णकटुके तुवरारुष्करोद्भवे। विशेषात्कृमिकुष्ठघ्ने तथोर्ध्वाधोविरेचने। अक्षातिमुक्तकास्फोटनालिकेरमधूकजम्। त्रपुसेर्वारुकूष्मांडश्लेष्मातकपियालजम्। वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम्। पित्तश्लेष्मप्रशमनं श्रीपर्णीकिंशुकोद्भवम्। तिलतैलं वरं तेषु कौसुम्भं न वरं परम्। वसा मज्जा च वातघ्नौ बलपित्तकफप्रदौ। मांसानुगस्वरूपौ च विद्यान्मेदोऽपि ताविव। शाल्लकी शौकरी पाकहंसजा कुक्कुटोद्भवा। वसा श्रेष्ठा स्ववर्गेषु कुंभीरमहिषोद्भवा। काकमद्गुवसा तद्वत्कारंडोत्था च निंदिता। शाखादमेदसां छागं हस्तिनं च वरावरमिति। इति तैलवर्गः ॥ ६१ ॥

वसादि के गुण—

वि०—वसा और मज्जा—ये दोनों वातनाशक, बलदायक, पित्त एवं कफ को उत्पन्न करती हैं। जिस प्राणी की वसा-मज्जा होती हैं उसी प्राणी के मांस के समान इनके गुण होते हैं। मेद के गुण भी वसा और मज्जा के समान ही होते हैं ॥ ६ ॥

तीक्ष्णोष्णसूक्ष्मादिगुणसामान्यात्तैलवर्गादनंतरं मद्यवर्ग आरभ्यते—

दीपनं रोचनं मद्यं तीक्ष्णोष्णं तुष्टिपुष्टिदम् ॥ ६२ ॥
सस्वादुतिक्तकटुकमम्लपाकरसं सरम्।
सकषायं स्वरारोग्यप्रतिभावर्णकृल्लघु ॥ ६३ ॥
नष्टनिद्रातिनिद्रेभ्यो हितं पित्तास्रदूषणम्।
कृशस्थूलहितं रूक्षं सूक्ष्मं स्रोतोविशोधनम् ॥ ६४ ॥
वातश्लेष्महरं युक्त्या पीतं विषवदन्यथा।

स०—सर्वं मद्यं दीपनादिगुणयुक्तम्। तुष्टिश्चित्तपरितोषः पुष्टिः शरीरपोषः ते ददाति जनयति यत्तत्तुष्टिपुष्टिदम्। आतोऽनुपसर्गे कः। तथा ईषन्मधुरतिक्तकटुकम्। तथाऽम्लौ पाकरसौ यस्य तदेवम्। तथा सरम्। तथा सकषायम्। तथा स्वरश्चारोग्यं च प्रतिभा च वर्णश्च तान् करोति। ननु सर्वाण्येव द्रव्याण्यारोग्यार्थमुपदिश्यंते तस्मादारोग्यकृत्त्वं सर्वेषामेव द्रव्याणां प्राप्तमिति सर्वस्यैवाऽरोग्यकृत्त्वम्। उच्यते। युक्तमाह

---

[1] इनके अतिरिक्त अनेक दूसरे तैल भी विशेषतः चिकित्सा में उपयोग में आते हैं और उनका वर्णन भी अष्टाङ्गसंग्रह सूत्र अ. ६ में देखें।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवान्। किंत्वतिशयख्यापनार्थम्। एतन्मद्यमतिशयेनारोग्यकृदित्यर्थः। तथा लघु। तथा नष्टनिद्रेभ्यो नरेभ्योऽतिनिद्रेभ्यश्च हितम् सर्वमेव मद्यं प्रभावादिति केचित्। अन्ये त्वेवं मन्यंते यथा सुरादि यन्मद्यं श्लेष्मादिवर्धनं तन्नष्टनिद्रेभ्यो हितम्, यच्च माधवादिमद्यं श्लेष्मादिहृत् तच्चाऽतिनिद्रेभ्यो हितमिति। तथा पित्तास्रदूषणम्। कृशेभ्यः स्थूलेभ्यश्च हितम्। सामान्येनाऽपि निर्देशेऽत्रायं विशेषो बोध्यः। किंचिन्मद्यं कृशाय हितं किंचित्स्थूलायेति। अथवा तैलोक्तन्यायेन कृशस्थूलहितत्वं बोध्यम्। तथा रूक्षसूक्ष्मं स्रोतोगामि तथा स्रोतो विशोधयति। तथा वातश्लेष्महरम्। युक्त्या पीतं सदेवंगुणं मद्यं भवति। युक्तिस्तु मदात्ययनिदाने चिकित्सिते च वक्ष्यमाणा। अन्यथाऽयुक्त्या पीतं सद्विषतुल्यं भवति ॥ ६२-६४ ॥

अथ मद्यवर्गः।

मद्य के सामान्य गुण—

वि०—युक्ति से पिया हुआ मद्य— अग्निदीपक, रुचिकारक, तीक्ष्ण, उष्ण, तुष्टि (सन्तोष) और पुष्टिदायक है। ईषन्मधुर, ईषत् तिक्त, ईषत्कटुक, अम्लरस, विपाक में अम्ल, सर (मृदु रेचक), ईषत्कषाय रस, स्वर, आरोग्य, प्रतिभा (सूक्ष्म) और वर्ण को करने वाला तथा लघु है। जिनको नींद नहीं आती हो अथवा जिनको बहुत नींद आती हो, उनके लिए हितकारी है; पित्त-रक्त को दूषित करने वाला है। कृश एवं स्थूल दोनों के लिए हितकारी; रूक्ष; सूक्ष्म और स्रोतों का शोधन करता है और वात-कफनाशक हैं। इसके विपरीत अयुक्ति से पिया मद्य विष के समान है ॥ ६२-६४ ॥

वक्तव्य—मद्य सन्धान से बनता है। इसके महत्त्व के उत्पत्ति-स्थान पांच हैं, यथा—'द्राक्षेक्षु माक्षिकं शालिरुत्तमा व्रीहिपञ्चमाः। मद्याकरा यदेभ्योऽन्यत्तन्मद्यप्रतिरूपकम् ॥ द्राक्षेक्षवः सखर्जूराः शालिपिष्टं यवस्य च। पञ्च मद्याकराः श्रेष्ठा द्राक्षा तेषां विशिष्यते ॥' तुष्टि—सन्तोष, पुष्टि—बलवृद्धि, प्रतिभा—प्रज्ञा। नष्टनिद्रा और अतिनिद्रा दोनों के लिए प्रभाव से हितकारी है। नष्ट निद्रा में वातघ्नत्व क्रिया करता है और अतिनिद्रा में कफघ्न प्रभाव करता है; अथवा जो मद्य (यथा-सुरा) कफवर्धक है वह नष्टनिद्रा वालों के लिये और जो मद्य कफनाशक है (यथा माधवादि) वह अतिनिद्रावालों के लिये उत्तम है। इसी प्रकार कोई मद्य कृश पुरुषों के लिये और कोई मद्य स्थूल पुरुषों के लिए उत्तम है। युक्तिपूर्वक—'बल-काल-देश सात्म्य-प्रकृति-सहायामयवयांसि प्रविभज्य तदनुरूपं यदि पिबति ततः पिबत्यमृतम्' (अष्टाङ्ग. नि. अ. ६। ४१)

गुरु तद्दोषजननं नवं जीर्णमतोऽन्यथा ॥ ६५ ॥

स०—नवं किंचित्कालातिक्रांतं तन्मद्यं गुरु त्रिदोषकरं च भवति। नवमनतीतसंवत्सरमित्येके। जीर्णं पुराणं बहुकालातिक्रांतमतो नवादन्यथा लघु दोषहरं चेत्यर्थः ॥ ६५ ॥

नये और पुराने मद्य के गुण—

वि०—नूतन मद्य—गुरु और दोषजनक है और पुरातन मद्य (जो मद्य एक साल का हो गया है)—लघु और दोषनाशक है।

वक्तव्य—सुश्रुत में कहा है—'स्फुटस्रोतस्करं जीर्णं लघु वातकफापहम् ॥' (सु. अ. ४५। १९४)

पेयं नोष्णोपचारेण न विरिक्तक्षुधातुरैः।
नात्यर्थतीक्ष्णमृद्वल्पसम्भारं कलुषं न च ॥ ६६ ॥

स०—तच्च मद्यमुष्णोपचारेण न पेयम्। उष्णो विहाराहारादिक उपचारो यस्य स एवं तेन। न विरिक्तेत्यादि। कृतविरेचनेन न पेयं दोषासाम्यादिति भावः। क्षुधार्तेन न पेयम्। तथाऽतितीक्ष्णमतिमृदु च मद्यं च पेयम्। अल्पसम्भारमिति। यद्यावता संभारेण लोकप्रसिद्धेन संधीयते सुरादि तत्र तदपेक्षया चाल्पसंभारं न पेयम्। तथा कलुषमस्वच्छं च न पेयम् ॥ ६६ ॥

मद्यपान का निषेध—

वि०—गरम भोजन या सूर्य-सन्ताप आदि को सेवन करके मद्य नहीं पीना चाहिये। विरेचन लेने पर एवं अतिशय भूख लगने पर भी मद्य नहीं पीना चाहिये। अतिशय तीव्र मद, अतिशय मृदु मद्य नहीं पीना चाहिये। थोड़े सम्भार (जो जो सामग्री जिस मद्य को बनाने के लिये उपयुक्त है उसमें कमी कर बनाये हुए) मद्य का पान नहीं करना चाहिये, मलिन (अस्वच्छ) मद्य नहीं पीना चाहिये ॥ ६६ ॥

अधुना मद्यविशेषानाह—

गुल्मोदरार्शोग्रहणीशोषहृत् स्नेहनी गुरुः।
सुराऽनिलघ्नी मेदोऽसृक्स्तन्यमूत्रकफावहा ॥ ६७ ॥

स०—सुरा गुल्मादिहृद्भवति। तथा स्नेहयतीति स्नेहनी। तथा गुरुर्वातनाशिनी च। तथा मेदश्चासृक् च स्तन्यं च मूत्रं च कफश्च तानावहति ॥ ६७ ॥

सुरा के गुण—

वि०—सुरा—गुल्म, उदर, अर्श, ग्रहणी और शोषनाशक, स्नेहन करने वाली, गुरु और वातनाशक है। वह मेद, रक्त, स्तन्य, मूत्र और कफ को बढ़ाती है ॥ ६७ ॥

तद्गुणा वारुणी हृद्या लघुस्तीक्ष्णा निहन्ति च।
शूलकासवमिश्वासविबन्धाध्मानपीनसान् ॥ ६८ ॥

स०—एवं वारुणी प्रसन्ना। त एव सुरोक्ता गुणा यस्याः सा तद्गुणा। सुरासमगुणेत्यर्थः। हृदयाय हिता हृद्या। तथा लघुतीक्ष्णा च। शूलादिन्निहंति च। विबंधः स्रोतसामुपलेपेन दोषादीनामवहनम्। जगलमेदकबक्कसानां सुतरामनुपयोगित्वाद्गुणा नेहोक्ताः संग्रहे तूक्ता एव। यथा—जगलः पाचनो ग्राही रूक्षस्तद्वच्च मेदकः। बक्कसो हृतसारत्वाद्विष्टंभी दीपकः पनः। वारुण्या अधोभागो घनो जगलः। जगलस्याधोभागो मेदकः। पानीयेन मद्यकल्कपीडनोत्पन्नो बक्कसः ॥ ६८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वारुणी के गुण—

वि०—वारुणी—सुरा के समान गुणवाली है; हृदय के लिए हित तथा तीक्ष्ण है। शूल, कास, वमि, श्वास, विबन्ध, आध्मान और पीनस को नष्ट करती है ॥ ६८ ॥

वक्तव्य—'प्रसन्ना वारुणी ज्ञेया परिस्रुन्मदिरा तथा। कादम्बरी घनसुरा, तदधो जगलः स्मृतः ॥ जगलः पाचनो ग्राही, रूक्षस्तद्वच्च मेदकः। बक्कसो हृतसारत्वाद् विष्टम्भी दोषकोपनः' ॥ वारुणी—सुरा के ऊपर का निर्मल भाग-इसी को 'मण्ड', 'प्रसन्ना' कहते हैं। वारुणी का निचला घट्ट भाग 'जगल', जगल का निचला भाग 'मेदक' एवं मद्यकल्क को जल के साथ निचोड़ने से 'बक्कस' बनता है।

हेमाद्रि के मत से—वारुणी-श्वेतसुरा है, जो कि श्वेत पुनर्नवा आदि मूलों के साथ पिसे हुए चावलों से बनाई जाती है, इनके मत से वारुणी अच्छसुरा नहीं है, क्योंकि प्रसन्ना कफनाशक है।

नातितीव्रमदा लघ्वी पथ्या बैभीतकी सुरा।
व्रणे पाण्ड्वामये कुष्ठे न चात्यर्थं विरुध्यते ॥ ६९ ॥

स०—बिभीतकानामियं बैभीतकी। नातितीव्रो मदो यस्याः सैवम्। तीव्रमदं न जनयतीत्यर्थः। लघ्वी तथा पथ्या। व्रणादिषु चात्यर्थमन्यमद्यवन्न विरुध्यते ॥ ६९ ॥

बहेड़े के मद्य का गुण—

वि०—बहेड़े की सुरा—मध्यम मदकारक, लघु और स्वस्थ अवस्था में हितकारी है। व्रण, पाण्डु रोग और कुष्ठ में दूसरे मद्यों के समान विरोधी नहीं, अर्थात् यह मद्य इन अवस्थाओं में थोड़ा दिया जा सकता है ॥ ६९ ॥

विष्टम्भिनी यवसुरा गुर्वी रूक्षा त्रिदोषला।

यवसुरा के गुण—

वि०—जौ की सुरा—विष्टम्भकारक, गुरु, रूक्ष और त्रिदोषकारक है।

यथाद्रव्यगुणोऽरिष्टः सर्वमद्यगुणाधिकः ॥ ७० ॥
ग्रहणीपाण्डुकुष्ठार्शः शोफशोषोदरज्वरान्।
हन्ति गुल्मकृमिप्लीहः कषायकटुवातलः ॥ ७१ ॥

स०—अरिष्टोऽपि यैर्द्रव्यैः सिद्धः स तद्गुणानुगच्छति। सर्वैश्च दीपनत्वादिभिर्मद्यगुणैरधिकः। तंत्रांतरे चोक्तम्—मद्याकराधिकद्रव्यं मदिराद्यात्मकं ततः। यथा—द्रव्यगुणोऽरिष्टः सर्वमद्यगुणाधिकः इति। ग्रहण्यादिकांश्च रोगान् हंति। तथा कषायः कटुश्चासौ वातलश्च स एवम्। लक्षणं चास्य प्रागुक्तम् ॥ ७०-७१ ॥

अरिष्ट के गुण—

वि०—अरिष्ट—अरिष्ट मूल द्रव्य के गुणों के अनुसार गुण वाला होता है, तथा यह सभी मद्यों में अधिक गुणवाला (उत्तम) होता है। यह ग्रहणी, पाण्डु, कुष्ठ, अर्श, शोफ, शोष, उदररोग, ज्वर, गुल्म, कृमि और प्लीहा को नष्ट करता है, कषाय, कटु एवं वातकारक है ॥ ७०-७१ ॥

वक्तव्य—'अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः। दीपनः कफवातघ्नः सरः पित्ताविरोधनः ॥' सुश्रुत।

मार्द्वीकं लेखनं हृद्यं नात्युष्णं मधुरं सरम्।
अल्पपित्तानिलं पाण्डुमेहार्शःकृमिनाशनम् ॥ ७२ ॥

स०—मार्द्वीकं द्राक्षारसोद्भवं लेखनत्वादियुक्तम्। तथाऽल्पौ पित्तानिलौ यस्य तदेवम्। अन्यमद्यापेक्षयाऽल्पतरौ करोतीत्यर्थः। तथा पाण्ड्वादिनाशनम्। विलिखत्यतितैक्ष्ण्याद्यद्धातूंस्तल्लेखनं मतम् ॥ ७२ ॥

द्राक्षामद्य (अंगूरी शराब) के गुण—

वि०—मार्द्वीक (द्राक्षा रस से बना) मद्य लेखन (लीन मल को उखाड़ने वाला), हृदय के लिये हितकर, बहुत गरम नहीं, मधुर, सारक, अन्य मद्य की अपेक्षा कम पित्त और कम वायुकारक, पाण्डु, मेह, अर्श और कृमिनाशक है।

वक्तव्य—'शुष्कद्राक्षाम्बुसम्भूतो विशदो रोचनो हिमः। द्राक्षासवो मधुसमो बृंहणो भृशदीपनः ॥'

अस्मादल्पान्तरगुणं खार्जूरं वातलं गुरु।

स०—खार्जूरं मद्यमस्मान्मार्द्वीकादल्पांतरगुणम्। अल्पांतराः किंचिद्विशेषा गुणा यस्य तदेवम्। तथा वातलं गुरु च। द्राक्षा मद्यं चान्यत्रोक्तम्। यथा। शुष्कद्राक्षांबुसंभूतो विशदो रोचनो हिमः। द्राक्षासवो मधुसमो बृंहणो भृशदीपन इति।

खजूर के मद्य का गुण—

वि०—खर्जूर से बना मद्य—मार्द्वीक से थोड़े भिन्न गुणों वाला, वायुकारक और गुरु है।

शार्करः सुरभिः स्वादुर्हृद्यो नातिमदो लघुः ॥ ७३ ॥

स०—शार्करः शर्करासंबंधी मद्यविशेषः सुरभिः सुगंधिर्भवति। तथा स्वादुश्च हृद्यश्च स्वादुहृद्यः। तथा नातिमदो लघुश्च भवति ॥ ७३ ॥

शर्करा के मद्य का गुण—

वि०—शर्करा से बना मद्य—सुगन्धित, मधुर, हृदय के लिये हितकारक, मध्यम मदकारक और लघु है ॥ ७३ ॥

सृष्टमूत्रशकृद्वातो गौडस्तर्पणदीपनः।

स०—गुडसंबंधी गौडः सृष्टमूत्रत्वादिभिर्गुणैर्युक्तः। तथा तर्पणश्चासौ दीपनश्च तर्पणदीपनः।

गुड़ के मद्य का गुण—

वि०—गुड़ से बनाया मद्य—मूत्र, मल और वायु को प्रवृत्त करने वाला, तृप्तिजनक और अग्निदीपक है।

वातपित्तकरः सीधुः स्नेहश्लेष्मविकारहा ॥ ७४ ॥
मेदःशोफोदरार्शोघ्नस्तत्र पक्वरसो वरः।

स०—सीधुः वातपित्तकरस्तथा स्नेहविकारान् तथा श्लेष्मविकारांश्च हंति। ब्रह्मभ्रूणवृत्रेभ्विस्यत्र चतुर्विधस्य नियमस्य प्रायिकत्वात् क्विप्। सीधुरपक्वेक्षुरसकृतः पक्वेक्षुरसकृतश्च। तत्र सीध्वोर्मध्ये पक्वरसो मेदः शोफोदरार्शांसि हंति। मेदः शोफोदरार्शोघ्न इत्यमनुष्यकर्तृके चेति टक् ॥ ७४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सीधु का गुण—

वि०—सीधु-(इक्षुरसकृत मद्य)-वात-पित्त को करने वाला, स्नेहजनित व्यापत् और कफजन्य रोगों को नष्ट करता है, मेद, शोफ, उदर और अर्शनाशक है। इनमें भी गन्ने के रस को पका कर बनाया गया 'पक्वरस' सीधु उत्तम है। (अपक्व रस से बनाया 'शीत रस' सीधु कहलाता है।) ॥ ७४ ॥

छेदी मध्वासवस्तीक्ष्णो मेहपीनसकासजित् ॥ ७५ ॥

स०—मध्वासवो माक्षिकेण संधीयते माधवाख्यो मद्यविशेषश्छेदी तीक्ष्णो मेहादिनाशनश्च। अष्टांगसंग्रहे तु सुरासवादयो गदिताः। तथा चापठत्। सुरासवस्तीव्रमदः स्वादुतीक्ष्णोऽनिलापहः। मैरेयो मधुरो वृष्यः सरः संतर्पणो गुरुः। तत्र मधुनैव सुरासंधानेन या क्रियते तां सुरासवमाहुः ॥ ७५ ॥

मधु के मद्य का गुण—

वि०—मध्वासव—(मधु से बनाया मद्य)—छेदी (संहत कफ को तोड़ने वाला), तीक्ष्ण, प्रमेह, पीनस और कासनाशक है ॥ ७५ ॥

रक्तपित्तकफोत्क्लेदि शुक्तं वातानुलोमनम्।
भृशोष्णतीक्ष्णरूक्षाम्लं हृद्यं रुचिकरं सरम् ॥ ७६ ॥
दीपनं शिशिरस्पर्शं पाण्डुदृक्कृमिनाशनम्।

स०—शुक्तं रक्तपित्तकफान् क्लेदयति। तथा वातानुलोमनं वातमनुलोमयति मार्गांतरेभ्यस्तमानीय स्वमार्गप्रतिपन्नं करोति तद्वातानुलोमनम्। अतिशयेनोष्णरूक्षाम्लं तथा हृद्यं तथाऽतिशयेन रुचिकरं तथा दीपनं तथा शिशिरः स्पर्शो यस्य तदेवं तथा पांड्वादिघ्नम् ॥ ७६ ॥

शुक्त के गुण—

वि०—शुक्त—रक्त, पित्त और कफ को द्रवीभूत करता है, वायु का अनुलोमक है। अतिशय उष्ण, तीक्ष्ण, रूक्ष, अम्ल, प्रिय, रुचिकारक और अनुलोमन है। अग्निदीपक, शीतलस्पर्श, पाण्डु, दृष्टिशक्ति और कृमिनाशक है ॥ ७६ ॥

वक्तव्य—शुक्त का लक्षण—'कन्दमूलफलादीनि सस्नेहलवणानि च। यत्रैकत्राभिपूयन्ते (यत्र द्रवेऽभिपूयन्ते) तच्छुक्तमभिधीयते ॥' यह शुक्त गुडशुक्त, मद्यशुक्त और मधुशुक्त तथा इक्षुरसशुक्त भेद से चार प्रकार का है; यथा—'गुडस्त्विक्षुरसो मद्यं माद्वीकं च द्रवं यदा। गुडेक्षुमद्यमाद्वीकशुक्तानि स्युस्तदा क्रमात् ॥' (शार्ङ्गधर म. अ. १०।७) तथा—गुडाम्बुना सतैलेन सन्धानं काञ्जिकं च यत्। कन्दशाकफलैर्युक्तं गुडशुक्तं तदुच्यते ॥ सर्वं मद्यं पञ्चरसं कालान्तरवशाद्यदा। त्यक्त्वाऽन्यरसमम्लत्वं याति शुक्तं तदुच्यते ॥ जम्बीरस्य फलरसं पिप्पलीमूलसंयुतम्। मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत् ॥ त्र्यहेण तज्जातरसं मधुशुक्तमुदाहृतम् ॥' शुक्त का ही एक भेद चुक्र है—'यन्मस्त्वादि शुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम्। धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥' शुक्त आँख की शक्ति को कम करता है।

गुडेक्षुमद्यमाद्वीकशुक्तं लघु यथोत्तरम् ॥ ७७ ॥

स०—गुडादिभवं शुक्तं यथोत्तरं लघु यद्यदुत्तरं तत्तल्लघु। गुडकृताच्छुक्तादिक्षुशुक्तं लघु। इक्षुशुक्तान्मद्यशुक्तं लघु। मद्यशुक्तान्माद्वीकं शुक्तं लघु भवति ॥ ७७ ॥

शुक्तों के भेद तथा गुण—

वि०—गुडशुक्त, इक्षुशुक्त, मद्यशुक्त और माद्वीकशुक्त ये उत्तरोत्तर लघु हैं ॥ ७७ ॥

कन्दमूलफलाद्यं च तद्वद्विद्यात्तदाऽऽसुतम्।

स०—कंदादि तदाऽऽसुतं गुडशुक्तादिसुतं तद्वद्विद्यात्। तच्छुक्तसमानगुणं जानीयात्। शुक्तेनात्युत्कृष्टशक्तिना परित्यज्य निजं स्वाभावं वशीकृत्याऽऽत्मरूपतां नीयत इत्यर्थः। आद्यग्रहणात्कांडत्वक्पत्रादिपरिग्रहः। तेन कांडाद्यपि तथैव वेद्यम्।

आसुत के लक्षण और गुण—

वि०—आसुत—किसी शुक्त में कन्द, मूल, फल आदि को डालकर रखने से 'आसुत' बनता है। इसके गुण शुक्त की भाँति हैं।

वक्तव्य—कन्दमूलं फलाद्यं च लवणोदकसंयुतम्। सन्धानाच्चिरकालाम्लमासुतं परिकीर्तितम् ॥' कन्द आदि को शुक्त में डालकर रखने या द्रव में शुक्त उत्पन्न होने पर उसी में पड़े रहने से 'आसुत' बनते हैं, इनके गुण शुक्त के समान हैं।

अम्लत्वरोचनादिगुणतुल्यत्वादन्यदपि शांडाक्यादिकमाह—

शाण्डाकी चासुतं चान्यत्कालाम्लं रोचनं लघु ॥ ७८ ॥

स०—मूलकसर्षपशाकानि क्वथितासुतानि कालजीरकराजिकासु भावितान्यम्लतीक्ष्णानि शांडाकीशब्देनोच्यंते। सा दध्वविषये प्रसिद्धा। सा चान्यच्चानुक्तमप्यासुतं कालेनाम्लमम्लीभूतं नतु स्वयमाम्लयमापाद्यम्। अनेनैव हेतुना सुतरां तत्संस्कारतामधिकरोतीति। तच्च रोचनं लघु भवति ॥ ७८ ॥

शाण्डाकी का गुण—

वि०—शाण्डाकी (बड़ा आदि)—और दूसरी कोई भी आसुत वस्तु, कुछ काल रखने से खट्टा होने पर रोचक और लघु है ॥ ७८ ॥

वक्तव्य—'शाण्डाकी कन्दमूलादिमुद्गादिवटकैः कृता ॥ मूलकच्छेदसन्धानं शाण्डाकी स्याद् बहुद्रवा ॥'

कालाम्ल—देर तक रखने के कारण जो अम्ल बन गया है।

धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत्स्पर्शशीतलम्।
श्रमक्लमहरं रुच्यं दीपनं वस्तिशूलनुत् ॥ ७९ ॥
शस्तमास्थापने हृद्यं लघु वातकफापहम्।
एभिरेव गुणैर्युक्ते सौवीरकतुषोदके ॥ ८० ॥
कृमिहृद्रोगगुल्मार्शःपाण्डुरोगनिबर्हणे।
ते क्रमाद्वितुषैर्विद्यात्सतुषैश्च यवैः कृते ॥ ८१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—धान्याम्लं कांजिकं भेदि तीक्ष्णं तथोष्णवीय तथा पित्तकृत् स्वभावाच्च स्पर्शशीतलम्। व्यायामादिना श्रांतत्वं श्रमः। निर्व्यायामादेवोपश्रांतत्वं क्लमः। तौ हरति। तथा रुच्यं दीपनं च बस्ति शूलं च जयति। तथा आस्थापने निरूहे शस्तम्। तथा लघु वातकफापहं च। हन्तेरन्येष्वपि दृश्यत इति डः। धान्याम्लं तंडुलकंडनादिकृतं सौवीरकतुषोदकैर्वितुषैः सतुषैश्च यवैः क्रमात्कृतं तद्वद्विद्यात् ॥ ७९-८१ ॥

कांजी के गुण—

वि०—काञ्जिक गुण—धान्याम्ल (काञ्जी)—भेदन, तीक्ष्ण, उष्ण, पित्तकारक, स्पर्श में शीतल, श्रम-क्लमनाशक, रुचिकारक, अग्निदीपक, वस्तिशूलनाशक, निरूह कार्य में प्रशस्त, हृदय के लिये प्रिय, वात-कफनाशक है। सौवीरक और तुषोदक कांजी भी इन्हीं गुणों वाली हैं। वे कृमि, हृद्रोग, गुल्म, अर्श और पाण्डु रोग का नाश करती हैं। इनमें सौवीरक कांजी तुषरहित जौ से, और तुषोदक तुष सहित जौ से बनाई जाती है। तुष=छिलका या भूसी ॥ ७९-८१ ॥

वक्तव्य—धान्याम्ल-चावलों की कणकियों से बनाया जाता है। 'प्रस्थं षष्टिकधान्यस्य नीरप्रस्थद्वये क्षिपेत्। आधारभाण्डं संरुध्य, भूमेर्गर्भे निधापयेत्॥ पश्चादथ समुद्धृत्य वस्त्रपूतञ्च कारयेत्। ततो जातरसं योज्यं धान्याम्लं सर्वकर्मसु॥' मद्य के जगल, वक्कस आदि के गुण भी अष्टाङ्गसंग्रह (सू. अ. ६) में दिये हैं।

मद्यवत्तीक्ष्णोष्णादियुक्तत्वाद् गोमूत्रादिगुणानप्याह—

मूत्रं गोऽजाविमहिषीगजाश्वोष्ट्रखरोद्भवम्।
पित्तलं रूक्षतीक्ष्णोष्णं लवणानुरसं कटु ॥ ८२ ॥
कृमिशोफोदरानाहशूलपाण्डुकफानिलान्।
गुल्माऽरुचिविषश्वित्रकुष्ठार्शांसि जयेल्लघु ॥ ८३ ॥

स०—मूत्रं गोऽजादिभवं पित्तलादिगुणयुक्तं तथा लवणोऽनुरसः स्वल्पो यस्य तदेवम्। तथा कृम्यादीन् जयेत्। लघु च। गोमूत्रस्य च पूर्वमुपन्यासात् प्राधान्यं ज्ञेयम्। संग्रहे तु विशेषांतरमप्युक्तम्। श्वासकासहरं छागं पूरणात्कर्णशूलजित्। दद्यात्स्वये किलासे च गजवाजिसमुद्भवम्। हंत्युन्मादमपस्मारकृमीन्मेहं तु रासभम्। कषायतिक्तमेतेषां हिध्मश्वासहरं शकृत्। पित्तं तिक्तं कृमिहरं रोचना कफवातजित्। तिक्तं पामाहरं मूत्रं मानुषं तु विषापहमिति ॥८२-८३॥

(अथ मूत्रवर्गः)

गौ आदि के मूत्र के गुण—

वि०—मूत्र—गाय, बकरी, भेड़, भैंस, हाथी, घोड़ा, ऊँट, गदहा, इन आठों का मूत्र बरता जाता है। सब मूत्र पित्तकारक, रूक्ष, तीक्ष्ण, उष्ण, लवण अनुरस, कटुरस वाले होते हैं। कृमि, शोफ, उदर, आनाह, शूल, पाण्डु, कफ और वायु को तथा गुल्म, अरुचि, विष, श्वित्र-कुष्ठ और अर्श को नष्ट करते हैं और लघु हैं।

वक्तव्य—'गोजाविमहिषीणां च स्त्रीणां मूत्रं प्रशस्यते। खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं मतम्॥' इनमें प्रत्येक के मूत्र के गुण पृथक् पृथक चरक-सुश्रुत में दिये हैं। यहाँ पर सामान्य गुण कहे हैं—ये ही आठ मूत्र मुख्य हैं। देखिये च. सू. अ. १।९२-१०४।

तोयक्षीरेक्षुतैलानां वर्गैर्मद्यस्य च क्रमात्।
इति द्रवैकदेशोऽयं यथास्थूलमुदाहृतः ॥ ८४ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने द्रवद्रव्यविज्ञानीयो नाम पञ्चमोऽध्यायः ॥ ५ ॥

स०—इत्यनन्तरोक्तेन प्रकारेण तोयादीनां वर्गैः क्रमानतिक्रमेण द्रवाणामेकदेशो यथास्थूलमयमुदाहृत उक्तः ॥८४॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां पञ्चमोऽध्यायः ॥ ५ ॥

पाँचवें अध्याय का उपसंहार—

वि०—उपसंहार—तोयवर्ग, क्षीरवर्ग, इक्षुवर्ग, तैलवर्ग और मद्यवर्ग-इनमें द्रवपदार्थों का एक अंश जो कि बहुत प्रसिद्ध था, वह कह दिया है ॥ ८४ ॥

वक्तव्य—चरक में 'अन्नपानैकदेशोऽयमुक्तः प्रायोपयोगिकः। द्रव्याणि नहि निर्देष्टुं शक्यं कार्त्स्न्येन नामभिः॥' चरक सू. अ. २७।३२९।

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का 'द्रवद्रव्यविज्ञानीय' नामक पाँचवाँ अध्याय समाप्त हुआ।

षष्ठोऽध्यायः

अथातोऽन्नस्वरूपविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥
इति ह स्माहुरात्रेयादयो महर्षयः।

अन्नविधौ प्रकृतेऽल्पवक्तव्यत्वात्पूर्वं द्रवद्रव्यमभिधायान्नं वक्ति—

स०—अन्नस्य स्वरूपं स्वभावो रसवीर्यविपाकप्रभावगुणकर्मादि तस्य विज्ञानमवगमस्तस्मै हितोऽध्यायोऽन्नस्वरूपविज्ञानीयस्तं व्याख्यास्यामः। शेषं पूर्ववद्व्याख्येयम्। द्रव्यशब्दश्चाप्रयुक्तोऽप्यर्थस्य गमक इत्यन्नद्रव्यस्वरूपविज्ञानीय इति द्रष्टव्यम्। तथाहि पूर्वस्मिन्नध्याये मन्दमतिप्रबोधनाय प्रयुक्तो द्रष्टव्यः। आचार्या हि वैचित्र्येण ग्रंथरचनां विदधति। तत्र प्राक् स्वरूपशब्दो न निर्दिष्ट इह च द्रव्यशब्दः। अथ चोभयमप्रयुक्तमपि गम्यते मध्यलोपाख्यया च। अद्यते यत्तदन्नं धान्यमांसादि। धान्यं च द्विधा शूकशिबीभेदेन। तत्र प्राधान्याच्छूकधान्यस्य पूर्वमुपन्यासः। प्राधान्यं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चास्य भूयस्त्वोपयोगित्वात्। शिंबीधान्यस्य तु तद्व्यंजनत्वेन स्वल्पोपयोगित्वात्प्रायेणापथ्यत्वाच्चाऽप्राधान्यम् ॥ १ ॥

वि०—अब इसके आगे 'अन्नस्वरूपविज्ञानीय अध्याय' का व्याख्यान करेंगे—जैसा कि भगवान् आत्रेय ने कहा था।

रक्तो महान् सकलमस्तूर्णकः शकुनाहृतः।
सारमुखो दीर्घशूको रोध्रशूकः सुगन्धिकः॥ १॥
पुण्ड्रः पाण्डुः पुण्डरीकः प्रमोदो गौरसारिवौ।
काञ्चनो महिषः शूको दूषकः कुसुमाण्डकः॥ २॥
लाङ्गला लोहवालाख्या कर्दमाः शीतभीरुका।
पतङ्गास्तपनीयाश्च ये चान्ये शालयः शुभाः॥ ३॥
स्वादुपाकरसाः स्निग्धा वृष्या बद्धाल्पवर्चसः।
कषायानुरसाः पथ्या लघवो मूत्रला हिमाः॥ ४॥

स०—तत्र रक्तशालिमहाशाली सुप्रथितावेव। कलमो मगधादिषु प्रसिद्धः। स एव महातंडुल इति काश्मीरेषु। तूर्णकश्च तत्रैव आजव इति प्रसिद्धः। शकुनाहृतो यो मगधेषु बुद्धोत्पादकाल उत्तरकुरुभ्यो हंसैरानीतो मृगारिमात्रा विशाखाख्यया वापितो विस्तरं गतः। अत एव शकुनाहृत इत्यन्वर्थाऽस्य संज्ञा। सारामुखः कृष्णशूकः। शुक्लाकारो दीर्घशूकः। रोध्रशूको रोध्रपुष्पाकारशूकः। सुगन्धको गन्धशालिसंज्ञया जालंधरमगधादिषु ख्यातो देवशालिरित्यपरनामा। एवं पतंगादयो नानादेशेषु कर्षकादिभ्योऽवधार्याः। शूके जाताः शूकजास्तेषु मध्ये रक्ताद्यास्तपनीयांता अन्ये च ये शालयः शुभा रक्ताविसदृशास्ते सर्वे स्वादुपाकरसत्वादियुक्ताः। बद्धं ग्रन्थितमल्पं च वर्चः पुरीषं कुर्वंतीति बद्धाल्पवर्चसस्त एवम्। कारणे कार्योपचारादुक्ताः। कषायोऽनुरसो येषां त एवम्। पथ्याः स्वभावेनैव हिताः। तथा लघवो मूत्रकारिणः शीतवीर्याश्च ॥ १-४ ॥

अथ शूकधान्यवर्गः।

चावलों के भेद—

वि०—शालि—लालशालि, महाशालि, कलम, तूर्णक, शकुनाहृत, सारमुख, दीर्घशूक, रोध्रशूक, सुगन्धिक, पुण्ड्, पाण्डु, पुण्डरीक, प्रमोद, गौर, सारिव, काञ्चन, महिष, शूक, दूषक, कुसुमाण्डक, लाङ्गल, लोहवाल, कर्दम, शीतभीरुक, पतङ्ग, तपनीय तथा जो अन्य उत्तम जाति के शालि हैं, वे सब निर्दोष, विपाक और रस में मधुर, स्निग्ध, वृष्य, मल को बाँधने और कम करनेवाले हैं। इनमें कषाय अनुरस होता है और ये पथ्य, लघु, मूत्र को लानेवाले और शीतल हैं ॥ १-४ ॥

वक्तव्य—पूर्वाध्याय में द्रव आहार कह दिया, अब अन्न का आहार कहते हैं। इनमें मुख्य धान्यवर्ग है। यह वर्ग शूक और शिम्बी भेद से दो प्रकार का है। शूक धान्यवर्ग में—वे धान्य समाविष्ट हैं, जिनमें शूक अर्थात्–काँटा या बाल रहता है; पकते समय जो बाल में लगते हैं। शिम्बी धान्य—फली में से निकलते हैं। शूक धान्यों में चावल उत्तम है–इसलिए प्रथम शालि का वर्णन किया है। जैसा कि आगे कहेंगे–'शूकजेषु वरः॥' ये शालि कई प्रकार के हैं, यथा–लालमती, बासमती, रामजवायन, रामसुनिया, हंसराज, कुमुद आदि। इनमें जो चावल अधिक उत्तम हैं, उनके नाम ऊपर दे दिये हैं।

शूकजेषु वरस्तत्र रक्तस्तृष्णात्रिदोषहा।

स०—तत्र तेषु महाशालिकलमादिषु मध्ये रक्तो रक्तशालिसंज्ञो वरस्तृष्णादींश्च दोषान्निहंति। अस्य च प्रागुपादानेनैव वरत्वे लब्धे वरग्रहणं युक्त्याऽन्यादिसंग्रहार्थम्। तथा च। वर्षासु दिव्यनादेये परं तोये बरावरे इति। तथा गव्ये क्षीरघृते श्रेष्ठे। तथा शर्करेक्षुविकाराणां फाणितं च बरावरे। वरोऽत्र मुद्गोऽवरचलः। मासोऽत्र सर्वेष्ववरो यवकः शूकजेषु चेत्यादीनि वाक्यानि प्रदेशांतरेष्वयमबोचदाचार्यः।

लाल चावल के गुण—

वि०—इन शालियों में रक्तशालि सब शूकधान्यों में श्रेष्ठ है, तृष्णानाशक और त्रिदोषनाशक है।

महांस्तस्यानु कलमस्तं चाप्यनु ततः परे॥ ५॥

स०—तस्यानु रक्तशालेः पश्चान्महान् शालिर्वरः। तं च महांतमनु कलमः महत्संज्ञात्कलमः किंचिदून इत्यर्थः। ततोऽनंतरं परेऽन्ये शालयोऽवरा ज्ञेयाः॥ ५॥

श्रेष्ठ चावल—

वि०—रक्तशालि से उतरकर महान् शालि श्रेष्ठ हैं, इससे उतर कर कलम और फिर दूसरे शालि श्रेष्ठ हैं॥ ५॥

वक्तव्य—चावलों की उत्तमता–उनके बीज, बोने की विधि, पानी–बरसात एवं नदी के पानी पर निर्भर करती है। उत्तम चावलों की पौद लगती है। यह पौद एक या दो बार जितनी बार बदली जाती है, और जितना इनको नदी का पानी मिलता रहता है, उतना ही चावल उत्तम होता है। जिन चावलों की पौद नहीं लगती, और जो चावल केवल बरसात के पानी पर ही रहते हैं; जिनको थोड़ा पानी मिलता है, वे चावल मोटे और हीन गुणवाले होते हैं।

यवका हायनाः पांशुवाप्यनैषधकादयः।
स्वादूष्णा गुरवः स्निग्धाः पाकेऽम्लाः श्लेष्मपित्तलाः॥६॥
सृष्टमूत्रपुरीषाश्च पूर्वं पूर्वं च निन्दिताः।

स०—यवकादयः शालिविशेषाः स्वादवः। तथोष्णादिगुणयुक्ताः। तथा सृष्टे मूत्रपुरीषे यैस्ते सृष्टमूत्रपुरीषाः। पूर्वं पूर्वं च निंदिताः तेन यवकाः सर्वेभ्योऽपि गर्हिताः। तदनन्तरं किंचित्किंचित्क्रमेण गर्हिता इति विज्ञेयम्। नैषधकादय इत्यत्राऽदिशब्देन च यवकपत्रिकादयः शालिविशेषा गृह्यंते॥ ६॥

यवकादि चावलों के गुण—

वि०—यवक, हायन, पांशुवाप्य, नैषधक आदि (मोटे) धान्य मधुर, उष्णवीर्य, गुरु, स्निग्ध, विपाक में अम्ल तथा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कफ और पित्त को बढ़ाते हैं। मूत्र और मल को प्रवृत्त करने वाले, तथा पूर्व-पूर्व निन्दित हैं, अर्थात् यैवक से पांशुवाप्य निन्दित है, पांशु-वाप्य से हायन और हायन से यवक निन्दित हैं ॥ ६ ॥

स्निग्धो ग्राही लघुः स्वादुस्त्रिदोषघ्नः स्थिरो हिमः ॥
षष्टिको व्रीहिषु श्रेष्ठो गौरश्चासितगौरतः ।

स०—व्रीहिषु मध्ये षष्टिकः श्रेष्ठो रक्तशालिरिव शालिषु । तथा स्निग्धादिगुणयुक्तः स्थिरो हिम इति । शरीरस्थैर्यं करोति । ज्वरश्रमग्लानिहरोऽत एव रसायनप्रयोगे ज्वरादौ च तत्र तत्र चामबपुषामुपदिष्टः । यस्तु स्थैर्यकरोऽपि नाम्नातो गुरुवातलत्वादिति । षष्टिकश्च द्विविधो गौरः कृष्णगौरश्च । अत्राऽसितगौरतो गौरः षष्टिकः श्रेष्ठः ॥ ७ ॥

साठी चावल के गुण—

वि०—षष्टिक व्रीहि—साठी धान का चावल—स्निग्ध, ग्राही, लघु, मधुर, त्रिदोषनाशक, स्थिर एवं शीतल है। षष्टिक व्रीहि धान्यों में श्रेष्ठ माना गया है उसमें भी गौर षष्टिक कृष्ण गौर से श्रेष्ठ होता है। गौर और असित भेद से दो प्रकार के हैं। इनमें असित साठी से गौर साठी उत्तम है ॥ ७ ॥

वक्तव्य—षष्टिक धान्य साठ दिन में पकते हैं। ये व्रीहि धान्यों में श्रेष्ठ हैं। ये तीन प्रकार के हैं-गौर, कृष्ण और कृष्णगौर। इनमें कृष्णगौर से गौर श्रेष्ठ हैं, परिशेष कृष्णव्रीहि हीन हैं।

ततः क्रमान्महाव्रीहिकृष्णव्रीहिजतूमुखाः ॥ ८ ॥
कुक्कुटाण्डकलावाख्यपारावतकशूकराः ।
वरकोद्दालकोज्ज्वालचीनशारददर्दुराः ॥ ९ ॥
गन्धनाः कुरुविन्दाश्च गुणैरल्पान्तराः स्मृताः ।

स० ततः षष्टिकान्महाव्रीह्यादयः क्रमाद्गुणैरल्पांतरा गुणैर्हीना ॥ ८-९ ॥

विभिन्न चावलों के गुण—

वि०—षष्टिक से उतरकर क्रम से महाव्रीहि, कृष्णव्रीहि, जतूमुख, कुक्कुटाण्डक, लावाख्य, पारावतक, शूकर, वरक, उद्दालक, उज्ज्वाल, चीन, शारद, दर्दुर, गन्धन और कुरुविन्द—ये अल्पगुण वाले होते हैं ॥ ८-९ ॥

स्वादुरम्लविपाकोऽन्यो व्रीहिः पित्तकरो गुरुः ॥१०॥
बहुमूत्रपुरीषोष्मा, त्रिदोषस्त्वेव पाटलः ।

स०—एभ्यः षष्टिकादिभ्योऽन्योऽनुक्तो व्रीहिः स्वादुर्मधुरसोऽम्लविपाकः । पित्तकरो गुरुर्बहुमूत्रपुरीषोष्मा च । पाटलः पाटलाकुसुमाकरः । त्रिदोष स्त्रिदोषकोपनः । त्रिदोषस्त्वेवेत्यत्रैव शब्दोऽतिशयख्यापनाय । अतिशयेन त्रिदोषल एवेत्यर्थः । अतित्रिदोषलत्वेनास्याऽभ्यवहारनिषेधं करोति । अत एव च रसादिमत्त्वं न व्यधादस्य शास्त्रकारः ॥ १० ॥

पाटल आदि के गुण—

वि०—इनसे अन्य व्रीहि (धान)-रस में मधुर, विपाक में अम्ल, पित्तकारक और गुरु हैं; मूत्र और मल को बहुत लाने वाले तथा उष्णवीर्य हैं। पाटल—तीनों दोषों को बढ़ाता है ॥ १० ॥

वक्तव्य—अवस्था और संस्कार भेद से गुण में भेद आ जाता है। 'सर्वथा दोषजित्तक्रं ग्रहण्यां दोषकृद् व्रणे। शालिः पिष्टो गरीयस्त्वं गोधूमादपि गच्छति ॥ संग्रह (सू. अ. ७)

कङ्गुकोद्रवनीवारश्यामाकादि हिमं लघु ॥ ११ ॥
तृणधान्यं पवनकृल्लेखनं कफपित्तहृत् ।

स०—कंग्वादि तृणधान्यं हिमं लघु च । तथा मारुतकृल्लेखनं च । लेखनं विकर्षणम् । विलिखत्यतितैच्ण्याद्यत् धातूंस्तल्लेखनं मतमिति । तथा कफपित्तहृत् । कषायमधुरत्वं पित्तश्लेष्महृत्त्वेनैतेषामवगतं तद्बद्धविण्मूत्रत्वं वातकृत्त्वात् । तथा चोक्तम् । ततश्चाऽनेकधा प्रायः पवनो यत्प्रकुप्यति । अन्नपानौषधं तस्य युंजीतातोऽनुलोमनमिति । संग्रहे तु स्पष्टं कृत्वैते गुणा एषामुक्ताः । यथा । कफपित्तहरा रूक्षाः कषाया मधुरा हिमाः वातला बद्धविण्मूत्रा लघवो लेखनात्मका इति । श्यामाकादीत्यत्राऽदिशब्देन तोयश्यामाकशिबिरप्रशांतिकामधूलिकांगवेधुकांडलोहित्यानां ग्रहणम् ॥ ११ ॥

तृणधान्य के गुण—

वि०—कङ्गु, कोद्रव, नीवार, श्यामाक (साँवा) आदि तृणधान्य शीतल, लघु, वायुकारक, कर्षण करने वाले, कफ-पित्त नाशक हैं ॥ ११ ॥

वक्तव्य—कङ्गुनी, कोदो, साँवा, गवेधुक आदि ये तृण धान्य हैं, इनको मुनि धान्य भी कहते हैं-ये कृश करने वाले हैं-मोटे पुरुषों के लिये उत्तम हैं।

भग्नसन्धानकृत्तत्र प्रियङ्गुर्बृंहणी गुरुः ॥ १२ ॥

स०—तत्र तेषु तृणधान्येषु मध्ये प्रियंगुः कंगुर्भग्नस्यांगस्य संधानं करोति । तथा गुरुः । सुश्रुतेनोक्तम् । रक्ताः पीताश्च कृष्णाश्च श्वेताश्चैव प्रियंगवः । यथोत्तरं प्रधानाः स्यू रूक्षाः कफहराः स्मृताः ॥ १२ ॥

वि०—तृणधान्यों में प्रियङ्गु (कङ्गु) टूटे अस्थि आदि को जोड़ने वाला, बृंहण और गुरु है ॥ १२ ॥

कोरदूषः परं ग्राही स्पर्शे शीतो विषापहः ।

स०—कोरदूषः कोद्रवोऽत्यर्थं संग्राही तथा स्पर्शशीतो विषापहश्च ।

कोदो के गुण—

वि०—कोदो—अतिशय ग्राही, स्पर्श में शीतल और विषनाशक है।

रूक्षः शीतो गुरुः स्वादुः सरो विड्वातकृद्यवः ॥१३॥
वृष्यः स्थैर्यकरो मूत्रमेदःपित्तकफाञ्जयेत् ।
पीनसश्वासकासोरुस्तम्भकण्ठत्वगामयान् ॥१४॥
न्यूनो यवादनुयवः—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—यवो रूक्षादिगुणैर्युक्तो विड्वातकरो वृष्यः स्थैर्यकृच्च। तथा मूत्रादीन् जयेत्। अन्ययवो नाम शूकधान्यविशेषो लोकप्रसिद्धः। स यवान्न्यूनः स्वल्पगुणैर्युक्तः॥१३-१४॥

जौ के गुण—

वि०—जौ—रूक्ष, शीतल; गुरु, मधुर, सर; मल और वायुकारक, वृष्य, स्थिरता करने वाला है एवं मूत्र, मेद, पित्त तथा कफ को नष्टकरता है। पीनस, श्वास, कास, ऊरुस्तम्भ, कण्ठरोग और त्वचा के रोगों को नष्ट करता है। अनुयव जौ से कम गुण वाले हैं॥ १३-१४॥

—रूक्षोष्णो वंशजो यवः।

स०—वंशोद्भवो वेणुयवो रूक्षोष्णो भवति।

बाँस के जौ (बीज) के गुण—

वि०—बाँस के जौ (बाँस के बीज)—रूक्ष और उष्ण हैं।

वृष्यः शीतो गुरुः स्निग्धो जीवनो वातपित्तहा ॥१५॥
सन्धानकारी मधुरो गोधूमः स्थैर्यकृत्सरः।

स०—गोधूमो वृष्यादिगुणयुक्तः। जीवन ओजोऽभिवर्धनः। तथा वातपित्तहरः संधानकारी ऊरुप्रभृतेर्भग्नस्य संधानं करोति। तथा स्थैर्यकृत्सरश्च। चरके त्वन्यथैव गुणयुक्त उक्तः। यथा। स्थैर्यकृत्सकषायश्च बल्यः श्लेष्मविकारहा। संधानकृद्वातहरो गोधूमः स्वादुशीतल इति॥ १५॥

गेहूँ के गुण—

गेहूँ—वृष्य; शीतल, गुरु, स्निग्ध, जीवनदायक, वातपित्तनाशक, भग्न अंगों का सन्धान करने वाला, मधुर, स्थिरताकारक और अनुलोमक है॥ १५॥

पथ्या नन्दीमुखी शीता कषायमधुरा लघुः॥ १६॥

स०—नंदीमुखी पथ्या शरीराय हिता कषायमधुरा लघुश्च। इति शूकधान्यवर्गः॥ १६॥

गेहूँ के भेद—

वि०—नन्दीमुखी—(महुआ) शरीर के लिये हितकर, शीतल, कषाय-मधुर और लघु है॥ १६॥

वक्तव्य—इस प्रकार शूकधान्यों का शालि व्रीहि और तृणधान्य इन तीन वर्गों में विभाजन कर वर्णन किया। शालि और व्रीहि चावल के भेद हैं जो क्रमशः हेमन्त और शरद् में होते हैं। इनके अतिरिक्त, अन्य शूकधान्य तृणधान्य माने गये हैं। इनमें अनेक वन्य रूप में भी होते है जिनका उपयोग वनवासी मुनिजन करते थे।

अथ शिम्बीधान्यवर्गः।

मुद्गाढकीमसूरादि शिम्बीधान्यं विबन्धकृत्।
कषायं स्वादु संग्राहि कटुपाकं हिमं लघु॥ १७॥
मेदःश्लेष्मास्रपित्तेषु हितं लेपोपसेकयोः।

स०—अस्मादनंतरं शिबीधान्यवर्गस्य संबंधप्रयोजनं प्रागुक्तमेव। शिंब्याः कोश्या धान्यं मुद्गादिकं यत् शिंबीधान्यं तद्विबंधकृत्। केषां विबंधं करोति। सामर्थ्यात् स्रोतसां ननु पुरीषादीनाम्। तथा च संग्राहीत्यत्रैव पठति शास्त्रकृत्। संग्राहिलक्षणं च तंत्रांतरे। यथा। भेदि तत्पिंडितान् भावान् शकृदाद्यान्भिनत्ति यत्। विपरीतमतो ग्राहीति। तस्माद्विबंधं स्रोतसामेवेत्याह। तथा कषायं स्वादु कटुपाकं शीतवीर्यं लघु च। मसूरादीत्यत्राऽऽदिशब्देन मकुष्ठचणकादीनां ग्रहणम्। तथा मेदआदिषु हितं प्रकृतत्वादभ्यवहारे तथा लेपोपसेके चेति। चशब्दोऽत्र लुप्तनिर्दिष्टो बोध्यः। लेपः प्रदेहः। उपसेकः परिषेकः। कषायशीतरूक्षत्वेन कटुपाकित्वेन च वातकृत्त्वं शिंबीधान्यस्य शास्त्रकृतोक्तम्। अत एवेदमुपपन्नम्। मुद्गोऽल्पचल इति। यदि हि शिंबीधान्यस्य मारुतकृत्त्वं समेयात् तदेतद्वक्तुं युज्यते। तस्माद्वातकृत्त्वमस्यास्तीति स्थितम्। तस्मिंश्च सत्याध्मानकारित्वमप्युपपन्नमेव। अत एव संग्रहेऽस्याध्मानकारित्वमुक्तम्। मुद्गादीनां च विशेषास्तत्रैवोक्ताः। यथा। हरितास्तेष्वपि वरा मकुष्ठाः कृमिकारिणः। वर्ण्याः परं प्रलेपाद्यैर्मसूरा ग्राहिणो भृशमिति॥ १७॥

शिम्बी धान्य के सामान्य गुण—

वि०—मूँग, अरहर, मसूर आदि—ये शिम्बी धान्य हैं, ये वायु का अवरोध करने वाले, कषाय, मधुर, संग्राही, विपाक में कटु, शीतवीर्य, लघु और मेद, कफ, रक्त और पित्त में पथ्य एवं प्रदेह और परिषेक में उपयोगी हैं॥ १७॥

वक्तव्य—ये धान्य फलियों से निकलते हैं—इनमें आदि शब्द से मोठ, चना, मटर आदि लेने चाहिये। मूँग और उड़द काले और हरे दो भेद वाले होते हैं; जिनमें हरे उत्तम हैं, मसूर भी दो प्रकार का है—काला और पाण्डु वर्ण। मसूर वर्ण्य और अतिशय संग्राही है, यथा—'वर्ण्याः परं प्रलेपाद्यै मंसूरा ग्राहिणो भृशम्॥' चरक में 'पित्तश्लेष्मणि शस्यन्ते सूपेष्वालेपनेषु च।' शिम्बी धान्य दाल तथा आलेप कार्य में बरते जाते हैं।

वरोऽत्र मुद्गोऽल्पचलः, कलायस्त्वतिवातलः॥१८॥
राजमाषोऽनिलकरो रूक्षो बहुशकृद् गुरुः।

स०—अत्र एषु च शिंबीधान्येषु मध्ये मुद्ग उत्तमः। तथा अल्पं चलं पवनं करोतीत्यल्पचलः। तुर्यतिरेके। कलायः पुनरतिशयेन वातलो भवति। राजमाषो रूक्षो बहुशकृत्करोतीति बहुशकृत्। तथा गुरुस्तथाऽनिलकरः। ताच्छील्ये टः। अन्यशिंबीधान्याच्चातिवातलोऽयमिति वेद्यमनिलकरग्रहणात्। अन्यथा शिंबीधान्यसामान्यलक्षणेन वातमात्रकरणस्य लब्धत्वादनिलकरग्रहणं न कुर्यात्॥ १८॥

मूँग के गुण—

वि०—शिम्बीधान्य में मूँग श्रेष्ठ है, इससे वायु कम बनती है। मटर अतिशय वायुकारक है। राजमाष साधारणतः वायुकारक, रूक्ष, मल को अधिक मात्रा में लाने वाला और गुरु है॥ १८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—कलाय दो प्रकार का है त्रिपुट (चिपटी) और गोल, त्रिपुट का पाठान्तर त्रिकोण भी है—इसको 'फाफर' 'खेसारी' या 'लतरी' कहते हैं।

उष्णाः कुलत्थाः पाकेऽम्लाः शुक्राश्मश्वासपीनसान्॥
कासार्शःकफवातांश्च घ्नन्ति पित्तास्रदाः परम्।

स०—कुलत्था उष्णवीर्याः पाकेऽम्लाः। तथा शुक्रादीन् घ्नंति। अश्माऽश्मरी वक्ष्यमाणलक्षणा। तथा पित्तास्रदा परमतिशयेन रक्तपित्तकराः कषायस्वादुसंग्राहित्वं शिंबीधान्यसामान्यलक्षणेनैषां वेद्यम्। दृष्टिनाशनत्वं चोष्णवीर्यत्वेन रक्तपित्तकरत्वेन च। संग्रहे तु स्पष्टं कृत्वोक्तम्। कषायस्वादुरूक्षोष्णाः कुलत्था रक्तपित्तलाः। पीनसश्वासकासार्शोहिक्काऽऽनाहकफानिलान्। घ्नंति शुक्राश्मरीं शुक्रं दृष्टिं शोफं तथोदरम्। ग्राहिणो लघवस्तीक्ष्णा विपाकेऽम्ला विदाहिन इति॥ १९॥

कुलथी का गुण—

वि०—कुलत्थ—उष्ण, विपाक में अम्ल, शुक्र, अश्मरी, श्वास, पीनस, कास, अर्श और कफ एवं वातजन्य रोगों को नष्ट करने वाला तथा अतिशय रक्तपित्तकारक है॥ १९॥

वक्तव्य—कुलत्थ उष्ण और पथरीली भूमि में होने के कारण अश्मरी विशेषतः शुक्राश्मरी को निकालने वाला है। उष्ण होने से शुक्र और दृष्टिनाशक है। यथा—'घ्नन्ति शुक्राश्मरीं शुक्रं दृष्टिं शोफं तथोदरम्॥' संग्रह।

निष्पावो वातपित्तास्रस्तन्यमूत्रकरो गुरुः॥ २०॥
सरो विदाही दृक्शुक्रकफशोफविषापहः।

स०—निष्पावो राजशिंबीसंज्ञो वातादिकरस्तथा गुरुः सरो विदाही च। तथा दृगादींश्च हंति। संग्रहोक्तं चाम्लपाकत्वं कषायमधुरत्वं चेह नोक्तम्। यतोऽम्लविपाकित्वं विदाहित्वादेवास्योक्तम्। कषायस्वादुत्वं च शिंबीधान्यसामान्यगुणकथनेनैव। कृष्णात्रेयस्त्वाह। निष्पावा मधुरा रूक्षाः सकषाया विदाहिनः। उदावर्ते प्रशस्यंते गुरवो वातपित्तला इति॥ २०॥

निष्पाव (सेम) के गुण—

वि०—निष्पाव (सेम)—वात, पित्त, रक्त, स्तन्य और मूत्र को बढ़ाने वाला; गुरु, मृदुरेचक, विदाही; दृष्टि, शुक्र, कफ, शोफ और विषनाशक है॥ २०॥

माषः स्निग्धो बलश्लेष्ममलपित्तकरः सरः॥ २१॥
गुरूष्णोऽनिलहा स्वादुः शुक्रवृद्धिविरेककृत्।

स०—माषः स्निग्धो बलादिकरः। तथा सरो गुरुरुष्णश्च। तथा वातहा स्वादुश्च। तथा शुक्रस्य वृद्धिं शुक्रस्यैव विरेकं बहिःप्रेरणं करोति॥ २१॥

उड़द के गुण—

वि०—माष (उड़द)—स्निग्ध, बल, कफ, मल, और पित्तकारक, मृदुरेचक, गुरु, उष्ण, वातनाशक, मधुर एवं शुक्र की वृद्धि और प्रवृत्ति करने वाला है॥ २१॥

फलानि माषवद्विद्यात्काकाण्डोलात्मगुप्तयोः॥ २२॥

स०—काकांडोला चात्मगुप्ता च तयोः फलानि माषवद्विद्यान्माषसमगुणानि विजानीयात्। काकांडोलाकटभी (कांगोणी) आत्मगुप्ता कपिकच्छुः॥ २२॥

कौंच के गुण—

वि०—काकाण्डोला (बड़ी कौंच) और आत्मगुप्ता (कौंच) इनके फल उड़द के समान गुण वाले हैं॥ २२॥

उष्णस्त्वच्यो हिमः स्पर्शे केश्यो बल्यस्तिलो गुरुः।
अल्पमूत्रः कटुः पाके मेधाग्निकफपित्तकृत्॥ २३॥

स०—तिल उष्णवीर्यः। तथा त्वच्यः। तथा स्पर्शे शीतः। केश्यो बल्यो गुरुश्च। तथाऽल्पमूत्रोऽल्पमूत्रकरः। पाके कटुः। तथा मेधादीन् करोति। त्वच्यकेश्यबल्या हितार्थयत्प्रत्ययांताः। स्निग्धत्वमनिलघ्नत्वं कषायकटुतिक्तरसत्वं नानाजातित्वं चेहास्य ग्रन्थकृता लाघवान्नोक्तम्। संग्रहे तूक्तमेव। यथा। स्निग्धोष्णतिक्तकटुकः कषायमधुरस्तिलः। त्वच्यः केश्यो गुरुर्वृष्यः स्पर्शशीतोऽनिलापहः। अल्पमूत्रः कटुः पाके मेधाऽग्निकफपित्तकृत्। कृष्णः प्रशस्ततस्तमनु शुक्लस्तमनु चारुण इति। अन्ये त्वनया भुक्त्या संग्रहोक्तमर्थं संगृह्णते। स्निग्धत्वं तावत्तिलस्य तैलेषु मुख्यस्य स्नेहस्य योनिभूतत्वात्सिद्धम्। कफपित्तकृदिति वचनाच्च सामर्थ्यलब्धं वातघ्नत्वम्। कषायस्वादिति शिंबीधान्यसामान्यगुणकथनेन कषायस्वादुत्वं लब्धमिति। एतदेवोररीकृत्य सद्योव्रणप्रतिषेधे वक्ष्यति। कल्कं संरोहणं कुर्यात्तिलानां मधुकान्वितम्। स्निग्धोष्णतिक्तमधुरकषायत्वैः स सर्वजिदिति॥ २३॥

तिल के गुण—

वि०—तिल—उष्णवीर्य, (बहिःप्रयोग में) त्वग्दोषनाशक, स्पर्श में शीतल, बालों के लिये हितकारी, बलकारक, गुरु, मूत्र को कम करने वाला, विपाक में कटु, मेधा, अग्नि, कफ और पित्तकारक है॥ २३॥

वक्तव्य—तिलों में काले तिल उत्तम हैं, फिर श्वेत और फिर लाल तिल हैं। अन्तःप्रयोग में तिल का अधिक सेवन कुष्ठरोग करता है। यथा—'कुष्ठं तत्कार्यपि तिलो हन्ति भल्लातकैः सह॥'

स्निग्धोमा स्वादुतिक्तोष्णा कफपित्तकरी गुरुः।
दृक्शुक्रहृत्कटुः पाके, तद्वद् बीजं कुसुम्भजम्॥२४॥

स०—उमाऽतसी स्निग्धा स्वाद्वादिगुणयुक्तोष्णवीर्या च। तथा दृष्टिं शुक्रं च हरति कटुपाका च तयोमया तुल्यं वर्तते तद्वदुमासमानगुणं कुसुंभबीजमित्यर्थः॥ २४॥

अलसी और कुसुम के बीज के गुण—

वि०—उमा (अलसी)—स्निग्ध, मधुर, तिक्त, उष्ण, कफ और पित्त को करने वाली और गुरु तथा दृष्टि एवं शुक्र का नाश करने वाली एवं विपाक में कटु है। कुसुम्भ का बीज भी अलसी के समान गुणोंवाला है॥ २४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

माषोऽत्र सर्वेष्ववरो यवकः शूकजेषु च ।

स०—अत्र शिंबीधान्येषु माषोऽश्रेष्ठः। शूकजेषु शूकधान्येषु यवकोऽश्रेष्ठः।

वि०—शिम्बी धान्यों में माष सबसे बुरा है, और शूक धान्यों में यवक सबसे हीन हैं।

वक्तव्य—वाग्भटाचार्य ने माष को किसलिये निकृष्ट बताया है, इसका कोई कारण टीकाकारों ने नहीं बताया। सम्भवतः शुक्रच्युतिकारक होने से इसको हीन कहा होगा। किन्तु गृहस्थ धर्म आवश्यक होने से माष का उपयोग भी जरूरी है। स्त्री के लिये तो आगे स्वयं कहेंगे—'तैलमाषोत्तराहाराम्'—तैल और उड़द खाये। माष पचने में भारी है तथा अतिस्निग्ध पिच्छिल होने से क्रमशः स्रोतोरोध उत्पन्न करता है। इस कारण भी निकृष्ट माना गया हो।[1]

नवं धान्यमभिष्यन्दि, लघु संवत्सरोषितम् ॥ २५ ॥
शीघ्रजन्म तथा सूप्यं निस्तुषं युक्तिभर्जितम् ।

स०—नवं प्रत्यग्रं धान्यमभिष्यंद्याभिमुख्येन स्यंदयति। ताच्छील्ये णिनिः। मालिन्यात्स्रोतसां स्रुतिरूपश्लेष्माणं करोतीत्यर्थः। अर्थात्पुराणमनभिष्यंदि। संवत्सरोषितं वर्षातीतं लघु भवति। नवं चार्थाद्गुर्वित्यनुक्तमप्युक्तं भवति तन्त्रांतरेऽप्युक्तम्। वर्षातीतं सर्वमन्नं परित्यजति गौरवम्। नतु त्यजति तद्वीर्यं वीर्यं मुंचत्यतः क्रमादिति। शीघ्रेत्यादि। लघ्वित्यनुवर्तते। सूप्यं मुद्गादि यच्छीघ्रजन्म तल्लघु भवति। तथा विगततुषं युक्त्या भर्जितं भृशं लघु भवति। संग्रहे त्वेवमुक्तम्। नवं धान्यमभिष्यंदि सेव्यं केदारजं च यत्। लघु वर्षोषितं दग्धभूमिजं स्थलसंभवमिति। इति शिंबीधान्यवर्गः ॥ २५ ॥

नवीन और पुराण धान्य—

वि०—नूतन धान्य—अभिष्यन्दी (स्रोत को कफ से अवरुद्ध करने वाले) हैं; एक साल पुराना धान्य लघु है। जो जल्दी उग आता है, तुष (छिलका) रहित, युक्तिपूर्वक भूना हुआ, मुद्गादि सूप्य धान्य लघु है ॥ २५ ॥

वक्तव्य—'नवं धान्यमभिष्यन्दि सेव्यं केदारजं च यत्। लघु वर्षोषितं दग्धभूमिजं स्थलसम्भवम्' ॥ बलवान व्यक्ति शिम्बी धान्य को स्नेह की प्रचुर मात्रा से खायें—'स्नेहाढ्या बलिभिर्भोज्या विविधाः शिम्बिजातयः' ॥ संग्रह।[2]

अथ कृतान्न (पकान्न) वर्गः[3]

मण्डपेयाविलेपीनामोदनस्य च लाघवम् ॥ २६ ॥
यथापूर्वं शिवस्तत्र मण्डो वातानुलोमनः ।
तृड्ग्लानिदोषशेषघ्नः पाचनो धातुसाम्यकृत् ॥ २७ ॥
स्रोतोमार्दवकृत्स्वेदी सन्धुक्षयति चानलम् ।

स०—मंडादीनां यथापूर्वं लाघवम्। तेनौदनमपेक्ष्य लघ्वी विलेपी ततोऽपि पेया पेयातो मंडो लघुतर इत्यर्थोऽवतिष्ठते। मंडपेयाविलेप्योदनानां यथापूर्वं लाघवमित्येवं वक्तव्ये यदत्रौदनस्य पृथक्पाठः स इदं ज्ञापयति। मंडादयो लाजोपादाना वेद्या न तु तंडुलोपादानाः। तथा च मुनिः। शृतः पिप्पलिशुंठीभ्यां युक्तो लाजांबुदाडिमैः। मंडः संदीपयत्यग्निं वातं चाप्यनुलोमयेदिति। तदुक्तम्। द्रव्यस्यार्धपलं दत्वा तोयस्य प्रस्थमावपेत्। अर्धशेषं गृहीत्वा तत्कर्षौ द्वौ दाडिमस्य च। युक्तं सैंधवविश्वाह्वधान्यकैः शाणमात्रकैः। द्विकर्षमात्रैर्लाजैश्च भूयः संक्वथितं च तत्। पिप्पलीजीरकाभ्यां च शाणैकेनावचूर्णितम्। पेयास्वेष विधिः कल्प्यो दाडिमादिकृतास्वपीति। तथा। सिक्थैर्विरहितो मंडः पेया सिक्थसमन्विता। घनसिक्था विलेपी स्याद्यवागूर्विरलद्रवेति। अन्ये तु मंडलक्षणं पेयालक्षणं चान्यथैवेच्छंति। तथा तल्लक्षणम्। लाजांबुसैंधवकणाधान्यनागरदाडिमैः। युक्तो विमृदितः पूतो मंडः संस्कृत उच्यते। निर्द्रव्या प्राकृता पेया तक्रदाडिमतंडुलैरिति सामान्यपेयायाश्च तक्रदाडिमलाजादिसाधिताया गुणनिर्देशोऽयं न तु विशिष्टाया ज्वरचिकित्सादिविहिताया इति द्रष्टव्यम्। विशेषग्रहणात्कर्मांतरनिर्देशाच्च। तत्र तेषु मंडादिषु मध्ये मंडः शिवः। तथा वातानुलोमनः तथा तृड्ग्लानिदोषशेषं हंतीति तृड्ग्लानिदोषशेषघ्नः। अमनुष्यकर्तृके चेत्यत्र ठक्। विहितवमनस्य विहितविरेचनस्य वा किंचिच्छेषो यो दोषस्तस्य भावो दोषशेषता वचनज्ञापकात् कृतवमनविरेचनस्य दोषशेषकरणं तेन च वमनकर्मणि विरेचनकर्मणि वा कर्तव्येऽतियोगभयात्तद्दोषशेषः कार्य इत्ययमर्थो युक्त्या प्रतिपादितः। तथा मंडः पाचनो धातुसाम्यकरश्च। तथा स्रोतसां मार्दवं करोति तथा स्वेदयतीति स्वेदी। वह्निं च दीपयति ॥ २६-२७ ॥

चावल के मंड का गुण—

वि०—मण्ड पेया विलेपी और ओदन—ये पूर्व क्रम से लघु हैं। इनमें मण्ड कल्याणकारी और वायु का अनुलोमक,

---

१. उड़द—गुरु और कफ-पित्तकारक होने से रूक्ष देशों में विशेषतः उपयोगी होता है किन्तु आनूप देशों में अहित होता है; यह अनुभवसिद्ध है।

२. पुरान अन्न लघु और हित कहा गया है किन्तु एक वर्ष का पुराना ही श्रेष्ठ है। उसके बाद उत्तरोत्तर लघुता के साथ वीर्यहीनता भी आती जाती है। 'वर्षस्थितं सर्वमन्नं परित्यजति गौरवम्। न तु त्यजति तद्वीर्यं, वीर्यं मुञ्चत्यतः क्रमात् ॥' (खरनाद संहिता)

३. धान्यों का स्वाभाविक गुणधर्म वर्णन करने के बाद अब उनके भोजन आदि के लिए विशेषतः प्रयुक्त संस्कारजन्य गुणों का वर्णन करने के लिए कृतान्न या पकान्न वर्ग का वर्णन किया जा रहा है। पाचन आदि संस्कार से द्रव्यों के गुण में अन्तर आ जाता है। एक ही वस्तु में विभिन्न संस्कारों द्वारा विभिन्न गुण उत्पन्न होते हैं। जैसे—चावल से ही भात, माँड़, खिचड़ी, पुलाव आदि बनते हैं और प्रत्येक के गुण भिन्न-भिन्न होते हैं। इसलिये प्रायः जिन रूपों में अन्न का उपयोग होता है उनका गुण आगे लिखेंगे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्यास, ग्लानि और बचे हुए दोष को नाश करने वाला पाचक, धातुओं को समान करने वाला, स्रोतों को कोमल करने वाला, पसीना लाने वाला और अग्नि को बढ़ाने वाला है ॥ २६-२७ ॥

वक्तव्य—मण्ड, पेया और विलेपी ये तीनों यवागू कहलाते हैं। 'यवागूस्त्रिविधा प्रोक्ता मण्डः पेया विलेप्यपि। सिक्थकै रहितो मण्डः, पेया सिक्थसमन्विता ॥ यवागूर्बहुसिक्था स्याद् विलेपी विरलद्रवा ॥' असिक्थ द्रव-मण्ड। जैसे—लाजमण्ड, वाट्यमण्ड (वार्ली वाटर)। अल्पसिक्थ वाली पेया और बहुसिक्थवाली विलेपी। द्रवरहित एवं सिक्थ (सीठी, छुद्दी या घनभाग) युक्त-ओदन (भात) है। इनमें ओदन से विलेपी लघु, विलेपी से पेया लघु और पेया से मण्ड लघु है। शिव=आरोग्यप्रद। उष्ण और द्रव होने से समस्त शरीर में शीघ्र व्याप्त होकर वमन, लंघन आदि से शेष दोष को नष्ट करता है; लंघनादि से संकुचित स्रोतों को खोलता है, स्वेदवह स्रोतों को खोलने से स्वेदक है अर्थात् शेष दोषों को स्वेद द्वारा निकालता है।

क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगज्वरापहा ॥ २८ ॥
मलानुलोमनी पथ्या पेया दीपनपाचनी।

स०—क्षुच्च तृष्णा च ताभ्यां ग्लानिः सा च दौर्बल्यं च कुक्षिरोगश्च ज्वरश्च तानपहंति या सैवंभूता पेया। दौर्बल्यं कार्श्यम्। तथा मलान्वातादीननुलोमयति स्वमार्गस्थान् करोति। पथ्या शरीरस्य हिता। तथा दीपनी पाचनी चेति। पुंवत्कर्मधारयेति पुंवद्भावः ॥ २८ ॥

पेया के गुण—

वि०—पेया—भूख, प्यास, ग्लानि, दुर्बलता, कुक्षिरोग और ज्वरनाशक, मल का अनुलोमन करने वाली, शरीर के लिये हितकारी, दीपन और पाचन गुण वाली है ॥ २८ ॥

वक्तव्य—कुक्षिरोग-अतीसार (हेमाद्रि)। पथ्या-आहार रूप से पथ्य है।

विलेपी ग्राहिणी हृद्या तृष्णाघ्नी दीपनी हिता ॥ २९ ॥
व्रणाक्षिरोगसंशुद्धदुर्बलस्नेहपायिनाम् ।

स०—विलेपी ग्राहिणी हृद्या तृष्णाघ्नी दीपनी हिता च। व्रणश्चाक्षिरोगश्च संशुद्धिश्च दुर्बलश्च स्नेहपायी च तेषां हिता। व्रणाक्षिरोगशब्दौ मत्वर्थीयाकारांतौ ॥ २९ ॥

विलेपी के गुण—

वि०—विलेपी—ग्राही, हृदय के लिए हितकारी, तृष्णानाशक, अग्निदीपक, व्रणरोगी, अक्षिरोगी, वमनादि से शुद्ध, दुर्बल व्यक्ति तथा नित्य स्नेह पीने वालों के लिये हितकारी है ॥ २९ ॥

सुधौतः प्रस्रुतः स्विन्नोऽत्यक्तोष्मा चौदनो लघुः ॥३०॥
यश्चाग्नेयौषधक्वाथसाधितो भृष्टतण्डुलः ।
विपरीतो गुरुः क्षीरमांसाद्यैर्यश्च साधितः ॥ ३१ ॥
इति द्रव्यक्रियायोगमानाद्यैः सर्वमादिशेत्।

स०—ओदनः सुष्ठु धौतस्तथा प्रस्रुतो निःश्रोतितः स्विन्नोऽत्यक्तबाष्पश्च लघुर्भवति। यश्चौदनं आग्नेयौषधानां चित्रकादीनां क्वाथेन साधितः सोऽतिलघुः। तथा भृष्टास्तंडुला यस्मिन्नोदने सोऽतिलघुतमः। यथोक्तलक्षणादोदनाद्विपरीतो योऽसुधौतादिः स गुरुः। क्षीरमांसादिभिर्मधुरैर्यश्च साधितः सोऽतिगुरुः। इत्यनया दिशा सर्वं तेयादिकं पूर्वोक्तं वक्ष्यमाणं च भक्ष्यादिकं द्रव्येण क्रियया संयोगेन मानेन चादिशेत्। तत्र द्रव्यतो यथा। ओदनस्य रक्तशाल्यादिजस्य लाघवम्। यावकादिजस्य तु गौरवम्। क्रियातो यथा। पाकादिसंस्काराच्छूल्यमांसस्य लध्वादिगुणयोगः अपरस्य त्वन्यथात्वं दृश्यते। तथा चोक्तं तंत्रांतरे। वृष्यं वातहरं बल्यं पथ्यं शूल्यामिषं लघु। अपथ्यं गुरु विष्टंभिमांसं यच्च रसोद्धृतमिति। तंत्रांतरे चोक्तम्। स्विन्नं मांसं गुरु स्तंभिशूलपक्वं त्रिदोषजिदिति। क्रिया संस्कार इत्यर्थः। योगः संयोगस्तेन यथा। आग्नेयचित्रकाद्यौषधक्वाथैः साधितस्य लाघवम्। मानतो यथा। बहुभिर्लघुभिरल्पैश्च गुरुभिर्युक्तैर्लघुरेव। विपरीतैस्तु विपरीत एव। आदिग्रहणेन देशादिपरिग्रहः। जांगलदेशप्रभवतंडुलकृतो लघुः। आनूपदेशतंडुलकृतो गुरुरित्यादि बोध्यम् ॥ ३०-३१ ॥

भात के गुण—

वि०—जो चावल भली प्रकार धोया गया; जिसका माँड निकाल दिया गया हो; जो भली प्रकार गल गया; और जो गरम है, वह भात लघु होता है। और जो भात पानी के स्थान पर आग्नेय (चित्रक, मरिच आदि) ओषधियों के क्वाथ में पकाया जाता है, वह भी लघु है; इसी प्रकार भूने हुए चावलों का भात भी लघु है। इसके विपरीत जो चावल भली प्रकार धोया नहीं, जिसमें से माँड़ निकाला नहीं, जो ठण्डा हो गया है; वह भात गुरु है; और जो भात दूध या मांसरस से पकाया होता है, वह भी गुरु है।

इस युक्ति से सब पेयादि तथा भक्ष्यादि के गुण को द्रव्य, क्रिया, संयोग, मान आदि के अनुसार समझना चाहिये ॥ ३०-३१ ॥

वक्तव्य—द्रव्य से; यथा-रक्तशालि का भात लघु और यवक का भात गुरु है। क्रिया से—भूनकर बनाये तण्डुलों (जिसे सेला कहते हैं) का भात हलका है और दूसरे चावलों का भारी है। संयोग से—आग्नेय चित्रकादि के योग से बनाये भक्ष्य लघु तथा क्षीर-मांसरस आदि से बनाये भारी हैं। मान से—बहुत से लघु द्रव्यों से या थोड़े गुरु द्रव्यों से भक्ष्य लघु रहता है; और बहुत से गुरु द्रव्यों से भक्ष्य गुरु हो जाता है। आदि शब्द से-देश और काल को समझना चाहिये; यथा—जांगल देश में उत्पन्न तण्डुल लघु हैं; आनूप देश के तण्डुल भारी हैं; इसी से सुश्रुत में-'दग्धायामवनौ जाताः शालयो लघुपाकिनः।' स्थिति-भेद से यथा—ताम्र में रखा दही अभक्ष्य है। आमादि अवस्थाभेद से—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कच्ची या शुष्क मूली से बनाया यूष पथ्य है। पुरातन और आर्द्र मूली से बनाया यूष अपथ्य है।

बृंहणः प्रीणनो वृष्यश्चक्षुष्यो व्रणहा रसः ॥ ३२ ॥

स०—रस इति मांसरसः। आदिशब्दलोपात्। स बृंहणादिगुणयुक्तः। कृताकृतस्य च रसस्यायं गुणनिर्देशो बोध्यः। रसो हि स्नेहशुंठ्यादियुतः कृत इत्युच्यते विपरीतस्त्वकृतः। तेन कृतस्य तंत्रांतरे विधानमप्युक्तम् गुणाश्च। यथा। छागलं सविथजं मांसं निरस्थि तैत्तिरं तथा। चतुष्पलान्वितं सूक्ष्मं कल्पितं क्षालितं जले। पिप्पलीपिप्पलीमूलशुंठीचित्रकधान्यकैः। द्विशाणैः संयुते तोये क्वाथं सार्धाढकोन्मिते। मांसेऽस्मिन् द्विपलं तत्र दाडिमान्कुट्टितान्क्षिपेत्। तं रसं मर्दितं पूतं हिंगुसैंधवजीरकैः। युक्तं प्रधूपितं पथ्यं शुद्धानां शुद्धिकांक्षिणाम्। शुष्यतां व्याधियुक्तानां व्रणिनां वातरोगिणाम्। भग्नविश्लिष्टसंधीनां क्षीणधातिंवद्रियौजसामिति। तंत्रांतरे चोक्तम्। रसस्तत्र वरोऽनम्लःशाकुनो बृंहणः सरः। तक्रसिद्धस्तु विष्टंभी लघुर्वातकफापहः। फलाम्लगोरसोदारं सविश्वाजाजिधान्यकम्। स्निग्धं मांसं हितं बल्यं बृंहणं रोचनं गुरु। कासमर्दकधान्याम्लदाडिमादिरजः कृताः। लेह्यास्तक्रादिजाश्चान्ये योनिवद्गुरुरोचनाः। मालुधानीयवासादिपुष्पैर्योऽतिगुणः खलः। फलमूलैर्घनादानं व्यंजनं पाकतो घनम्। लेहवत्खल इत्यन्ये दोषलाः स्वस्वयोनिवत्। तद्वच्च तिलकल्काम्लप्रायः कांबलिको मतः। कट्वरः कफजिद्ग्राही पित्तलो रोचको लघुः। मांसादजातिशुठ्याविगलितः सोदको लघुः ॥ ३२ ॥

मांसरस का गुण—

वि०—मांसरस—बृंहण (पुष्टिकारक), प्रीणन (तृप्तिजनक), वृष्य, आँखों के लिये उत्तम और व्रणनाशक है ॥ ३२ ॥

वक्तव्य—रस शब्द से मांसरस लेना; यथा—'पिशितेन रसस्तत्र, यूषो धान्यैः खलः फलैः' ॥ यह मांसरस कृत, अकृत तथा मसालों से (घी आदि स्नेह द्रव्य से युक्त या रहित) और दकलावणिक (केवल जल में उबाल कर नमक मिला हुआ) भेद से तीन प्रकार का है; यथा—'ज्ञेयाः कृताकृतास्ते तु स्नेहादियुतवर्जिताः। अल्पमांसादयः स्वच्छा दकलावणिकाः स्मृताः' ॥ यह मांसरस तनु एवं सान्द्र; मधुर एवं अम्ल भेद से फिर दो दो प्रकार का होता है।

मौद्गस्तु पथ्यः संशुद्धव्रणकण्ठाक्षिरोगिणाम्।

स०—मौद्गो रसो यूषो व्रणिनां कंठरोगिणां च पथ्यः। अस्य च संस्कृतस्य विधानमुक्तम्। मुद्गानां द्विपलं तोये शृतमर्धाढकोन्मिते। पादस्थं मर्दितं पूतं दाडिमस्य पलेन तु। युक्तं सैंधवविश्वाह्वधान्यकैः पादकार्षिकैः। कणाजीरकयोश्चूर्णाच्छाणैकेनावचूर्णितम्। संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः। तथा। पटोलपत्राच्छाणार्धं मुद्गानां द्विपलं जले। द्रव्याद्द्वात्रिंशद्गुणिते अतश्च दाडिमात्पलम्। कर्षमामलकानां च क्षिप्त्वा पुनरधिश्रयेत्। पूतं तत्सैंधवाद्यैश्च युक्तमाज्येन योजितम्। पटोलपत्रकाख्योऽयं यूषः पित्तोत्थरोगजित्। निंबपत्रैर्निंबयूषमेवमेव प्रकल्पयेत्। मूलकाच्छुंठिका स्विन्ना घृतभृष्टा सधान्यका। हिंगुजीरकसंयुक्ता ततो मथितदाडिमे। ससैंधवे विनिक्षिप्य पुनरग्नावधिश्रयेत्। तावद्यावन्मृदूभूतं ततस्त्र्यूषणसंयुतम्। सुधूपितं हिंगुघृतैश्चातुर्जातावचूर्णितम्। शुण्ठीरसं दीपनीयं वातश्लेष्मामयापहम्। अकृताकृतयूषाच्च रसाच्च जलसाधितात्। स्नेहाम्लपटुयुक्ताच्च पूर्वः पूर्वो लघुर्मतः। विद्याद्यूषे रसे सूपे शाके चैवोत्तरोत्तरम्। गौरवं तनुसांद्राम्लस्वादुष्वेषु पृथक्तया। तथोक्तम्। खलकाम्बलिकौ हृद्यौ साधितौ स्वौषधानुगौ। पिशितेन रसस्तत्र यूषो धान्यैः खलः फलैः। मूलैश्च तिलकल्काम्लप्रायः काम्बलिकः स्मृतः। ज्ञेयाः कृताकृतास्ते तु स्नेहादियुतवर्जिताः। अल्पमांसादायः स्वच्छा दकलावणिकाः स्मृताः। स्वल्पेन मांसेन शुंठ्यादिभि; स्वल्पैः स्वच्छा ये क्रियन्ते ते दकलावणिका बोध्याः। एवं यूषे यत्र धान्यमल्पं खलादौ वा मूलादीन्यल्पानि तस्याऽपि दकलावणिकत्वं बोध्यम्। तन्त्रातरे चोक्तम्। अथ गोरसधान्याम्लफलाम्लैरम्लितं च यत्। यथोत्तरं लघु हितं संस्कृतासंस्कृतं तथा। प्रभूतास्तमलो यूषः सूपाल्लघुतरः स्मृतः। सूपस्तु रसयूषाभ्यां स्थैर्याद्गुरुतरो मतः। तं सरोगो चाश्नीयान्न चाल्पाशी कथंचनेति।

मूँग के यूष का गुण—

वि०—मूँग का यूष—वमनादि से शुद्ध हुए व्यक्ति, व्रणरोगी, कण्ठरोगी तथा अक्षिरोगियों के लिए पथ्य है।

वक्तव्य—मुद्गयूष पटोल, निम्बपत्र, मूली तथा हींग आदि मसालों के साथ विभिन्न गुणों वाला होता है। संस्कार भेद से ग्रन्थान्तरों में इसके अनेक भेद वर्णित हैं। यथा—'मुद्गानां द्विपलं तोये शृतमर्धाढकोन्मिते। पादस्थं मर्दितं पूतं दाडिमस्य पलेन तु॥ युक्तं सैन्धवविश्वाह्वधान्यकैः पादकार्षिकैः। कणाजीरकयोश्चूर्णाच्छाणकेनावचूर्णयेत् संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः ॥' आदि।

वातानुलोमी कौलत्थो गुल्मतूनीप्रतूनिजित् ॥ ३३ ॥

स०—कौलत्थो यूषो वातमनुलोमयति गुल्मादींश्च जयति। तूनिप्रतूनीरोगौ गुल्मनिदाने वक्ष्यमाणलक्षणौ ॥३३॥

कुलथी के यूष का गुण—

वि०—कुलत्थ का यूष—वायु का अनुलोमक, गुल्म, तूनी एवं प्रतूनी को शान्त करता है ॥ ३३ ॥

वक्तव्य—तूनी-प्रतूनी रोग गुल्म निदान में कहे जायेंगे (हृ. नि. अ. ११।६१)

तिलपिण्याकविकृतिः शुष्कशाकं विरूढकम्।
शाण्डाकीवटकं दृग्घ्नं दोषलं ग्लपनं गुरु ॥ ३४ ॥

स०—तिलस्य विकृतिः पिण्याकस्य च। तथा शुष्कशाकादि दृष्टिघ्नं त्रिदोषकरं ग्लानिकरं गुरु च। अंकुरितं सस्यं विरूढकम्। शांडाक्यपि तन्त्रादिका शांडाकीवटकम् ॥ ३४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिल के पदार्थ, शुष्क शाक, अंकुरित धान्यादि के गुण—

वि०—तिल की विकृति, पिण्याक (खल) की विकृति, शुष्क शाक, अंकुरित धान्य, शाण्डाकी वटकः; ये दृष्टिनाशक, दोषकारक, ग्लानिकारक और गुरु हैं ॥ ३४ ॥

वक्तव्य—तिल की बनावट-तिलकुट आदि। पिण्याक (खल) इससे बनाई वस्तुएँ; सूखे शाक गोभी, भिण्डी या कचरी जो सुखाकर रख लिये जाते हैं अंकुरित धान्य-मोठ, मूँग आदि को अंकुरित करके खाना, शाण्डाकी वटक-बड़ियाँ बनाने के लिये उड़द की दाल को पीसकर उसमें मसाला मिलाकर जो कुछ दिन इसलिये रक्खा जाता है कि उसमें खटास आ जाये, उसका नाम शाण्डाकी वटक है—'शाण्डाक्या सह संयुतं वटकं शाण्डाकीवटकम्।

रसाला बृंहणी वृष्या स्निग्धा बल्या रुचिप्रदा।

स०—रसाला करमथितेन मरीचशर्करादियुक्तेन दध्ना कृता उल्लेखिकासंज्ञा बृंहणी देहस्य बृहत्त्वकरी वृष्यादिगुणयुक्ता च।

रसाला (श्रीखंड) के गुण—

वि०—रसाला—बृंहण, वृष्य, स्निग्ध, बल्य और रुचि देने वाली है।

वक्तव्य—रसाला-(श्रीखण्ड)-'किञ्चित्कुङ्कुमसम्मिश्रं विमस्तु दधि गालितम्। सशर्करं भवेत्पीता पक्वाम्ररससन्निभा'॥ विस्तार के लिये क्षेमकुतूहल देखिये।

श्रमक्षुत्तृट्क्लमहरं पानकं प्रीणनं गुरु॥ ३५॥
विष्टम्भि मूत्रलं हृद्यं यथाद्रव्यगुणं च तत्।

स०—पानकं श्रमादिहरं प्रीणनादिगुणयुक्तम्। प्रीणनं मनःप्रीतिकरं यथाद्रव्यगुणं च। स्वादुना गुणेन च युक्तम्। पर्पटादीनां लाघवादिह गुणा नोक्ताः। यथा। पर्पटा लघवो रुच्या लघीयान् क्षारपर्पटः। हृद्या वृष्या रुचिकरा गुरवो रागखांडवाः। प्रीणना श्रमतृट्छर्दिमदमूर्च्छाश्रमच्छिदः॥ ३५॥

पानक (पन्ना) के गुण—

वि०—पानक—श्रम, भूख, प्यास और क्लमनाशक, पुष्टिदायक, गुरु, विष्टम्भि, मूत्रल, हृदय के लिये प्रिय और जिस द्रव्य से बनाया जाता है, उस द्रव्य के समान गुण वाला होता है॥ ३५॥

वक्तव्य—इमली को पानी में भिगोकर और गलने पर हाथ से मथ कर छान ले, इसमें गुड़ या चीनी मिलाकर पीने योग्य पानक बनाते हैं। इसी प्रकार द्राक्षा, खर्जूर, फालसा आदि से पानक बनाते हैं।

लाजास्तृट्छर्द्यतीसारमेहमेदकफच्छिदः ॥ ३६॥
कासपित्तोपशमना दीपना लघवो हिमाः।

स०—लाजास्तृडादींश्छिंदंति। कासपित्ते चोपशमयंति। तथा दीपना लघवः शीतवीर्याश्च॥ ३६॥

धान के लावा के गुण—

लाजा—(खील)-प्यास, वमन, अतिसार, प्रमेह, मेद और कण्डू को नष्ट करने वाली है; कास और पित्त को शान्त करती है; अग्निदीपक, लघु तथा शीत है॥ ३६॥

वक्तव्य—छर्दि के लिये 'लाजैश्च मन्थं यदि वाऽपि पेयाम्' चरक में दिया है। लाजा-चावलों (धान) से ही बनती है; परन्तु संस्कार के कारण लघु है।

पृथुका गुरवो बल्याः कफविष्टम्भकारिणः॥ ३७॥

स०—हरितधान्यानि निस्तुषभृष्टमुशलहतानि पृथुकाश्चिपिटसंज्ञा गुरुत्वादियुक्ताः॥ ३७॥

पृथुक (चूड़ा) के गुण—

वि०—चूड़ा—भारी, बलकारक, कफकारी और विष्टम्भी होता है।

धाना विष्टम्भिनी रूक्षा तर्पणी लेखनी गुरुः।

स०—धाना भृष्टयवादिर्विष्टंभिनी रूक्षादिगुणयुक्ता च।

दाना (भुने हुए जौ) आदि के गुण—

वि०—धाना—(भूने मक्की-जौ-ज्वार आदि)-विष्टम्भी, रूक्ष, तर्पण और लेखन करनेवाले एवं गुरु हैं।

वक्तव्य—धाना का एक भेद उलुम्ब या उलुम्बिका (गादा) भी है- इसमें गेहूँ की बालों को या ज्वार की बालों को आग पर भून लेते हैं-जैसे प्रायः होले बनते हैं, या मक्की को भूनकर (सेंककर) खाते हैं।

सक्तवो लघवः क्षुत्तृट्श्रमनेत्रामयव्रणान्॥ ३८॥
घ्नन्ति सन्तर्पणाः पानात्सद्य एव बलप्रदाः।
नोदकान्तरितान्न द्विर्न निशायां न केवलान्॥ ३९॥
न भुक्त्वा न द्विजैश्छित्त्वा सक्तूनद्यान्न वा बहून्।

स०—सक्तवो लघवः क्षुधादींश्च घ्नंति। तथोदकमिश्रिताः संतर्पणाः सद्य एव बलं कुर्वंति। तांश्च जलेनांतारितान्व्यवहितान्नाश्नीयात्। अन्यभोजनेषु ह्येतरा पानं विहितं न तथा सक्तुषु कार्यमिति बोधयति। तथा न द्विर्द्वौ वारौ नाद्यात्। न निशायां रात्र्याम्। न केवलानुदकादिरहितान्। न भुक्त्वाऽन्यद्भोजनादि। न द्विजैश्छित्त्वा दंतैः करस्थं पिंडं छित्त्वेत्यर्थः। बहूंश्च सक्तून्नाद्यात्। तंत्रांतरे चोक्तं रूक्षवातलत्वं सक्तूनामिह नोक्तम्। लघुत्वादिनैवावगतत्वात्। ननु रूक्षवातलं चेदभ्युपगम्यते सक्तूनां ततः संतर्पणा इत्यनुपपन्नम्। सद्य एव बलप्रदा इत्येतदप्ययुक्तम्। युक्त्या ह्याहारः परिणमति। स धातुपुष्ट्यै नान्यथा। अत्राचक्ष्महे। प्रभावादुभयमप्येतदुक्तम्। सक्तूनां ह्ययमचिंत्यः प्रत्यक्षवेद्यः प्रभावो यत्पीताः संतः संतर्पयंति। सद्य एव च बलं प्रयच्छंति वाजीकरणं ह्यपरिणतमेव स्वकार्यं जनयति। तथा च मद्यं परिणतमेव मदं जनयति तस्मात्संतर्पणत्वं फलप्रदत्वं चैषामुपपन्नमेव। तंत्रांतरे चोक्तम्। तुल्याज्यः सक्तुप्राशस्तु वृष्यो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भेदी रसायनम्। तृट्छर्दिश्रमतुन्मद्यपीततृष्णानिवर्तकः। प्रमेहक्षयकुष्ठानि न च स्युर्मंथपायिनाम्। निचयात्कठिना गुर्वी पिंडी प्रोक्ता मृदुर्लघुः। सक्तूनां द्रवतायोगाल्लघीयस्यवलेहिका। लाजसक्तुकृताऽपि स्याद्विलेपी तु गरीयसी ॥ ३८-३९ ॥

सत्तू के गुण—

वि०—सत्तू—लघु, भूख, प्यास,श्रम, नेत्ररोग और व्रण नाशक, पानी में घोलकर पीने से तुरन्त सन्तपर्ण करते हैं, और बल-प्रद होते हैं। सत्तू को खाते हुए बीच में पानी नहीं पीना चाहिये। दिन में दो बार सत्तू नहीं खाना चाहिये। रात में सत्तू नहीं खाना चाहिये। अकेला सत्तू नहीं खाना चाहिये (साथ में गुड़, मिर्च, कुछ लेना चाहिये)। भोजन करके सत्तू नहीं खाना चाहिये; सत्तू की पिण्डी को दाँतों से काटकर नहीं खाना चाहिये। मात्रा में बहुत सत्तू नहीं खाना चाहिये ॥ ३८-३९ ॥

वक्तव्य—'समघृतसक्तुप्राशाभ्यासो वृष्योदावर्त्तहराणाम्' चरक। 'तर्पयन्ति नरं सद्यः पीताः सद्यो बलाश्च ते ॥' (चरक सू. अ. २७।२६३) सत्तू तपर्क है। सत्तू बिना परिणत हुए ही बल-कारक और वृष्य होता है; जिस प्रकार अपरिणत मद्य मद को उत्पन्न करता है; उसी प्रकार सत्तू भी तुरन्त बलप्रद होता है।

पिण्याको ग्लपनो रूक्षो विष्टम्भी दृष्टिदूषणः ॥ ४० ॥

स०—पिण्याकाख्यो यस्तिलादीनां निष्पीडितः कल्को ग्लपनो ग्लानिकरः। ग्लपन इति ग्लायतेर्णिजंताद् ग्लास्नावनुवमां चेति मित्वाच्छ्रस्वः बाहुलकात्कर्तरि ल्युट् तथा विष्टंभी दृष्टिविकारकृच्च ॥ ४० ॥

पिण्याक (तिल-कल्क)—

वि०—पिण्याक (खली)—ग्लानिकारक, रूक्ष, विष्टम्भी और दृष्टि को नष्ट करने वाली है ॥ ४० ॥

वेसवारो गुरुः स्निग्धो बलोपचयवर्धनः।

स०—वेसवारो नागरधान्यकाजाजिहिंगुघृतादिसंस्कृतं कुट्टितं मांसम्। गुरुः स्निग्धो बलवर्धनः शरीरोपचयवर्धनश्च।

वेसवार का गुण—

वि०—वेसवार—गुरु, स्निग्ध, बल, और पुष्टि को बढ़ाने वाला है।

वक्तव्य—वेसवार—'निरस्थि पिशितं मांसं स्विन्नं गुडघृतान्वितम्। कृष्णामरिचसंयुक्तं वेसवारं तदुच्यते ॥' अस्थि रहित कुट्टित मांस को स्विन्न करके उसमें हींग, धनिया, गुड़, घी, पिप्पली, मरिच, जीरा मिलाकर जो तैयार किया जाता है; वह वेसवार है।

मुद्गादिजास्तु गुरवो यथाद्रव्यगुणानुगाः ॥ ४१ ॥

स०—मुद्गादिजास्तु वेसवारा ये इंडरिकादिभिर्द्रव्यैः सूक्ष्मच्छिन्नैः क्रियंते लोके पूरणशब्देन प्रसिद्धास्ते गुरवः प्रकृतिद्रव्यगुणाश्च। आदिशब्देन माषादयो गृह्यंते। तंत्रांतरे चोक्तम्। सर्पिस्तैलगुणक्षीरैर्यवगोधूमपैष्टिकाः। पूपा विष्टंभिनः शीताः पौष्टिका वातलाः खराः। वृष्या बल्याः सरा माषैर्जातश्च मृदुपिच्छिलाः। यथाऽन्नं गुरवो बल्याः स्थूलाश्च कठिनाश्च ये। तैलपक्वास्तु दृष्टिघ्ना गरीयांसो विदाहिनः। कासारसारलघवो लाजैर्लघुतराः स्मृताः। वातपित्तहरो वृष्यो घृतपूरः कफप्रदः। सद्यः प्राणकरो रुच्यो मांसलो रक्तलो गुरुः। लघीयान्मंडककृतो गरीयान्फलपूरितः। मधुरोत्कारिका वृष्या कासारः पिच्छिलो गुरुः। गुडमत्स्यंडिकाखंडक्षीरेक्षुरसमाक्षिकैः पूपाः शुक्रवलश्लेष्मरुचिदास्तर्पणाः क्षणात्। नानाद्रव्यैः समायुक्ताः पक्वामक्लिन्नभर्जिताः। निमर्दको गुरुः स्निग्धो वृष्यो बलवतां हितः। खारिकेंदुरिकापूरवटिकावटकादयः। विशदा रोचना बल्या गुरवः स्युः स्वयोनिवत्। यावकः पिच्छिलः स्निग्धः प्लीहोदावर्तहा गुरुः। भृष्टस्विन्नतया वाद्यो लघुः सेव्योऽतिकासिनाम्। ज्वरोदावर्तमेहानां पथ्यो वातानुलोमनः। ओलकं हरितावस्थं शिंबिजत्वात्खरं गुरु। मंदजर्यो यवादित्वादभ्योषो बृंहणः सरः। सिद्धसारे चोक्तम्। अत्युष्णा मंडकाः पथ्याः शीतला गुरवो मता इति ॥ ४१ ॥

वि०—मूंग आदि से बनाये वेसवार—गुरु तथा द्रव्य के समान गुण वाले होते हैं ॥ ४१ ॥

वक्तव्य—इनमें मांस के स्थान पर मूंग, चने आदि डालकर बनाते हैं। हरे मटर या चनों से इनको प्रायः बनाते हैं।

कुकूलकर्परभ्राष्ट्रकन्द्वङ्गारविपाचितान्।
एकयोनींल्लघून्विद्यादपूपानुत्तरोत्तरम् ॥ ४२ ॥

स०—अपूपान् कुकूलादिसिद्धानेकयोनीनेककारणान्यथोत्तरं लघून्विद्यात्। तेन कुकूलपक्वात् सजातीयादपूपात्कर्परपक्वो लघुः। कर्परपक्वाच्च भ्राष्ट्रपक्वः। भ्राष्ट्रपक्वात्कंदुपक्वः। कंदुपक्वाच्चांगारपक्वः। कुकूलं गोअरं गोशकृदादिचूर्णसंतापः। कर्परो ज्वालातप्तं कपालम्। भ्राष्ट्रकंदू प्रसिद्धावेव। अंगारा बृहंतः काष्ठसंभूता इति। इति कृतान्नवर्गः ॥ ४२ ॥

पाकभेद से अन्नों के गुण—

वि०—एक ही वस्तु से बने अपूप (खाद्य) यदि कुकूल, कर्पर, भ्राष्ट्र, कन्दु और अंगारे पर सेके जायें तो वे उत्तरोत्तर लघु होते हैं ॥ ४२ ॥

वक्तव्य—कुकूल-किसी गड्ढे को तुष या घास-फूस से गरम करके उसमें पकाना। कर्पर—मिट्टी का खर्पर या ठीकरा। भ्राष्ट्र—भाड़, जैसा चना भुनने के लिये-भड़भूजों का होता है। कन्दू—तन्दूर। अङ्गार—कोयले। कुकूल का अर्थ-पानी के बाष्प से पकाया-यह भी अरुणदत्त ने दिया है; परन्तु छानों को जला करके जो जमीन गरम होती है; उस पर सेकना-जैसा साधु लोग बाटी बनाते हैं, वह ठीक है। 'कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले' इति मेदिनीकोशे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ मांसवर्गः ।

कृतान्नवर्गानन्तरं मांसशाकवर्गयोस्तद्व्यञ्जनभूतयोर्निर्देशः। तत्राऽपि प्राधान्यान्मांसवर्गस्य पूर्वं निर्देशः। प्राधान्यं चाऽस्य भक्तेन सह प्रचुरोपयोगेऽप्यदोषात्। शाकस्य तु बहूपयोगे दोषं वक्ष्यति। शाकावरान्नभूयिष्ठमम्लंदुष्टवणं त्यजेदित्यनेन—

हरिणैणकुरङ्गर्क्षगोकर्णमृगमातृकाः ।
शशशम्बरचारुष्कशरभाद्या मृगाः स्मृताः ॥ ४३ ॥

स०—हरिणादयो दश मृगाः स्मृताः। आदिशब्देन कालपुच्छकपृषतादयः संग्रहोक्ता गृह्यंते। कालपुच्छकचारुष्कवरपोतशशोरणाः। श्वदंष्ट्रारामशारभकोहकारकशंबराः। करालकृतमालौ च पृषतश्च मृगाः स्मृता इति ॥ ४३ ॥

मृगों के नाम—

वि०—मृग—हरिण, एण, कुरङ्ग, ऋक्ष, गोकर्ण, मृगमातृका, शश, शम्बर, चारुष्क, शरभ आदि मृग कहलाते हैं ॥ ४३ ॥

वक्तव्य—मांस की योनि आठ प्रकार की है। यथा—'मृग-विष्किर-प्रतुद-बिलेशय-प्रसह-महामृग-जलचर-मत्स्य-भेदेन।' इनमें जो चलते रहते हैं—(शिकार के लिए) ढूंढे जाते हैं, वे मृग हैं; यथा हरिण आदि।

लाववर्तीकवर्तीररक्तवर्त्मककुक्कुभाः ।
कपिञ्जलोपचक्राख्यचकोरकुरुबाहवः ॥ ४४ ॥
वर्तको वर्तिका चैव तित्तिरिः क्रकरः शिखी ।
ताम्रचूडाख्यबकरगोनर्दगिरिवर्तिकाः ॥ ४५ ॥
तथा शारपदेन्द्राभवरटाश्चेति विष्किराः ।

स०—तत्र लावादयो वारटांता एकविंशतिः विकीर्य भक्षणाद्विष्किराः। रक्ते वर्त्मनी यस्य स रक्तवर्त्मकः। वर्तको वर्तिकेति जात्यंतरं नतु वर्तकस्य स्त्री वर्तिका। यथा च बलाका सारिकेति। पुंस्यपि स्त्रीलिंगत्वावेशात्। शिखी मयूरः। व्रीह्यादिः ॥ ४४–४५ ॥

विष्किर पक्षियों के नाम—

वि०—विष्किर—लाव, वर्त्तीक, वर्त्तीर, रक्तवर्त्मक, कुक्कुभ, कपिञ्जल, उपचक्र, चकोर, कुरुबाहु, वर्त्तक, वर्तिका, तित्तिर, क्रकर, मोर, मुर्गा, बकर, गोनर्द, गिरिवर्त्तिका, शारपद, इन्द्राभ, वरटा आदि विष्किर हैं क्योंकि ये पैर से वस्तु को बिखेर कर खाते हैं ॥ ४४–४५ ॥

जीवञ्जीवकदात्यूहभृङ्गाह्वशुकसारिकाः ॥ ४६ ॥
लट्वाकोकिलहारीतकपोतचटकादयः ।
प्रतुदाः—

स०—जीवंजीवकादयः प्रतुदा दश स्मृताः। प्रतुद्य तुंडेनाऽऽहृत्य शाल्यादेर्भक्षणात्प्रतुदाः। आदिशब्देन संग्रहोक्ताः खंजरीटकपारावता गृह्यन्ते ॥ ४६ ॥

प्रतुद पक्षियों के नाम—

वि०—प्रतुद—जीवञ्जीवक, दात्यूह, भृंग, शुक, सारिका, लट्वा, कोकिल, हारीत, कपोत, चटक आदि प्रतुद हैं। प्रतुद—चोंच से ठोंग मारने वाले ॥ ४६ ॥

भेकगोधाहिश्वाविदाद्या बिलेशयाः ॥ ४७ ॥

स०—भेकादयश्चत्वारो बिलेशयाः। बिले बाहुल्येन शयनाद्बिलेशयाः। आदिशब्देन श्वेतश्यामशल्यकादयो गृह्यन्ते ॥ ४७ ॥

बिलेशय के नाम—

वि०—बिलेशय—मेढक, गोह, साँप, सेह आदि बिल में रहने से बिलेशय कहलाते हैं ॥ ४७ ॥

गोखराश्वतरोष्ट्राश्वद्वीपिसिंहर्क्षवानराः ।
मार्जारमूषकव्याघ्रवृकबभ्रुतरक्षवः ॥ ४८ ॥
लोपाकजम्बुकश्येनचाषवान्तादवायसाः ।
शशघ्नीभासकुररगृध्रोलूककुलिङ्गकाः ॥ ४९ ॥
धूमिका मधुहा चेति प्रसहा मृगपक्षिणः ।

स०—गवादयः प्रसह्याहृत्य भक्षणात्प्रसहाः। मृगाश्च पक्षिणश्च मृगपक्षिणः। केचिन्मृगाः केचित्पक्षिण इत्यर्थः। अश्वतरो वेंगसरः। अश्वस्तुरगः। बभ्रुर्जाहको नकुल इत्यन्ये। लोपाको लोमशः। जंबुकः शृगालः। श्येनो गरुडाकृतिः। चाषः किकीदिविः। वांतादः श्वा। वायसः काकः। उलूकः काकारिः कुलिंगकः कृष्णचटकः ॥ ४८–४९ ॥

प्रसह पशुओं के नाम—

वि०—प्रसह—गाय, गधा, खच्चर, ऊंट, घोड़ा, चीता, सिंह, रीछ, बन्दर, बिल्ली, चूहा, व्याघ्र, भेड़िया, बभ्रु (नकुल), तरक्षु (लगड़-भगड़), लोमड़ी, गीदड़, श्येन (बाज), चाष, कुत्ता, कौवा, शशघ्नी, भास, कुरर, गीध, उल्लू, कुलिङ्गक (गौरैया), धूमिका, मधुहा—ये पशु-पक्षी प्रसह जाति के हैं—क्योंकि झपट कर खाते हैं ॥ ४८–४९ ॥

वक्तव्य—इनमें श्येन, चाष को छोड़ कर कुत्ते तक पशु हैं, और कौवे से लेकर पक्षी हैं।

वराहमहिषन्यङ्कुरुरुरोहितवारणाः ॥ ५० ॥
सृमरश्चमरः खड्गो गवयश्च महामृगाः ।

स०—वराहादयो दश महामृगसंज्ञाः। वारणो हस्ती ॥ ५० ॥

महामृगों के नाम—

वि०—महामृग—सूअर, भैंस, न्यङ्कु, रुरु, रोहित, हाथी, सृमर (जङ्गली घोड़ा), चमरी गाय, गैंडा और गवय (नील गाय) ये महामृग—अर्थात् बड़े मृग हैं।

हंससारसकादम्बबककारण्डवप्लवाः ॥ ५१ ॥
बलाकोत्क्रोशचक्राह्वमद्गुक्रौञ्चादयोऽम्चराः ।

स०—हंसादयः क्रौंचांता अप्सु चरणादप्चरसंज्ञाः। आदिशब्देन रक्तशीर्षकादयो गृह्यन्ते ॥ ५१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जलचरों के नाम—

जलचर—हंस, सारस, कादम्ब, बगुला, कारण्डव, प्लव, बलाका, उत्क्रोश, चक्रवाक, मद्गु, क्रौञ्च आदि जलचर हैं—जल में विहार करते हैं ॥ ५१ ॥

मत्स्या रोहितपाठीनकूर्मकुम्भीरकर्कटाः ॥ ५२ ॥
शुक्तिशङ्खोद्रशम्बूकशफरीवर्मिचन्द्रिकाः ।
चुलूकीनक्रमकरशिशुमारतिमिङ्गिलाः ॥ ५३ ॥
राजीचिलिचिमाद्याश्च—

स०—रोहितकादय एकोनविंशतिर्जलोद्भवा मत्स्यसंज्ञाः । चशब्दोऽनुक्तकदलकपर्दकादिसमुच्चयार्थः ॥५२–५३॥

मत्स्यवर्ग—

वि०—मछलियाँ—रोहित, पाठीन, कछुआ, कुम्भीर (घड़ियाल), केकड़ा, शुक्ति, शंख, उद्र (जलविडाल-उदविलाव), शम्बूक (घोंघा), शफरी, वर्मी, चन्द्रिका, चुलूकी, नक्र, मकर, शिशुमार (सुइँस वा सोंस), तिमिङ्गिल (ह्वेल आदि), राजी, चिलचिम आदि मछलियाँ हैं ॥ ५२–५३ ॥

—मांसमित्याहुरष्टधा ।
(मृग्यं वैष्किरिकं किञ्च प्रातुदं च बिलेशयम् ।
प्रासहं च महामृग्यमप्चरं मात्स्यमष्टधा ॥ १ ॥)
योनिष्वजावी व्यामिश्रगोचरत्वादनिश्चिते ॥ ५४ ॥
आद्यान्त्यांजाङ्गलानूपा मध्यौ साधारणौ स्मृतौ ।

स०—इत्यष्टभिः प्रकारैः शास्त्रकारा मांसमाहुः । योनिषु पूर्वोक्तास्वष्टासु मध्ये व्यामिश्रगोचरत्वाद्व्यामिश्रविषयत्वादजावी व्यामिश्रेऽजावी छागोरभ्रे ते अनिश्चिते । ते हि जांगलेऽपि देशे वर्तेते अनूपेऽपि अजावी इति स्त्रीलिंगनिर्देशोऽत्र विवक्षित एव । केचित्त्वनिश्चिताविति निजगदुः । तत्र तित्तिरिरपि धन्वानूपचारी प्रथितः । तत्कथमसौ हि जांगलः कीर्तितः । ब्रूमः । तत्स्वभावत्वात् यद्यप्युभयचरोऽयं तथापि जांगलस्वभावत्वाज्जांगलोऽयं भक्षणे । अत्र बिष्किरत्वं तित्तिरे निश्चितं निमित्तमस्ति । तस्मादयं जांगल एव युक्तः । हरिणादीनां च किरातकैवर्तादिभ्यो नानादेशप्रसिद्धा संज्ञा वेद्याः । आदौ भवा आद्या मृगविष्किरप्रतुदाख्या जांगलचारित्वाज्जांगलशब्दवाच्या एव । महामृगाऽप्चरमत्स्याख्या आनूपाः । मध्यौ द्वौ विलेशयप्रसहाख्यौ साधारणौ । जांगलानूपचारिणावित्यर्थः । मध्याविति द्विवचननिर्देशसामर्थ्यादाद्यंतानां वर्गाणां प्रत्येकं त्रिधात्वमनुमीयते त्रिग्रहणमंतरेणापि ॥ ५४ ॥

इस प्रकार से शास्त्रकार मांस को आठ प्रकार का कहते हैं—

वि०—(मृग, विष्किर, प्रतुद, बिलेशय, प्रसह, महामृग, जलचर और मछलियाँ ये आठ प्रकार हैं ।)

बकरी और भेड़—ये दोनों अनिश्चित योनिवाले हैं; क्योंकि ये जांगल और आनूप दोनों देशों में रहते हैं ।

इन आठ वर्गों में—पहले के तीन मृग, विष्किर और प्रतुद ये जंगल में रहने से जांगल कहे जाते हैं; और अन्त के तीन—महामृग, जलचर और मछलियाँ ये आनूप हैं । मध्य के दो—बिलेशय और प्रसह साधारण कहलाते हैं ॥ ५४ ॥

तत्र बद्धमलाः शीता लघवो जाङ्गला हिताः ॥५५॥
पित्तोत्तरे वातमध्ये सन्निपाते कफानुगे ।

स०—तत्र तेषु जांगलानूपसाधारणेषु मध्ये जांगला बद्धमला ग्रथितं पुरीषं कुर्वंति । शीतवीर्या लघवः । सन्निपाते हिताः । किंभूते । पित्तोत्तरे पित्ताधिके । तथा वातो मध्यो यस्मिंस्तस्मिन्मध्यममरुति । तथा कफानुगे कफोऽनुगोऽबलो हीनो यस्मिंस्तस्मिन् स्वल्पश्लेष्मणि ॥ ५५ ॥

जंगली जीवों के मांस का गुण—

वि०—जांगल मांस—मल को बाँधने वाले, शीतल और लघु हैं तथा पित्तप्रधान, वातमध्य और हीनकफ सन्निपात में प्रशस्त हैं ॥ ५५ ॥

दीपनः कटुकः पाके ग्राही रूक्षो हिमः शशः ॥५६॥

स०—शशोऽग्निदीपनः पाके कटुको ग्राही रूक्षः शीतश्च । ग्राहिशीतत्वं चाऽस्य जांगलत्वादेव लब्धमित्यतिशयार्थं पुनारहोपात्तम् । स्वादुकषायत्वादिकमेषामिह युक्त्योक्तम् । संग्रहे तु स्पष्टं कृत्वोक्तम् । यथा । तत्र बद्धमला रुच्या मांसानामुत्तमा हिमाः । कषायस्वादुविशदा लघवो जांगला हिताः । ताम्रोऽथ हरिणः कृष्णस्त्वेणो हृद्यस्त्रिदोषजित् । लघीयान् षड्सश्चासौ ग्राही रूक्षो हिमः शशः । कटुपाकोऽग्निकृत्पथ्यः सन्निपातेऽनिलावर इति ॥ ५६ ॥

खरगोश के मांस का गुण—

वि०—शशक—अग्निदीपक, विपाक में कटु, ग्राही, रूक्ष और शीतल है ॥ ५६ ॥

ईषदुष्णगुरुस्निग्धा बृंहणा वर्तकादयः
तित्तिरिस्तेष्वपि वरो मेधाग्निबलशुक्रकृत् ॥ ५७ ॥
ग्राही वर्ण्योऽनिलोद्रिक्तसन्निपातहरः परम् ।

स०—वर्तकादारभ्य यावज्जांगलसमाप्तिस्तावत्सर्वे औष्ण्यगौरवस्निग्धत्वैरल्पैर्युक्ताः । तेष्वपि मध्ये तित्तिरिः श्रेष्ठो मेधादिकरश्च । तथा संग्रहणो वर्ण्यो वाताधिकसन्निपातहरश्च । स च तित्तिरिर्धन्वन्यानूपे च देशे विचरत्यतः स्निग्ध उष्णो गुरुर्बृंहणश्च । तथा च संग्रहे । धन्वानूपविचारित्वात् स्निग्धोष्णगुरुबृंहण इति ॥ ५७ ॥

बटेर आदि के मांस का गुण—

वि०—वर्त्तक आदि—थोड़े गरम, गुरु, स्निग्ध और पुष्टिदायक है । इनमें तीतर श्रेष्ठ है । यह मेधा, अग्नि, बल और शुक्र को बढ़ाता है; एवं संग्राही, वर्ण को बढ़ानेवाला, और वात-प्रधान सन्निपात को नष्ट करने में उत्तम है ॥ ५७ ॥

वक्तव्य—तीतर-जांगल और आनूप दोनों देशों में विचरने से स्निग्ध, उष्ण, गुरु और बृंहण है । इसी से कहा है 'धन्वानूपविचारित्वात् स्निग्धोष्णगुरुबृंहणः ।'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नातिपथ्यः शिखी पथ्यः श्रोत्रस्वरवयोदृशाम् ।।५८।।

स०—शिखी बर्ही नातिपथ्यः श्रोत्रादीनां पथ्यो वयसः स्तम्भनकारित्वेन पथ्यः ॥ ५८ ॥

मोर, मुर्गा आदि के मांस के गुण—

वि०—मोर—स्वास्थ्य के लिये बहुत उत्तम नहीं है; परन्तु कान, स्वर, वय (युवावस्था) और दृष्टि के लिये उत्तम है ॥ ५८ ॥

वक्तव्य—कान, आँख या गले के रोगों में यह उपयोगी है।

तद्वच्च कुक्कुटो वृष्यः ग्राम्यस्तु श्लेष्मलो गुरुः ।

स०—तद्वच्च कुक्कुटो मयूरतुल्यगुणो वृष्यश्च ग्राम्यः पुनः कुक्कुटः श्लेष्मलो गुरुश्च ।

वि०—मुर्गा—मोर के समान गुणवाला है; तथा वृष्य है। इनमें ग्राम का (पालतू) मुर्गा कफकारक और गुरु होता है।

मेधाऽग्निकरा हृद्याः क्रकरा सोपचक्रकाः ।।५९।।

स०—क्रकरोपचक्रकाश्च मेधामग्निं च कुर्वंति हृद्याश्च ॥ ५९ ॥

वि० क्रकर और उपचक्रक—बुद्धि और अग्निकारक, हृदय के लिये हितकर हैं ॥ ५९ ॥

गुरुः सलवणः काणकपोतः सर्वदोषकृत् ।

स०—काणः कपोतो गुरुरीषल्लवणस्त्रिदोषकृच्च ।

वि०— काणकपोत (काल-श्वेत कबूतर)—गुरु, थोड़ा नमकीन और तीनों दोषों को उत्पन्न करता है।

चटकाः श्लेष्मलाः स्निग्धा वातघ्नाः शुक्रलाः परम् ।।

स०—चटकाः श्लेष्मलादियुक्ता अतिशयेन शुक्रकृतश्च ॥ ६० ॥

वि०—चटक (गौरैया)—कफकारक, स्निग्ध, वातनाशक और अतिशय शुक्रवर्धक है ॥ ६० ॥

वक्तव्य—अतिशय शुक्रवर्धक होने से चरक में—'तृप्तिं चटकमांसानां गत्वा योऽनुपिबेत्पयः। न तस्य लिङ्गशैथिल्यं स्यान्न शुक्रक्षयो निशि ॥' इसका वृष्य विधान किया गया है।

गुरूष्णस्निग्धमधुरा वर्गाश्चातो यथोत्तरम् ।

सूत्रशुक्रकृतो बल्या वातघ्नाः कफपित्तलाः ।।६१।।

स०—अतोऽनन्तरं बिलेशयाद्या वर्गा यथोत्तरं गुरुत्वेनोष्णत्वेन स्निग्धत्वेन मधुरत्वेन चाधिकाः। यो यस्मादुत्तरो वर्गः स तस्माद्गुरुत्वादिभिरधिक इत्यर्थः। तथा यथोत्तरमेव मूत्रशुक्रकृतो बल्या वातघ्नाः श्लेष्मपित्तलाश्च ॥ ६१ ॥

बिलेशयादि के मांस का गुण—

वि०—इसके आगे के वर्ग उत्तरोत्तर गुरु, उष्ण, स्निग्ध, मधुर हैं। वे मूत्र और मल को उत्पन्न करनेवाले, बलकारक, वातनाशक और पित्त को बढ़ाते हैं ॥ ६१ ॥

वक्तव्य—जांगल वर्ग से अगले वर्ग-बिलेशय, प्रसह, महामृग, जलधर और मत्स्य-ये उत्तरोत्तर गुरु, उष्ण, स्निग्ध और मधुर हैं।

एवं वर्गपंचकस्य सामान्यगुणानुक्त्वाऽपवादमाह—

शीता महामृगास्तेषु, क्रव्यादप्रसहाः पुनः ।

लवणानुरसा पाके कटुका मांसवर्धनाः ।।६२।।

जीर्णार्शोग्रहणीदोषशोषार्तानां परं हिताः ।

स०—तेषु वर्गेषु मध्ये महामृगाः शीतवीर्याः। क्रव्यमाममांसं भुंजते ये ते क्रव्यादाः। क्रव्यादास्तु ये प्रसहा मार्जारगृध्रोलूकादयस्ते लवणानुरसाः पाके कटुका मांसवर्धनाश्चातितराम्। जीर्णप्रभृत्यामयानामतिशयेन हिताः ॥ ६२ ॥

महामृगादि के मांस का गुण—

वि०—अपवाद—इनमें महामृग शीत हैं, और प्रसहवर्ग में जो मांस खानेवाले जीव हैं, वे लवण अनुरस, विपाक में कटु और मांसवर्धक हैं। पुरातन अर्श, ग्रहणी रोग और राजयक्ष्मा के रोगियों के लिये अतिशय उत्तम हैं ॥ ६२ ॥

नातिशीतगुरुस्निग्धं मांसमाजमदोषलम् ।।६३।।

शरीरधातुसामान्यादनाभिष्यन्दि बृंहणम् ।

स०—नातिशब्दोऽत्रेषदर्थे। यदि तु प्रतिषेधनमात्रमभीष्टमभविष्यदाचार्यस्य ततो नञ एव केवलस्योपादानमकरिष्यत्। तस्मादीषदर्थ एव विवक्षितः। अत एवं व्याख्यानयंति। अदोषलमिति। अल्पदोषलम्। यथाऽनतिदग्धो ग्राम इति। शरीरस्य धातुः शरीरधातुः प्रकृतत्वात्पुरुषशरीरस्य मांसाख्यो यो धातुस्तस्य सामान्यात्तुल्यत्वादाजं मांसमनभिष्यन्दि बृंहणं च। गुणकृतं चाऽत्र सामान्यं गृह्यते न द्रव्यकृतम्। द्रव्यकृते हि सामान्ये गृह्यमाणे तुरगोरगादिमांसमपि पुरुषशरीरधातोर्मांसाख्यस्य मांसत्वेन समानं भवतीति तदप्यनभिष्यंदि बृहणं च स्यान्न केवलमाजं मांसम्। गुणकृते तु सामान्ये गृहीते शरीरधातुसामान्ययादाजमेव मांसमनभिष्यंदि बृंहणं चेति वक्तुं युज्यते। मांसग्रहणं चात्रोपलक्षणार्थम्। न केवलमाजं मांसं पुरुषशरीरधातुना मांसाख्येन तुल्यं यावदन्येऽपि ये छागशरीरगता धातवस्तेऽपि मनुष्यशरीरधातुना तुल्यगुणास्तेऽप्यनभिष्यंदिनो बृंहणाश्च। अनया संग्या पुरुषमांसस्याऽप्याचार्येणाऽत्र गुणा उक्ताः। ननु बृंहणं यद्द्रव्यं तद्भौमाप्यमभिष्यंदि च। अपामेवाऽसाधारणो धर्मः स्रवणरूपः। तत्कथमनभिष्यंदीत्युक्तम्। ब्रूमः। द्रव्यप्रभावात् ईदृशोऽयं द्रव्यप्रभावो यद्बृंहणमपि द्रव्यमनभिष्यंदीति ॥६३॥

बकरे के मांस का गुण—

वि०—बकरे का मांस—न तो बहुत शीत है, न बहुत गुरु है और न बहुत स्निग्ध है, तथा दोष प्रकोपक भी नहीं है। मनुष्य के शरीर के धातुओं के समान होने से बृंहण है तथा अभिष्यन्दी नहीं है ॥ ६३ ॥

वक्तव्य—जिस प्रकार जमे हुए घृत में जमा घृत मिलाने से घृत बढ़ता तो है, परन्तु बाहर नहीं आता या द्रव नहीं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बनता, परन्तु गरम घृत बढ़ता भी है और द्रव भी हो जाता है; उसी प्रकार यह बकरे का मांस शरीर-धातु के समान होने से (जमे घी की भाँति) बृंहण करता है।

विपरीतमतो ज्ञेयमाविकं बृंहणं तु तत् ॥६४॥

स०—अतोऽजमांसाद्विपरीतमाविकं मांसमत्युष्णं स्निग्धं गुरु सदोषमभिष्यंदि चेति। बृंहणत्वस्याऽपि विपर्यये प्राप्ते तदपवादमाह। बृंहणं तु तदिति। तुशब्दोऽवधारणे। बृंहणमेव तदित्यर्थः ॥ ६४ ॥

भेड़ों के मांस का गुण—

वि०—भेड़ का मांस—बकरी के मांस से विपरीत गुणों वाला अर्थात् अत्यन्त उष्ण, स्निग्ध, गुरु, त्रिदोषकारक और अभिष्यन्दी होता है तथा बृंहण है ॥ ६४ ॥

शुष्ककासश्रमात्यग्निविषमज्वरपीनसान्।
कार्श्यं केवलवातांश्च गोमांसः सन्नियच्छति ॥६५॥

स०—गोमांसं शुष्ककासादीन्नियच्छति ॥ ६५ ॥

गोमांस के गुण—

वि०—गाय का मांस—शुष्ककास, श्रम, अत्यग्नि, विषम ज्वर, पीनस, कार्श्य और शुद्ध वायुजन्य रोगों को नष्ट करता है ॥ ६५ ॥

उष्णो गरीयान्महिषः स्वप्नदार्ढ्यबृहत्त्वकृत्।

स०—महिष उष्णो गुरुतरः स्वप्नादींश्च करोति। गुरुशब्दादीयसुनि प्रियस्थिरेत्यादिना गरादेशः। दार्ढ्यमिति वर्णदृढेत्यादिना ष्यञ्।

भैंसे के मांस का गुण—

वि०—भैंसे का मांस—उष्ण तथा दूसरे मांसों से गुरु है तथा नींद, दृढ़ता और पुष्टि को करता है।

तद्वद्वराहः श्रमहा रुचिशुक्रबलप्रदः ॥६६॥

स०—वराहःसूकरस्तद्वन्महिषगुणो ज्ञेय इत्यर्थः। तथा श्रमहा रुच्यादिप्रदश्च ॥ ६६ ॥

सूअर के मांस के गुण—

वि०—सूअर का मांस—भैंसे के मांस के गुणों के समान है; थकान नाशक; रुचि, शुक्र और बल देने वाला है ॥ ६६ ॥

मत्स्याः परं कफकराश्चिलिचीमस्त्रिदोषकृत्।

स०—गुरूष्णस्निग्धमधुरावर्गाश्चातो यथोत्तरमित्यनेन। लक्षणेनाऽतिगुरूष्णस्निग्धमधुरत्वमतिमूत्रशुक्रकृत्वमतिबल्यत्वमतिवातघ्नत्वमतिकफपित्तलत्वं च मत्स्यानामुक्तम्। परं कफकरा इत्यनेनाऽतः कफकृत्तमा मत्स्या इति बोधयति। संग्रहे स्पष्टार्थमेवमुक्तम्। कफपित्तकरा मत्स्याः परं पवननाशना इति। चिलिचीमसंज्ञो मत्स्यस्त्रिदोषकरः।

मछली के गुण—

वि०—मछलियाँ—अतिशय कफ को उत्पन्न करती हैं; (इसलिये वायुनाशक हैं) किन्तु चिलचिम मछली त्रिदोषकारक है।[1]

लावरोहितगोधैणाः स्वे स्वे वर्गे वराः परम् ॥६७॥

स०—लावादयः। स्वस्ववर्गेषु वरतराः। तत्र लावो विष्किरेष्वतिश्रेष्ठः। रोहितो मत्स्येषु। स हि प्रतिस्रोतोविचारी। आकाशप्लवनश्च। तथा चोक्तम्। प्रतिस्रोतोविचारित्वादाकाशप्लवनेन च। रोहितः प्रवरस्तेषामिति। गोधा च विलेशयेषु वरा। एणो मृगेष्विति ॥ ६७ ॥

सर्वोत्तम मांस—

वि०—अपने अपने वर्गों में—विष्किरों में बटेर; मछलियों में रोहित; बिलेशयों में गोह; मृगों में एण अतिशय श्रेष्ठ हैं ॥ ६७ ॥

मांसं सद्योहतं शुद्धं वयःस्थं च भजेत्—

स०—मांसं सद्योहतं भजेत्। सद्योहतस्य मांसं भजेदित्यर्थः। तथा शुद्धं स्नाय्वस्थ्यादिरहितम्। तथा वयसि तिष्ठतीति वयःस्थम्। यद्यपि सर्वं मांसं वयःस्थमेव तथाऽपीह वयःस्थमित्युक्त्वा शोभनं तरुणं वय इति गम्यते। तस्माद्यूनः प्राणिनो मांसं भजेन्न बालवृद्धयोरिति।

वि०—भक्ष्य मांस—जो मांस तुरन्त का मारा हुआ, शुद्ध (विषादि से रहित), युवा पशु का हो वह भक्ष्य है।

—त्यजेत्।

मृतं कृशं भृशं मेद्यं व्याधिवारिविषैर्हतम् ॥ ६८ ॥

स०—मृतं स्वयं मृतं न भजेत्। अविज्ञातस्वरूपेण व्याधिना मृतस्य प्राणिनो यन्मांसं तत्त्यजेदित्यर्थः। कृशं दुर्बलं न भजेत्। तथा भृशं मेद्यमतिमेदुरं मांसं त्यजेत्। तथा व्याधिना निर्ज्ञातस्वरूपेण हतस्य वारिणा विषेण च हतस्य निर्जीवीकृतस्य यन्मांसं तत्त्यजेत्। संग्रहे तु हंसादीनां विशेषा उक्ताः। यथा। हंसः स्वरकरः पित्तरक्तजिन्मधुरो हिमः। कुलीरः परमं वृष्यो बृंहणः प्रीणनो गुरुः। गोधा नियच्छति विषं मूषिकः शुक्रवर्धनः। गुरूण्यंडानि बालानां कषायमधुरं पलम्। वृद्धानां स्नायुभूयिष्ठमबल्यं गुरु दोषलमिति ॥ ६८ ॥

त्याज्य मांस—

वि०—निन्द्य मांस—स्वयं मरे, कृश, अतिशय मेदवाले, रोग से, पानी में डूबकर या विष से मरे हुए पशु या पक्षी का मांस निन्दित है—इसको नहीं खाना चाहिये ॥ ६८ ॥

पुंस्त्रियोः पूर्वपश्चार्धे गुरुणी, गर्भिणी गुरुः।
लघुर्योषिच्चतुष्पात्सु, विहङ्गेषु पुनः पुमान् ॥६९॥
शिरःस्कन्धोरुपृष्ठस्य कट्याः सक्थ्नोश्च गौरवम्।
तथाऽऽमपक्वाशययोर्यथापूर्वं विनिर्दिशेत् ॥७०॥

१. प्रसह वर्ग में इसका मांस सबसे निन्दित है—'निन्दितो गौः सदर्दुरः' (अ० सं० सू० अ० ७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शोणितप्रभृतीनां च धातूनामुत्तरोत्तरम् ।
मांसाद्गरीयो वृषणमेढ्रवृक्कयकृद्गुदम् ॥७१॥

स०—पुंस्त्रियोः पूर्वपश्चार्धे यथासंख्यं गुरुणी । पूर्वं च पश्चं च पूर्वपश्चे तयोरर्धे । पुंसः पूर्वार्धं गुरु स्त्रियः पश्चार्धं गुर्वित्यर्थः । गर्भिणी गुरुः गर्भिणीमांसं गुरु । चत्वारः पादा येषां ते चतुष्पादस्तेषु चतुष्पात्सु गवादिषु मध्ये स्त्री लघुः । चतुष्पादितिसंख्यासुपूर्वस्येत्यंतलोपः । विहंगेषु द्विजेषु तु पुमान् लघुः । शिरःप्रभृतीनां मांसानां यथापूर्वं गुरुत्वं निर्दिशेत् । एवं सक्थ्यादिमांसेभ्यः शिरोमांसं गुरुतममित्यवतिष्ठते । आमपक्वाशययोश्च यथापूर्वं गुरुत्वनिर्देशः । तेन पक्वाशयादामाशयो गुरुः । रक्तादीनां धातूनां यथोत्तरं गुरुत्वं निर्दिशेत् । तेन लोहितान्मांसं गुरु मांसान्मेद इत्यादि । मांसाद्गरीयो वृषणमेढ्रवृक्कयकृद्गुदमित्यत्राऽप्युत्तरोत्तरमित्यनुवर्तते । तेन मांसाद्गुरुतरो वृषणस्तस्मान्मेढ्रो यावत्सर्वं गरिष्ठं गुदं निर्दिशेत् । इति मांसवर्गः ॥ ६९-७१ ॥

नर-मादा का मांस—

वि०—गौरव-लाघव—मांसवर्ग में पुमान् (पुँल्लिङ्ग—नर) का पूर्वभाग-नाभि से आगे का भाग-गुरु होता है और स्त्रियों (मादा) का नाभि से पिछला भाग गुरु है । गर्भवती सब अवस्थाओं में गुरु है । चौपायों में स्त्री जाति लघु है; और पक्षियों में पुरुष जाति लघु है । शिर, कन्धे, ऊरु, पीठ, कटि और सक्थि इनमें पहला पिछले से भारी है; अर्थात् सक्थि से कटि भारी है; कटि से पीठ भारी है इसी प्रकार पक्वाशय से आमाशय गुरु है । रक्तादि धातुओं में उत्तरोत्तर गुरु हैं—रक्त से मांस, मांस से मेद् गुरु है । मांस से वृषण, वृषण से मेहन, मेहन से वृक्क, वृक्क से यकृत् और यकृत् से गुदा भारी होता है ॥ ६९-७१ ॥

वक्तव्य—मांस के गुरु एवं लघु के विषय में चरक में कहा है-'चरः शरीरावयवः स्वभावो धातवः क्रियाः । लिङ्गं प्रमाणं संस्कारं मात्रा चास्मिन्परीक्ष्यते ॥' मांस के सम्बन्ध में प्राणी के विचरण (आहार और जाङ्गलादि योनि), शरीर के अवयव, स्वभाव, धातु, क्रिया, लिङ्ग, प्रमाण, संस्कार और मात्रा की परीक्षा करनी चाहिये ।

अथ शाकवर्गः ।

मांसवर्गादनन्तरं शाकवर्गो निगद्यते—

शाकं पाठाशटीसूषासुनिषण्णसतीनजम् ।
त्रिदोषघ्नं लघु ग्राहि सराजक्षववास्तुकम् ॥७२॥
सुनिषण्णोऽग्निकृद्वृष्यस्तेषु राजक्षवः परम् ।
ग्रहण्यर्शोविकारघ्नो वर्चोभेदि तु वास्तुकम् ॥७३॥

स०—पाठादिजं शाकं त्रिदोषहरं लघु ग्राहि च तद्वद्राजक्षवकवास्तुकम् । तेषु मध्ये सुनिषण्णः स्वस्तिकाख्यो जलमध्ये भवति । पत्रैश्चांगेरीतुल्योऽग्निकरोऽपि वृष्यः । राजक्षवः दुग्धोधनो राजशाकाख्योऽत्यर्थं ग्रहण्यर्शोविकारघ्नः । वास्तुकं तु पुनः टक्कवास्तुकाख्यं वर्चोभेदि पुरीषस्य भेदनम् ॥७२-७३॥

शाकों का गुण—

वि०—शाक—पाठा, शटी (कपूर कचूरी), सूषा (कसौंदी), सुनिषण्णक (चौपतिया), और सतीन (मटर) इनका शाक त्रिदोषनाशक, लघु और ग्राही है । राजक्षव (दुधिया) एवं बथुवे का शाक भी त्रिदोषनाशक, लघु और ग्राही है ॥ ७२-७३ ॥

इन शाकों में सुनिषण्णक अग्नि को बढ़ानेवाला और वृष्य है । अतिशय ग्रहणी और अर्शरोग नाशक है । बथुवा-मल करनेवाला है-मल साफ लाता है ।

हन्ति दोषत्रयं कुष्ठं वृष्या सोष्णा रसायनी ।
काकमाची सरा स्वर्या—

स०—काकमाची त्रिदोषघ्नी कुष्ठनाशनी वृष्या किंचिदुष्णा सरा भेदिनी स्वरहिता च स्वर्या । स्वास्थ्यसंवाहकत्वेन च रसायनसादृश्याद्रसायनम् ।

मकोय शाक के गुण—

वि०—काकमाची (मकोय)—त्रिदोषनाशक, कुष्ठ को नष्ट करती है, वृष्य, कुछ उष्ण-रसायन, मलभेदक और स्वर के लिये-उत्तम है ।

—चाङ्गेर्यम्लाऽग्निदीपनी ॥७४॥
ग्रहण्यर्शोऽनिलश्लेष्महितोष्णा ग्राहिणी लघुः ।

स०—चांगेरी क्षुद्राम्लिकाम्ला चाग्निदीपनी ग्रहण्यादिषु हिता । उष्णवीर्या ग्राहिणी लघ्वी च ॥ ७४ ॥

चांगेरी शाक के गुण—

वि०—चांगेरी—(तिपतिया)—खट्टी, अग्निदीपक, ग्रहणी, अर्श, वायु और कफ रोगों में हितकारी, उष्ण, ग्राही और लघु है ।

पटोलसप्तलारिष्टशार्ङ्गेष्टावल्गुजाऽमृताः ॥७५॥
वेत्राग्रबृहतीवासाकुतिलीतिलपर्णिकाः ।
मण्डूकपर्णीकर्कोटकारवेल्लकपर्पटाः ॥७६॥
नाडीकलायगोजिह्वावार्ताकं वनतिक्तकम् ।
करीरं कुलकं नन्दी कुचैला शकुलादनी ॥७७॥
कठिल्लं केम्बुकं शीतं सकोशातककर्कशम् ।
तिक्तं पाके कटु ग्राहि वातलं कफपित्तजित् ॥७८॥

स०—पटोलादीनि कर्कशांतान्यष्टाविंशतिः शीतवीर्याणि तिक्तानि पाके कटूनि ग्राहीणि वातलानि कफपित्तघ्नानि च । सप्तला सातला । अरिष्टो निंबः । शार्ङ्गेष्टांगारवल्लिका । अवल्गुजा बाकुची । अमृता गुडूची । वेत्रो वंशसदृशस्तस्याग्रम् । वासा वृषः । कुन्तली सूक्ष्मतिलजातिः । तिलपर्णी बदरकः । मंडूकपर्णी (उंदीरकानी प्र०) वा ब्राह्मी । कर्कोटकारवेल्ले पुनः प्रथित एव । पर्पटः शीतप्रियाख्यः । नाडीकलायं सकुलाधकः सुवर्चलाभेदः । गोधूमिका तु गोजिह्वा गोजी क्रोष्टुकमूलिका । वनतिक्तकं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वत्सकः। कुलकं काकतिंदुकः। नन्दी जयवृक्षश्च शब्दितः। कुचेला पाठा। शकुलादनी कटुका। कटिल्लं दीर्घपत्रा वर्षाभूः। कोशातको घंटोलिः। कर्कशः कंपिल्लकः॥ ७५-७८॥

पटोलादि शाक के गुण—

वि०—पटोल (परवल), सप्तला (सातला), अरिष्ट (नीम), शार्ङ्गेष्टा, अवल्गुजा (बाकुची), गिलोय, बेंत का अग्रिमभाग; बड़ी कटेरी, वासा, कुतिली; तिलपर्णिका (हुरहुर), मण्डूकपर्णी; कर्कोटक (ककोड़ा); करेला; पर्पट, नाड़ीकलाय; गोजिह्वा (गोजी), बैंगन, वनतिक्तक, करीर, कुलक, नन्दी, कुचैला (पाठा), शकुलादनी (कुटकी), कटिल्ल (पुनर्नवा), वेम्बुक, कोशातक (तरोई), और कर्कश (कम्पिल्ल) ये शीतवीर्य, तिक्त, विपाक में कटु; वातकारक तथा कफ-पित्त-नाशक हैं॥ ७५-७८॥

सामान्यगुणानुक्त्वा केषांचिद्गुणकर्मविशेषमाह—

हृद्यं पटोलं कृमिनुत्स्वादुपाकं रुचिप्रदम्।

स०—मुनिनाऽप्युक्तम्। पटोलपत्रं पित्तघ्नं वल्ली चास्य कफापहा। फलं त्रिदोषशमनं मूलं चास्य चिरेचनमिति। बृहतीद्वयं स्थूलबृहती महोटिकाख्या। क्षुद्रबृहती कंटकारिकाख्या।

परवल का विशेष गुण—

वि०—पटोल (परवल)—हृदय के लिये प्रिय, कृमिनाशक, विपाक में मधुर और रुचिप्रद है।[1]

पित्तलं दीपनं भेदि वातघ्नं बृहतीद्वयम्॥७६॥

स०—तदेतदुभयं पित्तकरमग्निदीपनं शकृवादीनां भेदनं वातघ्नं च॥ ७९॥

दोनों कटेरी के गुण—

वि०—छोटी और बड़ी कटेरी—पित्तकारक, अग्निदीपक, मलभेदी और वातनाशक हैं॥ ७९॥

वृषं तु वमिकासघ्नं रक्तपित्तहरं परम्।

स०—वृषं छर्दिकासौ हंति। रक्तपित्तं चात्यर्थं जयति।

अडूसा के गुण—

वि०—अडूसा—वमन और कासनाशक तथा रक्तपित्त रोग के लिये श्रेष्ठ है।

कारवेल्लं सकटुकं दीपनं कफजित्परम्॥ ८०॥

स०—कारवेल्लमीषद्रसे कटुकमग्निदीप्तिकरमतिश्लेष्मघ्नम्॥ ८०॥

करैले का गुण—

वि०—करैला—ईषत्कटु, अग्निदीपक अतिशय कफनाशक है।

वार्ताकं कटुतिक्तोष्णं मधुरं कफवातजित्।
सक्षारमग्निजननं हृद्यं रुच्यमपित्तलम्॥ ८१॥

स०—वार्ताकं रसे कटु तिक्तमुष्णवीर्यं मधुरं वातश्लेष्मघ्नम्। सह क्षारेण वर्तते सक्षारं किंचित्क्षारत्वयुक्तमग्निजननम्। हृद्यं हृदयाय हितम्। रुच्यं रुचिकृत्। अपित्तलम्। नञीषदर्थे। किंचित्पित्तकरमित्यर्थः। तत्र सह क्षारेण वर्तते सक्षारमित्येवं कथमुक्तम्। यातना क्षारं द्रव्यम्। तथा च प्रागुक्तं क्षरणादित्यादि। न द्रव्यं द्रव्येण सह वर्तते। तथा च गुणानामेवाऽयं धर्मो यद्द्रव्याश्रितत्वं नाम। तस्मात्क्षारमित्युक्तमिव मन्यामहे। अत्राऽऽचक्ष्महे। क्षारशब्देनात्र क्षारधर्मं उपलक्ष्यते। विस्रावणाद्यात्मकस्तद्वत्सक्षारमिति द्रव्यमुपदिश्यते। तस्मात्सक्षारमित्युपपन्नम्॥ ८१॥

बैंगन के गुण—

वि०—बैंगन—कटु, तिक्त, उष्णवीर्य, मधुर, वात-कफनाशक; थोड़ा क्षारीय; अग्निजनक, हृदय के लिये हितकर; रुचिकारक; थोड़ा पित्तकारक है॥ ८१॥

करीरमाध्मानकरं कषायं स्वादु तिक्तकम्।

स०—करीरं गूढपत्राख्यमाध्मानकरं रसे कषायमधुरतिक्तकम्।

करील के गुण—

वि०—करीर—आध्मानकारक, कषाय, स्वादु और तिक्त हैं।

कोशातकावल्गुजकौ भेदिनावग्निदीपनौ॥ ८२॥

स०—अनयोश्च पित्तकारित्वं वातकफघ्नत्वं च वेद्यम्। तथाहि। प्रायेण यदुक्तं गुडूच्यादिद्रव्यं तत्पित्तलं वातपित्तकफहरं च दृष्टम्। तथा चाह मुनिः। कफवातनुदवल्गुज इति। तदेवमन्यत्राऽप्यौचित्येन दोषकरत्वादि। संग्रहे चान्येऽप्युक्ताः। यथा—"सतरुठं कंदकं च चक्षुर्ग्राहि हिमं गुरु। कुमारी जीवलोणिका नलिनी गुग्गुपर्णिका॥ स्वादु रूक्षं सलवणं वातश्लेष्मकरं गुरु। श्यामा शाल्मलिकाश्मर्यः फंजी कणिकयूथिका॥ वृषादनी क्षीरवृक्षा बिंबी तनिकवृश्चिका। रोध्रः शाणः कर्बुदारः सशेलुर्वृषमूषिका॥ भल्लातकः कोविदारः कमलोत्पलकिंशुकम्। पटोलादिगुणं स्वादु कषायं पित्तजित्परम्॥ वातपित्तहरा रूढी एर्विणी दीर्घपुष्पिका। लघुरूष्णतरा तिक्ता सारुबूका च लांगली॥ वातला कटुतिक्ताम्लभेदिनौ तिलवेतसौ। विश्वं रास्ना बलाशाकं वातघ्नमतिसारनुत्॥ वातं वत्सादनी हन्यात्कफं कंडीरचित्रका" इति। मुनिना चान्येऽप्युक्ताः। न्यग्रोधोदुंबराऽश्वत्थप्लक्षपद्मादिपल्लवाः। कषायाः स्तम्भनाः शीता[1] हिताः पित्तातिसारिणाम्। तथा सुश्रुते गदितम्। करीरकुसुमं ज्ञेयं कफपित्तहरं लघु। आगस्त्यं नातिशीतोष्णं नक्तांधानां प्रशस्यते। चातुर्थकज्वरहरं नस्ययोगेन शीलितम्। राजवृक्षस्य निंबस्य शिग्रोः सिंहमुखस्य च। कफपित्तहरं पुष्पं कुष्ठघ्नं कुटजस्य च। श्रेयसी बिल्वपर्णी च बिल्वपत्रं च वातनुदिति॥ ८२॥

१. पटोलपत्रं पित्तघ्नं वल्ली चास्य कफापहा
फलं त्रिदोषशमनं मूलं चास्य विरेचनम्॥ इति
—माधवद्रव्यगुणे।

१ अत्र "हृद्याः शीताः" इति पाठान्तरम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तोरई और बाबची का गुण—

वि०—कोशातकी और अवल्गुज—मलभेदक और अग्नि-दीपक हैं ॥ ८२ ॥

तण्डुलीयो हिमो रूक्षः स्वादुपाकरसो लघुः।
मदपित्तविषास्रघ्नः—

स०—तंडुलीयो गंडीरकाख्यः शीतवीर्यो रूक्षः स्वादुपाकरसो लघुर्मदादिनाशनश्च।

चौलाई का गुण—

वि०—तण्डुलीय (चौलाई)—शीतल, रूक्ष, विपाक और रस में मधुर एवं लघु है; मद, पित्त, विष और रक्तस्राव को नष्ट करती है।

मुञ्जातं वातपित्तजित् ॥ ८३ ॥
स्निग्धं शीतं गुरु स्वादु बृंहणं शुक्रकृत्परम्।

स०—मुंजातं वातपित्तघ्नं स्निग्धादिगुणयुतमतिशुक्रकृच्च ॥ ८३ ॥

मुंजात का गुण—

वि०—मुंजातक (सालम)—वातपित्तनाशक, स्निग्ध, शीतल, गुरु, मधुर, बृंहण और अतिशय शुक्रवर्धक है ॥८३॥

गुर्वी सरा तु पालङ्क्या—

स०—पालंक्या गुर्वी तथा सरा शकृदादिभेदिनी। तुशब्दः पिच्छिलश्लेष्मलहिमादीनां संग्रहोक्तानां समुच्चयार्थः। तथा चोक्तं संग्रहे—पालक्या पिच्छिला गुर्वी श्लेष्मला भेदिनी हिमेति।

पालक का गुण—

वि०—पालक—गुरु और मलभेदक है।

—मदघ्नी चाप्युपोदिका ॥ ८४ ॥

स०—उपोदका मदनाशिनी। अपिशब्दात्तद्वद् गुर्वी सरा च। उपोदका मयाला खंडपालक्येति प्रथिता ॥ ८४ ॥

पोई का गुण—

वि०—उपोदिका (पोई)—मदनाशक एवं गुरु तथा मलभेदक है ॥ ८४ ॥

पालङ्क्यावत्स्मृतश्चञ्चुः स तु संग्रहणात्मकः।

स०—चंचुः पालंक्यासदृशो गुणैः स्मृतः। स पुनश्चंचुः संग्रहणात्मको न भेदी।

चंचु के गुण—

वि०—चंचु—के गुण पालक के समान हैं; परन्तु चंचु संग्राहक है, मलभेदक नहीं।

विदारी वातपित्तघ्नी मूत्रला स्वादुशीतला ॥८५॥
जीवनी बृंहणी कण्ठ्या गुर्वी वृष्या रसायनी।

स०—विदारी शृगालिका वातपित्तहरा मूत्रलादिगुणयुक्ता रसायनं च। कन्दस्यैवायं गुणनिर्देशो बोध्यः। तथा च मुनिः। जीवनो बृंहणो वृष्यो बल्यः। शस्तो रसायनम्। विदारिकन्दः कंठयश्च मूत्रलः स्वादुशीतल इति ॥ ८५ ॥

विदारीकंद के गुण—

वि०—विदारी—वात-पित्तनाशक, मूत्रल, मधुर, शीतल, जीवनदायक, पुष्टिकारक, गले के लिये उत्तम, गुरु, वृष्य और रसायन है ॥ ८५ ॥

चक्षुष्या सर्वदोषघ्नी जीवन्ती मधुरा हिमा ॥८६॥

स०—जीवन्ती चक्षुष्यादिगुणयुक्ता। या मधुरा सा शीतवीर्या। एभिर्गुणैः किंचिदूना। तथा चोक्तं संग्रहे। चक्षुष्या सर्वदोषघ्नी जीवन्ती मधुरा हिमा। शाकानां प्रवरा न्यूना द्वितीया किंचिदेव तु। मुनिना तु जीवन्त्याः शतावर्या वातपित्तहरत्वमगादि। तत्पाठो हि। भंडीशतावरीशाकं बलाजीवंतिजं च यत्। पर्वाण्या पर्वपुष्पा च वातपित्तहरं मतमिति ॥ ८६ ॥

जीवन्ती के गुण—

वि०—जीवन्ती—आँखों के लिये उत्तम, त्रिदोषनाशक, मधुर और शीतल है ॥ ८६ ॥

वक्तव्य—चरक और सुश्रुत ने जीवन्ती शाक को सबसे उत्तम शाक कहा है—'जीवन्तीशाकं शाकानां श्रेष्ठतमम्।'

कूष्माण्डतुम्बकालिङ्गकर्कार्वेर्वारुतिण्डिशम्।
तथा त्रपुसचीनाकचिर्भटं कफवातकृत् ॥८७॥
भेदि विष्टम्भ्यभिष्यन्दि स्वादुपाकरसं गुरु।

स०—कूष्मांडादिकं कफवातकृद्भेदि विष्टंभ्यभिष्यन्दि स्वादुपाकरसं गुरु च ॥ ८७ ॥

कूष्माण्डादि के सामान्य गुण—

वि०—कूष्माण्ड (पेठा), तुम्ब (तुम्बी), कालिङ्ग (तरबूज़), कर्कारु (ककड़ी), एर्वारु (खीरा), तिण्डिश, त्रपुस (खीरा), चीनाक, चिर्भट (फूट)—ये कफ-वात को करते हैं; और मल को भेदन करनेवाले, विष्टम्भी, अभिष्यन्दी, मधुरविपाक, मधुररस और गुरु हैं ॥ ८७ ॥

अत्र विशेषमाह—

वल्लीफलानां प्रवरं कूष्माण्डं वातपित्तजित् ॥८८॥
वस्तिशुद्धिकरं वृष्यं; त्रपुसं त्वतिमूत्रलम्।

स०—वल्लीफलानां मध्ये कूष्मांडं पुष्पफलसंज्ञं वरं तथा वातपित्तहरं बस्तिशुद्धिकरं वृष्यं च। त्रपुसं पुनरतिशयेन मूत्रलम् ॥ ८८ ॥

वि०—वल्ली फलों (बेल या लता के फलों) में कूष्माण्ड श्रेष्ठ है; यह वातपित्तनाशक, मूत्राशय का शोधन करनेवाला (मूत्र लानेवाला) और वृष्य है।

त्रपुस—(खीरा) अतिमूत्रल है ॥ ८८ ॥

तुम्बं रूक्षतरं ग्राहि कालिङ्गैर्वारुचिर्भटम् ॥८९॥
बालं पित्तहरं शीतं विद्यात्पक्वमतोऽन्यथा।

स०—तुंबमलाबुसंज्ञं रूक्षतरम्। एर्वारुकाण्यपि रूक्षं तुंबं त्वतिशयेनेत्यर्थः। तथा ग्राहि। पूर्वाणि तु सामान्यगुणोक्त्या भेदीन्येव। चरकमुनिमतानुसारिणस्त्वेवमाचक्षते। तुंबं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रूक्षतरं कालिंगैर्वारुचिर्भटं ग्राहीति। कालिंगं कर्चरम्। एर्वारुः कर्कटिका। चिर्भटं डंगरं मालवेषु प्रसिद्धमतिप्रसिद्धं जालंधरादिषु। एतच्च बालमसम्पूर्णरसादि पित्तहरं शीतवीर्यं च। अतो बालाद्विपरीतं पक्वं पित्तकरमुष्णवीर्यं चेत्यर्थः। सुश्रुतेनोक्तम्। नीलं यत्त्रपुसं बालं वृष्यं पित्तहरं मतम्। तत्पांडुकफकृज्जीर्णमम्लपित्तकरं स्मृतम् ॥ ८९ ॥

तुम्बी आदि के गुण—

वि०—तुम्ब—(अलाबु)—अतिशय रूक्ष, ग्राही है। कालिङ्ग, एर्वारु और चिर्भट—ये भी रूक्ष हैं तथा ये (और कूष्माण्ड आदि भी) कच्चे होने पर पित्तनाशक तथा शीतल हैं और पक जाने पर पित्तकारक और उष्णवीर्य हैं (ये ईषत्-परिपक्व कूष्माण्ड आदि के गुण हैं) ॥ ८९ ॥

शीर्णवृन्तं तु सक्षारं पित्तलं कफवातजित् ॥९०॥
रोचनं दीपनं हृद्यमष्ठीलाऽऽनाहनुल्लघु।

स०—शीर्णवृन्तं कर्चरमीषत्क्षारं पित्तलं कफवातघ्नं च। रुचिकरमग्निदीप्तिकृत्। हृद्यमष्ठीलाऽऽनाहं च हंति लघु च। घनाष्ठीलोपमो ग्रंथिरष्ठीलोर्ध्वं समुन्नत इत्यष्ठीलालक्षणम्। साठोपमत्युग्ररुजमाध्मानमुदरे भृशम्। ऊर्ध्वाधोवातरोधेन तमानाहं प्रचक्षत इति ॥ ९० ॥

शीर्णवृन्त (ककड़ी भेद) के गुण—

वि०—शीर्णवृन्त—(ककड़ी भेद जो पककर टहनी से अलग हो जाये) ईषत्क्षार वाला, पित्तकारक, कफ-वात-नाशक, रुचिकारक, अग्निदीपक, हृदय के लिये उत्तम, अष्ठीला और आनाहनाशक एवं लघु है ॥ ९० ॥

मृणालबिसशालूककुमुदोत्पलकन्दकम् ॥ ९१ ॥
नन्दीमाषककेलूटशृङ्गाटककसेरुकम्।
क्रौञ्चादनं कलोड्यं च रूक्षं ग्राहि हिमं गुरु ॥ ९२ ॥

स०—मृणालादि रूक्षं संग्रहणं शीतवीर्यं गुरु च। मृणालं द्विविधं सूक्ष्मं स्थूलं च। तत्र सूक्ष्मं मृणालमितरद्बिसम्। शालूकं पद्ममूलम्। कुमुदकंदम्। कुमुदं शशिप्रियम्। उत्पलकंदकं रक्तोत्पलकंदम्। नंदी तुंडेरिका। माषको वास्तुलः। केलूटं हिरमकसंज्ञमुदुंबरभेदः। शृंगाटकं त्रिकोणाकृति जलोद्भवं कंदम्। कसेरुकं मागधम्। क्रौंचादनं तमेदम्। कलोड्यं पद्मबीजम् ॥ ९१-९२ ॥

मृणाल का गुण

वि०—मृणाल, बिस (भिस), शालूक (कमल की जड़), कुमुद, उत्पलकन्द, नन्दी, माषक, केलूट, सिंहाड़ा, कसेरु, क्रौञ्चादन, कलोड्य[1] (पद्मबीज)—ये रूक्ष, शीतल और गुरु हैं ॥ ९१-९२ ॥

कलम्बनालिकामार्षकुटिञ्जरकुतुम्बकम्।
चिल्लीलट्वाकलोणीकाकुरूटकगवेधुकम् ॥ ९३ ॥

१. कमलनाल पतली और मोटी दो प्रकार की होती है; पतली को मृणाल और मोटी को बिस तथा कमल की जड़ को शालूक और बीज को कलोड्य कहते हैं।

जीवन्तझुञ्झ्वेडगजयवशाकसुवर्चलम्।
आलुकानि च सर्वाणि तथा सूप्यानि लक्ष्मणम् ॥ ९४ ॥
स्वादु रूक्षं सलवणं वातश्लेष्मकरं गुरु।
शीतलं सृष्टविण्मूत्रं प्रायो विष्टभ्य जीर्यति ॥ ९५ ॥

स०—कलंबादिकं मधुरं किंचिल्लवणं वातश्लेष्मकरं गुरु च शीतवीर्यं मूत्रं पुरीषं च विसृजति बहिः क्षिपति। विष्टभ्योदरप्रदेशे पिंडीभूय जीर्यति परिणमति। प्रायोग्रहणं किंचिदेषां मध्ये नैवं स्वरूपमिति ज्ञापनार्थम्। कलंबं कदंबः। नालिका दीर्घनालरूपा कलंबुसंज्ञा। मार्षो गंधारिका। कुटिंजरं ताम्रमूलकम्। कुतुंबको द्रोणपुष्पी। चिल्ली पृथुपत्रं यवशाकं कुमामसंज्ञम्। लट्वाको गुग्गुलुकः। लोणीका। लोणारः। कुरूटकः स्थितिवारकः। गवेधुकं तृणधान्यविशेषः। जीवंतो बृहद्गांधारम्। झुंझुझुंझुरुकः। एडगजः प्रपुन्नाटः। यवशाकं हृद्यपत्रा चिल्ली। सुवर्चला रविभक्ता। आलुकानि च सर्वाणि नानाविधानि रक्तालुकमधुकालुकादिभेदेन। सूप्यानि मुद्गराजमाषादिपत्राणि। लक्ष्मणं मधुयष्टिका ॥ ९३-९५ ॥

कदम्ब-पुष्पादि के गुण

वि०—कलम्ब और नालिका (दोनों करेमूभेद), मार्ष (मरसा?), कुटिञ्जर, कुतुम्बक (द्रोणपुष्पी), चिल्ली, लट्वाक, लोणिका, कुरूटक, गवेधुक, जीवन्त (बड़ा मरसा), झुञ्झु, एडगज (चकवड़), यवशाक (बथुआ), सुवर्चला और सब आलुक (आलू, रतालू आदि) तथा सब प्रकार के दाल की छीमी और पत्र मूंग, राजमाष आदि), लाक्ष्मणम्—(लक्ष्मणा) -ये मधुर, रूक्ष, ईषत् लवण; वात-कफकारक, गुरु शीतल; मल-मूत्र को प्रवृत्त करने वाले हैं और प्रायः विष्टम्भ (वायु) उत्पन्न करके जीर्ण होते हैं ॥ ९३-९५ ॥

लघुपत्रा तु या चिल्ली सा वास्तुकसमा मता ॥ ९६ ॥

स०—एतच्च सर्वं स्विन्नं निष्पीडितरसमतिबहुस्नेहं च नात्यपथ्यम्। सुश्रुते चोक्तम्। संस्कृतं वेसवारेण सस्नेहं शाकमिष्यते। राजिकासक्तुभक्तादिसंस्कारं चानुवर्तते। लघुपत्रा या चिल्ली यवशाकविशेषः सा तु वास्तुकसमा गुणैर्मता ॥ ९६ ॥

सामान्य शाक—

वि०—जो चिल्ली छोटे पत्तों वाली होती है, उसके गुण बथुवे के समान होते हैं ॥ ९६ ॥

तर्कारीवरुणं स्वादु सतिक्तं कफवातजित्।

स०—तर्कार्यरणीका। वरणो मालः। समाहारेण तयोर्द्वंद्वः। एतत्स्वादु किंचित्तिक्तं कफवातघ्नं च।

तर्कारी और वरुण—

तर्कारी—(अरणिका) और वरुण, मधुर, ईषत् तिक्त और कफ-वातनाशक हैं।

वर्षाभ्वौ कालशाकं च सक्षारं कटुतिक्तकम् ॥ ९७ ॥
दीपनं भेदनं हन्ति गरशोफकफानिलान्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—वर्षाभ्वौ पुनर्नवे तथा कालशाकं किंचित्क्षारं रसे च कटुतिक्तं वह्निदीपनं भेदनं गरादींश्च हरति। कठिल्लो वर्षाभूः स च प्रागुक्तगुणः। तथा च निघंटुः। पुनर्नवा विशाखश्च कठिल्लः शासिनाडिका। वृश्चिकः क्षुद्रवर्षाभूः दीर्घपत्रः कठिल्लकः। पुनर्नवा परः क्षुद्रः सद्यो मंडलपत्रकः। श्वेतमूलो वर्षकेतुर्मंदा वर्षाभुरुच्यत इति ॥ ९७ ॥

पुनर्नवा और कालशाक—

वि०—श्वेत पुनर्नवा और रक्त पुनर्नवा तथा कालशाक—ईषत्क्षारयुक्त, कटु, तिक्त; अग्निदीपक एवं मलभेदक हैं; गर (संयोगज विष), शोफ, कफ और वायु को नष्ट करते हैं ॥ ९७ ॥

दीपना कफवातघ्नाश्चिरबिल्वाङ्कुराः सराः ॥ ९८ ॥

स०—चिरिबिल्वः पूतिकरंजस्तस्यांऽकुरा वह्निदीपनाः कफवातघ्नाः सराश्च ॥ ९८ ॥

पूतिकरंज के अङ्कुर का गुण—

वि०—चिरबिल्व (पूतिकरंज) के अङ्कुर-अग्निदीपक, कफवातनाशक और मलरेचक हैं ॥ ९८ ॥

शतावर्यङ्कुरास्तिक्ता वृष्या दोषत्रयापहाः।

शतावरी के अङ्कुर—

स०—शतावर्या अंकुराः प्ररोहास्तिक्तरसा वृष्याः शुक्रकृतस्त्रिदोषघ्नाश्च।

वि०—शतावरी के अङ्कुर—तिक्त, वृष्य और त्रिदोषनाशक हैं।

रूक्षो वंशकरीरस्तु विदाही वातपित्तलः ॥ ९९ ॥

स०—वंशकरीरो वंशांकुरो रूक्षो विदाही वातपित्तकृत् ॥ ९९ ॥

वंशांकुर के गुण—

वि०—बाँस के अङ्कुर—रूक्ष, विदाही और पित्तकारक हैं ॥ ९९ ॥

पत्तूरो दीपनस्तिक्तः प्लीहार्शःकफवातजित्।

स०—पत्तूरो दीपनस्तिक्तरसः प्लीहादिजित्। पत्तूरो मत्स्याक्षकः।

पत्तूर के गुण—

वि०—पत्तूर—अग्निदीपक, तिक्त, प्लीहा-अर्शनाशक, कफ और वात को नष्ट करता है।

कृमिकासकफोत्क्लेदान् कासमर्दो जयेत्सरः ॥१००॥

स०—कासमर्दः सरः कृम्यादींश्च नाशयति। उत्क्लेदः स्रोतसां मालिन्येनार्द्रत्वम् ॥ १०० ॥

कसौंदी के गुण—

वि०—कासमर्द (कसौंदी)—कृमि, कास, कफ के उत्क्लेद को नष्ट करती है और अनुलोमन है ॥ १०० ॥

रूक्षोष्णमम्लं कौसुम्भं गुरु पित्तकरं सरम्।

स०—कुसुंभं शाकं रूक्षमुष्णवीर्यमम्लं गुरु पित्तकृत्सरं च।

कुसुम का शाक—

वि०—कुसुम्भ (बर्रे) का शाक—रूक्ष, उष्ण, अम्ल, गुरु, पित्तकारक और सारक है।

गुरूष्णं सार्षपं बद्धविण्मूत्रं सर्वदोषकृत् ॥१०१॥

स०—सार्षपं शाकं गुरूष्णवीर्यम्। तथा शकृन्मूत्रं च बध्नाति। त्रिदोषकृच्च। संग्रहे तु सक्षारत्वमस्योक्तम्। तत्पाठो हि। सक्षारमधुरं स्निग्धमुष्णं च गुरु सार्षपमिति। सुश्रुतेन चोक्तम्। कफघ्नं सार्षपं शाकमासुरं शाकमेव चेति ॥ १०१ ॥

सरसों का शाक—

वि०—सरसो का शाक—गुरु, उष्ण, मल और मूत्र को बाँधने वाला तथा सब दोषों को कुपित करता है ॥ १०१ ॥

वक्तव्य—सरसों का शाक सब से हीन बताया है। यथा-'शाकानामवरं बद्धविण्मूत्रम्' (संग्रह)। चरक में-'सर्षपशाकं शाकानामवरम्' (सू. अ. २५)।

मूली के गुण—

यद् बालमव्यक्तरसं किञ्चित्क्षारं सतिक्तकम्।
तन्मूलकं दोषहरं लघु सोष्णं नियच्छति ॥१०२॥
गुल्मकासक्षयश्वासव्रणनेत्रगलामयान्।
स्वराग्निसादोदावर्तपीनसांश्च—

स०—यन्मूलकमव्यक्तरसमस्फुटस्वादं तथा किंचित्क्षारमीषत्क्षारगुणयुक्तं कार्यतोऽनुमीयमानं तथा सतिक्तमीषत्तिक्तकं रसनेंद्रियस्य किंचिदुद्वेजकं तन्मूलकं दोषाणां हरं दोषहरं नान्यावस्थम्। बालं मूलकं दोषहरमित्यनेनास्य विशिष्टा बालावस्था दोषहरत्वेन नियम्यते। न सर्वं बालावस्थं दोषहरमपि त्वीदृग्रूपमित्यर्थः। अन्ये तु दोषहरमित्यत्र समासं कृत्वा वातश्लेष्मघ्नत्वमेवास्य प्रतिजानते। यतः किंचिदुष्णवीर्यत्वात्पित्तकरत्वमस्यास्त्येव। किंचित्तिक्तरसोपेतत्वेन पित्तकर्तृत्वमस्य व्याहर्तुं न युक्तम्। वक्ष्यति हि। रसं विपाकस्तौ वीर्यं प्रभावस्तानप्यपोहतीति। एवं चैतन्मूलकं वातश्लेष्मघ्नमेव युक्तं न तु पित्तहृच्चेति तेषामभिप्रायः। एतच्च मूलकं गुल्मादीन्नियच्छति। पीनसांश्चेति चशब्दः समुच्चये। अन्यानप्येवं प्रायशो रोगान्नियच्छतीति। सुश्रुतस्तु। सर्वदोषहरा लध्वी कंठ्या मूलकपोतिकेति यद्वदांतरं ब्रूते तदप्यत्रैव बालमूलकलक्षणेंऽतर्भूतमिति तंत्रकृतेहं पृथङ् नोक्तम् ॥१०२॥

जो मूली-बाल—(कच्ची, अपक्व, नरम) तथा अव्यक्तरस, थोड़ी क्षारयुक्त, थोड़ी तिक्त होती है, वह दोषनाशक, लघु और ईषदुष्ण होती है। यह मूली गुल्म, कास, क्षय, श्वास, व्रण, नेत्ररोग, गलरोग, स्वररोग, अग्निमान्द्य, उदावर्त्त और पीनस रोग को नष्ट करती है ॥ १०२ ॥

—महत्पुनः ॥१०३॥
रसे पाके च कटुकमुष्णवीर्यं त्रिदोषकृत्।
गुर्वभिष्यन्दि च स्निग्धसिद्धं तदपि वातजित् ॥१०४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—अव्यक्तरसादिलक्षणावस्थां विहाय यावद्व्यक्तरसाद्यवस्थं तरसंपद्यते ततोऽनंतरं क्रमेण रसविपाकयोः कटुकमुष्णवीर्यं तन्मूलकं महद्वृद्धं त्रिदोषकृद्गुर्वभिष्यंदि च भवति। वृद्धस्य च मूलकस्यानेका अवस्थाः संभवंति। तत्र चास्याद्याऽवस्थायां किंचित्त्रिदोषकृत्त्वमंत्याऽवस्थायामतिशयेन त्रिदोषकृत्त्वं वेद्यम्। संग्रहे त्वस्य स्वादुविपाकित्वमुक्तम्। तत्पाठे। महत्पुनः रूक्षोष्णं कटुकं स्वादु विपाके सर्वदोषकृदिति। तच्चामविषयम्। अपिशब्द एवार्थे। तदेव महन्मूलकं स्निग्धंस्विन्नं वातजित्। स्निग्धं च तत्स्विन्नं च स्निग्धस्विन्नम्। न त्वस्निग्धस्विन्नमात्रमित्यर्थः॥ १०३-१०४॥

वि०—बड़ी (पकी) मूली—रस और विपाक में कटु, उष्णवीर्य, त्रिदोषकारक, गुरु और अभिष्यन्दी है। यदि स्नेह में सिद्ध की जाये तो यह भी वातनाशक होती है॥ १०३-१०४॥

वातश्लेष्महरं शुष्कं सर्वमामं तु दोषलम्।

स०—सर्वं बालं वृद्धं च मूलकं शुष्कं सद्वातश्लेष्महरम्। आमं तु पुनर्मूलकं हरीतकत्वेन यद्भक्ष्यते तद्दोषलम्। सर्वमित्यत्रायत्नकृतेन संबंधेन संबध्यते। तेनादोषलस्य बालस्याऽप्यामस्य दोषलत्वं न तु वृद्धस्यैवेत्यर्थः। मूलकं नीलकंठापरसंज्ञम्।

वि०—सब प्रकार की सूखी मूली—वात-कफनाशक है; और कच्ची मूली दोषकारक है।

कटूष्णो वातकफहा पिण्डालुः पित्तवर्धनः॥ १०५॥

स०—पिंडालुः कटुको रसे वीर्ये चोष्णो वातकफघ्नः पित्तकरश्च॥ १०५॥

वाराहीकन्द के गुण—

वि०—पिण्डालु—कटु, उष्ण, वात-कफनाशक और पित्तवर्धक है॥ १०५॥

वक्तव्य—'वाराहीकन्दः पिण्डालुस्तथा शबरकन्दकः। प्रोक्तो मूलकमूलाभो वातालुस्त्ववच्छदस्तथा॥' इसमें हेमाद्रि ने वाराहीकन्द अर्थ किया है; क्योंकि पिण्डालु (मीठे जिमीकन्द) के गुण इससे भिन्न होते हैं। यथा—'पिण्डालुकं कफकरं गुरु विष्टम्भि शीतलम्।' (सु. सू. अ० ४६)

कुठेरशिग्रुसुरससुमुखासुरिभूस्तृणम्॥
फणिज्जार्जकजम्बीरप्रभृति ग्राहि शालनम्॥ १०६॥
विदाहि कटु रूक्षोष्णं हृद्यं दीपनरोचनम्।
दृक्शुक्रकृमिहृत्तीक्ष्णं दोषोत्क्लेशकरं लघु॥ १०७॥

स०—कुठेरादि शालनं ग्राहि विदाहि कटुकं रसपाकयो रूक्षमुष्णवीर्यं हृद्यमग्निदीपनं च। तथा दृगादिहृत्तीक्ष्णम्। तथा दोषान्वातादीनुत्क्लेशयति कोपयति स्थानाच्चालयति दोषोत्क्लेशकरं लघु च। शालनमवदंशो येन सहान्नं भोक्तुं युज्यते। कुठेरो वैकुंठः। शिग्रुः फलपत्रकः। सुरसः कृष्णतुलसी। सुमुखः कटुपत्रकः। आसरी राजिक। भूस्तृणं गुह्यबीजकम्। फणिज्जको मारिचकस्तीक्ष्णगंधः प्रकीर्तितः। आर्जकः खरपत्रकः। जंबीरः करपत्रकः। प्रभृतिशब्देन संग्रहोक्ता गृह्यंते। धान्यतुंबरुसालेययवानीशृंगबेरकाः। पर्णाशो गृंजनोऽजाजी कंडीरं जलपिप्पली। फणिज्जाजंबीरं खराश्वा कालमालिका। दीप्यकः चवकद्वीपिवस्तगंधादिबद्धविडिति। तंत्रांतरे चोक्तम्। कटुतिक्तरसा शीता कफपित्तविनाशिनी। विपाके मधुरा लघ्वी तस्करांगुलिका स्मृतेति॥ १०६-१०७॥

कुठेरक, शोभांजन आदि के गुण—

वि०—कुठेरक और शिग्रु (दोनों सहजन भेद), सुरस (तुलसी), सुमुख, आसुरी (राई), भूस्तृण, फणिज्जक, अर्जक, जम्बीर आदि शालन[1] (हरित शाक-जो हरे काम में आते हैं), ग्राही, विदाहकारक, कटु, रूक्ष, उष्ण, दीपक, रुचिकारक; आँख, शुक्र और कृमिनाशक; तीक्ष्ण, दोषों को क्लेशित करने वाले और लघु हैं॥ १०६-१०७॥

हिध्माकासविषश्वासपार्श्वरुक्पूतिगन्धहा।
सुरसः सुमुखो नातिविदाही गरशोफहा॥ १०८॥

स०—सुरसो हिध्मादिघ्नः। पूतिगंधं दौर्गंध्यं सौरभ्योत्पादनाद्धंति। सुमुखः कटुपत्राख्यः किंचिद्विदाही गरशोफौ च हंति॥ १०८॥

तुलसी के गुण—

वि०—सुरस (तुलसी)—हिक्का, कास, विष, श्वास, पार्श्वशूल और दुर्गन्ध को नष्ट करती है। सुमुख—थोड़ा विदाह करनेवाली; कृत्रिम विष और शोफ को नष्ट करती है॥१०८॥

आर्द्रिका तिक्तमधुरा मूत्रला न च पित्तकृत्।

स०—आर्द्रिकाऽऽर्द्रधानिका तिक्तमधुरा मूत्रकरी पित्तं च न करोति।

हरी धनियाँ के गुण—

वि०—आर्द्रिका (हरी धनियाँ)—तिक्त, मधुर, मूत्रल है किन्तु पित्त को नहीं करती।

लशुनो भृशतीक्ष्णोष्णः कटुपाकरसः सरः॥ १०९॥
हृद्यः केश्यो गुरुर्वृष्यः स्निग्धो रोचनदीपनः।
भग्नसन्धानकृद् बल्यो रक्तपित्तप्रदूषणः॥ ११०॥
किलासकुष्ठगुल्मार्शोमेहक्रिमिकफानिलान्।
सहिध्मापीनसश्वासकासान् हन्ति रसायनम्॥ १११॥

स०—लशुनोऽतितीक्ष्णोऽत्युष्णवीर्यः। कटुपाकरसः सरः भेदी हृद्यादिगुणयुक्तश्च किलासादीन् हंति रक्तपित्तं च करोति। किलासं श्वित्रम्। कंदस्यैवायं गुणवीर्यनिर्देशो बोध्यः। पत्रमध्ययोर्मधुरत्वाद् भृशोष्णत्वानुपपत्तिः। तथा चोक्तं संग्रहे।

१. शालन का अर्थ आजकल प्रचलित सलाद के रूप में किया जा सकता है। शालन का शब्द प्रयाग, विन्ध्यप्रदेश आदि में कढ़ी के लिए भी प्रयुक्त होता है किन्तु इस कढ़ी में राई या पत्र आदि डालते हैं और यह सामान्य कढ़ी से भिन्न होती है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पत्रे सक्षारमधुरो मध्ये मधुरपिच्छिलः। तीक्ष्णोष्णो लशुनः कंद इति ॥ १०९-१११ ॥

लशुन के गुण—

लहसुन—अतिशय तीक्ष्ण एवं उष्ण, विपाक एवं रस में कटु, सर (रेचक), मन के लिये प्रिय, केश्य, गुरु, वृष्य, स्निग्ध, रुचिकारक, अग्निदीपक, टूटे हुए को जोड़नेवाला, बल्य, रक्त-पित्त को दूषित करनेवाला, किलास, कुष्ठ, गुल्म, अर्श, प्रमेह, कृमि, कफ और वायु तथा हिक्का, पीनस, श्वास और कास को नष्ट करता है तथा रसायन है ॥ १०९-१११ ॥

वक्तव्य—ये कन्द के ही गुण हैं।

पलाण्डुस्तद्गुणन्यूनः श्लेष्मलो नातिपित्तलः।

स०—पलांडुर्धवलाक्षकाख्यस्तद्गुणन्यूनस्तस्य रसोनस्य गुणास्तद्गुणास्तैर्हीनः। लशुनात्किंचिद्धीनगुण इत्यर्थः। तथा श्लेष्मलो नातिपित्तं च करोति। ननु लशुनवत्कफघ्नोऽतिपित्तकृच्च।

प्याज के गुण—

वि०—प्याज—में लहसुन के ही किन्तु कम गुण हैं; यह कफकारक है और थोड़ा पित्त करता है।

कफवातार्शसां पथ्यः स्वेदेऽभ्यवहृतौ तथा ॥ ११२ ॥
तीक्ष्णो गृञ्जनको ग्राही पित्तिनां हितकृन्न सः।

स०—कफवातार्शसां स्वेदे भक्षणे च प्रभावात्पथ्यः। तंत्रांतरेऽन्योऽप्युक्तो यथा। स्निग्धो रुचिष्यः स्थिरधातुकारी बल्योऽथ मेधाकफपुष्टिदश्च। स्वादुर्गुरुः शोणितपित्तशस्तः सपिच्छिलः क्षीरपलांडुरुक्त इति। गृञ्जनकस्तीक्ष्णो ग्राही पित्तिनामहितश्च ॥ ११२ ॥

गन्दन (लशुनभेद) के गुण—

वि०—गृञ्जनक—(गन्दन)—स्वेदन और भोजन द्वारा लेने से कफ, वायु और अर्श रोगियों के लिये उत्तम है। तीक्ष्ण एवं ग्राही है, पित्तवालों के लिये यह हितकारी नहीं है ॥११२॥

दीपनः सूरणो रुच्यः कफघ्नो विशदो लघुः ॥ ११३ ॥
विशेषादर्शसां पथ्यः—

स०—सूरणो नाम कंदविशेषो दीपनो रुच्यः श्लेष्मघ्नो विशदो लघुरर्शसामतिपथ्यश्च ॥ ११३ ॥

जमीकन्द (सूरण) के गुण—

वि०—सूरण—(जिमीकन्द)—अग्निदीपक, रुचिकारक, कफनाशक, विशद और लघु है; विशेषकर अर्शरोगियों के लिये पथ्य है ॥ ११३ ॥

—भूकन्दस्त्वतिदोषलः।

स०—भूकंदः स्फोटाख्यः प्रावृड्भवः प्रसिद्ध एव स चात्यर्थं दोषलः।

वि०—भूकन्द—(भूस्फोट या कुकुरमुत्ता)—बहुत दोषवाला है।

पत्रे पुष्पे फले नाले कन्दे च गुरुता क्रमात् ॥ ११४ ॥

स०—पत्रादीनां यथोत्तरं क्रमाद् गुरुत्वम्। तेन पत्रशाकमपेक्ष्य पुष्पशाकं गुरु ततः फलशाकं ततो नालशाकं ततोऽपि कंदशाकमिति। एवं हारीतकेष्वपि गुरुत्वं वेद्यम्। बाहुल्येन चैतदुक्तम्। मूलके हि वैपरीत्यं दृश्यते। तथा हि। मूलकस्य हि कंदे लघुत्वम्। अत एव मुनिरप्याह। मूलके तु विपर्यय इति। शाकानां हारीतकानां च येषामिह पर्याया नोक्तास्तेषां सद्वैद्येभ्योऽवगंतव्याः ॥ ११४ ॥

पत्रादि के गुण—

सभी शाकों के पत्र, पुष्प, फल, नाल और कन्द में क्रमशः गुरुता-भारीपन होता है ॥ ११४ ॥

वक्तव्य—मूली में अपवाद है—'पुष्पं च पत्रं च फलं तथैव यथोत्तरं ते लघवः प्रदिष्टाः ॥' (सुश्रुत सू. अ. ४६)

अथ वरावरत्वं निर्धारयति—

वरा शाकेषु जीवन्ती सार्षपं त्ववरं परम्।

स०—शाकेषु मध्ये जीवंती वरा। सर्षपाः पुनरवराः।

इति शाकवर्गः।

शाकों में वरावरत्व—

वि०—पत्र शाकों में जीवन्ती सबसे श्रेष्ठ है और सरसों का शाक सबसे निकृष्ट है।

अथ फलवर्गः।

फलानामाहारकाले शाकेभ्योऽल्पोपयोगित्वाच्छाकवर्गादनन्तरं फलवर्ग उच्यते। खरनादेऽप्युक्तम् भुक्तावसाने फलं भुज्यत इति फलवर्गोऽभिधीयत इत्याह—

द्राक्षा फलोत्तमा वृष्या चक्षुष्या सृष्टमूत्रविट् ॥११५॥
स्वादुपाकरसा स्निग्धा सकषाया हिमा गुरुः।
निहन्त्यानलपित्तास्रतिक्तास्यत्वमदात्ययान् ॥११६॥
तृष्णाकासश्रमश्वासस्वरभेदक्षतक्षयान्।

स०—फलेषूत्तमा फलोत्तमा गोस्तनीपर्याया द्राक्षा सा वृष्यादिगुणयुक्ता। सकषाया ईषत्कषाया। अनिलादीन्व्याधींस्तान् हंति। उदावर्तहरत्वं चरकमुनिनाऽस्या उक्तं तच्च स्निग्धत्ववृष्यत्वसृष्टविण्मूत्रत्वेनेहोक्तप्रायम्। अभ्यासाच्च द्राक्षाणां गुणहीनत्वं देशाद्यनुरोधात्कल्प्यम् ॥ ११५-११६ ॥

दाख के गुण—

वि०—द्राक्षा सब फलों में उत्तम है। यह वृष्य, आँखों के लिये उत्तम, मल-मूत्र को प्रवृत्त करने वाली, विपाक और रस में मधुर, स्निग्ध, ईषत्कषाय रस, शीतल, गुरु, वायु, पित्त और रक्त के दोषों को नष्ट करती है, मुख की तिक्तता और मदात्यय को मिटाती है। तृष्णा, कास, श्रम, श्वास, स्वरभेद, क्षत एवं क्षय को नष्ट करती है ॥ ११५-११६ ॥

वक्तव्य—वायुनाशक, यह कोष्ठ की वायु को छोड़कर अन्यत्र की वायु को नष्ट करती है। कोष्ठ में द्राक्षा वायु करती है, इसीलिये संग्रह में कहा है—'वातहरत्वेऽपि मृद्वीका खर्जूरं कोष्ठवातकृत्' ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उद्रिक्तपित्ताञ्जयति त्रीन्दोषान्स्वादु दाडिमम् ॥ ११७ ॥
पित्ताविरोधि नात्युष्णमम्लं वातकफापहम् ।
सर्वं हृद्यं लघु स्निग्धं ग्राहि रोचनदीपनम् ॥ ११८ ॥

स०—उद्रिक्तमतिरिक्तं पित्तं येषां तांस्तथाविधान् त्रीन् दोषान् मधुरं दाडिमं जयति। मधुरस्य पूर्वकथनं प्राधान्यख्यापनार्थम्। पित्तेत्यादि। अम्लं दाडिमं पित्ताविरोधि न पित्तं कुरुते न च पित्तं शमयति। अत एवैतद्वातकफाप्रहमुक्तम्। सर्वं मधुरमम्लं च यद्दाडिमं तत् हृद्यादिगुणसंयुक्तम्। मुनिना तूक्तम्। रूक्षाम्लं दाडिमं यत्तु तत्पित्तानिलकोपनमिति ॥ ११७-११८ ॥

अनार के गुण—

मीठा अनार—पित्त प्रधान तीनों दोषों का शमन करता है। खट्टा अनार—न तो पित्त को करता है और न पित्त का शमन करता है, बहुत गरम नहीं है किन्तु वात-कफ नाशक है। दोनों प्रकार के अनार—हृदय के लिये उत्तम, लघु, स्निग्ध, ग्राही, रुचिकारक और अग्निदीपक हैं ॥ ११७-११८ ॥

मोचखर्जूरपनसनारिकेलपरूषकम्
आम्राततालकाश्मर्यराजादनमधूकजम् ॥ ११९ ॥
सौवीरबदराङ्कोल्लफल्गुश्लेष्मातकोद्भवम् ।
वातामाभिषुकाक्षोडमुकूलकनिकोचकम् ॥ १२० ॥
उरुमाणं प्रियालं च बृंहणं गुरु शीतलम् ।
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम् ॥ १२१ ॥
स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत् ।

स०—मोचादिप्रियालांतं बृंहणत्वादियुक्तम्। मोचं कदलीफलम्। नालिकेरं राजफलाख्यम्। परूषको मृदुफलः। आम्रातः कपिचूडः। तालं तालफलम्। काश्मर्यं काश्मरीफलम्। राजादनं क्षीरशुक्लम्। सौवीरबदरं कर्णिकावदरम्। अंकोल्ल इति बिल्वः। फल्गुः काकोदुंबरिका। श्लेष्मातकं शेलुः। अभिषुकं स्याराटम्। आक्षोडं स्नेहफलाख्यम्। मुकूलकं दंतीफलम्। निकोचकं सरलफलम्। उरुमाणं स्निग्धफलम्। प्रियालं प्रियालकफलम् ॥ ११९-१२१ ॥

केला, खजूर आदि फलों के गुण—

वि०—मोच (केला), खर्जूर, पनस (कटहल), नारियल, फालसा, आम्रात (आमड़ा), ताल, गम्भारी, राजादन (खिरनी), मधूक (महुआ), सौवीर (बड़ा बेर), बदर (बेर), अङ्कोल (अङ्कोठ) फल्गु (अञ्जीर), लसोड़ा, बादाम, अभिषुक, अखरोट, मुकूलक (पिस्ता), निकोचक (चिलगोजा), उरुमाण (खुबानी) और प्रियाल (चिरौंजी)—ये बृंहण गुरु, शीतल हैं; दाह, क्षत एवं क्षय नाशक हैं, रक्त और पित्त को निर्मल करते हैं, विपाक और रस में मधुर, स्निग्ध, विष्टम्भ करने वाले, कफ और शुक्र को बढ़ाते हैं ॥ ११९-१२१ ॥

वक्तव्य—बेर पांच प्रकार के होते हैं 'कर्कन्धु कोलं बदरं सौवीरं सिञ्चतीफलं। यथोत्तरं महत्स्वादु पञ्चधा बदरीफलम् ॥'

फलं तु पित्तलं तालं सरं काश्मर्यजं हिमम् ॥ १२२ ॥
शकृन्मूत्रविबन्धघ्नं केश्यं मेध्यं रसायनम् ।
वातामाद्युष्णवीर्यं तु कफपित्तकरं सरम् ॥ १२३ ॥
परं वातहरं स्निग्धम्—

स०—तालस्येदं तालं फलम् पित्तकारि। काश्मर्यजं फलं सरं शीतवीर्यादिगुणयुक्तम्। मधूकबदरयोरपि विशेषांतरमुक्तं संग्रहे। मधूकजमहृद्यं तु बदरं सरणात्मकमिति। वातामादीनां ग्रहणं गुणविशेषप्रदर्शनार्थम्। निर्धारिते तु विशेषे वातामादिकमुष्णवीर्यं कफपित्तकरं सरमतिशयेन वातघ्नं स्निग्धं च ॥ १२२-१२३ ॥

तालफलादि के गुण—

वि०—ताल का फल—पित्तकारक और काश्मरी का फल शीतल और विरेचक है तथा मल-मूत्र के विबन्ध का नाश करनेवाला, बालों के लिये उत्तम, मेधावर्धक और रसायन है। बदाम आदि उष्णवीर्य, कफ-पित्तकारक, मृदु रेचक, स्निग्ध एवं अतिशय वातनाशक हैं ॥ १२२-१२३ ॥

—अनुष्णं तु प्रियालजम् ।
प्रियालमज्जा मधुरो वृष्यः पित्तानिलापहः ॥१२४॥
कोलमज्जा गुणैस्तद्वत्तृट्छर्दिकासजिच्च सः ।

स०—आदिशब्देनाऽभिषुकादीनां ग्रहणम्। प्रियालजातं प्रियालजं फलमनुष्णवीर्यम्। तुर्विशेषे। विशेषस्तु शीतवीर्यत्वमेव। शेषं बृंहणादि सर्वं समानम्। प्रियालमज्जाऽस्थ्यभ्यंतरं मधुरादिगुणयुक्तम् बदरमज्जा गुणैस्तद्वत् प्रियालमज्जावत्तृडादिजिच्च। तंत्रांतरे चोक्तम्। बैभीतको मदकरः कोलानां पित्तनाशनः। तथा तालखर्जूरादीनां मस्तकमज्जानः स्वादुपाका वृष्याः शीतवीर्याश्चेति सुश्रुतोऽपठत् ॥ १२४ ॥

वि०—प्रियाल [पियाल] का फल—ईषद् उष्ण है। प्रियाल की मज्जा—[चिरौंजी] मधुर, वृष्य, पित्त और वायु नाशक है। बेर की मज्जा—गुणों में पियाल की मज्जा के समान है, एवं प्यास, वमन और कास नाशक है ॥ १२४ ॥

पक्वं सुदुर्जरं बिल्वं दोषलं पूतिमारुतम् ॥ १२५ ॥
दीपनं कफवातघ्नं बालं ग्राह्युभयं च यत् ।

स०—बिल्वं पक्वं सुदुर्जरं पूतिमारुतं च दुर्गंध्यपानवातकृद्भवति बालमसम्पूर्णमनुपचितं बिल्वं दीपनं कफवातघ्नम्। उभयमामं पक्वं च ग्राहि मूत्रपुरीषादेः संग्रहणम् ॥ १२५ ॥

बेल के गुण—

वि०—बेल का पका हुआ फल—अतिशय दुर्जर, दोषकारक एवं दुर्गन्धित अपान वायु को उत्पन्न करता है। कच्चा बेल फल अग्निदीपक, कफ-वातनाशक है। कच्चे और पके दोनों प्रकार के फल ग्राही हैं ॥ १२५ ॥

कपित्थमामं कण्ठघ्नं दोषलं, दोषघाति तु ॥ १२६ ॥
पक्वं हिध्मावमथुजित्, सर्वं ग्राहि विषापहम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—आमं कपित्थं कंठं हंति। दोषलं त्रिदोषकृत्। पक्वं कपित्थं दोषघ्नं हिक्काच्छर्दिहरम्। सर्वमामं पक्वं च कपित्थं ग्राहि विषापहं च। आमकपित्थस्य कषायत्वं कंठघ्नत्वेनैवोदितम्। अम्लत्वं चाम्लवर्गमध्ये पाठादवगंतव्यम्। पक्वस्य च मधुरत्वं सुप्रसिद्धमितीहैतन्नोक्तम्। तथा आमकपित्थगुणकथनेन तथाविधानि कषायाम्लस्वभावानि विविधानि कपित्थानि सदैवामकपित्थगुणानि वेद्यानि पक्वकपित्थगुणकथनेन च तथाविधानि माधुर्यानुविद्धानि सदा पक्वगुणानि वेद्यानि ॥ १२६ ॥

कपित्थफल के गुण—

वि०—कच्चा कैथ—गले को बिठाने वाला और दोषकारक है। पका कैथ—दोषनाशक, हिक्का और वमन नाशक है। कच्चा और पक्का दोनों प्रकार का कैथ ग्राही और विषनाशक है ॥ १२६ ॥

जाम्बवं गुरु विष्टम्भि शीतलं भृशवातलम् ॥ १२७ ॥
सङ्ग्राहि मूत्रशकृतोरकण्ठ्यं कफपित्तजित्।

स०—जांबवं गुर्वादिगुणयुक्तं मूत्रशकृतोश्च संग्रहणं कंठाय च हितं न। कफपित्तजिच्च। जांबवमिति फलार्थे जंब्वा वेत्यण् ॥ १२७ ॥

जामुन के गुण—

वि०—जामुन का फल—गुरु, विष्टम्भी, शीतल, अतिशय वायुकारक, मूत्र और मल का संग्राही, कण्ठ के लिए अहितकर तथा कफ और पित्त को शान्त करता है ॥ १२७ ॥

वातपित्तास्रकृद् बालं, बद्धास्थि कफपित्तकृत् ॥१२८॥
गुर्वाम्रं वातजित्पक्कं स्वाद्वम्लं कफशुक्रकृत्।

स०—वातेत्यादि। आम्रमिति वक्ष्यमाणेन सम्बन्धः आम्रं चूताख्यं बालं सद्वातपित्तास्रकृत्। बद्धास्थि संजातास्थि कफपित्तकृत्। पक्वमाम्रं गुरु वातजित्। मधुराम्लं कफशुक्रकृत्। संग्रहे सहकारस्य गुणा उक्ताः। यथा। सहकाररसो हृद्यः सुरभिः स्निग्धरोचन इति ॥ १२८ ॥

आम के गुण—

वि०—कच्चा आम (बिना गुठली का टिकोरा)—वायु-पित्त और रक्त को दूषित करता है। गुठली पड़ा कच्चा आम—कफ, पित्तकारक, पका हुआ आम—गुरु, वायुनाशक, मधुर, अम्ल होता है और कफ एवं शुक्र को बढ़ाता है ॥ १२८ ॥

वृक्षाम्लं ग्राहि रूक्षोष्णं वातश्लेष्महरं लघु ॥ १२९ ॥

स०—वृक्षाम्लं ग्राह्यादिगुणैर्युक्तम्। वातश्लेष्महल्लघु च। कोशाम्रं च किंचिदेतस्मान्न्यूनगुणं ज्ञेयम्। तथा च सग्रहे। वृक्षाम्लं ग्राहि रूक्षोष्णं लघु रोचनदीपनम्। वातश्लेष्महरं किंचिदूनं कोशाम्रजं तत इति ॥ १२९ ॥

वृक्षाम्ल के गुण—

वि०—वृक्षाम्ल—ग्राही, रूक्ष, उष्ण, वात कफ नाशक और लघु है ॥ १२९ ॥

शम्या गुरूष्णं केशघ्नं रूक्षम्—

स०—फलापेक्षया षष्ठी। शम्याः फलं गुरु उष्णवीर्यं केशघ्नं रूक्षं च।

शमी फल के गुण—

वि०—शमी का फल—गुरु, उष्ण, केशनाशक और रूक्ष है।

—पीलु तु पित्तलम्।
कफवातहरं भेदि प्लीहार्शःक्रिमिगुल्मनुत् ॥१३०॥
सतिक्तं स्वादु यत्पीलु नात्युष्णं तत्त्रिदोषजित्।

स०—पीलुफलं च पित्तलं यावद्गुल्मनुत्। सतिक्तमीषत्तिक्तं मधुरं च यत्पीलु तन्नात्युष्णं त्रिदोषजिच्च ॥ १३० ॥

पीलु फल के गुण—

वि०—पीलु—पित्तकारक, कफ और वात नाशक; मलभेदक; प्लीहा, अर्श, कृमि और गुल्मनाशक है। थोड़ा तिक्त और मीठा पीलु—बहुत गरम नहीं (थोड़ा गरम) और त्रिदोषनाशक है ॥ १३० ॥

मातुलुंगस्य त्वङ्मांसकेसराणां पृथगुपयोगदर्शनात्पृथगेव गुणानाह—

त्वक्तिक्तकटुका स्निग्धा मातुलुङ्गस्य वातजित् ॥ १३१ ॥
बृंहणं मधुरं मांसं वातपित्तहरं गुरु।
लघु तत्केसरं कासश्वासहिध्मामदात्ययान् ॥ १३२ ॥
आस्यशोषानिलश्लेष्मविबन्धच्छर्द्यरोचकान्।
गुल्मोदरार्शःशूलानि मन्दाग्नित्वं च नाशयेत् ॥ १३३ ॥

स०—बीजपूरकस्य त्वक्तिक्ता कटुका रसे स्निग्धा वातघ्नी च। चरकेऽप्युक्तम्। गुर्वी त्वगस्य कटुका मारुतस्य च नाशनीति। खरनादस्त्वाह। त्वङ्मातुलुंगात्कटुका गुर्वी वातप्रकोपनीति। एतन्मतानुसारिणस्त्वत्रैवं पाठं पठंति। त्वक्तिक्तकटुकाऽस्निग्धा मातुलुंगस्य वातकृदित्यकारप्रश्लेषात्। मांसं केसरादवाग्बृंहणं मधुरं वातपित्तहृद् गुरु च। तस्य मातुलुंगस्य केसरं तत्केसरं लघु। तथा कासादीन्मंदाग्नित्वांतान्नाशयेत् ॥ १३१-१३३ ॥

बिजौरे के गुण—

वि०—बिजौरे का छिलका—तिक्त, कटु, स्निग्ध और वातनाशक है। बिजौरे का गुदा—पुष्टिकारक, मधुर, वातपित्तनाशक और गुरु है। बिजौरे का केशर (दानें)—लघु, कास, श्वास, हिक्का, मदात्यय, मुखशोष, वायु, कफ, विबन्ध, वमन, अरुचि, गुल्म, उदर, अर्श, शूल और मन्दाग्नि का नाशक है ॥ १३१-१३३ ॥

भल्लातकस्य त्वङ्मांसं बृंहणं स्वादु शीतलम्।
तदस्थ्यग्निसमं मेध्यं कफवातहरं परम् ॥१३४॥

स०—त्वक् च मांसं च त्वङ्मांसं भल्लातकसम्बन्धि बृंहणं मधुरं शीतलं च। तस्य भल्लातकस्यास्थि तदस्थि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निसमं तीक्ष्णत्वादग्निवत्स्फोटककर्तृत्वात्। अथवाऽग्निश्चित्रस्तस्य गुणदोषकर्तृतया तुल्यं भल्लातकास्थीति। तथा मेधायै हितमिति। कफवातघ्नम् ॥ १३४ ॥

भिलावे के गुण—

वि०—भिलावे की छाल और गुद्दा—पुष्टिकारक, मधुर और शीतल है। इसकी गुठली—(बीज-काला)-अग्नि के समान (दाह और पाक करनेवाला), मेध्य, अतिशय कफनाशक है ॥ १३४ ॥

स्वाद्वम्लं शीतमुष्णं च द्विधा पालेवतं गुरु।
रुच्यमत्यग्निशमनम्—

स०—पालेवतं रैवतकाख्यं द्विधा। कथं द्विःप्रकारमित्याह। स्वाद्वम्लं च तत्त यथासंख्येन शीतमुष्णं च। तथा द्वयमपि गुरु रुच्यमत्यग्निशमनं च। अथवा यथासम्भवं सम्बन्धो मधुरं गुर्वत्यग्निनाशनं च।

पालेवतादि के गुण—

वि०—पालेवत—यह दो प्रकार का होता है—१. मधुर, २. अम्ल। जो मधुर है वह शीत है और जो अम्ल है वह उष्ण है। और दोनों प्रकार का पारेवत गुरु, रुचिकर तथा अत्यग्निशामक है।

अपक्वस्यैवैते गुणा वेद्याः। यस्मादाह—

—रुच्यं मधुरमारुकम् ॥१३५॥
पक्वमाशु जरां याति नात्युष्णं गुरुदोषलम्।

स०—अम्लं रुच्यमिति। मधुरमारुकं रुच्यं हृद्यं भवति। पक्वं च द्रागेव परिणामं याति। किंचिदुष्णवीर्यं किंचिद् गुरु किंचिद्दोषलमपथ्यम्। निघंटावुक्तम्। आरुकं बीरसेनं च वीरावीरारुकं तथा। विद्याज्जातिविशेषेण यच्चतुर्विधमारुकम् ॥ १३५ ॥

आलूबुखारा—

वि०—आरुक—(आलूबुखारा)—मीठा, रुचिकारक है। अच्छी प्रकार पका आरुक-जल्दी पच जाता है, थोड़ा गरम एवं थोड़ा गुरु और दोषकारक है ॥ १३५ ॥

द्राक्षापरूषकं चार्द्रमम्लं पित्तकफप्रदम् ॥ १३६ ॥
गुरूष्णवीर्यं वातघ्नं सरं सकरमर्दकम्।

स०—द्राक्षा परूषकं करमर्दकं चार्द्रमशुष्कमपक्वमम्लं सपित्तश्लेष्मकरं गुरूष्णवीर्यं वातघ्नं सरं चेति। करमर्दकं सुषेणमम्लम् ॥ १३६ ॥

हरे दाख, फालसे और करमर्द के गुण—

वि०—द्राक्षा (अंगूर, फालसे तथा करमर्द (करौंदा)—हरे खट्टे होने पर-पित्त-कफवर्धक, गुरु, उष्णवीर्य, वातनाशक और मृदुरेचक होते हैं ॥ १३६ ॥

तथाऽम्लं कोलकर्कन्धुलकुचाम्रातकारुकम् ॥१३७॥
ऐरावतं दन्तशठं सतूदं मृगलिण्डिकम्।
नातिपित्तकरं पक्वं शुष्कं च करमर्दकम् ॥१३८॥

स०—कोलादिकं मृगलिंडिकान्तं तथा तद्वच्चेत्यम्लद्राक्षादिवद् गुणैर्ज्ञेयमित्यर्थः। कर्कंधूर्ह्रस्वबदरी। लकुचं लिकुचम्। आरुकस्याम्लस्यैवैते गुणा ज्ञेयाः। मधुरस्य हि विशेषेण पूर्वमुक्ता एव गुणाः। तथैरावतादि नात्युष्णं पित्तं करोति। ऐरावतं नागरंगम्। दंतशठं जंबीरम्। तथा सतूदं मृगलिंडिकं च। तथा करमर्दकं पक्वं शुष्कं च नात्यर्थपित्तकरम् ॥ १३७-१३८ ॥

कोलादि के गुण—

वि०—बेर, झाड़ी के बेर, बड़हल, आम्रातक (आमड़ा), आरुक, ऐरावत (नारङ्गी), जम्बीरी निम्बू, तूद, मृगलिण्डिक ये खट्टे होने पर बहुत अधिक पित्त को नहीं करते, थोड़ा पित्त करते हैं। पका और सूखा करौंदा भी बहुत पित्त नहीं करता ॥ १३७-१३८ ॥

दीपनं भेदनं शुष्कमम्लीकाकोलयोः फलम्।
तृष्णाश्रमक्लमच्छेदि लघ्विष्टं कफवातयोः ॥१३९॥

स०—अम्लीकाफलं कोलफलं च शुष्कं सदीपनं भेदनं तृष्णादिनाशनं लघु कफवातयोश्च पथ्यम् ॥ १३९ ॥

इमली और बेर के गुण—

वि०—इमली और बेर (बड़ी और छोटी दोनों) का शुष्क फल—अग्निदीपक, मलभेदक, तृष्णा, श्रम और क्लमनाशक, लघु, कफ और वायु में उत्तम है ॥ १३९ ॥

फलानामवरं तत्र लकुचं सर्वदोषकृत्।

स०—फलानां सर्वेषां मध्ये लकुचमप्रधानं त्रिदोषकरम्। चरकमुनिस्त्वस्य पित्तश्लेष्मकरत्वमेवानुजज्ञे। तत्पाठे। लकुचं श्लेष्मपित्तकृत्। वातलं कफपित्तघ्नं विद्यात्कपर्दकीफलम्। मधुराण्यतिपाकानि वातपित्तहराणि च। अश्वत्थोदुंबरप्लक्षन्यग्रोधानां फलानि तु। प्राचीनामलके चैव दोषघ्नं सदृहानि च। इङ्गुदं तिक्तमधुरं स्निग्धोष्णं कफवातजित्। सुश्रुतेनोक्तम्। सुगन्धि मधुरं स्निग्धं लवलीफलमुच्यते। वृन्ताम्लालपान्तरगुणं कोशाम्रफलमुच्यत इति।

लकुच (बड़हल) की हीनता—

वि०—सब फलों में बड़हल का फल हीन है, यह तीनों दोषों को करता है।

संप्रति यादृशं फलं शाकं च संपाद्यं तदुपदिशन्नाह—

हिमानलोष्णदुर्वातव्याललालाऽऽदिदूषितम् ॥१४०॥
जन्तुजुष्टं जले मग्नमभूमिजमनार्तवम्।
अन्यधान्ययुतं हीनवीर्यं जीर्णतयाऽति च ॥१४१॥
धान्यं त्यजेत्तथा शाकं रूक्षसिद्धमकोमलम्।
असञ्जातरसं तद्वच्छुष्कं चान्यत्र मूलकात् ॥१४२॥
प्रायेण फलमप्येवं तथाऽऽमं बिल्ववर्जितम्।

स०—दूषितशब्दः प्रत्येकं संबध्यते। धान्यं केदारस्थं हिमेन दूषितं त्यजेत्। तथाऽनिलेन प्रवृद्धेन दूषितं तथा उष्णेनातपादिना दुर्वातेन पुरोवातादिना तथा व्यालानां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्पादीनां लालया दूषितं त्यजेत्। आदिग्रहणेन शवकोथमूत्रपुरीषादीनां ग्रहणम्। तथा जंतुभिः कृम्यादिभिर्जुष्टं सेवितम्। जले मग्नमाशिखं बुडितम्। अभूमौ विपरीतभुवि जातमभूमिजम्। या यस्योचिता भूमिस्ततोऽन्या विपरीता। अनार्तवमप्राप्तसमयम्। यस्मिन्नृतौ यस्योत्पत्तिः प्रसिद्धा ततोऽन्यस्मिन् जातमित्यर्थः। तल्लक्षणं रसादीनामपरिपूर्णत्वेन विज्ञेयम्। अन्येन च विजातीयेन धान्येन संयुतम्। यथा रक्तशालिर्यवकेन सह विरुध्यते। तथा मुद्गो माषेण। एवं शूकधान्यं विजातीयेन शूकधान्येन। तथा शिंबीधान्यं शिंबीधान्येन विजातीयेन सह विरुद्धं त्यजेत्। केचिच्छूकधान्येन सह विरुद्धमिति वर्णयंति। अन्ये तु जीर्णं नवेन मिश्रितमन्यधान्ययुतमिति ब्रुवते। केदारगतं जीर्णतयाऽतिपुराणत्वेन हीनवीर्यं नष्टशक्ति। एवंविधं धान्यं त्यजेत्। तथा शाकमपि त्यजेत्। कीदृशम्। रूक्षसिद्धं निःस्नेहसिद्धमित्यर्थः। अथवा रूक्षेण कांजिकादिना सिद्धं रूक्षसिद्धम् अकोमलं जठरेऽसंजातरसमपरिपूर्णरसस्वरूपमित्यर्थः। तद्वच्छुष्कं तथैव शुष्कशाकमप्यसंजातरसं त्यजेत्। अन्यत्र मूलकात् शुष्कमूलकं भजेदेव। प्रायेण फलमप्येवंविधं त्यजेत्। प्रायोग्रहणं द्राक्षापरूषकादीनां शुष्काणामपि पथ्यत्वादत्याज्यत्वज्ञापनार्थम्। तथा आममसंप्राप्तपाकं फलं त्यजेदिति वर्तते। किं सर्वं नेत्याह। बिल्ववर्जितम्। बिल्वं त्वाममपि पथ्यत्वान्न त्यजेदेवेत्यर्थः। इति फलवर्गः॥ १४०-१४२॥

त्यागने योग्य धान्य, शाक, फलादि—

वि०—हिम (तुहिन); अनल (अग्नि), उष्ण (गरमी), दुर्वात (पुरोवात-आदि), व्याल (सर्प आदि) के लाला आदि (सड़न, मूत्र, पुरीष आदि) से दूषित, कीड़ों से खाया या युक्त, पानी में डूबा, अयोग्य भूमि में उत्पन्न, अपनी ऋतु से भिन्न ऋतु में उत्पन्न हुआ, किसी अन्य धान्य से मिला; हीनवीर्य, और जो बहुत पुराना हो; ऐसा धान्य नहीं खाना चाहिये। इसी प्रकार का शाक, तथा जो शाक रूक्ष सिद्ध हो (स्नेह के बिना सिद्ध किया हो), जो शाक कड़ा (रूढ़) हो गया हो; जिनमें रस उत्पन्न नहीं हुआ हो; तथा जो शाक सूख गया हो; वह सब शाक; मूली को छोड़कर त्याज्य है। प्रायः ऐसा फल भी अपथ्य होता है; तथा बेल को छोड़कर सभी कच्चे फल त्याज्य हैं॥ १४०-१४२॥

अथौषधवर्गः।

फलवर्गादनंतरं विविधौषधवर्गारंभः। प्रायेणास्याऽहारोपयोगित्वात्तत्राऽपि लवणानां पूर्वमुपन्यासो युक्तः सुतरामुपयोगित्वादित्याह—

विष्यन्दि लवणं सर्वं सूक्ष्मं सृष्टमलं मृदु ॥१४३॥
वातघ्नं पाकि तीक्ष्णोष्णं रोचनं कफपित्तकृत्।

स०—सर्वं लवणं विष्यंद्यादिगुणयुक्तं विदुर्जानंति सद्वैद्य इति शेषः। विष्यंदयति तच्छीलं विष्यंदि। स्त्यानस्य कफादिसंघातस्य विलीनविग्रहतामुत्पादयतीत्यर्थः। सूक्ष्मं सूक्ष्मस्रोतोगामि। सृष्टं मलं मूत्रपुरीषादि येन तत्सृष्टमलम्। तथा वातापहम्। पाकि अन्नव्रणादीनां पाककारि। तीक्ष्णममृदु मरीचादिवत्। उष्णमुष्णवीर्यम्। रोचनं रुचिकृत्। तथा कफपित्तकृत्॥ १४३॥

नमक—

वि०—सब लवण—विष्यन्दि (द्रवीभूत करने वाले), सूक्ष्म स्रोतों में पहुँचने वाले, मल को प्रवृत्त करने वाले, मृदु, वातनाशक, अन्न तथा व्रण आदि को पकाने वाले, तीक्ष्ण-उष्ण, रुचि करने वाले होते हैं एवं कफ और पित्त को करते हैं॥ १४३॥

इति सामान्यलक्षणमुक्त्वा विशेषमाह—

सैन्धवं तत्र सुस्वादु वृष्यं हृद्यं त्रिदोषनुत् ॥१४४॥
लघ्वनुष्णं दृशः पथ्यमविदाह्यग्निदीपनम्।

स०—तत्र तेषु लवणेषु मध्ये सैंधवं सस्वादु ईषन्मधुरं वृष्यं हृद्यं त्रिदोषघ्नं तथा किंचिदुष्णं दृष्टेः पथ्यं किंचिद्विदाह्यग्निदीपनं च। सामान्यगुणांश्च विष्यंदिसूक्ष्मसृष्टमलत्वरोचनान्यस्य सत्येव॥ १४४॥

सेंधा नमक—

वि०—सैन्धव नमक—थोड़ा मधुर, वृष्य, हृद्य, त्रिदोषनाशक, लघु, थोड़ा उष्ण, आँखों के लिये हितकारी, अविदाही और अग्निदीपक है॥ १४४॥

लघु सौवर्चलं हृद्यं सुगन्ध्युद्गारशोधनम् ॥१४५॥
कटुपाकं विबन्धघ्नं दीपनीयं रुचिप्रदम्।

स०—सौवर्चलं लघु हृदयाय हितं सुगंध्युद्गारं शोधयति दुष्टं सच्छुद्धं करोति। कटुपाकं च। तथा विबद्धस्रोतसां हितं विबंधघ्नम्। अग्निदीसिरुचिकृत्॥ १४५॥

सोंचर नमक—

वि०—सौवर्चल नमक—लघु, हृदय के लिये हितकारी, सुगन्धि, दूषित उद्गार को शोधन करने वाला, विपाक में कटु, विबन्धनाशक, अग्निदीपक और रुचि देने वाला है॥ १४५॥

ऊर्ध्वाधःकफवातानुलोमनं दीपनं बिडम् ॥१४६॥
विबन्धानाहविष्टम्भशूलगौरवनाशनम्।

स०—बिडं तदूर्ध्वमधश्च कफवातादीननुलोमयति। तथा दीपनं विबंधादिघ्नं च॥ १४६॥

बिड नमक—

वि०—बिडनमक—ऊपर और नीचे की वायु (डकार और अपान वायु) और कफ का अनुलोमन करने वाला, तथा अग्निदीपक है। विबन्ध, आनाह, विष्टम्भ, शूल और भारीपन को नष्ट करता है॥ १४६॥

विपाके स्वादु सामुद्रं गुरु श्लेष्मविवर्धनम् ॥१४७॥

स०—सामुद्रं विपाके मधुरं गुरु कफवर्धनं च॥ १४७॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामुद्र नमक--

वि०—सामुद्र नमक--विपाक में मधुर, गुरु और कफ को बढ़ाता है।

सतिक्तकटुकक्षारं तीक्ष्णमुत्क्लेदि चौद्भिदम्।

स०—भूमिमुद्भिद्य यद्भवति तदौद्भिदमीषत्तिक्तं कटुक्षारं तीक्ष्णमुत्क्लेदि च दोषोत्क्लिष्टकरम्।

उद्भिद् नमक--

वि०—उद्भिद् नमक—ईषत् तिक्त; कटु-क्षार युक्तः तीक्ष्ण, उत्क्लेदन करने वाला है।

कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिताः ॥१४८॥

स०—कृष्णे लवणे सौवर्चलगुणा लघुत्वादयो गन्धेन वर्जिताः सौगंध्यरहितास्ते संति इति शेषः ॥ १४८ ॥

काला नमक—

वि०—काले नमक—में गन्ध को छोड़कर सौवर्चल नमक के सब गुण रहते हैं ॥ १४८ ॥

रोमकं लघु, पांशूत्थं सक्षारं श्लेष्मलं गुरु।

स०—रोमकं लवणं लघु पांशूत्थं शिरालवणमीषत्क्षारं श्लेष्मलं गुरु च।

रोमक और पांशुज नमक—

वि०—रोमक नमक—लघु, पांशु (धूल) से उत्पन्न नमक ईषत्क्षारयुक्त, कफकारक और गुरु है।

लवणानां प्रयोगे तु सैन्धवादि प्रयोजयेत् ॥१४९॥

स०—लवणानां प्रयोगे सैंधवमादि कृत्वा प्रयोजयेत्। अन्यत्र प्रदेशे लवणानि द्वित्राणि त्रिचतुराण्येव यत्र युज्यंते तत्र सैंधवमादि कृत्वा प्रयोज्यानि। यथा हिंग्वादिचूर्णे द्विपट्वित्युक्तम्। तत्र सैंधवसौवर्चले प्रयोज्ये। यत्र त्रयाणां प्रयोगस्तत्र सैंधवसौवर्चलविडानि। एवमौद्भिदादीनां लवणवर्गे पठितानामन्यत्राऽपि वेद्यम्। खरनादे चोक्तम्। सैंधवं सारकं पाक्यं सौवर्चलमथौद्भिदम्। पूर्वं पूर्वं गुणोत्कृष्टमौष्ण्यं चैषां यथोत्तरमिति ॥ १४९ ॥

नमक का प्रयोग—

वि०—लवणों के प्रयोग में सैन्धव को आदि मानकर प्रयोग करना चाहिये। अर्थात् जहाँ दो नमक लिखे हों वहाँ सैन्धव और सौवर्चल बरतना, जहाँ तीन का प्रयोग हो वहाँ सैन्धव, सौवर्चल और बिड इनको करते हैं ॥ १४९ ॥

वक्तव्य—लवण आठ हैं, यथा-सैन्धव, सौवर्चल, बिड, सामुद्र, औद्भिद, कृष्ण, रोमक और पांशुज। इनमें पाँच नमक मुख्य हैं-यथा सौवर्चलं सैन्धवं च विडमौद्भिदमेव च। सामुद्रेण सहैतानि पञ्च स्युर्लवणानि च॥'

गुल्महृद्ग्रहणीपांण्डुप्लीहानाहगलामयान्।
श्वासार्शःकफकासांश्च शमयेद्यवशूकजः ॥१५०॥

स०—यवशूकजो यवक्षारो गुल्मादीन् शमयति ॥१५०॥

जवाखार के गुण—

वि०—यवक्षार—गुल्म, हृद्रोग, ग्रहणी, पाण्डु, प्लीहा, आनाह, गलरोग, श्वास, अर्श और कफ और कास को नष्ट करता है।

वक्तव्य—यवक्षार बनाने की विधि—खेत में दूधिया यव लेकर उसको पंचांग समेत सुखाकर जला देवे। फिर इस भस्म को छः गुने जल में घोलकर मथकर रात भर पड़ा रहने देवे। दूसरे दिन इस जलको नितार लेवे। फिर इस जल को इक्कीस बार गाढ़े वस्त्र से छान लेवे। इस छने पानी को आग पर गरम करे। जब पानी शुष्क हो जाय तब नीचे बचा यवक्षार लेवे।

संप्रति स्वर्जिकाक्षारादीनामपि गुणानाह—

क्षारः सर्वश्च परमं तीक्ष्णोष्णः कृमिजिल्लघुः।
पित्तासृग्दूषणः पाकी छेद्यहृद्यो विदारणः ॥१५१॥
अपथ्यः कटुलावण्याच्छुक्रौजःकेशचक्षुषाम्।

स०—क्षारः सर्वश्च परममतिशयेन तीक्ष्णोष्णः कृमिजिल्लघुश्च। पित्तासृजौ दूषयति। पाकी पाककारी। छेदी मेदःश्लेष्मादिग्रथिघ्नः अहृद्यो हृदयाय न हितः। विदारणः पक्वगंडादीनाम्। कटुलावण्याच्छुक्रादीनामपथ्यः ॥ १५१ ॥

क्षार-सामान्य के गुण—

वि०—सब क्षार—अतिशय तीक्ष्ण, उष्ण, कृमिनाशक, लघु, पित्त और रक्त को दूषित करने वाला, पाक करने वाला, मेद-श्लेष्मा आदि का छेदन करने वाला, पके हुए फोड़े आदि को विदीर्ण करने (फोड़ने) वाला, हृदय के लिये अहितकर, कटु और लवण होने से शुक्र, ओज, केश और आँखों के लिये अपथ्य है।

हिङ्गु वातकफानाहशूलघ्नं पित्तकोपनम् ॥ १५२ ॥
कटुपाकरसं रुच्यं दीपनं पाचनं लघु।

स०—हिंगु वातादिघ्नं पित्तकोपनं कट्वादिगुणयुक्तं च ॥ १५२ ॥

हींग के गुण—

वि०—हींग—वायु, कफ, आनाह और शूल नाशक, पित्तप्रकोपक. रस और विपाक में कटु, रुचिकारक, अग्निदीपक, पाचक और लघु है ॥ १५२ ॥

कषाया मधुरा पाके रूक्षा विलवणा लघुः ॥ १५३ ॥
दीपनी पाचनी मेध्या वयसः स्थापनी परम्।
उष्णवीर्या सराऽऽयुष्या बुद्धीन्द्रियबलप्रदा ॥१५४॥
कुष्ठवैवर्ण्यवैस्वर्यपुराणविषमज्वरान्।
शिरोऽक्षिपाण्डुहृद्रोगकामलाग्रहणीगदान् ॥ १५५ ॥
सशोषशोफातीसारमेदोमोहवमिक्रिमीन्।
श्वासकासप्रसेकार्शःप्लीहानाहगरोदरम् ॥ १५६ ॥
विबन्धं स्रोतसां गुल्ममूरुस्तम्भमरोचकम्।
हरीतकी जयेद्व्याधींस्तांस्तांश्च कफवातजान् ॥१५७॥

स०—हरीतकी कषाया कषायरसा। कषायरसत्वात्कटुविपाकित्वं प्राप्तमित्याह। मधुरा पाक इति। तथा रूक्षा। विलवणेति वचनं लवणं वर्जयित्वा शेषाः पंचरसा अस्याः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संतीति वेदयति। नन्वेवं कषायेत्यनर्थकं यतः पंचसु रसेषु लवणहीनेषु मध्ये कषायोऽनुप्रविष्ट एव। अस्त्येवैतत्। कषायेत्येतदतिशयख्यापनाय। कषायो रसोऽस्यां बाहुल्येनाऽस्तीत्यर्थः। तथा च मुनिः। हरीतकी पंचरसामुष्णां विलवणा शिवामिति। तथा लघुः। दीपन्यग्नेः। पाचन्यामादेः। मेध्या मेधायै हिता। वयस इत्यादि। कालकृतां शरीरावस्था यौवनादिर्वयस्तस्य परमतिशयेन स्थापनी स्थिरीकरणी। उष्णेत्येतावतैवोष्णवीर्यैत्यस्याऽर्थस्य लब्धत्वाद्वीर्यग्रहणमतिशयोष्णवीर्यत्वख्यापनार्थम्। सरा भेदनी। तथाऽऽयुषे हिता। बुद्धिः वर्तमानार्थग्राहिणी प्रज्ञा। इन्द्रियाणि चक्षुरादीनि तेषां बलं प्रददाति या सैवम्। कुष्ठादीन् रोगान् जयति। स्वरनादे त्वेवमभ्यधायि। स्वाद्वम्लभावात्पवनं कटुतिक्ततया कफम्। कषायमधुरत्वाच्च हंति पित्तं हरीतकी॥ १५३-१५७॥

हरड़ के गुण—

वि०—हरड़—कषाय रस, विपाक में मधुर, रूक्ष, लवण को छोड़ कर शेष पाँचों रस वाली; लघु, अग्निदीपक, पाचन, मेध्य, तथा वय को स्थिर रखने में अतिशय श्रेष्ठ है; उष्णवीर्य, सर, आयुवर्धक, बुद्धि और इन्द्रियों को बल देने वाली, कुष्ठ, विवर्णता, स्वरभेद, पुरातन ज्वर, विषम ज्वर, शिरोरोग, अक्षिरोग, पाण्डु रोग, हृद्रोग, कामला, ग्रहणी रोग, शोप, शोफ, अतीसार, मेद, मोह, वमन, कृमि, श्वास, कास, मुख से लालास्राव, अर्श, प्लीहा, आनाह, कृत्रिमविष, उदर रोग, स्रोतों के विबन्ध, गुल्म, ऊरुस्तम्भ और अरोचक रोगों को तथा कफ-वातजन्य दूसरे रोगों को नष्ट करती है॥ १५३-१५७॥

वक्तव्य—स्वाद्वम्लभावात्पवनं, कटुतिक्तया कफम्। कषायमधुरत्वाच्च पित्तं हन्ति हरीतकी॥' इससे पित्तजन्य रोगों का भी शमन करती है, कफ-वातजन्य रोगों को विशेष रूप में नष्ट करती है। जो हरड़ पानी में डालने से डूब जाये वह उत्तम है; यथा—'स्निग्धाऽम्भसि निमज्जेद्या गुणकृत्सा प्रकीर्त्तिता॥'

तद्वदामलकं शीतमम्लं पित्तकफापहम्।

स०—तया हरीतक्या तुल्यं वर्तत इति तृतीयांताद्वतिः। हरीतकीसमानगुणमामलकमित्यर्थः। विशेषं त्वस्याह। अभयोष्णेदं शीतं शीतवीर्यं तथाऽम्लमम्लरसं पित्तकफघ्नं चेति। कृष्णात्रेयस्त्वामलकं त्रिदोषघ्नं चाख्यत्। यथा। अम्लभावाज्जयेद्वातं पित्तं माधुर्यशैत्यतः। कफं रूक्षकषायत्वादेवमेष त्रिदोषनुत्। सुश्रुतेऽपि त्रिदोषघ्नमुक्तम्। तद्ग्रन्थो हि। चक्षुष्यं सर्वदोषघ्नं वृष्यमामलकीफलम्। हंति वातं तदम्लत्वात्पित्तं माधुर्यशैत्यतः। कफं रूक्षकषायत्वात्फलेभ्योऽभ्यधिकं तु तदिति।

आँवला के गुण—

वि०—आँवला—भी हरड़ के समान है, परन्तु वीर्य में शीत, रस में विशेष अम्ल, पित्त और कफ नाशक है[1]।

वक्तव्य—'तान् गुणांस्तानि कर्माणि विद्यादामलकीष्वपि। यान्युक्तानि हरीतक्या वीर्यस्य तु विपर्ययः॥'

कटु पाके हिमं केश्यमक्षमीपच्च तद्गुणम्॥ १५८॥

स०—अक्षं बिभीतकं पाके कटुकं शीतवीर्यं केशेभ्यो हितम्। तथैषत्तद्गुणं ताभ्यां हरीतकीधात्रीभ्यां, समाना गुणा यस्य तत्तद्गुणं किंचिदूनम्। ननु हरीतक्यादीनां स्थूलसूक्ष्मादिभेदेनानियतस्वरूपत्वात्कथमिवोपयोगः क्रियतामिति केचित्। तान् ब्रूमहे। अक्षं तावदत्र कर्षप्रमाणं ग्राह्यम्। तथा च धन्वंतरिराख्यत्। बिभीतकः कर्षफल इत्यादि। अन्वर्था हीयं संज्ञा। कर्षः कर्षप्रमाणं फलं यस्य स कर्षफल इति। तदेवं बिभीतकस्य फलं यत्कर्षप्रमाणं तद्ग्राह्यमित्यवतिष्ठते। हरीतक्या अपि प्रमाणं नियतमेव। तंत्रांतरेऽप्युक्तम्। नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता तथाऽम्भसि। निमज्जेद्या प्रशस्तत्वाद् गुणकृत्सा प्रकीर्तिता। नवादिगुण, युक्तत्वं तथैकत्र द्विकर्षता। हरीतक्याः फले यत्र तेनैतच्छ्रेष्ठमुच्यत इति। तदेवं द्विकर्षप्रमाणत्वं हरीतक्याः स्थितम्। धात्रीफलस्याऽपि युक्त्वा नियतप्रमाणत्वमेव। तथा चोक्तं तंत्रांतरे। अभयैका प्रदातव्या द्वावेव तु बिभीतकौ। धात्रीफलानि चत्वारि त्रिफलेयं प्रकीर्तितेति। तदेवमामलकानामर्धकर्षप्रमाणत्वमवतिष्ठते। तस्मान्नियतप्रमाणत्वं त्रिफलायाः स्थितम्॥ १५८॥

बहेड़ा के गुण—

वि०—बहेड़ा—विपाक में कटु, शीतवीर्य, बालों के लिये हित, एवं गुणों में हरड़ और आंवले के कुछ समान ही है॥ १५८॥

इयं रसायनवरा त्रिफलाऽक्ष्यामयापहा।
रोपणी त्वग्गदक्लेदमेदोमेहकफास्रजित्॥ १५९॥

स०—इयमीदृशी त्रिफला रसायनवरा। चक्षूरोगघ्नी रोपणी व्रणानाम्। त्वग्गदाः कुष्ठादयः। क्लेदो व्रणादीनां स्रावः। मेदश्चतुर्थो धातुः। मेहः प्रमेहः। कफः श्लेष्मा। अस्रं रक्तम्। तानि जयति या सैवम्॥ १५९॥

त्रिफला के गुण—

वि०—त्रिफला—उत्तम रसायन है; आंख के रोगों को नष्ट करती है; व्रणों का रोपण करने वाली, त्वचा के रोग, क्लेद, मेद, मेह, कफ और रक्तदोष नाशक है। (हरड़-बहेड़ा और आंवले का नाम त्रिफला है।)॥ १५९॥

---

१. हरीतकी कषायरसप्रधान, उष्णवीर्य और त्रिदोषघ्न होते हुए भी विशेषतः वातकफशामक होती है किन्तु आमलकी अम्लरसप्रधान, शीतवीर्य और त्रिदोषघ्न होते हुए भी मुख्यतः पित्त और कफ को शमन करती है। यथा—'अम्लभावाज्जयेद्वातं, पित्तं माधुर्यशैत्यतः। कफं रूक्षकषायत्वादेवमेतत्त्रिदोषनुत॥' शेष गुण दोनों में प्रायः समान होते हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—'अभयैका प्रदातव्या द्वावेव तु बिभीतकौ।
धात्रीफलानि चत्वारि त्रिफलेयं प्रकीर्त्तिता ॥'[1]

सकेसरं चतुर्जातं त्वक्पत्रैलं त्रिजातकम्।
पित्तप्रकोपि तीक्ष्णोष्णं रूक्षं रोचनदीपनम् ॥ १६० ॥

स०—दीपनरोचनमित्येतत्पर्यंतम्। त्वक् च पत्रं चैला चेति द्वंद्वैकवद्भावः। एतस्य नाम त्रिजातकं त्रिसुगंधमिति। एतत्त्रिजातकं केसरयुक्तं चतुर्जातकमित्युच्यते। तच्च पित्तप्रकोपितत्वादिगुणम्। पित्तकोपि तीक्ष्णादिगुणयुक्तम् ॥ १६० ॥

त्रिजात और चातुर्जात—

वि०—त्वक् (दालचीनी), तेजपात और इलायची इन तीनों का मिलित नाम त्रिजातक है। नागकेशर को मिलाने से चतुर्जात हो जाता है। ये दोनों पित्तप्रकोपक, तीक्ष्ण, उष्ण, रूक्ष, रुचिकारक और अग्निदीपक हैं ॥ १६० ॥

वक्तव्य—त्रिजातक को त्रिसुगन्धि भी कहते हैं, यथा—'त्वक्पत्रकैलं त्रिसुगन्धमेतत् प्रकीर्त्तितं वातकफापहारि। वर्ण्यं विषघ्नं च सनागपुष्पं ज्ञेयं चतुर्जातकमेतदेव ॥' चिकित्साकलिका।

रसे पाके च कटुकं कफघ्नं मरिचं लघु।

स०—रसे पाके च कटुकं मरिचं कफघ्नं लघु च। कटुकरसत्वेन लब्धे पाकग्रहणमतिशयार्थम्।

काली मिर्च के गुण—

वि०—मरिच—रस और पाक में कटु तथा कफनाशक और हलकी होती है।

श्लेष्मला स्वादु शीताऽऽर्द्रा गुर्वी स्निग्धा च पिप्पली ॥ १६१ ॥
सा शुष्का विपरीताऽतः स्निग्धा वृष्या रसे कटुः।
स्वादुपाकाऽनिलश्लेष्मश्वासकासापहा सरा ॥ १६२ ॥
न तामत्युपयुञ्जीत रसायनविधिं विना।

स०—आर्द्राऽशुष्का पिप्पली श्लेष्मला स्वादुरसा। शीतवीर्या गुरुः स्निग्धा चासा शुष्का पिप्पल्यत आर्द्रायाः पिप्पल्याः सकाशाद्विपरीता शीतविपर्ययेणोष्णा। गुरुविपर्ययेण लघुः। स्निग्धविपर्ययस्त्वत्र नास्ति स्निग्धेत्युक्तत्वात्। तथा वृष्या रसे कटुश्च। कटुरसत्वाच्च कटुपाकत्वं प्राप्तमित्याह। स्वादुपाका। तथा अनिलादीन् हंति सरा च एवंविधामपि तां पिप्पलीमत्यर्थं न युंजीत रसायनविधिं विना पिप्पलीं वर्धमानादिरसायनविधान एवातिशयेनोपयुञ्जीत ॥ १६१-१६२ ॥

पिप्पली के गुण—

वि०—आर्द्र (गीली) पिप्पली—कफकारक, मधुर, शीतल, गुरु और स्निग्ध है। सूखी पिप्पली विपरीत गुणों वाली अर्थात् उष्ण, कटु, कफनाशक, लघु किन्तु स्निग्ध और वृष्य है। कटु रस होने पर भी विपाक में मधुर है; वायु, कफ, श्वास और कास नाशक एवं रेचक है। रसायन विधि के बिना पिप्पली का अधिक उपयोग नहीं करना चाहिये ॥ १६१-१६२ ॥

वक्तव्य—आर्द्र पिप्पली शीतल होने से पित्तशामक है; और शुष्क पिप्पली उष्ण और पित्त प्रकोपक है। पिप्पली का अतिसेवन चरक में भी निषिद्ध है; यथा—'पिप्पल्यो हि कटुकाः सत्यो मधुरविपाका गुर्व्यो नात्यर्थं स्निग्धोष्णाः प्रक्लेदिन्यो भिषजामभिमताश्च सत्यः शुभाशुभकारिण्यो भवन्ति। आपातभद्राः प्रयोगसमसाद्गुण्यात् दोषसञ्चयानुबद्धाः। सततमुपयुज्यमाना हि गुरुप्रक्लेदित्वात् श्लेष्माणमुत्क्लेशयन्ति; औष्ण्यात् पित्तम्। न च वातप्रशमनायोपकल्पन्ते, अल्पस्नेहोष्णभावात्। योगवाहिन्यः खलु ता भवन्ति तस्मात् पिप्पलीर्नात्युपयुञ्जीत ॥'

नागरं दीपनं वृष्यं ग्राहि हृद्यं विबन्धनुत् ॥ १६३ ॥
रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित्।

स०—नागरं श्रृङ्गवेरं दीपनादिगुणयुक्तम्। ग्राहि विड्विबन्धकृत् तथा हृद्यम्। विबंधनुत् स्रोतःशुद्धिकृत् ॥ १६३ ॥

सोंठ के गुण—

वि०—सोंठ—अग्निदीपक, वृष्य, ग्राही, हृदय के लिये उत्तम, विबन्धनाशक, रुचिकारक, लघु, विपाक में मधुर, स्निग्ध, उष्ण, और कफ तथा वात शामक है ॥ १६३ ॥

तद्वदार्द्रकमेतच्च त्रयं त्रिकटुकं जयेत् ॥ १६४ ॥
स्थौल्याग्निसदनश्वासकासश्लीपदपीनसान्।

स०—आर्द्रकं शुंठीसमानगुणमेव। एतच्च त्रयं मरिचपिप्पलीशुंठ्याख्यं त्रिकटुकसंज्ञं स्थौल्यादीन् जयेत् ॥ १६४ ॥

अदरख के गुण—

वि०—आर्द्रक—भी सोंठ के समान गुण वाला है; इन तीनों अर्थात् सोंठ, मरिच और पिप्पली को त्रिकटु कहते हैं। यह स्थूलता, अग्निमान्द्य, श्वास, कास, श्लीपद और पीनस को नष्ट करता है ॥ १६४ ॥

वक्तव्य—आर्द्रक और सोंठ एक ही हैं केवल आर्द्र और शुष्क का भेद है। यथा—'आर्द्रकाज्जायते शुण्ठी, संस्कारेण लघीयसी।',

चविका पिप्पलीमूलं मरिचाल्पान्तरं गुणैः ॥ १६५ ॥

स०—चविका पिप्पलीमूलं मरिचात् स्तोकविशेषगुणं गुणैर्भवति। कटुरसविपाकं कफघ्नं लघूष्णवीर्यं चेत्यर्थः। गुणशब्देन रसविपाकादयोऽपि तंत्रांतराद्गृह्यन्ते न तु पारिभाषिका एव गुरुलघ्वादयो व्याप्तिन्यायात् ॥ १६५ ॥

चव्य तथा पिप्पलीमूल—

वि०—चविका (चाब) और पिप्पलीमूल—गुणों में मरिच से थोड़े भिन्न हैं। यथा—रस और विपाक में कटु, कफनाशक, लघु और उष्णवीर्य हैं ॥ १६५ ॥

---

१. उत्तम बहेड़ा तौल में एक कर्ष, हरीतकी दो कर्ष और आँवला आधा कर्ष होता है। अतः गिन कर लेने से एक हरड़, दो बहेड़ा और चार आँवला तथा तौल में प्रत्येक समान लेना चाहिए। 'पथ्याविभीतधात्रीणां फलैः स्यात्त्रिफला समैः।'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चित्रकोऽग्निसमः पाके शोफार्शःकृमिकुष्ठहा।

स०—चित्रको दहनसंज्ञकोऽग्निसमः पाकेऽत्यंतोष्ण इत्यर्थः। तथा शोफादीन् हंति।

चित्रक (चीता) के गुण—

वि०—चित्रक—पाचन कार्य में अग्नि के समान है; शोफ, अर्श, कृमि और कुष्ठ नाशक है।

पञ्चकोलकमेतच्च मरिचेन विना स्मृतम् ॥ १६६ ॥
गुल्मप्लीहोदरानाहशूलघ्नं दीपनं परम्।

स०—एतच्च पूर्वोक्तं मरिचरहितं पिप्पलीपिप्पलीमूलचव्यचित्रकशुंठ्याख्यं पंचकोलसंज्ञं स्मृतं वैद्यके तंत्रे। तथा गुल्मादिघ्नमतिदीपनं च ॥ १६६ ॥

पञ्चकोल के गुण—

वि०—मरिच को छोड़कर पूर्वोक्त पाँचों अर्थात् पिप्पली, पिप्पलीमूल, चव्य, चित्रक और सोंठ इनको पंचकोल कहते हैं; यह पञ्चकोल-गुल्म, प्लीहा, उदर, आनाह और शूल नाशक और अतिशय अग्निदीपक है। (मरिच मिलाने पर 'षडूषण' कहलाता है।) ॥ १६६ ॥

बिल्वकाश्मर्यतर्कारीपाटलाटिण्टुकैर्महत् ॥ १६७ ॥
जयेत्कषायतिक्तोष्णं पञ्चमूलं कफानिलौ।

स०—बिल्वादीनामुपलक्षणे तृतीया। बिल्वादिभिरुपलक्षितं महत्पंचमूलं कफानिलौ जयेत्। तच्च कषायतिक्तरसमुष्णवीर्यं च। बिल्वं श्रीफलम्। काश्मर्यो गंभारी। तर्कार्यरणिका। पाटला ताम्रपुष्पा। टुंटुकः स्योनाकः। महद्गुरु बृहदनल्पमिति पर्यायाः ॥ १६७ ॥

बृहत्पंचमूल के गुण—

वि०—बिल्व, गम्भारी, अरणी, पाटला और श्योनाक इन पांच से बृहत्पंचमूल कहलाता है; यह महापञ्चमूल—कषाय, तिक्तरस, उष्णवीर्य, कफ और वायु नाशक है ॥१६७॥

ह्रस्वं बृहत्यंशुमतीद्वयगोक्षुरकैः स्मृतम् ॥ १६८ ॥
स्वादुपाकरसं नातिशीतोष्णं सर्वदोषजित्।

स०—पंचमूलमिति वर्तते। ह्रस्वं कनीयो लघ्वल्पमिति पर्यायाः। बृहतीद्वयं क्षुद्रबृहती महाबृहती च। अंशुमतीद्वयं शालिपर्णी पृश्निपर्णी च। गोक्षुरको भक्षकंटकः। इदं ह्रस्वं पंचमूलं स्वादुपाकरसं नातिशीतं नात्युष्णं सर्वदोषजिच्च ॥१६८॥

लघु पंचमूल के गुण—

वि०—बृहतीद्वय—छोटी कटेरी, बड़ी कटेरी, अंशुमतीद्वय—शालपर्णी और पृश्निपर्णी; तथा गोखरू इन पांच से ह्रस्वपञ्चमूल कहलाता है, यह विपाक एवं रस में मधुर, न बहुत शीतल और न बहुत उष्ण (अनुष्णशीत); और सर्व दोषनाशक है ॥ १६८ ॥

बलापुनर्नवैरण्डशूर्पपर्णीद्वयेन तु ॥१६९॥
मध्यमं कफवातघ्नं नातिपित्तकरं सरम्।

स०—एतैः पंचभिर्मध्यमं पंचमूलम्। एतच्च कफवातघ्नं नातिपित्तकरं सरं च ॥ १६९ ॥

मध्यम (तृतीय) पंचमूल—

वि०—मध्यम पञ्चमूल—बला, पुनर्नवा, एरण्ड, दोनों शूर्पपर्णी (माषपर्णी और मुद्गपर्णी)-ये पांच मध्यम पञ्चमूल है। यह कफवातनाशक, थोड़ा पित्तकारक और रेचक है ॥ १६९ ॥

अधुना चतुर्थं पंचमूलमाह—

अभीरुवीराजीवन्तीजीवकर्षभकैः स्मृतम् ॥१७०॥
जीवनाख्यं तु चक्षुष्यं वृष्यं पित्तानिलापहम्।

स०—अभीरुवीरादिभिः पंचभिर्जीवनाख्यं पंचमूलं चक्षुष्यादिगुणयुक्तम् ॥ १७० ॥

जीवन (चतुर्थ) पंचमूल—

वि०—जीवन पञ्चमूल—अभीरु (शतावरी), काकोली, जीवन्ती, जीवक और ऋषभक इन पांच को जीवन पञ्चमूल कहते हैं; यह चक्षुष्य, वृष्य और पित्त एवं वायुनाशक है ॥ १७० ॥

पंचमं पंचमूलमाह—

तृणाख्यं पित्तजिद्दर्भकाशेक्षुशरशालिभिः ॥ १७१ ॥

स०—तृणसंज्ञं पंचमूलं दर्भकाशेक्षुशरशालिभिः। तच्च पित्तजित्। संग्रहे त्वधिकमुक्तम्। यथा। सुवर्णं बृंहणं स्निग्धं मधुरं रसपाकयोः। विषदोषहरं शीतं सकषायं रसायनम्। रूप्यं स्निग्धं कषायाम्लं विपाके मधुरं सरम्। वयसः स्थापनं शीतं लेखनं वातपित्तजित्। ताम्रं सतिक्तमधुरं कषायं लेखनं लघु। कटुपाकरसं शीतं रोपणं कफपित्तजित्। कांस्यं कषायानुरसं विशदं लेखनं सरम्। दृष्टिप्रसादनं रूक्षं तिक्तं पित्तकफापहम्। सतिक्तलवणं भेदि पांडुत्वकृमिवातनुत्। लेखनं पित्तलं किंचित् त्रपुसीसं च तद्गुणम्। चक्षुष्यं कृष्णलोहं तु कषायं स्वादु तिक्तकम्। लेखनं वातलं शीतं कृमिकुष्ठकफप्रणुत्। गात्रशैथिल्यपालित्यपांडुघ्नं शोषशोफजित्। तद्वत्तीक्ष्णं विशेषेण तद्विकाशि सुदुर्जरम्। पद्मरागमहानीलपुष्परागविदूरकाः। मुक्ताविद्रुमवज्रेंद्रवैदूर्यस्फटिकादिकम्। मणिरत्नं सरं शीतं कषायं स्वादु लेखनम्। चक्षुष्यं धारयेत्पाणौ पाप्माऽलक्ष्मीविषापहम्। सक्षारं उष्णवीर्यश्च काचो दृष्टिकृदंजनात्। शंखोदधिमलौ शीतौ कषायावतिलेखनौ। तुत्थकं कटुकं क्षारं कषायं विशदं लघु। लेखनं भेदि चक्षुष्यं कण्डूकृमिविषापहम्। विशदो गैरिकः स्निग्धः कषायमधुरो हिमः। कफघ्नी तिक्तकटुका मनोह्वा लेखनी सरा। स्निग्धं कषायं कटुकं हरितालं विषप्रणुत्। कषायमधुरं शीतं लेखनं स्निग्धमंजनम्। रक्तपित्तविषच्छर्दिहिध्माघ्नं दृक्प्रसादनम्। स्रोतोऽजनं वरं तत्र ततः सौवीरकांजनम्। कफघ्नं तिक्तकटुकं छेदि सोष्णं रसांजनम्। सर्वदोषप्रशमनं कासमोहक्षयापहम्। कफघ्नमुष्णकटुकं शिलाजतु रसायनम्। तिक्तं च छेदनं योगवाहित्वात्सर्वरोगजित्। कषाया मधुरा रूक्षा कफघ्नी वंश-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रोचना। तुगाक्षीरी क्षयश्वासकासघ्नी मधुरा हिमा। कारवी कुंचिकाऽजाजी कबरी धान्यतुंबरु। अन्नगंधहरं रुच्यं दीपनं कफवातजित्। बाष्पिका कटुतीक्ष्णोष्णा कृमिश्लेष्महरा परम्। तद्वच्च राजिका विघ्नसाधनी दीपनी परम्। शूलाटोपहरो रुच्यो दीप्यकः कोष्ठशूलजित्। अहृद्याः सर्षपाः स्निग्धा बाष्पिकावत्प्रकीर्तिताः। शताह्वाकुष्ठतगरसुरदारुहरेणवः। एलैलवालुसरलत्वग्व्याघ्रनखचोरकाः लघूष्णाः कटुकाः पाके कफवातनिबर्हणाः। सैर्यकस्तिक्तमधुरः स्निग्धोष्णः कफवातजित्। बस्तिमूत्रविबंधघ्नो वृष्यो गोक्षुरको हिमः। पाचनं कफपित्तघ्नं तिक्तं शीतं विषाह्वयम्। कफघ्नं तिक्तकटुकं मुस्तं संग्राहि पाचनम्। तिक्ताऽमृता त्रिदोषघ्नी ग्राहिण्युष्णा रसायनी। दीपनी ज्वरहृद्दाहकामलावातरक्तनुत्। तिक्तशीतौ ज्वरहरौ लघू भूनिंबपर्पटौ। निंबस्तिक्तो हिमः कुष्ठकृमिपित्तकफापहः। महानिंबः परं ग्राही कषायो रूक्षशीतलः। गुग्गुलुः पिच्छिलः स्पर्शे बिशदोऽभ्यवहारतः। सस्वादुः सकटुस्तिक्तः सकषायो रसायनः। व्रण्यः स्वर्यः कटुः पाके रूक्षः सूक्ष्मोऽग्निदीपनः। क्लेदमेदोऽनिलश्लेष्मगंडमेहापचीकृमीन्। पिटिकाग्रंथिशोफांश्च हंत्युष्णः स्रंसनो लघुः। शंखपुष्पी सरा तिक्ता मेध्या कृमिविषापहा। कटुतिक्तोष्णमधुरा स्निग्धा स्वादुकफापहा। पित्तास्रविषतृड्दाहकृमिघ्नं गुरु रूक्षणम्। सर्वं सतिक्तं मधुरं चंदनं शिशिरं परम्। लघु रक्तं तथोशीरं वातलं पाचनं च तत्। ज्वरातिसारवमथुरक्तपित्तकफापहम्। मधुकं रक्तपित्तघ्नं व्रणशोधनरोपणम्। गुरु स्वादु हिमं वृष्यं चक्षुष्यं स्वरवर्णकृत्। कटुतिक्ते निशे कुष्ठमेहपित्तकफापहे। प्रलेपाज्जयतः कंडूं शोफं दुष्टव्रणं विषम्। प्रपौंडरीकं चक्षुष्यं शिशिरं व्रणरोपणम्। कषायतिक्तमधुरं रक्तपित्तप्रसादनम्। बलात्रयं स्वादु वृष्यं स्निग्धं शीतं बलप्रदम्। तत्र नागबला बलया क्षतक्षीणहिता गुरुः। तांबूलं कटु सक्षारं रुच्यमुष्णं कफप्रणुत्। भेदि संमोहकृत्पूगं कषायं स्वादु रोचनम्। जातिपत्री कटुफलं कंकोलकलवंगकम्। लघु तृष्णापहं हृद्यं वक्त्रदौर्गंध्यनाशनम्। सस्वादुतिक्तस्तृष्णाघ्नः कर्पूरश्छेदनो हिमः। लताकस्तूरिका तद्वन्मुखशोषहरा परम्। कषायमधुरं शीतं पद्मं पित्तकफास्रजित्। तद्वद्बकुलपुन्नागकुमुदोत्पलपाटलम्। सचंपकं ततो न्यूनं गुणैः कोरंटकिंशुकम्। मालतीमल्लिकापुष्पं तिक्तं जयति मारुतम्। विषपित्तकफान्नागं सिंदुवारं च तद्गुणम्। कफघ्नं कैतकं तिक्तं शैरीषं विषहारि च। वातलं पुष्पमागस्त्यं कषायं कफपित्तजित्। बंधूकं श्लेष्मलं ग्राहि तद्वदेव च यूथिका। कफघ्नमुष्णवीर्यं च कुंकुमं व्रणशोधनम्। अवल्गुजैडगजजं बीजं वातकफप्रणुत्। आस्या वर्णश्लेष्ममेदः सौकुमार्यकृदन्यथा। अतोऽध्वाऽग्निबलायूंषि कुर्याच्चंक्रमणं सुखम्। मारुतस्यानुलोम्यं च खुडस्तंभश्रमापहम्। अन्वर्थसंज्ञं पादत्रं बलकृच्छुक्रलं तथा। वर्ण्यं नेत्रहितं छत्रं वातवर्षातपापहम्। प्रवातो रौक्ष्यवैवर्ण्यस्तंभकृद्दाहतृड्भ्रमान्। श्रमाग्निमूर्च्छांश्च जयेदप्रवातमतोऽन्यथा। प्राग्वायुरुष्णोऽभिष्यंदी त्वग्दोषाऽर्शोविषक्रिमीन्। सन्निपातज्वरश्वासमामवायुं च कोपयेत्। याम्योऽसृग्वातकफकृच्छीतः स्वादुः कषायकः। कषायः पश्चिमो रूक्षो लघुर्नातिविदह्यते। वातकृत्कफपित्तघ्नो मूर्च्छादाहश्रमापहः। स्निग्धः शीतो लघुः सात्म्य उत्तरः पटुसोऽनिलः। ऐशानः कटुरूक्षोष्ण आग्नेयश्चैव मारुतः। अस्लो विदाही नैरृत्यो वायव्यस्तिक्त उच्यते। आतपो भ्रमतृट्स्वेददाहमूर्च्छाविवर्णताः। कुर्यात्पित्तास्रवह्नींश्च छाया त्वेतान्व्यपोहतीति ॥ १७१ ॥

तृण (पंचम) पञ्चमूल—

वि०—तृण पञ्चमूल—दर्भ, काश, ईख, शर और शालि इनके मूल को तृण पञ्चमूल कहते हैं; यह पित्तनाशक है ॥ १७१ ॥

संप्रति सुखग्रहणधारणार्थं संग्रहश्लोकमाह—

शूकशिम्बीजपक्वान्नमांसशाककलौषधैः ।
वर्गितैरन्नलेशोऽयमुक्तो नित्योपयोगिकः ॥ १७२ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थानेऽन्नस्वरूपविज्ञानीयो नाम षष्ठोऽध्यायः ॥ ६ ॥

स०—शूकधान्यादिभिर्वर्गितैर्वर्गीकृतैरयमन्नस्य लेश एकदेशः स्तोकमात्रो निर्दिष्टः। किंभूतः। नित्योपयोगो विद्यते यस्य स नित्योपयोगिकः। सदोपयोगवानित्यर्थः। मात्रायोगक्रियादेशकालादिविशेषाच्चोक्तानामपि द्रव्याणामन्यथात्वं दृष्टम्। यथा। तिलशो निषेव्यमाणं विषमपि संजायतेऽमृतसमानम्। भल्लातकः सह तिलैस्तत्कार्यपि कुष्ठमुग्रहंति। संस्कारेण लघुभ्यः सक्तुभ्यः सिद्धपिंडिका गुरवः। मरुवासिष्वतिसात्म्यं दधिपीलुशमीकरीराणाम्। घृतदुग्धं हेमन्ते मंदाग्निकफोत्तरं भवेत्प्रायः। दधिदुग्धं वातघ्नं तदजातं वातकृद्भवति। रेचनमपि च क्षीरं गव्यं संग्राहि कस्यचिद्भवति। तस्मादेवमादि स्वबुद्ध्यैवाऽभ्यूह्यम्। शास्त्रकृता तु ग्रंथगौरवभयात्स्पष्टं कृत्वा तन्नोक्तम्। प्रदेशांतरेषु युक्त्यैव प्रतिपादितमिति ॥ १७२ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायामन्नस्वरूपादिविज्ञानीयोऽध्यायः षष्ठः ॥

षष्ठ अध्याय का उपसंहार—

वि०—उपसंहार का श्लोक—सदा उपयोग में आने वाले आहार द्रव्यों का एक भाग शूकवर्ग, शिम्बीवर्ग, पक्वान्नवर्ग, मांस वर्ग, शाकवर्ग और औषधवर्ग-रूप में संक्षेप से कह दिया है ॥[1] १७२ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का अन्नस्वरूप विज्ञानीय नामक छठा अध्याय समाप्त हुआ।

१. अष्टाङ्गसंग्रह सूत्रस्थान अध्याय २२ में सुवर्ण आदि धातु उपधातु, रत्नोपरत्न तथा अनेक खनिज, औद्भिज्ज एवं जान्तव द्रव्यों के गुण धर्म का विवेचन किया है; उसे वहीं देखना चाहिए।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तमोऽध्यायः

अन्नपानस्वरूपं शरीरसंधारणार्थं प्रागुक्तम्। पथ्यमपि चान्नपानं विषाद्युपहतं रोगाय मृत्यवे वा संपद्यते। अतस्तद्रक्षणाध्यायोऽयमारभ्यते—

अथातोऽन्नरक्षाऽध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—अन्नस्य रक्षाऽन्नरक्षा सोपदेश्या यत्राध्याये सोऽप्युपचारादन्नरक्षेत्युच्यते। यथा। शिशुपालवधः काव्यमिति। शेषं व्याख्यानमत्र पूर्ववत्कार्यम्।

वि०—अब इसके आगे अन्नरक्षा अध्याय का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था[1]।

राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत्।
सर्वदा स भवत्येवं सर्वत्र प्रतिजागृतिः॥ १॥

स०—राजा नृपः प्राणाचार्यं वैद्यं राजगृहासन्ने निवेशयेदावासयेत्। एवं सति यो गुणः स्यात्तमाह। सर्वदेत्यादि। सर्वदा सर्वकालं रात्रौ दिवा वा नृपभवनसमीपस्थितः स वैद्यः सर्वत्रान्नपानशयनमाल्यादौ प्रतिजागृविर्दत्तावधानो भवति॥ १॥

वैद्य का स्थान—

वि०—राजा वैद्य को राजगृह के समीप में ही निवास देवे। राजगृह के पास रहने से वैद्य सदा सब अवस्थाओं में जागरुक (सावधान-चौकन्ना) रहता है॥ १॥

ननु किमेवं क्रियत इत्याह—

अन्नपानं विषाद्रक्षेद्विशेषेण महीपतेः।
योगक्षेमौ तदायत्तौ धर्माद्या यन्निबन्धनाः॥ २॥

स०—महीपतेः संबंध्यन्नपानं विषाद्विषसंस्पर्शाद्विशेषेणातिशयेन रक्षेत्। अन्नपानमित्युपलक्षणम्। शयनवस्त्रगंधरत्नमाल्यादीनामपि परिरक्ष्यत्वात्। किमिति नृपान्नपानादि विशेषेण रक्षेदित्याह। योगेत्यादि। योगोऽन्नवस्त्रादिभिः संबंधः। क्षेमस्तेषामन्नादीनां चौराद्युपद्रवरक्षणम्। द्वावप्येतौ तदायत्तौ नृपायत्तौ स्याताम्। क्षेमशब्दोऽर्घर्चादिः। धर्माद्या इति। धर्मार्थकाममोक्षा यन्निबंधना योगक्षेमनिबंधनाः॥ २॥

विष से राजा के अन्न-पानादि की रक्षा—

वि०—विषरक्षा—विशेषतः राजा के खान-पान की विष से रक्षा करनी चाहिये क्योंकि योग और क्षेम राजा के अधीन हैं, तथा धर्म, अर्थ, काम और मोक्ष-ये योग और क्षेम के साथ जुड़े हुये हैं; (इसलिये राजा की विशेष रूप में रक्षा करनी चाहिये।)॥ २॥

वक्तव्य—अलब्ध वस्तु के लाभ का नाम योग और लब्ध वस्तु की रक्षा करना क्षेम है।

संप्रति विषदुष्टस्य भक्तस्य लक्षणमाह—

ओदनो विषवान् सान्द्रो यात्यविस्राव्यतामिव।
चिरेण पच्यते, पक्वो भवेत्पर्युषितोपमः॥ ३॥
मयूरकण्ठतुल्योष्मा मोहमूर्च्छाप्रसेककृत्।
हीयते वर्णगन्धाद्यैः क्लिद्यते चन्द्रिकाचितः॥४॥

स०—विषवानोदनः सांद्रो विलेप्याकारः न च विस्रावयितुं शक्यते यतः पृथक्सिक्थो न भवेत्। तथा चिरेण पच्यते बहुना कालेन पाकं याति। स च पक्वो निष्पन्नपाकः सद्य एव पर्युषितोपमो दिवसांतरितोऽतिक्रांताहोरात्रः। मयूरकंठेन तुल्य ऊष्मा बाष्पराजिर्नीलवर्णः यस्य स तथोक्तः। पर्युषितोपम इति। यथा पर्युषितं भक्तं निरूष्म स्तब्धं च भवति। तथा विषदूषितं सद्योऽवतारितमपि तादृशमेव भवति। स चोपयुक्तो मोहमूर्छाप्रसेकान्करोति। मोहो वैचित्यम्। मूर्छा संज्ञाभ्रंशः। प्रसेकः श्लेष्मनिष्ठीवनम्। हीयते वर्णगंधाद्यैरित्यादिशब्देन रसस्पर्शादिपरिग्रहः। प्रक्लिन्नो भवति। सलिलमध्यक्षिप्ततैलबिंदु सदृशैश्चंद्रकैश्च पूर्णो भवति। इति चक्षुरादिभिः परीक्षा॥ ३-४॥

विषाक्त ओदन—

वि०—विषयुक्त भात—अधिक गाढ़ा (विलेपी सदृश) होता है; द्रव होने पर भी छाना नहीं जा सकता, देर में पकता है; पकने पर बासी भात की तरह हो जाता है। इस भात की भाप मोर के गले के समान नीली होती है। इस अन्न के खाने से मनुष्य को मोह, मूर्च्छा, मुख से लालास्राव होता है; यह भात वर्ण एवं गन्ध आदि में हीन हो जाता है, गल जाता है, इसमें चन्द्रिका (पानी में पड़े तैलबिन्दु के समान कान्ति) दीखती है॥ ३-४॥

व्यंजनानां परीक्षामाह—

व्यञ्जनान्याशु शुष्यन्ति ध्यामक्काथानि तत्र च।
हीनाऽतिरिक्ता विकृता छाया दृश्येत नैव वा॥ ५॥
फेनोर्ध्वराजीसीमन्ततन्तुबुद्बुदसम्भवः।
विच्छिन्नविरसा रागाः खाण्डवाः शाकमामिषम्॥ ६॥

स०—व्यंजनानि सूपादीनि दधितक्रदाडिमादिसंस्कृतान्याशु शीघ्रं शुष्काणि भवंति। क्काथश्च तेषां ध्यामो मलिनो भवति। तत्र चेति। व्यंजनवस्तु क्काथेषु हीनाधिका शिरोविरहादिलक्षणविकारोपेता चात्मीया छाया प्रतिबिंबं दृश्यते। नैव वा कीदृश्यपि छाया न दृश्यते। न चेदमरिष्टं सनिमित्तत्वात्। फेनादीनां संभवः। तत्रेति प्रकृतम्। व्यंजनोपलक्षितेषु सर्वद्रवेष्वेव। विशेषेण पुनर्लवणोल्वणद्रवे। फेनमाला। ऊर्ध्वराजीसंभवं तु रसकादिषु स्वयं दर्शयिष्यति।

१. शरीर के धारण और पोषण के लिए हित अन्न और पान आवश्यक होता है। उसके हिताहित-ज्ञान के लिए द्रव्यों के गुण धर्म पहिले कहे जा चुके हैं। पथ्य या हित आहार भी विषादि अनिष्ट पदार्थों से दूषित होकर रोग या मृत्यु का कारण हो सकता है। अतः अन्न (पान भी अन्न में ही समाविष्ट है) की रक्षा के उपायों का वर्णन इस अध्याय में करेंगे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विच्छिन्नविरसा रागा इति। विच्छिन्नो रक्तवर्णः क्वचित्क्वचित्प्रदेशे द्राक्षापानादौ रागो भवति। विरसं विगतरसं तद्भवति। यथा राग एवं खांडवोऽपि। शाकमामिषं च छिन्नं स्थाने स्थाने त्रुटद्विरसं च ॥ ५-६ ॥

विषाक्त व्यञ्जन—

वि०— व्यञ्जन परीक्षा—विष वाले व्यञ्जन (शाक-भाजी आदि) शीघ्र सूख जाते हैं, जिसमें पकाया जाता है, वह पानी काला हो जाता है। इस पानी में प्रतिबिम्ब, अधूरा, अधिक या विकृत दिखाई देता है, अथवा बिल्कुल दिखाई नहीं देता। ऐसे शाक आदि में झाग, ऊपर में रेखायें, सीमन्त (विभाग), तन्तु, तथा बलबुले उत्पन्न हो जाते हैं, राग (रायता), खाण्डव, मांस और शाक फट जाते हैं और इनका रस विकृत हो जाता है ॥ ५-६ ॥

यत्र द्रवे यादृशी राजी संभवति तां विशेषतो दर्शयन्नाह—

नीला राजी रसे, ताम्रा क्षीरे, दधनि दृश्यते।
श्यावाऽऽपीतासिता तक्रे, घृते पानीयसन्निभा ॥ ७ ॥
मस्तुनि स्यात्कपोताभा, राजी कृष्णा तुषोदके।
काली मद्याम्भसोः, क्षौद्रे हरित्तैलेऽरुणोपमा ॥ ८ ॥
पाकः फलानामामानां पक्वानां परिकोथनम्।
द्रव्याणामार्द्रशुष्काणां स्यातां म्लानिविवर्णते ॥ ९ ॥
मृदूनां कठिनानां च भवेत्स्पर्शविपर्ययः।
माल्यस्य स्फुटिताग्रत्वं म्लानिर्गन्धान्तरोद्भवः ॥१०॥
श्याममण्डलता वस्त्रे, शदनं तन्तुपक्ष्मणाम्।
धातुमौक्तिककाष्ठाश्मरत्नादिषु मलाक्तता ॥११॥
स्नेहस्पर्शप्रभाहानिः, सप्रभत्वं तु मृन्मये।

स०—मांसरसे विषदूषिते नीलानीलवर्तिकाकारा राजी दृश्यत इति प्रकृतेन संबंधः। एवं चाग्रेऽपि राजी दृश्यत इति योज्यम्। क्षीरमध्ये ताम्रा ताम्रवर्णा। दधनि दध्नि श्यावा दृश्यते लक्ष्यते चक्षुषा। राजीति सर्वत्र प्रकृतम्। पीताऽसिता तक्र इत्यादि। तक्रस्य मध्ये पीताऽसिता आनीलपीता राजी दृश्यत इति प्रकृतम्। घृते सलिलनिभा। काली कृष्णा मद्यस्य तोयस्य च विषदूषितस्य। क्षौद्रे हरिदिति। माक्षिकमध्ये हरिता राजी दृश्यते। तैलेऽरुणोपमेषल्लोहिताकारा। उदाहरणमात्रं त्वेतत्। मस्तुनः कपोताभा। धान्याम्लस्य कृष्णा। द्रवौषधस्य कपिला। तथा। आमानां फलानां पाकः। पक्वानां परिकोथनं शाटितत्वं भवति। द्रव्याणामार्द्रशुष्काणां स्यातां म्लानि विवर्णते। यथासंख्यं योज्यम्। आर्द्राणां म्लानिः। शुष्काणां वैवर्ण्यं श्यावत्वादिलक्षणम्। मृदूनां कठिनत्वं कठिनानां मृदुत्वम्। अयं स्पर्शविपर्ययः। माल्यस्य पुष्पादेः स्फुटितं विशीर्णमग्रं प्रान्तो यस्य तत्स्फुटिताग्रं तद्भावस्तत्त्वम्। म्लान्युद्भवो म्लानता। गंधान्तरोद्भवः स्वगंधनाशः अन्यस्य संभवश्च। वसागंधस्य च तैले संभवः। श्याममंडलता वस्त्रे। वस्त्र आस्तरणप्रावरणादिरूपे श्यामानि मलिनानि मंडलानि यस्य वस्त्रस्य तद्भावस्तत्त्वम्‌ शदनं श्यातः पातः। केषाम्। तंतूनां रोम्णां पक्ष्मणां च पार्श्ववर्तिनां वस्त्रसंबंधिनामेव। धातुर्लौहादिः। मौक्तिकं मुक्ता। काष्ठं दारु। अश्मा पाषाणः। रत्नानि वज्रमरकतादीनि। आदिशब्देन शंखशुक्त्यादिपरिग्रहः। तेषु धात्वादिषु मलाक्तता पंकोपदिग्धता। स्नेहहानिस्तेषामेव धात्वादीनां स्निग्धत्वव्यपगम इत्यर्थः। एवं स्पर्शप्रभाहानी। मृन्मये तु भांडे विषदूषिते निष्प्रभे सप्रभत्वम् ॥ ७-११ ॥

विषाक्त मांसरस, दूध, दही आदि—

वि०—मांसरस में—विष के कारण नीली रेखा आती है, दूध में ताम्रवर्ण, दही में श्याव (काले) रङ्ग की, तक्र में पीली-पीली रेखा, घृत में पानी के समान, मस्तु में कबूतर के रङ्ग की, तुषोदक (कांजी), मद्य और जल में काली रेखा, मधु में हरे रङ्ग की और तैल में गुलाबी रङ्ग की रेखा हो जाती है। विष के कारण कच्चे फल पक जाते हैं और पके हुए फल सड़ने लगते हैं। गीले द्रव्य विष के कारण मुरझा जाते हैं और सूखे द्रव्य विवर्ण हो जाते हैं। विष के कारण मृदु द्रव्य कठोर हो जाते हैं और कठोर द्रव्य मृदु बन जाते हैं; माला के फूलों के अग्रभाग फट जाते हैं, माला मुरझा जाती है, और अन्य गन्ध उत्पन्न हो जाती है। वस्त्र में काले धब्बे हो जाते हैं, वस्त्र के रेशे, और बाल गिरने लगते हैं। स्वर्ण आदि धातु तथा मोती, लकड़ी, पत्थर, रत्न आदि विष के कारण मैले हो जाते हैं; इनकी स्निग्धता, शीतादि स्पर्श और तेजस्विता नष्ट हो जाती है, मिट्टी की वस्तु में विष के कारण तेज न होने पर तेज (चमक) आ जाता है ॥ ७-११ ॥

इदानीं यो विषं ददाति तस्य लक्षणमाह—

विषदः श्यावशुष्कास्यो विलक्षो वीक्षते दिशः ॥१२॥
स्वेदवेपथुमांस्त्रस्तो भीतः स्खलति जृम्भते।

स०—विषं ददातीति विषदो नरः श्यावं शुष्कमास्यं मुखं यस्याऽसौ श्यावशुष्कास्यः श्यामशुष्कवदनः। किं करोति। विलक्षो वीक्षते दिशः। दिश इति समंतादित्यर्थः। विलक्ष इति लज्जावान्। वीक्षतेऽवलोकयति। किंच सदोषशंकया स्वेदवान्वेपथुमान्। त्रस्तः शरीरेण जातकंपत्वात्। भीतश्चित्तेन सोद्वेगतयोपलक्ष्यमाणत्वात्। स्तंभकुड्यादिभिरात्मानमंतर्धापयितुमिच्छन्नितस्ततो गच्छंश्च स्खलितगतिर्भवति तत आह। स्खलति। पुनःपुनश्च जृंभां करोति तेनाह। जृंभते। उपलक्षणं चेदं तत्तत्कालभाविनीनां क्रियाणाम्। तद्यथा अस्थानहासी। पृष्टोऽसंबद्धमुत्तरं ददाति नैव वा वदति। विवक्षुर्मुहुरंगुलीः स्फोटयति। शिरः कंडूयते। ओष्ठौ लेढि। भुवं विलिखति। क्रियासु त्वरते। विपरीतमाचरति। स्वभूमौ च नावतिष्ठते ॥ १२ ॥

विष देनेवाले के लक्षण—

वि०—विष देने वाले के लक्षण—विष देने वाले का मुख काला पड़ जाता है, और सूख जाता है। बिना उद्देश्य के

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इधर-उधर दिशाओं में देखता है, उसको पसीना आता है, कंपकपी छूटती है, डरा हुआ सा, घबराया हुआ होता है, चलते हुए या उत्तर देने में भूल करता है—फिसलता है और जम्भाइयाँ भरता है ॥ १२ ॥

प्राप्यान्नं सविषं त्वग्निरेकावर्तः स्फुटत्यति ॥१३॥
शिखिकण्ठाभधूमार्चिरनर्चिर्वोग्रगन्धवान् ।

स०—सविषमन्नं प्राप्याऽग्निः स्फुटत्यति चटचटायतेऽतिशयेनेत्यर्थः। एकावर्त इति। एक एवावर्तो यस्य। संहतसर्वज्वालत्वादसावेकावर्तः। शिखिकण्ठाभधूमार्चिः शिखी मयूरस्तस्य कण्ठ इन्द्रायुधवदनेकवर्णस्तस्येवाभा ययोर्धूमार्चिषोस्ते शिखिकण्ठाभे तादृशे धूमार्चिषी यस्याग्नेरसौ शिखिकण्ठाभधूमार्चिरिंद्रायुधवदनेकवर्णधूमज्वाल इति यावत्। अनर्चिर्वाऽज्वाल इति वा। उग्रगन्धवानिति। कुणपगन्धवान्। निदर्शनं चेदम्। धूमोऽप्यस्य प्रसेकरोमहर्षशिरोवेदनापीनसदृष्ट्याकुलता अप्युत्पादयति ॥ १३ ॥

अग्नि में विषाक्त अन्न की परीक्षा—

वि०—विषाक्त अन्न की अग्नि से परीक्षा—विष वाले अन्न से अग्नि एक ही आवर्त (घेरे के रूप में एक ही लौ) में होती है, अतिशय चटचटाती है; धूम और ज्वाला मोर के कण्ठ के समान होती है अथवा इसमें ज्वाला उत्पन्न ही नहीं होती और तेज गन्ध होती है ॥ १३ ॥

वक्तव्य—जिस प्रकार आग में गरम करने से धातुओं की परीक्षा होती है, ताम्र की एक तरह की ज्वाला होती है, स्वर्ण की दूसरी तरह उसी प्रकार विष की भिन्नता से ज्वाला में भी भेद हो जाता है। परन्तु कई बार नमक या स्नेह के कारण भी अग्नि में उपर्युक्त रङ्ग दीखते हैं; इसलिये आगे पक्षि-मृगों से परीक्षा कही है।

स्नेहलवणयोगादप्यग्निरेवं स्यादतः पक्षिमृगैरपि परीक्षाप्रकारांतरं दर्शयन्नाह—

म्रियन्ते मक्षिकाः प्राश्य काकः क्षामस्वरो भवेत् ॥१४॥
उत्क्रोशन्ति च दृष्ट्वैतच्छुकदात्यूहसारिकाः ।
हंसः प्रस्खलति, ग्लानिर्जीवञ्जीवस्य जायते ॥१५॥
चकोरस्याऽक्षिवैराग्यं, क्रौञ्चस्य स्यान्मदोदयः
कपोतपरभृद्दक्षचक्रवाका जहत्यसून् ॥१६॥
उद्वेगं याति मार्जारः, शकृन्मुञ्चति वानरः ।
हृष्येन्मयूरस्तद्दृष्ट्या मन्दतेजो भवेद्विषम् ॥१७॥
इत्यन्नं विषवज्ज्ञात्वा त्यजेदेवं प्रयत्नतः ।
यथा तेन विपद्येरन्नपि न क्षुद्रजन्तवः ॥१८॥

स०—मक्षिकाः सविषेऽन्ने न निलीयंते। निलीनास्तु सद्यो विपद्यंते। विषदुष्टाहारात्तु काकः क्षामस्वरो भवेत्। उत्क्रोशंत्युच्चैर्विक्रोशंति दर्शनादेव शुकदात्यूहसारिकाः। विषदर्शनमात्रादेव च हंसगतिः स्खलति। ग्लानिर्जीवंजीवस्य जायते। उपलक्षणं चेदम्। मरणमपि कस्यचिन्न ग्लानिरेव। जीवंजीवकस्य। चकोरस्याऽक्षिविरक्तता। दृष्ट्वैतदिति सर्वत्र योजनीयम्। क्रौंचस्य स्यान्मदोदयो मदोत्पत्तिः। कपोतपरभृद्दक्षचक्रवाकास्त्यजंत्यसून् प्राणान्विजहति अत्यर्थं मरणदुःखाभ्याहताः। उद्विजतेऽत्यर्थं मार्जारः। वानरस्तु शकृत् पुरीषं मुंचति उपलक्षणं चेदम्। पृष्ठतोमुखो रोदिति च। तथा हृष्येन्मयूरस्तद्दृष्ट्वा। तदिति सविषान्नपरामर्शः। दृष्ट्वेत्यनुवर्तमानेऽपि पुनर्दृष्ट्वेति वचनं सर्वत्र मध्ये संप्रत्ययार्थमाद्यंताभ्यां गृहीतत्वात्। विषं चास्य दर्शनादेव मंदतेजस्कं भवति। एवं पूर्वोक्ताभिः परीक्षाभिरन्नं भक्तादि विषवद्विषसंसृष्टं ज्ञात्वा त्यजेदेतत्। कथम्। प्रयत्नतः प्रयत्नेन। तमेव प्रयत्नं दर्शयन्नाह। यथा येन प्रकारेण त्यज्यमानेन क्षुद्रजंतवो मक्षिकादयोऽपि तेन विषेण न विपद्येरन् न नश्येयुस्तथा त्यजेत्। क्षुद्रजंतवोऽपि किं पुनर्महांत इत्यपिशब्दार्थः ॥ १४–१८ ॥

विषाक्त अन्न की पशु-पक्षियों द्वारा परीक्षा—

वि०—विषैले अन्न को खाकर मक्खियाँ मर जाती हैं; कौवे का स्वर क्षीण हो जाता है, तोता, दात्यूह (जलकाक) और मैना विषैले अन्न को देखकर जोर से बोलती हैं। हंस लड़खड़ाने लगता है; जीवञ्जीव (चकोर भेद) को ग्लानि होती है; चकोर की आँख श्वेत पड़ जाती है; क्रौंच में मत्तता आ जाती है। कबूतर, कोयल, मुर्गा और चक्रवाक मर जाते हैं। बिल्ली में उद्वेग आता है; बन्दर को मल आता है। मयूर विषैले अन्न को देख कर नाचता है, और मोर की दृष्टि से विष मन्द-तेज हो जाता है। इस प्रकार अन्न को विषयुक्त जानकर सावधानी से इस प्रकार छोड़ (फेंक) देवे जिससे उस विष के कारण छोटे जन्तु कीड़े-पतंगे आदि भी न मरें।

स्पृष्टे तु कण्डूदाहोषाज्वरार्तिस्फोटसुप्तयः ।
नखरोमच्युतिः शोफः, सेकाद्या विषनाशनाः ॥१९॥
शस्तास्तत्र प्रलेपाश्च सेव्यचन्दनपद्मकैः ।
ससोमवल्कतालीसपत्रकुष्ठामृतानतैः ॥२०॥

स०—सविषेऽन्ने मुखहस्तादिभिस्तु स्पृष्टे सति कंड्वादयः शोफांताः स्युः। ऊषा प्रादेशिको दाहः। सर्वदाहस्तु दाहः। अर्तिः शूलम्। सुप्तिरंगस्याऽचैतन्यम्। नखरोमच्युतिर्नखशातो रोमशातः। ननु नखशातः केवलं वातरोगेषु पठितः। विषे च सन्निपातकोप उक्तः। तत्कथमेतदुच्यते। जात्यंतर्भूत एवायं विषनिमित्त इत्यदोषः। तत्र तेषु विषसंस्पर्शजेषु कंड्वादिरोगेषु सेकाद्याः शास्ता यतो विषनाशनाः। प्रलेपाश्च हिताः। कैरित्याह। सेव्यादिभिः ॥ १९–२० ॥

विषाक्त अन्नस्पर्श से हानि—

वि०—विषैले अन्न को छूने से—कण्डू, दाह, ऊषा (क्षार से जलने की भाँति दाह), ज्वर, पीड़ा, छाले और स्पर्शज्ञान का नाश, नख या बालों का गिरना तथा सूजन होती है। इसमें विषनाशक परिषेक, अभ्यङ्ग आदि बरते। उशीर, चन्दन, पद्माख, सफेद खैर, तालीशपत्र, कूठ, गिलोय और तगर इनका लेप करे ॥ १९–२० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लाला जिह्वोष्ठयोर्जाड्यमूष्मा चिमिचिमायनम् ।
दन्तहर्षो रसाज्ञत्वं हनुस्तम्भश्च वक्त्रगे ॥२१॥
सेव्याद्यैस्तत्र गण्डूषाः सर्वं च विषजिद्धितम् ।

स०—वक्त्रगे मुखप्राप्ते लाला भवति । जिह्वौष्ठयोर्जाड्यं भवति । ऊष्मादयश्च स्युः । रसाज्ञत्वं जिह्वा रसं न चेतयत इत्यर्थः । हनोः स्तंभश्च स्यात् । तत्र सेव्याद्यैः पूर्वोक्तैर्गंडूषा हिताः । सर्वं चान्यदपि यद्विषं जयति तद्धितम् ॥ २१ ॥

मुखस्थित विष का लक्षण—

वि०—विषैले अन्न के मुख में पहुँचने पर—लालास्राव; जिह्वा और ओठ में जड़ता, दाह, चिमचिमाहट, दन्तहर्ष, रस की अप्रतीति और हनुस्तम्भ होता है । इसमें उशीर आदि से गण्डूष और विषनाशक सब चिकित्सा उपयोगी है । (प्रतिसारण-प्रलेप आदि विषनाशक चिकित्सा करे ।) ॥ २१ ॥

आमाशयगते स्वेदमूर्च्छाऽध्मानमदभ्रमाः ॥२२॥
रोमहर्षो वमिर्दाहश्चक्षुर्हृदयरोधनम् ।
बिन्दुभिश्चाचयोऽङ्गानां, पक्वाशयगते पुनः ॥२३॥
अनेकवर्णं वमति मूत्रयत्यतिसार्यते ।
तन्द्रा कृशत्वं पाण्डुत्वमुदरं बलसंक्षयः ॥२४॥
तयोर्वान्तविरिक्तस्य हरिद्रे कटभीं गुडम् ।
सिन्दुवारितनिष्पावबाष्पिकाशतपर्विकाः ॥२५॥
तण्डुलीयकमूलानि कुक्कुटाण्डमवल्गुजम् ।
नावनाञ्जनपानेषु योजयेद्विषशान्तये ॥२६॥

स०—विषान्न आमाशयं प्राप्ते स्वेदादयः स्युः । हृदयस्य रोधनं स्तंभः । बिंदुभिर्नानावर्णैरंगानामाचयः समंताच्चयनम् । पक्वाशयगते तु विषेऽनेकवर्णं वमति । मूत्रयत्यतिसार्यते । तंद्रादयश्च भवंति । तयोरामपक्वाशयगतयोर्विषयोर्वर्तमानस्य पुंसो यथायोगं वांतविरिक्तस्य हरिद्रे कटभीत्यादिकमौषधं नावनादिषु योजयेत् । तत्र मदनफलालबुकुंभीकोशातकीफलैर्मधुयुक्तैर्निष्पावांबुयुक्तैर्वमनम् । तस्य स्नेहयित्वा विरेचनम् । पक्वाशयगते वमितस्यैव नीलिनीफलयुक्तेन घृतेन विरेचनमेव ॥ २२-२६ ॥

आमाशयस्थ विष का लक्षण—

वि०—विषैले अन्न के आमाशय में पहुँचने पर—रोगी को पसीना आता है; मूर्च्छा, अध्मान, मद, भ्रम, रोमहर्ष, वमन, दाह, आँख और हृदय की स्तब्धता, शरीर पर जलविन्दु के समान छालों का भर जाना यह सब होता है । पक्वाशय में पहुँचने पर रोगी अनेक रङ्गों का वमन करता है; बार-बार मूत्र त्याग करता है; अतीसार हो जाता है; तन्द्रा, कृशता, पाण्डुता और उदर रोग, बल का ह्रास होता है । चिकित्सा—आमाशयगत विष में वमन और पक्वाशयगत में विरेचन देवे । इसके उपरान्त, हल्दी और दारुहल्दी; कटभी, गुड़, सम्हालू, निष्पाव (बाल-सेम); हिंगुपत्री; शतपर्विका (वच), चौलाई के मूल, मुर्गी के अण्डे, बावची; इनको विष की शान्ति के लिये नस्य, अञ्जन और पिलाने में बरतना चाहिये ॥ २२-२६ ॥

विषभुक्ताय दद्याच्च शुद्धायोर्ध्वमधस्तथा ।
सूक्ष्मं ताम्ररजः काले सक्षौद्रं हृद्विशोधनम् ॥२७॥
शुद्धे हृदि ततः शाणं हेमचूर्णस्य दापयेत् ।

स०—विषभुक्ताय पुंस ऊर्ध्वमधश्च शुद्धाय काले सूक्ष्मतिश्लक्ष्णं ताम्रचूर्णं समाक्षिकं दद्यात् । किंभूतम् । हृद्विशोधनं हृदयं शोधयेदित्यर्थः । विषभुक्तायेत्याहिताग्न्यादित्वात्परनिपातः । काल इत्युपलक्षणम् । देशसात्म्याग्न्यादीन्यपेक्षेतेत्यर्थः । शुद्धे हृदि स्वलिंगे ज्ञाते ततोऽनंतरं हेमचूर्णस्य शाणं कर्षचतुर्थांशं दापयेत् ॥ २७ ॥

विषभोक्ता को बचाने का उपाय—

वि०—विष खाये हुए मनुष्य का वमन और विरेचन से शोधन करके सूक्ष्म ताम्र भस्म मधु के साथ तथा हृदय के शोधन होने पर पीछे से स्वर्णभस्म की एक शाण (कर्ष का चौथाई—१॥ मासा) देवे ॥ २७ ॥

वक्तव्य—स्वर्णभस्म की मात्रा विष वेग में कुछ अधिक ही देनी चाहिये । ताम्रभस्म विषनाशक है ।

हेम्नि दत्ते सति यो गुणः स्यात्तमाह—

न सज्जते हेमपाङ्गे पद्मपत्रेऽम्बुवद्विषम् ॥ २८ ॥
जायते विपुलं चायुर्गरेऽप्येष विधिः स्मृतः ।

स०—हेम पिबतीति हेमपस्तस्यांगे विषं न सज्जते । कथम् । पद्मपत्रे जलमिव । तस्य च हेमपस्य विस्तीर्णमायुर्जायते । एष विधिर्गरेऽपि स्मृतो यो विष उक्तः । सज्जत इत्यत्रात्मनेपदं चिंत्यम् ॥ २८ ॥

सुवर्ण का प्रभाव—

वि०—स्वर्ण देने का गुण—स्वर्ण को पीने वाले मनुष्य के अङ्गों में विष प्रभाव नहीं करता; जिस प्रकार कि कमल के पत्र पर पानी नहीं ठहरता । स्वर्ण सेवन से दीर्घ आयु होती है । कृत्रिम विष में भी यही उपचार करना चाहिये ॥ २८ ॥

तदेव विरुद्धभोजनमाह—

विरुद्धमपि चाहारं विद्याद्विषगरोपमम् ॥२९॥

स०—विरुद्धं चाहारं विषगरोपमं विद्यात् । विषगरवद्विरुद्धाहारा अपि व्याधिमृत्युहेतव इत्यर्थः । तथा चोक्तं संग्रहे । विस्फोटगुल्ममदविद्रधिमेहयक्ष्मतेजोबलस्मृतिमतीन्द्रियचित्तनाशम् । कुर्याद्विरुद्धमशनं ज्वरमस्रपित्तमष्टौ गदांश्च महतो विषवच्च मृत्युमिति ॥ २९ ॥

विरुद्ध भोजन की विषतुल्यता—

वि०—विरुद्ध आहार को भी विष की तरह तत्काल मारक एवं गर विष की तरह कालान्तर में मारने वाला समझना चाहिये ॥ २९ ॥

वक्तव्य—विरोधी-संयोग, संस्कार, मात्रा, देश, काल, अवस्था, स्वभाव से विरुद्ध होता है । चरक में-'यच्चापि देश-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कालाग्निमात्रासात्म्यानिलादिभिः। संस्कारतो वीर्यतश्च कोष्ठावस्थाक्रमैरपि ॥ परिहारोपचाराभ्यां पाकात् संयोगतोऽपि च। विरुद्धं तच्च न हितं हृत्संपद्विधिभिश्च यत् ॥' (च. सू. अ. २६)

विरुद्ध भोजन—'यत्किंचिद्दोषमुत्क्लेश्य न निर्हरति कायतः। आहारजातं तत्सर्वमहितायोपपद्यते ॥' (च. सू. अ. २६।८५)।

आनूपमामिषं　　माषक्षौद्रक्षीरविरूढकैः।
विरुध्यते सह बिसैर्मूलकेन गुडेन वा ॥३०॥
विशेषात्पयसा मत्स्या मत्स्येष्वपि चिलीचिमः।

स०—आमिषं मांसमानूपं महामृगवारिचरवारिशयाख्यं माषादिभिः सप्तभिः सह विरुध्यते। आनूपेष्वपि मध्ये विशेषादतिशयेन पयसा सह मत्स्या विरुध्यंते। यतो मत्स्यक्षीरे स्वादुरसविपाकित्वान्महाभिष्यंदिनी। शीतोष्णयोगाच्च परस्परविरुद्धे। मत्स्येष्वपि चिलीचिमाख्यो मत्स्यः पयसा सहात्यंतविरुद्धः। स पुनः शकलीरो लोहिताक्षः सर्वतो लोहितराजिः प्रायो भूमौ चरति। सोऽत्यभिष्यंदितमत्वात्सुतरां विरुद्धः। एष चाहारोऽनिर्दिष्टविकारकारी यथोक्तान् विस्फोटादीन् करोति। कालांतरेण च चिकित्सां विना प्राणानपि हरति। कश्चिच्च विरुद्धाहारो निर्दिष्टविकारकारी। यथोपोदकाऽतिसारायेति ॥ ३० ॥

विरुद्ध आनूपमांस—

वि०—आनूपमांस—उड़द, मधु, दूध, अंकुरितधान्य, बिस, मूली और गुड़ इनमें से किसी के साथ विरोधी है। दूध के साथ मछलियाँ विरोधी हैं, इनमें भी चिलचिम मत्स्य दूध के साथ विशेष विरोधी है ॥ ३० ॥

विरुद्धमम्लं पयसा सह सर्वं फलं तथा ॥३१॥
तद्वत्कुलत्थवरककङ्गुवल्लमकुष्ठकाः　　।

स०—अम्लं द्रव्यं पयसा सह सर्वं विरुद्धम्। सर्वग्रहणं द्रवाद्रवग्रहणार्थम्। द्रवं कांजिकादि। अद्रवं चुक्रिकादिकमित्यर्थः। अन्यथा पयसो द्रवसमानजातीयत्वात्कांजिकाद्येव द्रवद्रव्यं विरुध्येत न चुक्रिकादिकमपि। ननु तृतीययैव सहार्थो लब्ध एव। यथा। वाराहं श्वाविधा नाद्यादित्यत्र। ततः किं सहशब्देन। सत्यमेतत्। सहग्रहणं तु नियमार्थम्। सहैकध्यमम्लेनोपयुज्यमानं विरुद्धम्। यदा त्वम्लेन गोरसादिना क्षीरशाकसंज्ञव्यंजनकरणार्थं पयः संस्क्रियते तदा तस्य द्रव्यांतरत्वावत्तेर्विरोधो नास्ति। तथा दधिक्षीरादिना घृतं पच्यते तत्राऽप्याविरोध एव। द्रव्यांतरत्वात्। पूर्वस्याऽपि सहशब्दस्यैवंप्राममेव प्रयोजनमभ्यूह्यामिति। अपि च। क्षीरे भुक्त उत्तरे कालेऽप्यम्लं न भोज्यमिति प्रतिपादनार्थं च सहग्रहणम्। तथा चोक्तं संग्रहे। सर्वं चाम्लं पयसा सहैकध्यं तदुत्तरं वा विरुद्धमिति। फलं तथेति। फलमक्षोडादि च पयसा सह विरुद्धम्। सर्वशब्दः सर्वत्र न संबंधनीयो यतो न सर्वं फलं पयसा सहाभ्यवहर्तुं विरुद्धम्। अपि तु किंचिदेव। तथा च मुनिः परिसंख्ययैवाऽपठत्। तथा आम्राम्रातकलकुचकरमर्दमोचदंतशठबदरकोशाम्रभव्यजांबवकपित्थतिंतिडीकपालेवताक्षोडपनसनालिकेरदाडिमामलकान्येवंप्रकाराणि चान्यानीति। तस्मान्न सर्वं फलं पयसा सहाभ्यवहर्तुं विरुद्धं किंतु मुन्युक्तमेव। तद्वदिति। फलवत् कुलित्थादयः पयसा सह विरुद्धाः। वरको व्रीहिभेदः। वरकोद्दालकेति प्रागुक्तेः। वल्लमकुष्ठकौ शिंबीधान्यविशेषौ। उपलक्षणं चेदम्। माषनिष्पावावपि हि विरुद्धौ पयसा सहेति संग्रहे कथितम् ॥ ३१ ॥

दूध के विरुद्ध फल और धान्य—

वि०—द्रव या अद्रव सब प्रकार के अम्ल दूध के साथ विरोधी हैं। दूध के साथ सभी फल एवं कुलथी, वरक (एक प्रकार का धान), कंगनी, वल्ल (निष्पाव) और मोठ विरोधी हैं ॥ ३१ ॥

वक्तव्य—अम्ल को दूध के साथ या दूध के पीछे खाना विरुद्ध है; यथा—'सर्वं चाम्लं पयसैकध्यं तत उत्तरं वा विरुद्धम्।' (संग्रह सू. अ. ९)

भक्षयित्वा हरितकं मूलकादि पयस्त्यजेत् ॥३२॥

स०—भक्षयित्वेति। हरितकं मूलकं कुठेरादि भुक्त्वा पयस्त्यजेन्न पुनः शाकम् भुक्त्वा। मूलकादिस्निग्धस्विन्नं शाकसाधनेन साधितं भुक्त्वा क्षीरं न त्यजेत्। एतस्मादेव च ज्ञापकान्मूलकादीनामुभयरूपत्वं वेद्यम्। मूलकादीनां यदि शाकत्वप्रसिद्धिरेवाऽभविष्यत् ततो हरितकं मूलकादि भक्षयित्वेति तंत्रकृन्नावचयत्। तस्मान्मूलकस्य हरितकत्वं च ज्ञेयम्। लशुनेन सह क्षीरस्य प्रयोगो य उक्तः साधयेच्छुद्धशुष्कस्य लशुनस्य चतुःपलमिति स न विरुद्धः। अग्न्यादिसंपर्काद् द्रव्यांतरत्वोत्पत्तेः ॥ ३२ ॥

दुग्ध-विरुद्ध शाक—

वि०—मूली आदि हरे (कच्चे) शाक खाकर दूध नहीं पीना चाहिये ॥ ३२ ॥

वाराहं श्वाविधा नाद्याद्दध्ना पृषतकुक्कुटौ।
आममांसानि पित्तेन, माषसूपेन मूलकम् ॥३३॥
अविं कुसुम्भशाकेन, बिसैः सह विरूढकम्।
माषसूपगुडक्षीरदध्याज्यैर्लकुचं　　फलम् ॥३४॥
फलं कदल्यास्तक्रेण दध्ना तालफलेन वा।
कणोषणाभ्यां मधुना काकमाची गुडेन वा ॥३५॥
सिद्धां वा मत्स्यपचने पचने नागरस्य वा।
सिद्धामन्यत्र वा पात्रे कामातामुषितां निशाम् ॥३६॥

स०—श्वाविधा सेधामांसेन सह वाराहं मांसं नाद्यात्। अग्रेऽपि नाद्यादिति क्रियायोगो यावत्त्यजेदिति क्रियांतरम्। पृषतकुक्कुटौ दध्ना सह नाद्यात्। आमान्यपक्वानि मांसानि पित्तेन सह। माषसूपेन सह मूलकम्। आविं मेषं कुसुंभशाकेन सह। विरूढकमंकुरितधान्यं बिसैः सह। माषसूपादीनामन्यतमेन सह लकुचफलम्। कदल्याः फलं तक्रेण सह दध्ना वा तालफलेन वा कदलीफलम्। कणोषणाभ्यां सह काक-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

माचीम्। केवलेन माक्षिकेण सह काकमाचीं गुडेन वा सह काकमाचीम्। मत्स्याः पच्यंते यस्मिन् भाण्डे तत्र वा सिद्धां काकमाचीं नाद्यात्। नागरस्य वा पचने शुंठीपाचितभांडे सिद्धां काकमाचीम्। तथाऽन्यत्र वा भाजने यथारुचिसिद्धां कामात्तां काकमाचीं रात्रिमुषितां पर्युषितां नाद्यात्॥ ३३-३६॥

विरुद्ध मांसादि—

वि०—सूअर का मांस सेह के मांस के साथ नहीं खाना चाहिये। दही के साथ पृषत और मुर्गे को नहीं खाना चाहिये। पित्त के साथ अपक्व मांस; उड़द की दाल के साथ मूली; भेड़ के मांस को कुसुम्भ के शाक के साथ; अङ्कुरित धान्य को भिस के साथ; बड़हल के फल को उड़द की दाल, गुड़, दूध, दही, घी के साथ; तक्र के साथ केले के फल को; दही के साथ ताड़ के फल को; मकोय को मिलित पिप्पली और मरिच के साथ या गुड़ के साथ अथवा मधु के साथ नहीं खाना चाहिये। जिस पात्र में मछलियाँ पकी हों या जिसमें सोंठ सिद्ध की गयी हो, उस पात्र में अथवा अन्यत्र किसी ऐसे वैसे पात्र में पकाई तथा रातभर की बासी मकोय को भी न खाये॥ ३३-३६॥

मत्स्यनिस्तलनस्नेहे साधिताः पिप्पलीस्त्यजेत्।
कांस्ये दशाहमुषितं सर्पिरुष्णं त्वरुष्करे॥३७॥

स०—मत्स्या निस्तल्यंते भृज्यंते येन स्नेहेन स मत्स्यनिस्तलनस्नेहस्तत्र साधिताः पिप्पलीस्त्यजेत्। विरुद्धत्वात्। नाद्यादिति प्रकृतेऽपि त्यजेदिति वचनं न केवलं नाद्याल्लेपादिकमपि न कुर्यादिति प्रतिपादनार्थम्। उत्तरत्राऽपि त्यजेदित्यस्यानुवृत्तावेतदेव तात्पर्यम्। कांस्यपात्रे दशरात्रमुषितं सर्पिस्त्यजेत्। दशाहादर्वागपि विरुद्धमेव। अरुष्करे भल्लातकाविषय उष्णमन्नपानादिकं त्यजेत्। तथा पेयं नोष्णोपचारेणेत्यर्थेन मद्यस्योष्णं निषिद्धम्। तथोष्णमुष्णार्तमुष्णे च युक्तं चोष्णैरिति माक्षिकस्य। तथा दध्नो नैवाद्यान्निशि नैवोष्णं वसंतोष्णेत्यादिभिः। तस्मान्मधुमद्यदधिष्वस्युष्णं विरुद्धमित्याचार्यो युक्त्या प्रत्यपादयत्। संग्रहे तु स्पष्टं कृत्वोक्तम्। मद्यमधुदधिभल्लातकेषु चोष्णमिति॥ ३७॥

विरुद्ध स्नेहादि पदार्थ—

वि०—जिस स्नेह में मछलियाँ तली गई हों उस तैल में सिद्ध पिप्पली को, काँसे के बर्त्तन में दस दिन तक रक्खे घी को तथा भिलावे के साथ गरम वस्तुओं का त्याग करे॥३७॥

भासो विरुध्यते शूल्यः कम्पिल्लस्तक्रसाधितः।

स०—भासः पक्षिविशेषः शूल्यो विरुध्यते शूले संस्कृतो भासः कृतवस्तैर्विरुध्यत इत्यर्थः। शूल्य इति शूलात्पाक इति यत्। कंपिल्लस्तक्रसाधितो विरुध्यते। संग्रहे चातोऽधिकमप्युक्तम्। यथा। सौवीरेण तिलशष्कुली। क्षीरेण लवणम्। नवनीतेन शाकम्। नवपुराणमानपक्वं चैकध्यम्। तथा सलिलावगाहः सहसोष्णाभितप्तस्य स्वग्दष्टयुपघाताय तृष्णाभिवृद्धये च। तथैव पयःपानं रक्तपित्ताय। शरीरेणायस्तस्य सहसाभ्यवहारश्छर्दिषे गुल्माय वा। वाचा त्वायस्तस्य स्वरसादायेति।

वि०—सींखचों पर भूना भास पक्षी का मांस विरोधी है; तक्र में सिद्ध किया कमीला भी विरोधी है।

ऐकध्यं पायससुराकृशराः परिवर्जयेत्॥३८॥

स०—एकत्र पायससुराकृशरास्त्यजेत्। ऐकध्यमिति एकाद्धो ध्यमुञिति ध्यमुञ्॥ ३८॥

दूध के विरुद्ध—

दूध, सुरा और कृशरा इनको एक साथ मिलाकर खाना विरोधी है॥ ३८॥

मधुसर्पिर्वसातैलपानीयादि द्विशस्त्रिशः।
एकत्र वा समांशानि विरुध्यन्ते परस्परम्॥३९॥

स०—मध्वादीनी समांशानि तुल्यप्रमाणानि मिथो विरुध्यंते। कथम्। द्वे वा त्रीणि वैकत्र वा सर्वाणि। यथा। मधुसर्पिषी। मधुवसे। माक्षिकतैले। माक्षिकोदके। त्रीणि त्रीणि यथा। मधुसर्पिर्वसेत्येवमादि। ननु यद्येवंविधो विरोध उच्यते तत्कथमगस्त्य लेहे कुडवं च पृथग्घृतात्। तैलाम्लपिप्पलीचूर्णात्सिद्धशीते च माक्षिकादिति तैलघृतमधूनां तुल्यांशानां प्रयोगः। ब्रूमः। केवलानां मध्वादीनां समांशानामुपयोगो विरुद्धो न तु द्रव्यांतरसंयोगेन। तेषां संयोगसंस्कारादिवशाद्विशिष्टगुणांतरोत्पत्तिर्दृष्टा। तस्मादगस्त्यलेहादौ द्रव्यांतरे संयोगादिवशादविरोध एव॥ ३९॥

शहद के विरुद्ध—

वि०—मधु, घी, वसा, तैल और जल इनको दो-दो या तीन-तीन मिलाकर या सबको एक साथ समान मात्रा में लेना परस्पर बिरोधी हैं[1]॥ ३९॥

भिन्नांशे अपि मध्वाज्ये दिव्यवार्यनुपानतः।
मधुपुष्करबीजं च, मधुमैरेयशार्करम्॥४०॥
मन्थानुपानः क्षैरेयो; हारिद्रः कटुतैलवान्।

स०—भिन्नांशे अपि मध्वाज्ये दिव्यवार्यनुपानतोऽनुपानेन विरुध्येते। तृतीयार्थे तसिप्रत्ययः। अपिशब्दान्न केवलं समांश इत्यर्थः। मधु माक्षिकं पुष्करबीजं चैकध्यं विरुध्यते। तथा मधु मार्द्वीकं मैरेयं खर्जूरासवं शार्करं शर्करया कृतं मद्यमेकत्रोपयुक्तं विरुध्यते। क्षैरेयः पायसो मंथानुपानो विरुद्धः। मंथोऽनुपानं यस्य स एवम्। क्षैरेय इति क्षीराड्ढञ्। हारिद्रः कुप्रसवः शाकविशेषः सार्पच्छत्रानुकारी पीताभासः कटुतैलवान् सर्षपतैलभृष्टो विरुद्धः॥ ४०॥

---

१. मधु आदि पांचों में दो, तीन, चार या पाँचों के संयोगभेद से विरुद्धता के २६ भेद शास्त्रों में वर्णित हैं। किन्तु समान मात्रा में तथा केवल इन्हीं के सेवन से विरुद्ध होते हैं; इनके साथ दूसरे द्रव्य मिलने पर विरुद्धता नहीं रहती। अत एव आचार्यों ने अनेक औषध योगों से सहपान या अनुपान रूप में सहमात्रा में भी घी और मधु के सेवन का आदेश दिया है। यथा—'कर्षं मधुकचूर्णस्य घृतक्षौद्रसमांशिकम्।', (च. चि. अ. २)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

असमान शहद-घी—

वि०—मधु और घृत भिन्न परिमाण में होने पर भी वर्षा जल के अनुपान से विरोधी हैं। मधु और कमल के बीज; मधु के साथ मैरेय (खजूर का आसव) और शार्कर (शक्कर का आसव); वैरेय (पायस-खीर) मन्थ के अनुपान से तथा हारिद्र (छत्रक जाति का एक शाक) सरसों के तेल से विरोधी हैं ॥ ४० ॥

उपोदिकाऽतिसाराय तिलकल्केन साधिता ॥४१॥

स०—उपोदका तिलकल्केन साधिताऽतिसाराय। तादर्थ्ये चतुर्थ्यत्र। अर्थो निमित्तम्। तस्मै इदं तदर्थं तदर्थमेव तादर्थ्यम्। तेनातीसारकरणमित्ययमर्थो जायते ॥ ४१ ॥

तिलकल्क और पोई शाक—

वि०—तिल कल्क में सिद्ध की गई उपोदिका अतीसार उत्पन्न करती है ॥ ४१ ॥

बलाका वारुणीयुक्ता कुल्माषैश्च विरुद्ध्यते।
भृष्टा वराहवसया सैव सद्यो निहन्त्यसून् ॥४२॥

स०—बलाका पक्षिजातिर्वारुण्या प्रसन्नया युक्ता विरुद्धा। कुल्माषैर्नातिस्विन्नमुद्गादिभिश्च सह विरुध्यते। सैव बलाका वराहवसया भृष्टा सद्यस्तत्क्षणादेव प्राणान् मारयति ॥ ४२ ॥

बगुला के मांस और मद्य—

वि०—बलाका, वारुणी अथवा कुल्माषों (अर्धस्विन्न धान्य) के साथ विरोधी है। यही जब सूअर की वसा में भूनी हो तो तुरन्त मारक होती है ॥ ४२ ॥

तद्वित्तित्तिरिपत्राढ्यगोधालावकपिञ्जलाः ।
ऐरण्डेनाग्निना सिद्धास्तत्तैलेन विमूर्च्छिताः ॥४३॥

स०—तित्तिर्यादय ऐरंडेनाग्निना सिद्धास्तत्तैलेनैरंडतैलेन विमूर्छिता बहुशो भृष्टास्तद्वद्बलाकावत्सद्यो जीवितहराः। पत्राढ्यो मयूरः ॥ ४३ ॥

तीतरादि के मांस—

वि०—इसी प्रकार तीतर, पत्राढ्य (मोर), गोह, बटेर और कपिञ्जल ये एरण्ड की अग्नि से पकाने पर या एरण्ड तैल में भूनने से तुरन्त मारक होते हैं ॥ ४३ ॥

हारीतमांसं हारिद्रशूलकप्रोतपाचितम् ।
हरिद्रावह्निना सद्यो व्यापादयति जीवितम् ॥४४॥
भस्मपांशुपरिध्वस्तं तदेव च समाक्षिकम् ।

स०—हारीतस्य पक्षिविशेषस्य मांसं हारिद्रशूलके प्रोतमासक्तं च तत्पाचितं च हारिद्राग्निना सद्यो जीवितं हंति। तदेव हारीतमांसं भस्मपांशुपरिध्वस्तं समाक्षिकं विरुद्धम्। भस्म च पांशुश्च भस्मपांशू भस्मरेणू ताभ्यां परिध्वस्तं धूसरितम्। सिद्धसारे चोक्तम्। न जातु कटुतैलेन भृष्टामद्यादुपोदकाम्। प्रियंगुकल्कस्निग्धांगः पायसं न समाचरेदिति ॥ ४४ ॥

हरियल पक्षी का मांस—

वि०—हारीत पक्षी के मांस को दारुहल्दी की शलाका में फँसाकर दारुहल्दी की ही अग्नि से पकाने पर तुरन्त मारक होता है।

हारीत मांस राख और धूली में मिला होने पर अथवा मधु के साथ मिलाकर खाने से तुरन्त मारक होता है ॥ ४४ ॥

द्रव्याणामानंत्यात्प्रतिपदोक्त्याऽशेषविरुद्धसंग्रहः
कर्तुमशक्य इति तत्संग्रहार्थं व्यापि लक्षणमाह—

यत्किञ्चिद्दोषमुत्क्लेश्य न हरेत्तत्समासतः ॥४५॥
विरुद्धं—

स०—यत्किंचिदन्नपानौषधं वा दोषमुत्क्लेश्य स्वस्थानात्संचलय्य न हरेद्बहिर्न निष्कासयेत् तत्समासतः संक्षेपतो विरुद्धम् ॥ ४५ ॥

विरुद्ध अन्नपानादि का लक्षण एवं शमन—

वि०—संक्षेप में जो कोई वस्तु शरीर में दोषों को उत्क्लेशित करके बाहर नहीं निकालती, वह विरुद्ध है ॥४५॥

वक्तव्य—शोधन—दोषों को उत्क्लेशित करके निकाल देती है; शमन—न उत्क्लेशित करती है और न निकालती है।

न च शोधनशमनरूप एवोपक्रमोऽत्रेत्याह—

—शुद्धिरत्रेष्टा शमो वा तद्विरोधिभिः ।
द्रव्यैस्तैरेव वा पूर्वं शरीरस्याभिसंस्कृतिः ॥४६॥

स०—शुद्धिरत्रेष्टा। अत्र विरुद्धाहारकृते विकारे शुद्धिर्वमनविरेकादिरूपेष्टा श्रेष्ठा। कुपितदोषसमूहस्य वमनादिभिर्निर्हरणात्तन्निहारे चारोग्योत्पत्तिः शमो वेति। न केवलं शुद्धिरिष्टा शमश्रेष्टः। कैः। तेषां वैरोधिककोपितदोषाणां तत्कृतानां वा विस्फोटादीनां विकाराणां विरोधिभिः प्रतिपक्षभूतैरौषधैः। तैरेव वैरोधिककुपितदोषप्रतिपक्षभूतैर्द्रव्यैः पूर्वं प्रथमं या शरीरस्याऽभिसंस्कृतिः सा च विरुद्धाहारकृते विकारे प्रशस्तेति। यथा माक्षिकहरीतक्यादिना पित्तश्लेष्महरणौषधेन संततशीलनादभिसंस्कृते देहे पित्तश्लेष्मकरं विरुद्धमुपयुक्तं सद्विकर्तुमशक्तम्। एतदुक्तं भवति। विरुद्धप्रतिपक्षगुणवता द्रव्येण देहस्तथा दार्ढ्यं ग्राहितो यथा विरुद्धमपि द्रव्यं विकारं कर्तुं नालम् ॥ ४६ ॥

विरुद्धाहार का उपचार

वि०—विरोधी द्रव्यों का वमनादि से शोधन करना चाहिये अथवा प्रतिपक्षी आहार-विहारों से उनका शमन करना चाहिये अथवा वैरोधिक कुपित दोष के प्रतिपक्षी द्रव्यों से शरीर का प्रथम ही अभिसंस्कार करना उत्तम है ॥ ४६ ॥

वक्तव्य—चरक में—'एषां खल्वपरेषां च वैरोधिकनिमित्तानां व्याधीनामिमे भावाः प्रतीकारा भवन्ति। तद्यथा-वमनं विरेचनं च. तद्विरोधिनां च द्रव्याणां संशमनार्थमुपयोगः, तथाविधैश्च द्रव्यैः पूर्वमभिसंस्कारः शरीरस्येति ॥'—अर्थात् तथाविध—उसी प्रकार के द्रव्यों से शरीर का संस्कार करना; जैसा चेचक में चेचक के सीरम का टीका करवाना; अथवा प्लेग में प्लेग के सीरम लगवाना—जिससे प्लेग न हो।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इस दृष्टि से 'तैरेव' का अर्थ—उन्हीं विषैले द्रव्यों से शरीर संस्कार करवाना है।

व्यायामस्निग्धदीप्ताग्निवयःस्थबलशालिनाम् ।
विरोध्यपि न पीडायै सात्म्यमल्पं च भोजनम् ॥४७॥

स०—व्यायामो विद्यते येषामित्यर्शआदित्वादच्। वयःस्थास्तरुणाः। बलेन शालितुं श्लाधितुं शीलं येषां ते बलशालिनः। स्निग्धाः स्निग्धद्रव्याहारसात्म्याः। व्यायामिनां विरोध्यपि भोजनं न पीडायै न रोगोत्पत्तये। एवं स्निग्धादीनां प्रत्येकं संबंधः कार्यः। केचिद्व्यायामीति पठंति। तथा विरुद्धमप्यन्नं यदभ्यासात्सात्म्यं सात्मीभूतं तथाऽल्पमल्पमात्रया च यद्भोजनं तच्च विरुद्धमपि न पीडायै इति योज्यम् ॥ ४७ ॥

विरुद्ध भोजन के सहन योग्य व्यक्ति—

वि०—व्यायाम करने वाले, स्निग्धभोजी, दीप्ताग्नि, युवा और बलवान् व्यक्तियों में विरुद्ध वस्तु भी कोई नुकसान नहीं करती अथवा सात्म्य हुआ या अल्प मात्रा में हुआ विरुद्ध भोजन भी कुछ पीड़ा नहीं करता ॥ ४७ ॥

अथ यद्यपथ्यमपि सात्म्यतां प्राप्तं तत्किं त्याज्यं न वा। कथं च त्याज्यं कथं च पथ्यं भोज्यमित्याह—

पादेनापथ्यमभ्यस्तं पादपादेन वा त्यजेत्।
निषेवेत हितं तद्वदेकद्वित्र्यन्तरीकृतम् ॥४८॥

स०—अपथ्यमहितमन्नं पानं वा यल्लंघनप्लवनजागरणस्वप्नादिकं वा चेष्टितमहितमभ्यस्तं तत्पादेन चतुर्थांशेन त्यजेदहितफलत्वात्। तद्धि शरीरोचितमप्यपथ्यत्वादुदर्के दोषाय संपद्यते न गुणाय। यदि तु तदपथ्यमभ्यस्तं तथा सात्मीभूतं यस्मिंश्चतुर्थांशेनाऽपि त्यज्यमाने शरीरबाधा शक्यते वह्निमांद्याद्वा तदा पादपादेन वा षोडशांशेन त्यजेदिति वाशब्दार्थः। तेन तुल्यं वर्तते तद्वत्। तेनैव क्रमेण पादेन पादपादेन वा हितं निषेवेत शीलयेत्। कथमेतद्द्वयमप्यपथ्यरूपं त्याज्यं पथ्यं निषेव्यं चेत्याह। एकेत्यादि। एकश्च द्वौ च त्रयश्च तैरंतरीकृतम्। एकद्वित्रिभिरन्नकालैर्व्यवधानं कृत्वाऽपथ्यं पादेन पादपादेन वा त्यजेत्। एकद्वित्र्यंतरीकृतमिति क्रियाविशेषणत्वादत्र नपुंसकलिंगत्वम्। अधुनैतदेव स्पष्टीकृत्योच्यते। अपथ्यात्पाटलव्रीह्यादेरभ्यस्तात्पादमेकं त्यक्त्वाऽनुचितात्पथ्याद्रक्तशाल्यादेस्तमेव पादं दत्वा चतुष्पात्त्वं संपाद्य योज्यम्। एवमन्नकालमेकमतिवाहयेत्। एवं पादेनापथ्यमभ्यस्तं त्यक्तं भवति। पथ्यं चानुचितं निषेवितं भवति। तथा द्वितीयेऽन्नकाले सर्वमपथ्यं योजनीयम्। एवमेकेनान्नकालेनापथ्यपादोंऽतरीकृतः। ततस्तृतीयेऽप्युचितादपथ्यात्पादद्वयमपास्यानुचितात्पथ्यात्पादद्वयमुपयुज्य ततश्चतुर्थे सर्वमपथ्यं भोज्यं पंचमे च। एवमन्नकालद्वयेन पथ्यपादद्वयसहितमपथ्यपादद्वयमंतरीकृतम्। ततः षष्ठेऽन्नकाले पादमुचितादपथ्यात्पादत्रयमनुचितात्पथ्याद्भुक्त्वा सप्तमाष्टमनवमान्नकालेषु सर्वमपथ्यं भोज्यम्। एवमन्नकालत्रयेणापथ्यमंतरीकृतम्। ततो दशमेऽन्नकाले सर्वं पथ्यं सेवनीयम्। एवं पादपादेनाप्ययमेव क्रमः। स्पष्टार्थं च दिक्प्रदर्श्यते। तथा यवकादेः षोडशांशं त्यक्त्वाऽनुचिताच्छाल्यादेः पथ्यात्षोडशांशमेव दत्वा चतुष्पात्त्वं संपाद्य भोज्यम्। एवमपथ्यमभ्यस्तं पादपादेन त्यक्तं भवति पथ्यं चानुचितं निषेवितं भवति। द्वितीयेऽन्नकाले सर्वमपथ्यं सेव्यम्। एवमेकेनापथ्यषोडशांशोऽंतरीकृतः। ततस्तृतीयेऽप्युचितादपथ्यात्पादपादद्वयमपास्याऽनुचितात्पथ्यात्पादपादद्वयं दत्वा चतुष्पात्त्वं संपाद्य सेव्यम्। ततश्चतुर्थे पंचमे वाऽन्नकाले सर्वमपथ्यं भोज्यम्। एवं कालद्वयेन पादपादद्वयमपथ्यस्यांतरीकृतम्। ततः षष्ठेऽन्नकालेऽनुचितात्पथ्यात्पादपादत्रयमुचितादपथ्यात्पादपादास्त्रयोदशेति भोज्यम्। ततः सप्ताष्टमनवमान्नकालेषु सर्वमपथ्यं भोज्यम्। एवं कालत्रयेणांतरीकृताः। ततो दशमेऽन्नकाले पथ्यादनुचितात्पादपादाश्चत्वारः। अपथ्यपादपादा द्वादशेति भोज्यम्। तत एकादशे सर्वमपथ्यं भोज्यम्। तत एकेनान्नकालेनांतरीकृतम्। एवमन्नकालद्वयत्रयांतरितं च तावद्योज्यं यावत्पथ्यस्य षोडशपादाः सेव्यतया संपद्यंते ॥ ४८ ॥

पथ्यापथ्य के सेवन और त्याग विधि—

वि०—अभ्यास से सात्म्य हुए अपथ्य को चतुर्थांश से सोलहवें अंश में छोड़े। इसी तरह पथ्य को चतुर्थांश से या सोलहवें भाग से ग्रहण करना चाहिये। इसको एक, दो और तीन दिन का अन्तर देकर जितने अंश से अपथ्य को छोड़ा हो, उतने अंश से पथ्य का ग्रहण करे ॥ ४८ ॥

वक्तव्य—इसकी व्याख्या तृतीय अध्याय के अन्तिम श्लोक में की गई है, वहाँ देख लेना चाहिये।

सोलहवें अंश के छोड़ने से एक सौ अस्सी दिन में पूरे होंगे। इसमें पाँच दिन तक का अन्तर करना चाहिये।

एवमनेन क्रमेणापथ्यदोषास्त्यक्ताः पीडायै न भवंति पथ्यगुणाश्च संवर्धिताः स्थिरतां प्राप्नुवंतीत्यत आह—

अपथ्यमपि हि त्यक्तं शीलितं पथ्यमेव वा।
सात्म्यासात्म्यविकाराय जायते सहसाऽन्यथा ॥४९॥

स०—हि यस्मात्सहसा क्रममिममनालोच्याऽन्यथैवोक्तविध्यतिक्रमेणाऽपथ्यमपि त्यक्तं सात्म्यविकाराय जायते पथ्यमेव वा सहसा शीलितमसात्म्यविकाराय जायते। सात्म्यासात्म्याभ्यां विकारः सात्म्यासात्म्यः विकारस्तस्मै। क्लृपि संपद्यमाने चतुर्थीति चतुर्थी ॥ ४९ ॥

सहसा पथ्यापथ्य के त्याग का फल—

वि०—पूर्वोक्त क्रम विपरीत एकदम से त्याग किया हुआ अपथ्य और एकदम से सेवन किया पथ्य भी रोग का कारण होता है। क्योंकि अपथ्य ही सात्म्य हुआ रहता है, और पथ्य असात्म्य होता है। (इसलिये क्रम से छोड़े और ग्रहण करे।) ॥ ४९ ॥

क्रमेण त्वपथ्यत्यागपथ्यशीलने विधीयमाने गुणाय स्यातामिति दर्शयति—

क्रमेणापचिता दोषाः क्रमेणोपचिता गुणाः।
सन्तो यान्त्यपुनर्भावमप्रकम्प्या भवन्ति च ॥५०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—दोषा अपथ्याभ्यासजाः क्रमेण पूर्वोक्तेनापचिताः क्षयं नीताः गुणाश्च पथ्योपयोगजाः क्रमेण पूर्वोक्तेनैवोपचिताः वृद्धिं नीताः संतः पुरुषाणां यथासंख्यमपुनर्भावं यांति दोषाः गुणाश्चाप्रकंप्याः स्थिरा भवंति ॥ ५० ॥

वि०—जो दोष क्रमशः घटाये गये हैं, और जो गुण क्रमशः बढ़ाये गये हैं, वे दोष फिर उत्पन्न नहीं होते और जो गुण हैं वे स्थिर हो जाते हैं ॥ ५० ॥

सांप्रतमहिताहारसेवनं सदा त्याज्यमितिसद्युक्तिं दर्शयति—

अत्यन्तसन्निधानानां दोषाणां दूषणात्मनाम्।
अहितैर्दूषणं भूयो न विद्वान् कर्तुमर्हति ॥५१॥

स०—दोषाणामहितैराहारादिभिर्दूषणं कर्तुं विद्वान् पंडितो नार्हति न युज्यते। किं भूतानाम्। अत्यंतमतिशयेन संनिधानं निकटत्वं येषां दोषाणां त एवं तेषां दूषणात्मनां दूषणस्वभावानाम् ॥ ५१ ॥

अहिताहार सेवन का परित्याग--

वि०—विद्वान् मनुष्य को अहित आहारादि के सेवन से (शरीर के दूष्यों के) अति समीप में रहने वाले एवं दूषण स्वभाव वाले दोषों को दूषित करना योग्य नहीं ॥ ५१ ॥

एतत्प्रसंगेन चेदमाह—

आहारशयनाब्रह्मचर्यैर्युक्त्या प्रयोजितैः।
शरीरं धार्यते नित्यमागारमिव धारणैः ॥५२॥

स०—शयनं स्वप्नः अब्रह्मचर्यं स्त्रीणां सेवा आहारादीनां द्वंद्वः। एतैर्युक्त्वा प्रयोजितैः शरीरं सततं धार्यते। किमिव कैः। आगारं गृहमिव धारणैः स्तंभैर्यथा ॥ ५२ ॥

दीर्घायु का विधान—

वि०—आहार (अन्न-पान सेवा), शयन (निद्रा) और अब्रह्मचर्य (मैथुन)–इनका युक्तिपूर्वक प्रयोग करने से जिस प्रकार स्तम्भों से मकान धारण किया जाता है उसी प्रकार शरीर धारण किया जाता है ॥ ५२ ॥

वक्तव्य—चरक में–'त्रय उपस्तम्भाः—आहारः, स्वप्नो, ब्रह्मचर्यमिति;' यह कहा है; आगे भी 'ब्रह्मचर्यमायुष्कराणां श्रेष्ठतमम्' आगे स्वयं वाग्भट भी ब्रह्मचर्य के लिये कहेंगे कि 'धर्म्यं यशस्यमायुष्यं लोकद्वयपरायणम्। अनुमोदामहे ब्रह्मचर्यमेकान्तनिर्मलम्।' इतना होने पर भी जो अब्रह्मचर्य पाठ दिया है, वह युगधर्म का प्रभाव है। आज की तरह वाग्भट के काल (गुप्तकाल) में भी सेक्स का शिक्षण आवश्यक माना जाता था।

आहारो वर्णितस्तत्र तत्र तत्र च वक्ष्यते।

स०—तत्र तेषु त्रिषु मध्यादाहारो वर्णित ऋतुचर्यायां द्रवान्नस्वरूपविज्ञानीययोः। तत्र तत्र च शास्त्रकारो ज्वरचिकित्सादौ च वक्ष्यति।

आहार-योजना—

वि०—इन तीनों में आहार का वर्णन ऋतुचर्या तथा द्रवान्नस्वरूप-विज्ञानीय में कर दिया है; और पुनः वहाँ-वहाँ (प्रसंगानुसार) ज्वर चिकित्सा आदि में एवं मात्राशितीय में कहेंगे।

शयनाब्रह्मचर्ययोस्त्विहैव विधिं वक्तुकाम आह—

निद्राऽऽयत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् ॥५३॥
वृषता क्लीबता ज्ञानमज्ञानं जीवितं न च।

स०—निद्रायत्तं निद्राधीनं सुखमारोग्यं दुखं रोगस्तथा पुष्ट्यादि च। न च जीवितमिति संबंधः। अजीवितेन योगो भवतीत्यर्थः ॥ ५३ ॥

निद्रा की आवश्यकता—

वि०—सुख, दुःख, शरीर की पुष्टि, शरीर की कृशता, शरीर का बल, निर्बलता, वृषता, क्लीबता, ज्ञान, अज्ञान, जीवन और मृत्यु ये निद्रा के अधीन हैं। (नींद आने से शरीर में सुख, पुष्टि, बल, वृषता, ज्ञान, जीवन होता है। नींद न आने से दुःख, कृशता, निर्बलता, क्लीबता, अज्ञान और मृत्यु होती है।) ॥ ५३ ॥

सांप्रतं दुष्टनिद्रां निर्दिशति—

अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता ॥५४॥
सुखायुषी पराकुर्यात् कालरात्रिरिवापरा।

स०—अकाले निषेविताऽति च निषेविता न च निषेविता निद्रा सुखमारोग्यलक्षणमायुश्च जीवितं ते सुखायुषी पराकुर्यान्नाशयेत्। केव। अपरा कालरात्रिरिव ॥ ५४ ॥

अकाल निद्रा का कुपरिणाम—

वि०—अकाल में निद्रा, अतिनिद्रा और निद्रा न सेवन करना ये आरोग्य और जीवन का नाश करते हैं; ये तीनों दूसरी कालरात्रि के समान हैं ॥ ५४ ॥

अथ निद्रागुणप्रसंगेन तत्प्रतिपक्षभूतस्य जागरणस्याऽपि गुणमाह—

रात्रौ जागरणं रूक्षं, स्निग्धं प्रस्वपनं दिवा।
अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम् ॥५५॥

स०—अपिशब्दावत्र सामर्थ्यलब्धौ बोद्धव्यौ। तेन रात्रावपि जागरणं रूक्षम्। दिवा त्वाम्रेयमत्यर्थं रूक्षं कालेनाहितबलत्वात्। तथा प्रस्वपनं दिवाऽपि स्निग्धम्। रात्रौ तु सौम्यकालेऽतिशयेन स्निग्धमित्यवतिष्ठते। अपिशब्दाभ्यामंतरेण तु रात्रावेव जागरणं रूक्षं दिवा तु स्निग्धमित्यर्थो जायते। व्यच्छेदफलत्वाद्व्याख्यानाम् एवं दिवस एव स्निग्धं प्रस्वपनं रात्रौ तु रूक्षमिति। नचैतद्युज्यते। ततो दिवा जागरणं सदा रूक्षं नाभविष्यत् तत्कथमिदमुपपत्स्यते बहुमेदः कफाः स्वप्युः स्नेहनित्याश्च नाहनि। विषार्तः कंठरोगी च नैव जातु निशास्वपीति। येषां ह्यपतर्पणमेव हितं यच्चापतर्पणं तदवश्यं रूक्षम्। तस्मादपतर्पणस्वभावं जागरणमेव सेव्यम्। तथा। ग्रीष्मे वायुचयादानरौक्ष्यराज्यल्पभावतः। दिवा स्वप्नो हितोऽन्यस्मिन् कफपित्तकरो हि सः। मुक्त्वा तु भाष्ययानाध्वमद्यस्त्रीभारकर्मभिः। क्रोधशोकभयैः क्लातान्। श्वासहिध्मातिसारिणः। वृद्धबालाबलक्षीणक्षततृट्शूलपीडितान्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अजीर्णाभिहितोन्मत्तान् दिवा स्वप्नोचितानपि । तदेतेषां संतर्पणार्हत्वात्संतर्पणमेव हितम् । यच्च संतर्पणं तदवश्यं स्निग्धम् । तस्मादेतैः संतर्पणस्वभावमेव सदा प्रस्वपनं सेव्यम् । एवं च पूर्वमेव च व्याख्यानं युक्तम् । प्रस्वप्नजागरण-क्रिययोरद्रव्ययोरपि रूक्षस्निग्धत्वमुपचारादुपपन्नम् । यथा रूक्षं द्रव्यं गुग्गुल्वादि कफमेदः प्रभृतीन् सौम्यान् भावान् क्षपयति । तथैव तदा जागरणमपि तत्क्षपयद्दृष्टं तदा तद्रूक्ष-कार्यकरणादरूक्षमपि रूक्षमित्युपचर्यते । तथा प्रस्वपनादर्वा-क्कफमेदः प्रभृतीनां सौम्यानां भावानां स्वहेतोरुत्पादस्तथा नोपलभ्यते । यथा प्रस्वपनादनंतरं तस्मात्प्रस्वपनमस्निग्धमपि स्निग्धमित्युपचर्यते । प्रचल इवाचारतीति क्यङन्तान्निष्ठा । आसीनस्योपविष्टस्य प्रचलायितमासीनप्रचलायितं नतु प्रस्वपनं सर्वसर्विकया । येन स्नेहन हेतुः स्यात् । रूक्षकार्या-करणादरूक्षम् । अनभिष्यंदि तु विशेषेण । आसीनप्रचलायितं पुनरीदृग्रूपमित्यर्थः ॥ ५५ ॥

रात्रि-जागरण और दिवा-शयन का प्रभाव—

वि०—रात्रि में जागना रूक्षताकारक है (वातव्याधि जनक है); दिन में सोना स्निग्धता करता है (कफरोगजनक है)। बैठ कर झूमते हुए झपकी लेना (दिन में) न तो रूक्षता करता है और न अभिष्यन्दी है ॥ ५५ ॥

वक्तव्य—'स्वप्नकामो दिवा काममुपविष्टः शयीत वा । प्रस्तीर्णाङ्गस्य जन्तोर्हि श्लेष्मा कोष्ठे प्रवर्त्तते ॥'—मेल । 'आसीनप्रचलः स्वप्नो निरभिष्यन्दिबृंहणः ॥'

यदि स्निग्धत्वादभिष्यंदी दिवास्वप्नस्तत्किं कदाचिदपि नकार्य इत्याह—

ग्रीष्मे वायुचयादानरौक्ष्यराऽयल्पभावतः ॥५६॥
दिवास्वप्नो हितोऽन्यस्मिन् कफपित्तकरो हि सः ।
मुक्त्वा तु भाष्ययानाध्वमद्यस्त्रीभारकर्मभिः ॥५७॥
क्रोधशोकभयैः क्लान्तान् श्वासहिध्मातिसारिणः ।
वृद्धबालाबलक्षीणक्षततृट्शूलपीडितान् ॥५८॥
अजीर्ण्यभिहतोन्मत्तान् दिवास्वप्नोचितानपि ।
धातुसाम्यं तथा ह्येषां श्लेष्मा चाङ्गानि पुष्यति ॥५९॥

स०—ग्रीष्मकाले दिवास्वाप्नो हितः । यतस्तस्मिन्काले पवनचयो भवति । आदानस्य च परिपुष्टत्वादतिरौक्ष्यं भवति । रात्रयश्च निद्रासमाप्त्ययोग्या अल्पा भवन्ति । दिवास्वप्नश्च संतर्पकः । ग्रीष्मादपरस्मिन् काले कफपित्तकरः सोऽचिंत्यत्वाद्धेतु-प्रभावस्य । भाष्यादिक्लांतादीन् मुक्त्वा वर्जयित्वा तेनैतदुक्तं भवति । ग्रीष्मादपरस्मिन्नपि काले स्वप्न एषां हित एव । यानमश्वादि । क्षतः खड्गादिच्छिन्नः । अभिहतो लगुडादिना । स्वप्नोचिताः शीलितदिवास्वप्नाः । तत्र भाष्यादिक्लांतानां पवनकोपात्स्वप्नोऽनुज्ञातः । श्वासहिध्मादीनां वेगविस्मरणा-र्थम् । वृद्धादीनां यथायथं संतर्पणार्थं वेगविस्मरणार्थं च । अजीर्णिनां दिवास्वप्नोचितानां च धातुवैषम्यपरिहारार्थं दिवास्वप्नोऽनुमतस्तंत्रकृता । तथा चोक्तम् । उचितो हि दिवास्वप्नो येषां नित्यं शरीरिणाम् । वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवेति । नन्वजीर्णिनां दिवास्वप्नो न युक्तो दिवास्वप्नस्य कफवृद्धिकरत्वात् । कफवृद्ध्या चाग्निमांद्यम् । अग्निमांद्यादजीर्णान्नस्याऽपाक इत्ययुक्तस्तेषां दिवास्वप्नः । अत्रोच्यते । दिवास्वप्नेनाजीर्णिनां धातुसाम्यं भवति धातु-साम्ये च सति स्वस्थानस्थितैर्दोषैरनुपहतो वह्निः पचत्यामो भवति । कफस्तु वृद्धोऽपि नैतेषामग्निमांद्यं विधत्ते । अपित्वं-गानां पुष्टिमादधाति । अत एवानंतरमेवोवाच शास्त्रकारः धातुसाम्यं तथा ह्येषां श्लेष्मा चांऽगानि पुष्यतीति ॥५६–५९॥

ग्रीष्म ऋतु में दिवा-शयन का विधान—

वि०—ग्रीष्मकाल में—वायु का सञ्चय होने से, आदान काल होने से, रूक्षता होने से तथा रात्रियों के छोटा होने से दिन में सोना हितकारी है । अन्य ऋतुओं में दिन में सोने से कफ और पित्त दूषित होते हैं । बहुत बोलने, सवारी करने, पैदल चलने, मद्य सेवन, स्त्री-प्रसङ्ग एवं बोझा ढोने आदि कर्म एवं क्रोध, शोक और भय से थके लोगों को दिन में सोना उत्तम है । श्वास, हिक्का, अतीसार से पीड़ित; वृद्ध, बालक, निर्बल, क्षीण, क्षतकासी, प्यास, शूल से पीड़ित; अजीर्ण होने पर, चोट लगने पर एवं पागल तथा जिनको दिन में सोने की आदत है; उनको भी दिन में सोना अच्छा है । दिन में सोने से इनमें धातुओं की समानता होती है; और कफ अङ्गों को पुष्ट करता है ॥ ५६–५९ ॥

वक्तव्य—इन लोगों को भी दिन में थोड़ा ही सोना चाहिये तथा—प्रतिषिद्धेष्वपि······मुहूर्तं दिवास्वप्नमप्रति-षिद्धम् । रात्रावपि जागरितवतां जागरितकालादर्धमिष्यते दिवास्वप्नम् ।' (सू. शा. अ. ४।३८)

बहुमेदःकफाः स्वप्युः स्नेहनित्याश्च नाहनि ।
विषार्तः कण्ठरोगी च नैव जातु निशास्वपि ॥६०॥

स०—तथा बहुमेदः श्लेष्माणः स्निग्धाहारादिशीलिनश्च ग्रीष्मेऽप्यहनि न स्वप्युः । विषार्तः कंठरोगी च रात्रिष्वपि कदाचिदपि न स्वप्यात् ॥ ६० ॥

ग्रीष्म ऋतु में भी दिवा शयन का निषेध—

वि०—जिनमें कफ और मेद की अधिकता हो; और जो नित्य स्निग्ध भोजन करते हैं उनको (ग्रीष्म में भी) दिन में नहीं सोना चाहिये । विषरोगी और गले के रोगी को कभी भी रात में भी नहीं सोना चाहिये ॥ ६० ॥

अकालशयनान्मोहज्वरस्तैमित्यपीनसाः ।
शिरोरुक्शोफहृल्लासस्रोतोरोधाग्निमन्दताः ॥६१॥

स०—अकाले शयनं स्वप्नोऽकालशयनं तस्मादकाल-शयनान्मोहादयः स्युः । स्तैमित्यं गात्राणां निरुत्साहत्वम् ॥६१॥

असमय में निद्रा का निषेध—

वि०—असमय में सोने से—मोह, ज्वर, स्तिमितता (शरीर में निरुत्साह), पीनस, शिरदर्द, शोफ, जी मचलाना, स्रोतों में रुकावट और अग्निमान्द्य होता है ॥ ६१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अत्र च का चिकित्सेत्याह—

तत्रोपवासवमनस्वेदनावनमौषधम् ।
योजयेदतिनिद्रायां तीक्ष्णं प्रच्छर्दनाञ्जनम् ॥६२॥
नावनं लङ्घनं चिन्तां व्यवायं शोकभीक्रुधः ।
एभिरेव च निद्राया नाशः श्लेष्मातिसङ्क्षयात् ॥६३॥

स०—तेष्वकालस्वप्नजेषु रोगेषूपवासाद्यौषधं योजयेत्। निद्रायाश्च बाहुल्येन रात्रिः कालः। तथा चोक्तम्। लोकादिसर्गप्रभवा तमोमूला तमोमयी। बाहुल्यात्तमसो रात्रौ निद्रा प्रायेण जायत इति। अतिनिद्रायां सत्यां तीक्ष्णानि वमनांजननस्यानि योजयेत्। लंघनानि च। एभिरेव च तीक्ष्णवमनादिभिर्निद्राया नाशो भवति। श्लेष्माख्यस्य धातोरतिशयेनापचयात् ॥ ६२-६३ ॥

अतिनिद्रा की चिकित्सा—

वि०—चिकित्सा—इस अवस्था (अकालशयन-जनित विकारों) में उपवास, वमन, स्वेद, नस्य का प्रयोग करें। निद्रा के अधिक आने पर—तीक्ष्ण अञ्जन, तीक्ष्ण वमन, नस्य, लङ्घन, चिन्ता, सम्भोग, शोक, भय, क्रोध का सेवन करें। इनसे श्लेष्मा का बहुत क्षय होने पर निद्रा का नाश होता है ॥ ६२-६३ ॥

वक्तव्य—मनुष्य को रात में ही नींद क्यों आती है—इसके लिये 'लोकादिसर्गप्रभवा तमोमूला तमोमयी। बाहुल्यात्तमसो रात्रौ निद्रा प्रायेण जायते ॥' (संग्रह सू. अ. ९) 'रात्रिस्वभावप्रभवा च निद्रा'—(च. सू. अ. २१।५८) रात में तम की अधिकता होने से निद्रा आती है। इसके अतिरिक्त दिन काम करने के लिए और रात विश्राम के लिए है। दिन भर के श्रम के बाद सब इन्द्रियाँ थक कर विश्राम चाहती हैं तब नींद आती है।[1]

संप्रति निद्रानाशजान्विकारानाचष्टे—

निद्रानाशादङ्गमर्दशिरोगौरवजृम्भिकाः ।
जाड्यग्लानिभ्रमापक्तितन्द्रा रोगाश्च वातजाः ॥६४॥

स०—निद्रानाशादंगमर्दादयो वातोत्थाश्च रोगाः स्युः ॥ ६४ ॥

निद्रानाश के परिणाम—

वि०—निद्रा के नाश (समय पर न सोने से) से-अङ्गों का टूटना, शिर में भारीपन, जम्भाई आना; जड़ता, ग्लानि, चक्कर आना, भोजन का न पचना, तन्द्रा और वातजन्य रोग होते हैं ॥ ६४ ॥

यथाकालमतो निद्रां रात्रौ सेवेत सात्म्यतः ।
असात्म्याज्जागरादर्धं प्रातः स्वप्यादभुक्तवान् ॥६५॥

स०—यतश्च सम्यक् सेवितायां निद्राया असम्यक् सेवितायाश्चाऽनंतरोक्ता गुणा दोषाः। अतोऽस्माद्धेतोः कालानतिक्रमेण सात्म्यतो यामद्वयं त्रयं वा निशि निद्रां भजेत्। असात्म्याज्जागरादर्धेन स्वप्न इष्यते। किं तर्हि यो यावंतं कालमुचितं स्वपिति तस्मात्कालादर्द्धेन प्रातः स्वप्यात्। अभुक्तवानभुक्ते सति। असात्म्यग्रहणेनै तद् द्योतयति। न सर्वस्य रात्रावसुप्तस्य जागरणकालादर्धेन दिवास्वप्न इष्यते किं तर्हि यो यावंतं कालमुचितं स्वपिति तस्मात्कालाद्यावंतं कालं निशि जागृयात्तावतोऽर्धेनासौ प्रातः स्वप्यात्। केचिद्धि स्वल्पनिद्राः स्वभावतो भवंति ॥ ६५ ॥

निद्रा का समय—

वि०—इसलिये अपने सात्म्य की दृष्टि से (६ से ८ घण्टे तक) काल के अनुसार (समय पर) रात्रि में सोये। असात्म्य के कारण रात्रि में जागरण की अवस्था में (कभी आवश्यकतावश जागना ही पड़े तो) जागरण काल के आधे समय तक बिना भोजन किये प्रातः (दिनमें) सोये ॥ ६५ ॥

वक्तव्य—'रात्रौ स्वप्याच्च यामांस्त्रींस्तान्स्वप्याद् द्विर्दिवा नरः। एतदप्याहुरारोग्यं नात्र दोषोऽस्ति कश्चन ॥' (भेड)। तथा—'असुप्तानां तथा रात्रौ तन्मात्रं स्वपनं दिवा' (खरनाद) इस प्रकार रात्रि जागरण होने पर आधा, तिहाई या पूर्णकाल तक भी आवश्यकतानुसार सो सकते हैं; किन्तु बिना भोजन किए।

शीलयेन्मन्दनिद्रस्तु क्षीरमद्यरसान् दधि ।
अभ्यङ्गोद्वर्तनस्नानमूर्धकर्णाक्षितर्पणम् ॥६६॥
कान्ताबाहुलताश्लेषो निर्वृतिः कृतकृत्यता ।
मनोऽनुकूला विषयाः कामं निद्रासुखप्रदाः ॥६७॥

स०—यो यो मंदनिद्रः स क्षीरादीन् शीलयेत्। कांताबाहुलताश्लेषादयो निद्रासुखहेतवः। कांताबाहुलताश्लेषग्रहणमाश्लेषमात्रमेव निद्रासुखहेतुर्नतु ग्राम्यधर्मसेवेति दर्शनार्थम् ॥ ६६-६७ ॥

निद्राकर उपाय

वि०—जिनको बहुत थोड़ी नींद आती हो-वे दूध, मद्य, मांसरस और दही का सेवन करें। अभ्यङ्ग, उद्वर्त्तन, स्नान, शिर पर तेल लगाना; कान में तेल डालना, आँखों का तर्पण, स्त्री का आलिङ्गन; सुखी जीवन, मनोरथों की सम्पूर्णता और मन के अनुकूल विषय यथेच्छ निद्रा सुख को देने वाले हैं ॥ ६६-६७ ॥

ब्रह्मचर्यरतेर्ग्राम्यसुखनिस्पृहचेतसः ।
निद्रा सन्तोषतृप्तस्य स्वं कालं नातिवर्तते ॥६८॥

स०—अत एवानंतरमाह। ब्रह्मचर्यरतेर्निद्रा स्वं कालं नातिवर्तत इति। ब्रह्मचर्यरतस्याऽप्यनुगतो मैथुनाभिलाषो निद्रां नाशयेदित्याह। ग्राम्यसुखे निःस्पृहं चेतो यस्य स तस्य। तथा संतोषतृप्तस्य ॥ ६८ ॥

१. यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः ।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः ॥
(च. सू. अ. २१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मचर्य—

वि०—ब्रह्मचर्य में लगे हुए, सम्भोग सुख से विरक्त मन वाले, एवं यथालाभ से सन्तुष्ट व्यक्ति में नींद अपने ठीक समय का उल्लङ्घन नहीं करती, अर्थात् इनको नींद ठीक समय पर स्वयं आ जाती है ॥ ६८ ॥

यदा तु ग्राम्यधर्मेण विना न रतिरपत्यार्थिता वा तदा तदधिकारार्थमुच्यते—

ग्राम्यधर्मे त्यजेन्नारीमनुत्तानां रजस्वलाम् ।
अप्रियामप्रियाचारां दुष्टसङ्कीर्णमेहनाम् ॥६९॥
अतिस्थूलकृशां सूतां गर्भिणीमन्ययोषितम् ।
वर्णिनीमन्ययोनिं च गुरुदेवनृपालयम् ॥७०॥
चैत्यश्मशानाऽऽयतनचत्वराम्बुचतुष्पथम् ।
पर्वाण्यनङ्गं दिवसं शिरोहृदयताडनम् ॥७१॥
अत्याशितोऽधृतिः क्षुद्वान् दुःस्थिताङ्गः पिपासितः ।
बालो वृद्धोऽन्यवेगार्तस्त्यजेद्रोगी च मैथुनम् ॥७२॥

स०—ग्राम्यधर्मे स्त्रीपुंसयोगविषयेऽनुत्तानां स्त्रियं त्यजेदुत्तानां भजेदित्यर्थः। तथा रजस्वलत्वादियुतां त्यजेत्। दुष्टं व्याधिमलादिभिः संकीर्णं संकुचन्मेहनं योनिर्यस्यास्ताम् । तथा वर्णिनीं ब्रह्मचारिणीम् । अन्ययोनिमजामहिष्यादिं च त्यजेत्। गुर्विंत्यादि। ग्राम्यधर्मनिर्वर्तने गुरुदेवनृपालयांस्त्यजेत्। तथा चैत्यादींस्त्यजेत्। तेषु स्त्रिय न संगच्छेदित्यर्थः। चैत्यादीनां पर्याया दिनचर्यायामुक्ताः । आयतनं दुष्टानां निग्रहस्थानम्। पर्वाणि रविसंक्रांत्यादींस्त्यजेत्। तेषु कामं न सेवेतेत्यर्थः। तथाऽनंगम् अंगं जघनम् नांगमनंगमंगसदृशं जघनकार्यनिर्वर्तनयोग्यं मुखादिकमुच्यते। दाक्षिणात्या हि मुखेन कुर्वंति तन्निषिध्यते। दिवसं च त्यजेत्। दिने रतं न कुर्वीतेत्यर्थः। मूर्धवक्षोऽभिघातं च त्यजेत्। अत्याशितादयः सुरतं त्यजेयुः। अत्याशितोऽतिभुक्तः। अधृतिर्दुर्मनाः। अन्यवेगार्तः तृषादिवेगातुरः। ननु क्षुद्वान् क्षुद्वेगार्त उच्यते। ततोऽन्यवेगार्त इत्यनेनैवाऽस्यार्थस्य लब्धत्वात् किं क्षुद्वानित्यनेन। सत्यमेतत्। अतिशयार्थं त्वेतत्। यथा क्षुद्वेगार्तः स्त्रियं गच्छन्नतिशयेन पीडया बाध्यते न तथाऽन्यवेगार्त इति ॥ ६९-७२ ॥

असंभोग्य स्त्री—

वि०—सम्भोग के समय जो स्त्री उत्तान (चित्त) न हो; रजस्वला हो, अवाञ्छनीय हो; अनिष्ट आचार वाली हो; दूषित योनि (योनि रोग से युक्त हो), सङ्कुचित योनि, अति स्थूल, अति कृश, प्रसूता, गर्भवती, पराई स्त्री, ब्रह्मचारिणी हो उसका तथा विजातीय योनि का त्याग करे। गुरु के समीप, देवता के समीप, राजा के समीप, चैत्य, श्मशान, वधस्थान, चौपाल, पानी, चौराहा, पर्वकाल, अनङ्ग (मैथुनाङ्ग-योनि से भिन्न अंग-मुख आदि) और दिन में सम्भोग न करे। सम्भोग के समय हृदय और शिर पर प्रहार (मुष्टि आदि से) न करे। भोजन करने पर, अधीर होकर, भूखा होने पर, शरीर को विषम स्थिति में रख कर, प्यास लगी होने पर तथा मल, मूत्र आदि किसी के भी उपस्थित वेग से पीड़ित होने पर मैथुन न करे। बालक, वृद्ध और रोगी मनुष्य सम्भोग न करे ॥ ६९-७२ ॥

वक्तव्य—सम्भोग में स्त्री को उत्तान रहना चाहिये, यथा-'तस्मादुत्ताना बीजं गृह्णीयात्—यथा हि, यथास्थानमवतिष्ठन्ते दोषाः ॥' (चरक शा. अ. ८।६) अन्य योनि-बकरी, घोड़ी आदि की। अनङ्ग-अङ्ग=जघन या योनि; जो अङ्ग नहीं-सम्भोग के लिये अयोग्य अङ्ग; गुदा, मुख आदि। दिन में मैथुन-'प्राणा एव प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते॥' उपनिषद्। बालक और वृद्ध में—'नर्ते वै षोडशाद् वर्षात् सप्तत्याः परतो न च। आयुष्कामो नरः स्त्रीभिः संयोजयितुमर्हति ॥' (चरक चि. अ. २; ४।४०)

संप्रति ऋतुविशेषे निधुवनं नियमयति—

सेवेत कामतः कामं तृप्तो वाजीकृतो हिमे ।
त्र्यहाद्वसन्तशरदोः पक्षाद्वर्षानिदाघयोः ॥ ७३ ॥

स०—तृप्तो वाजीकरणैः संजातसंतर्पणः सन् कामतो यथेच्छया हिमे हेमंतर्तौ शिशिरे च कामं यथेच्छं सेवेत। वाजीकृतामिति संपदादित्वात्क्विप्। तृप्त इति क्तोऽधिकरणे च ध्रौव्येत्यादिनाऽधिकरणे क्तः। अधिकरणवाचिनश्चेति षष्ठी। वसंते शरदि च त्र्यहात् त्र्यहमतिक्रम्य मैथुनं निषेवेत। वर्षाग्रीष्मयोः पक्षात् कामं भजेत् ॥ ७३ ॥

स्त्रीप्रसंग का समय—

वि०—शीतकाल में वाजीकरण ओषधियों से तृप्त हुआ मनुष्य इच्छानुसार सम्भोग सुख का अनुभव करे। वसन्त और शरद् ऋतु में तीन दिन छोड़कर तथा वर्षा और ग्रीष्म में पन्द्रह दिन पीछे सम्भोग करे ॥ ७३ ॥

वक्तव्य—'ऋतावृतौ यथाकालं मैथुनं तु समाचरेत्। वर्षासु नवरात्रात्तु दशरात्राच्छरद्यपि ॥ पञ्चाहाच्छीतसमये सप्ताहाच्छिशिरे तथा। वर्षाद् वसन्ते ग्रीष्मे तु मासि मासे समाचरेत् ॥ निदाघे पश्चिमे मासि मैथुनं न समाचरेत् ॥' भेड़।

भ्रमक्लमोरुदौर्बल्यबलधात्विन्द्रियक्षयाः ।
अपर्वमरणं च स्यादन्यथा गच्छतः स्त्रियम् ॥ ७४ ॥

स०—अन्यथोक्तविधेरन्येन प्रकारेण स्त्रियं गच्छतो भ्रमादयः स्युः। अपर्वण्यकाले मरणमपर्वमरणम् ॥ ७४ ॥

अनियमित स्त्रीप्रसंग से हानि—

वि०—उपर्युक्त विधि को न पालने से भ्रम, क्लम, जाँघों में निर्बलता, बलक्षय, धातुक्षय, इन्द्रिय का क्षय और अकाल मृत्यु ये सब होते हैं ॥ ७४ ॥

वक्तव्य—दूषित योनि में और विपरीत सम्भोग करने से रोग होते हैं—उसके लिये 'विपरीतरतप्राप्त्या लिङ्गे दाहः प्रजायते। कार्श्यं च सर्वगात्रेषु तत्प्रतीकार उच्यते। प्रत्यग्वर्ति निबध्यैव लिङ्गाचूषणमाचरेत्। व्रणे तस्य संजाते स्नापये-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च्छीतलाम्बुना ॥ कोलनिर्यासमादाय पाययेत्तं सशर्करम् । शाल्मलीदूर्वयोर्मूलरसं पायसमाशयेत् ॥' रसायुर्वेद ।

स्मृतिमेधाऽऽयुरारोग्यपुष्टीन्द्रिययशोबलैः ।
अधिका मन्दजरसो भवन्ति स्त्रीषु संयताः ॥ ७५ ॥

स०—स्त्रीषु संयताः स्त्रीः सम्यक् सेवमानाः स्मृत्यादिभिरधिका अल्पजराश्च भवंति ॥ ७५ ॥

नियमित स्त्रीप्रसंग से लाभ—

वि०—स्त्रियों के विषय में संयमी पुरुष, स्मृति, मेधा, आयु, आरोग्य, पुष्टि, इन्द्रियों की शक्ति, शुक्र, यश और बल में अधिक होते हैं तथा इनको देर में बुढ़ापा आती है ॥७५॥

स्नानानुलेपनहिमानिलखण्डखाद्य-
शीताम्बुदुग्धरसयूषसुराप्रसन्नाः ।
सेवेत चानुशयनं विरतौ रतस्य
तस्यैवमाशु वपुषः पुनरेति धाम ॥ ७६ ॥

स०—रसांते यथौचित्येन स्नानादीन् सेवेत । खण्डखाद्यंखंडकृतं कणिकेत्यादि । रसो मांसरसः । चानुशयनमिति । अनु पश्चाच्च स्वप्नं सेवेत । तस्य स्नानादिसेविनः शरीरस्य एवमस्मिन्कृते धामं तेजो भूय आगच्छति । रमौ जौ वसंततिलकं गुरुकद्वयं च । स्नानांगरागव्यजनेंदुपादयूषासवक्षीररसान् रसालाम् । भक्ष्यान् सिताढ्यान् सलिलं सुशीतं सेवेत निद्रां च रतांततांत इति ॥ ७६ ॥

मैथुन के बाद सेवनीय पदार्थ—

वि०—सम्भोगके पीछे सेवनीय—सम्भोग के पीछे स्नान, चन्दनादि का लेप; शीतल वायु, शर्करा प्रचुर भक्ष्य (मोदक आदि), मांसरस, मूंग आदि का यूष, सुरा, निर्मल सुरा, निद्रा इनका सेवन करने से शरीर का तेज पुनः शीघ्र आ जाता है ॥ ७६ ॥

वक्तव्य—'भक्ष्याः सशर्कराः क्षीरं ससितं रस एव च । स्नानं सव्यजनं स्वापो व्यवायान्ते हितानि तु ॥' (सुश्रुत)

एतच्च पूर्वोक्तं हिताहितं सर्वं वैद्य एव वेत्ति तस्माद्वैद्ये सर्वथा शरीरं राज्ञां निवेद्यमिति दर्शयन्नाह—

श्रुतचरितसमृद्धे कर्मदक्षे दयालौ
भिषजि निरनुबन्धं देहरक्षां निवेश्य ।
भवति विपुलतेजःस्वास्थ्यकीर्तिप्रभावः
स्वकुशलफलभोगी भूमिपालश्चिरायुः ॥ ७७ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थानेऽन्नरक्षा नाम सप्तमोऽध्यायः ॥ ७ ॥

स०—भिषजि शरीररक्षणं निरनुबंधं निर्विकल्पमाधाय बहुकालमात्मीयश्रेष्ठफलभोगवान् तथा तेजश्च स्वास्थ्यं च कीर्तिश्च प्रभावश्च एवं विपुला विस्तीर्णास्तेजःस्वास्थ्यकीर्तिप्रभावा यस्य स एवंविधः । कीदृशे भिषजि । श्रुतं शास्त्रावबोधः । चरितमाचारः । ताभ्यां समृद्धे संपूर्णे । तथा क्रियाचतुरे । तथा कृपालौ । वसुमुनिविरतिश्चेन्मालिनी नौ मयौ यः ॥ ७७ ॥

इति श्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायामन्नपानरक्षाध्यायः सप्तमः ॥ ७ ॥

चिकित्सक को शरीर का स्वामित्व—

वि०—शास्त्र ज्ञानयुक्त एवं शास्त्रोक्त अनुष्ठान वाले, उपचार कुशल, दयावान, वैद्य में बिना शङ्का के अपने शरीर की रक्षा का भार सौंप कर राजा अतिशय कान्ति वाला, आरोग्य, कीर्त्ति तथा प्रताप से युक्त एवं अपने उपार्जित पुण्य के फल को भोगने वाला तथा दीर्घायु होता है ॥ ७७ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का अन्न-रक्षा नामक सातवाँ अध्याय समाप्त हुआ ।

अष्टमोऽध्यायः

अन्नरक्षाध्यायानंतरं मात्राशितीयो युक्तः । यतो विषादिभ्यो रक्षितमन्नपानं हीनमात्राभ्यवहृतं जीवितोपघाताय संपद्यते । मात्राभ्यवहृतं प्राणिनां प्राणाय—

अथातो मात्राऽशितीयमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

स०—अथेत्यानंतर्ये यथा । अथाऽतो धर्मजिज्ञासेति वेदाध्ययनादनंतरं धर्मो जिज्ञासितव्य इत्यर्थः । अतः इति प्रस्तुताभिसंबंधे । अशनमशितम् । भावे निष्ठा । मात्रयाऽशितं तस्मै हितो मात्राशितीयः । शेषं पूर्ववद्व्याख्येयम् ॥१॥

वि०—अब इसके आगे मात्राशितीय अध्याय का व्याख्यान करेंगे जैसा कि आत्रेय आदि महर्षियों ने कहा था ।

मात्राशी सर्वकालं स्यान्मात्राह्यग्नेः प्रवर्त्तिका ।
मात्रां द्रव्याण्यपेक्षन्ते गुरूण्यपि लघून्यपि ॥ १ ॥

स०—सर्वकालं स्वस्थ आतुरो वा मात्राशी स्यात् परिमिताशी भवेत् । कुतो हेतोः हि यस्मान्मात्राऽग्नेः प्रवर्तिका स्वव्यापारे अग्निप्रवृत्तिश्च देहस्थितिहेतुः । तथा चोक्तम् । अग्निमूलं बलं पुंसां बलमूलं हि जीवितमिति । तस्मान्मात्रायाः प्राधान्यम् । यस्माच्च कारणान्मात्रायाः प्राधान्यं ततो मात्रां द्रव्याण्यपेक्षंते गुरूण्यपि लघूनि च । तत्र गुरूणि पिष्टक्षीरद्राक्षाक्षोडेक्षुमाषानूपमांसादीनि । लघूनि दिव्योदकरक्तशालिषष्टिकमुद्गलावकपिंजलैणशशशंबरादीनि ॥ १ ॥

परिमित आहार का विधान—

वि०—सब समयों (रोगी और स्वस्थावस्था) में मनुष्य को मात्रा में खाने वाला होना चाहिये; क्योंकि मात्रा अग्नि को (स्वकर्म=पाचन कार्य में) प्रवृत्त करने वाली है । गुरु द्रव्य और लघु द्रव्य सभी मात्रा की अपेक्षा करते हैं ॥ १ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्र गुरूणां का मात्रा का लघूनामित्याह—

गुरूणामर्धसौहित्यं लघूनां नातितृप्तता।
मात्राप्रमाणं निर्दिष्टं सुखं यावद्धि जीर्यति॥ २॥

स०—गुरूणां द्रव्याणामर्धसौहित्यमर्धतृप्तिः लघूनां नातितृप्तता नातितृप्तिः किं तर्हि सौहित्यमात्रम्। एतन्मात्राप्रमाणं निर्दिष्टम्। मात्रा ह्रस्वा मध्या बृहती च तस्याः प्रमाणम्। तत्र प्रमाणं मानम्। एवं चात्र मात्राशब्दस्यापौनरुक्त्यम्। हि तावत् परिमाणमभ्यवहृतं सुखमविकृतिं कृत्वा परिणमति। एतद्विपर्ययेण हीनमात्रं भोजनं वर्ज्यं दोषदर्शनात्॥ २॥

गुरु लघु द्रव्यों की मात्रा[1]—

वि०—जितनी आहार-राशि से तृप्ति उत्पन्न हो, उससे आधी मात्रा में गुरु द्रव्यों का सेवन करना चाहिये। लघु द्रव्यों को बहुत पेट भर कर नहीं खाना चाहिये। जितना सुखपूर्वक पच जाये वही मात्रा का प्रमाण जानना चाहिये॥ २॥

वक्तव्य—कहा भी है 'यदभ्यवहृतं सम्यग् यथाकालं जरां व्रजेत्। प्रकृत्यविकृतिं कृत्वा तन्मात्रालक्षणं विदुः॥'

यथा चाह—

भोजनं हीनमात्रं तु न बलोपचयौजसे।
सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते॥ ३॥

स०—हीनमात्रं पुनरशनं न बलाय नोपचयाय न चौजसे। सर्वेषां वातरोगाणां कारणतां याति॥ ३॥

अत्यल्प भोजन से हानि—

वि०—मात्रा से कम किया भोजन न तो बल के लिये, न पुष्टि के लिये और न कान्ति के लिये होता है। और सब वातरोगों की उत्पत्ति में कारण बनता है॥ ३॥

अतिमात्रं पुनः सर्वानाशु दोषान् प्रकोपयेत्।

स०—अतिमात्रं त्वशनं त्रीनपि दोषान् शीघ्रमेव प्रकोपयति।

अति भोजन से हानि—

वि०—मात्रा से अधिक किया भोजन सब दोषों को शीघ्र प्रकुपित कर देता है।

कुपिताश्च त्रयो दोषा अलसकाख्यं विसूचिकाख्यं वा व्याधिं यथा कुर्वंति तथा दर्शयति—

पीड्यमाना हि वाताद्या युगपत्तेन कोपिताः॥ ४॥
आमेनान्नेन दुष्टेन तदेवाविश्य कुर्वते।
विष्टम्भयन्तोऽलसकं च्यावयन्तो विसूचिकाम्॥ ५॥
अधरोत्तरमार्गाभ्यां सहसैवाजितात्मनः।

स०—तेनापक्वेनाहारेण दुष्टेन वाताद्या हि यस्मात्पीड्यमाना विबध्यमाना रुद्धमार्गत्वादत एव युगपदेककालं सर्व एव कोपितास्तदेव दुष्टमन्नमाविश्याऽलसकं कुर्वते। किंकुर्वतः। विष्टंभयंतस्तदेव दुष्टमन्नं स्रोतःसुरुन्धानाः तथाऽधरोत्तरमार्गाभ्यां सहसैवानुचिते देशे काले च्यावयंत ऊर्ध्वमधश्च निष्कर्षयंतः। अजितात्मनोऽसंयतचेतसः मनुजस्य विषूचिकां कुर्वते॥ ४-५॥

अजीर्ण भोजन का परिणाम—

वि०—क्योंकि मात्रा से अधिक खाने से सभी दोष उसी दुष्ट आम अन्न से दबते हुए पुनः एक साथ कुपित होकर उसी दूषित आम अन्न में प्रविष्ट होकर उसको रोकते हुए अलसक को उत्पन्न करते हैं; अथवा आम अन्न को ऊपर एवं निचले मार्ग से (वमन-विरेचन रूप में) वेगपूर्वक बाहर करते हुए असंयमी पुरुष में विसूचिका उत्पन्न करते हैं॥ ४-५॥

एतदेव सविस्तरमाह—

प्रयाति नोर्ध्वं नाधस्तादाहारो न च पच्यते॥ ६॥
आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः।

स०—ऊर्ध्वं मुखेनाहारो न प्रयाति न चाधस्तद्गुदेन प्रयाति न चाहारः पच्यते आमाशये नाभिस्तनांतरं जंतोरामाशय इति स्मृतस्तस्मिन्नलसीभूत इवालसीभूतः। यथाऽकर्मशीलः पुरुषोऽलस इत्युच्यते तथाऽयमाहारोऽलसीभूतस्तिष्ठति तेन हेतुना स रोगोऽलसकः स्मृतः॥ ६॥

अलसक का लक्षण—

वि०—इससे आहार न तो मुख से (वमन द्वारा) और न गुदा मार्ग से बाहर जाता है, और न पचता है; केवल आमाशय में अकर्मशील-निष्क्रिय पड़ा रहता है, इसलिये उसे अलसक कहते हैं॥ ६॥

विसूचिकायास्तु निर्वचनमाह—

विविधैर्वेदनोद्भेदैर्वाय्वादिभृशकोपतः॥ ७॥
सूचीभिरिव गात्राणि विध्यतीति विसूचिका।

स०—वाय्वादीनां त्रयाणामत्यंतप्रकोपान्नानाप्रकारैर्वेदनोद्भेदैः पीडोत्पादैर्यस्माद्गात्राणि सूचीभिरिव विध्यति तस्माद्विसूचिकेत्युच्यते। विविधानां विकाराणां सूचिका विसूचिका विसूचिकेत्युच्यते॥ ७॥

विसूचिका के लक्षण—

वि०—विसूचिका—अतिशय कुपित वातादि-नाना प्रकार की वेदनाओं को उत्पन्न करके शरीर के अङ्गों में सूई के चुभने के समान पीड़ा देते हैं—इसलिये इस रोग को विसूचिका

१. मात्रा सम्यग्योग की निर्देशिका है। अमात्रा से अयोग या हीनयोग तथा अतियोग और मिथ्यायोगरूप असम्यग्योग का निर्देश होता है। हेमाद्रि ने असम्यग्योग के सात भेद लिखे हैं:— १-सङ्कीर्णभोजन = निषिद्ध लोगों के घर या उनके साथ और निषिद्ध अन्न का भोजन. २-विरुद्धभोजन = संयोगादिविरुद्ध. ३-अजीर्णाशन = उचित मात्रा में भी जिसका पाचन न हो. ४-५-६-समाशन, अध्यशन और विषमाशन (इसका वर्णन आगे किया गया है) तथा ७-अमात्राशन—जिसका वर्णन कर रहे हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(विविधानां विकाराणां सूचिका अथवा विविधसूचीतुल्यत्वाद् विसूचिका) कहते हैं ॥ ७ ॥

तत्र शूलभ्रमानाहकम्पस्तम्भादयोऽनिलात् ॥ ८ ॥
पित्ताज्ज्वरातिसारान्तर्दाहतृट्प्रलयादयः ।
कफाच्छर्द्यङ्गगुरुतावाक्सङ्गष्ठीवनादयः ॥ ९ ॥

स०—वातादधिकाच्छूलादयो भवंति । आदिशब्देनांगोद्वेष्टनमुखशोषादिपरिग्रहः । पित्तादुद्वृद्धाज्ज्वराद्याः स्युः । प्रलयो मूर्च्छाप्रायः । आदिशब्देन मदादिपरिग्रहः ॥ कफादधिकाच्छर्द्यादयो भवंति । आदिशब्देन स्वब्धादीनां ग्रहणम् ॥ ८–९ ॥

विसूचिका में उपद्रव—

वि०—इसमें वायु से शूल, भ्रम, आनाह, कम्प, स्तम्भ आदि होते हैं । पित्त से-ज्वर, अतिसार, अन्तर्दाह, प्यास, मूर्च्छा आदि होते हैं । कफ के कारण-वमन, अंगों में भारीपन, वाणी का अवरोध, थूक का आना आदि होता है ॥ ८–९ ॥

विशेषाद् दुर्बलस्याल्पवह्नेर्वेगविधारिणः ।
पीडितं मारुतेनान्नं श्लेष्मणा रुद्धमन्तरा ॥ १० ॥
अलसं क्षोभितं दोषैः शल्यत्वेनैव संस्थितम् ।
शूलादीन् कुरुते तीव्रांश्छर्द्यतीसारवर्जितान् ॥ ११ ॥
सोऽलसः—

स०—दुर्बलत्वादियुक्तस्य यन्मारुतेन विशेषादन्नं पीडितमंतराऽऽमाशयमध्य एव श्लेष्मणा रुद्धमलसीभूतं तथा दोषैः क्षोभितमाकुलितमत एवाऽतिपीडाकारित्वाच्छल्यरूपत एव स्थितं तीव्रान् दुःसहान् शूलादीन् छर्द्यादिवर्जितान् कुरुते । छर्द्यतीसाराभ्यां विसूचिकोक्ता । सोऽलससंज्ञो रोगः । दुर्बलो ह्यनुपचितधातुः स न कदाचिदाहारं सोढुं शक्तः । अल्पाग्नेश्चाहारं सम्यङ् न जीर्यति । यतो वेगधारणशीलस्य प्रतिहतो वायुर्विमार्गगः पित्तकफावपि विमार्गगौ कुरुत इत्येतद्विशेषेण निर्देशः ॥ १०–११ ॥

अलसक—

वि०—अलसक—विशेष करके दुर्बल, मन्दाग्नि एवं रोगों को रोकने वाले पुरुषों में वायु से पीड़ित अन्न मार्ग में कफ के कारण रुक जाने से निष्क्रिय बनकर वातादि दोषों से सञ्चालित होकर शल्य रूप में (कष्ट देता हुआ) स्थित होकर वमन-अतिसार से रहित उपर्युक्त शूलादि लक्षणों को उत्पन्न करता है तो इसको अलसक कहते हैं ॥ १०–११ ॥

दंडकालसकं लिलक्षयिषुराह—

—अत्यर्थदुष्टास्तु दोषा दुष्टामबद्धखाः ।
यान्तस्तिर्यक्तनुं सर्वां दण्डवत्स्तम्भयन्ति चेत् ॥ १२ ॥
दण्डकालसकं नाम तं त्यजेदाशुकारिणम् ।

स०—अतिशयेन दुष्टा दोषास्तथा दुष्टामेन बद्धानि पूर्णानि खानि स्रोतांसि यैस्ते दुष्टामबद्धखाः । तथा तिर्यग्गच्छंतः तनुं सर्वां शरीरं सकलं दंडवद्यदि स्तंभयंति प्रसारणाकुंचनरहितं कुर्वंति तदा दंडकालसको नाम रोगो भवति । तं दंडकालसकं त्यजेन्नोपक्रमेत् । यत आशुकारिणमाशु शीघ्रं स्वकर्म मारणं करोतीत्याशुकरी । क्षिप्रं हंतीत्यर्थः ॥ १२ ॥

दण्डालसक—

वि०—दण्डालसक—अतिशय दूषित एवं दूषित आम से अवरुद्ध स्रोतों वाले दोष जब तिरछे जाते हुए शरीर को दण्डे की भाँति स्तब्ध बना देते हैं-तब इसको 'दण्डालसक' कहते हैं । इस दण्डालसक की चिकित्सा नहीं करनी चाहिये—क्योंकि यह शीघ्र मारक है ॥ १२ ॥

वक्तव्य—दूषित आम से स्रोतों के बन्द हो जाने से दोष मार्गावरोध के कारण तिरछे जाते हैं।[1]

संप्रत्यामविषं निर्दिशति—

विरुद्धाध्यशनाजीर्णशालिनो विषलक्षणम् ॥ १३ ॥
आमदोषं महाघोरं वर्जयेद्विषसंज्ञकम् ।
विषरूपाशुकारित्वाद्विरुद्धोपक्रमत्वतः ॥ १४ ॥

स०—विरुद्धं प्रागुक्तं विरुद्धमपीत्यादिना । विषादध्यशनमित्यादिनाऽध्यशनम् । अजीर्णं च त्रिविधं वक्ष्यति । एतानि शीलितुं शीलं यस्य तस्य पुंसो य आमदोषो विषलक्षणलालादिलक्षणयुक्तो महाघोरोऽतिकष्टो विषाख्यो यो भवति तं न चिकित्सेत् । कुतः । विषरूपत्वादाशुकारित्वाद्विरुद्धोपक्रमत्वाच्च । विषसदृशस्वरूपत्वाद्विषे शीतोपक्रमो युक्त आमे चोष्णोपक्रमो युक्त इति विरुद्धोपक्रमत्वम् ॥ १३–१४ ॥

आम विष का लक्षण—

वि०—विरुद्ध भोजन-अध्यशन और अजीर्ण में भोजन करने के अभ्यस्त पुरुष में उत्पन्न विष के समान लक्षणों वाले; तीव्र पीड़ा कारक, विष संज्ञा वाले आम दोष की चिकित्सा नहीं करे । क्योंकि यह आम दोष-विष के समान-शीघ्र मारक और विरुद्ध चिकित्सावाला होता है ॥ १३–१४ ॥

---

१. अतिमात्रा में भोजन करने पर आमाशय में अत्यधिक तनाव होता है, वातादि दोषों के सञ्चार के लिए तथा पाचन के लिये आमाशय के संकोच विस्तार के लिए स्थान नहीं रहता जिससे आहार के साथ पाचक रस ठीक से मिल नहीं पाते और वह अन्न अपक्व ही पड़ा रहता है । इससे अत्यधिक क्षोभ होने से वातादि दोष और भी बढ़ते हैं और अनेक प्रकार के कष्ट होते हैं ।

अन्ततः यदि वमन और विरेचन आरम्भ हो जाता है तो उसे विसूचिका कहते हैं । जब वमन विरेचन न होकर अपक्व अन्न आमाशय में ही पड़ा रहकर कष्ट देता है तो उसे अलसक कहते हैं । देर तक पड़ा रहने पर उसमें सड़ान प्रारम्भ होती है और थोड़ा बहुत दूषित रस भी बनता है । यही दूषित रस शरीर में व्याप्त होकर विभिन्न स्रोतों में अवरोध और विकृति के साथ स्तब्धता उत्पन्न कर दण्डालसक उत्पन्न करता है और विषाक्तता अधिक होने पर आमविष उत्पन्न करता है ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—आम विष 'विरुद्धाध्यशनाजीर्णशालिनः पुनरामदोषमामविषमाचक्षते ॥' (चरक वि० अ २।१५)

विरुद्धोपक्रम—विष में शीत चिकित्सा करनी चाहिये; आम में उष्ण चिकित्सा करनी है, इसीलिये विरोधी है। विष के लक्षण—लाला आदि लक्षण रहते हैं।

अलसकोपक्रमं निर्दिदिक्षुरिदमाह—

अथाऽममलसीभूतं साध्यं त्वरितमुल्लिखेत्।
पीत्वा सोग्रापटुफलं वार्युष्णं योजयेत्ततः॥ १५॥
स्वेदनं फलवर्तिं च मलवातानुलोमनीम्।
नाम्यमानानि चाङ्गानि भृशं स्विन्नानि वेष्टयेत्॥१६॥

स०—अथेत्यानंतर्ये। पूर्वोक्तं साध्यासाध्यमवगम्याऽनंतरमामं साध्यमदुष्टं संतं त्वरितं द्रागातुर उल्लिखेदुद्वमेदित्यर्थः। किंविधमामम्। अलसीभूतम्। अलसलक्षणतामगतमुल्लिखेदित्याह। पीत्वेत्यादि। वचालवणमदनफलयुक्तं जलमुष्णं पीत्वा वमेदित्यर्थः। ततोऽनंतरं स्वेदनं योजयेत्। तथा। विपाच्य मूत्राम्लमधूनि दंतीपिंडीतकृष्णाबिडधूमकुष्ठैः। वर्तिं करांगुष्ठनिभ घृताक्तां गुदे रुजानाहहरीं विदध्यादित्यादि फलवर्तिं च मलवातानुलोमनीं योजयेत्। तत्रामदोषे दोषवशादंगानि च नाम्यमानानि संकोच्यमानानि संस्वत्यर्थं स्विन्नानि वस्त्रादिना वेष्टयेत्॥ १५-१६॥

अलसक में चिकित्सा—

वि०—अलसक की चिकित्सा—साध्य-अलसीभूत (निष्क्रिय बने) आम (अपक्व आहार) को जल्दी से वमन द्वारा बाहर करे। वमन के लिये-वच-नमक और मैनफल मिश्रित गरम पानी पिलावे। वमन के पीछे स्वेदन करे, तथा वायु-एवं मल का अनुलोमन करने वाली फलवर्त्ति बरते। जो अङ्ग बहुत संकुचित हो गये हों उनको अतिशय स्वेदन कर वस्त्रों से लपेट देना चाहिये॥ १५-१६॥

वक्तव्य—फलवर्त्ति-'विपाच्यमूत्राम्लमधूनि दन्ती-पिण्डीतकृष्णाविडधूमकुष्ठैः। बर्त्तिं कराकुष्ठनिभां घृताक्तां गुदे रुजानाहहरीं विदध्यात्॥' चिकित्सा अलसक की—'शूले तु स्तिमिते सामे स्वेदः शस्तो मुहुर्मुहुः। रूक्षोष्णैः लटुकैः पांशु-करीषसिकतादिभिः। पिप्पल्योऽगारधूमश्च मदनं सर्षपास्त्रिवृत्॥ हेमक्षीरी वचा किण्वं कुष्ठं दन्ती यवाग्रजः। समूत्रलवणाभ्यक्ता फलवर्त्तिरियं हिता॥ संस्वेद्यालसके शूलं विबन्धानाहनाशिनी॥' (खरनाद)

विसूच्यामतिवृद्धायां पार्ष्ण्योर्दाहः प्रशस्यते।
तदहश्चोपवास्यैनं विरिक्तवदुपाचरेत्॥ १७॥

स०—विसूच्यां पूर्वोक्तलक्षणायामतिवृद्धायां सत्यां पार्ष्ण्योः खुरिकयोरयःशलाकादिना दाहः प्रशस्यते। तदहर्विसूचिकावंतमुपवास्य लंघयित्वा विरिक्तवत्पेयादिक्रमेणोपाचरेत्। सुश्रुते चोक्तम्। सुच्छर्दितविरिक्तस्य गात्रायामेऽतिदारुणे। भल्लातकमधूच्छिष्टसीसपिण्याकनागरैः। घृततैलं पचेत् साम्लैस्तच्च खल्लीघ्नमुत्तमम्। त्वक्पत्रारास्नागुरुशिग्रुकुष्ठैरम्लप्रपिष्टैः सवचाशताह्वैः। उद्वर्तनं खल्लिविसूचिकाघ्नं तैलं विपक्वं च तदर्थकारि। शिरीषनक्ताह्वफणिज्जबीजत्रायंत्यपामार्गफलानि वर्तिः। बस्तस्य मूत्रेण विसूचिकाघ्नी प्रलेपनस्यांजनधूमयोगैरिति॥ १७॥

प्रबल विसूचिका में उपाय—

वि०—विसूचिका रोग बहुत बढ़ गया हो तो पार्ष्णियों (एड़ी) में दाह करना उत्तम है। और (आम दोष निवृत्त होने पर) उस दिन रोगी को उपवास कराके पीछे विरेचन की भाँति पेयादि क्रम बरते॥ १७॥

वक्तव्य—दाह के लिये पिप्पली का भी उपयोग होता है, यथा-'विसूच्यामतिवृद्धायां पार्ष्णिदेशे च दाहयेत्। पिप्पल्या वाऽप्यरण्या वा शस्त्रेणातापितेन वा॥'

तीव्रार्तिरपि नाजीर्णी पिबेच्छूलघ्नमौषधम्।
आमसन्नोऽनलो नालं पक्तुं दोषौषधाशनम्॥ १८॥
विहन्यादपि चैतेषां विभ्रमः सहसाऽऽतुरम्।

स०—अजीर्णी तीव्रशूलोऽपि सन् शूलहरमौषधं न पिबेत्। वमनकरमुष्णोदकं च प्रागुपदिष्टमेव पिबेदित्यर्थः। शूलघ्नमित्युपलक्षणार्थम्। छर्द्यतीसारघ्नमपि विसूचिकायां न पिबेत्। यत आमेन सन्नो मंदीभूतोऽग्निर्दोषौषधाशनं पक्तुं न समर्थः। एतेषां च दोषौषधाशनानां त्रयाणां संबन्धी यो विभ्रमो व्यापत्तिः सहसा कालमनपेक्ष्य चातुरं हन्यात्। न केवलमिदं गुणाय संपद्यते प्रत्युत दोषं करोतीति सूचनार्थमपि चेति कृतम्॥ १८॥

अजीर्ण में उपाय—

वि०—अजीर्ण अवस्था में औषध नहीं देनी—अतिशय पीड़ा होने पर भी अजीर्ण रोगी को शूलनाशक—औषधि नहीं पीनी चाहिये। क्योंकि आम के कारण मन्द हुई अग्नि दोष, औषध और भोजन तीनों को पकाने में समर्थ नहीं हो सकती। और इन सबकी व्यापत्ति रोगी को एकदम मार भी सकती है। (विभ्रमः—संक्षोभ, बेचैनी। अर्थात् उस अवस्था में प्रयुक्त ओषधि न केवल व्यर्थ होगी, किन्तु हानिकारक भी होगी।)॥ १८॥

कदौषधं युंजीतेत्याह—

जीर्णाशने तु भैषज्यं युञ्ज्यात् स्तब्धगुरूदरे॥ १९॥
दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च।

स०—जीर्णमशनं यस्य तस्मिन्नौषधं युंज्याद्वैद्यः। कीदृशि। स्तब्धमचलं गुरूदरं कोष्ठो यस्य तस्मिन्। किमर्थमौषधं युंज्यादित्याह। दोषेत्यादि गतार्थम्॥ १९॥

अजीर्ण में औषध सेवन का काल—

वि०—आहार के जीर्ण हो जाने पर यदि उदर स्तब्ध (निश्चल), और भारी हो तो बचे हुये दोष के पाचन के लिये तथा अग्नि को प्रदीप्त करने के लिये दीपन-पाचन औषध देनी चाहिये॥ १९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कीदृशमौषधं योज्यमित्याह—

शान्तिरामविकाराणां भवति त्वपतर्पणात् ॥ २० ॥
त्रिविधं त्रिविधे दोषे तत्समीक्ष्य प्रयोजयेत् ।

स०—तुरवधारणे । यस्मादपतर्पणादेवामजातानां विकाराणामालस्यजाड्याग्निमांद्यादीनां शांतिरुपशमो भवति तस्मादपतर्पणं योजयेत्। वक्ष्यति हि। मेहामदोषातिस्निग्धे-त्यारभ्य यावल्लंघयेन्नित्यमिति । तस्मादपतर्पणं समीक्ष्य देशकालाग्न्यादीन् पर्यालोच्य त्रिप्रकारं त्रिप्रकारे दोषे वैद्यः प्रयोजयेत् ॥ २० ॥

औषध का निर्णय—

वि०—आमजन्य रोगों की शान्ति अपतर्पण से होती है। तीन प्रकार (अल्प, मध्य और प्रभूत) के दोषों में (देश, काल, अग्नि का) विचार करके निम्नलिखित तीन प्रकार के अपतर्पण को बरतना चाहिये ॥ २० ॥

संप्रत्येतदेव यथायोगमाह—

तत्राल्पे लङ्घनं पथ्यं, मध्ये लङ्घनपाचनम् ॥ २१ ॥
प्रभूते शोधनं, तद्धि मूलादुन्मूलयेन्मलान् ।

स०—तत्र तेषु त्रिषु मध्येऽल्पे दोषे लंघनमुपवासाख्यं पथ्यम्। तेन ह्यनलानिलवृद्धाऽल्पो दोषः शीघ्रं संशोष्य जीयते। मध्ये दोषे लंघनं पाचनं च पथ्यम्। अग्निः पचति तस्य पचतो ये विबंधादयो भवंति तान्निषिध्य पाटवमदधानं पचेति प्रयुंक्त इव तत् पाचयतीति पाचनमुच्यते। हेतुमण्णि-जंतात्पचेर्बाहुलकात्कर्तरि ल्युट् । यदुपयुक्तमन्नपानौषधमप-क्वानां सामानां धातूनां पाचने समर्थं तत् पाचनमित्यर्थः। प्रभूते शोधनं पथ्यम्। शोधनं तु कायाद्बहिर्दोषानीरयति। वक्ष्यति हि। यदीरयेद्बहिर्दोषान्पंचधा शोधनं तु तदित्यादि। कुतः। प्रभूत आमदोषे शोधनं हितमित्याह। तद्धीत्यादि। हि यस्मात्तच्छोधनं मूलान्मलान्नाशयेत्। संग्रहेऽप्युक्तम्। बहु-दोषाणां पुनर्दोषावसेचनमेव कार्यं नह्यस्राविते पल्वलोदकौघे शाल्यादिपुष्टिर्भवतीति ॥ २१ ॥

औषध की यथायोग्यता—

वि०—दोष के थोड़ा होने पर लङ्घन पथ्य है; दोष के मध्यम होने पर लंघन और पाचन पथ्य है और दोष के प्रचुर होने पर शोधन (वमन-विरेचनादि) पथ्य है; क्योंकि शोधन मलों को जड़ से उखाड़ देता है ॥ २१ ॥

न च हेतुव्याधिविपर्यययोरेव चिकित्सायामुपयोग इति दर्शयन्नाह—

एवमन्यानपि व्याधीन् स्वनिदानविपर्ययात् ॥ २२ ॥
चिकित्सेदनुबन्धे तु सति हेतुविपर्ययम् ।
त्यक्त्वा यथायथं वैद्यो युञ्ज्याद्व्याधिविपर्ययम् ॥२३॥
तदर्थकारि वा, पक्वे दोषे त्विद्धे च पावके ।
हितमभ्यञ्जनस्नेहपानवस्त्यादि युक्तितः ॥ २४ ॥

स०—यथा संतर्पणोत्थ आमदोषो निदानविपर्ययाच्चि-कित्स्यत एवमन्यानपि ज्वरादीन् विकारान् स्वनिदानविपर्ययाच्चिकित्सेत्। संतर्पणोत्थोऽपतर्पणेन शीतोत्थ उष्णेनेत्यादि यदि त्वेवमुपक्रम्यमाणो व्याधिरनुबध्यते तेनोपशमं न गच्छेत् ततो हेतुविपर्ययं त्यक्त्वा व्याधिविपर्ययं युंज्यात्। किंभूतम्। यथायथं यद्यस्य ज्वरादिव्याधेर्भैषज्यं वक्ष्यमाणं तत्प्रयुंजीते-त्यर्थः। यथा मुस्तापर्पटकं ज्वरे रजनी प्रमेह इति। तन्निदान-व्याधिविपर्ययासाध्यमर्थं रोगोपशमलक्षणं कर्तुं शीलं यस्य तत्तदर्थकारि तद्वा युंज्यात्। यथा मदात्यये मद्यपानमतिसारे विरेचनमिति। वाशब्दः समुच्चयार्थ इति विविधमौषधं निर्दि-श्याऽऽमचिकित्सामेवानुसरन्नाह। पक्वे दोषे निरामे दीप्ते पावके च निरामत्वे दीप्ताग्नित्वे च समुचितमेव हितमभ्यंगादि-कम् युक्तितो मात्रया यथाऽग्निसादादि न भवतीति ॥२२-२४॥

रोगान्तर में चिकित्सा क्रम—

वि०—इसी सिद्धान्त से वैद्य दूसरे रोगों में भी कारण विपरीत चिकित्सा बरते। यदि इससे पूर्ण शमन न हो तो कारण विपरीत चिकित्सा को छोड़ कर यथोचित रोग-विपरीत चिकित्सा बरते।

अथवा निदान और रोग दोनों के विपरीतार्थकारी[1] औषध देवे—यथा मद्यपान-जनित मदात्यय में मद पिलावे, अतिसार में विरेचन देवे। दोष के पक जाने पर (निराम हो जाने पर) और अग्नि के प्रदीप्त हो जाने पर अभ्यङ्ग, स्नेहपान, वस्ति आदि को युक्तिपूर्वक बरते ॥ २२-२४ ॥

अजीर्णं लक्षयितुमाह—

अजीर्णं च कफादामं तत्र शोफोऽक्षिगण्डयोः ।
सद्योभुक्त इवोद्गारः प्रसेकोत्क्लेशगौरवम् ॥ २५ ॥

स०—अग्निप्रतिपक्षत्वेन कफस्याऽजीर्णकरणप्राधान्यादग्रे निर्देशः। कफात्सकाशादजीर्णमामसंज्ञकं भवति। तत्रामाख्येऽ-जीर्णेऽक्षिकूपयोर्गण्डयोः शोफो भवति । सद्योभुक्तवदप्राप्त-विदाहश्च उद्गारः। प्रसेकः प्रसक्तं निष्ठीवनम्। उत्क्लेशो दोषाणां स्थानाच्चलनम्। गौरवं गात्राणाम् ॥ २५ ॥

अजीर्ण के प्रकार और उनके लक्षण—

वि०—आमाजीर्ण—कफजन्य अजीर्ण को आमाजीर्ण कहते हैं। इसमें आंख और गण्डस्थल पर सूजन; तुरन्त भोजन किये हुए की भांति (अविदग्धावस्था का ही) उद्गार, लालास्राव, जी मचलाना और भारीपन होता है ॥ २५ ॥

विष्टब्धमनिलाच्छूलविबन्धाध्मानसादकृत्
पित्ताद्विदग्धं तृण्मोहभ्रमाम्लोद्गारदाहवत् ॥ २६ ॥

स०—अनिलाद्विष्टब्धं नामाजीर्णं भवति । तच्च शूलादिकृत्। पित्ताद्विदग्धं नामाऽजीर्णमुत्पद्यते। तच्च तृडादि-युक्तम् ॥ २६ ॥

१. विपरीतं अर्थं कर्तुं शीलं यस्य तद् विपरीतार्थकारि। अर्थात् जो औषधादि सामान्यतः कारण और व्याधि के समान प्रतीत होते हुए भी उनके विपरीत कार्य करते हैं वे तदर्थकारी कहलाते हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—वायु के कारण विष्टब्धाजीर्ण होता है; इसमें शूल, वातादि का अवरोध, आध्मान और शरीर में शिथिलता होती है ॥ २६ ॥

पित्त के कारण विदग्धाजीर्ण होता है; इसमें प्यास, मोह, भ्रम, खट्टे डकार आना और दाह होता है।

त्रिविधस्यैवास्य चिकित्सामाह—

लङ्घनं कार्यमामे तु विष्टब्धे स्वेदनं भृशम्।
विदग्धे वमनं यद्वा यथाऽवस्थं हितं भवेत् ॥ २७ ॥

स०—तुरवधारणे। आमाख्येऽजीर्णे लंघनमेव कार्यं न वमनविरेचनादि। विष्टब्धे स्वेदनं भृशं कार्यम्। भृशशब्देनै तद् द्योतयति। पूर्वत्रापि स्वेदनं कार्यमत्र त्वत्यर्थमिति। विदग्धे विदग्धनाम्न्यजीर्णे वमनं कार्यम्। यद्वा लंघनस्वेदनवमनानां यथावस्थं यथादोषोद्रेकं हितं भवेत्तदेव कार्यम्। आमाजीर्णेऽपि स्वेदनवमने विदग्धेऽपि लंघनस्वेदने इति ॥२७॥

त्रिविध अजीर्ण की चिकित्सा—

वि०—आमाजीर्ण में लंघन कराना चाहिये। विष्टब्धाजीर्ण में अतिशय स्वेदन तथा विदग्धाजीर्ण में वमन कराना चाहिये। अथवा जो कार्य जिस अवस्था में योग्य प्रतीत हो, उस कार्य को उस अवस्था में बरते ॥ २७ ॥

गरीयसो भवेल्लीनादामादेव विलम्बिका।
कफवातानुबद्धाऽऽमलिङ्गा तत्समसाधना ॥ २८ ॥

स०—गरीयसः प्रभूतादर्जीर्णादेव विलंबिका स्यात्। कीदृशात्। लीनादत्यर्थं स्रोतःसु श्लिष्टत्वात्। लीनादिति लीङ् श्लेषण इत्यस्य क्तप्रत्यये स्वादय ओदित इत्योदितश्चेति निष्ठानत्वम्। सा च श्लेष्मवायुभ्यामनुबद्धा युक्ता भवति। आमं नाम यदजीर्णं तत्सदृशलक्षणा। यथा। शोफोऽक्षिगंडयोः। सद्यो भुक्त इवोद्गारः प्रसेकोत्क्लेशगौरवमिति। तेनामेन समं तुल्यं साधनं चिकित्सा यस्याः सैवम्। लंघनं कार्यमाम इति ॥ २८ ॥

विलंबिका रोग की उत्पत्ति—

वि०—विलम्बिका—अतिशय रूप में लीन (स्रोतों में चिपके) हुए गंभीर आम दोष से ही कफ एवं वायु लक्षणों के साथ आमाजीर्ण के लक्षणों वाली विलम्बिका होती है और इसकी चिकित्सा भी आमाजीर्ण के समान है ॥ २८ ॥

वक्तव्य—विलम्बिका में दोष अतिशय लीन होने से बाहर आने में विलम्ब करते हैं; कभी-कभी कफ और वात के साथ पित्तजन्य विदग्धता भी रहती है। यथा—'यदा भुक्तं विदग्धं च नोर्ध्वं नाधः प्रवर्त्तते। तां विलम्बीं विगर्हन्ति बिषकल्पां विसूचिकाम् ॥'

जीर्णेऽप्याहारे कदाचिदाहारसारो रसोऽजीर्णः स्यात्। तल्लक्षणार्थमाह—

अश्रद्धा हृद्व्यथा शुद्धेऽप्युद्गारे रसशेषतः।
शयीत किञ्चिदेवात्र सर्वत्रानशितो दिवा ॥ २९ ॥
स्वप्यादजीर्णी, सञ्जातबुभुक्षोऽद्यान्मितं लघु।

स०—रसशेषेऽश्रद्धाऽश्रद्धाऽन्नानभिलाषः। हृद्व्यथा हृदयशूलं गौरवं च। शुद्धेऽप्युद्गारेऽन्नसंबंधिनि। तेनाजीर्णाद्वर्थान्तरभूत एवायं रसशेषः। अतश्च रसस्य रुधिरादिहेतोरसम्यक्परिपाक इत्यर्थः। तच्चिकित्सामाह। शयीतेत्यादि। अत्र रसशेषे किंचिदेव स्तोकमात्रमेव स्वप्यात् नाजीर्ण इव प्रभूतम्। सर्वत्राऽजीर्ण्यनाशितो दिवा शयीत। आलाघवात्। यदा चोत्पन्नक्षुत्स्यात्तदा स्तोकं लघु चाद्यात्। आशः कृतो येनाऽऽशितः। न आशितोऽनाशितः अभुक्तवानित्यर्थः। नन्वजीर्ण्यभिहतोन्मत्तानित्यनेनैव वाक्येनाजीर्णिनां दिवास्वप्नोऽनुज्ञात एव तत्किं पुनरुक्तेन। ब्रूमः। विशेषार्थं वाक्यमिदम्। अभुक्तो दिवा स्वप्यादजीर्णीति। तत्र तु सामान्यम्। अशितानशितचिंता न कृतेति युक्ता पुनरिहोक्तिः ॥ २९ ॥

रसशेषाजीर्ण के लक्षण—

वि०—रसशेषाजीर्ण—रसशेष[1] अजीर्ण से उद्गार के शुद्ध हो जाने पर भी अन्न में अश्रद्धा और हृदय में पीड़ा होती है। इस अवस्था में तथा सभी अजीर्णों में बिना भोजन किए दिन में थोड़ी देर सोना चाहिये और भूख लगने पर थोड़ा और हल्का भोजन करे ॥ २९ ॥

वक्तव्य—आम-'ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम्। दुष्टमामाशयगतं रसमामं प्रचक्षते ॥'

रसशेषाजीर्ण में अजीर्ण की सब अवस्थाओं में बिना भोजन दिन में सोना उत्तम है किन्तु रसशेष में थोड़ा ही सोना चाहिये।

सामान्यमजीर्णलक्षणं सामान्येन ब्रूते—

विबन्धोऽतिप्रवृत्तिर्वा ग्लानिर्मारुतमूढता ॥ ३० ॥
अजीर्णलिङ्गं सामान्यं विष्टम्भो गौरवं भ्रमः।

स०—विबंधो मूत्रपुरीषयोरप्रवृत्तिलक्षणः। अतिप्रवृत्तिस्तयोरेव। ग्लानिः शरीरस्य ग्लानता। मारुतमूढता वातस्य प्रतिलोमता। विष्टंभः कुक्षेराध्मानम्। गौरवं गुरुगात्रत्वम्। भ्रमो मोहः। एतत्सामान्यमजीर्णलक्षणम्। उक्तं च, 'सीदत्यंगं भ्रमो मोहः कोष्ठे मुह्यति मारुतः। सर्वेषामप्यजीर्णानामविसंवादि लक्षणम् ॥ ३० ॥

वि०—अजीर्ण के सामान्य लक्षण—मूत्र, मल की रुकावट अथवा अतिशय प्रवृत्ति; शरीर में ग्लानि; वायु की प्रतिलोम गति; उदर में आध्मान (तनाव और गड़गड़ाहट), भारीपन चक्कर आना ये अजीर्ण के सामान्य लक्षण हैं ॥ ३० ॥

१. रसशेष शब्द का अर्थ और भाव स्पष्ट करने के लिए इसकी कई व्युत्पत्तियाँ प्राचीन टीकाकारों ने दी हैं। यथा 'रसाय शेषः' अर्थात् रस बनने के लिए शेष अन्न अथवा 'रसस्य शेषः (रसशब्देन रसहेतुभूताहारराशिः)'=अपक्व अन्न का कुछ भाग अथवा 'रसे शेषः' अर्थात् रस में शेष (कुछ आमदोष)। वस्तुतः तीसरा पक्ष ही ठीक है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सांप्रतमजीर्णस्याऽन्यान्यपि कारणान्याह—

न चातिमात्रमेवान्नमामदोषाय केवलम् ॥ ३१ ॥
द्विष्टविष्टम्भिदग्धामगुरुरूक्षहिमाशुचि ।
विदाहि शुष्कमत्यम्बुप्लुतं चान्नं न जीर्यति ॥ ३२ ॥
उपतप्तेन भुक्तं च शोकक्रोधक्षुदादिभिः ।

स०—अतिमात्रमेव भुक्तमन्नं न केवलमामदोषाय किं तर्हि द्विष्टादि चान्नं न जीर्यति । द्विष्टमप्रियम् । विष्टंभि कुक्ष्याध्मानकारि । हिममति शीतम् । अशुच्युच्छिष्टं केशादिदूषितं च । एतच्चाचिंत्यप्रभावत्वादामदोषहेतुः । विदाहि प्रागुक्तम् । शुष्कमद्रवप्रायम् । अत्यंबुप्लुतमतिजलेन प्लावितम् । चः समुच्चये । न केवलं द्विष्टाद्यन्नं भुक्तं न जीर्यति यावता शोकादिभिश्चोपतप्तेन भुक्तं न जीर्यति । शोक इष्टविपत्त्यादिना मनोवैक्लव्यम् । क्रोधो रोषः । क्षुद् बुभुक्षा । तदुपतप्तत्वं कालातिक्रमत्वात् । आदिशब्देन लोभभयादिपरिग्रहः ॥ ३१-३२ ॥

अजीर्ण के अन्य कारण—

वि०—अकेला अति मात्रा में खाया हुआ अन्न ही आम दोष का कारण नहीं होता, अपितु और भी दूसरे कारण हैं; यथा—अप्रिय भोजन, वाताबरोधकारी भोजन, दग्ध (जला हुआ); कच्चा, भारी, रूक्ष, ठण्डा, अपवित्र, विदाही (जलन करने वाला), सूखा आहार और बहुत अधिक पानी के पीने से अन्न नहीं पचता तथा शोक, क्रोध, भूख (समय बीत जाने के कारण) से ग्रस्त व्यक्तियों में खाया हुआ अन्न नहीं पचता ॥ ३१-३२ ॥

संप्रत्यपरमप्यन्नमामदोषकरमाह—

मिश्रं पथ्यमपथ्यं च भुक्तं समशनं मतम् ॥ ३३ ॥
विद्यादध्यशनं भूयो भुक्तस्योपरि भोजनम् ।
अकाले बहु चाल्पं वा भुक्तं तु विषमाशनम् ॥ ३४ ॥
त्रीण्यप्येतानि मृत्युं वा घोरान् व्याधीन् सृजन्ति वा ।

स०—पथ्यं शाल्यादि । अपथ्यं यवकादि । तन्मिश्रमेकीकृत्य भुक्तं समशनमभिमतमस्मिन्वैद्यकतन्त्रे । विद्यादित्यादि । भुक्तस्याऽप्यवहृतस्योपरि यद्भोजनं तदध्यशनं जानीयात् । नन्वेवं प्रातराशे कृते यः सायमाशस्तस्याऽध्यशनत्वं प्रसज्यते । अध्यशनं च विवर्ज्यमेव यतोऽनंतरमेव पठिष्यति । त्रीण्यप्येतानि मृत्युं वेत्यादि । वैद्यकतंत्रेषु च नराणां द्विराहार उपदिष्टः । भगवान् व्यासोऽप्यवोचत् । सायंप्रातर्मनुष्याणां भोजनं विधिनिर्मितमिति । तस्मादध्यशनस्यैवं तदसमीचीनं लक्षणम् । अत्र संचक्ष्महे । प्राग्भुक्तस्योपरि समनंतरमेव वह्नावविभक्ते यदशनं तदेवाध्यशनं नान्यत् । अतएव सुश्रुतो ब्रूते । प्राग्भुक्ते त्वविभक्तेऽग्नौ द्विरन्नं न समाचरेदिति तस्मात् प्रातराशे कृते सत्यग्नौ विभक्ते यः सायमाशः स न परिहार्योऽपि तु कार्य एव । गुणावहत्वात् । एतदेव प्रतिपादयितुं संग्रहेऽध्यगीष्ट । प्रातराशे त्वजीर्णेऽपि सायमाशो न दुष्यति । अजीर्णे सायमाशे तु प्रातराशो हि दुष्यति । दिवा प्रबोध्यतेऽर्केण हृदयं पुंडरीकवत् । तस्मिन्विबुद्धे स्रोतांसि स्फुटत्वं यांति सर्वशः । व्यायामाच्च विचाराच्च विक्षिप्तत्वाच्च चेतसः । न क्लेदमुपगच्छंति दिवा तेनास्य धातवः । अक्लिन्नेष्वन्नमासक्तमन्यत्केषु न दुष्यति । अविदग्धेष्विव पयः स्वन्यत्संमिश्रितं पयः । रात्रौ तु हृदये ग्लाने संवृतेष्वयनेषु च । परिक्लेदं यांति कोष्ठे संवृते देहधातवः । क्लिन्नेष्वन्यदपक्वेषु तेष्वासिक्तं प्रदुष्यति । विदग्धेषु पयः स्वन्यत्पयस्तप्तेष्विवार्पितम् । नैशे तस्मादजीर्णेऽन्ने नान्यद्भुञ्जीत भोजनमिति । अधिशब्दोऽत्रोपरिशब्दार्थः । यथा प्रासादमधिरोहति । अकाले बहु चाल्पं वा भुक्तं त्वशनं विषमाशनसंज्ञं विद्यात् । कः पुनः कालो भोजनस्येति चेत् ब्रूमः । प्रसृष्टे विण्मूत्रइत्यादिनाऽऽहारकालं वक्ष्यति तद्वैपरीत्येनाकालो वेद्यः । त्रीण्यप्येतानि समशनाऽध्यशनविषमाशनानि मृत्युं वा सृजंति जनयंति । घोरान् व्याधीन्गुल्मादीन् वा ॥ ३३-३४ ॥

समशन, अध्यशन, विषमाशन—

वि०—पथ्य और अपथ्य को मिलाकर खाना समशन कहा जाता है । खाये हुए अन्न के (बिना पचे) ऊपर फिर खाना अध्यशन कहा जाता है । असमय में, बहुत अथवा थोड़ा खाना विषमाशन है । ये तीनों ही मृत्यु अथवा भयानक रोगों को उत्पन्न करते हैं ॥ ३३-३४ ॥

वक्तव्य—अजीर्ण में भोजन का विचार—'प्रातराशे त्वजीर्णेऽपि सायमाशो न दुष्यति । अजीर्णे सायमाशे तु प्रातराशो हि दुष्यति ॥ दिवा प्रबोध्यतेऽर्केण हृदयं पुण्डरीकवत् । तस्मिन्विबुद्धे स्रोतांसि स्फुटत्वं यान्ति सर्वशः ॥ रात्रौ तु हृदये ग्लाने संवृतेष्वयनेषु च । परिक्लेदं यान्ति कोष्ठे संवृते देहधातवः ॥ क्लिन्नेष्वन्यदपक्वेषु तेष्वासिक्तं प्रदुष्यति । विदग्धेषु पयःस्वन्यत् पयस्तप्तेष्विवार्पितम् ॥ नैशे तस्मादजीर्णेऽन्ने नान्यद् भुञ्जीत भोजनम् ॥' (संग्रह)

काले सात्म्यं शुचि हितं स्निग्धोष्णं लघु तन्मनाः ॥ ३५ ॥
षड्रसं मधुरप्रायं नातिद्रुतविलम्बितम् ।
स्नातः क्षुद्वान् विविक्तस्थो धौतपादकराननः ॥ ३६ ॥
तर्पयित्वा पितॄन् देवानतिथीन् बालकान् गुरून् ।
प्रत्यवेक्ष्य तिरश्चोऽपि प्रतिपन्नपरिग्रहान् ॥ ३७ ॥
समीक्ष्य सम्यगात्मानमनिन्दन्नब्रुवन् द्रवम् ।
इष्टमिष्टैः सहाश्नीयाच्छुचिभक्तजनाहृतम् ॥ ३८ ॥

स०—काले वक्ष्यमाणे । तन्मनाः भोजनगतचित्तः स्नातः । बुभुक्षितः । विविक्तस्थ एकांतस्थितः । तथा प्रक्षालितचरणहस्तमुखः । अनिंदन् भोजनमगर्हमाणः । अब्रुवन्नभाषमाण । इष्टं मनोरुचितं भोजनम् । तथा द्रवं द्रवप्रायम् । इष्टैः प्रियैः सहाश्नीयात् । क्षुद्वान् । अत्र च प्रशंसायां मतुप् । उत्पन्नप्रशस्तबुभुक्षः । तेन किंचिदपि यदा दुष्टबुभुक्षा स्यात्तदा नाद्यादित्यर्थः । दुष्टबुभुक्षाया लक्षणम् । दोषोपनद्धं यदि लीनमामं पित्तोद्धतस्यावृणुयाच्च वह्निम् । जायेत दुष्टा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तु तदा बुभुक्षा सा मंदबुद्धीन् विषवन्निहंतीति। किंभूतं भोजनम्। सात्म्यम्। तच्च सात्म्यं द्विधा। एकं स्वरूपकालाभ्यस्तं सुखावहम्। अन्यच्च जन्मनः प्रभृति सहात्मनाभ्यस्तं सुखावहं च। एतदेवैकं सात्म्यमुच्यते। तथा शुचि अनुच्छिष्टं केशाद्यनुपहतं च हितं पथ्यम्। स्निग्धं च तदुष्णं च स्निग्धोष्णम्। तथा लघु लघुप्रायं न तु लघ्वेव। अत एवेदमुपपन्नम्। षड्रसं मधुरप्रायमिति। मधुररसो हि गुरुः। तथा च वक्ष्यति। कटोः कषायस्तस्माच्च मधुरः परमं गुरुः। तद्यदि लघ्वेव स्यान्मधुरप्रायमिति न घटते। तस्माल्लघुप्रायमिति व्याख्येयम्। कथमद्यात्। आह। नातिद्रुतविलंबितम्। किं कृत्वा। पित्रादींस्तर्पयित्वा। तथा तिरश्चोऽप्यश्वबृषादीन् प्रतिपन्नपरिग्रहान् कृतघासस्वीकारान् प्रत्यवेक्ष्य तदाहारचिंतां कृत्वेत्यर्थः। अथात्मानं समीक्ष्य यथा ममेदं सात्म्यमिति नित्यमप्रमत्तः सन् पर्यालोच्य। खरनादेनोक्तम्। अतिद्रवाशी त्वाहारगुणदोषान्न विंदति। उन्मुह्यत्यल्पमश्नाति च्छर्दयेद्वाऽनवस्थितः। विलंबितं तु भुंजानो न तृप्तिमधिगच्छति। स्वादु बह्वपि शीतत्वाद्याति भक्तमहद्यताम्। जल्पतो हसतश्चापि भुञ्जानस्याऽन्यचेतसः। त एव दोषा मंतव्या ये विलंबितभोजन इत्यादि ॥ ३५-३८ ॥

भोजन की व्यवस्था—

वि०—भोजन विधि—समय पर, आत्मा के अनुकूल (अभ्यस्त हितकारी भोजन), पवित्र, हितकारी, स्निग्ध, गरम, लघु, छ रसवाला, मधुर रस बहुल भोजन को मनोयोग करके; न तो बहुत जल्दी और न तो बहुत धीरे, स्नान करके भूख लगने पर, एकान्त स्थान में, पैर-हाथ-मुख धोकर भोजन करे। भोजन करने से पूर्व—पितर, देवता, अतिथि, बालक, गुरुजन इनको भोजन कराकर पशु-पक्षी आदि तथा जिनके पालन का उत्तरदायित्व लिया हुआ है, उनको भी अपने से पहिले भोजन देकर, अपने स्वास्थ्य, प्रकृति आदि का विचार करके भोजन की निन्दा न करते हुए; न बोलते हुए, द्रव-बहुल, प्रिय भोजन को प्रियजनों के साथ; पवित्र एवं अनुरक्त जनों से लाये भोजन को खाये ॥ ३५-३८ ॥

भोजनं तृणकेशादिजुष्टमुष्णीकृतं पुनः।
शाकावरान्नभूयिष्ठमत्युष्णलवणं त्यजेत् ॥ ३९ ॥

स०—तृणादिजुष्टं भोजनं त्यजेत्। आदिशब्देन मक्षिकादिपरिग्रहः। तथा भूय उष्णीकृतम्। तथाशाकबहुलम्। तथाऽवरान्नं माषादि तद्भूयिष्ठम्। तथाऽत्युष्णमतिलवणं च त्यजेत् ॥ ३९ ॥

त्याज्य भोजन—

वि०—तिनके, केश आदि से युक्त भोजन को, दुबारा गरम किये भोजन को, शाक बहुल, अवरान्न (कोदो आदि क्षुद्र अन्न) बहुल, अति उष्ण और अति लवणवाला भोजन न करे ॥ ३९ ॥

किलाटदधिकूर्चीकाक्षारशुक्तामसूलकम्।
कृशशुष्कवराहाविगोमत्स्यमहिषामिषम् ॥ ४० ॥
माषनिष्पावशालूकबिसपिष्टविरूढकम्।
शुष्कशाकानि यवकान् फाणितं च न शीलयेत् ॥ ४१ ॥

स०—तथा किलाटादीन्न शीलयेन्नाभ्यसेत्। न कादाचित्कोऽभ्यवहार एषां निषिध्यते। मुनिना तु नाभ्यसेद्गौरवादिति यथा हेतुरुपन्यस्तस्तथेह नोक्तमयुक्तत्वात्। तथा हि एषामनभ्यवहारे यदि गुरुत्वमेव हेतुः स्यात् ततो यवादीनामपि बहुतराणां द्रव्याणां शीलनमयुक्तं स्यात्। तस्मादेषामशीलनेऽन्यदपि कारणं चिंत्यं न तु गुरुत्वमात्रमेव। यथा किलाटकूर्चीकयोर्दोषलत्वं दध्नस्तु ज्वरादिकर्तृत्वं तथा स्रोतोलेपः स्रोतोलेपत्वाच्चानेकरोगहेतुत्वम्। क्षारस्य पुंस्त्वहानिकृत्त्वम्। शुक्तस्य दृष्टिहननत्वादि। तस्मादेषामपथ्यत्वाच्छीलननिषेधो बोध्यः ॥ ४०-४१ ॥

किलाटादि भोजन का निषेध—

वि०—किलाट, दही, कूर्चिका, क्षार, शुक्त, कच्ची मूली, दुबले पशु के और शुष्क मांस वाले सूअर, भेड़, गाय, मछली और भैंस के मांस को; उड़द, सेम, शालूककन्द, बिस, पिट्ठी से बने पदार्थ, अङ्कुरितधान्य; शुष्क शाक, यवक और फाणित इनको प्रतिदिन न खाये। प्रायः न खाये—कभी खा ले ॥ ४०-४१ ॥

शीलयेच्छालिगोधूमयवषष्टिकजाङ्गलम्।
सुनिषण्णकजीवन्तीबालमूलकवास्तुकम् ॥ ४२ ॥
पथ्यामलकमृद्वीकापटोलीमुद्गशर्कराः।
घृतदिव्योदकक्षीरक्षौद्रदाडिमसैन्धवम् ॥ ४३ ॥

स०—शाल्यादीन् शीलयेत् ॥ ४२-४३ ॥

भोज्य पदार्थ—

वि—शालिधान्य, गेहूँ, जौ, साठी, जाङ्गलमांस, चौपतिया, जीवन्ती, नरम-कच्ची मूली, बथुआ, हरड़, आँवला, द्राक्षा, पटोली (परवल), मूँग, शक्कर, घी, वर्षाजल, दूध, मधु, अनार और सैन्धव इनका अभ्यास डाले—प्रतिदिन खाये ॥ ४२-४३ ॥

त्रिफलां मधुसर्पिर्भ्यां निशि नेत्रबलाय च।
स्वास्थ्यानुवृत्तिकृद्यच्च रोगोच्छेदकरं च यत् ॥ ४४ ॥

स०—मधुसर्पिर्भ्यां सह त्रिफलां च रात्रौ नेत्रबलाय शीलयेत्। न केवलं शाल्यादीनेव शीलयेत्। यच्च द्रव्यं स्वास्थ्यानुवृत्तिं करोत्यृतुचर्याविध्यादिषु युक्तमन्नपानादिकम्। तथा रोगोच्छेदकरं यत्किराततिक्तकादिद्रव्यं तच्च शीलयेत् ॥ ४४ ॥

नेत्र-हितकर पदार्थ—

वि०—नेत्रों की ज्योति के लिये रात्रि में घी और मधु के साथ (असमान मात्रा में) त्रिफला को खाये। और जो वस्तु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वास्थ्य को बनाये रखने वाली तथा रोगनाशक हो (रसायन आदि) उसको भी प्रतिदिन खाये॥ ४४॥

वक्तव्य—चरक में कहा भी है—'तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते। अजातानां विकाराणामनुत्पत्तिकरं च यत्॥' (च. सू. अ. ५।१०)।

बिसेक्षुमोचचोचाम्रमोदकोत्कारिकादिकम्।
अद्याद् द्रव्यं गुरु स्निग्धं स्वादु मन्दं स्थिरं पुरः॥ ४५॥
विपरीतमतश्चान्ते मध्येऽम्ललवणोत्कटम्।

स०—बिसादिद्रव्यं गुर्वादिगुणयुक्तं पुरः पूर्वमद्यात्। मोदको लड्डुकः। उत्कारिका लप्सिका। अतोऽस्माच्च विपरीतं लघुरूक्षतीक्ष्णकटुरसप्रायमंते भोजनस्य सेवेत। मध्ये चाम्ललवणोत्कटम्। खरनादे चोक्तम्। कटुं लवणमम्लं वा पूर्वमाहारमाहरेत् आहारो मधुरो ह्यग्रे गुरु विष्टभ्य जीर्यति। तदेतद्देशसात्म्यादिवशात्प्रमाणयितव्यम्॥ ४५॥

भोजन का क्रम

वि०—भोजन क्रम—बिस, ईख, केला, नारियल, आम, लस्सी आदि जो पदार्थ गुरु, स्निग्ध, स्वादु, मन्द और स्थिर हों उनको भोजन में पहले खाये। इनसे विपरीत, लघु, रूक्ष, कटु, तीक्ष्ण और सर पदार्थों को भोजन के अन्त में खाये। मध्य में शुक्त आदि अम्ल एवं लवण पदार्थों को खाये॥४५॥

वक्तव्य—भोजन करने के उपरान्त-प्रथम कफ, पीछे पित्त और अन्त में वायु बढ़ती है; उसी क्रम से भोजन का यह नियम है। मन्दाग्नि वाले को प्रथम कटु, लवण, अम्ल भोजन करना चाहिये; यथा—'कटुं लवणमम्लं वा पूर्वामाहारमाहरेत्। आहारो मधुरोऽग्रे हि गुरु विष्टभ्य जीर्यति॥'

अन्नेन कुक्षेर्द्वावंशौ पानेनैकं प्रपूरयेत्॥ ४६॥
आश्रयं पवनादीनां चतुर्थमवशेषयेत्।

स०—कुक्षेर्जठरस्यान्नेन द्वौ भागौ प्रपूरयेत्। पानेन जलादिना एकमंशं प्रपूरयेत्। चतुर्थमंशं पवनादीनामाश्रयमवशेषयेन्न त्वन्नेन पानेन वा प्रपूरयेत्। अत्र त्वंशकल्पना परिकल्पनेनैव युज्यते नत्वंगुलमानादिना सुश्रुते चाभिहितम्। प्रक्षालयेदद्भिरास्यं भुंजानश्च मुहुर्मुहुः। विशुद्धे रसने तस्मै रोचतेऽन्नमपूर्ववत्। रसना विद्यते यस्य मुखस्य तद्रसनं तस्मिन् रसने विशुद्धे रोचतेऽन्नमपूर्ववत्॥ ४६॥

भोजन का प्रमाण—

वि०—उदर के चार भाग (कल्पना) करे—इसमें से दो भाग अन्न से और एक भाग द्रव पदार्थ से भरे। वात आदि के आश्रय के लिये चतुर्थ भाग को छोड़ देवे। पूरा पेट भर करके भोजन न करे, (भोजन की गति के लिये स्थान रहने देना चाहिये)॥ ४६॥

अनुपानं हिमं वारि यवगोधूमयोर्हितम्॥ ४७॥
दध्नि मद्ये विषे क्षौद्रे, कोष्णं पिष्टमयेषु तु।
शाकमुद्गादिविकृतौ मस्तुतक्राम्लकाञ्जिकम्॥ ४८॥
सुरा कृशानां पुष्ट्यर्थं, स्थूलानां तु मधूदकम्।
शोषे मांसरसो, मद्यं मांसे स्वल्पे च पावके॥ ४९॥
व्याध्यौषधाध्वभाष्यस्त्रीलङ्घनातपकर्मभिः।
क्षीणे वृद्धे च बाले च पयः पथ्यं यथाऽमृतम्॥ ५०॥

स०—यवगोधूमयोर्भुक्तयोरनु पश्चात्पानं शीतं जलं हितम्। तथा दध्नि मद्ये विषे क्षौद्रे च हिमं जलमनुपाने हितम्। पिष्टमयेषु कोष्णं जलं हितम्। शाकमुद्गादिविकृतौ च मस्त्वादिकमनुपानं हितम्। कृशानां पुंसां सुरा पुष्ट्यर्थं हिता। स्थूलानां पुनः कर्शनाय मधूदकं हितम्। शोषे क्षये मांसरसो हितः पुष्टिकारित्वात्। मांसे भुक्ते मद्यमनुपानं हितम्। स्वल्पे च पावके मद्यमेवानुपानम्। व्याध्यादिभिः क्षीणे क्षपिते पयो दुग्धं पथ्यं हितम्। इह प्रकृतेऽपि पथ्यग्रहणं पथ्यतरत्वज्ञापनार्थम्। यथाऽमृतमित्यनेनैतत्प्रतिपादयति। यथाऽमृतं बलवर्णौजः कान्त्यायुरादिजनकं तथेदमपीत्यर्थः॥४७-५०॥

भोजन के पश्चात् अनुपान—

वि०—जौ और गेहूँ के भोजन के पीछे शीतल जल अनुपान (पीछे पीना) उत्तम है। दही, मद्य, विष और मधु में भी शीतल जल अनुपान है। पिट्ठी से बने भोजनों में गरम जल अनुपान है। शाक, मूँग आदि के बने पदार्थों में मस्तु, तक्र, अम्ल और काँजी अनुपान है। कृश पुरुषों में पुष्टि के लिये सुरा अनुपान है; स्थूल पुरुषों को कृश करने के लिए मधु का शरबत; शोष में मांसरस; मांस भोजन और अग्निमान्द्य में मद्य अनुपान है। रोग, औषध, मुसाफिरी, भाषण, स्त्री सेवन, लङ्घन, धूप तथा श्रम से पीड़ित, क्षीण, बालक और वृद्ध के लिये दूध का अनुपान अमृत के समान है॥ ४७-५०॥

वक्तव्य—अनुपान का लाभ—'कामं दोषवदप्यन्नममात्रं वा निषेवितम्। अल्पदोषमदोषं वाऽप्यनुपानेन जीर्यति॥ अनु पश्चात्पीयते इत्यनुपानम्॥' (हेमाद्रिः)

विपरीतं यदन्नस्य गुणैः स्यादविरोधि च।
अनुपानं समासेन, सर्वदा तत्प्रशस्यते॥ ५१॥

स०—अन्नस्य भक्तवटकादेर्यद्विपरीतं गुणैस्तदनुपानं सदा प्रशस्यते। यथा स्निग्धस्य रूक्षं रूक्षस्य स्निग्धं शीतस्योष्णमुष्णस्य शीतम्। मधुरस्याम्लमम्लस्य मधुरमित्यादि। नन्वेवमुररीक्रियमाणे क्षीरस्य तैरेयादेर्वा चुक्रादीनामम्लानामनुपानं प्राप्तमित्याह। विपरीतगुणमपि यदविरोधि तदेवानुपानं सदा हितम्॥ ५१॥

अनुपान की व्यवस्था—

वि०—जो द्रव्य जिस अन्न के गुणों से विपरीत होते हुए भी उस अन्न के साथ विरोधी नहीं होता; संक्षेप से वह उसका अनुपान होता है। ऐसा अनुपान सदा उत्तम है॥ ५१॥

अनुपानस्य किं कर्मेत्याह—

अनुपानं करोत्यूर्जां तृप्तिं व्याप्तिं दृढाङ्गताम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अङ्गसङ्घातशैथिल्यविक्लित्तिजरणानि च ॥ ५२ ॥

स०—अनुपानमूर्जादीन्करोति । ऊर्जा मनः प्रहर्षः । तृप्तिः प्रीणनं शरीरेंद्रियस्य क्षामताविपरीतोऽत्र गुणः । तथा व्याप्तिः द्रवस्य हि गमनं न कठिनस्य । दृढांगता स्थिरशरीरत्वम् । तथाऽन्नसंघातस्य शैथिल्यम् । विक्लित्तिर्विश्लेदनम् । जरणं परिणामः । एतानि च करोति ॥ ५२ ॥

अनुपान से लाभ—

वि०—अनुपान—ऊर्ज (शक्ति), तृप्ति, अन्न का समस्त शरीर में फैलना, अङ्गों की दृढ़ता, अन्न के संघात को ढीला करना, अन्न को गलाना या नरम करना; और पाचन करना ये कार्य अनुपान के हैं ॥ ५२ ॥

एवंगुणमप्यूर्ध्वजत्र्वादिषु न हितमित्याह—

नोर्ध्वजत्रुगदश्वासकासोरःक्षतपीनसे ।
गीतभाष्यप्रसङ्गे च स्वरभेदे च तद्धितम् ॥ ५३ ॥

स०—ऊर्ध्वं जत्रुण ऊर्ध्वजत्रुस्तस्मिन्ये गदास्तेषु तदनुपानं न हितम् । तथा श्वासादिषु न हितम् । गीतभाष्ययोः प्रकर्षेण संगः सातत्येन सम्बन्धस्तस्मिन् । तथा स्वरभेदे स्वरसादे न तद्धितम् । ऊर्ध्वजत्रुगदादीनां ह्यनुपानं प्रदूष्यामाशयमुरःकण्ठस्थितमाहारजं स्नेहमासाद्याऽभिष्यन्दाऽग्निसादच्छर्द्यादीनामयान्विदध्यात् ॥ ५३ ॥

अनुपान के अयोग्य रोगी—

वि०—जत्रु के ऊपर के रोगों में, श्वास, कास, उरःक्षत, पीनस में तथा लगातार गीत या भाष्य में लगे होने पर और स्वरभेद में अनुपान हितकारी नहीं है ॥ ५३ ॥

संप्रति येषां पानमेव न शस्यते तानाह—

प्रक्लिन्नदेहमेहाक्षिगलरोगव्रणातुराः ।
पानं त्यजेयुः—

स०—प्रक्लिन्नो देहो येषां विसर्पाद्यार्तानां ते पानं त्यजेयुः । मेहादीनां रोगातुरशब्देन प्रत्येकं सम्बन्धः । मेहरोगाद्यातुराः पानं द्रवरूपं त्यजेयुर्न केवलमन्नस्योपरि यदनुपानम् । स्वरनादे चोक्तम् । मेही प्लीही व्रणी कुष्ठी पांडुर्जठरपीनसी । शोषातिसारी मन्दाग्निः पानीयं मन्दमाचरेत् । नोर्ध्वांगपवनाविष्टे वाग्व्यायामहते न च । क्षतोरसि श्वासकासहिक्कावम्यर्दिते न च । निरन्ने चोर्ध्वरोगे च न पेयं बारि शीतलमिति ।

पान के अयोग्य रोग

वि०—क्लेदबहुल शरीर वाले, मेहरोगी, आँख और गले के रोगी और व्रणरोगी-पान (द्रव) का त्याग कर देवें ।

वक्तव्य—पान-जो कि अनियत काल में रुचिवश पिया जाता है । अनुपान-नियत काल में विधिवश होकर पीना पड़ता ही है ।

—सर्वश्च भाष्याध्वशयनं त्यजेत् ॥ ५४ ॥
पीत्वा, भुक्त्वाऽतपं वह्निं यानं प्लवनवाहनम् ।

स०—चशब्दो लुप्तनिर्दिष्टोऽत्र । सर्वोपि पुरुषः पीत्वा भुक्त्वा च भाष्यादींस्त्यजेत् । तथाऽऽतपादीन् पञ्च त्यजेदित्यत्राऽप्यनुवृत्त्या योज्यम् । यानं रथादि । प्लवनं तरणम् । वाहनमश्वादि ॥ ५४ ॥

वि०—पान या अनुपान पीकर सब (स्वस्थ या रोगी) मनुष्य बोलना, मुसाफिरी, और निद्रा को छोड़ देवे । भोजन करके-धूप या अग्नि का सेवन, पैदल चलना, तैरना या सवारी करना छोड़ देवे ॥ ५४ ॥

वक्तव्य—अरुणदत्त के अनुसार पान तथा भोजन करके दोनों अवस्थाओं में ये सब कार्य त्याज्य हैं । भोजन करके एक सौ कदम टहलना विधेय है । इससे अधिक चलना निषिद्ध है ।

काले सात्म्यमित्युक्तम् । भोजनस्य तु कः काल इत्याह—

प्रसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे
विशुद्धे चोद्गारे क्षुदुपगमने वातेऽनुसरति ।
तथाऽग्नावुद्रिक्ते विशदकरणे देहे च सुलघौ
प्रयुञ्जीताहारं विधिनियमितं, कालः स हि मतः ॥५५॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने मात्राशितीयो नाम अष्टमोऽध्यायः ॥ ८ ॥

स०—आहारं विधिना पूर्वोक्तेन काले सात्म्यं शुचि हितमित्यादिना नियमितं प्रयुञ्जीत अश्नीयादित्यर्थः । कदा । मूत्रपुरीषे प्रकर्षेण सृष्टे सति । न किंचिदेव त्यक्त इति प्रशब्देन द्योतयति । तथा हृदये सुष्ठु विमले रसशेषकृतगौरवादिरहिते । तथा दोषे वातादौ स्वपथगे स्वमार्गगे । अजीर्णे ह्याहारेऽन्नशेषेण रुद्धगतयो वातादयः स्वस्थानं न लभेरन् । सुजीर्णे तु स्वस्थानस्था स्युः । उद्गारे विशुद्धे चशब्दोऽनुक्तसमुच्चयार्थः । स्रोतोमुखेषु च विशुद्धेष्वित्यर्थः । क्षुदुपगमन उपगतायां क्षुधि । वातेऽनुसरत्यनुलोमं गच्छति । तथाऽग्नौ कायाग्नावुद्रिक्ते पाकक्षमे । तथा देहे पटिवन्द्रिये सुष्ठु लघौ च । कालः स हि मतः । हिशब्द एवार्थे । स एव कालो भोजनस्य दृष्टो न ततोऽप्यूर्ध्वम् । स ह्यतिकालः । तत्र भुक्तमन्नं वातविष्टब्धं कृच्छ्राद्विपच्यते । तथा चोक्तं तन्त्रान्तरे । अतीतकालं भुञ्जानो वायुनोपहतेऽनले । कृच्छ्राद्विपच्यते भुक्तं द्वितीयं न च कांक्षति । क्षुत्तावाध्मानमाटोपसादांश्च कुरुतेऽधिकमिति । तस्मात्पूर्वोक्तकाले भोजनमद्यादिति । यमौ न्सौ तः सरसादसरविरामा धीरललिता ॥५५॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां मात्राशितीयोऽध्यायोऽष्टमः ॥ ८ ॥

भोजन का समय—

वि०—भोजन का समय—मल-मूत्र की प्रवृत्ति हो जाने पर; हृदय के अति प्रसन्न होने पर; दोषों के अपने मार्ग में रहने

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पर; उद्‌गार के शुद्ध होने पर, भूख लगने पर; वायु अनुलोम होने पर; अग्नि के अतिशय प्रदीप्त होने पर, इन्द्रियों के निर्मल होने पर और शरीर के हल्का होने पर, विधि के अनुसार आहार का सेवन करे क्योंकि भोजन का यही ठीक समय है ॥ ५५ ॥

भोजन विधि—'काले सात्म्यम्' आदि जो विधि पहले बता आए हैं उनके अतिरिक्त प्रकृति आदि आठ विशेषताओं का भी विचार आवश्यक है। 'यथा तत्र खल्विमान्यष्टावाहारविधिविशेषायतनानि भवन्ति; तद्यथा प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपयोक्त्रष्टमानि भवन्ति।' (चरक वि. अ. १।२१)।

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का मात्राशितीय नामक आठवाँ अध्याय समाप्त हुआ ॥ ८ ॥

नवमोऽध्यायः

पूर्वमन्नपानादिद्रव्यैकदेशः प्रायोपयोगवान्निर्दिष्टस्तस्य चाहारविधेर्मात्रा चोपदिष्टा। संप्रति द्रव्यरसवीर्यविपाकादयो वाच्याः। अन्नपानं हि रसवीर्यविपाकादि परीचय प्रयोक्तव्यं नान्यथा। तस्यान्मात्राशितीयाध्यायादनन्तरं द्रव्यादिविज्ञानीय आरभ्यते—

अथातो द्रव्यादिविज्ञानीयमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—द्रव्यमादिर्येषां ते द्रव्यादयः। आदिशब्देन रसवीर्यादिपरिग्रहः। द्रव्यादीनां विज्ञानमवगमस्तस्मै हितः। शेषं पूर्ववत्।

अब इसके आगे द्रव्यादिविज्ञानीय अध्याय का व्याख्यान करेंगे-जैसा कि भगवान् आत्रेय[1] आदि ने कहा था।

तत्र द्रव्यस्य रसादिभ्यः प्राङ्‌निर्देशः प्राधान्यात्। प्राधान्यं च स्वयमेव ग्रंथकृत्प्रतिपादयन्नाह—

द्रव्यमेव रसादीनां श्रेष्ठं, ते हि तदाश्रयाः।

स०—रसादीनामिति निर्धारणे षष्ठी। रसवीर्यादीनां मध्ये द्रव्यमेव प्रधानम्। ते रसादयो हि यस्मात्तदाश्रयास्तदेव द्रव्यमाश्रयो येषां त एवम्। अत एव केवला रसादयो नोपलभ्यन्ते। तस्मात् द्रव्यं प्रधानम्।

द्रव्यों की प्रधानता—

वि०—रस, गुण, वीर्य आदि में द्रव्य ही अधिक महत्त्व का है; क्योंकि रस आदि द्रव्य के ही आश्रित होते हैं।

अथ केन महाभूतेन कथं कृत्वाऽऽरब्धं द्रव्यमित्याह—

पञ्चभूतात्मकं तत्तु क्ष्मामाधिष्ठाय जायते ॥ १ ॥

स०—तुरवधारणे। यत्तदोश्च नित्यसम्बन्धाद्यदित्येतदनुक्तमप्यर्थाल्लभ्यते। तेनायमर्थः। यद्रसादीनामाश्रयभूतं कार्यं द्रव्यं हरीतक्यादि स्थावरं छागादि जंगमं तत्पञ्चभूतात्मकम्। तत्र यत्कारणद्रव्यमाकाशादि तस्य हि पंचभूतात्मकत्वे सत्याकाशादीनां पृथक्त्वेनात्मलाभो न स्यात्। ततश्चेदमाकाशं नाम महाभूतमिदं पृथ्वी नाम महाभूतमिति गदितुं न पार्येत। सर्वस्य पंचमहाभूतात्मकत्वात्। न च यत्कारणं तत्कदाचित्कार्यं स्यात्। तस्मात्कार्यद्रव्यस्यैव पंचमहाभूतात्मकत्वं न कारणद्रव्यस्याऽऽकाशादेः। मुनिस्तु। खादीन्यात्मा मनः कालो दिशश्च द्रव्यसंग्रह इति। न च वा द्रव्यमुक्त्वा लक्षणं व्यधीत। यथा। यत्राऽश्रिताः कर्मगुणाः कारणं समवायि यत्। तद्‌द्रव्यमिति। अस्यार्थः यत्र कर्म परिस्पंदलक्षणं संयोगवियोगकारणं समवेतश्च गुणः यत्र शब्दादयो गुर्वादयो वा बुद्धिवपुरादयो वा समवेताः। यच्च कारणं समवायि तद्‌द्रव्यमुच्यते। समवायीति। यत्कारणमपृथग्भवति तत्समवायिकारणं यथा तन्तवः पटस्य। एवमेतानि च कर्मगुणाश्रयित्वसमवायिकारणत्वानि यद्यपि सर्वाणि सर्वस्मिन् द्रव्ये न विद्यंते तथाऽपि यद्यत्र सम्भवति तत्र तेन तस्य द्रव्यस्य द्रव्यत्वं कल्प्यम्। तद्यथा मनसः कर्मगुणाश्रयित्वेन वाय्वादीनां तु कर्मगुणाश्रयित्वेन समवायिकारणत्वेन च। नन्वाकाशादीनि कारणद्रव्याणीति कथमुक्तम्। यावताऽऽकाशस्य द्रव्यत्वमेव नास्तीति केचित्तान्ब्रूमहे। जलधेरिवं प्रत्यक्षेणैवाऽस्य नीलरूपतोपलब्धेरस्तित्वं सिद्धम्। तथा कवयोऽपि नीलत्वमेवाऽस्य वर्णयंति। तथा कर्णाटस्य। विपुलपुलिना हृद्या नद्यो वहंत्यतिनिर्मलाः कमलसुभगो वायुर्घ्राणं विलंबति मांसलः। नवजलधरच्छायावासादिवाचिरनिर्गतो वहति शशभृन्नीलस्निग्धे नभस्यवदाततामति। तथा च बाणस्य धावति शशिनि नभसीति। तदेतद्‌दूषयति। तथा हि दूरात् भ्रांतिमात्रेणैव नीलरूपत्वमस्योपलभ्यते। यथागिरेर्विविधवर्णस्याऽपि दूरान्नीलत्वप्रतीतिः। यत्कवीनां वर्णनं तस्मादलसेन निष्प्रमाणकमेव संभाव्यते। तथा च ते नभसः शुक्लत्वं वर्णयंति। न च शुक्लत्वमेतस्योपपद्यते निराकारत्वात्। तस्मान्न नीलरूपत्वं नभसः। ननु दर्शनवैचित्र्यादस्य रूपवत्त्वमुपपन्नम्। यथा पुरुषः शरादि ऋजुतां दिदृक्षुरेकं चक्षुर्निमील्याऽपरं चोन्मील्य तामुपलंभते न तु नयनयुगलेन। तद्वत्संनिकृष्टे गगनरूपस्यानादानं विप्रकृष्टे तु स्यादिति। नचैतद्युक्तम्। यतो रूपवत्त्वेऽभ्युपगम्यमाने स्पर्शवत्त्वमस्य प्रसज्ज्येत। रूपस्य स्पर्शेन नित्यसंबंधात्। स्पर्शवत्त्वे सत्याकाशत्वमेव न स्यात्। अतो न रूपवद्व्योम। अन्ये त्वेवं मन्यंते। पवनवदाकाशस्यावस्थाऽस्तु यथा किल पवनः स्पर्शवान्। न च तस्मिन्रूपं संभवति। तथैवाकाशो न रूपवान्न च स्पर्शवानिति। तदिदमनवगतपदार्थस्वरूपाणां बिलपनम्। ततो यत्र रूपं तत्राऽवश्यं स्पर्शो न तु यत्र

१. इसके पूर्व के ४ अध्यायों में अधिकतर प्रयुक्त आहार द्रव्यों का गुण धर्म बतलाया है किन्तु आहार-द्रव्यों की इयत्ता नहीं है और सब द्रव्यों का गुण धर्म अलग-अलग वर्णन करना भी सम्भव नहीं है। अतः नवीन द्रव्यों के गुण-कर्म आदि जानने के उपाय-द्रव्य, रस, गुण, वीर्य, विपाक और प्रभाव का वर्णन करेंगे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्पर्शस्तत्राऽवश्यं रूपम् । तस्मान्न नभो रूपवन्न च सत् । अत्रोच्यते । परमार्थदर्शिभिर्यदुपादायोत्पत्तिः कथ्यते तदस्ति । यथा पृथिव्यादि । उक्तं च । अक्षरात् खं ततो वायुस्तस्मात्तेजस्ततो जलम् । उदकात् पृथिवी जाता भूतानामेष संभव इति । तस्मादाकाशं द्रव्यमस्ति । अपि च । आकाशमुपादाय गतिवृद्धिप्रसवादिविशेषोपलब्धेराकाशस्याऽस्तित्वम् । यथा रूपोपलब्धिविशेषसंभवानुमितं चक्षुः । अपि च । आकाशाभावे ह्येकघनत्वं जगतः स्यात् । तथा शब्दाख्यस्य गुणस्यान्यथाऽनुपपत्त्यास्त्याकाशमिति । ननु वायुर्नास्त्येव । तत्स्वरूपग्राहकप्रमाणाभावात् । स्पर्शोपलब्धेर्वायोरस्तित्वमुच्यत इति चेत् तदपि न युज्यते । अधुनैवोक्तं खाद्वायुरिति । गगनस्य च स्पर्शाभावाद्वायोरस्पर्शवत्त्वं कारणगुणपूर्वकत्वात्कार्यस्य । नैतदस्ति । कार्यस्योभयात्मकत्वदर्शनात् । कारणगुणपूर्वकं कार्यं दृष्टमकारणगुणपूर्वकं च दृष्टम् । तत्र कारणगुणपूर्वकं तावद्यथा तंतुश्वेतत्वपूर्वकं पटे श्वेतत्वम् । अकारणगुणपूर्वकं च दृष्टं यथा । हरिद्राक्षारसंयोगाद्रक्तता । तस्मादस्पर्शादाकाशादुत्पन्नो वायुः स्यादेव स्पर्शवान् । नन्वेवमप्यग्निजलपृथिवीष्वपि स्पर्शविशेषसंभवात्तस्मादग्न्यादिसमवाय एव वायुर्व्यवह्रियते न तद्व्यतिरिक्तो वायुरस्ति । अत्रोच्यते सत्यमनलादीनामपि स्पर्शोऽस्ति किंतु विलक्षण एवासौ । तथा हि । तेजसः स्पर्शो रूपैकार्थसमवायी । अपां स्पर्शो रूपरसाभ्यां समवेतः । पृथिव्या रूपरसगंधसमवेतः । यस्तु वायोः स्पर्शः स पत्रचलनशाखाभंजनादिकर्मसमवायी स नैषामग्न्यादीनां दृष्टानामप्यदृष्टानामात्मादिकालादीनाम् । गुणाश्च सर्वे द्रव्याश्रया दृष्टा रूपादय इव पटादिषु । तस्माद्वायोर्विशिष्टस्पर्शवत्त्वादस्तित्वमनुमीयते । तथा पनस्य तत्कर्मोपदेशादस्तित्वम् । यस्य तत्त्वदर्शिभिः कर्मोपदिश्यते तदस्ति यथा कफादिवद्वातस्य च कर्मोपदिष्टम् । यथा संसव्यासव्यधरत्वापेत्यादि । तस्मादस्ति वायुर्द्रव्यमिति । अग्निर्द्रव्यं नास्ति इन्धनव्यतिरेकेणानुपलब्धेः । अत्रोच्यते । तत्त्वदर्शिभिरग्नेर्द्रव्योत्पत्तिहेतुत्वेनोपदेशादस्तित्वम् । तथा चेहैव वक्ष्यति । आग्नेयं दाहभावर्णप्रकाशपवनात्मकमिति । ननु युक्तश्चतुर्णां भूतानां सावयवत्वात् द्रव्येषूत्कर्षापकर्षसंनिवेशः । क्वचिद्द्रव्ये कस्यचिद्भूतस्य प्रमाणतः प्रभावतश्चावयवानामुत्कर्षापकर्षसद्भावादाकाशस्य तु निरवयवत्वात्सूक्ष्मत्वादेकत्वाच्चोत्कर्षापकर्षसंनिवेशो न युक्तः । युक्तमाह भवान् किंतु सावयनामेव द्रव्याणां येऽवयवाः क्षारपाषाणादौ संहता अवतिष्ठन्ते । येन तत्र द्रव्ये काठिन्यस्य प्रकर्षो भवति तत्र चाऽऽकाशमपकृष्यते । अनिबिडावयवे तु सन्निवेश आकाशः प्रकृष्यते । तदेवमनया युक्त्याऽऽकाशस्याऽपि न्यूनाधिकभाव उपपन्नः । पृथ्वीमाधारीकृत्योत्पद्यते ॥ १ ॥

वि०—द्रव्य पंच भूतों से (पृथ्वी, अप्, तेज वायु और आकाश से) बना हुआ है और पृथ्वी का आश्रय लेकर उत्पन्न होता है ॥ १ ॥

एवं पृथिव्याख्येन भूतेनाऽऽधारत्वेनोपकृत्य तेन तदारब्धं द्रव्यमित्युच्यते । यथा—

अम्बुयोन्यग्निपवननभसां समवायतः ।
तन्निर्वृत्तिर्विशेषश्च—

स०—अम्बु सलिलं योनिः कारणं यस्य तदंबुयोनि द्रव्यम् । एवं जलं नाम महाभूतं रसवत्त्वाद्योनितयोपकृत्य तेन तदारब्धमित्युच्यते । मुनिनाऽप्युक्तम् । रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा । निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः । अमीषां द्रव्यादीनामाश्रयकर्मणोर्भेदश्चिंत्यः । तयाऽग्निपवननभसां समवायादपृथग्भावात्तस्य द्रव्यस्य निर्वृत्तिर्निष्पत्तिः । तथा तस्य द्रव्यस्य यो विशेष इदमन्यदिदमन्यद्द्रव्यमित्येवंरूपो नानात्वभावः सोऽप्यग्निपवनभसां समवायात् । एवमग्निपवननभोभिः समवायिकारणत्वेनोपकृत्य तैरेतद्द्रव्यमारब्धमित्युच्यते । एवं च सर्वं पंचमहाभूतात्मकं पंचभिर्महाभूतैरारब्धत्वात् । ननु यदि पंचमहाभूतात्मकं द्रव्यं तत्कथमुच्यते पार्थिवमिदं द्रव्यमिदमाप्यमित्याह ।

वि०—जल इसका उत्पत्ति कारण है; अग्नि-वायु और आकाश इनके समवाय से इसमें व्यक्तता एवं भिन्नता आती है ।

वक्तव्य—जैसा कि कहा है-'रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा । निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः ॥'
(चरक सू. अ. १।६३)।

—व्यपदेशस्तु भूयसा ॥ २ ॥

स०—व्यपदेशस्तु भूयसेति । यत्र द्रव्ये यद्भूतं भूयिष्ठमधिकृतं तेन तस्य व्यपदेशः संज्ञा भवति । यथा पृथिव्याधिक्योत्पादितं द्रव्यं पार्थिवम् । एवमाप्यं तैजसं च वेद्यम् । तदेवं सर्वं द्रव्यं पंचभूतात्मकं स्थितम् ॥ २ ॥

वि०—पाञ्चभौतिक होते हुए भी किसी एक भूत की अधिकता से (पार्थिवादि) व्यवहार होता है जैसे—यह द्रव्य पार्थिव है, यह जलीय है, यह वायवीय है; इत्यादि ॥ २ ॥

तस्मान्नैकरसं द्रव्यं भूतसङ्घातसम्भवात् ।
नैकदोषास्ततो रोगास्तत्र व्यक्तो रसः स्मृतः ॥ ३ ॥
अव्यक्तोऽनुरसः किञ्चिदन्ते व्यक्तोऽपि चेष्यते ।

स०—तस्माद् भूतसंघातसंभवात् कारणाद्द्रव्यं नैकरसमपि त्वनेकरसम् । एवं द्रव्यवद्रसस्याऽपि भूतसंघातसंभवत्वम् । अत एव प्रतिद्रव्यं मधुरादिरसस्य नानात्वादोपलंभः । तथा च । द्राक्षाऽऽक्षोडक्षीरेक्षुक्षौद्रगोजाक्षीरशुक्लादौ द्रव्ये सत्यपि माधुर्ये परोऽपर आस्वाद उपलभ्यते । एवमम्लानामपि मातुलुंगधान्याम्लादीनां द्रव्याणां नानास्वादोपलंभः । एवं लवणादीनाम् । अपि चैषां द्राक्षादीनामनेकरसत्वमास्वादविशेषादनुमीयमानं भूयसा रसेनान्यरसाभिभवं कृत्वा व्यपदिश्यते । इदं मधुरमिदमम्लाद्यन्यतमं महाभूतवत् । यथा सर्वं द्रव्यं पंचमहाभूतात्मकं भूयसा महाभूतेनान्यमहाभूताभिभवं कृत्वा तेन व्यपदिश्यते पार्थिवमिदमाप्यमिदमिति । ननु द्रव्यनिर्णये कृते पांचभौतिकं द्रव्यं यदेव प्रतिज्ञातं तदेव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मादित्यादिना निगमग्रंथेनाऽतिवाहयितुं युक्तं न पुनरप्रस्तुतमनेकरसत्वम्। तस्मादत्रैवं ग्रंथः कर्तुं न्याय्यः तस्मान्नैकभूतजं द्रव्यं भूतसंघातसंभवादिति। अत्रोच्यते। षण्णामपि रसानां योनिरुदकं ततश्चैकस्यैव महाभूतस्योदकसंज्ञस्य रसकारणत्वं प्राप्तं नान्येषां नीरसत्वादिति कृत्वा न भूतसंभवत्वं रसस्येत्येवंविधामाशंकामपनिनीषुर्भूतसंघातसंभवत्वं रसस्य चैकेनेव प्रयत्नेन। तस्यानैकरसं द्रव्यं भूतसंघातसंभवादिति जगाद। मुनिश्चात एव रसस्य भूतसंघातसंभवत्वं स्पष्टं कृत्वोवाच। यथा। रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा। निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः। इत्येवं भूतसंघातो रसानां द्रव्याश्रितानामपि संभवकारणम्। एतच्च रसभेदीये सविस्तरं व्याख्यास्यामः। द्रव्यमनेकरसं ततस्तस्मात्कारणादेकदोषा रोगा ज्वरादयो न भवंत्यपि त्वनेकदोषा इत्यर्थः। अत्रापि व्यपदेशस्तु भूयसेत्यध्याहार्यम्। ते त्रिदोषात्मकेऽपि ज्वरे वाताधिके वातज्वर एवं पित्तज्वरः श्लेष्मज्वर इत्येवंरूपो व्यपदेश उपपन्नः। ननु यदि सर्वो ज्वरः संनिपातजस्तत्किमिति वक्ष्यत्ययं संनिपातज्वर इति। ब्रूमहे। समविषमरूपं शक्त्युत्कर्षमाश्रित्य यत्र दोषा वर्तंते स सन्निपातज्वर इति तंत्रकृता पुरस्ताद्विस्तरेण प्रतिपादयिष्यते। अथ को रसोऽनुरसो वेत्याह। तत्रेत्यादि। तत्र तस्मिन् द्रव्ये यो व्यक्तः स्फुट उपलभ्यते स रसः स्मृतस्तंत्रकृद्भिः। यश्चाव्यक्तोऽस्फुटप्रतिभासो रसनेंद्रियेणोपलभ्यते सोऽनुरसः। हीनार्थोऽत्रानुशब्दोऽल्परस इत्यर्थः। नैतावदेवानुरसलक्षणमित्याह। किंचिदित्यादि। मुखक्षिप्तस्य हरीतक्यादेर्द्रव्यस्य रसनेंद्रियेण किंचिदंते व्यक्तोऽप्युपलभ्यते यः सोऽप्यनुरस इष्यते मुनिभिरिति वाक्यशेषः। अंत इत्यनेनैवं तद्बोधयति अंतेऽवसाने न स्वादौ वा पानमात्रे वा न च मध्ये। तयोर्हि रसस्यैवोपलंभः। अनुशब्दस्यात्र पश्चादर्थत्वम्। पश्चात् स्फुटोऽपि किंचिच्च उपलभ्यते सोऽप्यनुरस इत्यर्थः॥ ३॥

द्रव्यों का अनेकरसत्व—

पंच महाभूतों के समवाय से (मिलने से) द्रव्य बनता है; इसलिये कोई द्रव्य एक रस वाला नहीं है।

(क्योंकि सब द्रव्य अनेक रस वाले हैं) इसलिये एक दोष वाले ज्वरादि रोग भी नहीं होते। (इनमें भी अधिकता से व्यवहार होता है)।

द्रव्यों में जो स्वाद स्पष्ट होता है; उसको 'रस' कहते हैं। और जो अस्पष्ट रहता है; या पीछे से कुछ स्पष्ट होता है; या थोड़ा स्पष्ट दीखता है-ये तीनों अनुरस कहलाते हैं ॥३॥

वक्तव्य—रस-'रसनाऽर्थो रसः' रसनेन्द्रिय से जिस विषय का ग्रहण होता है उसे रस कहते हैं। उसी के रस और अनुरस दो भेद यहाँ बताए गये हैं; विस्तृत विवेचन अगले अध्याय में है। दोषों का रस के साथ सम्बन्ध होता है क्योंकि दोष भी पंचमहाभूतजन्य हैं—'वाय्वाकाशधातुभ्यां वायुः। आग्नेयं पित्तम्। अम्भःपृथ्वीभ्यां श्लेष्मा।'

(संग्रह; सू. अ. २०)।

ननु मधुरादयो रसा गुर्वादिगुणयुक्ताः कथं वक्तुं पार्यंते। यतो मधुरादयो रसा गुणा गुर्वादयश्च। न च गुणानां मधुरादीनां गुर्वादिगुणाधारत्वमुपपन्नम्। तथा च वैशेषिकाः। निर्गुणा गुणा इति तस्मिन्पर्यनुयोग इदमाह—

गुर्वादयो गुणा द्रव्ये पृथिव्यादौ रसाश्रये ॥ ४ ॥
रसेषु व्यपदिश्यन्ते साहचर्योपचारतः।

स०—पृथिव्यादौ पृथिव्यादिमहाभूतारब्धे द्रव्ये रसाश्रये गुर्वादयो गुणाः परमार्थत आश्रिता नतु रसेषु मधुरादिषु। यत्तु रसेषु व्यपदिश्यंते तत् साहचर्योपचारतः। सह चरतीति सहचरस्तस्य भावः साहचर्यम्। यस्मिन्नेव गुडादौ द्रव्ये मधुरो रस आश्रितस्तस्मिन्नपि गुरुगुण आश्रित इति मधुररसगुरुगुणयोः सहचरभावः। साहचर्येण तुल्याश्रयत्वेनोपचारः साहचर्योपचारस्तस्मात्साहचर्योपचारतो गुर्वादयो गुणा रसेषु मधुरादिषु व्यपदिश्यंते। यथा गुरुर्मधुरो रसो लघुरम्ल इत्यादि। न पुनः परमार्थतो रसेषु गुर्वादयः संति। अस्ति च साहचर्येण व्यपदेशः। यथा घृतसहचरेण घृतस्थेनाग्निना दग्धो घृतदग्ध इत्युच्यते ॥ ४ ॥

रसों में गुर्वादि गुण—

वि०—गुरु आदि गुण रस के आश्रय पृथ्वी आदि पंचमहाभूतजन्य द्रव्यों में ही रहते हैं; रसों में उनका होना केवल साथ होने से औपचारिक रूप में कहा जाता है[1] ॥ ४ ॥

तत्र द्रव्यं गुरुस्थूलस्थिरगन्धगुणोल्बणम् ॥ ५ ॥
पार्थिवं गौरवस्थैर्यसङ्घातोपचयावहम्।

स०—तत्र तेषु पार्थिवादिषु पंचसु द्रव्येषु मध्ये पार्थिवं द्रव्यं गुर्वादिगुणोत्कटम्। उल्बणशब्देन तद् द्योतयति पार्थिवे द्रव्येऽन्येऽपि गुणाः संति। सर्वद्रव्याणां पांचभौतिकत्वात् गुर्वादयस्तत्रोत्कटाः। एवमाप्यादिषु सर्वं योज्यम्। तथा गौरवाद्यावहं गुरुत्वादित्यर्थः ॥ ५ ॥

पार्थिव द्रव्यों के स्वरूप और गुण—

वि०—जिस द्रव्य में गुरु, स्थूल, स्थिर और गन्ध गुणों की अधिकता होती है वह पार्थिव होता है। पार्थिव द्रव्य-भारीपन, स्थिरता, काठिन्य और पुष्टि देता है ॥ ५ ॥

द्रवशीतगुरुस्निग्धमन्दसान्द्ररसोल्बणम् ॥ ६ ॥
द्रव्यं स्नेहनविष्यन्दक्लेदप्रह्लादबन्धकृत्।

स०—आप्यं द्रव्यं द्रवादिगुणोल्बणं स्नेहनादिकृत् ॥६॥

---

१. रस एक गुण है और गुरु आदि भी गुण हैं, गुण द्रव्यों में ही रहते हैं। 'यत्राश्रिताः कर्मगुणाः' तथा गुण में गुण नहीं रहते 'गुणा गुणाश्रया नोक्ताः' फिर भी रसों में गुणों का होना शास्त्रों में वर्णित है। 'यथा गुरुर्मधुरो रसो लघुरम्ल' इत्यादि। वस्तुतः गुरु आदि गुण उस द्रव्य में ही रहते हैं जिनमें मधुर आदि रस, किन्तु साहचर्य या दोनों के एक साथ और एक ही द्रव्य में आश्रित होने से उपचारतः गुरु आदि गुण मधुर आदि रस के गुण कहे जाते हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जलीय द्रव्य के स्वरूप और गुण—

वि०—द्रव, शीतल, गुरु, स्निग्ध, मन्द, सान्द्र और रस की प्रधानता वाले द्रव्य जलीय होते हैं और स्नेहन, विष्यन्दन, क्लेद, तृप्ति या प्रसन्नता और बन्धन करने वाले होते हैं ॥ ६ ॥

रूक्षतीक्ष्णोष्णविशदसूक्ष्मरूपगुणोल्बणम् ॥ ७ ॥
आग्नेयं दाहभावर्णप्रकाशपचनात्मकम् ।

स०—आग्नेयं द्रव्यं रूक्षादिगुणोत्कटं दाहादिकरम् ॥७॥

आग्नेय द्रव्य के स्वरूप और गुण—

वि०—रूक्ष, तीक्ष्ण, उष्ण, विशद, सूक्ष्म और रूप गुणों की प्रधानता वाले द्रव्य आग्नेय होते हैं। ये दाह, कान्ति, वर्ण प्रकाश और पाक करते हैं ॥ ७ ॥

वायव्यं रूक्षविशदलघुस्पर्शगुणोल्बणम् ॥ ८ ॥
रौक्ष्यलाघववैशद्यविचारग्लानिकारकम् ।

स०—वायव्यं रौक्ष्यादिगुणं रौक्ष्यलाघवादिकरं च ॥८॥

वायव्य द्रव्य के लक्षण और गुण—

वि०—रूक्ष, विशद, लघु और स्पर्श गुणों की प्रधानता वाले द्रव्य वायव्य होते हैं। इनसे रूक्षता, लघुता, विशदता; विविध प्रकार चेष्टायें और ग्लानि होती है ॥ ८ ॥

नाभसं सूक्ष्मविशदलघुशब्दगुणोल्बणम् ॥ ९ ॥
सौषिर्यलाघवकरम्—

स०—नाभसं द्रव्यं सूक्ष्मादिगुणोल्बणं सौषिर्यादिकरं च ॥ ९ ॥

आकाशात्मक द्रव्य के लक्षण और गुण—

वि०—सूक्ष्म, विशद, लघु और शब्द गुणों की प्रधानता वाले द्रव्य आकाशीय होते हैं। इनसे सुषिरता और लघुता होती है ॥ ९ ॥

—जगत्येवमनौषधम् ।
न किञ्चिद्विद्यते द्रव्यं वशान्नानार्थयोगयोः ॥१०॥

स०—एवमनेन पंचमहाभूतारब्धेन गुर्वादिगुणयोगेन द्रव्याणां जगति भुवनेऽस्मिन्ननौषधभूतं न किंचिद् द्रव्यमस्त्यपि तु सर्वमेव द्रव्यं यत्सिकतापांस्वादिकं तदौषधं चिकित्सितम्। वशान्नानार्थयोगयोः। अर्थश्च योगश्चार्थयोगौ। अर्थः प्रयोजनम्। योगो युक्तिः। यथाऽनया युक्त्यौषधमिदं योजितमस्य रोगस्य विजयाय स्यादनया चास्य रोगस्येति। नानाविधौ तावर्थयोगौ तयोर्वशात्सामर्थ्यात् सर्वमपि द्रव्यमौषधम्। रोगप्रतीकारहेतुत्वात् ॥ १० ॥

वि०—इस प्रकार भिन्न भिन्न प्रयोजन और योजना की दृष्टि से जगत् में कोई भी द्रव्य अनौषध नहीं है, अर्थात् प्रयोजन और योजना की दृष्टि से संसार का प्रत्येक द्रव्य औषधरूप है ॥ १० ॥

अथ किं द्रव्यं किंभूतोत्कटं भवतीत्याह—

द्रव्यमूर्ध्वगमं तत्र प्रायोऽग्निपवनोत्कटम् ।
अधोगामि च भूयिष्ठं भूमितोयगुणाधिकम् ॥ ११ ॥

स०—ऊर्ध्वं गच्छतीत्यूर्ध्वगमम्। खप्रकरणे गमेरप्युपसंख्यानमिति खः। प्रायो बाहुल्येनोर्ध्वगं द्रव्यमग्निपवनाधिकं भवति। यथा मदनफलादि भूयिष्ठं प्रायेण। तथा चाऽग्निसमीरणोत्कटस्याऽप्यधोगामित्वं दृष्टम्। यथा हरीतक्यादेः। अचिन्त्यप्रभावत्वाद्यथा सर्पे विषमयत्वेऽपि तत्फणामणेर्विषघ्नत्वम्। भूमितोयोल्बणं द्रव्यमधोगामि भवति यथा त्रिवृतादि। यत्तु व्यामिश्रात्मकं तुल्यकालमूर्ध्वाधोदोषहरणं तदिह ग्रन्थगौरवभयान्नोक्तमपि मिश्रीभूतोत्कटं द्रव्यं व्यामिश्रात्मकमिति सामर्थ्यलब्ध एवायमर्थः ॥ ११ ॥

द्रव्यों का अधोगत्व-ऊर्ध्वगामित्व—

वि०—अग्नि और वायु की प्रधानता वाले द्रव्य प्रायः ऊर्ध्वगामी अर्थात् वमन कराने वाले होते हैं तथा जल और पृथ्वी की अधिकता वाले द्रव्य प्रायः अधोगामी अर्थात् विरेचन कराने वाले होते हैं ॥ ११ ॥

वक्तव्य—आकाश की अधिकता वाले द्रव्य शमन करने वाले हैं। यथा—'आकाशगुणभूयिष्ठं शमनम्' प्रायः शब्द का अपवाद भी हैं यथा-चित्रक की भाँति दन्ती में अग्नि और वायु की अधिकता होने पर भी वह विरेचक है। मुलहठी में मृद्वीका की भाँति जल और पृथ्वी की अधिकता होने पर भी वमन की प्रवृत्ति है। मिले हुए भूतों की अधिकता वाले द्रव्य वमन—विरेचन दोनों कार्य करते हैं।

इति द्रव्यं—रसान् भेदैरुत्तरत्रोपदेक्ष्यते ।

स०—इति परिसमाप्तौ। द्रव्यं प्रति यद्वक्तव्यं तन्निष्पन्नमित्यर्थः। एवं द्रव्ये निर्दिष्टे रसा निर्देष्टुं युक्ता इत्याह। रसानित्यादि। बहुवक्तव्यत्वादुत्तरत्रानंतरेऽध्याये रसान् भेदैस्त्रिषष्टिसंख्यावच्छिन्नैरुपदेक्ष्यते तन्त्रकृत्।

वि०—इस प्रकार द्रव्य की विवेचना समाप्त हुई। रसों को उनके भेदों के साथ—इसके अगले अध्याय में कहेंगे (चूँकि रसों के सम्बन्ध में अधिक कहना है; इसलिये अलग अध्याय में कहा गया)।

अथ वीर्यस्य विपाकादिभ्यः प्राधान्यात्तच्चर्चा प्रस्तौति—

वीर्यं पुनर्वदन्त्येके गुरु स्निग्धं हिमं मृदु ॥ १२ ॥
लघु रूक्षोष्णतीक्ष्णं च तदेवं मतमष्टधा ।

स०—द्रव्यमुक्तम्। वीर्यं पुनर्गुर्वादीनष्टौ गुणान् द्रव्याश्रितानिति समाचक्षते। तस्मादेवमनेन प्रकारेण वीर्यमष्टधाऽष्टप्रकारं गुर्वादीनां मतम् ॥ १२ ॥

अष्टविधवीर्यवाद—

वि०—कई आचार्य वीर्य को-गुरु, स्निग्ध, शीत, मृदु, लघु, रूक्ष, उष्ण और तीक्ष्ण आठ प्रकार का मानते हैं। (सुश्रुत में गुरु-लघु के स्थान पर विशद और पिच्छल पाठ है) ॥ १२ ॥

चरकस्त्वाह वीर्यं तत् क्रियते येन या क्रिया ॥ १३ ॥
नावीर्यं कुरुते किञ्चित्सर्वा वीर्यकृता हि सा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—चरकाचार्यः पुनरेवं वक्ति। येन स्वभावेन या क्रिया क्रियते यत्कर्म निष्पाद्यते तद्वीर्यम् । तदेव यावत् किंचिद्गुणजातं द्रव्ये स्थितं तत्सर्वं वीर्यमेव सर्वं वीर्यं करोति। अत एवाह। नावीर्यमित्यादि । यन्न वीर्यं तन्न किंचित्करोति न कांचिदप्यर्थक्रियां निष्पादयति। प्रतिनियतशक्तिपरिष्वक्तत्वात्सर्वभावानाम् । अत एवाह। सर्वेत्यादि। हिशब्दो यस्मादर्थे । यस्मात्सर्वा क्रिया वीर्यकृता वीर्येण जनिता ततो यन्न वीर्यं तन्न किंचित्कुरुते ॥ १३ ॥

शक्तिमात्रवीर्यवाद—

वि०—चरक का कहना है कि—जिससे यावत् (समस्त) क्रिया की जाती है, वह वीर्य है। वीर्यरहित द्रव्य कोई कार्य नहीं करता; क्योंकि सब क्रियायें वीर्य (शक्ति) से ही होती हैं ॥ १३ ॥

गुर्वादिष्वेव वीर्याख्या तेनान्वर्थेति वर्ण्यते ॥ १४ ॥
समग्रगुणसारेषु शक्त्युत्कर्षविवर्तिषु ।
व्यवहाराय मुख्यत्वाद्बह्वग्रग्रहणादपि ॥ १५ ॥

स०—यतो वीर्यस्यैव करणसामर्थ्यं तेन कारणेन गुर्वादिष्वेवाष्टासु वीर्याख्याऽन्वर्थाऽनुगतार्थेति भण्यते। एवकारोऽवधारणार्थः। गुर्वादिष्वेव वीर्यसंज्ञा न तु रसविपाकप्रभावेषु। किंभूतेषु गुर्वादिषु। समग्रेत्यादि। समग्राश्च ते गुणाश्च तेषु साराश्चिरकालावस्थितत्वो गुर्वादय एव। तथा च जाठराग्निसंयोगेनाऽपि न मधुरादिरसस्वभावमेते जहति । सर्तेः सुस्थिर इति घञि सारशब्दः। तथाऽन्येभ्यो मंदसांद्रादिभ्यो रसादिभ्यो वा गुणेभ्यो वा गुर्वादयः शक्त्युत्कर्षविवर्तिनः। शक्तेः सामर्थ्यस्योत्कर्ष आधिक्यम्। विशेषेण वर्तो विशेषेण भवनम्। शक्त्युत्कर्षस्य विवर्तः स विद्यते येषां त एवम्। किंच। गुर्वादीनां गुणानां व्यवहाराय व्यवहारार्थम् मुख्यत्वादन्येभ्यो गुणेभ्यो गुर्वादयः प्रधानभूता इत्यर्थः। तथा च गुर्वादयो गुणा द्रव्ये पृथिव्यादौ रसाश्रय इत्युक्तं न मधुरादयो गुणा इति। तस्माद् गुर्वादीनां गुणानां व्यवहारमुख्यत्वं रसादिभ्यः। तथा बह्वग्रग्रहणाद्बहुग्रहणादग्रग्रहणाच्च बहवो द्रव्यरसादयो गुर्वादिभिर्गृहीता भवंति। तथा चायुर्वेदशास्त्रेषु रसादिभ्यो गुर्वादीनामग्रे ग्रहणं दृष्टम्। यथा वातादिदोषगुणनिरूपणायां गुर्वादीनामेव पूर्वं ग्रहणं न रसादीनाम्। तथा च तत्र रूक्षो लघुरित्याचार्योऽपठद्वाय्वादिलक्षणे। एवं गुर्वादीनामेवाग्रे ग्रहणाद्गुर्वादिष्वेव वीर्याख्याऽन्वर्थाऽनुगतार्थेति भण्यते ॥ १४–१५ ॥

पारिभाषिकवीर्यवाद—

वि०—गुरु, स्निग्ध, शीत, मृदु, लघु, रूक्ष, उष्ण और तीक्ष्ण इन्हीं आठ गुणों को वीर्य कहना जिस लिए ठीक है उसका वर्णन करते हैं। समस्त गुणों में ये आठ सार या मुख्य हैं (क्योंकि ये स्थिर हैं; विपाक आदि से भी इनमें परिवर्तन नहीं होता) इनमें शक्ति का आधिक्य होता है। व्यवहार में मुख्यतया इन्हीं का प्रयोग होता है और बहुत से गुणों में भी सबसे पूर्व इन्हीं का शास्त्रों में भी उल्लेख होता है ॥१४–१५॥

अतश्च विपरीतत्वात्सम्भवत्यपि नैव सा ।
विवक्ष्यते रसाद्येषु वीर्यं गुर्वादयो ह्यतः ॥ १६ ॥

स०—अतोऽस्माच्च कारणकदंबकाद्विपरीतत्वाद्वैपरीत्येन स्थितत्वान्न रसादयो वीर्यम्। तथाहि। रसस्य सारत्वं नास्ति। जाठरानलसंयोगवशेन रसांतरोत्पत्तेः। गुर्वादीनां तु जाठराग्निसंयोगवशेनाऽपि नान्यथाभावः। तथा न रसस्य शक्त्युत्कर्षविवर्तित्वम् । यतो रसस्य गुर्वाद्याहितशक्तेरेव स्वकर्मणि सामर्थ्यम्। व्यवहाराय यथा गुर्वादेर्मुख्यत्वं यथा बह्वग्रग्रहणं तथा प्राग्दर्शितम्। प्रभावः सर्वातिशायी द्रव्यस्वभावस्तस्य च क्रियानिर्वर्तनसामान्ये सत्यपि वीर्यसंज्ञा पूर्वोक्ताद्धेतोर्न वर्तते। एवं विपाककर्मणोरपि चिंत्यम्। तस्माद्रसाद्येषु संभवत्यपि विद्यमानाऽप्यसद्रूपेव सा वीर्यसंज्ञा न विवक्ष्यते नोररीक्रियते। आदौ भव आद्यः। दिगादित्वाद्यत्। रस आद्यो येषां प्रभावादीनां त एवं तेषु। वीर्यमित्यादि। हि शब्दो यस्मादर्थे। यत एवं सा वीर्यसंज्ञा संभवत्यपि रसादिषु वपरीत्यान्न विवक्ष्यतेऽतो गुर्वादय एव वीर्यं न रसादयः ॥ १६ ॥

रसादि में अवीर्यत्व—

वि०—इसीलिये वीर्य का लक्षण रस आदि में घटता हुआ भी पूर्वोक्त कारणों से विपरीत होने से अर्थात् गौण, अस्थिर, अल्पशक्तिता, व्यवहार में अप्रधानता से रसादि के लिए वीर्य शब्द का प्रयोग नहीं होता—अर्थात् रस आदि क्रिया करने में समर्थ होने पर भी वीर्य शब्द से नहीं कहे जा सकते। इसलिये गुरु आदि आठ ही की वीर्य संज्ञा है ॥ १६ ॥

उष्णं शीतं द्विधैवान्ये वीर्यमाचक्षतेऽपि च ।

स०—अन्य आचार्या उष्णं शीतमिति द्विप्रकारं वीर्यमाचक्षते । एवकारोऽवधारणार्थः । द्विधैव वयं नाष्टधेति । अपिचेति निपातसमुदायो युक्तिसमुच्चये । तेऽपि सयुक्तिकमेवाहुरित्यर्थः।

द्विविधवीर्यवाद—

वि०—दूसरे आचार्य शीत और उष्ण भेद से वीर्य दो प्रकार का मानते हैं।

तामेव युक्तिं दर्शयन्नाह—

नानात्मकमपि द्रव्यमग्नीषोमौ महाबलौ ॥ १७ ॥
व्यक्ताव्यक्तं जगदिव नातिक्रमति जातुचित् ।

स०—नानात्मस्वभावमपि द्रव्यं स्थावरजंगमाद्यचेतनचेतनमग्नीषोमौ महाबलावुत्कृष्टशक्ती न जातु कदाचिदतिक्रामति नोल्लंध्य वर्तते। अवश्यं हि द्रव्यं किंचिदाग्नेयं किंचित्सौम्यम्। अतः किंचिद्द्रव्यमुष्णवीर्यं किंचिच्छीतवीर्यम्। तथा च मुनिः। न मत्स्याः पयसा सहाभ्यवहार्याः। उभयं ह्येतन्मधुरं मधुरविपाकं शीतोष्णत्वाद्विरुद्धवीर्यं विरुद्धवीर्यत्वाच्छोणितप्रदूषणायेति। अत्र दृष्टांतमाह। व्यक्ता व्यक्तमित्यादि। व्यक्तं चाव्यक्तं च व्यक्ताव्यक्तं नानात्मकमपि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जागत्त्रैलोक्यं कर्तृ यथा व्यक्तं चाव्यक्तं च नातिक्रामति तथा द्रव्यमग्नीषोमावित्यर्थः। व्यक्तं स्थूलं दृश्यमित्यर्थः। सांख्यानां तु महदादि व्यक्तमव्यक्तं प्रधानं पुरुषश्च ॥ १७ ॥

वि०—क्योंकि नाना प्रकार के स्थावर-जङ्गम, चेतन-अचेतनादि द्रव्य व्यक्त और अव्यक्त संसार के समान महाबली अग्नि और सोम इन दो का कभी उलङ्घन नहीं करते अर्थात् कोई द्रव्य आग्नेय और कोई सौम्य होता है और उनसे उत्पन्न गुण या कर्म भी आग्नेय या सौम्य होते हैं अतः उष्ण और शीत के भीतर ही सभी वीर्यों का समावेश हो जाता है ॥ १७ ॥

तत्रोष्णं भ्रमतृड्ग्लानिस्वेददाहाशुपाकिताः ॥ १८ ॥
शमं च वातकफयोः करोति, शिशिरं पुनः।
ह्लादनं जीवनं स्तम्भं प्रसादं रक्तपित्तयोः ॥ १९ ॥

स०—तत्र तयोरुष्णशीतयोर्मध्य उष्णमुष्णवीर्यं भ्रमादीन् करोति। आशुपाकितां शीघ्रपाकित्वम्। शिशिरं शीतवीर्यं तु ह्लादनादीन्करोति ॥ १८-१९ ॥

दोनों वीर्यों के गुण—

वि०—इनमें उष्णवीर्य—भ्रम, प्यास, ग्लानि, पसीना, दाह और शीघ्र पाक करता है तथा वात एवं कफ का शमन करता है। शीतवीर्य—प्रसन्नता, जीवन, रुकावट, रक्त और पित्त की निर्मलता करता है ॥ १८-१९ ॥

वीर्यादनंतरं विपाकं लक्षयति—

जाठरेणाग्निना योगाद्यदुदेति रसान्तरम्।
रसानां परिणामान्ते स विपाक इति स्मृतः ॥ २० ॥

स०—जाठरेणौदर्येणाऽग्निना योगात् संश्लेषाद्द्रसानां परिणामांते जरणनिष्ठाकाले रसांतरं रसविशेष उत्पद्यते स विपाक इति स्मृतो मुनिभिः कथितः ॥ २० ॥

विपाक का लक्षण—

वि०—विपाक—जाठराग्नि के संयोग से द्रव्यों की परिणति के अन्त समय में जो अन्य रस उत्पन्न होता है उसको विपाक कहते हैं। [विशेषरूप में पाक होना विपाक है] ॥ २० ॥

स्वादुः पटुश्च मधुरमम्लोऽम्लं पच्यते रसः।
तिक्तोषणकषायाणां विपाकः प्रायशः कटुः ॥ २१ ॥

स०—स्वादुर्मधुरो गुडादिः पटुर्लवणः सैंधवादिर्मधुरं कृत्वा पच्यते रस इति संबन्धः। मधुरमिति क्रियाविशेषणत्वान्नपुंसकलिंगम्। स्वादुः स्वादुविपाको लवणोऽपि स्वादुविपाक इत्यर्थः। अम्लो रसो दधिकांजिकादिरम्लं पच्यतेऽम्लविपाको भवति तिक्तोषणकषायाणां प्रायशः कटुर्विपाको भवति। प्रायशोग्रहणं सर्वत्राऽपि योजनीयम्। तेन व्रीहिस्थो मधुरो रसोऽम्लं पच्यत इत्युपपन्नम्। तथा चोक्तम्। स्वादुरम्लविपाकोऽन्यो व्रीहिरिति। तथा हरीतक्या भूयस्त्वेन यः कषायो रसः स मधुरमेव पच्यते। तथा कटुको रसः शुंठ्यार्द्रकपिप्पल्यादिस्थो मधुरं पच्यते। तथा चोक्तम्। कषाया मधुरा पाक इति। तथा। नागरं दीपनं वृष्यं ग्राहि हृद्यं विबंधनुत्। रुच्यं लघु स्वादुपाकमिति। तद्वदार्द्रकमपीति। तथा। श्लेष्मला स्वादुशीतार्द्रेत्यारभ्य यावत्स्वादुपाकेति। अत्र केचिदाहुः। तिक्तकषाययोरेव कटुविपाकतया पित्तकर्तृत्वमापद्यत इति। तदेतदसत्। शीतवीर्यत्वेनैतयोः पित्तहंतृत्वात्। वीर्यं हि रसविपाकौ विजयते। वक्ष्यति हि। रसं विपाकस्तौ वीर्यमिति ॥ २१ ॥

रसों का विपाक—

वि०—विपाक तीन प्रकार का है—मधुर और लवण का मधुर विपाक; अम्लरस का अम्ल विपाक और तिक्त, उष्ण और कषाय रस का विपाक प्रायः कटु होता है ॥ २१ ॥

वक्तव्य—सुश्रुत में अम्ल विपाक न मानकर मधुर और कटु दो ही प्रकार का विपाक माना है। कुछ आचार्य प्रति रस का विपाक मानते हैं। परन्तु पिप्पली कटु होने पर भी उसका कटु विपाक नहीं, इसी प्रकार खट्टे अनार का अम्ल पाक नहीं होता अतः यह मत असमान्य है।

रसैरसौ तुल्यफलस्तत्र द्रव्यं शुभाशुभम्।

स०—रसैर्जिह्वावैषयिकैर्मधुराम्लकटुकैर्विपाककालोपलभ्यो मधुराम्लकटुकलक्षणो यो रसो भवत्यसौ तुल्यफलः। तुल्यं सदृशं फलं यस्य स तुल्यफलः। एतदुक्तं भवति। अभ्यवहृतस्य मधुररसस्य जाठराग्निसंयोगवशाद्यद्रसांतरं फलतया निष्पन्नं तद्रसैः सदृशम्। फलग्रहणेनैतत्प्रतिपादयति। फलोपममेव वृष्याद्विलक्षणकार्यसदृशं न तु कुसुमोपमं देहाह्लादनादिलक्षणकार्यमिति। एवमम्लादीनामपि व्याख्येयम्। तत्रेत्यादि। तेषु रसवीर्यविपाकादिषु मध्ये द्रव्यं किंचिच्छुभाशुभं सदसत्कर्म रसेन कुरुते। यथा। मधु कषायरसत्वेन पित्तं शमयति। किंचिद्विपाकेन। यथा। तदेव मधु कटुविपाकतया कफं हंति।

विभिन्न विपाकों के कर्म—

वि०—यह तीन प्रकार का विपाक मधुर-अम्ल और कटु-इन तीन रसों के समान फल देने वाला है; अर्थात् मधुर विपाक का गुण मधुर रस के समान है। अम्ल का अम्ल के और कटु विपाक का कटु रस के समान है।

किञ्चिद्रसेन कुरुते कर्म पाकेन चापरम् ॥ २२ ॥
गुणान्तरेण वीर्येण प्रभावेणैव किञ्चन।

स०—किंचन द्रव्यं गुणांतरेणाऽन्योन्यगुणविकृतत्वाद्रसविपाकतो यः गुणांतरो गुर्वादिस्तेन। यथा। अम्लं कांजिकं कफं शमयति। रौक्ष्यात्। किंचन वीर्येण। यथा। कषायतिक्तं महत्पंचमूलं वातं जयति नतु पित्तमुष्णवीर्यत्वात्। किंचन द्रव्यं प्रभावेणैव शुभाशुभं कर्म कुरुते। यथा। अम्लोष्णा सुरा क्षीरं वर्धयति ॥ २२ ॥

वि०—कुछ द्रव्य शुभ (दोष-शमन कार्य), अशुभ (दोष-कोपन कार्य) कार्य रस से करता है; और दूसरा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्रव्य वीर्य से करता है; और कोई गुणान्तर से, कोई वीर्य से और कोई प्रभाव से कार्य करता है ॥ २२ ॥

वक्तव्य—रस से कार्य-मधु मधुर-कषाय रस होने से पित्त का शमन करता है। विपाक से-मधु कटु विपाक होने से कफ का नाश करता है। गुणान्तर से-अम्ल काञ्जी कफ का शमन करती है; रूक्ष होने से। कोई वीर्य से-बृहत्पंचमूल कषाय—तिक्त होने पर भी उष्णवीर्य से वायु को शान्त करता है। प्रभाव से-अम्ल और गरम सुरा दूध को बढ़ाती है। शुभ-अशुभ कार्य-मधु कटु विपाक से कफ का शमन करता है; परन्तु कषाय और रूक्ष होने से वायु को उत्पन्न करता है।

ननु गुरूष्णाम्लमधुरादिगुणानां रसादीनां विरोधः। तत्रैषां कार्यनिष्पत्तौ समशक्तित्वं न वेत्याशंकानिवृत्त्यर्थमाह—

यद्यद्द्रव्ये रसादीनां बलवत्त्वेन वर्तते ॥ २३ ॥
अभिभूयेतरांस्तत्तत्कारणत्वं प्रपद्यते।

अत इदमाह—

विरुद्धगुणसंयोगे भूयसाऽल्पं हि जीयते ॥ २४ ॥

स०—रसादीनां रसवीर्यविपाकप्रभावानां मध्ये यद्रसादिवस्तु रसो वीर्यं वा विपाको वा प्रभावो वा बलवत्त्वेन बलिष्ठतया द्रव्यं वर्ततेऽवतिष्ठते तत्तद्वस्तुजातमितरानबलिष्ठानभिभूय विफलीकृत्य कारणत्वं प्रपद्यते। कर्मकरणे कारणतामासादयतीत्यर्थः। हि यस्माद्विरुद्धगुणसंयोगे संहतीभावे सति यदल्पं वस्तु तद् भूयसा बलवता जीयतेऽभिभूयते। गुणशब्देन चात्र रसादयो गृह्यंते न पारिभाषिका गुर्वादयोऽप्रकृतत्वात्। विरुद्धगुणसंयोग इत्यत्र विरुद्धगुणसमवेतद्रव्यसंयोग इति कल्प्यं न विरुद्धगुणसंयोग इति। नहि गुणानां संयोगो वक्तुं युज्यते किं तर्हि द्रव्याणाम्। तथा च मुनिः। संयोगस्तु द्वयोर्बहूनां वा संहतीभावः। विरोधश्च द्विविधः। स्वरूपतः कार्यतश्च। स्वरूपतो विरोधो गुरुलघ्वोः शीतोष्णयोश्च। कार्यतो यथा। वायौ जेतव्येऽरूक्षोष्णद्रव्यसंयोगोपयोगः। अत्र हि यो गुणानां विरोधः स कार्येण। तत्र यदल्पं वस्तुजातं तद् भूयसा वस्तुजातेनाऽभिभूयते। तत्र यथा क्षीरं शीतवीर्यमपि मधुररसहेतुकस्नेहगौरवादिभिः साहाय्यबाहुल्याद्वातशमनाख्यं कार्यं करोति न पुनः स्वकार्यं वातप्रकोपाख्यम् ॥ २३-२४ ॥

वि०—रस, वीर्य, विपाक, प्रभाव में से जो द्रव्य में बलिष्ठ रूप से रहता है; वह दूसरे रसादि को दबा करके कर्म करने में कारण बन जाता है; क्योंकि विरोधी गुण से टक्कर होने पर अधिक गुण से थोड़ा गुण पराजित हो जाता है ॥ २३-२४ ॥

यत्र तु द्रव्ये रसादीनामुत्कर्षसंभवः परस्परं साम्यं तत्र कस्य कार्यकारणत्वमित्याह—

रसं विपाकस्तौ वीर्यं प्रभावस्तान्यपोहति।
बलसाम्ये रसादीनामिति नैसर्गिकं बलम् ॥ २५ ॥

स०—रसं मधुरादिषड्विधं विपाकः कर्ता व्यपोहति कार्यकरणे कुंठयति। कुंठयति। यथा मधुरो मधुनि रसः कटुना विपाकेनाभिभूयते। अत एव पवनशमनाख्यं कार्यं मधुररसहेतुकं न करोत्यपि तु वातप्रकोपनाख्यं कटुविपाकहेतुकमेव करोति। तौ रसविपाकौ वीर्यं कर्तृभूतमपोहति। यथा महिषामिषेऽस्थितौ मधुररसविपाकावुष्णवीर्याख्यं कर्तृ अभिभवति। अत एव तन्मांसं पित्तादिदूषणम्। अन्यथा स्वादुरसविपाकित्वात्पित्तशामकमेव स्यात्। प्रभावस्तु त्रीनपि रसादीन् विजयते। यथा। अम्लरसविपाकोष्णवीर्या च सुरा क्षीरं जयति। इतीदृशं रसादीनां नैसर्गिकं बलं स्वाभाविकी शक्तिः। एतदुक्तं भवति। रसं समबलमपि विपाको व्यपोहति। रसविपाकौ च समबलावपि वीर्यं स्वभावाद्व्यपोहति। एतानि च समबलान्यपि प्रभावो व्यपोहतीति ॥२५॥

रसादि में उत्कर्षता—

वि०—सामान्यतः बल की समानता होने पर रस-वीर्य आदि का स्वाभाविक बल इस प्रकार रहता है कि रस को विपाक दबा देता है; रस और विपाक को वीर्य पराजित करता है; रस-विपाक और वीर्य को प्रभाव दबा देता है ॥ २५ ॥

बल—स्वाभाविक शक्ति; यह दो प्रकार की है; कृत्रिम और अकृत्रिम। मात्रा की अधिकता या सहायक द्वारा दी हुई शक्ति कृत्रिम। स्वाभाविक—अकृत्रिम शक्ति है।

ननु द्रव्यरसविपाकवीर्याणि कर्मानुमानेन यथा स्वरूपाण्येवावगच्छामः। प्रभावस्य तु न ज्ञायते कीदृशं कर्मेत्यत आह—

रसादिसाम्ये यत् कर्म विशिष्टं तत् प्रभावजम्।

स०—द्वयोर्द्रव्ययो रसादीनां रसवीर्यविपाकानां साम्ये सति यदेकं द्रव्यमन्यत्कर्म कुरुतेऽन्यत्पुनरन्यद्विशिष्टं कर्म तत् प्रभावजं प्रभावाज्जातमिति ज्ञेयम्। अयमस्य द्रव्यस्य प्रभाव इति विशिष्टकर्मकरणान्निश्चीयत इत्यर्थः। ननु प्रभावः क उच्यत इति। ब्रूमः। रसवीर्यविपाकादिगुणातिशायी द्रव्यस्य स्वभावो यः स प्रभावः। उक्तं च रसवीर्यविपाकादिगुणातिशयवानलम्। द्रव्यस्वभावो निर्दिष्टो यः प्रभावः स कीर्त्यत इति।

प्रभाव का लक्षण—

वि०—रस आदि की समानता (दो द्रव्यों में) होने पर भी जो कर्म दीखता है; वह प्रभाव है।

अत्र निदर्शनार्थमाह—

दन्ती रसाद्यैस्तुल्याऽपि चित्रकस्य विरेचनी ॥ २६ ॥
मधुकस्य च मृद्वीका, घृतं क्षीरस्य दीपनम्।

स०—चित्रकस्य रसवीर्यविपाकैस्तुल्यापि दंती रसादिभ्योऽतिशायिद्रव्यस्वभावयोगाद्विरेचनी न चित्रकश्चित्रकत्वात्। मधुकस्य च मृद्वीका तुल्याऽपि रसादिभ्योऽतिशायिद्रव्यस्वभावयोगान्मृद्वीका विरेचनी न मधुकम्। घृतं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षीरस्य रसादिभिस्तुल्याऽपि घृतं दीपनं न पुनः क्षीरम्। अन्ये त्वेवं प्रभावलक्षणं प्रतिपन्नाः प्रतिवस्तु स्वसंज्ञाप्रवृत्तिनिमित्तलक्षणो यो धर्मस्त्वतलादिप्रत्ययप्रतीतिसमधिगम्यः स प्रभावः। तंत्रांतरे चोक्तम्। वस्तूनां यः स्वसंज्ञायाः। प्रवृत्तौ करणे स्मृतः। त्वतलादिप्रबोध्यश्च प्रभाव इति कीर्तितः। एवं च दंतीत्वाद्दंत्या विरेचनकारित्वं प्रभावः। चित्रकस्य चित्रकत्वादविरेचनकारित्वं प्रभावः। एवं मृद्वीकात्वान्मृद्वीकाया विरेचनकारित्वं प्रभावः। इत्यादि सकलपदार्थेषु बोध्यम् ॥ २६ ॥

प्रभाव का निदर्शन—

वि०—उदाहरण—दन्ती, रस, वीर्य और विपाक में चित्रक के समान होने पर भी विरेचक होती है। इसी प्रकार मुलेठी और द्राक्षारस; रस वीर्य और विपाक में समान होने पर भी द्राक्षा रेचन होता है। घी और दूध रस, वीर्य, विपाक में समान होते हुए भी घी अग्निदीपक है; दूध अग्निदीपक नहीं ॥ २६ ॥

सामान्यविशेषाभ्यां यतः सकलं व्याप्तमतो ग्रंथकार इदमाह—

इति सामान्यतः कर्म द्रव्यादीनां, पुनश्च तत् ॥ २७ ॥
विचित्रप्रत्ययारब्धद्रव्यभेदेन भिद्यते।

स०—इति प्रकारे। अनेन प्रकारेण द्रव्यरसवीर्यादीनां सामान्येन कर्म व्याख्यातं न विशेषेण। यैरेव महाभूतै रसवीर्यादयो द्रव्याश्रिता आरब्धास्तैरेव तथाभूतैस्तदाश्रयमपि द्रव्यम्। अतः सामान्यतः कर्म द्रव्यादीनां युक्तं संप्राप्तं विशिष्टं कर्म प्रतिद्रव्यं वक्तुमिदमाह। पुनश्च तदिति। तत्सामान्योक्तं कर्म द्रव्यरसादीनां संबंधि पुनर्भिद्यते विशिष्यते। केनेत्याह। विचित्रेत्यादि। विचित्राश्च ते प्रत्ययाश्च विचित्रप्रत्ययाः। नानाकारसंनिवेशविशेषयुक्तानि महाभूतानि प्रतिसत्त्वं प्राक्तनशुभाशुभकर्मप्रेरितो विचित्रो महाभूतपरिणाम इत्यर्थः। विचित्रप्रत्ययारब्धं च तद्द्रव्यं च तस्य भेदो विशेषस्तेन विचित्रप्रत्ययारब्धद्रव्यभेदेन तत्सामान्योक्तं कर्म द्रव्यादीनां भिद्यते। द्रव्याश्रितत्वाद्रसादीनामपि यत्कर्म तदपि द्रव्यभेदेन भिद्यते न तु सर्वमपि देशकालादिवशाद्विचित्रप्रत्ययारब्धम्। परस्परवैलक्षण्याद्द्रव्याणाम्। परस्परवैलक्षण्ये चैषां विचित्रप्रत्ययारब्धत्वमेव कारणम्। यद्वशादन्यदिदं द्रव्यमिति रूपरसविपाकादिभिन्नमुत्पद्यते तथा प्रतिभासते च तत्किंतु विचित्रप्रत्ययारब्धद्रव्यभेदेन भिद्यत इति। अत्राचक्ष्महे। सत्यमेतत् किंतु विशिष्टद्रव्यस्य संग्रहार्थं विचित्रप्रत्ययारब्धमिति विशेषणं शास्त्रकृता कृतम्। यस्य भेदेन द्रव्ये रसवीर्यादीनां यत्सामान्योक्तं कर्म तद्भिद्यते। यस्मिन् द्रव्ये रसादीनामन्यानि महाभूतान्यारम्भकाणि द्रव्यस्य चारंभकाण्यपराणि च तद्द्रव्यं विचित्रप्रत्ययारब्धम् तदेवं द्रव्याणां द्वैविध्यम्। यतः कानिचिद्द्रव्याणि यैरेव महाभूतैर्यथाविधै रसादय आरब्धास्तैरेव तथाविधैर्महाभूतैस्तदाश्रयाण्यपि द्रव्याण्यारब्धानि। तानि रसादिसमानप्रत्ययारब्धान्युच्यन्ते। तानि च यथायथं तत्कर्म रसाद्यनुगुणं सामान्यात्कुर्वते। यथा क्षीरेक्षुशर्करादीनि। कानिचित्पुनस्तदाश्रितरसादिसमारम्भकमहाभूतान्यन्यानि तदाश्रयद्रव्यारम्भकाण्यन्यानि च महाभूतानि। तैरारब्धानि तानि विचित्रप्रत्ययारब्धानि द्रव्याणि। एतदुक्तं भवति। रसादीनामारम्भकाण्यन्यथाभूतानि महाभूतानि नोभयत्रैकरूपाणीति। तानि च यथायथं रसाद्यनुगुणं कर्म न कुर्वंति भिन्नत्वाद्धेतुभावस्य। तथाहि। रसादीनामारंभेऽन्यो हेतुरन्यश्च तदाश्रयद्रव्यारम्भ इति यथा मकुष्ठयवमत्स्यसिंहादीनि। एतानि यथारसं वीर्यविपाककर्म न कुर्वंति। विचित्रप्रत्ययारब्धत्वात्। इत्थं यानि रसादिसमानप्रत्ययारब्धानि द्रव्याणि च बहून्यपि तेषां रसोपदेशेन रसकर्म निर्देष्टुं शक्यते। अत एव हेतोः षण्णां रसानां योऽनुगुणनिर्देशस्तस्य सार्थकत्वम्। रसोपदेशमन्तरेण हि बहुतराणां समानरूपाणां द्रव्याणां क्षीरेक्षवादीनां कर्म वक्तुं सुखेन शक्यते। यानि तु विचित्रप्रत्ययारब्धानि द्रव्याणि तेषां प्रतिद्रव्यं कर्मोपदेशं विना यथायथं कर्म वक्तुं न शक्यते ॥ २७ ॥

ग्रन्थकार की उक्ति—

वि०—इस प्रकार द्रव्यों के सामान्य रूप में कर्म कह दिये। परन्तु ये कर्म द्रव्य के आरम्भक कारणों की विचित्रता के भेद से भिन्न-भिन्न होते हैं ॥ २७ ॥

वक्तव्य—द्रव्य और रस दोनों के आरम्भक महाभूत ही होते हैं। प्रायः दोनों ही के आरम्भक भूत एक समान होते हैं और उनके गुण भी समान होते हैं। ऐसे द्रव्य समानप्रत्ययारब्ध कहलाते हैं किन्तु कभी-कभी द्रव्य के आरम्भक भूतों से भिन्न प्रकार के भूत रसों के आरम्भक होते हैं तो उनके गुणों में कुछ विचित्रता आ जाती है और ऐसे द्रव्य विचित्रप्रत्ययारब्ध कहलाते हैं। इनसे क्रमशः प्रकृतिसम समवेत (कारण के अनुसार कार्य जैसे श्वेतसूत से श्वेत वस्त्र) तथा विकृतिविषमसमवेत (कारण से भिन्न कार्य जैसे श्वेत चूना और पीली हल्दी के संयोग से लाल रंग की उत्पत्ति होना) ये दो कार्य या गुण उत्पन्न होते हैं।

एतदुदाहरणार्थं ग्रन्थकृदाह—

स्वादुर्गुरुश्च गोधूमो वातजिद्वातकृद्यवः ॥ २८ ॥
उष्णा मत्स्याः पयः शीतं कटुः सिंहो न शूकरः ॥ २९ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने द्रव्यादिविज्ञानियो नाम नवमोऽध्यायः ॥ ९ ॥

स०—स्वादुरसोपेतो गुरुगुणयुक्तश्च गोधूमो मधुररसोपदिष्टं यद्वातजित्वं कर्म तत्करोति। समानप्रत्ययारब्धत्वात्। यवस्तु स्वादुरसोपेतो गुरुगुणयुक्तश्च मधुररसोपदिष्टं यद्वातजित्वं कर्म तन्न करोत्यपि तु वातकृत्वमेव करोति। विचित्रप्रत्ययारब्धत्वात्। मत्स्यः स्वादुरसोपेतो गुरुगुणोपेतश्च न

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मधुररसोपदिष्टशीतवीर्यः किं तर्ह्युष्णवीर्यो विचित्रप्रत्ययारब्धत्वात्। क्षीरं च स्वादुरसोपेतं गुरुगुणयुक्तं च मधुररसोपदिष्टशीतवीर्यं समानप्रत्ययारब्धत्वात्। स्वादुरसयुक्तो गुरुगुणयुक्तश्च सिंहो न यथारसं मधुरविपाकः किं तर्हि कटुको विपाके विचित्रप्रत्ययारब्धत्वात्। शूकरो मधुररसयुक्तो गुरुगुणोपेतश्च यथारसं मधुरविपाक एव समानप्रत्ययारब्धत्वात्। एवं यानि समानप्रत्ययारब्धानि द्रव्याणि तेषां रसोपदेशेनैव गुणा निर्दिष्टा भवंति। तथा च मुनिः। शीतं वीर्येण यद्द्रव्यं मधुरं रसपाकयोः। तयोरम्लं यदुष्णं च यच्चोष्णं कटुकं तयोः। रसोपदेशेन तथा निर्देश्यो गुणसंग्रहः। वीर्यतो विपरीतानां पाकलक्ष्मोपदेक्ष्यते। यथा पयो यथा सर्पिर्यथा वा चव्यचित्रकौ। एवमादीनि चान्यानि निर्दिशेद्रसतो भिषगिति। बाहुल्येन च रसादिसमानप्रत्ययारब्धान्येव द्रव्याणीति चेतसि कृत्वा चान्योऽवोचत्। यथा। गुर्वादयो गुणा द्रव्ये पृथिव्यादौ रसाश्रये। रसेषु व्यपदिश्यंते साहचर्योपचारत इति। अत एव च बहुतराणि द्रव्याणि रसादिसमानप्रत्ययारब्धान्यतो रसोपदेशव्याप्त्या तानि निर्देष्टुं शक्यंते नान्यथा। विचित्रप्रत्ययारब्धानि पुनः कतिपयान्येव द्रव्याणि तानि प्रतिद्रव्यमेवोपदिश्यंते। मुनिनाऽप्ययमर्थो युक्त्यैवोक्तः। यथा। मधुरं किंचिदुष्णं स्यात्कषायं तिक्तमेव च। यथा महत्पंचमूलं तथा चानूपमामिषम्। लवणं सैन्धवं नोष्णमम्लमामलकं तथा। अर्कागुरुगुडूचीनां तिक्तानां चौष्ण्यमुच्यते। किंचिदम्लरसं ग्राहि किंचिदम्लं भिनत्ति च। यथा कपित्थं संग्राहि भेदि चामलकं यथा। पिप्पली नागरं वृष्यं कटु चावृष्यमुच्यते। कषायः स्तंभनः शीतः सोऽभयास्वन्यथा मतः। तस्माद्रसोपदेशेन न सर्वं द्रव्यमादिशेदिति। ये च रससंयोगा वक्ष्यमाणास्ते रसादिसमानप्रत्ययारब्धैर्मधुराम्ललवणतिक्तकटुकषायरूपैर्मिथः कल्पनीयाः। न तु विचित्रप्रत्ययारब्धैर्मधुराम्ललवणतिक्तकटुकषायरूपैः। यस्मात्तेषामयथाशास्त्रनिरूपिता रसवीर्यविपाकादयो विद्यंते। विचित्रप्रत्ययारब्धत्वात्। अयं रससंयोगभेद एवं गुणोऽयमेवं गुणत्वाच्चामुष्मिन्विषये योज्य एतस्मिन्विषये चाऽयमिति निर्देष्टुं न शक्यते। अनिर्ज्ञातस्वरूपत्वात् नहि विचित्रप्रत्ययारब्धैर्ये रससंयोगाः क्रियंते तेषां स्वरूपं कथमवधारयितुं शक्यते। अपिच। समानप्रत्ययारब्धैर्ये संयोगाः कल्प्यंते तेषां संयोगिनां वीर्यतो यो विरोधः शीतोष्णलक्षणः स न दोषाय। ते तु विचित्रप्रत्ययारब्धैः संयोगाः कल्प्यंते तेषां संयोगिनां यः शीतोष्णलक्षणैर्विरोधः स दोषायेति वेद्यम्। अन्यथा रसालापानकादीनामनेकद्रव्यकृतानामनव्यवहार एव प्राप्नुयात्। तथा त्रयस्त्रिंशद्वर्गा ये वक्ष्यमाणास्तेषु यदयौगिकं तज्ज्ञात्। यौगिकं त्वनुक्तमपि युंज्यादिति यद्वक्ष्यते तत्र रसादिसमानप्रत्ययारब्धमेव योज्यं न विचित्रप्रत्ययारब्धम्। तस्य रसवीर्यविपाकानां निश्चयस्य कर्तुमशक्यत्वात्। तस्मादित्यादि। यत एवं विचित्रप्रत्ययारब्धं विचित्ररूपं तस्माद्रसोपदेशेन न सर्वं द्रव्यमादिशेदपि तु रसादिसमानप्रत्ययारब्धं द्रव्यमेव रसोपदेशेन निर्दिशेदिति ॥ २८-२९ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वाङ्गसुन्दराख्यायां नवमोऽध्यायः ॥ ९ ॥

वि०—उदाहरण विचित्रप्रत्यारब्ध के—मधुर और गुरु गुण में समान होने पर भी विचित्रप्रत्ययारब्ध होने से (आरम्भक कारण की विचित्रता से) गेहूँ वातशामक, जौ वातकारक है। मछलियाँ उष्णवीर्य होती हैं जब कि दूध शीतवीर्य है, सिंह का मांस कटु विपाक होता है किन्तु सूअर का कटु विपाक नहीं होता है ॥ २८-२९ ॥

वक्तव्य—जौ को स्वादु और गुरु होने से वातशामक होना चाहिये न कि वातकारक। इसी प्रकार मछलियों को मधुर और गुरु होने से शीतवीर्य होना चाहिये परन्तु वे उष्णवीर्य हैं। स्वादु और गुरु होने से सिंह के मांस का विपाक मधुर होना चाहिये, परन्तु वह कटुविपाक है। यह विचित्रता इन द्रव्यों के आरम्भक महाभूतों के संयोग की विचित्रता के कारण ही होती है।

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का द्रव्यादिविज्ञानीय नामक नवां अध्याय समाप्त हुआ ॥ ९ ॥

दशमोऽध्यायः

पूर्वस्मिन्नध्याये रसान् भेदैरुत्तरत्रोपदेक्ष्यत इत्युक्तमतस्तान् रसभेदान्वक्तुं रसभेदीयाध्यायं ब्रूते—

अथातो रसभेदीयमध्यायं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

स०—रसानां भेदो रसभेदस्तस्मै हितो रसभेदीयस्तमध्यायं व्याख्यास्यामः कथयिष्यामः। रसनार्थो रस इति मुनिः। तथाऽव्योनिरपामेव रसवत्त्वात्। तथा च मुनिः। आपो हि रसवत्य इति। अपां चाव्यक्तरसत्वात्प्रतिद्रव्यस्यान्यादृशो रसानां महाभूतवैलक्षण्यज आस्वाद आस्वाद्यते। तथा च मधुररसाधिष्ठितानां क्षीरद्राक्षेक्षुशर्करादीनां प्रतिद्रव्यस्यन्यादृशो मधुररसास्वाद उपलभ्यते। न त्वेकरूपः। एवमम्लानामारनालकोलाम्लिकादीनामपि प्रतिद्रव्यमनेकरूप आस्वादविशेष उपलभ्यते न त्वेक एव।

वि०—अब इसके आगे रसभेदीय[1] अध्याय का

१. पूर्वाध्याय में 'रसाद् भेदैरुत्तरत्रोपदेक्ष्यते' कहा था अतः अब रस के सम्बन्ध में विवेचन करते हैं। यद्यपि प्रथम अध्याय में छः ही रसों का निर्देश किया है पर इन छः रसों के परस्पर संयोग एवं पृथक्-पृथक् भी उत्कर्ष और न्यूनता आदि की दृष्टि से अनेक भेद होते हैं अतः इनके सम्बन्ध में बहुत वक्तव्य होने से पृथक् अध्याय में इनका विवेचन कर रहे हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्याख्यान करेंगे जैसा कि भगवान् आत्रेय आदि महर्षियों ने कहा था।

पूर्वं च प्रत्यपादि षडेव रसा इति तानेव लक्षयति—

क्ष्माऽम्भोऽग्निक्ष्माऽम्बुतेजःखवाय्वग्न्यनिलगोऽनिलैः।
द्वयोल्बणैः क्रमाद्भूतैर्मधुरादिरसोद्भवः॥ १॥

स०—पृथिव्यादिभिर्महाभूतैर्द्वयोल्बणैर्द्व्यधिकैः क्रमात्परिपाट्या यथासंख्यमित्यर्थः। मधुरादीनां षण्णां रसानामुद्भवोऽभिनिर्वृत्तिर्भवति। द्वयमुल्बणं येषु भूतेषु तानि द्वयोल्बणानि तैः। द्वयोल्बणशब्दोपादानाच्च द्रव्यवद्रसस्याऽपि पाञ्चभौतिकत्वमिति प्रतिपादयति। कतमत्पुनर्भूतद्वयं कतमस्मिन् रसेऽधिकमारंभकं स्यादिति यथासंख्येन दर्शयन्नाह। क्ष्मांभोऽग्निक्ष्मांबुतेजःखवाय्वग्न्यनिलगोऽनिलैः। भूमिजलाभ्यामधिकाभ्यां मधुरः। क्ष्माग्निभ्यामम्लः। अंब्वग्निभ्यां लवणः। खवायुभ्यां तिक्तकः। अग्निवायुभ्यां कटुः। क्ष्मानिलाभ्यां कषायः। ननु भूमितोयाधिक्यान्मधुर एवमंबुवाय्वाधिक्यादन्यो भूम्याकाशाधिक्यादन्य इत्येवमादिरसविकल्पैरसंख्येयरसप्रसंगः प्राप्नोति। अत्रोच्यते। स्वभावाददोषः। एषां भूम्याकाशादीनामीदृशः स्वभावो यत्केनचिदेव भूताधिक्येन व्यवस्थितानि भूम्यादीनि रसांतरोत्पादनसमर्थानि भवंति न सर्वेणेति॥ १॥

मधुरादि रसों की उत्पत्ति—

वि०—दो-दो भूतों की अधिकता से क्रमशः मधुर आदि छः रस उत्पन्न होते हैं; यथा—भूमि और जल की अधिकता से मधुर, भूमि और अग्नि की अधिकता से अम्ल, जल और अग्नि की अधिकता से लवण, आकाश और वायु की अधिकता से तिक्त, अग्नि और वायु की अधिकता से कटु, पृथ्वी और वायु की अधिकता से कषाय रस होता है॥ १॥

वक्तव्य—रस में पञ्चमहाभूतों का सम्बन्ध रहता है; परन्तु जिन दो भूतों की प्रधानता रहती है; उनको कारण माना है। इसमें महाभूतों का स्वभाव ही कारण है कि छः ही रस होते हैं; वे जल और वायु आदि अन्य दो-दो भूतों की अधिकता से किसी अन्य रस को उत्पन्न नहीं करते।

ननु स्वलक्षणं बिनाऽनुक्तो रसविशेषः कथं ज्ञायतामिति लक्षणार्थमाह—

तेषां विद्याद्रसं स्वादुं यो वक्त्रमनुलिम्पति।
आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादनः॥ २॥
प्रियः पिपीलिकादीनाम्—

स०—तेषां रसानां मध्य आस्वाद्यमानो वक्त्रमनुलिंपति मुखोपदेहं जनयति। तथा देहस्याह्लादन आश्वासकः। तथाऽक्षाणामिंद्रियाणां प्रसादनः प्रसन्नत्वकृत्। तथा पिपीलिकादीनां प्रियः। तं मधुरं जानीयात्। पिपीलिकादीनां प्रियपतेनैतद्दर्शयति। प्रमेहादिषु मूत्रगन्धोदये पिपीलिकोपसर्पणान्माधुर्यानुमानं कृत्वा मधुमेहत्वादि ज्ञायते। आस्वाद्यमान इत्युत्तरत्रापि योज्यम्॥ २॥

रसों के लक्षण—

वि०—इसमें मधुर रस—उसको जानना-जो कि खाने पर मुख में चिपचिपापन उत्पन्न करता है; शरीर को पुष्ट करता है, इन्द्रियों को निर्मल करता है; पिपीलिका चिउँटी आदि को प्रिय होता है॥ २॥

—अम्लः क्षालयते मुखम्।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः॥ ३॥

स०—अम्लो रस आस्वाद्यमानो मुखं क्षालयते स्रावयति। तथा रोमदन्तानां हर्षणः। हृषु अलीके। अलीककारी। उद्वेजक इत्यर्थः। तथाऽक्षिभ्रुवनिकोचनः। अक्षिणी च भ्रुवौ चाक्षिभ्रुवम् अचतुरादिसूत्रे निपातितम्॥ ३॥

वि०—अम्ल रस—मुख को धोता है—मुख से स्राव निकालता है, रोमांच तथा दन्तहर्ष करता है; आँख और भ्रुवों को संकुचित करता है॥ ३॥

लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत्।

स०—लवणो रसो मुखं स्पंदयति। तथा कपोलयोर्गले च दाहं करोति। अन्नस्य रोचन इतीहातिप्रसिद्धत्वान्नोक्तम्। संग्रहे तु। स्पष्टार्थमुक्तम्। यथा। कण्ठकपोलं विदहन्नन्नं प्ररोचयतीति।

वि०—लवण रस—मुख से लार टपकाता है, कपोल और गले में दाह करता है।

तिक्तो विशदयत्यास्यं रसनं प्रतिहन्ति च॥ ४॥

स०—तिक्तो मुखं विशदयतीति। तच्च अपैच्छिल्ययुतं करोति। रसनेन्द्रियं च प्रतिहंति। अन्यरसग्रहणशक्तिं नाशयतीत्यर्थः॥ ४॥

वि०—तिक्त रस—मुख से लिसलिसेपन को हटाता है (स्वच्छ करता है) और अन्य रसों को नष्ट कर देता है॥ ४॥

उद्वेजयति जिह्वाग्रं कुर्वंश्चिमिचिमां कटुः।
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च॥ ५॥

स०—कटुरास्वाद्यमानो जिह्वाग्रमुद्वेजयति सोद्वेगं करोति। चिमिचिमां कुर्वन् दहनज्वालासंस्पर्शादिवाऽक्ष्यादि स्रावयति। गण्डौ च दहतीव॥ ५॥

वि०—कटु रस—मुख में चिमचिमाहट करता हुआ जिह्वा के अग्रभाग को उद्वेजित करता है; आँख, नाक और मुख से स्राव करता है और कपोलों को जलाता-सा है॥ ५॥

कषायो जडयेज्जिह्वां कण्ठस्रोतोविबन्धकृत्।

स०—कषायो जिह्वां जडयति रसादिक्रियायां मंदीकरोति। तथा कण्ठस्य स्रोतांसि शिराविशेषास्तेषां विबन्धं करोति। श्वासादीनामयथाप्रवृत्तिमिव कुरुत इत्यर्थः।

वि०—कषाय रस—जिह्वा को जड बनाता है (जकड देता है) कण्ठ और स्रोतों को बन्द कर देता है।

अथ को रसः किं कर्म करोतीत्यत आह—

रसानामिति रूपाणि कर्माणि मधुरो रसः॥ ६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

आजन्मसात्म्यात्कुरुते धातूनां प्रबलं बलम् ।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ॥ ७ ॥
प्रशस्तो बृंहणः कण्ठ्यः स्तन्यसाधनकृद्गुरुः ।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः ॥ ८ ॥
कुरुतेऽत्युपयोगेन स मेदः श्लेष्मजान् गदान् ।
स्थौल्याग्निसादसंन्याससमेहगण्डार्बुदादिकान् ॥ ९ ॥

स०—इति परिसमाप्तौ । रसानां मधुरादीनां लक्षणानि समाप्तानि सम्प्रति तेषां कर्म यथास्वं प्रदर्शयन्नाह । कर्माणीति । वक्ष्यमाणानीति वाक्यशेषः । मधुरो रसो धातूनां बलं प्रबलं कुरुते । बलं निजं तत्प्रकृष्टं जनयतीत्यर्थः । कुतः आजन्मसात्म्याज्जन्मप्रभृति देहस्य सात्म्यादित्यर्थः । बालभाव एव हि क्षीराद्विना पुरुषस्य वृत्तिः । तथा बालादीनां प्रशस्तो हित ओजसोऽधिकवर्धनत्वात्प्रशस्तः । ओजस्तु तेजो धातूनां शुक्रांतानां परमित्योजोलक्षणं वक्ष्यति । तथा बृंहणः कंठ्यश्च । स्तन्यं क्षीरं संधानं श्लेषस्ते करोतीति स्तन्यसंधानकृत् । तथाऽऽयुष्यादिगुणः । नन्वायुष्यजीवनयोरेकार्थत्वादेकतरोपादानमेव युक्तम् । मैवम् । एतयोर्भिन्नार्थत्वात् । यथाहि । आयुष्यः स उच्यते । योऽपरिमितायुषो हितोऽधिकायुषो हितत्वात् । तथा च मुनिः । तेनाऽऽयुरमितं लेभ इति । यस्त्वायुषो नियतरूपस्य तामेव मर्यादामनुबध्नाति स जीवयतीति जीवन उच्यते । तदनयोः स्पष्ट एव भेदः । तथा जीवनमोजस्यमित्यभिन्नार्थौ किन्त्वेतयोर्द्वयोरपीह यदुपादानं तदोजसो द्विविधाया अपि वृद्धेः कारकोऽयमिति प्रतिपादयितुम् । तथा च मधुरो रसो रुधिरादिक्रमेणौजसो वृद्धिकरः सामान्याद्विशेषाच्च । यथा क्षीरं धातुवर्धनमुक्तं वृष्यं च । तत्र धातुवर्धनत्वेनैव वृष्यत्वस्योक्तत्वाद्वृष्यशब्दोपादानं यत्तदन्यानि वृष्यरूपाण्यात्मगुणादीनि तेभ्यः सकाशाद्विशेषेणाश्वेव वृद्धिकरमिति द्योतयितुं कृतमिति । कुरुत इत्यादि । मधुरो रसोऽत्युपयोगेनाऽतिसेवया मेदःश्लेष्मोत्थान्रोगान्करोति । कांस्तानित्याह । स्थौल्यादिकान् ॥ ६–९ ॥

मधुर रस के कर्म—

वि०—ये रसों के लक्षण हैं—अब कर्मों को कहते हैं। इनमें—मधुर रस—जन्मकाल से ही सात्म्य होने के कारण धातुओं को अतिशय बलवान् बनाता है। बालक और वृद्ध को, क्षत, क्षीण, वर्ण, केश, इन्द्रियाँ और ओज के लिए उत्तम है, बृंहण करने वाला, गले के लिये उत्तम, दूध को बढ़ानेवाला, सन्धानकारक, गुरु, आयुवर्धक, जीवनदायक, स्निग्ध तथा पित्त, वायु और विषनाशक है। किन्तु मधुर रस अधिक मात्रा में सेवन करने से मेद और कफजन्य स्थूलता, अग्निमान्द्य, संन्यास, प्रमेह, गण्डमाला, अर्बुद आदि रोगों को उत्पन्न करता है ॥ ६–९ ॥

अम्लोऽग्निदीप्तिकृत्स्निग्धो हृद्यः पाचनरोचनः ।
उष्णवीर्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः ॥१०॥
करोति कफपित्तास्रं मूढवातानुलोमनः ।
सोऽत्यभ्यस्तस्तनोः कुर्याच्छैथिल्यं तिमिरं भ्रमम् ॥११॥
कण्डूपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान् ।

स०—अम्लो रसोऽग्निदीप्तिकृत्त्वादियुतः । तथा कफपित्तास्रं करोति । मूढमननुलोमगं वातमनुलोमयतीति मूढवातानुलोमनः । सोऽम्लो रसोऽतिसेवितो देहशैथिल्यं तिमिरादींश्च कुर्यात् ॥ १०–११ ॥

अम्ल रस के कर्म—

वि०—अम्ल रस—अग्नि को प्रदीप्त करने वाला, स्निग्ध, हृदय के लिये प्रिय, पचाने वाला, रुचिकारक, उष्णवीर्य, स्पर्श में शीतल, तर्पण; क्लिन्नताकारक एवं लघु होता है तथा कफ, पित्त और रक्त को बढ़ाने वाला तथा मूढ वायु का अनुलोमक है। अम्ल रस अधिक सेवन करने पर शरीर में शिथिलता, तिमिर, भ्रम, कण्डू, पाण्डु, विसर्प, शोफ, विस्फोट, प्यास और ज्वर को उत्पन्न करता है ॥ १०–११ ॥

लवणः स्तम्भसङ्घातबन्धविध्मापनोऽग्निकृत् ॥ १२ ॥
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत् ।
सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम् ॥ १३ ॥
तृट्कुष्ठविषवीसर्पाञ्जनयेत्क्षपयेद्बलम् ।

स०—लवणो रसः स्तंभादिविध्मापनो वह्निकृत्त्वादियुतश्च । सोऽत्यभ्यस्तो वातरक्तादीन् जनयेत् । बलं प्राणं क्षपयेत् ॥ १२–१३ ॥

लवण रस के कर्म—

वि०—लवण रस—स्तम्भ [रुकावट], संघात (काठीन्य), और बन्ध को नष्ट करता है, अग्नि बढ़ाता है, स्नेहन करने वाला, स्वेदन, तीक्ष्ण, रुचि कराने वाला, छेदक और भेदक है। अधिक सेवन करने पर यह वातरक्त, गञ्जापन, बालों का सफेद होना, झुर्रियाँ पड़ना, प्यास, कुष्ठ, विष (के वेग को बढ़ाता है) एवं वीसर्प को उत्पन्न करता है और बल का नाश करता है ॥ ११–१३ ॥

तिक्तः स्वयमरोचिष्णुररुचिं क्रिमितृड्विषम् ॥ १४ ॥
कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत् ।
क्लेदमेदोवसामज्जशकृन्मूत्रोपशोषणः ॥ १५ ॥
लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्ठविशोधनः ।
धातुक्षयानिलव्याधीनतियोगात्करोति सः ॥ १६ ॥

स०—तिक्तो रसः स्वयं मुखस्याऽरोचनशीलोऽरुच्यादीन् जयेत् । अरुचिराहारद्रव्यविषयेऽनभिलाषः । क्लेदादीनामुपशोषणः । तथा लघ्वादिगुणयुक्तः । सोऽतिसेवितो धातुक्षयादीन् कुरुते ॥ १४–१६ ॥

तिक्तरस के कर्म—

वि०—तिक्त रस—अपने आप अरुचिकारक (दुःस्वादु) होता हुआ भी अरुचि (भोजन पान में अनिच्छा) को मिटाता है, कृमि, प्यास, विष, कुष्ठ, मूर्च्छा, ज्वर, उत्क्लेश,

Digitized by Madhuban Trust, Delhi
CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दाह, पित्त और कफ को शान्त करता है; क्लेद, मेद, वसा, मज्जा, मल और मूत्र को सुखाता है; लघु, मेधा के लिए उत्तम, शीतवीर्य, रूक्ष एवं दूध और गले का शोधक है। अधिक सेवन करने से यह धातुओं का क्षय और वातरोगों को उत्पन्न करता है ॥ १४-१६ ॥

कटुर्गलामयोदर्दकुष्ठालसकशोफजित् ।
व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः ॥ १७ ॥
दीपनः पाचनो रुच्यः शोधनोऽन्नस्य शोषणः ।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥ १८ ॥
कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम् ।
मूर्च्छामाकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम् ॥ १९ ॥

स०—कटुर्गलामयादीन् जयति। व्रणस्यावसादनो रोहणः स्नेहादिविशोषणो दीपनत्वादिगुणयुक्तश्च। अन्नं शोषयति विदहति। अन्नशोषणत्वाच्छिनत्ति बन्धान्। स्रोतांसि विवृणोति प्रसारयति। कफघ्नश्च। सोऽतिनिषेवितस्तृष्णादीन् करोति ॥ १७-१९ ॥

कटु रस के कर्म—

वि०—कटु रस—गले के रोग, उदर्द, कुष्ठ, अलसक और शोफनाशक; व्रणों को दबाने वाला है एवं स्नेह, मेद और क्लेद को सुखाता है; अग्निदीपक; पाचक, रुचिकारक, शोधक, अन्न का शोषक, बन्धनों को काटने वाला; स्रोतों को खोलने वाला और कफ-नाशक है। अधिक सेवन करने से यह प्यास, शुक्रक्षय, बलक्षय, मूर्च्छा, सङ्कोच, कम्पन, कमर और पीठ आदि में पीड़ा उत्पन्न करता है ॥ १७-१९ ॥

कषायः पित्तकफघ्नो गुरुरस्रविशोधनः ।
पीडनो रोपणः शीतः क्लेदमेदोविशोषणः ॥ २० ॥
आमसंस्तम्भनो ग्राही रूक्षोऽति त्वक्प्रसादनः ।
करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः ॥ २१ ॥
तृट्कार्श्यपौरुषभ्रंशस्रोतोरोधमलग्रहान् ।

स०—कषायः पित्तकफघ्नो गुरुत्वादियुतोऽतिशयेन त्वक्प्रसादनश्च। सोऽत्युपयुक्तो विष्टम्भादीन्करोति ॥ २०-२१ ॥

कषाय रस के कर्म—

वि०—कषाय रस—पित्त और कफनाशक, गुरु, रक्तशोधक, पीडक [व्रण या फोड़ों को दबाने वाला], व्रणों का रोपक (भरने वाला); शीतवीर्य, क्लेद और मेद को सुखाता है। आम को रोकने वाला, ग्राही, रूक्ष एवं त्वचा को अतिशय निर्मल करता है। अधिक सेवन करने से यह विष्टम्भ, आध्मान, हृदय में में वेदना, प्यास, कृशता, शुक्रहानि, स्रोतों का अवरोध और मल की रुकावट करता है ॥ २०-२१ ॥

अथ मधुरादिस्कन्धान्निर्दिशति—

घृतहेमगुडाक्षोडमोचचोचपरूषकम् ॥ २२ ॥
अभीरुवीरापनसराजादनबलात्रयम् ।
मेदे चतस्रः पर्ण्यो जीवन्ती जीवकर्षभौ ॥ २३ ॥
मधूकं मधुकं बिम्बी विदारी श्रावणीयुगम् ।
क्षीरशुक्ला तुगाक्षीरी क्षीरिण्यौ काश्मरी सहे ॥ २४ ॥
क्षीरेक्षुगोक्षुरक्षौद्रद्राक्षाऽऽदिर्मधुरो गणः ।

स०—हेम काञ्चनम्। राजादनं चाषप्रियम्। बलात्रयं बलाऽतिबलानागबलेति। मेदा महामेदेति मेदाद्वयम्। चतस्र इति। शालिपर्णी पृश्नीपर्णी मुद्गपर्णी माषपर्णी च। मधूकं मधूकपुष्पम्। मधुकं मधुयष्टी। बिंबी गोल्हा। श्रावणीयुगं श्रावणी महाश्रावणी च। क्षीरिणी कांचनक्षीरी। काश्मरी गंभारी। सहे महासहा क्षुद्रसहा च। आदिशब्देन तृणपंचमूलं मेदोमज्जतैलं मधुरदाडिमपुष्करबीजशृंगाटकाश्वगन्धाश्वदंष्ट्रामृणालकशेरुकर्कोसिचतिकाखर्जूरतालमस्तकादीनि गृह्यन्ते ॥ २२-२४ ॥

मधुर वर्ग के द्रव्यों के नाम—

वि०—मधुरगण—घी, सुवर्ण, गुड़, अखरोट, केला, नारियल, फालसा, शतावरी, बीरा, कटहल, खिरनी, बला अतिबला और नागबला; मेदा, महामेदा, शालपर्णी, पृश्निपर्णी, मुद्गपर्णी, माषपर्णी, जीवन्ती, जीवक, ऋषभक, महुआ, मुलहठी, कन्दूरी, विदारी, श्रावणी, महाश्रावणी, क्षीरविदारी, वंशलोचन, क्षीरकाकोली और दूधी, गम्भारी, सहा और महासहा; दूध; ईख, गोखरू, मधु, द्राक्षा आदि यह मधुरगण हैं ॥ २२-२४ ॥

इदानीमम्लस्कन्धमाह—

अम्लो धात्रीफलाम्लीकामातुलुङ्गाम्लवेतसम् ॥ २५ ॥
दाडिमं रजतं तक्रं चुक्रं पालेवतं दधि ।
आम्रमाम्रातकं भव्यं कपित्थं करमर्दकम् ॥ २६ ॥

स०—धात्रीफलमामलकम्। रजतं रौप्यम्। चुक्रं शुक्तम्। उपलक्षणं चेदम्। संग्रहोक्तान्यन्यान्यपि कोशाम्रलकुचकुवलकोलवदरैरावतप्राचीनामलकमस्तुधान्याम्लादीनीहैव बोध्यानि ॥ २५-२६ ॥

अम्लवर्ग के द्रव्यों के नाम—

वि०—अम्ल गण—आँवला, इमली, बिजौरा, अम्लवेतस, अनार, चाँदी, तक्र, चुक्र, पालेवत (अम्ल), दही, आम, आम्रातक, कमरख, कैथ, करौंदा यह अम्लगण के द्रव्य हैं ॥ २५-२६ ॥

अथ लवणस्कन्धमाह—

वरं सौवर्चलं कृष्णं विडं सामुद्रमौद्भिदम् ।
रोमकं पांशुजं सीसं क्षारश्च लवणो गणः ॥ २७ ॥

स०—वरं सैंधवं लवणश्रेष्ठत्वात्। क्षारः स्वर्जिकादिः ॥ २७ ॥

लवणवर्ग के द्रव्यों के नाम—

वि०—लवण गण—सैन्धव, सञ्चल, कृष्ण, बिड, सामुद्र, औद्भिद, रोमक, पांशुज, सीसा और क्षार लवणगण के द्रव्य हैं ॥ २७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिक्तः पटोली त्रायन्ती बालकोशीरचन्दनम् ।
भूनिम्बनिम्बकटुकातगरागुरुवत्सकम् ॥ २८ ॥
नक्तमालद्विरजनीमुस्तमूर्वाटरूषकम् ।
पाठापामार्गकांस्यायोगुडूचीधन्वयासकम् ॥ २९ ॥
पञ्चमूलं महद्व्याघ्र्यौ विशालाऽतिविषा वचा ।

तिक्तस्कन्धं वक्ति—

स०—नक्तमालः करंजः । कांस्यं लोहभेदः । अयो लोहम् ॥ २८-२९ ॥

तिक्त वर्ग के द्रव्यों के नाम—

वि०—तिक्तगण- पटोली, त्रायन्ती, ह्रीबेर, खस, चन्दन, चिरायता, नीम, कटुकी, तगर, अगरु, इन्द्रजौ, करञ्ज, हल्दी, दारुहल्दी, मुस्ता, मूर्वा, बासा, पाठा, चिरचिटा, कांसा, लोहा, गिलोय, धमासा, महापञ्चमूल, छोटी और बड़ी कटेरी, इन्द्रायण, अतीस और वच ये तिक्तगण हैं ॥ २८-२९ ॥

कटुस्कन्धमाह—

कटुको हिङ्गुमरिचकृमिजित्पञ्चकोलकम् ॥ ३० ॥
कुठेराद्या हरितकाः पित्तं मूत्रमरुष्करम् ।

स०—पित्तं मूत्रं छागादीनाम् । उपलक्षणं चेदम् । अन्यानि संग्रहोक्तानि च मनःशिलासर्षपकुष्ठादीनि बोध्यानि ॥ ३० ॥

कटु वर्ग के द्रव्यों के नाम—

वि०—कटुगण—हींग, मरिच, विडङ्ग, पञ्चकोल, कुठेरादि और हरितक वर्ग, सभी पित्त, मूत्र और भिलावा यह कटुगण हैं ३० ॥

कषायस्कन्धमाह—

वर्गः कषायः पथ्याऽक्षं शिरीषः खदिरो मधु ॥ ३१ ॥
कदम्बोदुम्बरं मुक्ताप्रवालाञ्जनगैरिकम् ।
बालं कपित्थं खर्जूरं बिसपद्मोत्पलादि च ॥ ३२ ॥

स०—आदिशब्देन प्रियंगुरोध्रकट्वंगादीनि गृह्यन्ते ॥ ३१-३२ ॥

कषायवर्ग के द्रव्यों के नाम—

वि०—कषायगण—हरड़, बहेड़ा, शिरीष, खैर, मधु, कदम्ब, गूलर, मुक्ता, प्रवाल, अञ्जन, गेरू, कच्चा कैथ, कच्ची खर्जूर, भिस, पद्म और कमलादि गण कषायगण हैं ॥ ३१-३२ ॥

इदानीमेषां गुणनिरूपणं करोति—

मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवादृते ।
मुद्गाद् गोधूमतः क्षौद्रात्सिताया जाङ्गलामिषात् ॥ ३३ ॥

स०—प्रायेण मधुरं द्रव्यं कफकृद्भवति शाल्यादीन्पुराणान् वर्जयित्वा । प्रायोग्रहणं तैलमकुष्ठादीनां व्यभिचारदर्शनात् । एवमुत्तरत्रापि प्रायोग्रहणस्य प्रयोजनं वेद्यम् ॥ ३३ ॥

वि०—मधुर द्रव्यों के गुण—प्रायः सब मधुररस वाले द्रव्य कफवर्धक हैं किन्तु पुरातन शालि, जौ, मूँग, गेहूँ, मधु, सिता और जाङ्गलमांस को छोड़कर ॥ ३३ ॥

वक्तव्य—प्रायः कहने से-तैल, मोठ आदि इसके अपवाद हैं ।

प्रायोऽम्लं पित्तजननं दाडिमामलकादृते ।

स०—अम्लं द्रव्यं प्रायः पित्तकृद्दाडिमामलके हित्वा ।

वि०—प्रायः सब अम्ल द्रव्य पित्तजनक हैं; दाडिम और आँवले को छोड़ कर ।

अपथ्यं लवणं प्रायश्चक्षुषोऽन्यत्र सैन्धवात् ॥ ३४ ॥

स०—लवणं द्रव्यं प्रायश्चक्षुषोऽपथ्यं सैन्धवं वर्जयित्वा ॥ ३४ ॥

वि०—प्रायः सब लवण आँखों के लिये अपथ्य हैं, सैन्धव को छोड़ कर ॥ ३४ ॥

तिक्तं कटु च भूयिष्ठमवृष्यं वातकोपनम् ।
ऋतेऽमृतापटोलीभ्यां शुण्ठीकृष्णारसोनतः ॥ ३५ ॥

स०—तिक्तं द्रव्यं कटु च प्रायेणावृष्यं वातकृच्च गुडूच्यादीन् हित्वा ॥ ३५ ॥

वि०—प्रायः तिक्त और कटु रस वाले द्रव्य अवृष्य और वातकोपक हैं । इसमें-गिलोय, पटोल, सोंठ, पिप्पली और रसोन अपवाद हैं ॥ ३५ ॥

कषायं प्रायशः शीतं स्तम्भनं चाभयां विना ।

स०—कषायं द्रव्यं प्रायेण शीतवीर्यं स्तम्भनं च भवति हरीतकीं वर्जयित्वा ।

वि०—हरड़ को छोड़ कर प्रायः सब कषायद्रव्य शीतल और स्तम्भन करने वाले हैं ।

रसाः कट्वम्ललवणा वीर्येणोष्णा यथोत्तरम् ॥ ३६ ॥
तिक्तः कषायो मधुरस्तद्वदेव च शीतलाः ।
तिक्तः कटुः कषायश्च रूक्षा बद्धमलास्तथा ॥ ३७ ॥
पट्वम्लमधुराः स्निग्धाः सृष्टविण्मूत्रमारुताः ।
पटोः कषायस्तस्माच्च मधुरः परमं गुरुः ॥ ३८ ॥
लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः ।

स०—कट्वम्ललवणा रसा यथोत्तरमुष्णवीर्याः । कटुरुष्णः । अम्ल उष्णतरः । लवण उष्णतमः । एवमुत्तरत्राऽपि यथोत्तरत्वं योज्यम् । तिक्तादयश्च तद्वदेव यथोत्तरं शीतवीर्याः । तेन तिक्तः शीतवीर्यः । कषायः शीतवीर्यतरः । मधुरः शीतवीर्यतम इति स्थितम् । तिक्तकटुकषाया रूक्षा विष्टंभकृतश्च । तथेति । यथोत्तरमित्यर्थः । पट्वादयः स्निग्धा निःसारितविण्मूत्रवाताश्च । तथेत्यत्राऽपि वर्तते । लवणात्कषायो गुरुतरः । कषायान्मधुरः परमं गुरुः । अतिशयेन गुरुरित्यर्थः । अम्लो लघुस्तस्मादम्लात् कटुर्लघुतरस्तस्माच्च कटोस्तिक्तो लघुतमः ॥ ३६-३८ ॥

वि०—कटु, अम्ल और लवण रस उत्तरोत्तर उष्ण वीर्य वाले हैं । तिक्त, कषाय और मधुर ये उत्तरोत्तर शीतवीर्य हैं । इसी प्रकार तिक्त, कटु और कषाय ये उत्तरोत्तर रूक्ष और मल को बाँधने वाले हैं । लवण, अम्ल और मधुर ये उत्तरोत्तर

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्निग्ध; मल, मूत्र और वायु को प्रवृत्त करने वाले हैं। लवण से कषाय और कषाय से मधुर अतिशय गुरु है। अम्ल रस लघु है; कटु रस इससे भी अधिक लघु और तिक्त रस सबसे लघु है ॥ ३६-३८ ॥

इदानीं रसानामाधारद्वारेण संयोगान् कल्पनां च विभजन्नाह—

संयोगाः सप्तपञ्चाशत्कल्पना तु त्रिषष्टिधा ॥ ३९ ॥
रसानां यौगिकत्वेन यथास्थूलं विभज्यते ।

स०—वक्ष्यमाणया रीत्या रसानां योगाः सप्तपंचाशद्विभज्यंत इति वचनविपरिणामेन संबंधः। कल्पना पुनरेषां त्रिषष्टिधा विभज्यते कथं कृत्वा कल्पना विभज्यते। यथास्थूलं स्थूलानतिक्रमेण व्यक्तरसास्वादानुरूपतया न पुनर्यथासूक्ष्मम्। तथाहि। रसानुरसकल्पनया तरतमयोर्वशाच्च रसानां कल्पना क्रियमाणाऽऽनंत्यमुपैति। तस्माद्यथास्थूलं रसानां कल्पना त्रिषष्टिधा विभज्यते। तथा यौगिकत्वेन शारीरोपयोग्यत्वेन ॥ ३९ ॥

रसों का भेद—

वि०—रसों की संख्या—रसों के संयोग सत्तावन हैं; और इनकी कल्पना तिरसठ है। इन दोनों का स्नेह-विचारणा आदि तथा व्यवहार में उपयोग होने से स्थूल दृष्टि से (रसों की ही दृष्टि से सूक्ष्म तथा अनुरस की दृष्टि से नहीं) विभाग करके कहते हैं ॥ ३९ ॥

इदानीं रससंयोगानां व्याख्यानं विभक्तिकामाह—

एकैकहीनास्तान् पञ्चदश यान्ति रसा द्विके ॥ ४० ॥
त्रिके स्वादुर्दशाम्लः षट् त्रीन् पटुस्तिक्त एककम् ।
चतुष्केषु दश स्वादुश्चतुरोम्लः पटुः सकृत् ॥ ४१ ॥
पञ्चकेष्वेकमेवाम्लो मधुरः पञ्च सेवते ।
द्रव्यमेकं षडास्वादमसंयुक्ताश्च षड्रसाः ॥ ४२ ॥

स०—द्विके परिमाणे रसाधरद्रव्यसंबंधिनि संयोगे पंच रसा मधुराम्ललवणतिक्तकटुकास्तान् पंचाम्ललवणतिक्तकटुकषायान् यांति संयुज्यंते। किंभूतानेकैकेन हीना विनाकृता एकैकहीनास्तान्। येनैकेन युक्तांस्तद्वियुक्तानित्यर्थः। अत्र पंचानां रसानां पर्यायेण प्रत्येकमेकैकहीनानां च शक्तिमत्वेनककर्तृत्वेन च संबंधो वेद्यः। अत एव चतुर्द्विके पंचदशप्रकाराविति यद्वक्ष्यति तदुपपन्नम्। एवं मधुरोऽम्लादीनम्लो लवणादीन् लवणस्तिक्तादींस्तिक्तः कटुकषायौ कटुकषायं यातीति स्थितम्। द्विक इति द्वौ परिमाणमस्य संयोगस्य। संख्यायाः संज्ञेत्यादिपरिमाणानुवृत्तेः परिमाणार्थे संख्यायाः अतिशदंतायाः कनिति कन्। एवं त्रिकादिषु वक्ष्यमाणेषु लक्षणं योज्यम्। द्विरसद्रव्यसंयोगे पंचदश भेदा भवंति। यथा मधुरोऽम्लं याति १ मधुरो लवणं २ मधुरस्तिक्तं ३ मधुरः कटुकं ४ मधुरः कषायम् ५। अम्लो लवणं याति १ अम्लस्तिक्तम् २ अम्लः कटुकम् ३ अम्लः कषायम् ४। लवणस्तिक्तं १ लवणः कटुकं २ लवणः कषायम् ३। तिक्तः कटुकं १ तिक्तः कषायम् २। कटुः कषायमिति १। अत्र च मधुरस्य गन्तृत्वमेव न गम्यत्वं हीनत्वयोगाऽभावात्। कषायस्य गम्यत्वमेव न गन्तृत्वमन्त्यत्वात्। एवं द्विरससंयोगे पंचदश। त्रिके त्रिरसाधारद्रव्यसम्बन्धिनि संयोगे स्वादुर्मधुरो दश संयोगान् याति। यथा। मधुरोऽम्ललवणं १ मधुरोऽम्लतिक्तकं २ मधुरोऽम्लकटुकं ३ मधुरोऽम्लकषायम् ४। स एव मधुरोऽम्लत्यागेन तत्स्थाने लवणयुक्तस्तिक्तादिभिस्त्रिभिः क्रमेणाऽन्वितस्त्रीन् संयोगान् याति। मधुरलवणतिक्तकः १ मधुरलवणकटुकः २ मधुरलवणकषायः ३। स एव लवणत्यागेन तत्स्थाने तिक्तयुक्तः कटुकषायाभ्यां क्रमेणान्वितो द्वौ संयोगौ याति। मधुरतिक्तकटुकः १ मधुरतिक्तकषायः २। स एव तिक्तत्यागेन तत्स्थाने कटुकान्वित एकं संयोगं याति। मधुरकटुकषायः १। एवं मधुरो दशसंयोगान् याति। अम्ल इत्यादि। त्रिक इति वर्तते। अम्लः षट् संयोगान् याति। यथा। अम्ललवणतिक्तः १ अम्ललवणकटुकः २ अम्ललवणकषायः ३। स एवाऽम्लो लवणत्यागेन तत्स्थाने तिक्तान्वितः कटुकषायाभ्यां क्रमेण युक्तो द्वौ संयोगौ याति। अम्लतिक्तकटुकः १ अम्लतिक्तकषायः २। एवं तिक्तत्यागेनैकं संयोगं याति। अम्लकटुकषायः १। इत्यम्लः षट्। त्रीन् पटुरिति लवणस्तिक्तयुक्तः कटुकषायायाभ्यां क्रमेणाऽन्वितो द्वौ संयोगौ याति। लवणतिक्तकटुकः १ लवणतिक्तकषायः २। स एवं तिक्तत्यागेनैकं याति। लवणकटुकषायः १। एवं लवणस्त्रीन् संयोगान् याति। तिक्त एकमेव संयोगं याति। तिक्तकटुकषायः १। एवं त्रिकसंयोगे विंशतिः। चतुष्केष्वित्यादि। चतुष्करससंयोगेषु स्वादुर्दश संयोगान् याति। तत्र मधुरः साम्लो लवणादिभिः षट् संयोगान् याति। यथा। मधुराम्ललवणतिक्तः। १ मधुराम्ललवणकटुकः २ मधुराम्ललवणकषायः ३ मधुराम्लतिक्तकटुकः ४ मधुराम्लतिक्तकषायः ५ मधुराम्लकटुकषायः ६। स एवं मधुरोऽम्लत्यागेन तत्स्थाने लवणान्वितस्त्रीन् संयोगान् याति। मधुरलवणतिक्तकटुकः १ मधुरलवणतिक्तकषायः। २ मधुरलवणकटुकषायः ३। स एव लवणत्यागेन तत्स्थाने तिक्तान्वित एकं संयोगं याति। मधुरतिक्तकटुकषायः १। एवं चतुष्केषु मधुरो दश संयोगान् याति। चतुरोऽम्ल इत्यादि। चतुष्क इति वर्तते। अम्लः सलवणस्तिक्तादिभिस्त्रीन् संयोगान् याति। अम्ललवणतिक्तकटुकः १ अम्ललवणतिक्तकषायः २ अम्ललवणकटुककषायः ३। स एव लवणत्यागेन तत्स्थाने तिक्तान्वित एकं संयोगं याति। अम्लतिक्तककटुकषायः १। एवं चतुष्केष्वम्लश्चतुरः। पटुः सकृत्। पटुर्लवणः सकृदेकं भेदं याति। लवणतिक्तकटुकषायः १। एवं चतुष्केषु पंचदश संयोगभेदाः। पंचकेष्वेकमेवाम्ल इति। पंचकेष्वम्लो रस एकमेव भेदं याति। अम्ललवणतिक्तकटुकषायः १। मधुरः पंच सेवते। मधुरो रसः पंच संयोगान् सेवते। अम्लत्यागान्मधुरलवणतिक्तकटुकषायः। १ लवणत्यागान्मधुराम्लतिक्तकटुकषायः २ तिक्तत्यागान्मधुराम्ललवणकटुकषायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ कटुकस्यागान्मधुराम्ललवणतिक्तकषायः ४ कषायस्यागान्मधुराम्ललवणतिक्तकटुक इति ५। पद्येन च सुखस्मृत्यै रसभेदान् शृणुष्व मे। मधुरोऽम्लेन कटुना तिक्तेन कटुकेन च। १। कषायेण पृथक् सार्धमम्लः सुलवणेन च। तिक्तेन कटुना सार्धं कषायेण पृथक् सह। २। पटुस्तिक्तेन कटुना कषायेण पृथक् सह। तिक्तस्तु कटुना सार्धं कषायेण पृथक् तथा। ३। कटुकस्तु कषायेण द्विसंयोग इति स्मृताः। दश पंच च भेदास्तु संख्याता विंशतिस्त्रिके। ४। मधुराम्लौ तु पटुना तिक्तेन कटुना तथा। कषायेण तथा सार्धं तथा स्वादुपटू पृथक्। ५। तिक्तेन कटुकेनापि कषायेण तथा सह। स्वादुतिक्तौ तु कटुना कषायेण पृथक् सह। ६। स्वादूषणौ कषायेण स्वादोरेवं दश त्रिके। भेदाः स्युरम्ललवणौ तिक्तेन कटुना पृथक्। ७। कषायेण तथा सार्धमम्लतिक्तौ पृथक् सह। कटुकेन कषायेण तथाम्लकटुकौ सह। ८। कषायेणेति षट् प्रोक्ता भेदा अम्लस्य तु त्रिके। पटुतिक्तौ तु कटुना कषायेण पृथक् सह। ९। पटूषणौ कषायेण भेदा इति पटोस्त्रयः। तिक्तोषणौ कषायेण तिक्तस्यैवं सकृत्स्मृतः। १०। त्रिके भेदा इति प्रोक्ताश्चतुष्के दश पंच च। स्वाद्वम्ललवणं सार्धं तिक्तेन कटुकेन च। ११। पृथक्कषायेण तथा मधुराम्लौ सतिक्तकौ। कटुकेन तु संपृक्तौ कषायेण पृथक् तथा। १२। स्वाद्वम्लकटुकाः सार्धं कषायेणेति षट् स्मृताः। सप्तमश्चाऽत्र मधुरो लवणोषणतिक्तकैः। १३। भेदोऽष्टमो मतः स्वादुकटुतिक्तकषायकैः। नवमस्तत्र मधुरः पटूषणकषायकैः। १४। दशमोऽत्र भवेत्स्वादुतिक्तोषणकषायकैः। दश भेदा भवंत्येवं मधुरेण चतुष्कके। १५। कटुतिक्ताम्ललवणैर्भेद एकश्चतुष्कके। द्वितीयस्त्वम्ललवणकषायकटुकैः स्मृतः। १६। तृतीयोऽत्र भवेदम्लपटुतिक्तकषायकैः। चतुर्थोऽत्र भवेदम्लतिक्तोषणकषायकैः। १७। एवमम्लेन भेदाः स्युश्चत्वारोऽत्र चतुष्कके। पटुनैकोऽत्र लवणतिक्तोषणकषायकैः। १८। एवं पंचदश ख्याताश्चतुष्करससंख्यया। षड् भेदान् पंचके प्राहुस्तान्वक्ष्यामि विभागशः। १९। एको भेदोऽम्ललवणतिक्तोषणकषायकैः। द्वितीयः स्वादुलवणतिक्तोषणकषायकैः। २०। तृतीयस्त्वम्लमधुरतिक्तोषणकषायकैः। चतुर्थस्त्वम्लमधुरपटूषणकषायकैः। २१। पंचमस्त्वम्लमधु पटुतिक्तकषायकैः। षष्ठो भेदोऽम्लमधुरलवणोषणतिक्तकः। २२। षड् भेदा इति निर्दिष्टाः पंचके प्रविभागशः। भेदः स्वाद्वम्ललवणतिक्तोषणकषायकैः। २३। एक एव षड्रसेन पृथक्त्वेन तु षट् स्मृताः। स्वादुरम्लोऽथ लवणस्तिक्तश्च कटुकस्तथा। २४। कषाय इति भेदाः स्युः सर्वतोऽत्र त्रिषष्टिधा। क्षीरं सुरा बिडं निंबश्च्या पद्मं रसाश्रयम्। २५। द्रव्यं स्वादु रसादीनां षण्णां विद्धि यथाक्रमम्। द्रव्यं द्रव्यांतरेणैव योजयेद्धि रसादिषु। २६। धात्रीफलं शर्करया लवणेनाऽऽर्द्रकं तथा। एवमादीनि द्रव्याणि योजयेद्भिषगुत्तमः। २७। कानिचिद् द्विरसादीनि द्रव्याणि स्युः स्वभावतः। यथैणः षड्रसः कृष्णो यथा पंचरसाऽभया। २८। मद्यं पंचरसं यद्वत्तिलो यद्वच्चतूरसः। एरंडतैलं त्रिरसं माक्षिकं द्विरसं यथा। २९। घृतमेकं स्वादुरसं मधुरादिविभागतः। दिङ्मात्राद्दुहितादेवं शेषमूह्यं मनीषिणा॥ ४०-४२॥

रस-संयोग के भेद—

वि०—दो-दो रसों के मेल से मधुरादि संयोग क्रमशः एक-एक कम करने से अर्थात् मधुर से पाँच, अम्ल से चार लवण से तीन, तिक्त से दो और कषाय से एक इस प्रकार पन्द्रह संयोग बनते हैं (यथा मधुर के ५, अम्ल के ४, लवण के ३, कटु के २ और तिक्त का एक–योग १५)। तीन का संयोग करने में मधुर रस के संयोग से दस; अम्ल रस से छः लवण से तीन और तिक्त से एक संयोग बनता है। चार रसों के संयोग में मधुर रस से दस, अम्ल से चार, लवण रस से एक। पाँच रसों के संयोग में–अम्ल से एक संयोग बनता है; मधुर से पाँच संयोग बनते हैं। छ रसों के संयोग में एक ही भेद बनता है और असंयुक्त (पृथक्-पृथक्) छः रस होते हैं। (इस प्रकार ६३ भेद रसों के हो जाते हैं।) ॥४०–४२॥

यथा—मधुर अम्ल, मधुर लवण, मधुर-तिक्त, मधुर-कटु, मधुर-कषाय (५)। अम्ल-लवण, अम्ल-तिक्त, अम्ल-कटु, अम्ल-कषाय (४)। लवण तिक्त, लवण कटु, लवण कषाय (३)। तिक्त कटु, तिक्त कषाय (२)। कटु कषाय (१)। मधुर अम्ल लवण, मधुर अम्ल तिक्त, मधुर अम्ल कटु, मधुर अम्ल कषाय, मधुर लवण तिक्त, मधुर लवण कटु, मधुर लवण कषाय, मधुर तिक्त कटु, मधुर तिक्त कषाय, मधुर कटु, कषाय (१०)। अम्ल लवण तिक्त, अम्ल लवण कटु, अम्ल लवण कषाय, अम्ल तिक्त कटु, अम्ल तिक्त कषाय, अम्ल कटु कषाय (६)। लवण तिक्त कटु, लवण तिक्त कषाय, लवण कटु कषाय (३)। तिक्त कटु कषाय (१)। मधुर अम्ल लवण तिक्त, मधुर अम्ल लवण कटु, मधुर अम्ल लवण कषाय, मधुर अम्ल तिक्त कटु, मधुर अम्ल तिक्त कषाय, मधुर अम्ल कटु कषाय, मधुर-लवण तिक्त कटु, मधुर लवण तिक्त कषाय, मधुर लवण कटु कषाय, मधुर तिक्त कटु कषाय (१०)। अम्ल लवण तिक्त कटु, अम्ल लवण तिक्त कषाय, अम्ल लवण कटु कषाय, अम्ल तिक्त कटु कषाय (४)। लवण तिक्त कटु कषाय (१)। अम्ल लवण तिक्त कटु कषाय (१)। मधुर अम्ल लवण तिक्त कटु, मधुर अम्ल लवण तिक्त कषाय, मधुर अम्ल लवण कटु कषाय, मधुर अम्ल-तिक्त कटु कषाय, मधुर तिक्त लवण कटु कषाय (५)। मधुर लवण अम्ल तिक्त कटु कषाय (६)। इस प्रकार ये सत्तावन संयोग हैं॥

संप्रति एकैकहीनानित्यादिना ग्रंथेन ये रसानां भेदाः शास्त्रकृतोक्तास्तानेव संक्षेपेण प्रकटयितुमाह—

षट् पञ्चकाः, षट् च पृथग् रसाः स्यु-
श्चतुर्द्विकौ पञ्चदशप्रकारौ।
भेदास्त्रिका विंशतिरेकमेव
द्रव्यं षडास्वादमिति त्रिषष्टिः॥ ४३॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—पंचकरसानां योगाः षट्संख्याः। पंचकेष्वेकमे-वाम्लो मधुरः पंच सेवत इति षट् च पृथग्रसा असंयुक्ताश्च षड्रसा इति। चतुरित्यादि। चतुष्कभेदः पंचदशप्रकारः। द्विकभेदश्च पंचदशप्रकारः। चतुष्केषु दश स्वादुश्चतुरोऽम्लः पट्टः सकृत्। एवं पंचदश प्रकाराः। एकैकहीनांस्तान् पंच पंच यांति रसा द्विके इति वचनात्। भेदा इत्यादि त्रिकास्त्रिभेद-भिन्ना भेदा विंशतिः। त्रिके स्वादुर्दशाम्लः षट् त्रीन् पटुस्तिक्त एककमिति विंशतिः। एकमेव द्रव्यं षडास्वादम्। इतीत्थं रसानां भेदास्त्रिषष्टिः॥ ४३॥

रसभेदों का विवरण—

वि०—पाँच रसों के संयोग भेद छ हैं। अलग-अलग रस छ हैं। चार रसों के संयोग पन्द्रह। दो रसों के संयोग पन्द्रह। तीन रसों के संयोग बीस हैं। और छ रसों वाले द्रव्य का भेद एक ही है। इस प्रकार तिरसठ रस भेद हैं॥ ४३॥

यथास्थूलं चैषा त्रिषष्टिधा कल्पना ख्याता। संप्रति यथासूक्ष्मं प्रदर्शयितुमाह—

ते रसानुरसतो रसभेदा-
स्तारतम्यपरिकल्पनया च।
सम्भवन्ति गणनां समतीता
दोषभेषजवशादुपयोज्याः॥ ४४॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्-
मष्टाङ्गहृदयसंहितायां सूत्रस्थाने रसभेदीयो
नाम दशमोऽध्यायः॥ १०॥

स०—ते रसभेदास्त्रिषष्टिरूपा रसतो रसवशेन तथाऽनुरसतोऽनुरसवशेन तथा तारतम्यपरिकल्पनाऽयं मधुरोऽयं मधुरतरोऽयं मधुरतम इत्येवंरूपा या तया च गणनां समतीताः संख्यामतिक्रांताः संभवन्ति। दोषेत्यादि। दोषा वातादयो भेषजानि हरीतक्यादीनि। दोषाश्च भेषजानि च दोषभेषजानि तेषां वशोऽनुरोधः सामर्थ्यं वा तस्माद्धेतु-भूताद्रसभेदा उपयोज्या न दोषमनपेक्ष्य भेषजं वाऽनपेक्ष्य। एवमेवोपयोज्या इत्यर्थः। तथा च मुनिः। क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित्। दोषौषधादीन् संचिंत्य भिषजा सिद्धिमिच्छतेति। दोषभेषजवशादित्युपलक्षणार्थम्। देशादिवशादपि देशादीन्वीक्ष्य रसभेदा उपयोज्याः। यथा पवने जेतव्ये मधुराम्लौ लवण इति। स्वागता रनभगैर्गुरु-कांता इति॥ ४४॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांग-
हृदयटीकायां सर्वांगसुन्दराख्यायां रसभेदीयाख्यो
नाम दशमोऽध्यायः॥ १०॥

रसों की सूक्ष्म कल्पना—

वि०—रसों के ये भेद रस और अनुरस की कल्पना के तारतम्य की कल्पना करने पर अगण्य बन जाते हैं। दोष तथा औषध की दृष्टि से इनका उपयोग करना चाहिये॥४४॥

वक्तव्य—'क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित्। दोषौषधीन् सुसञ्चिन्त्य भिषजा सिद्धिमिच्छता॥' चरक, सू. अ. २६।२३। दोष की दृष्टि से-केवल वायु में अम्ल; पित्तयुक्त वायु में अम्ल तिक्त; कफ युक्त वायु में अम्ल कटु। औषध की दृष्टि से-विरेचन औषध एक रस होने से अप्रिय; दो-तीन रस वाली होने से प्रिय होती है।

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का रसभेदीय
नामक दसवाँ अध्याय समाप्त हुआ॥ १०॥

एकादशोऽध्यायः

रसभेदीयादनंतरं दोषादिविज्ञानीयं आरभ्यते। यतो दोषभेषजवशादुपयोज्या इत्युक्तमत ईदृक्स्वरूपास्ते दोषा इति ज्ञापनार्थमध्यायोऽयमुच्यते—

अथातो दोषादिविज्ञानीयमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—दोषा आदयो येषां ते दोषादयस्तेषां विज्ञानं प्राकृतेन वैकृतेन च स्वरूपेणोपगमस्तस्मै हितो यस्तमध्यायं व्याख्यास्यामः। आदिशब्देन धातवो मलाश्च संगृह्यंते। तत्स्व-रूपोपगमेन च त एव दोषाः सम्यग्ज्ञाता भवंति। धातूनां मलानां च दोषाधारभूतत्वात्।

वि०—अब इसके आगे दोषादिविज्ञानीय अध्याय का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था।

दोषधातुमला मूलं सदा देहस्य—

स०—दोषा वातादयो धातवो रसादयो मला मूत्रा-दयस्ते देहस्य मूलमिव मूलम्। यथा वृक्षस्य स्कंधशाखादि युक्तस्य मूलं प्रधानं तदाधारत्वात्तथा देहस्य दोषधातुमलाः।

दोष धातु-मल—

वि०—दोष-वातादि, धातु-रसादि, मल-पुरीषादि देह का मूल है।

वक्तव्य—जिस प्रकार वृक्ष की शाखा आदि में आदि कारण मूल ही है; उसी प्रकार ये दोषादि शरीर के मूल हैं।

—तं चलः।
उत्साहोच्छ्वासनिश्वासचेष्टावेगप्रवर्तनैः॥ १॥
सम्यग्गत्या च धातूनामक्षाणां पाटवेन च।
अनुगृह्णात्यविकृतः, पित्तं पक्त्यूष्मदर्शनैः॥ २॥
क्षुत्तृड्रुचिप्रभामेधाधीशौर्यतनुमार्दवैः।
श्लेष्मा स्थिरत्वस्निग्धत्वसन्धिबन्धक्षमादिभिः॥ ३॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—तं च देहं चलो वायुरुत्साहादिभिरनुगृह्णात्युपकुरुते। उत्साहः सर्वचेष्टासूद्योगः। उच्छ्वास ऊर्ध्वं श्वसनं श्वासमुक्तिः। निश्वासः श्वासस्य शरीरान्तःप्रवेशनम्। चेष्टनं चेष्टा वाक्कायमनोव्यापारः। वेगानां प्रवर्तनं वातविण्मूत्रादीनां बहिर्निरसनम्। एतैश्च मारुतो देहमनुगृह्णाति। पित्तं पक्तयादिभिरनुगृह्णाति। पक्तिः पाकः। ऊष्मा औष्ण्यम्। दर्शनं दृष्टिः। मेधा बुद्धिविशेषः। धीः प्रज्ञा। शौर्यं पौरुषम्। तनुमार्दवं शरीरमृदुत्वम्। श्लेष्मा। स्थिरत्वादिभिरनुगृह्णाति। क्षमा क्षांतिः॥ १-३॥

वातादि दोषों के कर्म—

वि०—इनमें चल (वायु) अविकृत (प्राकृत) होने पर उत्साह, श्वास-प्रश्वास, चेष्टा, मल-मूत्रादि वेगों की प्रवृत्ति, धातुओं की उचित गति, इन्द्रियों की विषय ग्रहण करने में निपुणता आदि से शरीर का उपकार करता है। पित्त (प्राकृत)-पाचन, उष्णिमा, दर्शन (दृष्टिशक्ति), भूख, प्यास, रुचि, कान्ति, मेधा, बुद्धि, शौर्य, अस्थूलता और सुकुमारता से शरीर का उपकार करता है। अविकृत कफ-दृढाङ्गता, स्निग्धता, सुश्लिष्टसन्धित्व, क्षमा आदि से शरीर का उपकार करता है॥ १-३॥

इदानीं धातूनां कर्माण्याह—

प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे।
गर्भोत्पादश्च धातूनां श्रेष्ठं कर्म क्रमात्स्मृतम्॥ ४॥

स०—प्रीणनादीनि कर्माणि रसादीनां क्रमात्क्रमेण श्रेष्ठानि स्मृतानि। मुनिभिरिति शेषः। संग्रहोक्तानि मध्यमान्यपराणि कर्माण्येषां संत्येव। यथा रसस्य दृष्टिरक्तपुष्ट्यादिकं कर्म। रक्तस्य च वर्णप्रसादो मांसपोषणम्। मांसस्य बलं मेदः पुष्टी च। मेदसः स्वेददार्ढ्यास्थिपुष्टयश्च। अस्थ्नो मज्जपोषणम्। मज्ज्ञो बलमस्थिपूरणं शुक्रपुष्टिश्च। शुक्रस्य हर्षो बलं च। एतैर्धातवो देहमनुगृह्णन्तीत्यर्थः। प्रीणनमाप्यायनम्। रसो हि सम्यगभ्यवहरणतः स्रोतांसि संप्रविश्येंद्रियप्रसादमभिनिर्वर्तयन्मनसः प्रीतिमादधाति। जीवन मोजोवृद्धिकरं रक्तकर्म। लेप उपदेहो मांसस्य कर्म। तदुपलिप्तान्यस्थीनि चेष्टां क्षमंते। स्नेहो नेत्रादिषु स्निग्धता मेदसः कर्म। धारणमूर्ध्वधारणमस्थिकर्म। पूरणं स्नेहेनास्थ्नां मज्ज्ञः कर्म। शुक्रस्य गर्भोत्पत्तिः श्रेष्ठं कर्मेति योज्यम्॥ ४॥

धातुओं का कर्म—

वि०—अविकृत रस का श्रेष्ठ कर्म—प्रीणन-आप्यायन (संतर्पण), रक्त का-जीवन (प्राणधारण), मांस का-लेपन (उपदेह-जैसे मकान में मिट्टी का लेप करना), मेद का-स्नेहन (स्निग्धता), अस्थि का-धारण करना (आधार), मज्जा का-अस्थियों का (स्नेह से) पूरण करना, शुक्र का-गर्भोत्पत्ति करना ये उत्तम कर्म हैं॥ ४॥

इदानीं मलानां कर्माण्याह—

अवष्टम्भः पुरीषस्य मूत्रस्य क्लेदवाहनम्।
स्वेदस्य क्लेदविधृतिः—

स०—अवष्टंभो देहधारणशक्तिः श्रेष्ठं कर्म पुरीषस्य स्मृतम्। मूत्रस्य क्लेदवाहनं श्रेष्ठं कर्म। मूत्रं क्लेदं निर्वाहयति। स्वेदस्य क्लेदविधारणं श्रेष्ठं कर्म। क्लेदाभावे हि नैव देहस्य मध्यमत्वक्। स्वेदस्य कचरोमधारणमपि।

मलों का कर्म—

वि०—पुरीष का कर्म—अवष्टम्भन (धारण) करना, मूत्र का कार्य-क्लेद का वहन करना, स्वेद का-क्लेद को धारण करना श्रेष्ठ कर्म है।

वक्तव्य—अरुणदत्त ने—'क्लेदविधृति' पाठ माना है; परन्तु हेमाद्रि ने 'केशविधृति' माना है, यह भी ठीक है; किन्तु स्वेद द्वारा त्वचा में आवश्यक क्लेद बनाए रखना भी कम महत्त्व का नहीं है। वस्तुतः त्वचा के स्नेह की रक्षा होने से परम्परया केश आदि का धारण भी होता है। मल का महत्त्व विशेषतः यक्ष्मा रोग में है, यथा-'तस्मात् पुरीषं संरक्ष्यं विशेषाद् राजयक्ष्मिणः। सर्वधातुक्षयार्त्तस्य बलं तस्य हि विड्बलम्॥' (चरक चि. अ. ८।४२)

—वृद्धस्तु कुरुतेऽनिलः॥ ५॥
कार्श्यकार्ष्ण्योष्णकामत्वकम्पानाहशकृद्ग्रहान्।
बलनिद्रेन्द्रियभ्रंशप्रलापभ्रमदीनताः॥ ६॥

स०—वृद्धः पुनर्वायुः कार्श्यादीन् करोति। बलादीनां भ्रंशेन संबंधः। बलस्य तु प्राणोपघातो भ्रंशः। निद्रायास्तु नाशो भ्रंशः॥ ५-६॥

वृद्ध वायु का कर्म—

वि०—बढ़ी हुई वायु—कृशता, कालापन, उष्णता की चाह, कम्पन, आनाह, मलावरोध, बलभ्रंश, निद्रानाश, इन्द्रियों का विषय को न ग्रहण करना, प्रलाप, चक्कर आना और दीनता उत्पन्न करती है॥ ५-६॥

पीतविण्मूत्रनेत्रत्वक्क्षुत्तृड्दाहाल्पनिद्रताः।
पित्तम्—

स०—पीतस्य विडादिभिस्त्वगंतैः संबंधः। ततः क्षुदादिभिर्द्वंद्वस्ततस्ताप्रत्ययः। पित्तं पीतविण्मूत्रादीन् करोति।

वृद्ध पित्त का कर्म—

वि०—बढ़ा हुआ पित्त—मल, मूत्र, नेत्र और त्वचा में पीलापन, भूख, प्यास, दाह तथा नींद को कम करता है।

—श्लेष्माऽग्निसदनप्रसेकालस्यगौरवम्॥ ७॥
श्वैत्यशैत्यश्लथाङ्गत्वं श्वासकासातिनिद्रताः।

स०—श्लेष्मा वृद्धोऽग्निसादादीन् करोति। श्वैत्यं गात्रशुक्लता। शैत्यमंगानां शिशिरत्वम्॥ ७॥

१. दोषों का वैषम्य या विकृति वृद्धि और क्षय भेद से दो प्रकार की होती है। यथा 'क्षयः स्थानञ्च वृद्धिश्च दोषाणां त्रिविधा गतिः।' (च. सू. अ. १७) और प्रकृति को समता या स्थान भी कहते हैं। प्रस्तुत में पहिले वृद्ध दोषों का वर्णन कर रहे हैं बाद में क्षीण दोषों का भी वर्णन (श्लोक १५ में) करेंगे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृद्ध कफ का कर्म—

वि०—बढ़ा हुआ कफ—अग्निमान्द्य, मुख से लालास्राव, आलस्य, भारीपन, अङ्गों में श्वेत वर्ण, शीतलता और शिथिलता, श्वास, कास और निद्राधिक्य करता है ॥ ७ ॥

रसोऽपि श्लेष्मवत्—

स०—रसः श्लेष्मवत्। रसोऽपि वृद्धोऽग्निसादादीन् करोति।

वृद्ध रस का कर्म—

वि०—बढ़ा हुआ रस भी—कफ की भाँति कर्म करता है।

—रक्तं विसर्पप्लीहविद्रधीन् ॥ ८ ॥
कुष्ठवातास्रपित्तास्रगुल्मोपकुशकामलाः ।
व्यङ्गाग्निनाशसम्मोहरक्तत्वङ्नेत्रमूत्रताः ॥ ९ ॥

स०—रक्तं वृद्धं विसर्पादीन् करोति। उपकुशो नाम दंतरुजोत्तरतंत्रे वक्ष्यमाणलक्षणा ॥ ८-९ ॥

वृद्ध रक्त का कर्म—

वि०—बढ़ा हुआ रक्त—विसर्प, प्लीहावृद्धि, विद्रधि, कुष्ठ, वातरक्त, रक्तपित्त, गुल्म, उपकुश (दन्तरोगविशेष), कामला-व्यङ्ग, अग्निनाश, मूर्च्छा, त्वचा, आँख और मूत्र में ललिमा उत्पन्न करता है ॥ ८-९ ॥

मांसं गण्डार्बुदग्रन्थिगण्डोरूदरवृद्धिताः ।
कण्ठादिष्वधिमांसं च—

स०—मांसं वृद्धं गंडादीन् रोगान् करोति। गंडशब्देन गंडमाला गलगंडश्च गृहीतौ। आद्यंतलोपात्। इतरश्च गंडो गंडमांसम्। गंडौ चार्बुदं च ग्रंथिश्च गंडार्बुदग्रंथयः। गंडौ च ऊरू चोदरं च तेषां वृद्धता। ततो द्वंद्वः। ताः करोति। वृद्धता वृद्धत्वम्। कंठादिष्वधिकं मांसं च कुरुते। आदिशब्देन तालुजिह्वादिपरिग्रहः।

वृद्ध मांस का कर्म—

वि०—बढ़ा हुआ मांस—गलगण्ड और गण्डमाला, अर्बुद, ग्रन्थि, गण्ड (गाँठें=गिलटियाँ), ऊरुवृद्धि, उदरवृद्धि, कण्ठ, तालु, जिह्वा आदि में अधिमांस (मांस के ऊपर मांस) उत्पन्न करता है।

—तद्वन्मेदस्तथा श्रमम् ॥ १० ॥
अल्पेऽपि चेष्टिते श्वासं स्फिक्स्तनोदरलम्बनम् ।

स०—मेदोऽपि वृद्धगंडादीन् कुरुते। तथाऽल्पेऽपि चेष्टिते श्रमं कुरुते श्वासं च। तथा स्फिजोः स्तनयोरुदरस्य च लंबनं कुरुते ॥ १० ॥

वृद्ध मेद का कर्म—

वि०—बढ़ा हुआ मेद भी मांस की भाँति गण्डमाला आदि विकार करता है; तथा थोड़े से परिश्रम से भी थकान एवं श्वास होता है; नितम्ब, स्तन और उदर लटकने लगते हैं ॥ १० ॥

अस्थ्यध्यस्थ्यधिदन्तांश्च—

स० अस्थि वृद्धमध्यस्थ्यधिदंतांश्च कुरुते।

वृद्ध अस्थि का कर्म—

वि०—बढ़ी हुई अस्थि—अधिक अस्थि और अधिक दाँत (अर्बुद रूप में) को करती है।

—मज्जा नेत्राङ्गगौरवम् ॥ ११ ॥
पर्वसु स्थूलमूलानि कुर्यात् कृच्छ्राण्यरूंषि च ।

स०—मज्जा वृद्धो नेत्रयोरंगानां च गौरवं कुर्यात्। कुरुत इति प्रकृते कुर्यादित्युक्तं स्पष्टार्थम्। पर्वस्वंगुल्यादिसंधिषु स्थूलानि मूलानि येषां तानि अरूंषि पिटिकाविशेषान् कुर्यात्। कीदृशानि। स्थूलमूलानि कृच्छ्राणि कृच्छ्रसाध्यानि ॥ ११ ॥

वृद्ध मज्जा का कर्म—

वि०—बढ़ी हुई मज्जा—नेत्र और दूसरे अङ्गों में भारीपन, तथा पर्व (सन्धियों) में मूल में स्थूल तथा कष्टसाध्य फुन्सियों को उत्पन्न करती है ॥ ११ ॥

अतिस्त्रीकामतां वृद्धं शुक्रं शुक्राश्मरीमपि ॥ १२ ॥

स०—शुक्रं वृद्धमतिस्त्रीकामतां कुर्यात्। शुक्राश्मरीं च। अपिशब्दाद्बलस्नेहाद्यपि ॥ १२ ॥

वृद्ध शुक्र का कर्म—

वि०—बढ़ा हुआ शुक्र—अतिशय स्त्री-संगेच्छा और शुक्राश्मरी को उत्पन्न करता है ॥ १२ ॥

कुक्षावाध्मानमाटोपं गौरवं वेदनां शकृत् ।

स०—शकृत्पुरीषं वृद्धं कुक्षावाध्मानादीन् कुर्यात्। कुर्यादिति संभावनायां लिङ्। आध्मानमानाहः। आटोपोऽन्त्रकूजनम्।

वृद्ध पुरीष का कर्म—

वि० बढ़ा हुआ मल—उदर में आध्मान, गड़गड़ाहट, भारीपन और पीड़ा करता है।

मूत्रं तु बस्तिनिस्तोदं कृतेऽप्यकृतसंज्ञताम् ॥ १३ ॥

स०—मूत्रं वृद्धं बस्तिनिस्तोदं बस्तिव्यथां कुर्यात्। तथा कृतेऽपि मूत्रेऽकृतसंज्ञतामकृताभासत्वमेव कुर्यात् ॥ १३ ॥

वृद्ध मूत्र का कर्म—

वि०—बढ़ा हुआ मूत्र—बस्तिप्रदेश में व्यथा तथा मूत्रत्याग करने पर भी मूत्रत्याग नहीं किया है, ऐसा अनुभव कराता है॥

स्वेदोऽतिस्वेददौर्गन्ध्यकण्डूः—

स०—स्वेदो वृद्धोऽतिस्वेदादीन् कुर्यात्।

वृद्ध स्वेद का कर्म—

वि०—बढ़ा हुआ स्वेद—अतिस्वेद, दुर्गन्धता एवं कण्डू (खुजली) करता है।

—एवं च लक्षयेत् ।
दूषिकादीनपि मलान् बाहुल्यगुरुतादिभिः ॥ १४ ॥

स०—अनेन प्रकारेण दूषिकादीनपि मलान् लक्षयेदनुमिनुयात्। दूषिकाऽक्षिमलः। आदिशब्दाद् घ्राणकर्णनासास-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मलादीनां ग्रहणम् । कथं लक्षयेदित्याह । बाहुल्येत्यादि । मलबाहुल्येन तत्स्थानगौरवेण च । आदिग्रहणात्कंडूक्लेदादयो गृह्यंते ॥ १४ ॥

वृद्ध नेत्रादि के मल का कर्म—

वि०—इस प्रकार से दूषिका (नेत्र का मल) आदि मलों को भी मल की बहुलता से तथा स्थान के भारीपन आदि से बढ़ा हुआ जाने ॥ १४ ॥

वृद्धानां वातादीनां लिंगान्यभिधाय क्षीणानां वातादीनां लिंगान्याह—

लिङ्गं क्षीणेऽनिलेऽङ्गस्य सादोऽल्पं भाषितेहितम् ।
संज्ञामोहस्तथा श्लेष्मवृद्ध्युक्तामयसम्भवः ॥ १५ ॥

स०—अनिले क्षीणे स्वप्रमाणापचिते । वायोस्तु सर्वक्षये देह एव न स्यात् । कस्य तु लिंगं स्यात् । किं पुनस्तल्लिंगमित्याह । अंगस्येत्यादि । अंगस्य सादः क्रियास्वसामर्थ्यम् । ईहितं चेष्टितं कायिकं कर्म । भाषितं चेहितं च । अल्पवचनताऽल्पचेष्टितत्वं च स्यात् । तथा संज्ञामोहः संविदोऽभावः । तथा श्लेष्मवृद्धौ य उक्ता अग्निसादप्रसेकादयस्तेषामामयानां संभवो भवति ॥ १५ ॥

क्षीण वातादि के लक्षण—

वि०—वायु के क्षीण हो जाने पर—अंगों में शिथिलता, थोड़ा बोलना; थोड़ी चेष्टा करना, बुद्धि का व्यामोह तथा कफवृद्धि में वर्णित रोगों (तथा अग्निमान्द्य आदि) की उत्पत्ति होती है ॥ १५ ॥

पित्ते मन्दोऽनलः शीतं प्रभाहानिः—

स०—पित्ते क्षीणे लिंगमेतत् । अग्निर्मंदः शीतं कांतिहानिश्च स्यात् ।

वि०—पित्त के कम होने पर—अग्नि का मन्द होना, शरीर में शीतलता और प्रभा-कान्ति का नाश होता है ।

—कफे भ्रमः ।
श्लेष्माशयानां शून्यत्वं हृद्द्रवः श्लथसन्धिता ॥ १६ ॥

स०—कफे क्षीणे भ्रमो भवति । तथा श्लेष्माशयानां शून्यत्वम् । श्लेष्माशया उरः शिरः संध्यादयः ॥ १६ ॥

वि०—कफ के क्षीण हो जाने पर—चक्कर आना, छाती, शिर आदि कफाशयों में शून्यता (खालीपन), हृदय की धड़कन और सन्धियों में शिथिलता होती है ॥ १६ ॥

रसे रौक्ष्यं श्रमः शोषो ग्लानिः शब्दासहिष्णुता ।

स०—रसे क्षीणे रौक्ष्यादयः स्युः ।

रसादि की क्षीणता—

वि०—रस के क्षीण हो जाने पर—शरीर में रूक्षता, थकान, शोष, ग्लानि और शब्द की असहिष्णुता होती है ।

रक्तेऽम्लशिशिरप्रीतिसिराशैथिल्यरूक्षताः ॥ १७ ॥

स०—रक्ते क्षीणेऽम्लाद्यभिलाषादयः स्युः ॥ १७ ॥

वि०—रक्त के क्षीण हो जाने पर—अम्ल रस तथा ठण्ढी वस्तु में रुचि, सिराओं की शिथिलता और रूक्षता रहती है ॥

मांसेऽक्षग्लानिगण्डस्फिक्शुष्कतासन्धिवेदनाः ।

स०—मांसे क्षीणेऽक्षग्लानिः । गल्लयोः स्फिजोश्च शुष्कत्वम् । संधीनां वेदनाः स्युः । स्फुटंतीव संधय इत्यर्थः ।

वि०—मांसक्षय में—इन्द्रियों में दुर्बलता, कपोल और नितम्ब में शुष्कता तथा सन्धियों में वेदना होती है ।

मेदसि स्वपनं कट्याः प्लीह्नो वृद्धिः कृशाङ्गता ॥ १८ ॥

स०—मेदसि क्षीणे कट्याः स्वापः प्लीहवृद्धिः कृशांगत्वं च ॥ १८ ॥

वि०—मेद के क्षीण होने पर—कटि में स्पर्शज्ञान का नाश, प्लीहा की वृद्धि और अङ्गों में कृशता होती है ॥ १८ ॥

अस्थ्न्यस्थितोदः शदनं दन्तकेशनखादिषु ।

स०—अस्थि क्षीणेऽस्थ्नां तोदो भवति । शदनं शातः । पात इत्यर्थः । केषाम् । दंतादीनाम् ।

वि०—अस्थि क्षीण होने पर—अस्थियों में वेदना और दन्त, केश, नख आदि का गिरना होता है ।

अस्थ्नां मज्जनि सौषिर्यं भ्रमस्तिमिरदर्शनम् ॥ १९ ॥

स०—मज्जनि क्षीणेऽस्थ्नां सौषिर्यं भ्रमादिश्च ॥ १९ ॥

वि०—मज्जा के क्षीण होने पर—अस्थियों में खोखलापन, चक्कर आना और आँखों के सामने अंधेरा होता है ॥ १९ ॥

शुक्रे चिरात् प्रसिच्येत शुक्रं शोणितमेव वा ।
तोदोऽत्यर्थं वृषणयोर्मेढ्रं धूमायतीव च ॥ २० ॥

स०—शुक्रे क्षीणे शुक्रं चिरात् प्रसिच्येत रक्तं वा । प्रसिच्यतेति कर्मकर्तरि । वृषणयोरतिशयेन तोदो व्यथा स्यात् । मेढ्रं शिश्नं धूमायतीव च । लोहितादेराकृतिगणत्वात् क्यप् । अकृत्सार्वत्यादिना दीर्घः ॥ २० ॥

वि०—शुक्र के क्षीण होने पर—शुक्र का देर में चरण होना अथवा (शुक्र के साथ या उसके स्थान पर) रक्त का आना, वृषणों में अतिशय वेदना और मेहन (शिश्न) में जलन होती है ॥ २० ॥

पुरीषे वायुरन्त्राणि सशब्दो वेष्टयन्निव ।
कुक्षौ भ्रमति यात्यूर्ध्वं हृत्पार्श्वे पीडयन् भृशम् ॥ २१ ॥

स०—पुरीषे क्षीणे वायुः कुक्षौ भ्रमति । अंत्राणि वेष्टयन्निव शब्दं जनयन्यात्यूर्ध्वम् । किं कुर्वन् । हृत्पार्श्वे भृशं पीडयन् ॥ २१ ॥

पुरीष की क्षीणता—

वि०—पुरीष के क्षीण होने पर—वायु शब्द के साथ आंतों को ऐंठती हुई सी उदर में घूमती है तथा हृदय और पार्श्व को अतिशय दबायी हुई ऊपर को जाती है ॥ २१ ॥

मूत्रेऽल्पं मूत्रयेत् कृच्छ्राद्विवर्णं सास्रमेव वा ।

स०—मूत्रे क्षीणेऽल्पं मूत्रयेत्कृच्छ्राद्विवर्णं रक्तसहितमेव वा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—मूत्र का क्षय होने पर—मूत्र थोड़ा और कठिनाई से आता है। मूत्र का रंग बदला हुआ अथवा मूत्र रक्त से मिला होता है।

स्वेदे रोमच्युतिः स्तब्धरोमता स्फुटनं त्वचः ॥ २२ ॥

स०—स्वेदे क्षीणे रोम्णां च्युतिः शादो रोम्णां च स्तब्धत्वम्। त्वचश्चर्मणः स्फुटनं दरणम् ॥ २२ ॥

वि०—पसीने के क्षीण होने से—रोम का गिरना, रोम का कड़ापन एवं त्वचा का फटना होता है ॥ २२ ॥

इदानीं घ्राणादिमलानामपि सामान्येन क्षयलिंगमाह—

मलानामतिसूक्ष्माणां दुर्लक्ष्यं लक्षयेत् क्षयम्।
स्वमलायनसंशोषतोदशून्यत्वलाघवैः ॥ २३ ॥

स०—सूक्ष्माणां शुष्काल्पानां दूषिकादीनां दुःखेन बोद्धुं शक्यं दुर्लक्ष्यं क्षयं लक्षयेज्जानीयात्। कैः। मलानां स्थानानि मलायनानि स्वानि च तानि मलायनानि च स्व मलायनानि तेषां संशोषतोदशून्यत्वलाघवानि स्वमलायन-संशोषतोदशून्यत्वलाघवानि तैः ॥ २३ ॥

घ्राणादि मल की क्षीणता—

वि०—नेत्रमल आदि जो अतिशय सूक्ष्म होने से कठिनाई से देखे जाने योग्य हैं उनके क्षय को, उनके मलायनों के शुष्क होने को तथा उनमें चुभने का सा दर्द, शून्यता और लघुता को देखकर उनका क्षय जानना चाहिए ॥ २३ ।

एवं व्यासेन दोषधातुमलानां वृद्धिक्षयावभिधाय समासतोऽभिधातुमिदमाह—

दोषादीनां यथास्वं च विद्याद् वृद्धिक्षयौ भिषक्।
क्षयेण विपरीतानां गुणानां वर्धनेन च ॥ २४ ॥
वृद्धिं मलानां सङ्गाच्च क्षयं चातिविसर्गतः।

स०—दोषधातुमलानां वृद्धिक्षयौ जानीयात्। कथम्। यथास्वं दोषादीनां गुणेभ्यो विपरीता ये गुणास्तेषां क्षयेण वर्धनेन च देहगतेन दोषादीनां वृद्धिं क्षयं च विद्यात्। यथा वायोर्गुणा रूक्षलघुशीतादयस्तेषां विपरीताः स्निग्धगुरूष्णादयस्तेषां स्निग्धादीनां देहे यदा वृद्धिर्दृश्यते तदा वायोः क्षयो ज्ञेयः। यदा तु तेषां स्निग्धादीनां देहे क्षयो दृश्यते तदा वायोर्वृद्धिं विद्यात्। एवं स्वबुद्ध्या विकल्प्य मलानां धातूनां च वाच्यम्। मलानामित्यादि न केवलं मलानां पूर्वोक्तेन प्रकारेण वृद्धिक्षयौ ज्ञेयौ यावदमुनाऽपि वक्ष्यमाणेन लक्षणेन तेषां वृद्धिक्षयौ ज्ञेयौ। एवं स्वबुद्ध्या विकल्प्य मलानां संगाद्बहिर्निःसरणलक्षणाच्च वृद्धिं विद्यात्। तेषामेव मलानामतिविसर्गादतिप्रवर्तनात्क्षयं विद्यात् ॥ २४ ॥

दोषादि की साधारण क्षय-वृद्धि—

वि०—दोष आदि के अपने-अपने गुणों से विपरीत गुणों के बढ़ने और क्षय होने से क्रमशः शरीरगत दोष आदि की क्षय और वृद्धि जाननी चाहिए। [यथा वायु के गुण रूक्ष शीत-लघु हैं। इनसे विपरीत गुण स्निग्ध, गुरु, उष्ण आदि हैं। शरीर में जब स्निग्धादि गुणों का क्षय हो तब वायु की वृद्धि समझे और जब स्निग्ध आदि गुणों की वृद्धि हो तो वायु का क्षय समझना चाहिए]। बाहर न निकलने से मलों की वृद्धि और अत्यधिक निकलने से उनका क्षय समझे ॥ २४ ॥

वक्तव्य—चरक में—'मलवृद्धिं गुरुतया लाघवान्मलसंक्षयम्। मलायनानां बुध्येत संगोत्सर्गादतीव च'। (चरक)

मलोचितत्वाद् देहस्य क्षयो वृद्धेस्तु पीडनः ॥ २५ ॥

स०—द्वावपि मलानां वृद्धिक्षयौ पीडाकरौ देहस्य तत्रापि य एषां क्षयः स वृद्धितोऽप्यतिशयेन पीडाकरः। अनौचित्यात्। देहिनां हि प्रायो मलक्षयोऽनुचितोऽकभ्यस्तो वृद्धिस्तूचितैवेति न तथा पीडां करोति ॥ २५ ॥

मलों की क्षीणता का उपद्रव—

वि०—मल देह का सात्म्य है; इसलिए मल का क्षय-इनकी वृद्धि की अपेक्षा अधिक कष्टदायी होता है ॥ २५ ॥

अथ दोषादीनामाश्रयाश्रयिभावं दर्शयति—

तत्रास्थनि स्थितो वायुः पित्तं तु स्वेदरक्तयोः।
श्लेष्मा शेषेषु तेनैषामाश्रयाश्रयिणां मिथः ॥२६॥
यदेकस्य तदन्यस्य वर्धनक्षपणौषधम्।
अस्थिमारुतयोर्नैवं प्रायो वृद्धिर्हि तर्पणात् ॥२७॥
श्लेष्मणाऽनुगता तस्मात् सङ्क्षयस्तद्विपर्ययात्।
वायुनाऽनुगतोऽस्माच्च वृद्धिक्षयसमुद्भवान् ॥२८॥
विकारान् साधयेच्छीघ्रं क्रमाल्लङ्घनबृंहणैः।

स०—तत्र तेषु वातादिषु मध्येऽस्थि वायुः स्थित आश्रितः। पित्तं तु स्वेदरक्तयोः स्थितम्। श्लेष्मा शेषेषु रसमांसमेदोमज्जशुक्रमूत्रपुरीषादिषु स्थितः। यतश्चैवमाश्रयाश्रयिभावो दोषधातूनां तेन हेतुनाऽऽश्रयाश्रयिणां मिथः परस्परं यदेकस्याऽऽश्रयस्य वर्धनं तत्तदाश्रयिणोऽपि वर्धनं यदाश्रयस्य क्षपणं तदाश्रयिणोऽपि क्षपणम्। नन्वेवमेवाऽस्थ्नो वाताश्रयस्य यद्वर्धनं तदप्याश्रयिणोऽपि वर्धनं यदस्थ्न क्षपणं तदपि वातस्य क्षपणं प्राप्नोतीत्यत आह। अस्थिमारुतयोर्नैवं वर्धनक्षपणौषधम्। संभवतीत्यध्याहार्यम्। हि यस्मात् प्रायो बाहुल्येन या वृद्धिर्धनं दोषधातूनां सा तर्पणाद् बृंहणाद्भवति। प्रायो ग्रहणं वायुपरिहारार्थम्। सा च श्लेष्मणाऽनुगताऽनुबद्धा यत एवं या वृद्धिः संतर्पणात्तस्माद्धेतोर्य एषां दोषादीनां क्षयः स प्रायो भूयिष्ठमपतर्पणात्तल्लंघनरूपाद्भवति। स च संक्षयो वायुनाऽनुगतः। एवं यदस्थ्नो वर्धनमौषधं तत् स्निग्धमधुरादि बृंहणरूपं वातस्य क्षपणम्। यच्च वातस्य वर्धनमौषधं तद्रूक्षतिक्ताद्यपतर्पणं लंघनरूपमस्थ्नः क्षपणम्। तदर्थमेतदुक्तम्। यत एवं वृद्धेः संतर्पणरूपत्वं क्षयस्याऽपतर्पणरूपत्वमतो वृद्धिक्षयसंभवान् विकारान् दोषधातूनां संबंधिनः क्रमाल्लंघनबृंहणैः साधयेदुपक्रमेत्। कथम्। शीघ्रम्। चिरोत्थिता हि ते दुश्चिकित्स्याः स्युः। वृद्ध्युत्थान् विकारान् लंघनैः क्षयोत्थान् बृंहणैरिति क्रमार्थः ॥ २६–२८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धातु-मलों में दोषों का आश्रय—

वि०—धातु-मलों में दोषों की स्थिति—वायु-अस्थियों में रहती है, पित्त स्वेद और रक्त में, कफ-शेष धातु, रस, मांस, मेद, मज्जा, शुक्र, मूत्र, मल आदि में रहता है। इसलिए इनमें परस्पर आधार-आधेय सम्बन्ध होने से जो औषधि एक (आश्रयभूत धातु) को बढ़ाती है, वह दूसरे (आश्रित दोष) को भी बढ़ाती है; जो एक को घटाती है वह दूसरे को भी घटायेगी। [यथा—दूध शुक्र को बढ़ाता है, वह आश्रयी कफ को भी बढ़ायेगा। जो मेद को घटाता है, वह कफ को भी कम करेगा] परन्तु अस्थि और वायु के सम्बन्ध में अपवाद है। शरीर में जो वृद्धि होती है, उसका कारण प्रायः संतर्पण होता है और यह कफ से सम्बद्ध होती है। इसके विपरीत शरीर का क्षय प्रायः करके संतर्पण के विपरीत (अपतर्पण) से होता है और यह क्षय वायु से सम्बद्ध होता है। इस कारण वृद्धि-क्षयजन्य रोगों की क्रमशः लंघन (अपतर्पण) और बृंहण (संतर्पण) से शीघ्र चिकित्सा करे ॥ २६-२८ ॥

नन्वेवं वातवृद्ध्युत्थान् विकारान् लंघनैस्तत्क्षयोत्थान् बृंहणैरिति स्यादत इदमाह—

वायोरन्यत्र तज्जांस्तु तैरेवोत्क्रमयोजितैः ॥ २९ ॥

स०—वायुं हित्वा वृद्ध्युत्थान् विकारान् लंघनैः क्षयोत्थान् बृंहणैः साधयेत्। अथ तज्जान् वायुसंभवान् विकारान् पुनस्तैरेव लंघनबृंहणैरुत्क्रमयोजितैरुपक्रमेत् यथा निर्दिष्टक्रमाद्विपरीतः क्रमः उत्क्रमः। यथा वातवृद्ध्युत्थान् विकरान् बृहणैस्तत्क्षयोत्थांश्च लंघनैरिति ॥ २९ ॥

वि०—वायु को छोड़कर शेष अवस्थाओं में वृद्धिजन्य रोगों की लंघन से, क्षयजन्य रोगों की बृंहण से चिकित्सा करे। वायु के विषय में उत्क्रम-क्रम का उल्लंघन करके चिकित्सा करे अर्थात्—वातवृद्धिन्य रोगों में बृंहण चिकित्सा; क्षयजन्य रोगों में लंघन चिकित्सा करे ॥ २९ ॥

दोषाणां विशेषचिकित्सेह नोक्ता। दोषोपक्रमणीये वक्ष्यमाणत्वात्। रसचिकित्सा च रसोऽपि श्लेष्मवदित्युक्तेनेह पुनर्निर्दिष्टाऽतो रक्तादीनां चिकित्सामाह—

विशेषाद्रक्तवृद्ध्युत्थान् रक्तस्रुतिविरेचनैः।
मांसवृद्धिभवान् रोगाञ्छस्त्रक्षाराग्निकर्मभिः ॥ ३० ॥
स्थौल्यकार्श्योपचारेण मेदोजानस्थिसंक्षयात्।
जातान् क्षीरघृतैस्तिक्तसंयुतैर्वस्तिभिस्तथा ॥ ३१ ॥
विड्वृद्धिजानतीसारक्रियया विट्क्षयोद्भवान्।
मेषाजमध्यकुल्माषयवमाषद्वयादिभिः ॥ ३२
मूत्रवृद्धिक्षयोत्थांश्च मेहकृच्छ्रचिकित्सया।
व्यायामाभ्यञ्जनस्वेदमद्यैः स्वेदक्षयोद्भवान् ॥ ३३ ॥

स०—वृद्धिक्षयोपक्रमे एवं स्थितेऽपि विशेषेण रक्तवृद्ध्युत्थान् रक्तस्रुतिविरेचनैरुपक्रमेत। मांसवृद्धिजान् शस्त्रक्षाराग्निकर्मभिः। स्थौल्यकार्श्योपचारेण मेदोवृद्धिक्षयाभ्यां जातान् मेदोजानिति मध्यमपदलोपोऽत्र द्रष्टव्यः। मेदोवृद्धिजान् स्थौल्योपचारेण द्विविधोपक्रमणीयोक्तया स्थौल्यचिकित्सया। मेदःक्षयजान् कार्श्योपचारेणोपाचरेत्। अस्थिक्षयजान् क्षीरघृतैस्तिक्तसंयुक्तैर्वस्तिभिस्तथा तथारूपैस्तिक्तसंयुतैरित्यर्थः। ननु यानि वातकृंति द्रव्याणि तान्यस्थिक्षयोद्भवविकाराणां वृद्धिकरणानीति तद्द्रव्योपयोगोऽत्र न युक्तस्तिक्तस्य वातकृत्वात्। उच्यते। यद्द्रव्यं स्निग्धं शोषणं खरत्वमुत्पादयति तदस्थ्नो वर्धनं युक्तं खरत्वभावादस्थ्नाम्। न चैवंविधमेकं द्रव्यमस्ति यत् स्निग्धं शोषणं च। तस्मात् क्षीरघृतैस्तिक्तसंयुतैर्बस्तिभिश्च तिक्तसंयुतैश्चेत्युपदिष्टम्। क्षीरघृतस्य तिक्तयुक्तस्य खरत्वभावत्वात्। विड्वृद्धिजान् पुरिषवृद्धिजानतीसारचिकित्सया साधयेत्। विट्क्षयोद्भवान् मेषाजमध्यादिभिः साधयेत्। मेष ऊरभ्रः। अजश्छागः। तयोर्मध्यमंतराधिः। कुल्माषोऽर्धस्विन्नो माषादि हिंगुघृतादिसंयुतः। माषद्वयं माषो राजमाषश्च। आदि शब्देन काकांडोलात्मगुप्तादीनां ग्रहणम्। मूत्रवृद्ध्युत्थान् मेहचिकित्सया मूत्रक्षयोत्थान् मूत्रकृच्छ्रचिकित्सया। स्वेदक्षयजान् व्याधीन् व्यायामादिभिः साधयेत् ॥ ३०-३३ ॥

धातु-मलों के वृद्धि क्षय की चिकित्सा—

वि०—विशेषतः रक्तवृद्धि से उत्पन्न रोगों की चिकित्सा रक्तस्राव और विरेचन से; मांसवृद्धि से उत्पन्न रोगों की शस्त्र, क्षार और अग्नि कर्म से, मेदवृद्धिजन्य रोगों की स्थूलता की चिकित्सा से अर्थात् अपतर्पण से; मेदक्षयजन्य रोगों की कृशता की चिकित्सा से अर्थात् संतर्पण से; अस्थिक्षयजन्य रोगों की तिक्त द्रव्यों से साधित दूध, घी और बस्ति से; पुरीषवृद्धिजन्य रोगों की अतीसार-चिकित्सा से, पुरीष क्षयजनित रोगों में भेड़ और बकरी के मध्यभाग, कुल्माष, जौ, उड़द और राजमाष के प्रयोग से; मूत्रवृद्धि तथा मूत्रक्षयजन्य रोगों में क्रमशः प्रमेह तथा मूत्रकृच्छ्र की चिकित्सा करे तथा स्वेदक्षय से उत्पन्न रोगों में व्यायाम, अभ्यङ्ग, स्वेदन और मद्य देवे। ३०-३३ ॥

वक्तव्य—रसक्षय में रस को बढ़ाने वाले द्रव्य का उपयोग करे। यथा—'तत्रापि स्वयोनिवर्धनद्रव्योपयोगः प्रतिकारः॥ शुद्धवृद्धि के लिए—व्यावाय (संभोग), तथा शुक्र को कर्म करने वाले (कटु-तिक्तरस) द्रव्य बरते। शुक्रक्षय में—स्वादुमधुर भोजन बरते। सुश्रुत-में आर्त्तव तथा स्तन्य (दूध) वृद्धि के भी लक्षण दिये हैं। यथा—'आर्त्तवमङ्गमर्दमतिप्रवृत्ति दौर्गन्ध्यं च। स्तन्यं स्तनयोरापीनत्वं मुहुर्मुहुः प्रवृत्तिं तोदं च। गर्भो जठराभिवृधिं स्वेदं च॥' (सु. सू. अ. १५।१६)

स्वस्थानस्थस्य कायाग्नेरंशा धातुषु संश्रिताः।
तेषां सादातिदीप्तिभ्यां धातुवृद्धिक्षयोद्भवः ॥ ३४ ॥
पूर्वो धातुः परं कुर्याद् वृद्धः क्षीणश्च तद्विधम्।

स०—स्वस्थानं कायाग्नेः पक्वामाशययोर्मध्यम्। यथा वक्ष्यति। पित्तं पंचात्मकं तत्तु पक्वामाशयमध्यगमित्यादि यावत्पाचकं नाम तत् स्मृतमिति। तत्र पक्वामाशयमध्ये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिष्ठतीति स्वस्थानस्थातस्यैवंविधस्य कायाग्नेर्जाठरानलस्यांऽशा भागा धातुषु रसादिषु संश्रितास्तेषामग्न्यंशानां सादेन मांद्येन धातूनां वृद्धयुद्धवस्तेषामंशानामतिदीप्त्याऽतितैक्ष्ण्याद्धातुक्षयोद्भवः। पूर्वो रसाख्यो धातुर्वृद्धो भूत्वा परं रक्ताख्यं धातुः वृद्धं कुर्यात् पूर्वश्चेत् क्षीणो धातुः परं धातुं तद्विधं क्षीणमेव कुर्यात् ॥ ३४ ॥

धातुक्षयवृद्धि का कारण—

वि०—स्वस्थान—ग्रहणी में स्थित कायाग्नि के अंश-रक्तादि धातुओं में स्थित हैं। इन धात्वग्नियों के मन्द होने से धातुओं की वृद्धि होती है और उनके अतिदीप्त होने से धातुओं का क्षय होता है। पूर्व धातु बढ़ने पर अगले धातु को भी बढ़ाता है और पहला धातु क्षीण होने पर अगले धातु को भी घटाता है। रक्तवृद्धि से मांसवृद्धि, रक्तक्षय से मांसक्षय आदि ॥ ३४ ॥

दोषा दुष्टा रसैर्धातून् दूषयन्त्युभये मलान् ॥ ३५ ॥
अधो द्वे सप्त शिरसि खानि स्वेदवहानि च।
मला मलायनानि स्युर्यथास्वं तेष्वतो गदाः ॥ ३६ ॥

स०—दोषा दुष्टा रसैर्मधुरादिभिर्मिथ्यायोगातियोगसेवितैः कुपिता धातून् दूषयंति। उभये दोषा धातवश्च मलान् दूषयंति। मला मलायनानि दूषयंतीति संबंधः। तथा च मुनिः। मलायनानि बाध्यंते दुष्टैर्मात्राधिकैर्मलैरिति। कानि मलायनानीत्याह। अधो द्वे गुदमेढ्राख्ये। सप्त शिरसि खानि द्वे अक्षिणी द्वौ कर्णौ द्वौ नासापुटावास्यं चेति। तथा स्वेदवहानि रोमकूपाख्यानि छिद्राणि सर्वशरीरगतानि मलायनानि स्युः। अतो दूषणात्कारणात् तेषु मलायनेषु दुष्टेषु यथास्वं गदाः स्युः। यो यस्य स्वो यथास्वम् ॥३५-३६॥

दोषों से रोगों की उत्पत्ति का क्रम-सम्प्राप्ति—

वि०—रस (मधुर आदि) से दूषित हुए दोष धातुओं को दूषित करते हैं। दूषित दोष और धातु मलों को दूषित करते हैं और दूषित मल मलायनों (स्रोतों) को दूषित करते हैं तथा इससे उनके अपने-अपने (प्रकुपित दोषादि के अनुसार) रोग होते हैं। दो अधोमार्ग-गुदा और मेहन, शिर में सात-दो स्रोत कान, दो नेत्र, दो नासिका और एक मुख तथा स्वेदवाही स्रोत मलायन-(मलों के स्थान) हैं॥

दोषधातुमलानां समविषमाऽवस्था गदिता। ओजो निरूपयन्नाह—

ओजस्तु तेजो धातूनां शुक्रान्तानां परं स्मृतम्।
हृदयस्थमपि व्यापि देहस्थितिनिबन्धनम् ॥ ३७ ॥
स्निग्धं सोमात्मकं शुद्धमीषल्लोहितपीतकम्।
यन्नाशे नियतं नाशो यस्मिंस्तिष्ठति तिष्ठति ॥ ३८ ॥
निष्पद्यन्ते यतो भावा विविधा देहसंश्रयाः।

स०—रसादीनां धातूनां शुक्रांतानां यत्परं तेजस्तदोजः स्मृतम्। तथा हृदयस्थमपि व्यापि। सकलशरीरव्यापि। यतस्तस्य षड्बिंदुकस्य विशेषेण हृदयं स्थानम्। तथा देहस्य स्थिद्धिर्देहस्थितिस्तस्या निबंधनं जीविताधिष्ठानमित्यर्थः। अन्ये त्वाहुः परशब्देनैतद् द्योतयति। अन्यदप्योजोऽस्ति न तद्धातूनां शुक्रांतानां तेजः श्लेष्माख्यमिति। तथा चोक्तं संग्रहे। मृदु सोमात्मकं शुद्धं रक्तमीषत्सपीतकमित्यादि। यन्नाशे यस्यौजसो नाशेऽभावे नियतं निश्चतं प्राणिनोऽभावः। यस्मिन्नोजसि तिष्ठति विद्यमाने तिष्ठति प्राणिति देहीति शेषः। यतो यस्माच्च भावाः पदार्था निष्पद्यंते जायन्ते विविधा अनेक प्रकाराः। तथा देहः संश्रयो येषां ते देहसंश्रयाः। लक्षणमोजसो मुनिनाऽभ्यधायि। हृदि तिष्ठति यच्छुद्धं स्निग्धमीषत्सपीतकम्। ओजः शरीरे संख्यातं तन्नाशे ना विनश्यतीत्यादि ॥ ३७-३८ ॥

ओज का लक्षण—

वि०—ओज—रस धातु से शुक्र तक स्वधातुओं का जो उत्कृष्ट तेज है, उसका नाम ओज है। यह ओज हृदय में रहता हुआ भी सम्पूर्ण शरीर में व्याप्त है और जीवन का आधार है। यह सौम्य, स्निग्ध, शुद्ध-थोड़ा सा लाल पीले वर्ण का है। जिसके नाश होने पर निश्चित नाश-मृत्यु है; जिसके रहने से जीवन रहता है; जिसके कारण शरीर में आश्रित नाना प्रकार के भाव-पदार्थ उत्पन्न होते हैं-वह ओज है।

वक्तव्य—आयुर्वेद में ओज शब्द कई द्रव्यों के लिये प्रयुक्त हुआ है; यथा-धातूनां तेजसि रसे तथा जीवितशोणिते। श्लेष्मणि प्राकृते वैद्यैरोजः शब्दः प्रकीर्त्तितः॥' अत्यन्त शुद्ध होने से ओज में मल का अभाव रहता है, ओज-पर और अपर भेद से दो प्रकार का है। पर ओज के आठ बिन्दु हैं-और यह हृदय में रहता है, इसके नाश से मृत्यु है। अपर ओज की मात्रा आधा अञ्जलि है; यह सारे शरीर में व्याप्त रहता है; इसी ओज का क्षय, विस्रंसन या व्लापन होती है।

ओजो क्षीयेत कोपक्षुद्ध्यानशोकश्रमादिभिः। ३९ ॥
बिभेति दुर्बलोऽभीक्ष्णं ध्यायति व्यथितेन्द्रियः।
दुश्छायो दुर्मना रूक्ष भवेत्क्षामश्च तत्क्षये ॥ ४० ॥
जीवनीयौषधक्षीररसाद्यास्तत्र भेषजम्।

स०—ओजः कोपादिभिः क्षीयेत। तत्क्षये बिभेति दुर्बल इत्यादिलक्षणम्। जीवनीयौषधाद्यास्तत्र भेषजम्। जीवनीयौषधानि जीवंत्यादीनि दश जीवनसंज्ञानि। तथाऽन्यानि यानि मधुराणि द्रव्याणि। क्षीरस्य जीवनीयत्वेनैव ग्रहणे सिद्धे पृथग्भावोऽतिशयार्थोऽतिशयेनात्र क्षीरमौषधमिति। रसो मांसरसः। आदिग्रहणेन काकांडोलाऽमृतगुप्ताघृतादि परिग्रहः ॥ ३९-४० ॥

ओज का क्षय—

वि०—ओज—कोप, भूख, चिन्ता, शोक, श्रम आदि से क्षीण हो जाता है। ओजः क्षय होने पर रोगी डरता है, हीनबल हो जाता है; सदा बिना कारण चिन्ता करता है; इन्द्रियों (हृदय आदि स्थानों) में वेदना होती है, कान्ति मलिन हो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जाती है, चिड़चिड़ा; रूक्ष तथा कृश हो जाता है। इसके लिये जीवन्ती आदि जीवनीय द्रव्य दूध; मांसरस आदि औषध देना चाहिये।

ओजोवृद्धौ हि देहस्य तुष्टिपुष्टिबलोदयः ॥ ४१ ॥

स०—ओजोविवृद्धौ सत्यां देहस्य तुष्टिः प्रहर्षः पुष्टिर्वृद्धिर्बलं सामर्थ्यमेषामुदयः सम्यग्वृद्धिर्भवति ॥ ४१ ॥

ओज की वृद्धि—

वि०—ओज की वृद्धि से शरीर की तुष्टि (प्रहर्ष,) पुष्टि तथा शक्ति का उत्कर्ष होता है (अर्थात् इसकी वृद्धि से विकार नहीं होते) ॥ ४१ ॥

इदानीं संक्षेपेण वृद्धिक्षयभेषजं कथयन्नाह—

ननु द्वेष्यान्नत्यागेनेष्टभक्षणेन कुतो हेतोर्दोषाणां वृद्धिक्षयौ जयेदित्याह—

यदन्नं द्वेष्टि यदपि प्रार्थयेताविरोधि तु।
तत्तत्त्यजन् समश्नंश्च तौ तौ वृद्धिक्षयौ जयेत् ॥ ४२ ॥
कुर्वते हि रुचिं दोषा विपरीतसमानयोः।
वृद्धाः क्षीणाश्च भूयिष्ठं लक्ष्यन्त्यबुधास्तु न ॥ ४३ ॥

स०—यदन्नं पुरुषो द्वेष्टि नाभिनंदति यदप्यन्नं प्रार्थयेत तत्तदन्नं द्विष्टं त्यजन् परिहरन्निष्टमन्नं समश्नन् भक्षयन् दोषाणां संबंधिनौ वृद्धिक्षयौ तौ तौ यौ यस्य दोषस्यात्मीयौ वृद्धिक्षयौ तौ तौ जयेत्। ननु किमविशेषेणैतत्प्रार्थितमश्नन् दोषक्षयं जयेदित्याह। अविरोधि। तुरवधारणे। अविरोध्येव तत्तथाविधमन्नमश्नन् दोषाणां क्षयं जयेन्न तु विरोध्यन्नमश्नन्। यस्माद्दोषा वातादयो विपरीतसमानयोः रुचिं कुर्वंति। किंभूताः संतः। वृद्धाः। क्षीणाश्च यथाक्रमम्। वृद्धाः प्रमाणाधिकाः संतः स्वगुणेभ्यो यद्विपरीतगुणमन्नं तद्विषयां रुचिं प्रीतिमुत्पादयंति भूयिष्ठं बाहुल्येन। क्षीणाः संतो यत्तत्समानगुणमाहारजातं। तेषां वर्धनहेतुस्तद्विषयां प्रीतिमुत्पादयंति। यथा वातो वृद्धः स्निग्धाम्लमधुरमन्नमभिलषति। पित्तं वृद्धं शीतमधुररूक्षतिक्तकषायमन्नमभिलषति। श्लेष्मा वृद्धो रूक्षाम्लकटुतिक्तमन्नमभिलषति। वातः क्षीणो रूक्षकषायाद्यन्नमभिलषति। पित्तं क्षीणमम्ललवणकटुकमन्नमभिलषति। श्लेष्मा क्षीणः स्निग्धमधुराम्ललवणमन्नमभिलषति। भूयिष्ठमित्यनेन प्रायिकत्वमस्या व्यवस्थाया दर्शयति। तेन दोषगतिवैचित्र्यादन्यथाऽपि क्वचिद्भवति। यथा कस्यचिन्नरस्य वातोऽपि क्षीणः स्निग्धमधुराद्यन्नमभिलषति पित्तमपि वृद्धमम्ललवणाद्यन्नमभिलषति श्लेष्माऽपि वृद्धो मधुराम्लाद्यन्नमभिलषतीति व्यभिचारात्। अत एवाऽबुधा न लक्षयंति न विदंति यथा किमयं दोषः क्षीण उत वृद्ध इति ॥ ४२-४३ ॥

वृद्धि-क्षय की चिकित्सा—

वि०—पुरुष जिस अन्न से द्वेष करता है और जिस अन्न की चाह करता है; उस उस द्विष्ट अन्न का त्याग करता हुआ, तथा इच्छित किन्तु अविरोधी अर्थात् जो अपथ्य न हो ऐसे अन्न को खाता हुआ दोष सम्बन्धित वृद्धि एवं क्षय को जीते। क्योंकि वातादि दोष प्रमाण से अधिक बढ़कर अपने गुणों से विपरीत गुण वाले अन्न में तथा कम हुए दोष अपने समान गुण वाले आहार में रुचि को उत्पन्न करते हैं—ऐसा प्रायः करके होता है। मूर्ख इसको नहीं पहचानते ॥ ४२-४३ ॥

नचानेनैव लक्षणेन वृद्धाः क्षीणाश्च दोषा लक्षणीयाः किं तर्ह्यन्यदपि लक्षणमस्तीत्याह—

यथाबलं यथास्वं च दोषा वृद्धा वितन्वते।
रूपाणि जहति क्षीणाः समाः स्वं कर्म कुर्वते ॥ ४४ ॥

स०—बलानतिक्रमेण यथास्वं च यद्यदात्मीयं यथास्वं रूपाणि गुणकर्मलक्षणानि दोषा वृद्धा वितन्वते विस्तारयंति। क्षीणाश्च बलातिक्रमेण यथास्वं रूपाणि जहति त्यजंति। यथा वायुर्वृद्धो रूक्षशैत्यपारुष्यस्रंसंध्यासादीनि विस्तारयति। क्षीणस्तु वायुः पूर्वोक्तानि रूक्षादीनि जहात्यत एव न व्यंजयति। अथ समा दोषाः किं विदधतीत्याह। समा इत्यादि। यदा न वृद्धा नच क्षीणाः समा दोषाः स्वप्रमाणस्थास्तदा स्वं कर्मोत्साहोच्छ्वासादिकं यथोक्तं कुर्वते। तल्लक्षणात्ते लक्षणीयाः ॥ ४४ ॥

दोषों की वृद्धि, क्षय और समता के संक्षिप्त लक्षण—

वि०—बढ़े हुए दोष अपने बल के अनुसार अपने-अपने गुणकर्म और लक्षणों का विस्तार करते है। क्षीण हुए दोष अपने गुणकर्म को छोड़ देते हैं अर्थात् वे कम हो जाते हैं। समावस्था में दोष अपना उचित कर्म करते हैं। [इनसे दोषों की वृद्धि, क्षय और समावस्था को जाने।] ॥ ४४ ॥

तदेवं वृद्धक्षीणसमा दोषा वेद्याः। क्षीणा दोषाः क्षीणत्वादेवाकिंचित्करत्वात्कदाचित्पीडां नोत्पादयंत्येवेति विचिंत्याऽल्पमतयो वैद्याः क्षीणदोषवर्धनार्थं कदाचिदनादरं कुर्युरित्याह—

य एव देहस्य समा विवृद्ध्यै
त एव दोषा विषमा वधाय।
यस्मादतस्ते हितचर्ययैव
क्षयाद्विवृद्धेरिव रक्षणीयाः ॥ ४५ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने दोषादिविज्ञानीयो नामैकादशोऽध्यायः ॥ ११ ॥

स०—य एव दोषाः समाः संतो देहस्य विवृद्ध्यै वर्धनाय भवंति त एव दोषा विषमाः स्वप्रमाणादधिका हीना वा संतो वधाय देहविनाशाय स्युः। यस्मादेवं ततस्ते दोषा हितचर्ययैव क्षयाद्धीनत्वाद्रक्षणीयाः। कुत इव। विवृद्धेरिव। यथा विवृद्धेर्विशेषेण वर्धनात्ते रक्ष्यंते तथा क्षयादपि रक्षणीया इति। उपजातिर्वृत्तम् ॥ ४५ ॥

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां दोषादिविज्ञानीयो नामैकादशोऽध्यायः ॥ ११ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपसंहार—

वि०—जो दोष समानावस्था में शरीर की वृद्धि के कारण होते हैं; वे ही दोष विषमावस्था में शरीर के नाश के हेतु होते हैं। इसलिये इन दोषों की हितचर्या-पथ्य आहार-विहार द्वारा वृद्धि के समान चय से भी रक्षा करनी चाहिए क्योंकि न केवल दोषों की वृद्धि अपितु उनका क्षय भी विकारजनक होता है ॥ ४५ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान में दोषादिविज्ञानीय नामक ग्यारहवाँ अध्याय समाप्त हुआ।

द्वादशोऽध्यायः

दोषादिविज्ञानीयादनंतरं दोषभेदीयाध्यायारंभो यतो दोषभेदमंतरेण दोषविज्ञानं सम्यङ्नोक्तं स्यात्। पूर्वस्मिन्नध्याये बहुवक्तव्यत्वाद्दोषभेदो नोक्त इत्याह—

अथातो दोषभेदीयाध्यायं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

स०—दोषाणां भेदो दोषभेदः। स्थाननामविभागादिभिस्तस्मै हितो दोषभेदीयः शेषं पूर्ववत्।

वि०—अब इसके आगे दोषभेदीय अध्याय का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था।

पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम्।
स्थानं वातस्य, तत्रापि पक्वाधानं विशेषतः ॥ १ ॥

स०—पक्वाशयादि वातस्य स्थानं तत्राऽपि षड्विधस्थाने विशेषेण पक्वमाधीयते स्थाप्यतेऽस्मिन्निति पक्वाधानं पक्वाशयः। अत एव वाते बस्तेरुपक्रमः प्रधान उक्तः। मूलापकर्षणात्सकलशरीरव्यापित्वेऽपि येषामिदं विशेषेणोक्तम्। तथा च प्रागुक्तम्। ते व्यापिनोऽपि हृन्नाभ्योरिति। विचित्रगतित्वाच्चैषां वक्ष्यमाणप्राणादिभेदेन पृथक् स्थानकर्मनिर्देशः ॥ १ ॥

वायु के स्थान—

वि०—वायु के स्थान—पक्वाशय, कटि, पैर, श्रोत्र, अस्थि, त्वचा हैं; इनमें भी पक्वाशय मुख्य है ॥ १ ॥

नाभिरामाशयः स्वेदो लसीका रुधिरं रसः।
दृक् स्पर्शनं च पित्तस्य, नाभिरत्र विशेषतः ॥ २ ॥

स०—पित्तस्य नाभ्यादीनि स्थानानि। लसीका जलसदृशी। दृक् चक्षुः। स्पर्शनं त्वक्। ननु स्पर्शनेंद्रियं वायोः स्थानमुद्दिष्टं तदेव कथं पित्तस्याऽपि स्यात्। ब्रूमः। वातसखित्वादग्नेः वातसखो ह्यग्निः। पित्तं च वह्निरिति वचनात्। तस्मादुभयोरप्येतद्युक्तं स्थानम्। विशेषत इति अत्रैषु स्थानेषु मध्ये पित्तस्य विशेषेण नाभिः स्थानम् ॥ २ ॥

पित्त के स्थान—

वि०—पित्त के स्थान—नाभि, आमाशय, स्वेद, लसीका, रक्त, रस, आँख और त्वचा हैं, इनमें भी मुख्य स्थान नाभि है ॥ २ ॥

उरःकण्ठशिरःक्लोमपर्वाण्यामाशयो रसः ॥ ३ ॥
मेदो घ्राणं च जिह्वा च कफस्य, सुतरामुरः।

स०—कफस्योरःप्रभृतीनि जिह्वांतानि स्थानानि। सुतरां सुष्ठु स्थानमुरो वक्षः ॥ ३ ॥

कफ के स्थान—

वि०—कफ के स्थान—छाती, कण्ठ, सिर, क्लोम, पर्व (संधियाँ), आमाशय, रस, मेद, घ्राण और जिह्वा—ये कफ के स्थान हैं। इनमें भी छाती मुख्यतः कफ का स्थान है ॥ ३ ॥

अथ प्रत्येकमेतेषां दोषाणां विशिष्टस्थानाश्रयेण क्रियाभेदात्पंच पंच भेदानाह—

प्राणादिभेदात्पञ्चात्मा वायुः—

स०—वायुरेक एव चलनस्वभावः सन् प्राणादिभिः प्राणोदानव्यानसमानापानैर्भेदाद्विशेषात्पंचात्मा पंचस्वभावः। येथैकोऽपि देवदत्तो यां यां क्रियां करोति तदनुरूपमेव संज्ञां लावकपाचकादिकां लभते तद्वद्वातादयः।

वायु के पाँच भेद—

वि०—प्राण आदि (प्राण, उदान, व्यान, समान और अपान) के भेद से वायु पाँच प्रकार की है।

—प्राणोऽत्र मूर्धगः।
उरःकण्ठचरो बुद्धिहृदयेन्द्रियचित्तधृक् ॥ ४ ॥
ष्ठीवनक्षवथूद्गारनिःश्वासान्नप्रवेशकृत्।

स०—अत्र एषु मध्ये प्राणो वायुर्मूर्धगः शिरसि स्थित उरः कंठं च चरति। तथाबुद्ध्यादीनां धारकस्तथा ष्ठीवनादिक्रियः। ष्ठीवनं मुखास्रवोद्गारः। ष्ठीवनमिति ष्ठिवेर्युटि ष्ठिविसिव्योर्दीर्घश्चेति पृषोदरादिपाठाद्दीर्घः ॥ ४ ॥

प्राण वायु—

वि०—इनमें प्राण वायु शिर में रहती है, छाती और कण्ठ में गति करती है। बुद्धि, हृदय, इन्द्रिय और मन इनको धारण करती है। थूकना, छींकना, उद्गार, निःश्वास तथा अन्न का प्रवेश कराना इसके कार्य हैं ॥ ४ ॥

उरःस्थानमुदानस्य नासानाभिगलांश्चरेत् ॥ ५ ॥
वाक्प्रवृत्तिप्रयत्नोर्जोबलवर्णस्मृतिक्रियः।

स०—उदानस्य प्रधानमुरः स्थानं नासादींश्च चरति। वाक्प्रवृत्यादिक्रियः। प्रयत्नकार्येषु पदार्थग्रहणादिषूद्यमः ॥ ५ ॥

उदान वायु—

वि०—उदान वायु का स्थान—छाती है; यह नासा, नाभी और गले में गति करती है। वाणी की प्रवृत्ति, प्रयत्न, ऊर्ज (शक्ति), बल, वर्ण और स्मृति इसके कार्य हैं ॥ ५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्यानो हृदि स्थितः कृत्स्नदेहचारी महाजवः ॥ ६ ॥
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ।
प्रायः सर्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् ॥७॥

स०—व्यानो हृदये स्थितः प्राधान्येन कृत्स्ने सर्वस्मिन् शरीरे चरति । तथा महाजवः शीघ्रगतिःप्राणाद्यपेक्षया। तथा गत्यादिकाः क्रियाः । प्रायः सर्वदेहिनां तस्मिन्व्याने प्रतिबद्धास्तदायत्ताः । गतिश्चंक्रमणम् । अपक्षेपणमंगस्याऽधोनयनम् । उत्क्षेपोऽगस्योर्ध्वनयनम् । निमेषोऽक्ष्णोर्निमीलनम् । उन्मेषस्तयोर्विकाशः । आदिग्रहणेन जृंभणान्नास्वादनविशोधनादिपरिग्रह ॥ ६-७ ॥

व्यान वायु—

वि०—व्यान वायु—मुख्यतः हृदय में रहती है, सम्पूर्ण शरीर में गति करती है । (प्राणादि की अपेक्षा) शीघ्र गति वाली है । गति—चलना; अङ्ग को नीचे ले जाना; अङ्ग को ऊपर ले जाना, आँख को बन्द करना, आँख को खोलना, आदि मनुष्यों की सब क्रियायें मुख्यतः इसी के अधीन हैं ॥ ६-७ ॥

समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः ।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति ॥ ८ ॥

स०—समानो वायुरग्निसमीपस्थ इति सामान्योक्तावपि प्राधान्यात्पाचकोऽग्निर्गृह्यते । अत एवाह । कोष्ठे चरतीति । सर्वत इत्याद्यादित्वात् सर्वस्मिन् कोष्ठे चरति स चान्नं गृह्णात्यपक्वमामाशये धारयतीत्यर्थः । पचत्यग्निसंधुक्षणान्नक्तकार इव । विवेचयति संहतमन्नं पाकाय विभजते । मुंचति शकृन्मूत्रादिरूपमधः ॥ ८ ॥

समान वायु—

वि०—समान वायु मुख्यतः पाचकाग्नि के समीप रहती है और सम्पूर्ण कोष्ठ में फिरती है, अन्न को ग्रहण करती है पचाती है; विवेचन-सार और किट्ट में भेद करती है; किट्ट भाग को (पुरीष मल-मूत्र के रूप में) नीचे प्रवृत्त करती है ॥ ८ ॥

अपानोऽपानगः श्रोणिवस्तिमेढ्रोरुगोचरः ।
शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः ॥ ९ ॥

स०—अपानो वायुरपानं प्राधान्येनाश्रितः श्रोण्यादिचरः शुक्रादिन्निष्क्रमणक्रियः । इति वातभेदाः पंच ॥ ९ ॥

अपान वायु—

वि०—अपान वायु—मुख्यतः गुदा में रहती है और यह श्रोणि वस्ति; मेहन तथा ऊरु में विचरती है । शुक्र, आर्त्तव, पुरीष, मूत्र एवं गर्भ को बाहर निकालती है ॥ ९ ॥

पंच पित्तभेदानाह ।

पित्तं पञ्चात्मकम्—

पित्त के पाँच भेद—

वि०—पित्त पाँच प्रकार का है ।[1]

[1] १. पाचक, रञ्जक, साधक, आलोचक और भ्राजक ।

—तत्र पक्वामाशयमध्यगम् ।
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ॥ १० ॥
त्यक्तद्रवत्वं पाकादिकर्मणाऽनलशब्दितम् ।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ॥ ११ ॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत्स्मृतम् ॥ १२ ॥

स०—तत्र तेषु पंचसु मध्ये पक्वामाशययोर्मध्यस्थं तथा पंचभूतात्मकत्वेऽपि सति यत्तैजसगुणोदयादाग्नेयगुणोत्कर्षात्पितसोमगुणत्वेन त्यक्तद्रवत्वं संजातकाठिन्यं तथा सहकारिकारणैः पाचनक्रियां प्रति सव्यापारैर्वाय्वादिभिरनुग्रहादुपकारात्पाकदाहादिक्रिययाऽनलशब्दितमग्निशब्दवाच्यं यत्पित्तं तत्पाचकमुच्यते । तच्चान्नं पचति । सारकिट्टौ पृथग् विभजति विभागीकरोति । किट्टशब्दस्य लोकाश्रयत्वाल्लिंगस्येति पुंस्त्वम् । तत्रस्थमेव पक्वामाशयमध्यगमेव शेषाणां रंजकादीनां धातुस्थानां चानुग्रहमुपकारं करोति । बलदानेन सामर्थ्याधानेन स्वस्थानस्थमेव तेषूपकुरुत इत्यर्थः ॥ १०-११ ॥

पाचक पित्त—

वि०—इनमें पक्वाशय और आमाशय के मध्य (ग्रहणी) में रहने वाला पित्त-पञ्चभूतात्मक होने पर भी तैजस गुण की अधिकता से द्रवता का त्याग कर पाक आदि अग्नि के कार्य करने से 'अनल'-अर्थात् अग्नि' शब्द से कहा जाता है । यह पित्त अन्न को पचाता है, सार और किट्ट भाग को पृथक् करता है और वहीं रहकर शेष पित्तों को बल पहुँचा कर उनको शक्ति देता है । इस पित्त को 'पाचक' पित्त कहते हैं ॥ १०-१२ ॥

आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् ।

स०—यच्चाऽऽमाशयस्थं पित्तं तद्रसाख्यधातो रंजनाद्रागनिष्पादनाद्रंजकमुच्यते ।

रञ्जक पित्त—

वि०—रञ्जक पित्त—आमाशय में रहता है; और रस से रञ्जक कहलाता है ।

'बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् ॥ १३ ॥
साधकं हृद्गतं पित्तं—

स०—यत्तु हृद्गतं हृदयस्थं पित्तं तद्बुद्ध्यादिभिः करणभूतैरभिप्रेतस्याऽर्थस्य बाह्यग्रहणस्मरणादिरूपेण साधनात् साधकमुच्यते । वर्तमानकाले या मनोऽर्थसंशयस्य निश्चयं कर्तुं तदर्थाध्यवसायोपारूढा सा बुद्धिः । बुद्धिविशेषो मेधा ॥ १३ ॥

साधक पित्त—

वि०—साधक पित्त—हृदय में रहता है; बुद्धि, मेधा, अभिमान आदि के द्वारा वांछित अर्थ का साधन करने से यह साधक कहलाता है ॥ १३ ॥

रूपालोचनतः स्मृतम् ।
दृक्स्थमालोचकं—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—दृष्टिस्थं पित्तं रूपालोचनादंतस्तारकायाः स्थितं तदायत्तरूपग्रहणशक्तित्वादालोचकमुच्यते।

आलोचक पित्त—

वि०—आलोचक पित्त—आँखों में स्थित है; रूप ग्रहण करने से इसे आलोचक कहते हैं।

—त्वक्स्थं भ्राजकं भ्राजनात्त्वचः ॥ १४ ॥

स०—त्वचो भ्राजनाद्दीपनाद् भ्राजक नाम पित्तम्। एतच्च पित्तमभ्यंगलेपपरिषेकादीन् पाचयति ॥ १४ ॥

भ्राजक पित्त—

वि०—भ्राजक पित्त—त्वचा में स्थित है, यह पित्त त्वचा का प्रकाश करने से भ्राजक कहलाता है। (जिससे त्वचा में चमक और अभ्यङ्ग-लेप आदि द्वारा उपयुक्त द्रव्यों का पाचन और शोषण भी होता है।) ॥ १४ ॥

श्लेष्मा तु पञ्चधा—

स०—श्लेष्मा तु पंचधा, श्लेष्माऽपि पंचप्रकारः।

श्लेष्मा के पाँच भेद—

वि०—कफ पाँच प्रकार का है।[1] इनमें—

तदेव पंचकारत्वमाह—

—उरःस्थः स त्रिकस्य स्ववीर्यतः।
हृदयस्यान्नवीर्याच्च तत्स्थ एवाम्बुकर्मणा ॥ १५ ॥
कफधाम्नां च शेषाणां यत्करोत्यवलम्बनम्।
अतोऽवलम्बकः श्लेष्मा—

स०—स श्लेष्मा उरसि तिष्ठतीत्युरःस्थस्त्रिकस्य पृष्ठाधाराख्यस्य स्वप्रभावाद्यस्मादवलंबनं करोति स्वकर्मणितस्य सामर्थ्यमुत्पादयति। हृदयस्यान्नवीर्याद्न्नवीर्येणाभ्यवहृताद्न्नाद्रसरूपतापरिणतादवलंबनं बलेन वीर्येण करोति। चशब्दात्स्ववीर्येणाऽपि हृदयस्यावलंबनं करोति। किंत्वन्नवीर्यादतिशयेन यथावलंबनं हृदयस्य करोति। न तथा स्ववीर्यतः यतोऽन्नरसः पूर्वं हृदि स्थितिं कृत्वा ततो व्यानव्युत्क्षिप्तः सर्वं शरीरं याति तस्माद्विशेषेण हृदयस्यान्नऽवीर्यादवलंबनं युक्तम्। आगमोऽपि हृदयं मनसः स्थानभोजसश्चितितस्य च। मांसपेशीचयो रक्तपद्माकारमधोमुखम्। योगिनो यत्र पश्यंति सम्यग् ज्योतिः समाहिताः। रसो यः स्वच्छतां यातः स तत्रैवाऽवतिष्ठते। ततो व्यानेन विक्षिप्तः कृत्स्नं देहं प्रपद्यते। तथा तत्स्थ एवोरःस्थ एवैष श्लेष्मा शेषाणां कफस्थानानामंबुकर्मणा क्लेदसंश्लेषादिलक्षणेन जलव्यापारेणाऽवलंबनं करोत्यतोऽस्माद्यथोक्ताद्धेतोरवलंबकः श्लेष्मेत्युच्यते ॥ १५ ॥

अवलम्बक श्लेष्मा—

वि०—अवलम्बक कफ—छाती में रहता हुआ अपनी शक्ति से त्रिक का तथा अपनी और अन्न की शक्ति से हृदय का अवलम्बन करता है। छाती में रहता हुआ ही जलीय कार्यों से (क्लेदन, तर्पण, पूरण आदि) शेष कफ स्थानों का (गले आदि का) अवलम्बन करता है इसलिये इसको 'अवलम्बक श्लेष्मा' कहते हैं ॥ १५ ॥

—यस्त्वामाशयसंस्थितः ॥ १६ ॥
क्लेदकः सोऽन्नसङ्घातक्लेदनात्—

स०—स पुनः श्लेष्मा आमाशये स्थितः स क्लेदक इत्युच्यते। कुतः। अन्नसंघातक्लेदनात्कारणात् ॥ १६ ॥

क्लेदक श्लेष्मा—

वि०—जो कफ आमाशय में रहता है, वह अन्न-समूह का क्लेदन (गीला और मृदु) करने से 'क्लेदक श्लेष्मा' कहलाता है।

—रसबोधनात्।
बोधको रसनास्थायी—

स०—रसनःस्थायी जिह्वास्थो बोधक इत्युच्यते रसबोधनात् कारणात्।

बोधक श्लेष्मा—

वि०—जो कफ जिह्वा में रहता है, वह रस का ज्ञान कराने से 'बोधक श्लेष्मा' कहा जाता है।

—शिरःसंस्थोऽक्षतर्पणात् ॥१७॥
तर्पकः—

स०—शिरःस्थोऽक्षतर्पणात्तर्पकः शिरःस्थस्तर्पक इत्युच्यते। अक्षतर्पणाद्धेतोः ॥ १७ ॥

तर्पक श्लेष्मा—

वि०—जो कफ शिर में रहता हुआ इन्द्रियों का तर्पण करता है वह 'तर्पक श्लेष्मा' है ॥ १७ ॥

—सन्धिसंश्लेषाच्छ्लेषकः सन्धिषु स्थितः।

स०—संधिषु स्थितः श्लेष्मा श्लेषक इत्युच्यते। संधिसंश्लेषात् कारणात्।

श्लेषक श्लेष्मा—

वि०—जो कफ सन्धियों में स्थित रहकर सन्धियों का श्लेषण (स्नेहन और बन्धन) करता है, वह 'श्लेषक श्लेष्मा' है।

एवं दोषाणां स्थानान्युक्त्वोपसंहरन्नाह—

इति प्रायेण दोषाणां स्थानान्यविकृतात्मनाम् ॥ १८ ॥
व्यापिनामपि जानीयात्कर्माणि च पृथक् पृथक्।

स०—बाहुल्येन दोषाणामविकृतात्मनामप्रच्युत स्वभावानामित्युक्तप्रकाराणि स्थानानि व्यापिनामपि सकलशरीरचराणामपि ज्ञेयानि। तथा कर्माणि पृथक्पृथक् प्रत्येकं कृत्वा जानीयाद्वैद्यः ॥ १८ ॥

उपसंहार—

वि०—इस प्रकार सम्पूर्ण शरीर में फैले होने पर भी अविकृत दोषों के ये मुख्य स्थान तथा पृथक्-पृथक् कर्म जानने चाहिये ॥ १८ ॥

---

१. अवलम्बक, क्लेदक, बोधक, तर्पक, श्लेषक।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विकृतिरेषां वृद्धिः क्षयश्च। वृद्धिरपि द्विविधा चयप्रकोपभेदेन। दोषादिविज्ञानीये सामान्येन वृद्धिक्षयलक्षणमुक्तम्। संप्रति चयकोपरूपवृद्धिनिदानं संक्षेपेण सूचयन्नाह—

उष्णेन युक्ता रूक्षाद्या वायोः कुर्वन्ति सञ्चयम् ॥१९॥
शीतेन कोपमुष्णेन शमं स्निग्धादयो गुणाः।

स०—उष्णेन गुणेन विरुद्धेनोपहिता रूक्षादयः प्रथमाध्यायोक्ताः षड्वातगुणा वायोश्चयं कुर्वंति न कोपमुष्णस्य विरुद्धत्वात्। त एव रूक्षादयः शीतगुणोपहितास्तत्सदृशत्वाद्वायोः कोपं कुर्वंति। उष्णेन युक्ता स्निग्धादयो गुणा वायोः शमं कुर्वंति विपरीतत्वात् ॥ १९ ॥

वायु का सञ्चय, कोप तथा शमन—

वि०—चय-प्रकोपरूप वृद्धि—उष्णता से मिश्रित रूक्ष आदि गुण वायु का सञ्चय करते हैं, शीत से प्रकोप होता है और उष्णता से युक्त स्निग्ध आदि गुणों से शान्त होती है। ॥ १९ ॥

वक्तव्य—दोषों की अवस्था दो है; सम और विषम। विषम भी दो प्रकार की—वृद्धि और क्षय। इनमें वृद्धि भी दो प्रकार की सञ्चय और प्रकोप।

शीतेन युक्तास्तीक्ष्णाद्याश्चयं पित्तस्य कुर्वते ॥ २० ॥
उष्णेन कोपं मन्दाद्याः शमं शीतोपसंहिताः।

स०—एवं पित्तस्य शीतेन गुणेन युक्तास्तीक्ष्णादयो गुणाश्चयं कुर्वंति। एवं तीक्ष्णादयो गुणा उष्णेन सहिताः कोपं कुर्वंति। मंदादयो गुणाः शीतगुणयुक्ता शमं कुर्वंति विपरीतत्वात् ॥ २० ॥

पित्त का सञ्चय, कोप तथा शमन—

वि०—शीत से युक्त तीक्ष्ण आदि गुण पित्त का सञ्चय करते हैं, उष्णता से पित्त कुपित होता है और शीत से मिले मन्द आदि गुण पित्त का शमन करते हैं ॥ २० ॥

शीतेन युक्ताः स्निग्धाद्याः कुर्वते श्लेष्मणश्चयम् ॥२१॥
उष्णेन कोपं तेनैव गुणा रूक्षादयः शमम्।

स०—शीतगुणोपहिताः स्निग्धादयः कफस्य चयं कुर्वंति। उष्णेन युक्तास्त एव स्निग्धादयः कफस्य कोपं कुर्वंति। तेनैवोष्णेन युक्ता रूक्षादयः कफस्य च शमं कुर्वंति। कफस्य हि शीतगुणेन सदृशेनाऽपि स्निग्धादिगुणयुक्तेन स्त्यानत्वाच्चयः स्यात। विपरीतेनोष्णेन विलयनात्कोपः। स एवोष्णो यदा रूक्षादियुक्तो भवति तदा विपरीतत्वाच्छमनो भवति ॥ २१ ॥

कफ का सञ्चय, कोप तथा शमन—

वि०—शीत से युक्त स्निग्ध आदि गुण कफ का सञ्चय करते हैं; उष्णता से कफ कुपित होता है और उष्णता से युक्त रूक्ष आदि गुण कफ का शमन करते हैं ॥ २१ ॥

वक्तव्य—उष्णता से कफ का विलयन होने (पिघलने) के कारण प्रकोप होता है, यही उष्णता, रूक्ष आदि विपरीत गुणों से मिल कर कफ को शान्त करती है ॥

इदानीं चयादीनां लक्षणान्याह—

चयो वृद्धिः स्वधाम्न्येव प्रद्वेषो वृद्धिहेतुषु ॥ २२ ॥
विपरीतगुणेच्छा च—

स०—स्वधाम्न्यात्मीये स्थाने दोषस्य या वृद्धिः स चय उच्यते। चितस्य दोषस्य लिंगमाह। यदा हि वातश्चितो भवति तदा रूक्षादिषु तत्समानेषु प्रद्वेषः स्यात। तद्विपरीतगुणेषु स्निग्धादिष्वभिलाषः स्यात्। एवं कफपित्तयोश्चितयोर्व्याख्या। ननु प्रद्वेषो वृद्धिहेतुष्वित्येकमेव लक्षणं दोषचयसत्तानुमापकं कर्तुं न्याय्यम्। यदि वा विपरीतगुणेच्छा चेत्येतत्। किं द्वयोरुपादानेन। अत्रोच्यते। कदाचिदचितोऽपि दोषो वाताख्यः स्वप्रमाणस्थः क्षीणो वा यस्य स वातवृद्धिहेतून् रूक्षादीन्न द्वेष्ट्यपि तु तानिच्छति। सात्म्यवशात्। यथा गर्भिणी स्त्री दोहदवशात्। तदेवं व्यभिचारदर्शनात प्रद्वेषो वृद्धिहेतुषु विपरीतगुणेच्छा चेति द्वयमपि कर्तव्यम। तेन यदा तुल्यकालं मनुजस्य वातसमानगुणेषु तद्वृद्धिहेतुषु च प्रद्वेषो जायते वातगुणप्रतिपक्षेषु तत्क्षपणहेतुषु चाभिलाषस्तदा सम्यक् निश्चीयते वातस्योपचितिरिति द्वयमप्येतदुक्तम् ॥ २२ ॥

चय का लक्षण—

वि०—चय के लक्षण—दोष की अपने स्थान में ही जो वृद्धि होती है, उसका नाम 'चय' है। इससे वृद्धि के कारणों में द्वेष होता है और विपरीत गुण की इच्छा होती है ॥ २२ ॥

—कोपस्तून्मार्गगामिता।

लिङ्गानां दर्शनं स्वेषामस्वास्थ्यं रोगसम्भवः ॥ २३ ॥
स्वस्थानस्थस्य समता विकारासम्भवः शमः।

स०—उन्मार्गगामिता स्वस्थानं त्यक्त्वा दोषस्य यत्पुनर्मार्गांतरगमनं स कोपः। कोपस्य लिंगमाह। लिंगानां स्वेषां यथायथं दर्शनमुद्भवो वातादीनां कुपितानां यानि लिंगानि दोषादिविज्ञानीयेऽभिहितानि वातव्याधिनिदाने च वक्ष्यंते तेषां दर्शनमुपलब्धिः ॥ २३ ॥

कोप तथा शम के लक्षण—

वि०—दोषों का उन्मार्ग (अपने स्थान से भिन्न अन्य स्थान) में जाना ही कोप है। इसमें दोष अपने-अपने लक्षणों को दिखाते (प्रकट करते) हैं; शरीर में अस्वस्थता होती है और रोग उत्पन्न होता है। दोष का अपने स्थान में अपने प्रमाण में रहना और रोग उत्पन्न न होना 'शम' कहा जाता है ॥ २३ ॥

वक्तव्य—सुश्रुत ने विकृत दोषों की छः अवस्थायें कही हैं—'सञ्चयं च प्रकोपं च प्रसरं स्थानसंश्रयम्। व्यक्तिं भेदं च यो वेत्ति दोषाणां स भवेद् भिषक् ॥' (सु. सू. अ. २१।३६) इसका लाभ 'सञ्चयेऽपहृता दोषा लभन्ते नोत्तरा गतीः। ते तूत्तरासु गतिषु भवन्ति बलवत्तराः।'[1]

१. हेमाद्रि ने प्रकोप के भेदरूप मे सुश्रुतोक्त प्रसर आदि चारों का समन्वय करने का प्रयास किया है। यथा—उन्मार्गगमन = प्रसर;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु ॥ २४ ॥
वर्षादिषु तु पित्तस्य, श्लेमणः शिशिरादिषु ।

स०—ग्रीष्मादिषु त्रिषु कालेषु ग्रीष्मवर्षाशरत्सु वातस्य चयप्रकोपप्रशमा भवंति। तथा वर्षादिषु त्रिषु वर्षाशरद्धेमंतेषु पित्तस्य चयप्रकोपप्रशमा भवंति। तथा शिशिरादिषु त्रिषु शिशिरवसंतग्रीष्मेषु श्लेष्मण श्चयप्रकोपप्रशमा भवंति॥२४॥

वातादि दोषों का चयादि काल—

वि०—ग्रीष्म, वर्षा और शरद इन तीनों ऋतुओं में वायु का क्रमशः संचय, प्रकोप और शमन होता है। वर्षा, शरद और हेमन्त में पित्त का क्रमशः संचय, प्रकोप और प्रशमन होता है; शिशिर, वसन्त और ग्रीष्म में कफ का क्रमशः संचय, प्रकोप और प्रशमन होता है ॥ २४ ॥

ननु मरुतो ग्रीष्मे चयो न युक्तो यतस्तस्मिन्काले लघुरूक्षा ओषधयो भवंति। तथा वर्षासु पित्तचयो न युक्तो जलानामौषधीनां चाम्लपाकत्वात्। तथा श्लेष्मणः शिशिरे चयो न युक्तस्तदा ह्यप ओषधयश्च स्निग्धा भवंति कालश्च शीत इति कोप एवोपपन्न इत्यस्मिन् पर्यनुयोग इदमाह—

चीयते लघुरूक्षाभिरोषधीभिः समीरणः ॥ २५ ॥
तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति ।
अद्भिरम्लविपाकाभिरोषधीभिश्च तादृशम् ॥ २६ ॥
पित्तं याति चयं कोपं न तु कालस्य शैत्यतः ।
चीयते स्निग्धशीताभिरुदकौषधिभिः कफः ॥ २७ ॥
तुल्येऽपि काले देहे च स्कन्नत्वान्न प्रकुप्यति ।

स०—ग्रीष्मकाले वातो लघुरूक्षाभिरोषधीभिर्देहे चादानकालस्वाभाव्यात्तद्विधे लघुरूक्षः समीरण इति समानगुणत्वात्पवनस्य कोपः प्राप्तः स निषिध्यते कालस्यौष्ण्यादित्यनेन। एवं पित्तस्य वर्षासु कोपः नतु कालस्य शैत्यत इत्यनेन निषिध्यते ॥ २५-२७ ॥

दोष-चय का कारण—

वि०—ग्रीष्म काल में—लघु-रूक्ष गुणवाली औषधियों से (खान-पान से) लघु रूक्ष गुणवाली वायु (कालस्वभाव से) लघु-रूक्ष शरीर में संचित होती है, परन्तु ग्रीष्मकाल के उष्ण होने से कुपित नहीं होती वर्षाऋतु में जल का अम्लपाक होने से और औषधियों का भी अम्लपाक हो जाने से उसी प्रकार का (अम्लपाकी) पित्त संचित होता है, परन्तु वर्षाकाल के शीतल होने से कुपित नहीं होता। शिशिर में स्निग्ध, शीतल आदि जल और औषधियों से कफ संचित होता है। परन्तु काल और शरीर के समान (स्निग्ध और शीत) होने पर भी-जमा हुआ होने के कारण कुपित नहीं होता [जिस प्रकार कि शीत से जमा घी कुपित नहीं होता] ॥[2] २५-२७ ॥

इति कालस्वभावोऽयमाहारादिवशात्पुनः ॥२८॥
चयादीन् यान्ति सद्योऽपि दोषः कालेऽपि वा न तु ।

स०—इति पूर्वोक्तोऽयं वाय्वादिचयादिः कालस्य स्वभाव। आहारादिवशादन्नपानसामर्थ्यात्पुनर्दोषाः सद्योऽपि तत्क्षणादेव कालमनपेक्ष्यैव चयादींश्चयप्रकोपप्रशमान् यांति। तस्मादेव चाहारादिवशात् यथास्वं चयादिकालेऽपि वा दोषा न तु चयादीन् यांति। तस्मात्कालादाहारादीनां प्राधान्यमित्यर्थः। आहारादीत्यत्राऽऽदिशब्देन रसायनवाजीकरणवमनविरेचनादयो गृह्यंते ॥ २८ ॥

दोष-चयादि के अन्य कारण—

वि०—इस प्रकार संचय, प्रकोप और शमन काल के स्वभाव के कारण होता है। आहार आदि (विहार-देश) के कारण-दोषों का तुरन्त ही काल न होने पर भी सञ्चय आदि हो जाता है और काल होने पर भी संचय आदि नहीं होता। अर्थात् प्रकोपक आहार आदि के सेवन से अकाल में भी संचय आदि हो जाता है तथा शामक आहार-सेवन से प्रकोप आदि का काल होने पर भी प्रकोप आदि नहीं होता।

एवं दोषाणां चयादीन् प्रदर्श्य व्याप्तिनिवृत्ति वैचित्र्यं कोपजं दर्शयितुमाह—

व्याप्नोति सहसा देहमापादतलमस्तकम् ॥ २९ ॥
निवर्तते तु कुपितो मलोऽल्पाल्पं जलौघवत् ।

स०—मलः कुपितः सहसा शीघ्रमेवापादतलमस्तकं व्याप्नोति। पादतलादारभ्य यावन्मस्तकमित्यर्थः निवर्तते पुनरल्पाल्पं स्तोकं स्तोकमिति। यथा गिरिनद्यादीनां जलपूरः समविषमं सहसैव व्याप्नोति। निवर्तते तु स्तोकं स्तोकमिति ॥ २९ ॥

दोष की व्याप्ति तथा निवृत्ति—

वि०—दोष—कुपित मल (दोष) एकदम शिर से लेकर पैर तक सारे शरीर में फैल जाते हैं; परन्तु पानी के पूर की भाँति थोड़ा-थोड़ा कर लौटते हैं ॥ २९ ॥

वक्तव्य—नदी में पानी का पूर तो वेग से आ जाता है, परन्तु वापिस-थोड़ा-थोड़ा कर जाता है; इसी प्रकार दोष फैल तो तुरन्त जाते हैं, परन्तु लौटते थोड़ा-थोड़ा करते हैं।

ननु प्रतिरोगं निदानलक्षणचिकित्सितमानंत्याद्वक्तुमशक्यं तच्चाऽविदन्न कश्चिदत्र तथा यत्नं कुर्यादित्याशंक्याह—

नानारूपैरसङ्ख्येयैर्विकारैः कुपिता मलाः ॥ ३० ॥
तापयन्ति तनुं तस्मात्तद्धेत्वाकृतिसाधनम् ।
शक्यं नैकैकशो वक्तुमतः सामान्यमुच्यते ॥ ३१ ॥

स्वलक्षणों का प्रकट करना = स्थानसंश्रय; अस्वास्थ्य—व्यक्ति और रोगसम्भव = भेद।

२. निदान, दूष्य और दोष तीनों समान गुणवाले होने पर प्रकोप होना ही अधिक सम्भावित होता है फिर भी ग्रीष्म में वायु, वर्षा में पित्त और शिशिर में कफ का प्रकोप न होकर सञ्चय मात्र होता है उसका कारण यहाँ बतलाया गया है कि ग्रीष्म में उष्णता, वर्षा में शीतता और शिशिर में कफ की स्कन्नता (जमा होना) प्रकोप में बाधक होती है अतः संचयमात्र होता है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—यत्तदोर्नित्यसंबंधाद्यस्मादिति लभ्यते। यस्मान्नानारूपैरनेकप्रकारैरसंख्येयैर्गणनां समतीतैर्विकारै उर्वरैर्मला वातपित्तश्लेष्माणः कुपितास्तनुं देहं तापयंति दुःखयंति तस्मात्तद्धेत्वाकृतिसाधनं शक्यं नैकैकशो वक्तुमयमस्य हेतुरियमाकृतिरिदंलक्षणमिदमस्य साधनं चिकित्सितमिति एकैकशः वक्तुं न शक्यमतः सामान्यमुच्यते ॥ ३०-३१ ॥

दोषकोप के अनेक कारण—

वि०—कुपित हुए मल—अनेक प्रकार के एवं अगणित विकारों से शरीर को दुखी करते हैं। इसलिये एक-एक रोग को हेतु, लक्षण और चिकित्सा से यहाँ पर कहना असम्भव है, अतः सामान्य रूप से सबको कहा जाता है ॥ ३०-३१ ॥

अत्रैव हेत्वंतरमाह—

दोषा एव हि सर्वेषां रोगाणामेककारणम्।
यथा पक्षी परिपतन् सर्वतः सर्वमप्यहः ॥ ३२ ॥
छायामत्येति नात्मीयां यथा वा कृत्स्नमप्यदः।
विकारजातं विविधं त्रीन् गुणान्नातिवर्तते ॥ ३३ ॥
तथा स्वधातुवैषम्यनिमित्तमपि सर्वदा।
विकारजातं त्रीन् दोषान्—

स०—सर्वेषां रोगाणां यस्माद्दोषा एवैककारणम्। एकं प्रधानं च तत्कारणं निमित्तमेककारणम्। यदि वा सर्वेषां रोगाण दोषा एकं तुल्यं कारणं समानं कारणमित्यर्थः। एवशब्दोऽवधारणे। दोषा एव कारणं नाऽपरं किंचिद्वस्तुजातम्। अत्र दृष्टांतमाह। पक्षी प्राचिकादिर्यथा सर्वतः समंतात्परिपतन् भ्रमन् सर्वमप्यहः सकलमपि दिवसमात्मीयां छायां नाऽत्येति नाऽतिक्रामति। तया विना क्षणमप्यसौ नोपलभ्यत इत्यर्थः तथाऽन्यदपि निदर्शनमाह। यथा वेत्यादि। तथा वा कृत्स्नं निरवशेषमेतद्विकारजातं स्थावरजंगमादिभेदभिन्नं जरायुजांडजादिभेद भिन्नं वा विविधं नानाप्रकारं त्रीन् गुणान् सत्त्वरजस्तःसंज्ञान्नाऽतिवर्तते नात्येति। त्रिभिरेतैर्विरहितं न जातुचिद्भवतीत्यर्थः। तथा स्वधात्वित्यादि। धातवो दोषधातुमलाः शरीरधारणसामान्यात् तेषां वैषम्यं स्वलक्षण तोऽन्यथात्वंस्वधातुवैषम्यं निमित्तं यस्य तद्विकारजातं त्रीन् दोषान्नाऽतिक्रामति। त्रिदोष रहितं न संभवतीत्यर्थः। धातुवैषम्यं च प्रतिरोगमन्यादृशत्वान्नानाविधम्। यत्तु येन धातुवैषम्येण जन्यते तत्तस्य स्वं स्वीयं भवति। येषां तु रोगाणां देव ग्रहादि निमित्तं न तेषु तथा दोषानुबंधः। आगंतुकत्वात्। आगंतुकनिजयोर्ह्ययमेव भेदः। यदागंतुकेषु प्रथमं रोगोद्भूतिः पश्चाद्दोषानुबंधो निजेषु प्राग्दोषानुबंध इति। ये च व्याचक्षते स्वे च ते धातवश्च तेषां वैषम्यमिति। तेषां नायमर्थः प्रतिपादितः स्यात्। स्वग्रहणं चाऽतिरिच्यते। यतः शरीरांतरावस्थायिनो दोषा वातादयः शरीरांतरे रोगं जनयितुं नालम्। तस्मात्पूर्वमेव व्याख्यानं श्रेयः ॥ ३२-३३ ॥

दोष ही रोगों के मुख्य कारण—

वि०—सब रोगों के एक (समवायी) कारण दोष ही हैं। जिस प्रकार पक्षी सब ओर सारे दिनभर उड़ता हुआ भी अपनी छाया को नहीं छोड़ता अथवा जिस प्रकार सम्पूर्ण स्थावरजंगम रूप से नाना प्रकार के जरायुज, अण्डज, उद्भिज्ज, स्वेदज, विकार-समूह—सत्त्व, रज, तम इन तीन गुणों से अलग नहीं हो सकते; उसी प्रकार अपने धातुओं की विषमता से उत्पन्न रोगसमूह सदा वात-पित्त-कफ तीन दोषों का अतिक्रमण नहीं कर सकते ॥ ३२-३३ ॥

—तेषां कोपे तु कारणम् ॥ ३४ ॥
अर्थैरसात्म्यैः संयोगः कालः कर्म च दुष्कृतम्।
हीनातिमिथ्यायोगेन भिद्यते तत्पुनस्त्रिधा ॥ ३५ ॥

स०—तेषां वातादीनां कोपे कारणमसात्म्यैरनुचितैरर्थैः शब्दस्पर्शरूपरसगंधाख्यैः श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानामिंद्रियाणां यः संयोगस्तथा कालः शीतोष्णवर्षलक्षणो दुष्टस्तथा कर्म चैहिकमन्यजन्मजं च यद् दुष्कृतमशुभमेतत्त्रयं दोषाणां कोपे हेतुः। तुशब्दः समुच्चये। न कुवलं रुक्षादयो वातादीनां कोपकारणं यावदसात्म्येंद्रियार्थसंयोगादिरपि। एतच्च पूर्वोक्तं दोषकोपकारणमसात्म्येंद्रियार्थसयोगादिभेदेन त्रिधा भिन्नमपि पुनर्भूयस्त्रिधा त्रिप्रकारमपि भिद्यते कथम्। हीनमिथ्यातियोगेन ॥ ३४ ॥

दोष-प्रकोप के संक्षिप्त कारण—

वि०—इन दोषों के कुपित होने के कारण—असात्म्य शब्दादि विषयों के साथ श्रोत्र आदि इन्द्रियों का सम्बन्ध होना; काल-शीतोष्णवर्षालक्षण; ऐहिक या पूर्वजन्म कृत अशुभ कर्म; ये तीनों के प्रकोप में कारण हैं। इनमें प्रत्येक कारण हीनयोग, अतियोग और मिथ्यायोग भेद से फिर तीन प्रकार का है ॥ ३४-३५ ॥

तानेव हीनमिथ्यातियोगान्दर्शयति।

हीनोऽर्थेनेन्द्रियस्याल्पः संयोगः स्वेन नैव वा।
अतियोगोऽतिसंसर्गः, सूक्ष्मभासुरभैरवम् ॥३६॥
अत्यासन्नातिदूरस्थं विप्रियं विकृतादि च।
यदक्ष्णा वीक्ष्यते रूपं मिथ्यायोगः स दारुणः ॥३७॥
एवमत्युच्चपूत्यादीनिन्द्रियार्थान् यथायथम्।
विद्यात्—

स०—अर्थेन शब्दादिना स्वेनेंद्रियस्य श्रोत्रादि र्हीनोऽल्पो यः संयोगः स हीनयोगः नैव वेति। अथवा सर्वसर्विकया तेनार्थेन न संयोगः सोऽपि हीनो योगः तस्यैवेंद्रियस्य स्वेनार्थेन योऽतिसंसर्गोऽतिसेवालक्षणः स तस्य स्वेनार्थेनातियोगः। यच्च सूक्ष्मभासुरभैरवमित्यादि यदक्ष्णा वीक्ष्यते नयनेनालोक्यते स तस्य चक्षुरिंद्रियस्य स्वेनार्थेन मिथ्यायोगः। एवमनया दिशा सूक्ष्मभासुरभरवम्। अत्यासन्नातिदूरस्थं विप्रियं विकृतादि च। यदक्षणा वीक्षयते रूपं मिथ्यायोगः स दारुणः। तिमिरादिहेतुत्वात्। एवमनया चक्षुषो रीत्याऽन्यानपींद्रियार्थान् यथास्वमिंद्रियाणामत्युच्चपूत्यादीन् मिथ्यायोगरूपान्विद्यात्। यदाऽत्युच्चपरुषेष्टविनाशभीषणाद्य-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निष्टशब्दः श्रोत्रेन्द्रियेण गृह्यते तदा श्रोत्रेन्द्रियस्य स्वेनार्थेन शब्दाख्येन मिथ्यायोगः। यदा पूतिविष्ठादिनिष्टो गंधो घ्राणेंद्रियेण गृह्यते तदा घ्राणेंद्रियस्य स्वेनार्थेन गंधाख्येन मिथ्यायोगः। यदा स्नानानुलेपनादीनां शीतोष्णादीनां च स्पृश्यानामक्रमसेवनेन स्पर्शः स्पर्शनेंद्रियेण गृह्यतेतदा स्पर्शनेंद्रियस्य स्वेनार्थेन स्पर्शाख्येन मिथ्यायोगः। तथा रसनेंद्रियेण यो रसोऽपरिपाट्या युज्यते। तथाऽपथ्यद्रव्यनिविष्टो यो रसो रसनेंद्रियेण गृह्यते स तस्य रसनेंद्रियस्य स्वेन रसाख्येनाऽर्थेन मिथ्यायोगः॥ ३६-३७॥

हीन, मिथ्या आदि योगों के लक्षण—

वि०—हीनयोग—इन्द्रिय का अपने विषय के साथ अल्प संयोग या सर्वथा संयोग न होना हीनयोग है। इन्द्रिय का अपने भासुर विषय के साथ अतिशय संयोग अतियोग सूक्ष्म,(अतिदीप्त), भैरव (भयंकर), अतिसमीप के, बहुत दूर है। के अप्रिय और विकृत आदि रूपों को आँख से देखना कष्टकर मिथ्यायोग है। आँख की भाँति दूसरी इन्द्रियों के भी विषयों का मिथ्यायोग जानना चाहिये। यथा—कान से अति उच्च शब्द सुनना कान का, नाक से दुर्गन्ध को सूँघना नाक का मिथ्यायोग है॥ ३६-३७॥

—कालस्तु शीतोष्णवर्षाभेदात्त्रिधा मतः ॥३७॥
स हीनो हीनशीतादिरतियोगोऽतिलक्षणः।
मिथ्यायोगस्तु निर्दिष्टो विपरीतस्वलक्षणः ॥३८॥

स०—कालः पुनः शीतोष्णवर्षभेदेन त्रिधा त्रिप्रकारो मतो मुनीनाम्। तत्र हेमंतशिशिरलक्षणः शीतः। उष्णो वसंतग्रीष्मलक्षणः। प्रावृड्लक्षणो वर्षाख्यः स, च कालो हीनशीतादिर्हीनयोगलक्षणः। अतियोगोऽतिमात्रयोगलक्षणः। विपरीतं स्वं शीतोष्णवर्षाख्यं लक्षणं यस्य कालस्य स विपरीतस्वलक्षणो मिथ्यायोगः। गुणगुणिनोरभेदोपचारात् काल एवमुच्यते। तत्र यथा हेमंते शीतस्याल्पत्वं हीनो योगस्तस्मिन्नेव हेमंतेऽतिशैत्यमतियोगस्तस्मिन्नेव हेमंत औष्ण्यं मिथ्यायोगः। उपलक्षणं चेदम्। एवं शरद्वसंतयोरपि यन्मंद वर्षोष्णत्वं स्वलक्षणं तद्यदा हीनतरं स्यात् सोऽपि हीनयोगः एवमतियोगायोगयोरपि योज्यम्॥ ३८-३९॥

काल का त्रैविध्य तथा हीनादि योग—

वि०—काल—शीत, उष्ण और वर्षा के भेद से तीन प्रकार का होता है। इनमें अपने लक्षणों से हीन होना हीनयोग है, और अपने लक्षणों से अधिक होना अतियोग है। काल का अपने कहे हुए लक्षणों से विपरीत होना मिथ्यायोग होता है॥

कायवाक्चित्तभेदेन कर्मापि विभजेत्त्रिधा।
कायादिकर्मणां हीना प्रवृत्तिर्हीनसंज्ञिका ॥४०॥
अतियोगो निवृत्तिस्तु, वेगोदीरणधारणम्।
विषमाङ्गक्रियारम्भपतनस्खलनादिकम् ॥४१॥
भाषणं सामिभुक्तस्य रागद्वेषभयादि च।
कर्म प्राणातिपातादि दशधा यच्च निन्दितम् ॥४२॥
मिथ्यायोगः समस्तोऽसाविह वाऽमुत्र वा कृतम्।

स०—यथा कालस्त्रिधा निरूपितस्तथा कर्मापि कायवाक्चित्तभेदेन त्रिप्रकारं विभजेत्। तथा कायकर्मणस्तथा वाक्कर्मणस्तथा चित्तकर्मणो हीना या प्रवृत्तिः स हीनसंज्ञको योगः। अतिप्रवृत्तिस्त्वतियोगः। कायादिकर्मणो मिथ्यायोगमधिकृत्याह। वेगोदीरणधारणमित्यारभ्य यावत्पतनस्खलनादिकं यदेतत् कायिकं कर्म तस्य कर्मण एवंरूपस्य या वृत्तिः स कायकर्मणो मिथ्यायोगः। विषमांगैः क्रिया कर्म विषमारंभ उभयलोकविरुद्धः। विषमपतनं विषमस्खलनम्। आदिशब्देन विषमगमनादीनां ग्रहणम्। सामिभुक्तस्याऽर्धभुक्तस्य यद्भाषणं जल्पनमेवंरूपा या प्रवृत्तिः स वाक्कर्मणो मिथ्यायोगः। रागद्वेषभयादि यदेतन्मानसं कर्म तस्य कर्मण एवंरूपा या प्रवृत्तिः स चित्तकर्मणो मिथ्यायोगः। तथा दिनचर्याध्यायोक्तं यत्प्राणातिपातादि दशधा दशप्रकारं कर्म निंदितमशुभं निर्दिष्टं हिंसास्तेयेत्यादिना ग्रंथेन तच्च यथायथं कायवाक्चित्तकर्मणां मिथ्यायोगः। समस्तोऽसाविह चामुत्र कृतमस्मिन् लोके कृतमन्यत्र वा लोके कृतमाचरितं सर्व एव मिथ्यायोगः॥ ४०-४२॥

कर्म का त्रैविध्य तथा हीनादि योग—

वि०—कायिक, वाचिक और मानसिक भेद से कर्म तीन प्रकार का होता है। इनमें कायिक आदि कर्मों की हीन प्रवृत्ति-हीनयोग और इनकी अतिप्रवृत्ति अतियोग है। उपस्थित वेगों को रोकना, विषमरूप में स्थित अङ्गों से क्रिया का आरम्भ करना; गिरना; फिसलना आदि, भोजन के बीच में बोलना, राग, भय, द्वेष आदि कर्म तथा दिनचर्या में कहे-प्राणातिपातादि दस निन्दित कर्म-ये सब मिथ्यायोग हैं, तथा इस जन्म में या पूर्वजन्म में किया जो निन्दित कर्म है, वह सब मिथ्यायोग है[1]॥ ४०-४२॥

निदानमेतद्दोषाणां कुपितास्तेन नैकधा ॥४३॥
कुर्वन्ति विविधान् व्याधीन् शाखाकोष्ठास्थिसन्धिषु।

स०—निदानमेतद्दोषाणां कोपे इति वाक्यशेषः। कुपितास्तेन निदानेन नैकधा अनेकप्रकारेण व्याधीन् विविधान् नानाप्रकारान् कुर्वंति। कुपिता दोषा इति विभक्ति-

१. चरक ने भी संक्षेपतः सभी रोगों के कारण यही तीन बताए हैं किन्तु दुष्कृत कर्म के स्थान पर 'प्रज्ञापराध' (बुद्धिदोष) कहा है। वस्तुतः बुद्धिदोष से ही मनुष्य अशुभ कर्म करता है अतः 'प्रज्ञापराध' कारण को ही मानना युक्तिसंगत है और दुष्कर्म का उसी के भीतर समावेश हो जाता है। पूर्वोक्त अर्थ, काल और कर्म का मिथ्या, हीन और अतियोग रोग का और सम (उचित) योग स्वास्थ्य का कारण होता है। इस प्रकार (३ × ३ = ९) नौ प्रकार के रोगों के कारण होते हैं। पुनः इनके सूक्ष्म भेद करने पर वे अगणित हो जाते हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विपरिणामेन संबंधः। क व्याधीन् कुर्वंतीत्याह। शाखाश्च कोष्ठश्चाऽस्थीनि च संधयश्च तेषु ॥ ४३ ॥

दोषों के निदान—

वि०—दोषों का यह निदान (कारण) है। इस कारण से कुपित हुए दोष शाखा, कोष्ठ एवं अस्थि की सन्धियों में स्थित होकर अनेक-नाना प्रकार के रोगों को उत्पन्न करते हैं ॥ ४३ ॥

शाखेति किमुच्यत इत्याह—

शाखा रक्तादयस्त्वक् च बाह्यरोगायनं हि तत् ॥४४॥
तदाश्रया मषव्यङ्गगण्डालज्यर्बुदादयः।
बहिर्भागाश्च दुर्नामगुल्मशोफादयो गदाः ॥४५॥

स०—शाखा रक्तादयः षड्धातवस्त्वक् चैतद्बाह्यं रोगायनं बाह्यानां रोगाणामयनं स्थानम्। हिशब्दो यस्मादर्थे। यस्माद्बाह्यानां रोगाणामयनमतस्तदाश्रया मषव्यंगादयो रोगा बहिर्भागा उच्यंते। आदिशब्देन विसर्पविद्रधिप्लीहकुष्ठादयो गृह्यंते। दुर्नामेत्यादि। बहिर्भागाश्चेत्यत्र चशब्दो भिन्नक्रमः शोफादय इत्यस्मादनंतरं द्रष्टव्यः। दुर्नामगुल्मशोफादयश्च बहिर्भागा इत्यर्थः ॥ ४४–४५ ॥

बाह्य मार्ग के रोग—

वि०—बाह्य मार्ग—शाखा शब्द से रक्तादि धातु और त्वचा लेनी चाहिये, ये रोग के बाह्य मार्ग हैं। इनमें होनेवाले रोग मषक, व्यङ्ग, गण्ड, अलजी, अर्बुद आदि हैं तथा बहिर्भाग में होने-वाले अर्श, गुल्म और शोफ आदि रोग भी बहिर्मार्गज कहलाते हैं। [ये अन्तर्मार्ग में भी होते हैं।] ॥ ४४–४५ ॥

अन्तःकोष्ठो महास्रोत आमपक्वाशयाश्रयः।
तत्स्थानाश्छर्दतीसारकासश्वासोदरज्वराः ॥४६॥
अन्तर्भागं च शोफार्शोगुल्मवीसर्पविद्रधिः।

स०—कोष्ठः कथ्यते अंतः स महास्रोत आमपक्वाशयाश्रयः। तत्स्थाना अंतर्भागाश्रयाश्छर्द्यादयो रोगाः। न केवलास्त एव छर्द्यादयोंऽतर्भागाश्रया यावच्छोफार्शोगुल्मवीसर्पविद्रध्यप्यंतर्भागं च शोफादीनां विद्रध्यंतानां समाहारद्वंद्वनिर्देशः ॥ ४६ ॥

कोष्ठमार्ग के रोग

वि०—कोष्ठ को अन्तर्मार्ग कहते हैं; इसी को महास्रोत कहते हैं, यह आमाशय और पक्वाशय में आश्रित है। इस अन्तर्मार्ग में होने वाले रोग-वमन, अतीसार, कास, श्वास, उदर और ज्वर आदि हैं और अन्तर्भाग में होने वाले शोफ, अर्श, गुल्म, विसर्प विद्रधि आदि भी अन्तर्मार्गज कहलाते हैं ॥ ४६ ॥

इदानीं मध्यमं रोगमार्गं वक्ति—

सिरोहृदयबस्त्यादिमर्माण्यस्थ्नां च सन्धयः ॥४७॥
तन्निबद्धाः सिरास्नायुकण्डराद्याश्च मध्यमः।
रोगमार्गः स्थितास्तत्र यक्ष्मपक्षवधार्दिताः ॥४८॥
मूर्धादिरोगाः सन्ध्यस्थित्रिकशूलग्रहादयः।

स०—शिरोहृदयादीनि मध्यमो रोगमार्गः। अस्थ्नां च संधय इत्येवं निर्देशेनेदं बोधयति। नाऽत्र द्वयं विवक्षितमस्थीनि च संधयश्चेति किं तर्ह्यस्थ्नां संबंधिनः संधय इति। संधयो ह्यन्येऽपि संति। तथा च वक्ष्यति मांसास्थिस्नायुधमनीसिरासंधिसमागम इति। तन्निबद्धास्तेष्वस्थिषु निबद्धाः संलग्ना इत्यर्थः। सिराः स्नायवः कंडराश्चादयो येषां धमनीकूर्चादीनां ते। च शब्दात्पूर्वोक्ताश्च। तत्र मध्यमे रोगमार्गे यक्ष्मादयो गदास्त्रिकशूलग्रहाद्यंताः। मूर्धादीत्यत्राऽदिशब्देन हृदयबस्त्यादिपरिग्रहः। संध्यस्थित्रिके शूलानि सन्ध्यस्थित्रिके ग्रहा इति योऽयम्। आदिशब्देन पक्षग्रहादयो वातविकारा गृह्यंते। यक्ष्मणोऽत्र मर्मास्थिसन्ध्यधिष्ठानत्वात्पूर्वं निर्देशः। वक्ष्यतिहि। तैरुदीर्णोऽनिलः पित्तं कफं चोदीर्य सर्वतः। शरीरसंधीनाविश्य तान् शिराश्च प्रपीडयन्नित्यादि ॥ ४७–४८ ॥

मध्यम रोग-मार्ग—

वि०—मध्यम रोगमार्ग—शिर, हृदय, बस्ति आदि मर्म और अस्थियों की सन्धियाँ यथा इनसे सम्बन्धित सिरा, स्नायु, कण्डरा आदि मध्यम रोगमार्ग हैं। इनमें होने वाले रोग-यक्ष्मा, पक्षवध, अर्दित, शिर आदि के रोग, सन्धि, अस्थि और त्रिक इनका शूल तथा स्तब्धता आदि होते हैं ॥ ४७–४७ ॥

इदानीं वायोः कर्माण्याह—

स्रंसव्यासव्यधस्वापसादरुक्तोदभेदनम् ॥४९॥
सङ्गाङ्गभङ्गसङ्कोचवर्तहर्षणतर्पणम् ।
कम्पपारुष्यसौषिर्यशोषस्पन्दनवेष्टनम् ॥५०॥
स्तम्भः कषायरसता वर्णः श्यावोऽरुणोऽपि वा।
कर्माणि वायोः—

स०—स्रंसो हन्वादिसंधेर्भ्रंशः। व्यसनं व्यासो विक्षेपण मंगप्रत्यंगादेर्यथाऽऽक्षेपकादिषु। व्यधस्ताडनमिव मुद्गरादिना। स्वापः सुप्तिः कर्मण्यचैतन्यम्। सदनं सार्वोऽगानां क्रियास्वसामर्थ्यम्। रुक् सततं शूलम्। तोदो विच्छिन्नं शूलम्। भेदनं भेदो विदारणमिवांगस्य। संगो मूत्रपुरीषादेः स्वाशयेभ्योऽनिःसारो वाक्संगादिश्च अंगानां जंघोरुप्रभृतीनां भंग इव भंगश्चूर्णनमिवांगभंगः। संकोचनं संकोचः शिरादीनाम्। वर्तनं वर्तः पुरीषादीनां पिंडीकरणम्। हर्षण रोम्णामूर्ध्वीभावः तर्षणं तर्षस्तृट्। तथा कंपोऽतिवेपनम्। पारुष्यम्। परुषत्वम् सौषिर्यमस्थ्नाम्। शोषः शोषणम्। स्पंदनं हि किंचिच्चलनम्। वेष्टनं ग्रथनमिवांगस्य। स्तंभो बाहुजंघादीनामाकुंचनाद्यभावः। कषायरसता कषायास्वादत्वम्। वर्णः श्यावोऽरुणोऽपि वा। श्मावारुणौ वर्णावित्यर्थः। एतानि वायोः कर्माणि ॥ ४९–५० ॥

वायु के कर्म—

वि०—वायु के कार्य—स्रंस (सन्धि आदि का खिसकना);

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्यास (फैलना-खुलना); व्यध (चुभने जैसी पीड़ा); स्वाप (संज्ञानाश), साद (शिथिलता), पीड़ा, सुई चुभने की पीड़ा, फटने की पीड़ा; अङ्ग का जुड़ जाना, और टूटना, अङ्ग का सिकुड़ जाना; उलटना या मुड़ जाना; रोमांच, तर्षण (प्यास); कम्पन, कर्कशता, खोखलापन, सूखना, स्पन्दन, (फड़कन), ऐठन; जकड़ाहट, मुख में कसैलापन; श्याव या अरुण वर्ण का होना—ये वायु के कार्य हैं ॥ ४९–५० ॥

अथ पित्तस्याह—

—पित्तस्य दाहरागोष्मपाकिता: ॥५१॥
स्वेद: क्लेद: स्रुति: कोथ: सदनं मूर्च्छनं मद: ।
कटुकाम्लौ रसौ वर्ण: पाण्डुरारुणवर्जित: ॥५२॥

स०—दाहादीनि पित्तस्य कर्माणि । सर्वांगीणस्तापो दाह: । रागो लौहित्यम् । ऊष्मा औष्ण्यम् । पाकिता पाककर्तृत्वमजीर्णेष्वन्ने च । स्वेदनं स्वेद: । क्लेद: शोणितादिषु विकार: । स्रुति: स्राव: । कोथ: क्लेदस्यातिशयेऽविच्छिन्नत्वम् । सदनं साद: । मूर्च्छनं भ्रम: । मदो वक्ष्यमाणो रोगविशेष: । रसास्वादौ कटुकाम्लौ । वर्ण: पांडुरारुणाभ्यामन्य: । शुक्ल-लोहितवर्णनिषेधेन तच्छेषनानावर्णसंभव: सूच्यते ॥ ५१–५२ ॥

पित्त के कर्म—

वि०—पित्त के कार्य—जलन, रक्तिमा, उष्णता, पकना, पसीना, क्लिन्नता, स्राव का होना, सड़ना; शिथिलता, मूर्च्छा, मद, कटु और अम्ल रस; पाण्डुर या अरुण वर्ण को छोड़कर शेष रंग का (पीला-नीला-लाल-हरा) होना ये पित्त के कार्य हैं ।

श्लेष्मकर्माण्याह—

श्लेष्मण: स्नेहकाठिन्यकण्डूशीतत्वगौरवम् ।
बन्धोपलेपस्तैमित्यशोफापक्त्यतिनिद्रता: ॥५३॥
वर्ण: श्वेतो रसौ स्वादुलवणौ चिरकारिता ।

स०—कफस्य स्नेहादीनि कर्माणि । स्नेह: स्नैग्ध्यम् । काठिन्यममृदुत्वम् कंडू: खर्जू: । शीतत्वं शीतसद्भाव: । गौरवं गुरुत्वम् । बंध: स्रोतसाम् । अस्थ्यादीनामुपलेप: । स्तैमित्यं गात्राणामपटुत्वम् । काये वर्ण: शुक्ल: । रसौ च मधुरपटू । चिरकारिता कार्यादौ विश्रब्धत्वम् । ननु वायोरमूर्तत्वाद्वर्ण रसोपलब्धिरनुपपन्ना । अमूर्तस्य हि वर्णरसौ दूरोत्सारितौ । नैतदस्ति । न हि सर्वाणि कार्याणि कारणसदृशान्येव भवंति । यथा चेंद्रियेभ्यो जडेभ्यो बुद्धेरयडाया उत्पत्तिर्दृष्टा । तस्मात्-कारणसदृशानि कार्याणीति प्रायिकमेतत् । अचिंत्यत्वाच्च द्रव्यप्रभावस्य वायो: सकाशात् कषायरसता श्यावारुणवर्णोत्पत्तिश्चाऽन्वयव्यतिरेकसिद्धा कथमिव निवार्यताम् । इत्येवं दोषाणां कर्माण्युपदिष्टानि । तद्विकाराश्च संग्रह उक्ता: । तथा च तद्ग्रंथ: । अशीतिर्वातजा रोगाश्चत्वारिंशच्च पित्तजा: । विंशति: श्लेष्मजाश्चैव स्थूला नानात्वजा मता: । नखभेद: पादशूलं सुप्ति भ्रंशो विपादिका । खुडो गुल्फग्रहो जानविश्लेषोजानुकुंचनम् । पिंडिकोद्वेष्टनं सादश्चोर्वो: स्तंभश्च गृध्रसी । पांगुल्यं भ्रंशशूलं च गुदे स्तंभस्तु मेहने । मुष्काक्षेप: श्रोणिभेदो वंक्षणानाह एव च । उदावर्तोऽथ विड्भेद: पार्श्वपृष्ठत्रिकग्रह: । खंजवामन-कुब्जत्वं हृद्द्रवोदरवेष्टकौ । हृन्मोहोवक्षनिस्तोद: शोषोद्घातौ तथोरस: । बाहुशोषो हनुग्रीवामन्यास्तभौष्ठभेदनम् । दंतभेदोऽथ शैथिल्यं कंठध्वंसोऽथ वा ग्रह: । कषायास्यत्वमूकत्वे मुखशोषो रसाज्ञता । घ्राणानाहोऽज्ञता गंधे शब्दोच्चै:श्रवणं तथा । बाधिर्यं कर्णशूलं च वर्त्मस्तंभनकुंचनम् । तिमिरं चाऽक्षिशूलं च भ्रूव्युदासोऽथ नेत्रयो: । ललाटशंखभेदौ च केशभ्रस्फुटनं तथा । शिरोरुजाऽर्दितं जृंभा प्रलापो वेपथुर्भ्रम: । एकांगव्याधिरायाम: पक्षाघातोऽपपंत्रक: । दंडक: स्वप्ननाशश्च ग्लानि: पारुष्यरूक्षता । विषादश्चाऽनवस्थानमरुणश्यामवर्णता । इत्यशीति: समाख्याता रोगा वातसमुद्भवा: । अंतर्दाहो विदाहश्च प्लोषोऽथ दवथुर्दव: । अत्यूष्मा चांसदाहश्च स्वेदोऽत्यम्लकधूमकौ । रक्तक्लेदोऽगगंधश्च गात्रावयवशातनम् । त्वङ्मांसदरणं मांसक्लेदश्चर्मदलं तथा । रक्तविस्फोटक: कोठ: पित्तासृग्रक्तमंडले । नीलिका कामला कक्षा गात्रे हरितपीतता । पूतितिक्तास्यता तृष्णा लोहगंधास्यता तथा । जीवादानमतृप्तिश्च प्रवेशस्तमसस्तथा । गलास्यगुदमेढ्राक्षिपाको हारिद्रपीतता । नखाक्षिमूत्रशकृतां चत्वारिंशत्तु पित्तजा: । स्तैमित्यं गौरवं तृप्तिरालस्यमतिनिद्रता । तद्रास्यस्वाद्यमाधुर्यं प्रलेपो हृदयस्य च । साद: कंठप्रलेपश्च श्लेष्मोद्गिरणमेव च । मलाधिक्यमति-स्थौल्यं वमनं प्रतिसंचयम् । उदर्दो गलगंडश्च शैत्यं श्वेतावभासता । विण्मूत्रनखनेत्राणां शुक्लता च कफामया: । यथास्थूलं विकाराणां प्रसंख्यानमिदं स्मृतमिति । हृदादौ शूलवद्दाहो योऽन्तर्दाह: स कीर्तित: । पाणिपादांसमूलेषु संतापो विविधस्तु य: । अग्न्यर्चिषेव नि:स्वेदो विदाह: स निगद्यते । ओष: सर्वांगिकस्तीव्रो दाह: स्वेदारतिप्रद: । दवथुश्चक्षुरादिभ्य-स्तीव्र ऊष्मा प्रवर्तते । मुखौष्ठतालुषु दवश्चाम्लोद्गिरणमम्लक: । धूमायनं शिरोघ्राणकंठतालुषु धूमक: । प्रमीलकस्तु स्तैमित्यं गुरुतांऽगस्य गौरवम् । आहारानभिलाषस्तु तृप्ति: स्याद्विषयाऽ-ग्रह: । निद्रार्तस्येव तंद्रा स्याच्छेषा: प्रथितनामका । दोषाणां कर्माण्युपदिश्य निर्देशप्रयोजनमधिकृत्याह ॥ ५३ ॥

कफ के कर्म—

वि०—कफ के कार्य—स्निग्धता, कठिनता, कण्डू, शीतलता, भारीपन, बाँधना, उपलेप (लिसड़ना-लेपना), स्तैमित्य (अद्रिता के समान अनुभव); शोफ, पाक न होना; नींद का अधिक आना; श्वेत वर्ण, मधुर एवं लवण रस तथा देर में काम करना ये कफ के कार्य हैं ॥ ५३ ॥

वक्तव्य—कफ मधुर है; विदग्ध होने पर लवण होता है; पित्त तिक्त है; विदग्ध होने पर कटु बनता है ।

इत्यशेषामयव्यापि यदुक्तं दोषलक्षणम् ॥५४॥
दर्शनाद्यैरवहितस्तत्सम्यगुपलक्षयेत् ।
व्याध्यवस्थाविभागज्ञ: पश्यन्नार्त्तान् प्रतिक्षणम् ॥५५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—इति प्रकारे। दोषाणां लक्षणं दोषलक्षणं यथायथं लिंगम्। इति पूर्वोक्तेन प्रकारेण यद्दोषलक्षणमुक्तं तद्दर्शनाद्यैः सम्यगुपलक्षयेत् जानीयात्। वैद्य इति शेषः। दर्शनाद्यैरित्यादिशब्देन स्पर्शनप्रश्नौ गृह्येते। किंभूतं दोषलक्षणम्। अशेषाश्च त आमयाश्चाशेषामया तान् सर्वानामयान् व्याप्नोति तददेषामयव्यापि। किंभूतो वैद्यः। अवहितो दत्तावधानः। तथा व्याध्यवस्थाविभागज्ञः। व्याधेरवस्थाः कालकृता दशास्तासां विभागः पृथक्त्वं यथैवमन्यस्य व्याधेरवस्थैयमन्यावरथेत्यवस्थाभेदाच्चोपक्रमभेदः। तथा ह्येकस्यैव ज्वरस्य नवस्याऽन्य उपक्रमो जीर्णस्याऽन्यस्तदेवं विभागं यो जानाति स व्याध्यवस्थाविभागज्ञः। तथाऽऽर्तान् व्याधितान् प्रतिक्षणं मुहूर्ते मुहूर्ते पश्यंश्चालोकयन् ॥ ५४–५५ ॥

रोगी का बार बार निरीक्षण—

वि०—इस प्रकार सम्पूर्ण रोगों में लागू होने वाले दोषों के जो लक्षण कहे हैं, उनको दर्शन आदि (स्पर्शन, प्रश्न) से सावधानी के साथ रोग की अवस्था के विभाग को जानने वाला वैद्य प्रतिक्षण रोगियों को देखता हुआ जाने ॥५४–५५॥

किमिति पुनः पुनर्व्याधितदर्शनं क्रियत इत्याह—

अभ्यासात्प्राप्यते दृष्टिः कर्मसिद्धिप्रकाशिनी।
रत्नादिसदसज्ज्ञानं न शास्त्रादेव जायते ॥ ५६ ॥

स०—अभ्यासान्मुहुर्मुहुश्चिकित्सितकर्मणि प्रवर्तनाद्दृष्टिर्दर्शनं चिकित्साविज्ञानं जायते न केवलाच्चिकित्साशास्त्रावगमात्। किंभूता दृष्टिः। कर्मणि सिद्धिस्तां प्रकाशयितुं शीलं यस्याः सा कर्मसिद्धिप्रकाशिनी। अत्र दृष्टांतमाह। रत्नादीत्यादि। आदिशब्देन सुवर्णहिरण्यादीनां ग्रहणम्। तेषां यत्सदसज्ज्ञानमिदं शोभनमिदं न शोभनमित्यवगमस्तन्न शास्त्रादेव जायते किंतर्ह्यभ्यासाच्च। एवकारोऽवधारणार्थः। न शास्त्रावबोधान्न च केवलादभ्यासादित्येवकारेण बोधयति। किल यथा रत्नपरीक्षा तच्छास्त्रावबोधदर्शनाभ्यां सम्यग्जायते तथैव चिकित्साशास्त्रावबोधान्नित्यं नित्यमातुरदर्शनाच्चाऽवगम्यत इत्यर्थः ॥ ५६ ॥

रोगी के बार बार निरीक्षण का कारण—

वि०—कार्य में सफलता को दिखाने वाली दृष्टि अभ्यास से ही प्राप्त होती है। अच्छे-बुरे रत्नों की पहचान का ज्ञान शास्त्र पढ़ने से ही नहीं होता, अपितु अभ्यास से होता है॥५६॥

दृष्टापचारजः कश्चित्कश्चित्पूर्वापराधजः।
तत्सङ्कराद्भवत्यन्यो व्याधिरेवं त्रिधा स्मृतः ॥ ५७ ॥

स०—दृष्टश्चासावपचारश्च तस्माज्जातो दृष्टापचारजः। अपचारो व्याधिहेतुः। ऐहिकलौकिकाद् व्याधिकारणाज्जातो दृष्टापचारजः। कश्चिदात्मकृतात्पूर्वापराधादशुभकर्माख्याज्जातः पूर्वापराधजः। अपरः कश्चित्तत्संकराद्भवति। तयोः संकरस्तत्संकरो मिश्रत्वं तस्मात्। न केवलात्पूर्वापराधाच्च केवलाद् दृष्टापराधादपि तु द्वयोः संसर्गाज्जात इत्यर्थः। एवमनेन प्रकारेण व्याधिस्त्रिधा त्रिप्रकारः स्मृतः ॥ ५७ ॥

व्याधि के तीन भेद और उत्पत्ति के कारण—

वि०—रोग तीन प्रकार के होते हैं—१-जिसमें रोग का कारण दीखता हो (दृष्टकर्मज), २-पहिले किये अपराध-जन्य रोग (अशुभ कर्म-जन्य या अदृष्टकर्मज); ३-इन दोनों के मिश्रित होने से उत्पन्न (दृष्टादृष्टकर्मज) इस प्रकार से रोग तीन प्रकार के हैं ॥ ५७ ॥

अथ त्रिप्रकारव्याधिलक्षणार्थमाह—

यथानिदानं दोषोत्थः कर्मजो हेतुभिर्विना।
महारम्भोऽल्पके हेतावातङ्को दोषकर्मजः ॥ ५८ ॥

स०—यथानिदानं दोषोत्थ इति। यद्यस्य दोषस्य वातादेर्लघुरूक्षादि निदानं तेन कुपिता दोषास्तेभ्य उत्थितो व्याधिः स दोषोत्थो ज्ञेयः। यो दृष्टापचारज इत्युक्त इत्यर्थः। हेतुभिर्वातादिनिदानैर्लघुरूक्षादिभिर्विना यो भवति कर्मजः। यस्त्वल्पे निदाने सेविते महारंभः स्यात् स कर्मदोषजो रोगो ज्ञेयः महानारंभो यस्य सः। पूर्वरूपरूपैर्बलवद्भिर्युक्त इत्यर्थः ॥ ५८ ॥

इन व्याधियों के लक्षण—

वि०—इनके लक्षण—दोषजन्य (दृष्टकर्मज) रोग-निदान के अनुसार दोषों के लक्षण वाले होते हैं। कर्मजन्य रोग-कारण बिना ही उत्पन्न होते हैं। दोषकर्मज रोग-थोड़े से कारण में ही बहुत बड़े रोग का रूप ले लेते हैं ॥ ५८ ॥

अथ त्रिविधस्याऽपि व्याधेश्चिकित्सामाह—

विपक्षशीलनात्पूर्वः कर्मजः कर्मसङ्क्षयात्।
गच्छत्युभयजन्मा तु दोषकर्मक्षयात्क्षयम् ॥ ५९ ॥

स०—विपक्षशीलनात्पूर्व इति। पूर्वः पूर्वमुक्तो यः केवलं दोषजो व्याधिः स विपक्षशीलनात् यथोक्तविपक्षादिसेवनात्क्षयं याति। कर्मजो रोगः कर्मसंक्षयात्क्षयं याति। उभयजन्मा दोषकर्मोत्थो दोषकर्मणोरुभयोरपि क्षयात्क्षयं याति ॥ ५९ ॥

त्रिविध व्याधि की चिकित्सा—

वि०—चिकित्सा—दोषजन्य रोग-विरोधी वस्तु के सेवन से शान्त हो जाता है। कर्मजन्य रोग-कर्म के क्षय से शान्त होता है। दोष और कर्मजन्य रोग-दोष और कर्म दोनों के क्षय होने से शान्त होता है ॥ ५९ ॥

व्याधीनां त्रैविध्यमाख्याय वैविध्यं दर्शयितुमाह—

द्विधा स्वपरतन्त्रत्वाद्व्याधयोऽन्त्याः पुनर्द्विधा।
पूर्वजाः पूर्वरूपाख्या, जाताः पश्चादुपद्रवाः ॥६०॥

स०—स्वतंत्रश्च परतंत्रश्च स्वतंत्रपरतंत्रौ तयोर्भावः स्वतंत्रपरतंत्रत्वं तस्माद्धेतोर्द्विधा व्याधयः। एके स्वतंत्रा अन्ये परतंत्रा इत्यर्थः। अंते भवा अंत्याः परतंत्रास्ते पुनर्भूयो द्विधा। तदेव दर्शयितुमाह—पूर्वं जाताः पूर्वजाः। अन्येष्वपि दृश्यत इति डः। पूर्वजाः पूर्वं रूपसंज्ञा रोगः। ये च पश्चाज्जाता गदास्ते व्याधीनामुपद्रवा इत्थं ते द्विविधाः ॥ ६० ॥

प्रकारान्तर से व्याधि के दो भेद—

वि०—रोग—स्वतन्त्र और परतन्त्र भेद से दो प्रकार के

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होते हैं। इनमें परतन्त्र रोग फिर दो प्रकार के होते हैं। रोग से पूर्व होने वाले रोग-पूर्वरूप कहलाते हैं, रोग से पीछे होने वाले उपद्रव कहलाते हैं ॥ ६० ॥

संप्रति स्वतंत्रं लक्षयति—

यथास्वजन्मोपशयाः स्वतन्त्राः स्पष्टलक्षणाः।
विपरीतास्ततोऽन्ये तु विद्यादेवं मलानपि ॥ ६१ ॥

स०—जन्म चोपशयश्च जन्मोपशयौ। जन्मोत्पत्तिरुपशयः सुखानुबंधः। यो यः स्वं यथास्वम्। यस्य ज्वरादेर्यावात्मीयौ शास्त्रनिर्दिष्टौ तौ यथास्वशब्देन सूच्येते। यथास्वं जन्मोपशयौ येषां ते यथास्वजन्मोपशया व्याधयः स्वतंत्रा उच्यंते। चिकित्सागुरुलाघवप्रतिपत्त्यर्थं च स्वतंत्रादिसंज्ञाकरणम्। स्वग्रहणाद्येऽन्यजन्मनि जायंतेऽन्यस्य च व्याधेर्यत उपशयः सुखानुबंधस्तत एतत्परिवारस्यापि। ते तु न स्वतंत्राः। तथा चोक्तम्। पूर्वरूपरूपादिक्रमेण ज्वरादावुत्पन्ने तत्परिवारा ये श्वासादय उत्पद्यंते तदुपशये चोपशेरते न ते स्वतंत्राः। ज्वरादय एव मूलव्याधिरूपत्वात्स्वतंत्रा इत्युच्यंत इति। स्वतंत्रेभ्यो रोगेभ्यो येऽन्ये परतंत्राः पूर्वरूपाख्यास्तथोपद्रवसंज्ञाश्च ते विपरीता विपरीतस्वरूपा न यथास्वजन्मोपशया न च स्पष्टलक्षणाः। एवं व्याधीनां स्वतन्त्रत्वं प्रतिपाद्य दोषाणां प्रतिपादयन्नाह—न केवलं रोगान् स्वतंत्रपरतंत्रभेदैर्विद्याद्वैद्यो यावन्मलान् दोषानपि वातादीनेवं- स्वतंत्रपरतंत्रभेदैर्जानीयात् ॥ ६१ ॥

स्वतन्त्र और परतन्त्र व्याधि का लक्षण—

वि०—जिन रोगों की उत्पत्ति और शान्ति-उनके अपने हेतु और उसके शास्त्रोक्त शमन के द्वारा होती है वे स्वतन्त्र रोग हैं इनमें उस रोग के लक्षण स्पष्ट रहते हैं। इससे विपरीत अर्थात् जिनमें-उत्पत्ति और शान्ति अपने हेतु के अनुसार न हो—तथा लक्षण स्पष्ट नहीं होते-वे परतन्त्र रोग हैं। इस प्रकार-रोग की भाँति-वातादि दोषों को भी स्वतन्त्र या परतन्त्र जानना चाहिये ॥ ६१ ॥

तांल्लक्षयेदवहितो विकुर्वाणान् प्रतिज्वरम्।

स०—तान् वातपित्तकफान् यथास्वजन्मोपशयलक्षणावच्छिन्नस्वरूपान् प्रतिज्वरं प्रतिविकारं विकुर्वाणान् विकृतिं कोपं गच्छतो जानीयात् वैद्य इति शेषः। कीदृक्। अवहितो दत्तचित्तः।

प्रत्येक विकार में वैद्य का कर्तव्य—

वि०—प्रत्येक रोग में विकार उत्पन्न करने वाले इन वात, पित्त एवं कफ को वैद्य सावधानी ले (स्वतन्त्रता और परतन्त्रता की दृष्टि से) पहिचाने।

एवं स्वतंत्राणां व्याधीनां यथास्वोपशय एव भेषजमुक्तम्। परतंत्राणां व्याधीनां कः प्रशमोपाय इत्याह—

तेषां प्रधानप्रशमे प्रशमोऽशाम्यतस्तथा ॥ ६२ ॥
पश्चाच्चिकित्सेत्तूर्णं वा बलवन्तमुपद्रवम्।
व्याधिक्लिष्टशरीरस्य पीडाकरतरो हि सः ॥ ६३ ॥

स०—तेषां परतंत्राणां रोगाणामप्रधानानां प्रधानप्रशमे- स्वतंत्रव्याधिप्रशमे शमो भवति। न तु तेषां पृथगुपक्रमो विधेय इत्यर्थः। अशाम्यतस्तथा शममगच्छतः परतंत्रान् व्याधीन् दोषान् वा तथा तेन प्रकारेण प्रधानचिकित्सालक्षणेन पश्चात् प्रधानचिकित्सात उत्तरकालं चिकित्सेत्। अचिकित्स्यमानो ह्यसाध्यतां यायात्। तूर्णं वेति। उपद्रवश्चेद्बलवान् स्यात्तदा तमेवोपद्रवं तूर्णमेव चिकित्सेन्न पश्चात्। ननु कुतोऽप्रधानं शीघ्रं चिकित्सेदित्याह—हि यस्माद्व्याधिक्लिष्टशरीरस्य पुंसः सोऽतिशयेन पीडाकरः। प्रागुत्पन्नोऽपि रोगः पीडाकरः। उपद्रवश्च पश्चाज्जायमानो व्याधिक्लिष्टशरीरस्योत्पन्नत्वात्पीडाकरतरः। तदयमत्रार्थः। परतंत्रो व्याधिर्हीनबलः प्रधानोपक्रमेणैवोपशाम्यति। यस्तु परतंत्रः पश्चादुत्पद्यमानोऽपि स्वतंत्रव्याध्युपक्रमेण शमं न याति तं पश्चादुपक्रमेत्। यस्तु बलवान् परतंत्रस्तमादावेव चिकित्सेदतिपीडाकरत्वात् ॥ ६२-६३ ॥

परतन्त्र व्याधियों की शान्ति का उपाय—

वि०—इन परतन्त्र रोगों की स्वतन्त्र रोग के शान्त होने पर शान्ति हो जाती है; और यदि वे शान्त न हों तो पीछे से चिकित्सा करनी चाहिये। यदि उपद्रव बलवान् हो तो उसकी शीघ्रता से चिकित्सा करें। क्योंकि वह उपद्रव रोग से पीड़ित शरीर में अतिशय पीड़ा करने वाला होता है ॥ ६२-६३ ॥

ननु येषां विकाराणां नामग्राहं चिकित्सा नोक्ता तेषां नामाकुशलो वैद्यः किं चिकित्सेन्नेत्याशंक्याह—

विकारनामाकुशलो न जिह्रीयात् कदाचन।
नहि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ॥६४॥

स०—विकारा रोगास्तेषां नामानि तेष्वकुशलो वैद्यो न जातुचिज्जिह्रीयात् रोगसंज्ञाऽनभिज्ञोऽहमिति लज्जां न कुर्यात्। चिकित्सामेव विदध्यादित्यर्थः। कुतो हेतोरित्याह। नहीत्यादि। यस्मात्सर्वविकाराणां नामतः संज्ञातो ध्रुवा निश्चिता स्थितिः स्थानं नास्ति ॥ ६४ ॥

अनाम रोग में वैद्य का कर्त्तव्य—

वि०—रोग का नाम न ज्ञात होने पर वैद्य कभी भी शर्म का अनुभव न करें; क्योंकि सब रोगों की संज्ञा से निश्चित स्थिति नहीं है। [चिकित्सा में मुख्य कारण बात आदि ही हैं, न कि रोगों के नाम कारण हैं] ॥ ६४ ॥

ननु कुतोऽशेषरोगाणां नामतो नास्ति स्थितिरित्याशंक्याह—

स एव कुपितो दोषः समुत्थानविशेषतः।
स्थानान्तराणि च प्राप्य विकारान् कुरुते बहून् ॥६५॥
तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च।
बुद्ध्वा हेतुविशेषांश्च शीघ्रं कुर्यादुपक्रमम् ॥ ६६ ॥

स०—यस्मात्स एक एव दोषो वाताद्यन्यतमः समुत्थानविशेषतो हेतुभेदात् तथा स्थानांतराणि स्वस्थानं हित्वा पराणि स्थानानि प्राप्य गत्वा विकारान् बहूननंतान् कुरुते। तथा चोक्तं तंत्रांतरे। योऽतःशरीरसंधीनाविशति तेन जृम्भा ज्वर-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्चोपजायते। यस्त्वामाशयमभ्युपैति तेन रोगा भवंत्युरस्य-रोचकश्च। यः कंठमभिप्रपद्यते कंठस्ततो भ्रंशते स्वरश्चाऽव-सीदति। यः प्राणवहानि स्रोतांस्यन्वेति श्वासः प्रतिश्यायश्च तेनोपजायत इति। विकारस्य ज्वरादेः प्रकृतय उपादान-कारणानि वातादिदोषास्ता विकारप्रकृती रोगहेतुविशेषान् बुद्ध्वा ज्ञात्वा तथाऽधिष्ठानांतराणि स्थानविशेषांश्च बुद्ध्वा तथा हेतुविशेषानधिष्ठाननिदानभेदांश्च बुद्ध्वा यथा किमयं कुपितः पवनो रूक्षेण हेतुना लघुना शीतेन चेत्यादि ज्ञात्वा शीघ्रमेवोपक्रमं चिकित्सां कुर्यान्न तु विकारानभिज्ञ इति न चिकित्सेत् ॥ ६५-६६ ॥

यथाविकार चिकित्सा—

वि०—वही दोष कारण की भिन्नता से कुपित होकर तथा भिन्न-भिन्न स्थानों में पहुँच कर बहुत रोगों को उत्पन्न करता है। इसलिये रोग की प्रकृति (दोष-द्रव्य) अधिष्ठान-भेद एवं कारणों (निदान) की विशेषताओं को जानकर (उनके अनुसार) शीघ्र चिकित्सा करे।

ननु बुद्ध्वाऽपि विकारप्रकृत्यादित्रयमुपक्रमं कुर्वतः कदाचित्सिद्धिमाप्नुवंतो दृश्यंते भिषजः कदाचिन्नेति तदत्र संशयस्खलिते कर्मणि कथं नियुज्यते वैद्य इति कथमुक्तं शीघ्रं कुर्यादुपक्रममित्याशंक्याह—

दूष्यं देशं बलं कालमनलं प्रकृतिं वयः।
सत्त्वं सात्म्यं तथाऽऽहारमवस्थाश्च पृथग्विधाः ॥६७॥
सूक्ष्मसूक्ष्माः समीक्ष्यैषां दोषौषधनिरूपणे।
यो वर्तते चिकित्सायां न स स्खलति जातुचित् ॥६८॥

स०—दोषौषधनिरूपणे सति दूष्यादीन् दश समीक्ष्य सम्यग्विलोक्य यश्चिकित्सायां वर्तते यत्नं करोति स वैद्यो न कदाचित् स्खलति नाऽपराधी स्यात्। दोषो वातादिः। औषधं हरीतक्यादि। तयोर्निरूपणं पर्यालोचनं तस्मिन् दोषौषधनिरूपणे। दूष्यादीनां समस्तानामुपादानं सर्वेषामेवावगमे चिकित्साकरणं प्रति यत्नातिशयद्योतनार्थं न पुनरेषां द्वौ वा त्रीन् वा चतुरः पंच वा समीक्ष्य किंतर्हि सर्वानेतान् सम्यगवबुध्येति। अथ दूष्यादीनेव समीक्ष्य नेत्याह। अवस्थाश्च पृथग्विधाः। एषामेव दूष्यादीनामवस्थाः सूक्ष्मसूक्ष्मा अतिशयेन सूक्ष्मास्ताश्च यथावद् बुद्ध्वेति ॥ ६७-६८ ॥

रोग की दशविध परीक्षा—

वि०—दोष और औषध का निर्णय करने में जो मनुष्य दूष्य (धातु-मल), देश, बल, काल, अग्नि, प्रकृति, वय, सत्त्व, सात्म्य और आहार तथा रोग की भिन्न-भिन्न अवस्थाओं को अतिसूक्ष्म विवेचना करके चिकित्सा में प्रवृत्त होता है, वह कभी भी असफल नहीं होता ॥ ६७-६८ ॥

न च दूष्याद्येव परीक्ष्यं किंतर्हि व्याधिरपि गुरुलघुत्वेन परीक्ष्य एवेत्याह—

गुर्वल्पव्याधिसंस्थानं सत्त्वदेहबलाबलात्।
दृश्यतेऽप्यन्यथाकारं तस्मिन्नवहितो भवेत् ॥ ६९ ॥

स०—गुरुश्चाऽल्पश्च गुर्वल्पौ गुर्वल्पौ च तौ व्याधी च गुर्वल्पव्यधि तयोः संस्थानमाकृतिः। अपिशब्दो भिन्नक्रमे। तद्गुर्वल्पव्याधिसंस्थानमन्यथाकारमपि दृश्यते विपरीतमपि लक्ष्यते। अपिशब्दात्कचिद्गुर्वल्पव्याधिसंस्थानं यथातत्त्वं दृश्यते क्वचिन्नेति व्याधिलक्षणस्य गमकत्वाभावः प्रसज्येत। ततश्च रोगं निदानप्राग्रूपलक्षणोपशयाप्तिसिरिति दूष्येत्तस्मादपिशब्दोऽत्र गुर्वल्पसंस्थानस्य यथातत्त्वदर्शनं क्वचिन्नवत्येवेति सूचनार्थं कृतः। कुतो हेतोरित्याह। सत्त्वेत्यादि। सत्त्वं धैर्यम्। देहो महदल्पस्थूलकृशादिः। सत्त्वं च देहश्च सत्त्वदेहौ। बलं चाबलं च बलाबले। तस्मात्सत्त्वदेहबलाबलाद्धेतोर्गुर्वल्पव्याधिसंस्थानेऽवहितो भवेत्। अधिकसत्त्वे तथोत्कृष्टदेहबले च गुरुर्महानपि व्याधिरुत्पन्नोऽल्पसंस्थानो हीनबल इव लक्ष्यते। सत्त्वदेहबलयोरुत्कृष्टत्वात्। तथा हीनसत्त्वे हीनदेहबले चोत्पन्नो लघुरपि महानिव लक्ष्यते। हीनसत्त्वदेहबलात् तस्मादस्मिन्व्याधिसंस्थानेऽर्थे दत्तावधानेन भाव्यम् ॥ ६९ ॥

गुरु तथा लघु रोग की परीक्षा—

वि०—सत्त्व (मन) और शरीर के बल के कारण गुरु व्याधि भी साधारण रोग के लक्षणों वाली दीखती है और मन एवं शरीर की निर्बलता के कारण अल्पव्याधि भी बड़े रोग के लक्षणों वाली दीखती है, इसलिये इनके विवेचन में सावधान रहना चाहिये ॥ ६९ ॥

वक्तव्य—जिस प्रकार चिउँटी कृश-छोटी होने पर भी अपने से अधिक बोझ को उठा लेती है; इसी प्रकार मन और शरीरबल के कारण बड़े भारी रोग को भी मनुष्य सहन कर लेते हैं। यथा—'गुरुव्याधित एकः सत्त्वबलशरीरसंपदुपेतत्वाल्लघुव्याधित इव दृश्यते, लघुव्याधितोऽपरः सत्त्वादीनामल्पत्वाद् गुरुव्याधित इव दृश्यते। तयोरकुशलाः केवलं चक्षुषैव रूपं दृष्ट्वाऽध्यवस्यन्तोव्याधिगुरुलाघवे विप्रतिपद्यन्ते॥' चरक।

गुरुं लघुमिति व्याधिं कल्पयंस्तु भिषग्ब्रुवः।
अल्पदोषाकलनया पथ्ये विप्रतिपद्यते ॥ ७० ॥

स०—भिषग्ब्रुव इत्यादि। यश्च भिषग्ब्रुवः कुत्सितो वैद्यः स व्याधिसंस्थानमात्रावलोकनाद् गुरुं व्याधिं लघुमिति कल्पयन्निश्चिन्वन्नल्पदोषाकलनया हीनमात्रदोषनिश्चयेन पथ्ये विप्रतिपद्यते। चिकित्सिते मोहं गच्छति। गुरुव्याधावल्पव्याधियोग्यं भेषजं ददाति। एवं लघुव्याधिं गुरुमिति कल्पयन् बहुदोषाकलनया पथ्ये विप्रतिपद्यते भिषग्ब्रुवत्वात्। अन्यत्रापि ब्रुवांतस्य कुत्सितत्वमेव प्रसिद्धम्। यथाह मनुः। जातिमात्रोपजीवी स्यात् कामं वा ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचनेति। केचित् भिषग्ब्रुवमिति पेठुः। भिषग्वंद्यो गुरुं लघुमिति व्याधिं कलयन् ध्रुवं निश्चितं पथ्ये विप्रतिपद्यत इति च व्याचक्षते ॥ ७० ॥

कुवैद्य की भूल—

वि०—वैद्य न होते हुए भी अपने को वैद्य कहने वाले

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गुरु व्याधि को लघु व्याधि मानकर थोड़ा दोष निश्चय करके पथ्य (औषधादि) के विषय में विपरीत कर बैठते हैं ॥

यस्मादेवम्—

ततोऽल्पमल्पवीर्यं वा गुरुव्याधौ प्रयोजितम् ।
उदीरयेत्तरां रोगान् संशोधनमयोगतः ॥ ७१ ॥
शोधनं त्वतियोगेन विपरीतं विपर्यये ।
क्षिणुयान्न मलानेव केवलं वपुरस्यति ॥ ७२ ॥

स०—ततोऽल्पमल्पमात्रमल्पवीर्यं वाऽनुत्कृष्टशक्तिकं वा भेषजं गुरुव्याधौ प्रयोजितं दत्तं संशोधनं रोगानुदीरयेत्तरामतिशयेनोत्क्लेशयेत्। कुतः अयोगतो हीनयोगात्। अयोगो हि हीनयोग उच्यते। यथा पुत्रकार्याकरणादपुत्र इत्युच्यते। विपर्यये च लघुव्याधौ विपरीतं शोधनं तु प्रयोजितं कस्माद्विपरीतमल्पवीर्यात् संशोधनादतिमात्रमुत्कृष्टवीर्यं च बहुदोषाकलनयाऽतियोगेन प्रयोजितं न केवलं मलान् क्षिणुयात् क्षपयेद्यावद्वपुरस्यति शरीरमपि हिंस्यात्। अत्र च संशोधनं यद् दृष्टांतत्वेनोपन्यस्तं तदयोगातियोगाभ्यां रोगीशरीरक्षपणकृदिति निर्वर्तयतीति। खरनादेनाऽप्युक्तम्। अल्पमुत्क्लेशयेद्दोषं बहु प्राणान्निहंति च। तस्मान्निरूप्य भिषजा देयं युक्तं विरेचनमिति। तथा ज्वरगुल्मादीनां च तत्प्रतीकारार्थं यद्दीयते भेषजं तत्राऽपि महारंभेऽल्पमल्पवीर्यं चौषधं न देयमित्यस्मादेव दृष्टांतीभूतादर्थादवगंतव्यम् ॥ ७१-७२ ॥

गुरु, लघु रोग में विपरीत मात्रा से हानि—

वि०—गुरु व्याधि में मात्रा में थोड़ा या अल्पवीर्य संशोधन अयोग (हीन योग) के कारण रोगों को और भी अधिक बढ़ा देता है। लघु व्याधि में विपरीत (अधिक मात्रा में या अतिवीर्य) शोधन केवल मलों को ही नष्ट नहीं करता अपि तु शरीर को भी नष्ट कर देता है। (कहा भी है—

'अल्पमुत्क्लेशयेद्दोषं बहु प्राणान्निहन्ति च।
तस्मान्निरूप्य भिषजा देयं युक्तं विरेचनम् ॥')

अतोऽभियुक्तः सततं सर्वमालोच्य सर्वथा ।
तथा युञ्जीत भैषज्यमारोग्याय यथा ध्रुवम् ॥ ७३ ॥

स०—यस्माच्चैवं रोगाणां दुर्विज्ञेया गतिरतोऽस्माद्धेतोः सततमभियुक्तः सदाऽऽयुर्वेदपाठावबोधानुष्ठानपरो वैद्यः सर्वं दूष्यादिवस्तुजातमालोच्य सर्वथा सर्वेण प्रकारेणाऽऽयुर्वेदानुसारिण्या स्वमनीषया तद्विद्यसंभाषातः संभवया च तथा कर्माभ्यासतोऽपि निपुणं निरूप्य तथा तेन प्रकारेण दोषदूष्यदेशाद्यनुगुणेन भैषज्यं युंजीत भेषजं युंज्यात्। यथाऽऽरोग्याय ध्रुवं येन प्रकारेणाऽऽरोग्यार्थमवश्यं स्यात् ॥ ७३ ॥

रोग-मात्रा-निर्णय में सावधानी की आवश्यकता—

वि०—इसलिये आयुर्वेद के पठन-अवबोधन में तत्पर वैद्य सदैव सम्पूर्ण दूष्यादि की सब प्रकार से विवेचना करके इस प्रकार से औषध देवे जिससे कि निश्चित रूप में आरोग्य प्राप्त हो ॥ ७३ ॥

पूर्वमुक्तं दोषा एव हि सर्वेषां रोगाणामेककारणमतस्तानेव दोषान् वृद्धिक्षयभेदेनाह—

वक्ष्यन्तेऽतः परं दोषा वृद्धिक्षयविभेदतः ।

स०—वृद्धिश्च क्षयश्च वृद्धिक्षयौ तयोर्विभेदो वृद्धिक्षयविभेदः विविधो भेदो विभेदस्तस्माद्वृद्धिक्षयविभेदतः अतोऽनंतरं दोषा वातादयो वक्ष्यंते भणिष्यंते।

दोष के भेद—

वि०—इसके आगे दोषों को वृद्धि और क्षय के भेद से कहेंगे।

पृथक् त्रीन् विद्धि संसर्गस्त्रिधा, तत्र तु तान्नव ॥

स०—पृथग्व्यस्तान् स्वप्रमाणाधिकान् त्रीन् दोषान् रोगहेतून् विद्ध्यवेहि। वातो वृद्धः पित्तं वृद्धं श्लेष्मा वृद्धः एवं त्रयो दोषाः। संसर्गभेदानधुना वक्ति। संसर्गस्त्रिधा त्रिप्रकारः। तत्र संसर्गे नव दोषभेदान्स्वप्रमाणाधिकान् विद्धीत्येतदनुवृत्तिकृतेन संबंधेन सर्वत्र योज्यम् ॥ ७४ ॥

प्रत्येक के पृथक्-पृथक् भेद—

वि०—पृथक् दोषों को तीन जानो—वातवृद्धि, पित्तवृद्धि और कफवृद्धि। इनका संयोग तीन प्रकार का है; यथा—वातपित्त, वातकफ; पित्तकफ। पुनः ये संसर्ग (निम्न लिखित विधि से) नौ होते हैं ॥ ७४ ॥

कथं नव भेदा इत्याह—

त्रीनेव समया वृद्ध्या षडेकस्यातिशायने ।

स०—समया वृद्ध्या त्रीनेवाऽन्यूनाधिकान् संसर्गदोषभेदान्। एको वातपित्ताभ्यामधिकाभ्यां द्वितीयो वातकफाभ्यामधिकाभ्यां तृतीयः पित्तश्लेष्मभ्यामधिकाभ्यामिति। संसर्गोत्थयोर्दोषयोरेकस्य दोषस्याऽतिशायनेऽधिकतरया वृद्ध्या षट् संसर्गदोषभेदान् विद्धि। अतिशयोऽतिशायनम्। अतिशायने तमबिष्ठानाविति निपातनाद्दीर्घः। दोषद्वयवृद्धेश्चिंत्यमानत्वादपरदोषचिंता नास्त्यत्र। वातो वृद्धः पित्तं वृद्धतरम्। पित्तं वृद्धं वातो वृद्धतरः। कफो वृद्धः पित्तं वृद्धतरम्। पित्तं वृद्धं कफो वृद्धतरः। कफो वृद्धो वातो वृद्धतरः। वातो वृद्धः कफो वृद्धतरः। एवं षट् संसर्गभेदान् विद्धि।

संसर्ग के नव भेदों का स्फुटीकरण—

वि०—नौ संयोग—तीन संयोग तो प्रत्येक दोष की समानता से और एक दोष की अधिकता तथा दूसरे की अल्प वृद्धि से छः संयोग; इस प्रकार से नौ संयोग (इस प्रकार पृथक्-पृथक् वृद्ध दोष तीन, सम प्रमाण में वृद्ध दो-दो दोषों का संसर्ग तीन, और एक अतिवृद्ध तथा दूसरे अल्पवृद्ध दोषों का संसर्ग छः; कुल १२ भेद हुए।)

त्रयोदश समस्तेषु षड्द्व्येकातिशयेन तु ॥ ७५ ॥
एकं तुल्याधिकैः षट् च तारतम्यविकल्पनात् ।

स०—समस्तेषु सन्निपतितेषु त्रिष्वपि दोषेषु वृद्धेषु। त्रयोदश दोषभेदान् विद्धि। कथमित्याह—द्वावेकश्च द्व्येकास्तेषां द्व्येकेषामतिशयोऽधिकत्वं तेन द्व्येकातिशयेन। ततो द्व्यातिशयेन त्रयो भेदाः। तथा एकस्याऽतिशयेन यत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति षट् भेदाः। यथा कफो वृद्धो वातपित्तमधिकवृद्धम्। पित्तं वृद्धं वातकफावतिवृद्धौ। वातो वृद्धः पित्तकफावतिवृद्धौ। पित्तकफौ वृद्धौ वातोऽतिवृद्धः। वातकफौ वृद्धौ पित्तमतिवृद्धम्। वातपित्ते वृद्धे कफोऽतिवृद्धः। इति षड्भेदान् द्व्येकातिशयेन सन्निपाते विद्धि। तुल्यं कृत्वा समं कृत्वा वृद्धैर्दोषैरेकं सन्निपातमेकभेदं विद्धि। तरतमयोर्भावस्तारतम्यम्। कस्य तारतम्यम्। प्रकृतत्वात्संनिपातस्थदोषाणाम्। तारतम्यस्य विकल्पनं भेदस्तारतम्यविकल्पनं तस्मात्संनिपातस्थदोषाणां वृद्धिरूपाणां षड्भेदान् विद्धि। यथा वातो वृद्धः पित्तं वृद्धतरं कफो वृद्धतमः। वातो वृद्धः कफो वृद्धतरः पित्तं वृद्धतमम्। पित्तं वृद्धं कफो वृद्धतरो वातो वृद्धतमः। पित्तं वृद्धं वातो वृद्धतरः कफो वृद्धतमः। कफो वृद्धो वातो वृद्धतरः पित्तं वृद्धतमम्। कफो वृद्धः पित्तं वृद्धतरं वातो वृद्धतमः। एतेषां च लक्षणं सुनिरध्यगीष्ट। तथा च ग्रंथः। सन्निपातज्वरस्योर्ध्वं त्रयोदशविधस्य हि। प्राक् सूत्रितस्य वक्ष्यामि लक्षणं वै पृथक्पृथक्। भ्रमः पिपासा दाहश्च गौरवं शिरसोऽतिरुक्। वातपित्तोल्बणे विद्याल्लिंगं मंदकफे ज्वरे। शैत्यं कासोऽरुचिस्तंद्रा पिपासा दाहरुग्व्यथा। वातश्लेष्मोल्बणे विद्याल्लिंगं पित्तज्वरे विदुः। छर्दिः शैत्यं मुहुर्दाहस्तृष्णा मोहोऽस्थिवेदना। मंदवातेऽध्यवस्यंति लिंगं पित्तकफोल्बणे। संध्यस्थिशिरसः शूलं प्रलापो गौरवं भ्रमः। वातोल्बणे स्याद् द्व्यनुगे तृष्णा कंठास्यशुष्कता। रक्तविण्मूत्रता दाहः स्वेदस्तृड्बलसंक्षयः। मूर्छा चेति त्रिदोषे स्याल्लिंगं पित्ते गरीयसि। आलस्याऽरुचिहृल्लासदाहवम्यरतिभ्रमैः। कफोल्बणं सन्निपातं तन्द्राकासेन चादिशेत्। समं दोषैस्त्रिभिर्वृद्धैः सन्निपातस्य लक्षणम्। मुहुर्दाहो मुहुः शीतं कर्णदन्तेहनपार्श्वरुक्। मोहश्छर्दिर्दिवा निद्रा रात्रौ जागरणं तथा। प्रतिश्या छर्दिरालस्यं तंद्रारुच्यग्निमार्दवम्। हीनवाते पित्तमध्ये चिह्नं श्लेष्माधिके मतम्। हारिद्रमूत्रनेत्रत्वग्दाहस्तृष्णा भ्रमोऽरुचिः। हीनवाते मध्यकफे लिंगं पित्ताधिके मतम्। शिरोरुग्वेपथुः श्वासः प्रलापश्छर्द्यरोचकौ। हीनपित्ते मध्यकफे लिङ्गं वाताधिके मतम्। शीतकं गौरवं तंद्रा प्रलापोऽस्थिशिरोऽतिरुक्। हीनपित्ते वातमध्ये लिंगं श्लेष्माधिके विदुः। वर्चोभेदोऽग्निदौर्बल्यं तृष्णा दाहोऽरुचिर्भ्रमः। कफहीने वातमध्ये लिंगं पित्ताधिके मतम्। श्वासः कासः प्रतिश्यायो मुखशोषोऽतिपार्श्वरुक्। कफहीने पित्तमध्ये लिंगं वाताधिके स्मृतमिति ॥ ७५ ॥

त्रिदोष भेद—

वि०—तीनों दोषों के मिलने से तेरह भेद बनते हैं। इनमें से छः भेद तो, दोषों के एक से अधिक होने पर तीन तथा दो से एक दोष के अधिक होने पर तीन—इस प्रकार छः संयोग होते हैं। सम प्रमाण में वृद्ध तीनों दोषों के संयोग से एक तथा तर और तम की भिन्नता से अर्थात् एक वृद्ध दूसरा वृद्धतर और तीसरा वृद्धतम होने से छः संयोग—इस प्रकार ये तेरह संयोग हैं—(पूर्वोक्त १२+१३=२५। इस प्रकार दोषवृद्धि में पच्चीस भेद हैं।) ॥ ७५ ॥

वक्तव्य—यथा-एक दोष पृथक्-पृथक् वृद्ध वात, पित्त और कफ (३) वृद्ध दोषों का संसर्ग यथा—वृद्धवायुपित्त, वातकफ और पित्तकफ (३) एक अति वृद्ध और दूसरे अल्प वृद्ध इस प्रकार दो दोषों के संसर्ग यथा वृद्धत्तर वायु, वृद्धपित्त, वृद्धतर वात वृद्धकफ, वृद्धतर पित्त वृद्धवायु, वृद्धतर पित्त वृद्धकफ, वृद्धतर कफ वृद्धवात, वृद्धतर कफ वृद्धपित्त (६), त्रिदोष—सम प्रमाण में एक साथ बढ़े हुए तीनों दोष (१), दो दोष अधिक वृद्ध और एक वृद्ध यथा वातपित वृद्धतर कफ वृद्ध, वातकफ वृद्धतर पित्तवृद्ध; पित्त कफ वृद्धतर वात वृद्ध (२) एक अधिक बढ़ा और शेष दो केवल बढ़े यथा-वृद्धतर वात पित्त-कफ वृद्ध, वृद्धतर पित्त-वात कफ वृद्ध, वृद्धतर कफ वातपित्त वृद्ध (३), अति मध्य और अल्प वृद्ध तीनों दोष यथा—वृद्धतम वात वृद्धतर पित्त वृद्ध कफ, वृद्धतम वात वृद्धतर कफ वृद्धपित्त, वृद्धतम पित्त वृद्धतर वात वृद्धकफ, वृद्धतम पित्त वृद्धतर कफ वृद्धवात, वृद्धतम कफ वृद्धतर वात वृद्धपित्त और वृद्धतम कफ वृद्धतर पित्त वृद्धवात (३) कुल २५ भेद हैं।

पञ्चविंशतिमित्येवं वृद्धैः क्षीणैश्च तावतः ॥ ७६ ॥

स०—एवं पूर्वोक्तेन प्रकारेण पंचविंशतिसंख्यान् दोषभेदान् वृद्धैर्दोषैर्विद्धि। क्षीणैः क्षयावस्थैर्दोषैस्तावतस्तत्परिमाणान्पंचविंशतिसंख्याकान् दोषभेदान् विद्धि। यथा वृद्धैः पृथक् त्रीन् दोषभेदान् तथा क्षीणैः। पृथक् त्रीनित्यादिग्रंथे वृद्धिशब्दस्थाने क्षीणशब्दो निपात्यः। तद्यथा। वातः क्षीणः पित्तं क्षीणं कफः क्षीणः। तदेवं संसर्गे नव दोषभेदान् विद्धि। कथम्। त्रीनेव समक्षीणत्वेन क्षीणवातपित्तसंसर्गः। क्षीणपित्तकफसंसर्गः। क्षीणवातकफसंसर्गः। षडेकस्यातिशायने। अतिशायनेऽन्यदोषापेक्षया क्षीणत्वातिरेके। वातः क्षीणः पित्तं क्षीणतरम्। पित्तं क्षीणं वातः क्षीणतरः। वातः क्षीणः कफः क्षीणतरः। कफः क्षीणो वातः क्षीणतरः। कफः क्षीणः पित्तं क्षीणतरम्। पित्तं क्षीणं कफः क्षीणतरः। एवं षड् दोषभेदान् विद्धि। त्रयोदश समस्तेषु सन्निपतितेषु क्षीणेषु दोषेषु दोषभेदांस्त्रयोदश विद्धि। कथम्। षड् द्व्येकातिशये न तु। दोषद्वयस्याऽतिशयेनाऽतिक्षीणत्वेन तथा दोषैकस्याऽतिक्षीणत्वेन पर्यायतः षट् क्षीणसंनिपातैर्दोषभेदान् विद्धि। यथा वातः क्षीणः पित्तकफावतिक्षीणौ। पित्तं क्षीणं वातकफावतिक्षीणौ। कफः क्षीणः पित्तवातावतिक्षीणौ। वातपित्ते क्षीणे कफोऽतिक्षीणः। पित्तकफौ क्षीणौ वातोऽतिक्षीणः। वातकफौ क्षीणौ पित्तमतिक्षीणम्। एकं तुल्यक्षीणैर्भेदं विद्धि। षट् तारतम्यविकल्पनात्। कफः क्षीणः पित्तं क्षीणतरं वातः क्षीणतमः। वातः क्षीणः कफः क्षीणतरः पित्तं क्षीणतमम्। पित्तं क्षीणं कफः क्षीणतरो वातः क्षीणतमः। कफः क्षीणो वातः क्षीणतरः पित्तं क्षीणतमम्। वातः क्षीणः पित्तं क्षीणतरं कफः क्षीणतमः। पित्तं क्षीणं वातः क्षीणतरः कफः क्षीणतमः। एवं पंचविंशतिदोषभेदान् क्षीणैर्दोषैर्विद्धि ॥ ७६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृद्ध और क्षीण दोष के गुण—

वि०—जिस प्रकार वृद्धि में पचीस भेद हैं, इसी प्रकार क्षीण में भी पचीस हैं। २५+२५=५० कुल भेद हुए ॥ ७६ ॥

एकैकवृद्धिसमताक्षयैः षट् ते पुनश्च षट्।
एकक्षयद्वन्द्ववृद्ध्या सविपर्ययया‌ऽपि ते ॥ ७७ ॥

स०—ते सन्निपातस्थदोषास्त्रयः षोढा भवंति। कथमित्याह। वृद्धिश्च समता च क्षयश्च वृद्धिसमताक्षयाः। एकैकस्य वाताद्यन्यतमस्य वृद्धिसमताक्षया एकैकवृद्धिसमताक्षयास्तैरेकैकवृद्धिसमताक्षयैः षट्। यथा। वातो वृद्धः पित्तं समं कफः क्षीणः। पित्तं वृद्धं वातः समः कफः क्षीणः। कफो वृद्धः पित्तं समं वातः क्षीणः। कफो वृद्धो वातः समः पित्तं क्षीणम्। वातो वृद्धः कफः समः पित्तं क्षीणम्। पित्तं वृद्धं कफः समो वातः क्षीणः। एवमेकैकवृद्धिसमताक्षयैः षट्। एकस्य क्षय एकक्षयः द्वंद्वस्य वृद्धिर्द्वंद्ववृद्धिः। एकक्षयसहिता द्वंद्ववृद्धिरेकक्षयद्वंद्ववृद्धिस्तया। किंभूतया। सविपर्ययया सहविपर्ययेण वैपरीत्येन वर्तते तया। एकक्षयद्वंद्ववृद्ध्या पुनरेव षट् दोषभेदाः। वातः क्षीणः पित्तकफौ वृद्धौ। पित्तं क्षीणं वातकफौ वृद्धौ। कफः क्षीणो वातपित्ते वृद्धे। एवमेकक्षयद्वंद्ववृद्ध्या त्रयो भेदाः। सविपर्ययया च वृद्ध्या त्रयो दोषभेदाः। द्वंद्वक्षयैकदोषवृद्ध्या द्वंद्वक्षयसहितैकदोषवृद्धिस्तया। यथा। वातपित्ते क्षीणे श्लेष्मा वृद्धः। वातकफौ क्षीणौ पित्तं वृद्धम्। पित्तकफौ क्षीणौ वातो वृद्धः। इति सविपर्ययया वृद्ध्या त्रयो दोषभेदाः। एवं सन्निपातभेदाः। द्विरूपया वृद्ध्या षडेते ॥ ७७ ॥

क्षय, वृद्धि और समता के भेद—

वि०—एक दोष की वृद्धि, एक दोष की समता और एक दोष की क्षीणता से छः भेद होते हैं। (५०+६=५६) और फिर छै भेद हैं; यथा-एक दोष का क्षय और दो दोषों की वृद्धि-इस प्रकार तीन; तथा इससे विपरीत-एक दोष की वृद्धि और दो दोष का क्षय तीन; इस प्रकार छः। ५६+६=६२ योग ॥ ७७ ॥

भेदा द्विषष्टिर्निर्दिष्टाः त्रिषष्टिः स्वास्थ्यकारणम्।

स०—पंचभेदगणनया दोषाणां भेदा द्विषष्टिर्निर्दिष्टाः। त्रिषष्टीनां पूरणो यो दोषभेदः स स्वास्थ्यकारणमारोग्यहेतुर्धातुसाम्यात्। अत्र हि स्वप्रमाणस्था वातपित्तकफाः। ये च दोषभेदा द्विषष्टिस्ते च रोगकारणमित्यर्थादुक्तं भवति। अत्र च रोगहेतुत्वे दोषवैषम्यं कारणम्। त्रिषष्ट इति तस्य डडिति डट्।

वि०—इस प्रकार बासठ भेद कह दिये हैं। तिरसठवां भेद स्वास्थ्य का कारण है-अर्थात् वात-पित्त-कफ की समता होना स्वास्थ्य है।

वक्तव्य—यथा-'समवातपित्तश्लेष्माणं ह्यरोगमिच्छन्ति भिषजः, यतः प्रकृतिश्चारोग्यम्' (चरक वि०)

अधुना रसादिभेदादानंत्यं दोषभेदानां दर्शयन्नाह—

संसर्गाद्रसरुधिरादिभिस्तथैषां
दोषांस्तु क्षयसमताविवृद्धिभेदैः।
आनन्त्यं तरतमयोगतश्च यातान्
जानीयादवहितमानसो यथास्वम् ॥७८॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने दोषभेदीयो नाम द्वादशोऽध्यायः ॥ १२ ॥

स०—न केवलं द्विषष्टिभेदभिन्नान् दोषान् जानीयात्। आनंत्यं च गतान्विद्यात्। कथमानंत्यमित्याह। एषां दोषभेदानां यथास्वं रसादिभिः संयोगात्। तथैषामेव क्षयादिभेदैस्तरतमयोगाच्चाऽऽनन्त्यं गतान्विद्यात्। तत्र दिङ्मात्रं शिष्यव्युत्पत्तये प्रदर्श्यते। तत्र रसे वातपित्तकफानां पृथक् त्रयो भेदा भवंति पृथक् त्रीन् विद्धदीत्यनुसारेण। संसर्गस्त्रिधा। तत्र तु तान् रसमेवाऽधिकृत्य नव विद्धि। कथम्। पूर्ववत्। त्रीनेव समया वृद्ध्या षडेकस्याऽतिशायने। एवं पूर्वोक्तेन न्यायेन रसमधिकृत्य संसर्गं योजयित्वा संनिपाते योजनीयाः। यथा त्रयोदश समस्तेषु। कथम्। षड्द्व्येकातिशयेन तु। एकं तुल्याधिकैः षट् च तारतम्यविकल्पनादिति समानं पूर्वेण। रसाख्यं स्थानं केवलमधिकम्। पंचविंशतिमित्येवं वृद्धैः क्षीणैश्च तावतो रसमधिकृत्य भेदान् विद्धि। इत्येवं रुधिरमांसादिभिर्योज्यम्। एकैकापह्वसेनेत्येवं द्विषष्टिभेदभिन्नानां दोषाणां रसादिभिः सप्तभिः संयोगाच्चत्वारि शतान्येकचत्वारिंशदधिकानि स्युः। शक्रदादिसंसर्गात्क्षीणतमादिभेदैश्च चिंत्यमाना दोषा आनन्त्यं यांतीति। रसभेदे दोषभेदे चाऽवगते वैद्यस्य हेतुलक्षणोपक्रमेषु मोहो न भवति। तथा च मुनिः। यः स्याद्रसविकल्पज्ञः स्याच्च दोषविकल्पवित्। न स मुह्येद्विकाराणां हेतुलिंगोपपत्तिष्विति। क्षौञ्जौगस्त्रिदशभवा प्रहर्षिणी स्यात् ॥ ७८ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां दोषभेदीयो नाम द्वादशोऽध्यायः॥ १२ ॥

दोष-भेदों की अनन्तता—

वि०—रस, रक्त आदि संसर्ग से तथा क्षय, समता, वृद्धि के भेदों से, एवं तर-तम के संयोग से अगणित दोषों को इनके अपने-अपने लक्षणों से दत्तचित्त होकर—तन्मय बनकर जानना चाहिये ॥ ७८ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का दोषभेदीय नामक बारहवाँ अध्याय समाप्त हुआ ॥ १२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रयोदशोऽध्यायः

पूर्वेऽध्याये विकृतान् दोषानाश्वेवोपक्रमेदित्युक्तमतस्तमेवोपक्रमं दर्शयितुं दोषोपक्रमणीयमारिरिप्सुरिदमाह—

अथातो दोषोपक्रमणीयमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

स०—दोषाणामुपक्रमणं चिकित्सा दोषोपक्रमणं तस्मै हितो दोषोपक्रमणीयः । शेषं पूर्ववद्योऽयम् ।

वि०—अब इसके आगे दोपोपक्रमणीय अध्याय का व्याख्यान करेंगे-जैसा कि आत्रेय आदि महर्षियों ने कहा था।

सर्वदोषेभ्यश्च प्रधानो वात इति तदुपक्रमं पूर्वमाह—

वातस्योपक्रमः स्नेहः स्वेदः संशोधनं मृदु ।
स्वाद्वम्ललवणोष्णानि भोज्यान्यभ्यङ्गमर्दनम् ॥ १ ॥
वेष्टनं त्रासनं सेको मद्यं पैष्टिकगौडिकम् ।
स्निग्धोष्णा बस्तयो बस्तिनियमः सुखशीलता ॥२॥
दीपनैः पाचनैः सिद्धाः स्नेहाश्चानेकयोनयः ।
विशेषान्मेद्यपिशितरसतैलानुवासनम् ॥ ३ ॥

स०—वातस्योपक्रमः स्नेहः । श्रेष्ठत्वाच्च प्रागुपादानं स्नेहस्य । ततः स्वेदः । कृतस्नेहस्वेदस्य च संशोधनं तच्च मृदु न तीक्ष्णम् । तीक्ष्णस्य वातकोपहेतुत्वात् । तथा स्वाद्वादीनि भोज्यानि भक्ष्याणि । अभ्यंगश्च मर्दनं चाऽभ्यंगमर्दनं पाण्यादिना । वेष्टनं शाटकादिना । त्रासनं खड्गव्यग्रोग्रहस्तराजपुरुषादिदर्शनादिना । ननु भीशोकादिभिर्मारुतस्य कोप उक्तः वक्ष्यति हि । क्रियाऽतियोगभीशोकेत्यादि । तत् कथं त्रासनं वायोरुपक्रमः । उच्यते । भयं वातप्रकोपहेतुर्न तु त्रासनम् । त्रासनं हि सर्ववातावजयने तस्माद्वातोपशांत्यर्थं त्रासनं युक्तम् । यथोन्मादादिषु । तथा च वक्ष्यति । वातोन्मादे दर्पणाश्वासनत्रासभयताडनेत्यादि । तथा सेकादिरुपक्रमः । सेको दशमूलक्वाथादिना । तथा मद्यं पैष्टिकं गौडिकं वातस्योपक्रमः । तथा स्निग्धोष्णा बस्तयो वातस्योपक्रमः । स्निग्धोष्णा इत्युक्त्या रूक्षशीतं बस्तिमत्र निराकरोति । तथा बस्तिनियमो यथाविधि बस्तिदानं वातस्योपक्रमोऽथवा बस्तिनियमः कर्मकाले योगाख्यस्त्रिपंचाशद्बस्तिसंख्यः प्राक्स्नेह एकः पंचांत इत्येवमादिना ग्रंथेन यो दर्शितः स वातस्योपक्रमः । तथा सुखं शीलयतीति सुखशीलः । शीलिकामिभिक्ष्याचारिभ्यो णः । तस्य भावः सुखशीलता सौख्यवृत्तित्वम् । तिलप्रियालाक्षोडादयोऽनेका योनयो येषां तेऽनेकयोनयः स्नेहास्ते च वातस्योपक्रम इति योज्यम् । किंभूताः दीपनपाचनैर्द्रव्यैः सिद्धाः विशेषेण पुष्टमांसरसस्तैलमनुवासनं च वातस्योपक्रमः ॥ १-३ ॥

वायु का उपचार—

वि०—वायु का उपक्रम (चिकित्सा)—स्नेह, स्वेद, मृदु-संशोधन, स्वादु, अम्ल, लवण, और उष्ण भोजन, अभ्यङ्ग, मर्दन, वेष्टन (लपेटना); डराना, सेक, पिट्ठी तथा गुड़ से बने मद्य, स्निग्ध एवं उष्ण बस्तियाँ, बस्ति का नियमित प्रयोग, आराम से रहना, दीपन-पाचन से सिद्ध (दीपन-चित्रकादि, पाचन मुस्तादि से पकाये तिल-तैल; अतसीतैल, गोघृत, भैंस का घृत आदि) अनेक योनि वाले स्नेह; विशेषकर मेदुर-मांसरस, तैल से अनुवासन (स्नेह बस्ति) वायु के उपक्रम हैं ॥ १-३ ॥

पित्तस्योपक्रमं वक्ति—

पित्तस्य सर्पिषः पानं स्वादुशीतैर्विरेचनम् ।
स्वादुतिक्तकषायाणि भोजनान्यौषधानि च ॥ ४ ॥
सुगन्धिशीतहृद्यानां गन्धानामुपसेवनम् ।
कण्ठे गुणानां हाराणां मणीनामुरसा धृतिः ॥ ५ ॥
कर्पूरचन्दनोशीरैरनुलेपः क्षणे क्षणे ।
प्रदोषश्चन्द्रमाः सौमं हारि गीतं हिमोऽनिलः ॥ ६ ॥
अयन्त्रणसुखं मित्रं पुत्रः सन्दिग्धमुग्धवाक् ।
छन्दानुवर्तिनो दाराः प्रियाः शीलविभूषिताः ॥ ७ ॥
शीताम्बुधारागर्भाणि गृहाण्युद्यानदीर्घिकाः ।
सुतीर्थविपुलस्वच्छसलिलाशयसैकते ॥ ८ ॥
साम्भोजजलतीरान्ते कायमाने[1] द्रुमाकुले ।
सौम्या भावाः पयः सर्पिर्विरेकश्च विशेषतः ॥ ९ ॥

स०—उपक्रम इति वर्तते । सर्पिषः पानमित्यादि पित्तस्य प्रकुपितस्योपक्रमः । तथा हाराणां मुक्तादाम्नां कंठे गुणसंज्ञानां वक्षसा धृतिर्धारणम् । मणीनां मरकतचंद्रकांतपद्मरागादीनाम् । तथा कर्पूरादिभिः प्रतिक्षणमनुलेपनम् । तथा प्रदोषादिः पित्तस्योपक्रम इति वर्तते । प्रदोषो रात्रिमुखम् । सुधाया इदं सौधं धवलगृहम् । हारि रम्यं गीतं गानम् । तथा मित्रमयंत्रणसुखं न विद्यते यंत्रणा यस्मिंस्तथाविधं सुखं यस्मिंस्तथाविधं मित्रम् । तथा संदिग्धाऽव्यक्ता मुग्धाऽप्रौढा वाग् गीर्यस्य स एवंविधः पुत्रः । दाराः कलत्राणि वल्लभाः सुशीलाश्च । तथा छंदानुवर्तिनश्चित्तानुगुणकारिणः । शीतांबुधारा गर्भेऽभ्यंतरे येषां तथाविधानि गृहाणि । तथोद्यानमुपवनम् । तथा दीर्घिकाः गृहपुष्करिण्यः । तथा सौम्या भावाः पित्तस्योपक्रमः । क्व स्थितस्य । सुतीर्थविपुलस्वच्छसलिलाशयसैकते यः कायमानस्तृणगृहं तस्मिन् । शोभनं तीर्थं यस्य स एवं सुतीर्थश्चासौ विततविमलजलाशयश्च सुतीर्थविपुलस्वच्छसलिलाशयस्तस्य समीपे सैकतं तस्मिन् । सिकता अस्मिन्देशे संतीति सिकताशर्कराभ्यां चेत्यण् । समूहार्थे ठग्दुर्निवारः स्यात् । कीदृशे कायमाने सांभोजं सपद्मं जलं यस्मिंस्तीरांते स एवं सांभोजजलस्तीरांतो यस्मिन् कायमाने तस्मिन् तथा द्रुमैर्वृक्षैराकुले व्याप्ते । विशेषेण तु पयो घृतं विरेकश्चोपक्रमः ॥ ४-९ ॥

१. कायमान का सामान्य अर्थ काय = शरीर के मान = प्रमाण, अर्थात् शरीर की लम्बाई चौड़ाई के अनुसार होता है पर यहाँ वैसे ही तृण-पत्र आदि से बने झोपड़े अर्थ लेना चाहिये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

पित्त का उपचार—

वि०— पित्त की चिकित्सा—घृत पान; मधुर और शीतल द्रव्यों से विरेचन, मधुर, तिक्त, कषाय रस वाले भोजन और औषध; सुगन्धित, शीतल और मन के प्रिय गन्धों का सेवन; गले में लटकने वाली मुक्तामालाओं के मनकों का छाती पर धारण करना; थोड़ी-थोड़ी देर में कर्पूर, चन्दन, खस का लेप करना; रात्रि का प्रथम भाग, चन्द्रमा, धवलगृह; मनोहर संगीत; शीतल वायु; जिनमें किसी प्रकार का भेद या शर्म नहीं ऐसे हमजोली मित्र; अव्यक्त-कोमल वाणी वाले पुत्र;[1] चित्त के अनुकूल चलने वाली, शील से शोभित प्रिय स्त्रियाँ, शीतल जल की धारायें जिनके अन्दर चल रही हैं ऐसे घर, बाग की बावड़ियाँ; उत्तम घाट वाले विपुल स्वच्छ तालाब के समीप रेतीले स्थान में, सुन्दर कमल वाले तालाब के किनारे, वृक्षों से घिरे झोपड़े, मन को प्रसन्न करने वाले पदार्थ; (तथा आग्नेयगुणरहित) विशेष कर दूध, घी और विरेचन—ये पित्त की शान्ति करते हैं ॥ ४-९ ॥

अधुना श्लेष्मण उपक्रममाह—

श्लेष्मणो विधिना युक्तं तीक्ष्णं वमनरेचनम् ।
अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम् ॥ १० ॥
दीर्घकालस्थितं मद्यं रतिप्रीतिः प्रजागरः ।
अनेकरूपो व्यायामश्चिन्ता रूक्षं विमर्दनम् ॥ ११ ॥
विशेषाद्वमनं यूषः क्षौद्रं मेदोघ्नमौषधम् ।
धूमोपवासगण्डूषा निःसुखत्वं सुखाय च ॥ १२ ॥

स०—विधिना शास्त्रोक्तेन युक्तं तीक्ष्णं वमनविरेचनं कफस्योपक्रमः। तथाऽन्नं रूक्षादिगुणयुक्तम्। तथा मद्यं पुराणम्। रतिप्रीतिप्रजागरः। रमणं रतिस्तस्याः प्रीतिः सुखम्। तथा प्रजागरोऽतिजागरणं तथाऽनेकरूपो व्यायामो नियुद्धधनुराकर्षणादिकः। विशेषेण तु वमनं यूषो माक्षिकं तथा मेदोघ्नं यदौषधं तच्च धूमादयश्च। तथा निःसुखत्वं सुखाभावो दुःखरूपत्वम्। वाग्देहमनःकर्मणो दुःखदस्याऽनुष्ठानाद्यदसुखमुत्पद्यते तच्च श्लेष्मणो वृद्धस्य विकारकरणहेतोरुपशमात्सुखाय जायते ॥ १०-१२ ॥

कफ का उपचार—

वि०—कफ की चिकित्सा—विधिपूर्वक दिये गये तीक्ष्ण वमन-विरेचन; रूक्ष, अल्प, तीक्ष्ण, उष्ण, कटु, तिक्त एवं कषाय अन्न; चिरकाल स्थित (पुरान) मद्य; सम्भोग में प्रीति, रात्रि में जागरण; अनेक प्रकार का व्यायाम; चिन्ता (मानसिक श्रम), रूक्ष उपचार और मर्दन करना; विशेषकर—वमन; यूष, मधु, मेद-नाशक औषध; धूमपान; उपवास; गण्डूष; सुख का अभाव (कष्टकर स्थिति) यह सुख के लिये हैं अर्थात् कफनाशक हैं ॥ १०-१२ ॥

इदानीं संसर्गोपक्रमं वक्ति—

उपक्रमः पृथग्दोषान् योऽयमुद्दिश्य कीर्तितः ।
संसर्गसन्निपातेषु तं यथास्वं विकल्पयेत् ॥ १३ ॥

स०—पृथक् प्रत्येकं दोषान्वातादीनुद्दिश्याऽऽश्रित्य य उपक्रमः कीर्तित उक्तः संसर्गसंनिपातेषु च तमुपक्रमं यथास्वं विकल्पयेत। प्रवृद्धदोषानुसारेण निरूप्य प्रयुंजीतेत्यर्थः। यथा वातपित्तसंसर्गे वातपित्तोपक्रमौ मिश्रौ। वातकफसंसर्गे वातकफोपक्रमावित्यादि एवं संनिपातेऽपि निरूप्योपक्रमः प्रयोज्यः ॥ १३ ॥

मिलित दोषों के उपचार—

वि०—पृथग्दोषों को लक्ष्य में रखकर जो यह चिकित्सा कही गयी है इसको दोषों के संसर्ग एवं सन्निपात में दोष के अनुसार बरतना चाहिये ॥ १३ ॥

संसर्गे भूयोऽप्युपक्रममाह—

ग्रैष्मः प्रायो मरुत्पित्ते वासन्तः कफमारुते ।
मरुतो योगवाहित्वात् कफपित्ते तु शारदः ॥ १४ ॥

स०—उपक्रम इति वर्तते। वातपित्तसंसर्गे ग्रीष्मर्तुचर्याविहित उपक्रमः प्रायेण योज्यः। यथाऽतोऽस्मिन् पटुकट्वम्लव्यायामार्ककरांस्त्यजेत्। भजेन्मधुरमेवान्नमित्यादि सर्वं त्याज्यं सेव्यं च। कफमारुतसंसर्गे वसंतर्तुभवस्तीक्ष्णैर्वमननस्याद्यैरित्यादिरुपक्रमो योज्यः। प्रायेणेत्यत्रापि योज्यम्। ननु ग्रीष्मेऽत्यंतशीतसेवोक्ता वसंते त तीक्ष्णं वमननस्याद्युक्तमेतच्च द्वयमप्येकांतेन पवनहेतुः। तत्कथमुक्तं ग्रैष्मः प्रायो मरुत्पित्ते वासंतः कफमारुत इत्याशंक्याह। मरुतो योगवाहित्वात्। अत्राऽयं भावः। यदा किल वायुः पित्तेन युज्यते तदा दाहादिकृन्न। पित्ते समे सति दाहादिकं कर्तुं मरुत्सामर्थ्यमपि च ग्रीष्मे शीतमेव सेव्यत इति नायं नियमः। किं तर्हि स्निग्धाद्यपि तस्मान्मरुत्पित्ते ग्रीष्मविधिर्युक्तः। वसंते च कफयोगात् कफविकारकार्येव भवति योगवाहित्वादतो वासंतस्तीक्ष्णो वमननस्यादिर्न्योज्यः। एवं पित्तेन सह स्थितस्य वायोः पित्तचिकित्सा कफेन सह स्थितस्य वायोः कफचिकित्सा स्वभाववशादिति भावः। कफपित्तसंसर्गे तु शारदः शरदृतुचर्याविहित उपक्रमः। संनिपाते क उपक्रमः ब्रूमः। वर्षर्तुचर्याविहितः। प्रावृषि हि दोषत्रयकोप उक्तोऽत एवाह। भजेत्साधारणं सर्वमित्यादि ॥ १४ ॥

अन्य उपचार—

वि०—वायु योगवाही होने से वायु और पित्त के संसर्ग में ग्रीष्म ऋतु का उपचार; कफ और वायु में वसन्त ऋतु का तथा कफ और पित्त में शरद ऋतु का उपचार करना चाहिये ॥ १४ ॥

१. कालिदास ने कहा भी है—
'आलक्ष्यदन्तमुकुलाननिमित्तहासैः-
रव्यक्तपेशलवचोरमणीयवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति, ॥'

Digitized by Madhuban Trust, Delhi

वक्तव्य— कहा भी है—'योगवाही परं वायुः संयोगादुभयार्थकृत्। दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात्॥' इसलिये पित्त युक्त वायु में पित्त की शान्ति से, कफ युक्त वायु में कफ की शान्ति से वायु शान्त हो जाती है। तीनों दोषों का सन्निपात होने पर वर्षा ऋतु का उपचार करना चाहिये; इसी से कहा है—'भजेत्साधारणं सर्वम्॥'

संप्रत्युपक्रमस्य कालं वक्ति—

चय एव जयेद्दोषं कुपितं त्वविरोधयन्।
सर्वकोपे बलीयांसं शेषदोषाविरोधतः॥ १५॥

स०—चयकाल एव दोषं वातादिं जयेत्। तथा छिन्नमूलत्वान्न विकुर्वीत। न कोपकालं प्रतीक्षेतेति सूचनार्थं एवशब्दः। कथं जयेदित्याह। कुपितं दोषमविरोधयन्। सर्वदोषकोपे केवलं बलवत्तरं दोषं जयेत्। कथम्। शेषदोषाविरोधेन॥ १५॥

उपचार का समय—

वि०—दोष को उसके संचय काल में ही शान्त करना चाहिये। यदि दोष कुपित अवस्था में आ जाये तब (दूसरे दोषों से) विना विरोध के इसको शान्त करे। तीनों दोषों के कुपित होने पर बलवान् दोष को—शेष दोषों का विरोध न करते हुए शान्त करे॥ १५॥

वक्तव्य— इस विषय में कई पक्ष हैं—

(१) वात पित्त-कफ का समान बल होने पर प्रथम वायु को शान्त करे। क्योंकि नेता के नाश से सेना स्वयं भाग जाती है।

(२) स्थान की दृष्टि से पहले कफ को, फिर पित्त को और पीछे वायु को शान्त करना चाहिये। क्योंकि आमाशय जो कफ का स्थान है वह पहले शुद्ध हो तो आहार, औषध आदि का मार्ग शुद्ध होने पर ही आगे कार्य होगा।

(३) सुश्रुत की मान्यता है कि ज्वर और अतिसार में पहले पित्त; फिर कफ एवं अन्त में वायु को शान्त करना चाहिये। क्योंकि इन रोगों में पित्त का विशेष महत्त्व होता है।

(४) जो दोष अपने आशय में सबसे अधिक बढ़ा हो पहले उसे शान्त करना चाहिये।

इन सबका उपयोग चिकित्सा में अवस्था भेद से होता है। विशेष विवेचन संग्रह (सूत्र अ. २१) में देखिये।

कुतो हेतोरित्याह—

प्रयोगः शमयेद्व्याधिमेकं योऽन्यमुदीरयेत्।
नाऽसौ विशुद्धः शुद्धस्तु शमयेद्यो न कोपयेत्॥ १६॥

स०—प्रयोगो व्याधिं शमयेदन्यमन्यं व्याधिमुदीरयेत्प्रकोपयेन्नाऽसौ विशुद्धो न श्रेष्ठ इत्यर्थः। स तु विशुद्धः प्रयोगो यः शमयेद्व्याधिं न कोपयेत्। तस्मादन्यं व्याधिमविरोधयन् व्याधिं जयेत्॥ १६॥

विरुद्ध उपचार नहीं करने का हेतु—

वि०—जो प्रयोग (उपचार) एक रोग को शान्त करके दूसरे रोग को उत्पन्न करता है, वह श्रेष्ठ प्रयोग नहीं है। शुद्ध (श्रेष्ठ) प्रयोग वह है-जो कि रोग को शान्त करे, परन्तु दूसरे विकार को उत्पन्न न करे॥ १६॥

अथ कथं दोषाः कोष्ठाच्छाखास्थिमर्मसु यांतीत्याह—

व्यायामादूष्मणस्तैक्ष्ण्यादहिताचरणादपि।
कोष्ठाच्छाखास्थिमर्माणि द्रुतत्वान्मारुतस्य च॥१७॥
दोषा यान्ति—

स०—कोष्ठादुदराच्छाखास्थिमर्माणि दोषा यांति। कुत इति हेतुचतुष्टयमाह। व्यायामादिभिः शाखास्थिमर्माणि दोषा यांति। तत्र व्यायामोपजातश्रमस्योर्ध्वं प्रपन्नः पवनो व्यायामकृतक्षोभश्रमोष्मादिभिः प्रशिथिलं चलं च दोषं स्वास्पदाच्च्यावयित्वा पर्याकुलं शाखादिषु क्षिपति। तथाऽन्यातपादिसंबंधिन ऊष्मणस्तैक्ष्ण्यात्तीक्ष्णेन ह्यूष्मणा विलायिता दोषास्तेनैव चोष्मणा विवृतेषु स्रोतोमुखेषु सत्सु शाखादीन् यांति। अहितेत्यादि। अहितेन सेवितेन दोषाः स्वप्रमाणादतिरिच्यमानाः कोष्ठमापूर्य वार्षिका इव जलौघा निम्नोन्नतानीव शाखास्थिमर्माणि प्रपद्यंते। अपिः समुच्चये। द्रुतत्वादित्यादि। द्रुतत्वाच्छीघ्रवाहित्वान्मारुतस्य कोष्ठाच्छाखास्थिमर्माणि दोषा यांति॥ १७॥

कोष्ठ से शाखादि में दोषों का जाना—

वि०—व्यायाम के कारण, उष्णता से, तीक्ष्णता से; अहित विहार से वायु के द्रुतगामी होने से (उससे प्रेरित होकर) दोष कोष्ठ से शाखा (बहिर्मार्ग) अस्थि और मर्म (मध्य मार्ग) में पहुँच जाते हैं॥ १७॥

शाखादिभ्यः कथं दोषाः कोष्ठं यांतीत्याह—

—तथा तेभ्यः स्रोतोमुखविशोधनात्।
वृद्ध्याऽभिष्यन्दनात्पाकात्कोष्ठं वायोश्च निग्रहात्॥१८॥

स०—स्रोतसां मुखानि तेषां विशोधनं विवरणं तस्माद्दोषाः कोष्ठं यांति। तथा वृद्ध्यादिभिः। वृद्धिः स्वप्रमाणातिरेकः। वृद्धा हि दोषाः स्वानि स्रोतांस्यापूर्य कोष्ठं यांति। अभिष्यंदनं च नाम्नितापादितीक्ष्णोष्णादिसंश्लेषादेवाऽपि तु क्षीरा द्यभिष्यंदिभोजनादपि। एवं पाकात्। पाचनादिभिः पक्वा दोषाः क्वचिदनासज्जंतः कोष्ठं यांति। किंच। वायोश्च निग्रहात्। चशब्दान्न केवलं पूर्वेभ्यो हेतुभ्यो यावद्वाय्वप्रेरणाच्चेत्यर्थः॥ १८॥

शाखादि से कोष्ठ में दोषों का जाना—

वि०—स्रोतों के मुखों का शोधन होने से (खुलने से); दोषों में वृद्धि, अभिष्यन्दन (विलयन) एवं पाचन होने से, तथा वायु के नियन्त्रित हो जाने के कारण दोष शाखा, अस्थिसन्धि और मर्म में से कोष्ठ में पहुँच जाते हैं॥ १८॥

कोष्ठस्थाः दोषाः किं कुर्युरित्याह—

तत्रस्थाश्च विलम्बेरन् भूयो हेतुप्रतीक्षिणः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते कालादिबलं लब्ध्वा कुप्यन्त्यन्याश्रयेष्वपि ॥१९॥

स०—तत्रस्थाः कोष्ठस्थाश्च दोषा विलंबेरन्न रोगानुत्पादयेयुर्यस्मात्ते भूयो हेतुप्रतीक्षिणः। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनाद्धेतौ प्रथमा। भूयो हेतुप्रतीक्षित्वादित्यर्थः। वृद्धोऽपि हि दोषः कोष्ठे शाखादौ वा मार्गांतरे गतो हीनशक्तित्वान्न रोगोत्पादनसमर्थो भवति। यद्येवं किं कदाचिदप्यन्यस्थानगता दोषा हीनशक्तित्वान् रोगान् कुर्युरित्याह—ते दोषाः कालदेशदूष्यप्रकृत्यपथ्यादेः समानगुणाद्बलं लब्ध्वा कुप्यंति। विकारमुत्पादयंतीत्यर्थः। कुत्र स्थान इत्याह। अन्याश्रयेष्वपि कोष्ठाश्रयाः शाखादिमर्मस्वपि। शाखामर्माश्रिताः कोष्ठेष्वपीत्यर्थः। न केवलं स्वस्थानस्था एव कुप्यंतीति सूचनार्थोऽपिशब्दः ॥ १९ ॥

कोष्ठस्थित दोषों का कार्य व कुपित होने का कारण—

वि०—दोष कोष्ठ में आकर रुक जाते हैं; (रोग उत्पन्न नहीं करते) और अधिक कारण की प्रतीक्षा करते रहते हैं। ये दोष काल-देश आदि का बल मिलने पर कुपित होकर दूसरे स्थानों में भी कुपित होते हैं-रोग को उत्पन्न करते हैं ॥ १९ ॥

इदानीं परस्थानगतानां दोषाणां विकल्पेन चिकित्सामुपदिशन्नाह—

तत्रान्यस्थानसंस्थेषु तदीयामबलेषु तु।
कुर्याच्चिकित्सां स्वामेव बलेनान्याभिभाविषु ॥ २० ॥

स०—तत्र तेषु वातादिष्वन्यस्थानसंस्थेषु। अन्यस्य स्थानमन्यस्थानं तत्र संतिष्ठंतेऽन्यस्थानसंस्थास्तेषु परस्थानगतेषु तदीयां स्थानिदोषसंबंधिनीमेव चिकित्सां कुर्यान्न स्वकीयाम्। तस्य परस्थानदोषस्येयं तदीया ताम्। किंभूतेषु दोषेषु। अबलेषु। तुरवधारणे। अबलेष्वेव न बलवत्सु। बलवत्सु हि स्वामेव चिकित्सां वक्ष्यति। अत एवाह—बलेनात्मीयया शक्त्याऽन्याभिभाविष्वन्यस्थानिदोषमभिभवितुं शीलं येषां तेऽन्याभिभाविनः। स्थानिदोषं पराभूय तत्र ये संतिष्ठंत इत्यर्थः। तेषु स्वामेव चिकित्सां कुर्यादित्यर्थः। किमेष एव नियमो यदन्यस्थानगतेष्वबलेष्वागंतुषु स्थानिदोषसंबंधिनीं चिकित्सां कुर्यात्। बलवत्सु पुनरागंतुसंबंधिनीं चिकित्सां कुर्यात् ॥ २० ॥

अन्यस्थानगत दोषों की चिकित्सा—

वि०—अन्य स्थान में पहुँचे हुए निर्बल दोष की चिकित्सा उस स्थान-सम्बन्धी, अर्थात् वह स्थान जिस दोष विशेष का हो उसके अनुसार, करनी चाहिये। किंतु जिस दोष ने बलवान होने के कारण दूसरे स्थानों पर पहुँच कर स्थानीय दोष अर्थात् जिस दोषविशेष का वह स्थान है—उसे दबा दिया हो वहाँ पर उस बलवान दोष की अपनी चिकित्सा करे ॥ २० ॥

अथ पक्षांतरेऽपि कुत्रचित्क्वचिद्विधत इत्यत आह—

आगन्तुं शमयेद्दोषं स्थानिनं प्रतिकृत्य वा।

स०—स्थानिनं दोषं प्रतिकृत्य यथाऽसौ स्थानिदोष आगंतुदोषचिकित्सानिर्वर्तनान्न विकारं कुर्यात्तथा तस्य पूर्वं प्रतीकारं कृत्वा पश्चात् स्वैरेवोपक्रमैरबलिनमप्यागंतुं दोषं शमयेच्चिकित्सेत्। न केवलमन्यस्थानसंस्थेष्वागंतुष्वबलेषु स्थानिदोषचिकित्सां कुर्याद्यावदागंतुदोषचिकित्सामपि कुर्यादित्यर्थः। अथाऽसौ स्थानिदोष आगंतुदोषेण बलवत्त्वादभिभूयते ततोऽस्य विकारकरणं प्रत्यसमर्थत्वात्तत्प्रतीकारमकृत्वैव चागंतुं शमयेदिति वाशब्दार्थः। अन्यस्थानसंस्थेष्विति बहुवचननिर्देशः पर्यायेण दोषाणां स्थितत्वादन्यथा द्वयोरेकस्य वाऽन्यस्थानस्थितत्वं संभवति न त्रयाणाम्।

वि०—आगन्तु दोष में—स्थानिक दोष की चिकित्सा करके आगन्तुक दोष (यदि यह अधिक बलवान् नहीं है, तब) की चिकित्सा करे। यदि आगन्तुक दोष बलवान् हो तब आगन्तुक दोष की चिकित्सा करके पीछे से स्थानिक दोष की चिकित्सा करे। (हेमाद्रि का मत है कि स्थानीय और आगन्तु दोनों दोष समबल हों तो पहिले स्थानीय दोष की चिकित्सा कर बाद में आगन्तुक की अथवा पहिले आगन्तुक की, बाद में स्थानीय दोष की चिकित्सा करे।)

तिर्यग्गतेषु दोषेषु यत्कार्यं तदाह—

प्रायस्तिर्यग्गता दोषाः क्लेशयन्त्यातुरांश्चिरम् ॥२१॥
कुर्यान्न तेषु त्वरया देहाग्निबलवित् क्रियाम्।
शमयेत्तान् प्रयोगेण सुखं वा कोष्ठमानयेत् ॥२२॥
ज्ञात्वा कोष्ठप्रपन्नांश्च यथासन्नं विनिर्हरेत्।

स०—तिर्यग्गतादोषाः प्रायो बाहुल्येनाऽऽतुरांश्चिरं क्लेशयंति पीडयंति। तेषु तिर्यग्गतेषु दोषेषु त्वरया शीघ्रमेव क्रियां चिकित्सां न कुर्याद्वैद्य इति शेषः। कीदृशो वैद्यो देहाग्निबलाभिज्ञः। कथं तेषामुपक्रमः कार्य इत्याह—तांस्तिर्यग्गतान् दोषान् प्रयोगेण शास्त्रविहितेन शमयेत्। सुखं वेति। यथा वा देहपीडा न भवति तथा क्रमेण कोष्ठमानयेद् वृद्ध्याऽभिष्यंदनादित्यादिना। ज्ञात्वेत्यादि। कोष्ठगतांश्चावगत्य यथाऽऽसन्नं विनिर्हरेत्। यो यस्यासन्नो मार्गो गुदं मुखं घ्राणं वा तेनैव यथाऽऽसन्नं वमनविरेचनादिना निष्कासयेदित्यर्थः ॥ २१-२२ ॥

तिर्यक्स्थानगत दोषों में कर्तव्य—

वि०—तिरछे (शोधन मार्ग के बाहर शाखादि) में गये हुए दोष प्रायः रोगी को देर तक पीड़ित करते हैं। देह, अग्नि और बल को जानने वाला वैद्य इन दोषों में शीघ्रता में चिकित्सा न करे। [अपि तु देह-अग्नि और बल का विचार करके शनैः शनैः चिकित्सा करे]। इन दोषों को शास्त्रविहित प्रयोग से शान्त करे, अथवा सुखपूर्वक [जिससे विशेष कष्ट न हो इस प्रकार] क्रमशः कोष्ठ में ले आये। कोष्ठ में आने पर जो समीप का मार्ग हो उससे बाहर निकाल देवे अर्थात् शिरोविरेचन, वमन, विरेचन आदि द्वारा संशोधन करे ॥ २१-२२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संप्रति साममललिंगमाह—

स्रोतोरोधबलभ्रंशगौरवानिलमूढताः ॥ २३ ॥
आलस्यापक्तिनिष्ठीवमलसङ्गारुचिक्लमाः ।
लिङ्गं मलानां सामानां, निरामाणां विपर्ययः ॥ २४ ॥

स०—स्रोतसां रोधः। बलस्य भ्रंशो हानिर्बलभ्रंशः। गौरवं गुरुत्वम्। अनिलस्य वायोर्मूढता सम्यगसंचारः। आलस्यं तंद्रा। अपक्तिराहारस्याऽपाकः। निष्ठीवो मुखस्रावः। मलस्य पुरीषादेः संगोऽप्रवृत्तिः। अरुचिरन्नानभिलाषः। क्लमो ग्लानिः इत्येतत्सामानां मलानां लिंगं लक्षणम्। निरामाणां विपर्ययोऽस्माद्वैपरीत्यम् ॥ २३-२४ ॥

साम तथा निराम दोष के लक्षण—

वि०—साम (आम युक्त) दोषों के लक्षण—स्रोतों का अवरोध; बल की हानि, भारीपन, वायु का अवरोध, आलस्य, आहार का न पकना, मुखस्राव, पुरीषादि की अप्रवृत्ति, अरुचि, ग्लानि, ये साम दोषों के लक्षण हैं। निराम दोषों के लक्षण इनसे विपरीत होते हैं ॥ २३-२४ ॥

संप्रति आमसंभवमाह—

ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् ।
दुष्टमामाशयगतं रसमामं प्रचक्षते ॥२५॥

स०—ऊष्मणोऽग्नेरल्पबलत्वेन दौर्बल्येनाद्यं प्रथमधातुं रसं रसाख्यमपाचितमामं प्रचक्षते वदंत्याचार्या इति शेषः। किंभूतं रसम्। आमाशयगतम्। तथा दुष्टं वाताद्यनुशयितम्। रसग्रहणं पवनस्य निरासार्थम्। अन्यथा आद्यो धातुर्वाताख्य इत्याशंक्येत। वातादीनामपि हि धारणाद्धातुसंज्ञाऽस्त्येव ॥ २५ ॥

आम का लक्षण—

वि०—आम का लक्षण—अग्नि की दुर्बलता से अपक्व एवं दूषित अर्थात् वातादि दोषों से युक्त आमाशयगत आद्य (प्रथम) रसधातु को आम कहते हैं ॥ २५ ॥

अन्ये दोषेभ्य एवातिदुष्टेभ्योऽन्योन्यमूर्च्छनात् ।
कोद्रवेभ्यो विषस्येव वदन्त्यामस्य सम्भवम् ॥२६॥

स०—अन्येऽपरे आचार्या दोषेभ्य एव वातादिभ्योऽतिदुष्टेभ्योऽन्योन्यमूर्छनात्। परस्परमिश्रीभावादामस्य संभवं कथयंति। केभ्यः कस्येव। यथा कोद्रवेभ्यो विषस्य सम्भवं कथयंति तथा दोषेभ्य आमस्य संभवम् ॥ २६ ॥

मतान्तर—

वि०—अन्य आचार्य—अति दूषित हुए दोषों के परस्पर मिलने से ही आम की उत्पत्ति मानते हैं, जैसे कि कोदो से विष उत्पन्न हो जाता है ॥ २६ ॥

आमेन तेन सम्पृक्ता दोषा दूष्याश्च दूषिताः ।
सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥२७॥

स०—तेन पूर्वोक्तलक्षणेनाऽमेन संपृक्ताः संयुक्ता दोषा दूष्याश्च रसादयः। कीदृशाः। दूषितास्तैरेव वातादिभिः। सहामेन सामा इत्युपदिश्यंते तत्र तत्र प्रदेशे तंत्रे भण्यंते। ये च रोगा ज्वरादयस्तदुद्भवा वातादिदोषसमुत्थास्तेनामेन युक्ताः सामा इत्युच्यंते। यथेहैव। अजीर्ण इव शूलघ्नं सामे तीव्ररुजि ज्वरे इति। आमलक्षणं चैवं पठंति। द्रवं गुर्वनेकवर्णं हेतुः सर्वरोगाणां स्निग्धं पिच्छिलमामं तंतुमदनुबद्धशूलं दुर्गंधीत्यादि। समानां च वातादीनां संग्रहे पृथग्लक्षणमुक्तम्। यथा। वायुरामान्वयः सार्तिराध्मानकृदसंचरः। दुर्गंधमसितं पित्तं कटुकं बहलं गुरु। आविलस्तंतुमान्स्त्यानः प्रलेपी पिच्छिलः कफः। विपर्यये तु पक्वत्वं तथा ताम्रं समेचकम्। पीतं च पित्तमच्छं च श्लेष्माऽच्छः पिंडितोऽथवा। विशदश्च सफेनश्च धवलो मधुरो रस इति ॥ २७ ॥

साम शब्द का अर्थ—

वि०—इस आम से मिले हुए दूषित वातादि दोष और रक्तादि दूष्य साम कहे जाते हैं; और इनसे उत्पन्न रोगों को साम रोग (साम ज्वर, सामातिसार आदि) कहते हैं ॥२७॥

सामा अपि दोषा यादृशा न निर्हार्यास्तादृशान् दर्शयति—

सर्वदेहप्रतिसृतान् सामान् दोषान् न निर्हरेत् ।
लीनान् धातुष्वनुत्क्लिष्टान् फलादामाद्रसानिव ॥२८॥
आश्रयस्य हि नाशाय ते स्युर्दुर्निर्हरत्वतः ।

स०—सामान् दोषान् वातादीन् सर्वस्मिन्देहे प्रविसृतान् व्याप्ताशेषकायान् धातुषु रसाद्येषु लीनान् श्लिष्टाननुत्क्लिष्टान् स्वस्थानादचलितान् न निर्हरेद्वमनादिभिर्न शोधयेत्। कुतः। दुर्निर्हरत्वाद्दुःखेन निर्हर्तुं शक्यत्वात्। ते हि निर्ह्रियमाणा आश्रयस्य शरीराख्यस्य नाशाय स्युः। यावत्तु सर्वदेहप्रविसृता न भवंति यथा भुक्तानंतरं ज्वरोत्पत्तौ नवातिसारे च तथा वमनेन हरीतक्या च यथायोगं निर्हारोऽनुज्ञात एव ग्रन्थकृता। अत्र दृष्टांतमाह। फलादित्यादि। आमादपक्वात्फलादाम्रादे रसो निर्ह्रियमाणो दुर्ह्रियमाणो दुर्निर्हरत्वादाश्रयस्य फलस्य यथा नाशाय भवत्येवं दोषा अपि ॥ २८ ॥

वि०—सम्पूर्ण शरीर में फैले हुए एवं रसादि धातुओं में छिपे हुये तथा अपने स्थान से चलायमान न हुये दोषों को वमनादि द्वारा बाहर नहीं करे क्योंकि इनका निकालना अत्यन्त कष्टकर होने से शरीर के ही नाश के लिये होता है—जिस प्रकार कि कच्चे आम आदि फल से रस निकालने के प्रयास में फल का ही नाश हो जाता है। ॥ २८ ॥

तर्हीदृशे दोषे किं कार्यमित्याह—

पाचनैर्दीपनैः स्नेहैस्तान् स्वेदैश्च परिष्कृतान् ॥२९॥
शोधयेच्छोधनैः काले यथासन्नं यथाबलम् ।

स०—तांस्तथाविधान् दोषान् पाचनैर्ज्वराद्यध्यायोक्तैः। दीपनैरिति पाचनानां स्नेहानां च विशेषणं मध्यदीपवत्। अग्निदीप्तिकृद्भिः पाचनैः स्नेहैश्च परिष्कृतान् परिकल्पितान् कृतसंस्कारान् यथासन्नं यथाबलं च कृत्वा यथोक्ते काले शोधनैर्द्रव्यैः शोधयेत्। यथासन्नमिति। यस्य दोषस्यासन्नो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो मार्गस्तेनैव तं निर्हरेत्। यथाबलमिति। यस्य यावद्बलमातुरस्योत्तमं मध्यममधमं वा तज्ज्ञात्वा मृदुना मध्येन तीक्ष्णेन वा शोधनेन शोधयेदित्यर्थः॥ २९॥

उक्त दोषों में कर्तव्य—

वि०—इस प्रकार के दोषों को पाचनीय, दीपनीय ओषधियों से तथा दीपन और पाचन द्रव्यों से सिद्ध स्नेह और स्वेद से संशोधन योग्य बनाकर समीपस्थ मार्ग से दोष के बलानुसार यथोक्त काल में शोधन द्रव्यों से शोधन करे॥ २९॥

कस्य को मार्ग आसन्न इत्याह—

हन्त्याशु युक्तं वक्त्रेण द्रव्यमामाशयान्मलान्॥३०॥
घ्राणेन चोर्ध्वजत्रूत्थान् पक्वाधानाद् गुदेन च।

स०—द्रव्यं वक्त्रेण युक्तं पीतमामाशयादाशु मलान् हंति। घ्राणेन तु पीतमूर्ध्वजत्रूत्थान्मलानाशु हंति। गुदेन युक्तं पक्वाधानात् पक्वाशयादाशु मलान् हंति॥ ३०॥

दोषों के समीपस्थ मार्ग—

वि०—मुख से दिया द्रव्य आमाशय से दोषों को शीघ्र नष्ट करता है। नासिका से दी औषध जत्रु से ऊपर के दोषों को, तथा गुदा मार्ग से दी औषध पक्वाशय के दोषों को शीघ्र नष्ट करती है॥ ३०॥

इदानीं यादृशा आमा न धार्यास्तादृशान् दर्शयति—

उत्क्लिष्टानध ऊर्ध्वं वा न चामान् वहतः स्वयम्॥३१॥
धारयेदौषधैर्दोषान् विधृतास्ते हि रोगदाः।

स०—अध ऊर्ध्वं वोत्क्लिष्टानामान् स्वयं वहतो यत्नं विनैव प्रवृत्तानौषधैः स्तंभनैर्न धारयेत्। कुत इत्याह। हि यस्मात्ते दोषा विधृता रोगदा ज्वरादिकारिणः॥ ३१॥

नहीं रोकने योग्य दोष—

वि०—ऊपर या नीचे की ओर प्रेरित हुए अथवा स्वयं बाहर निकलते हुए आम दोषों को औषधियों से रोकना नहीं चाहिये। क्योंकि ये रुके हुये दोष रोग को उत्पन्न करने वाले होते हैं॥ ३१॥

वक्तव्य—अतीसार में या नासारक्तपित्त अथवा रक्तार्श में प्रारम्भ में रक्तावरोध नहीं करना चाहिये। यथा- 'स्रवणं चाप्युपेक्षेत लङ्घनैर्वा समाचरेत्'।

तेषु तु यत्कार्यं तदाह—

प्रवृत्तान् प्रागतो दोषानुपेक्षेत हिताशिनः॥ ३२॥
विबद्धान् पाचनैस्तैस्तैः पाचयेन्निर्हरेत वा।

स०—अतोऽस्माद्धेतोः प्रवृत्तान् प्राक् प्रारंभकाले दोषान् हितभोजिन उपेक्षेत संग्रहणेन न धारयेत्। विबद्धानीष त्प्रवृत्तांस्तैस्तैर्यथोक्तैः पाचनैः पाचयेत् पाकं नयेन्निर्हरेद्वा॥ ३२॥

उक्त दोषों में कर्तव्य—

वि०—इसलिये प्रवृत्त हुये दोषों की प्रारम्भ अवस्था में हितकारी भोजन देते हुये उपेक्षा करें। और जो दोष थोड़े प्रवृत्त हो रहे हों (रुके हुये हों), उनको यथोचित पाचन औषधियों से पचावें अथवा शोधन द्रव्यों से बाहर निकाल देवें॥ ३२॥

अथ कः शोधनकाल इत्याह—

श्रावणे कार्तिके चैत्रे मासि साधारणे क्रमात्॥ ३३॥
ग्रीष्मवर्षाहिमचितान् वाय्वादीनाशु निर्हरेत्।

स०—क्रमाद्यथाक्रमं ग्रीष्मचितं वायुं श्रावणे निर्हरेत्। वर्षाचितं पित्तं शरदि निर्हरेत्। हेमंतशिशिरचितं कफं वसन्ते निर्हरेत्। एते हि साधारणाः कालाः। अत एतेषु शोधनं युक्तम्॥ ३३॥

वायु आदि दोषों का शोधन काल—

वि०—शोधन काल—ग्रीष्म में सञ्चित वायु को श्रावण मास में; वर्षा में सञ्चित पित्त को कार्त्तिक में और हेमन्त में सञ्चित कफ को चैत्र में शरीर से बाहर निकाले; ये मास साधारण होने से इनमें शोधन उचित है॥ ३३॥

ननु ग्रीष्मादिष्वेवं कस्माद्वातादयो न शोध्यंत इत्याह—

अत्युष्णवर्षशीता हि ग्रीष्मवर्षाहिमागमाः॥३४॥
सन्धौ साधारणे तेषां दुष्टान् दोषान् विशोधयेत्।

स०—यतो ग्रीष्मादयोऽत्युष्णादियुक्तास्तेषामत्युष्णवर्षशीतानां ग्रीष्मवर्षाहिमागमानां साधारणे संधौ शीतोष्णवर्षसमभावे काले दोषान् वातादीन्दुष्टान्विकृतान्विशोधयेद्विनिर्हरेत्। संधौ हि साम्यमतः शोधनं प्रति न ते कालाः। तथा हि। ग्रीष्मे तावदादानग्लानं खरतरविकिरणतप्तं पिपासावलमाद्याकुलमतिप्रविलीनदोषमतिशिथिलं शरीरं भवति। औषधं पुनरतिखरदिवाकरकरनिर्भरतापादुष्णतीक्ष्णतां यातमतियोगाय संपद्यते। प्रावृषि घनघनौघसंघट्टसादिते सर्वतो जगत्यवसन्नोऽग्निर्भवति। आदानदुर्बलं च शरीरं भवति। ओषधयश्च जलदजलप्लावितमूला अल्पवीर्याः संपद्यन्ते। भूबाष्पसंयोगाच्चोषधीनां विदग्धत्वम्। अतो मध्यतां गता अयोगायैव। शीतकाले चाऽतिशीतोपहतत्वाच्छरीरमतिवातविष्टब्धमतिस्निग्धगुरुदोषं भवति। शीतोपहतत्वाच्चोष्णस्वभावमप्यौषधं संशोधनायोपयुक्तं मदवीर्यतां प्राप्तमयोगायैव कल्पते। तस्माद्युक्तमुक्तमत्युष्णवर्षशीतत्वाद्ग्रीष्मादिषु स्वस्थस्य शोधनमयुक्तम्॥ ३४॥

ग्रीष्मादि में दोष शोधन का निषेध—

वि०—ग्रीष्म ऋतु अति उष्ण हैं; वर्षा काल में वर्षा अधिक होती है; शीत काल में अति शीत होता है; इसलिये इनके साधारण सन्धि काल में उन दूषित दोषों का शोधन करना चाहिये॥ ३४॥

वक्तव्य—तात्पर्य यह है कि संशोधन के लिए वही काल उपयुक्त होता है जब न अतिशीत न अतिउष्ण हो और अत्यधिक वर्षा, शीत और ग्रीष्म के बीच-बीच में शरद; वसन्त और प्रावृट् नामक तीन साधारण ऋतुओं में ही

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संशोधन करना उचित है। इस प्रसङ्ग में तृतीय अध्याय के प्रथम श्लोक की व्याख्या और टिप्पणी भी देखें।

नन्वातुरस्य संशोधनसाध्यस्याऽयमेव संशोधनकालो नेत्याह—

स्वस्थवृत्तमभिप्रेत्य, व्याधौ व्याधिवशेन तु ॥ ३५ ॥

स०—स्वस्थावस्थमधिकृत्याऽयं संशोधनकाल उक्तः। व्याधौ चात्यधिके व्याध्यनुरोधेन शोधनकालः ॥ ३५ ॥

दोष-सोधन योग्य अन्य काल—

वि०—यह नियम स्वस्थवृत्त-स्वरूप व्यक्ति को लक्ष्य में रखकर कहा है; रोग में (आत्ययिक अवस्था में) तो रोग की दृष्टि से संशोधन काल होता है ॥ ३५ ॥

यदि हेमंतादावतिशीतोष्णादौ काले व्याधिः संशोधनसाध्यः संभवेत्तदा कथं संशोधनं कार्यमित्याह—

कृत्वा शीतोष्णवृष्टीनां प्रतीकारं यथायथम्।
प्रयोजयेत्क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥ ३६ ॥

स०—शीतोष्णवृष्टीनां प्रतीकारं कृत्रिमऋतुगुणं यथायथमुत्पाद्य संशोधनादिलक्षणं क्रियां प्रयोजयेत्। कृत्रिमगुणोपधानं च यथा। हेमंते गर्भगृहादि। ग्रीष्मे धारागृहादीनि। क्रियाकालं न हापयेन्नाऽतिक्रामयेदात्ययिकस्य व्याधेः प्राणहारित्वात् ॥ ३६ ॥

अतिशीतोष्ण काल में कर्तव्य—

वि०—(आत्ययिक रोगों में अतिशीत आदि काल में ही यदि रोग की स्थिति के अनुसार संशोधन आवश्यक हो तो) शीत-उष्ण और वृष्टि इनका ठीक-ठीक प्रतिकार करके उचित संशोधनादि रूप चिकित्सा का प्रयोग करे; चिकित्सा करने में समय नष्ट न करें अर्थात् शीघ्र चिकित्सा प्रारंभ कर दे ॥ ३६ ॥

वक्तव्य—आत्ययिक अवस्था में कल्पित ऋतु को बनाकर शोधन देना चाहिये—'आत्ययिके पुनः कर्मणि काममृतुं विकल्प्य कृत्रिमगुणोपधानेन यथर्त्तुगुणविपरीतेन भेषजं प्रमाणवीर्यसमं कृत्वा प्रयोजयेत् ॥' [हेमन्त में गर्भगृहादि; ग्रीष्म में धारा-गृहादि बनाकर चिकित्सा करे।] सामान्यतः साधारण ऋतुओं में संशोधन विहित और अन्य ऋतुओं में निषिद्ध है। 'तत्र शाधारणलक्षणेषु ऋतुषु वमनादीनां प्रवृत्तिर्विधीयते, निवृत्तिरितरेषु ॥' (चरक. वि. अ. ८।१२६)

संप्रत्यौषधकालान् दर्शयन्नाह—

युञ्ज्यादनन्नमन्नादौ मध्येऽन्ते कवलान्तरे।
ग्रासे ग्रासे मुहुः सान्नं सामुद्गं निशि चौषधम् ॥३७॥

स०—दशैते औषधस्य कालाः। अनन्नमौषधं तदुच्यते यदुपयुज्य तस्मिन्परिणते भुंजीत। अन्नादौ तदुच्यते यदुपयुज्य समनंतरमाहारोपयोगो विधीयते। मध्य इति। अन्नस्याहारस्य मध्ये यदौषधं भुज्यते। अंतेऽवसाने। कवलांतर इति। कवलयोर्ग्रासयोरंतरे मध्ये न तु ग्रासमिश्रितं कृत्वेत्यर्थः। ग्रासे ग्रास इति। यद्ग्राससंपृक्तं भुज्यते। मुहुरिति। पुनः पुनर्भुक्तेऽभुक्ते वा यदौषधं भुज्यते। सान्नमिति। सहान्नेनाहारेण यदौषधं भुज्यते। सामुद्गं तद्भण्यते। यदाहारस्य प्राक् पश्चाच्च प्रयुज्यते। तेन हि समुद्गपुटयुगलोपमेनौषधद्वयेनाहारो मध्ये क्रियते समुद्गः संपुटकः। निशि यच्छयनवेलायां भुज्यते ॥ ३७ ॥

औषधसेवन के काल—

वि०—शमन औषध काल—

(१) अनन्न औषध—केवल औषध जिसमें अन्न का कोई संसर्ग न हो ॥ ३७ ॥

(२) अन्नादौ (प्राग्भक्त) भोजन के पूर्व, अर्थात् औषध खा कर पीछे से अन्न खाया जाये।

(३) मध्ये—आधा भोजन करके औषध खाना, फिर आधा भोजन करना।

(४) अन्त में-भोजन के उपरान्त तुरन्त औषध खाना।

(५) कवलान्तर—ग्रासों के मध्य में [ग्रास में मिलाकर नहीं] देना।

(६) ग्रासे ग्रासे—प्रत्येक ग्रास में मिलाकर औषध देना।

(७) मुहुः औषध—भोजन करने या न करने पर जो औषध बार-बार दी जाती है।

(८) सान्नम्—आहार में मिलाई औषध को कहते हैं।

(९) सामुद्ग (सम्पुट)—पहले औषध, फिर भोजन और फिर औषध लेना सामुद्ग है; इसमें आहार दो औषध के बीच में आने से सम्पुटित हो जाता है।

(१०) निशा काल—रात्रि में सोते समय जो औषध खाते हैं।[1]

अधुना विषयविभागेन यस्मिन् व्याधौ यदुपयुज्यते तद्दर्शयति—

कफोद्रेके गदेऽनन्नं बलिनो रोगरोगिणोः।
अन्नादौ विगुणेऽपाने, समाने मध्य इष्यते ॥ ३८ ॥
व्यानेऽन्ते प्रातराशस्य सायमाशस्य तूत्तरे।
ग्रासग्रासान्तयोः प्राणे प्रदुष्टे मातरिश्वनि ॥३९॥
मुहुर्मुहुर्विषच्छर्दिहिध्मातृट्श्वासकासिषु।
योज्यं सभोज्यं भैषज्यं भोज्यैश्चित्रैररोचके ॥४०॥
कम्पाक्षेपजहिध्मासु सामुद्गं लघुभोजिनाम्।
ऊर्ध्वजत्रुविकारेषु स्वप्नकाले प्रशस्यते ॥४१॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने दोषोपक्रमणीयो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

स०—कफोद्रेके रोगे निरन्नमौषधं योज्यम्। कयोरित्याह। बलिनोरित्यादि। बलवति रोगे तत्केवलमन्नादिरहित-

१. अनन्न में ही अष्टांगसंग्रहोक्त अन्तरभक्त का अन्तर्भाव है अत एव अष्टांगसंग्रह का ११ औषध काल यहाँ १० ही रह गया।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मौषधम्। तद्वयनन्नमतिवीर्यं भवति। बलवांश्च यदि रोगी तदोपयुंजीत नतु दुर्बले। दुर्बलस्य त्वन्नसहितं न ग्लानिकरं भवति। अन्नादाविति। अपानाख्ये वायौ विगुणे कुपिते सत्यौषधं भुक्त्वा समनंतरमेवाहार इष्यत इत्यर्थः। समाने वायौ विगुणे मध्ये भक्तस्यौषधमिष्यते। व्यानाख्ये विगुणे प्रातराशस्य पूर्वाह्णभुक्तस्यांतेऽवसाने भेषजमिष्यते। सायमित्यादि। उत्तरे व्यानापेक्षयोदानाख्येन महति विगुणे सायमाशस्याऽपराह्णभुक्तस्य त्वंते भेषजमिष्यते। प्राणाख्ये मातरिश्वनि वाते प्रदुष्टे विकृते ग्रासग्रासांतरयोर्भेषजमिष्यते। ग्रासश्च ग्रासांतश्च तयोस्तेन ग्राससंपृक्तमौषधं ग्रासयोर्मध्ये भेषजमित्यवतिष्ठते। मुहुर्मुहुर्मुहुर्भुक्ते यदभुक्ते वा भेषजं तत्तु विषादिषु योज्यम्। अरोचकेऽरुचौ सह भोज्यैर्भेषज्यं योज्यम्। कीदृशैर्भोज्यैश्चित्रैरनेकविधैः। सामुद्गं नाम यदादावंते चाहारस्य भुज्यते तत्कंपादिषु प्रशस्यत इति वक्ष्यमाणेन संबन्धः। केषाम् लघ्वन्नाशिनाम्। ऊर्ध्वजत्रुविकारेषु शयनवेलायामौषधं प्रशस्यत इति ॥ ३८-४१ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां दोषोपक्रमणीयो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

रोगानुसार औषध काल—

वि०—अन्न काल—कफ की अधिकता में रोग और रोगी दोनों के बलवान होने पर खाली पेट औषध देनी चाहिये। अपान वायु के कुपित होने पर अन्न के प्रारम्भ में; समान वायु के कुपित होने पर अन्न के मध्य में; व्यान वायु के कुपित होने पर प्रातः भोजन के अन्त में; तथा उदान वायु के कुपित होने पर सायंकाल भोजन के पीछे औषध देवे। प्राण वायु के दूषित होने पर ग्रास में मिलाकर या ग्रासों के बीच में औषध देनी चाहिये। विष, वमन, हिक्का, प्यास, श्वास और कास में बार-बार औषध बरतनी चाहिये। अरोचक में अनेक प्रकार के भोजनों के साथ मिलाकर औषध (साद्य औषध) देवे। कम्प, आक्षेपक और हिक्का में स्वल्प भोजन के साथ सामुद्ग (भोजन के पूर्व और पश्चात्) औषध देवे। जत्रु के ऊपर के रोगों में सोते समय औषध देनी चाहिये ॥३८-४१॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का दोषोपक्रमणीय नामक तेरहवाँ अध्याय समाप्त हुआ ॥ १३ ॥

चतुर्दशोऽध्यायः

दोषोपक्रमणीयादनंतरं द्विविधोपक्रमणीयारंभेऽयं संबन्धः। पूर्वं सामान्येनोपक्रमो दोषोपक्रमणीयेऽभिहितः। अत्र तूपक्रम्यस्य विशेषेणोपक्रमविशेष उच्यत इत्याह—

अथातो द्विविधोपक्रमणीयमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—द्विविधं द्विप्रकारं च तदुपक्रमणं च द्विविधोपक्रमणं तस्मै हितो द्विविधोपक्रमणीयः। शेषं पूर्ववत्।

वि०—अब इसके आगे द्विविधोपक्रमणीय अध्याय का व्याख्यान करेंगे-जैसा कि आत्रेय आदि महर्षियों ने कहा था।

उपक्रमश्च समासतो द्विविधः। तन्त्रांतरपठितानां चतुर्णामुपक्रमाणामत्रैवांतर्भावात्। अतएव सहेतुकमुपदिशन्नाह—

उपक्रम्यस्य हि द्वित्वाद् द्विधैवोपक्रमो मतः।
एकः सन्तर्पणस्तत्र द्वितीयश्चापतर्पणः ॥ १ ॥
बृंहणो लङ्घनश्चेति तत्पर्यायावुदाहृतौ।
बृंहणं यद् बृहत्त्वाय लङ्घनं लाघवाय यत् ॥ २ ॥

देहस्य—

स०—हि यस्मादुपक्रम्यस्य चिकित्स्यस्य द्वित्वाद्धेतोरुपक्रमो द्विधैव मत इष्टः। एवशब्दोऽवधारणे परमतं क्षिपति। कथं द्विधेत्याह—तत्र तयोर्द्वयोरुपक्रमयोरेकः संतर्पणरूप उपक्रमो द्वितीयश्चापतर्पणरूप उपक्रमः बृंहणं लंघनं च तयोः संतर्पणाऽपतर्पणयोः पर्यायावुदाहृतौ। देहस्य बृंहणं तदुच्यते यद्देहस्य बृहत्त्वाय भवति। लंघनं तदुच्यते यद्देहस्य लाघवाय लाघवोत्पादनाय भवति ॥ १-२ ॥

उपचार के दो भेद—

वि०—उपक्रम्य (जिसकी चिकित्सा की जाती है-आतुर) दो प्रकार के होते हैं—१ कृश २ स्थूल। अतः उपक्रम (चिकित्सा) भी दो प्रकार का होता है—एक सन्तर्पण और दूसरा अपतर्पण। सन्तर्पण का बृंहण और अपतर्पण का लंघन पर्याय कहा गया है। देह की गुरुता या स्थूलता के लिये जो होता है, वह बृंहण है; और देह की लघुता या कृशता के लिये जो होता है, वह लङ्घन है।

कथं द्विधेत्याह—

—भवतः प्रायो भौमापमितरच्च ते।

स०—संतर्पणापतर्पणे भौमापमितरच्च भवतः। भूमेरिदं भौमम्। अपामिदमापम्। भौमयुक्तमापं संतर्पणम्। इतरद्भौमापादन्यदग्निवाय्वाकाशात्मकमपतर्पणम्। प्रायोग्रहणात्किंचिद्भौममप्यपतर्पणम्। यथा यवमसूरमकुष्ठतंडुलीयादि। तथाऽग्निपवनोत्कटस्याऽपि शुण्ठीपिप्पल्यादेर्बृंहणत्वेन संतर्पणकार्यदर्शनाच्च।

वि०—प्रायः बृंहण द्रव्य पार्थिव और जलीय तथा लङ्घन द्रव्य आग्नेय, वायव्य अथवा आकाशीय होते हैं। (प्रायः कहने से यह प्रतीत होता है कि कभी-कभी पार्थिव और जलीय द्रव्य भी लङ्घन तथा आग्नेयादि भी बृंहण होते हैं। यथा—पिप्पली आग्नेय होते हुए भी बृंहण तथा मसूर-मोठ भौम एवं जलीय होते हुए भी लङ्घन होते हैं।)

अधुना स्नेहनादेश्चतुर्विधस्योपक्रमस्य संतर्पणाऽपतर्पणयोरेवांतर्भावं दर्शयन्नाह—

स्नेहनं रूक्षणं कर्म स्वेदनं स्तम्भनं च यत् ॥ ३ ॥
भूतानां तदपि द्वैध्याद् द्वितयं नातिवर्तते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—स्नेहनादि यच्चतुर्विधं कर्म तदपि द्वितयं संतर्पणापतर्पणरूपं नाऽतिवर्तते नाऽतिक्रामति। कुतो हेतोरित्याह। भूतानां संतर्पणापतर्पणरूपाद्द्वैध्याद्द्विप्रकारकत्वात् ॥ ३ ॥

स्नेहादि कर्म का पूर्वोक्त दो में अन्तर्भाव—

वि०—भूतों की द्विविधता (गुरु लघु) के कारण (पृथ्वी और जल गुरु और अग्नि, वायु तथा आकाश लघु) स्नेहन, रूक्षण, स्वेदन और स्तम्भन ये चार प्रकार के जो अन्य कर्म है, वह भी सन्तर्पण और अपतर्पण इन दो से पृथक् नहीं है, इनका भी इन दो में ही समावेश हो जाता है ॥ ३ ॥

इदानीं प्रत्येकं तयोर्भेदानाह—

शोधनं शमनं चेति द्विधा तत्रापि लङ्घनम् ॥ ४ ॥

स०—तत्र च तयोः संतर्पणापतर्पणयोर्बृंहणलंघनापरपर्याययोर्मध्याद्यल्लंघनमतर्पणं तद् द्विधा। कथमित्याह। शोधनं शमनं चेति। इति हेत्वर्थे। यतः शोधनं शमनं च ततो द्विधेत्यर्थः ॥ ४ ॥

अपतर्पण के दो भेद—

वि०—इनमें लंघन या अपतर्पण भी शोधन और शमन भेद से दो प्रकार का होता है ॥ ४ ॥

इदानीं शोधनस्य लक्षणं प्रभेदं चाऽधिकृत्याह—

यदीरयेद्बहिर्दोषान् पञ्चधा शोधनं च तत्।
निरूहो वमनं कायशिरोरेकोऽस्रविस्रुतिः ॥ ५ ॥

स०—यदौषधं दोषान् वातादीनंतःस्थितान् बहिरीरयेत् क्षिपेत्तच्छोधनम्। तच्च पंचधा पंचविधम्। तदेवं पंचविधत्वमाह—निरूहो बस्तिस्तथा वमनं तथा कायविरेकः शिरोविरेकश्च तथाऽस्रविस्रुती रक्तस्रावश्चेति पंचधा शोधनम्। सर्वशरीरस्य शिरःप्रभृतेरधो मलनिर्हरणं यत्स कायविरेकशब्देनोच्यते। यत्तु केवलं शिरः संज्ञकस्य शरीरावयवस्य घ्राणेनोर्ध्वमलनिर्हरणं स शिरोविरेकः ॥ ५ ॥

शोधन के लक्षण और भेद—

वि०—शोधन का लक्षण—जो दोषों को शरीर से बाहर निकालता है, वह शोधन है। यह शोधन पांच प्रकार का है—वस्ति, वमन, कायविरेचन, शिरोविरेचन और रक्त मोक्षण ॥ ५ ॥

संप्रति शमनाख्यस्य लक्षणं प्रभेदं चाधिकृत्याह—

न शोधयति यद्दोषान् समान्नोदीरयत्यपि।
समीकरोति विषमान् शमनं तच्च सप्तधा ॥ ६ ॥
पाचनं दीपनं क्षुत्तृड्व्यायामातपमारुताः।

स०—यदौषधं दोषान् वातादीन्न शोधयति नांतःस्थितान्बहिर्निष्कासयति तथा समान् स्वप्रमाणस्थान्नोदीरयति नोत्क्लेशयति विषमांश्च स्वप्रमाणाद्धीनाधिकभावावस्थितान् समीकरोति स्वप्रमाणस्थान् विदधाति तच्छमनमुच्यते। तच्च सप्तधा सप्तप्रकारं पाचनादिभेदेन। पाचयतीति पाचनम्। पचतोऽग्नेः पक्तुं शक्तिमधिकां यदुत्पादयति तद्द्रव्यं क्रिया वा पाचनमुच्यते। यथा लंघनं किराततिक्ताख्यं मुस्तादि वा। दीपनं यथा घृतादि। तंत्रांतरे च दीपनपाचनयोर्लक्षणमुक्तम्। क्षारपाणिनाऽप्युक्तम्। पाचनं पाचयेद्दोषान् सामान् शमनमेव तु। दीपनं ह्यग्निकृच्चामं कदाचित्पाचयेन्न वा। यथा। यदग्निकृत्पचेच्चामं दीपनं तद्यथा घृतम्। पाचनं तद्विपर्यस्तं यथा वक्ष्यामि लक्षणमिति। क्षुत्तृट्शब्दाभ्यां क्षुत्तृष्णानिग्रहाविह गृहीतौ ॥ ६ ॥

शमन के लक्षण और भेद—

वि०—शमन चिकित्सा—जो न तो दोषों का शोधन करती है, न सम दोषों का प्रकोप करती है केवल विषम दोषों को समान करती है, उसको शमन कहते हैं। यह शमन सात प्रकार का है—पाचन, दीपन, भूख, प्यास, व्यायाम, धूप और वायु ॥ ६ ॥

पाचनादीनां दोषशमनत्वमुक्तं तच्च वाते वातपित्ते च न सम्भवतीत्याह—

बृंहणं शमनं त्वेव वायोः पित्तानिलस्य च ॥ ७ ॥

स०—तुशब्दो विशेषे। विशेषस्तु लंघनापेक्षया। शोधनं शमनं चेति द्विधा लंघनमुक्तम्। बृंहणमपि शोधनं भवति दुग्धादिद्रव्यं शोधनस्वभावद्रव्यत्वात्। तेन तथाविधेन द्रव्येण केवलस्य वातस्य पित्तयुक्तस्य वा कोप आशंक्यते। यथा लंघनशोधनद्रव्येण हरीतक्यादिना ततो बृंहणस्य विशेषणार्थस्तुशब्दः कृतः। बृंहणं यतः शोधनं मरुतः केवलस्य पित्तसहितस्य वा शमनं नतु लंघनशोधनवत्कोपनम्। एवकारोऽवधारणार्थः। बृंहणं यच्छोधनरूपं शोधनं वातस्य पित्तयुक्तस्य वा शमनमेव न कोपनं जातुचिदित्यर्थः। लंघनं तूभयरूपमपि वातस्य वातपित्तयोर्वा कोपनमेव ॥ ७ ॥

वायु आदि का शमन—

वि०—बृंहण केवल वायु अथवा पित्तयुक्त वायु का शमन करता है ॥ ७ ॥

वक्तव्य—बृंहण द्रव्य सदैव शमन ही होता है, कभी कभी शोधक होते हुए भी (जैसे दूध विरेचक होता है) वायु या वायुपित्त का शमन ही करता है जब कि लंघन द्रव्य शोधन कार्य के द्वारा वायु के प्रकोपक होते हैं, (जैसे-हरीतकी) यही इसकी विशेषता है।

इदानीं ये बृंह्यास्तानाह—

बृंहयेद्व्याधिभैषज्यमद्यस्त्रीशोककर्शितान्।
भाराध्वोरःक्षतक्षीणरूक्षदुर्बलवातलान् ॥ ८ ॥
गर्भिणीसूतिकाबालवृद्धान् ग्रीष्मेऽपरानपि।

स०—कर्शितशब्दस्य व्याध्यादिभिः प्रत्येकं सम्बन्धः। व्याधिकर्शितान् बृंहयेदेवं शेषेष्वपि योज्यम्। भारादिभिः क्षीणस्य प्रत्येकं सम्बन्धः। भारक्षीणान् बृंहयेत्। एवं शेषेषु। रूक्षादीन् बृंहयेत्। ग्रीष्मेऽपरानप्यन्यानप्यनुक्तानपि बृंहयेत्। इत्थं च ग्रीष्मेऽपि सर्वानपि बृंहयेदिति विशेषेण तु व्याधिकर्शितादीन् ॥ ८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बृंहण के योग्य मनुष्य—

वि०—बृंहण करने योग्य—रोग, औषध; मद्यसेवन, स्त्रीसेवन तथा शोक से कृश; भार उठाना, मुसाफिरी एवं उरःक्षतरोग से क्षीण; रूक्ष, दुर्बल, वातप्रकृति, गर्भवती, प्रसूता, वृद्ध और बालक तथा ग्रीष्म ऋतु में दूसरे स्वस्थ पुरुषों का भी बृंहण करना चाहिये ॥ ८ ॥

कैर्बृंहयेदित्याह—

मांसक्षीरसितासर्पिर्मधुरस्निग्धबस्तिभिः ॥ ९ ॥
स्वप्नशय्यासुखाभ्यङ्गस्नाननिर्वृतिहर्षणैः ।

स०—मांसादिभिर्बृंहयेत्। मधुरस्निग्धैर्बस्तिभिर्न तु रूक्षतीक्ष्णैस्तेषामपतर्पणस्वभावत्वात्। स्वप्नो निद्रा। शय्यासुखं खट्वाजनितं शर्म। निर्वृतिश्चित्तस्याऽनाकुलत्वम् ॥ ९ ॥

बृंहण औषध—

वि०—बृंहण द्रव्य—मांस, दूध, चीनी, घी, मधुर एवं स्निग्ध बस्तियाँ; नींद, शय्यासुख, अभ्यङ्ग, स्नान, मन की शान्ति; और प्रसन्नता इनसे बृंहण होता है ॥ ९ ॥

मेहामदोषातिस्निग्धज्वरोरुस्तम्भकुष्ठिनः ॥ १० ॥
विसर्पविद्रधिप्लीहशिरःकण्ठाक्षिरोगिणः ।
स्थूलांश्च लङ्घयेन्नित्यं शिशिरे त्वपरानपि ॥ ११ ॥

स०—मेहादीनामिनिर्मत्वर्थीयः। मेहिप्रभृतीन् लंघयेत्। शिशिरे पुनरन्यानप्यपरानपीति व्याधितानां ग्रहणम्। स्वस्थानां तु शिशिरे हेमंतविधिर्विशेषेणोक्त एव। शिशिरशब्दः शीतमात्रोपलक्षणार्थः। तेन हेमंतेऽपि लंघयेदित्यर्थ उपलभ्यते ॥ १०-११ ॥

लङ्घन के योग्य मनुष्य—

वि०—लङ्घन के योग्य पुरुष—प्रमेही, आम दोष युक्त, अतिस्निग्ध, ज्वर, ऊरुस्तम्भ, कुष्ठ, विसर्प, विद्रधि, प्लीहा; शिर, कण्ठ और आँख के रोगी; तथा स्थूल पुरुष इनको सब समय में लंघन कराये। शिशिर काल में दूसरे पुरुषों को भी लंघन कराये ॥ १०-११ ॥

पूर्वमुक्तं लंघनं द्विधा। शोधनं शमनं चेति। तत्र शोधनविषयं निरूपयन्नाह—

तत्र संशोधनैः स्थौल्यबलपित्तकफाधिकान् ।
आमदोषज्वरच्छर्दतीसारहृद्यामयैः ॥ १२ ॥
विबन्धगौरवोद्गारहृल्लासादिभिरातुरान् ।
मध्यस्थौल्यादिकान् प्रायः पूर्वं पाचनदीपनैः ॥ १३ ॥
एभिरेवामयैरार्तान् हीनस्थौल्यबलादिकान् ।
क्षुत्तृष्णानिग्रहैर्दोषैस्त्वार्तान् मध्यबलैर्दृढान् ॥ १४ ॥

स०—लंघयेदिति वर्तते। तत्र तेषु लंघनीयेषु मध्ये संशोधनाख्यैर्लंघनैः स्थौल्याद्यधिकान् तथाऽऽमदोषादिभिरार्तान् लंघयेत्। तथा मध्यस्थौल्यबलपित्तकफानेभिरेवाऽऽमदोषज्वरादिभिर्गदैरातुरान् प्रायः पूर्वं पाचनदीपनैर्लंघनभेदैर्लंघयेत्। प्रायोग्रहणं देशकालाद्यपेक्षया नियमस्याऽसर्वविषयत्वज्ञापनार्थम्। हीनस्थौल्यबलादिकांस्तु सतः क्षुत्तृष्णानिग्रहैः बुभुक्षापिपासावेगविधारणाख्यैर्लंघनविशेषैर्लंघयेत्। दोषैर्वातपित्तकफैर्मध्यबलैरार्तान् तथा दृढान् शक्तान् समीरणादिभिर्लंघयेत्। आयासो व्यायामः। किमुत किंपुनरल्पबलैर्दोषैरार्तान् समीरणादिभिर्लंघयेत्। सुतरां तु हीनबलैरार्तान् समीरणादिभिरेव लंघयेदित्यर्थः ॥ १२-१४ ॥

शोधन का नियम—

वि०—शोधन का विषय—स्थूल, बल, पित्त और कफ की अधिकता वालों का संशोधन से लंघन कराये। आमदोष (अजीर्ण), ज्वर, वमन, अतीसार, हृदयरोग, विबन्ध, भारीपन, उद्गार, जी मिचलाना आदि से पीडित रोगियों को तथा मध्यम रूप में स्थूल या पित्त कफ की मध्यम अधिकता वालों को पाचन और दीपन औषधियों से लंघन कराये। इन्हीं आम दोष आदि के रोगियों तथा हीनस्थूलतता या अल्पवृद्ध पित्त या कफ वालों को भूख और प्यास के रोकने से लंघन कराना चाहिये। मध्यम बल वाले वात-पित्त-कफ दोषों से पिड़ित, एवं दृढ शरीर वालों को वायु, धूप और व्यायाम से लंघन कराये; तथा अल्पबल वाले पुरुषों को भी वायु, धूप और व्यायाम से लंघन कराये ॥ १२-१४ ॥

तर्हि बृंह्यस्य वातलादेर्यदा ज्वरादिव्याधिर्लंघनसाध्यो जायते तदा किं लंघनं कार्यमुत बृंहणमित्यत्र संशय इत्याह—

न बृंहयेल्लङ्घनीयान् बृंह्यांस्तु मृदु लङ्घयेत् ॥ १५ ॥
युक्त्या वा देशकालादिबलतस्तानुपाचरेत् ।

स०—लंघनीयान् लंघनार्हान् मेहामदोषादीन्न बृंहयेत्। ये पुनर्बृंह्यास्तान् लंघनसाध्यामयार्तान् मृदु कृत्वा लंघयेत्। मृदुना लंघनप्रकारेणाऽपतर्पयेदित्यर्थः। युक्त्या वा प्रयोगेण संतर्पणाऽपतर्पणव्यामिश्रलक्षणेन देशकालादीनां बलतोऽनुरोधेन तानुपाचरेदुपक्रमेत्। नैव लंघयेदित्यर्थः। आदिग्रहणेन सत्त्वसात्म्यादिग्रहणम् ॥ १५ ॥

वि०—लङ्घन के योग्य (प्रमेह; आमदोष आदि ग्रस्त) पुरुषों का बृंहण नहीं करना चाहिये। किन्तु बृंहण के योग्य पुरुषों को मृदु लङ्घन करा सकते हैं, अथवा देश, काल आदि के अनुरोध से युक्तिपूर्वक (बिना लंघन कराये ही आवश्यकतानुसार सन्तर्पण और अपतर्पण का मिश्रित प्रयोग करते हुए) उनकी चिकित्सा करे ॥ १५ ॥

बृंहितलंघितयोः किं लक्षणमित्याह—

बृंहिते स्याद्बलं पुष्टिस्तत्साध्यामयसङ्क्षयः ॥ १६ ॥

स०—बृंहिते सति बलं पुष्टिश्च स्यात्। तथा बृंहणसाध्या य आमयास्तेषां संक्षयो विनाशो भवेत् ॥ १६ ॥

बृंहित के लक्षण—

वि०—बृंहण (सम्यक्) होने पर बल और पुष्टि होती है; तथा बृंहणसाध्य जो रोग होते हैं—उनका विनाश होता है ॥ १६ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संप्रति लंघितलक्षणमाह—

विमलेन्द्रियता सर्गो मलानां लाघवं रुचिः ।
क्षुत्तृट्सहोदयः शुद्धहृदयोद्गारकण्ठता ॥ १७ ॥
व्याधिमार्दवमुत्साहस्तन्द्रानाशश्च लङ्घिते ।

स०—विमलेंद्रियतादिस्तंद्रानाशश्चेत्यंतो ग्रंथो लंघितलक्षणम् । विमलेंद्रियता करणपाटवम् । क्षुत्तृषो सहैककालमुदयः । शुद्धहृदयेति । हृदयं चोद्गारश्च कंठश्च हृदयोद्गारकंठं शुद्धं च तद्धृतयोद्गारकंठं च तस्य भावः शुद्धहृदयोद्गारकंठता । विमलेंद्रियतादीनां पदानामकृतसमासानामेव समस्तानां निर्देशो दोषदेशाद्यनुरोधेनैकस्य द्वयोस्त्रिचतुराणां बहुतराणां सर्वेषां च लंघितलक्षणत्वद्योतनार्थः । अन्यथाहि सर्वेषां लक्षणानामुत्पत्तौ लंघितलक्षणत्वं भवेन्न त्वेकस्य द्वयोर्बहूनां चोत्पत्तौ लंघितलक्षणत्वं स्यात् । मुनिरप्यनेनैव हेतुनाऽसमासेनैव लक्षणं व्यधत्त । तथा । वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे । हृदयोद्गारकंठस्य शुद्धौ तंद्राक्लमे गते । स्वेदे जाते रुचौ चैव क्षुत्पिपासासहोदये । कृतं लंघनमादेश्यं निर्व्यथे चांतरात्मनीति ॥ १७ ॥

लङ्घित के लक्षण—

वि०—लंघन का फल—इन्द्रियों की निर्मलता; मलों की प्रवृत्ति; लघुता, भोजन में रुचि; भूख और प्यास का एक साथ उत्पन्न होना, हृदय, उद्गार और कण्ठ की शुद्धता; रोग का हलका होना; उत्साह होना और तन्द्रा का नाश-ये सम्यक् लङ्घन करने पर होते हैं ॥ १७ ॥

अनपेक्षितमात्रादिसेविते कुरुतस्तु ते ॥ १८ ॥
अतिस्थौल्यातिकार्श्यादीन्, वक्ष्यन्ते ते च सौषधाः ।

स०—ते बृंहणलंघने अनपेक्षितमात्रादिसेविते अतिस्थौल्याऽतिकार्श्यादीन् कुरुतः । अनपेक्षिताश्च ते मात्रादयश्चाऽनपेक्षितमात्रादयस्तैः सेविते । मात्राद्यनपेक्षया कृते इत्यर्थः । ते चाऽतिस्थौल्याऽतिकार्श्यादयः सौषधाः सभेषजा वक्ष्यंते पुरस्ताद्भणिष्यंते ॥ १८ ॥

अनपेक्षित मात्रा लेने का परिणाम—

वि०—मात्रा आदि का विचार न करके बृंहण और लङ्घन करने से अतिस्थूलता और अतिकृशता आदि उत्पन्न हो जाते हैं, इन अतिस्थूल-अतिकृशादि को औषध के साथ आगे (श्लोक २०-२८) में कहेंगे ॥ १८ ॥

अथाऽतिबृंहितलंघितयोः किं लक्षणमित्याह—

रूपं तैरेव च ज्ञेयमतिबृंहितलङ्घिते ॥ १९ ॥

स०—अतिबृंहितश्चातिलंघितश्चेत्येकवद्भावः । अतिबृंहितेऽतिलंघिते च तैरेवाऽतिस्थौल्यादिभिस्तथाऽतिकार्श्यादिभिश्च रूपं बृंहणलंघनाऽतियोगलक्षणं वेद्यम् । चशब्दः समुच्चये ॥ १९ ॥

अतिलङ्घित अतिबृंहित के लक्षण—

वि०—इन अतिस्थूलता, अतिकृशता आदि से क्रमशः बृंहण और लङ्घन के अतियोग का लक्षण समझना चाहिये अर्थात् अतिस्थूलता आदि अतिबृंहण के और अतिकृशता आदि अतिलंघन के चिह्न हैं ॥ १९ ॥

तानेवाऽतिस्थौल्यादीनाह—

अतिस्थौल्यापचीमेहज्वरोदरभगन्दरान् ।
कासंसंन्यासकृच्छ्रामकुष्ठादीनतिदारुणान् ॥ २० ॥

स०—अतिस्थौल्यादीनतिबृंहितं कर्तृ कुरुते इत्यनुपात्तेनाऽपि प्रकृतत्वादत्र कर्तृपदेन क्रियापदेन च संबंधः कार्यः । अत एव तदपेक्षयाऽतिस्थौल्यादीनां द्वितीया । अथवा योग्यतयैवाऽनुपात्तेनाऽपि क्रियादीनां संबंधो भवत्येव । सुकविलक्षणस्यैवंस्थितत्वात् । तथा च भगवतो व्यासस्य । यश्च निंबं परशुना यश्चैनं मधुसर्पिषा । यश्चैनं गंधमाल्येन सर्वस्य कटुरेव सः । अत्र हि छेदसेकालंकारक्रिया अपेक्ष्य निंबादीनां द्वितीयाऽर्थसंबंधश्च ॥ २० ॥

अतिस्थौल्यादि का वर्णन—

वि०—अतिस्थूलता आदि रोग-अतिस्थूलता, अपची, प्रमेह, ज्वर, उदर, भगन्दर, कास, संन्यास, मूत्रकृच्छ्र, आमरोग (अजीर्ण), कुष्ठ आदि अति भयंकर रोग अतिबृंहण से होते हैं ॥ २० ॥

अथैषां स्थौल्यादीनामुपक्रममाह—

तत्र मेदोऽनिलश्लेष्मनाशनं सर्वमिष्यते ।
कुलत्थजूर्णश्यामाकयवमुद्गमधूदकम् ॥ २१ ॥
मस्तुदण्डाहतारिष्टचिन्ताशोधनजागरम् ।
मधुना त्रिफलां लिह्याद् गुडूचीमभयां घनम् ॥ २२ ॥
रसाञ्जनस्य महतः पञ्चमूलस्य गुग्गुलोः ।
शिलाजतुप्रयोगश्च साग्निमन्थरसो हितः ॥ २३ ॥
विडङ्गं नागरं क्षारः काललोहरजो मधु ।
यवामलकचूर्णं च योगोऽतिस्थौल्यदोषजित् ॥ २४ ॥

स०—तेष्वतिस्थौल्यादिषु मेदोऽनिलश्लेष्मनाशनं सर्वमन्नपानौषधमिष्यते । किं तदिति ब्रूते—कुलत्थादिकं स्थूलायेष्यते । जूर्णस्तृणधान्यविशेषो दक्षिणापथे जोंधलक इति प्रसिद्धः । दंडाहतं मथितम् । त्रिफलादीनामन्यतमं मधुना लिह्यात् । तथा रसांजनादेश्च प्रयोगोऽग्निमन्थरससहितो हितोऽतिस्थूलायेति प्रकृतेन योज्यम् । विडंगादियोगः सर्वसमभागोऽतिस्थौल्यदोषजित् ॥ २१-२४ ॥

अतिबृंहण में उपचार—

वि०—इन रोगों में मेद, वायु, और कफ का नाश करने वाले अन्नपान और औषध बरतने चाहिये । यथा—कुलथी, जूर्ण (ज्वार), सांवाँ, जौ, मूँग, मधु का शर्बत, मस्तु, तक्र, अरिष्ट, चिन्ता, शोधन, रात्रि में जागना । औषध—मधु के साथ त्रिफला या गिलोय या हरड़ को अथवा मुस्ता को चाटे । रसाञ्जन (रसौत) या बृहत्पञ्चमूल या गुग्गुल अथवा शिलाजतु अग्निमन्थ के रस से पिये । वायविडङ्ग, सोंठ, यवक्षार, लोहचूर्ण (तीक्ष्ण लोह-भस्म) इन्हें समभाग

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लेकर जौ एवं आँवले का चूर्ण मिला कर मधु के साथ चाटे, यह योग अतिस्थूलता दोष को नष्ट करनेवाला है ॥२१-२४॥

व्योषकट्वीवराशिग्रुविडङ्गातिविषास्थिराः ।
हिङ्गुसौवर्चलाजाजीयवानीधान्यचित्रकाः ॥ २५ ॥
निशे बृहत्यौ हपुषा पाठा मूलं च केम्बुकात् ।
एषां चूर्णं मधु घृतं तैलं च सदृशांशकम् ॥ २६ ॥
सक्तुभिः षोडशगुणैर्युक्तं पीतं निहन्ति तत् ।
अतिस्थौल्यादिकान् सर्वान् रोगानन्यांश्च तद्विधान् ॥२७॥
हृद्रोगकामलाश्वित्रश्वासकासगलग्रहान् ।
बुद्धिमेधास्मृतिकरं सन्नस्याग्नेश्च दीपनम् ॥ २८ ॥

स०—व्योषादीनि द्रव्याणि चतुर्विंशतिः । परस्परसमभापानीत्येको भागः । तत्समो मधुनो द्वितीयो भागो घृतस्य तृतीयस्तैलस्य चतुर्थः । एषां सर्वेषां मिश्रीभूतानां षोडशगुणा यवसक्तवः । तदेतत्पीतमतिस्थौल्यादिकान् पूर्वोक्तान् सर्वान् रोगान्निहंति । अन्यांश्च तथाविधान् रोगान् बृंहणोत्थानित्यर्थः । तथा हृद्रोगादीन् निहंति । तथा बुद्ध्यादिकरम् । सन्नस्य मंदस्याऽग्नेर्दीपनं च ॥ २५-२८ ॥

अन्य औषध—

वि०—त्रिकटु, कुटकी, त्रिफला, सहजन, वायविडङ्ग, अतीस, शालपर्णी, हींग, सौवर्चल, जीरा, अजवायन, धनियाँ चित्रक, हल्दी, दारुहल्दी, कटेरी, बड़ी कटेरी, हाऊबेर, पाठा, केम्बुक मूल इनको परस्पर समभाग लेकर—इनका एक भाग; मधु एक भाग, घी एक भाग और तैल एक भाग (पूर्वोक्त चूर्ण मधु, घी और तैल प्रत्येक एक-एक भाग) मिलाइये; इन सबसे सोलहगुना सत्तु मिलाकर (ठण्डे जल से घोलकर) पिये। इसके पानी से अतिस्थूलता आदि सब रोग तथा इसी प्रकार के दूसरे रोग-हृद्रोग, कामला, श्वित्र, श्वास, कास, गलग्रह, नष्ट होते हैं। यह योग बुद्धि, मेधा और स्मृति बढ़ाता है और मन्द हुई अग्नि को प्रदीप्त करता है[1] ॥ २५-२८ ॥

सांप्रतमतिलंघनोत्थान् रोगान् सौषधादीनाह—

अतिकार्श्यं भ्रमः कासस्तृष्णाधिक्यमरोचकः ।
स्नेहाग्निनिद्रादृक्श्रोत्रशुक्रौजःक्षुत्स्वरक्षयः ॥ २९ ॥
बस्तिहृत्मूर्धजङ्घोरुत्रिकपार्श्वरुजा ज्वरः ।
प्रलापोर्ध्वानिलग्लानिच्छर्दिपर्वास्थिभेदनम् ॥ ३० ॥
वर्चोमूत्रग्रहाद्याश्च जायन्तेऽतिविलङ्घनात् ।

स०—अतिकार्श्यादयोऽतिविलंघनाज्जायंते। स्नेहादीनां क्षयशब्देन समासः। बस्त्यादीनां च रुजाशब्देन। मूत्रादिग्रहाद्याश्चेत्याद्यशब्देन नानाविधानां वातरोगाणां ग्रहणम् ॥२९-३०॥

१. यही प्रसङ्ग अष्टाङ्गसंग्रह सूत्र अ. २४, चरकसंहिता सूत्र अ- २१, २२, २३, तथा सुश्रुत सूत्र १५, चि. अ. १ (श्लोक ११-१३) एवं उत्तर तन्त्र अ. ३९ में विस्तार से वर्णित है।

अतिलङ्घन से होने वाले रोग—

वि०—अतिकार्श्यादि रोग—अति लङ्घन करने से—अतिकृशता, भ्रम, कास, तृष्णा की अधिकता; अरुचि; स्नेह, अग्नि, निद्रा, दृष्टि और श्रोत्र, शुक्र, ओज, भूख और स्वर का क्षय, बस्ति (पेड़ू-मूत्राशय), हृदय, मूर्धा, जङ्घा, ऊरु, त्रिक और पार्श्व में पीड़ा; ज्वर, प्रलाप, ऊर्ध्व वायु, ग्लानि, वमन, पर्व एवं अस्थियों में टूटने की सी वेदना, पुरीष और मूत्र का अवरोध आदि (नाना प्रकार के वात रोग) होते हैं ॥ २९-३० ॥

यद्यपि कार्श्याख्योऽयं महान्दोषस्तथापि स्थौल्यमपेक्ष्य वर एवेति प्रतिपादयन्नाह—

कार्श्यमेव वरं स्थौल्यान्न हि स्थूलस्य भेषजम् ॥३१॥
बृंहणं लङ्घनं वाऽलमतिमेदोऽग्निवातजित् ।

स०—अत्र चातिकार्श्यमेव वरमतिस्थौल्यादिति वेद्यम्। न कार्श्यमात्रं स्थौल्यमात्रं वा। यस्मादतिस्थूलातिकृशावेव लंघनबृंहणाभ्यामुपक्रम्यावत्र विवक्षितौ न स्थूलकृशौ सामान्येन। कार्श्यमेव स्थौल्याद्वरं कुत इत्याह—यस्मात् स्थूलस्य भेषजं बृंहणं नालं न समर्थं न च लंघनं समर्थम्। यस्मात्स्थूलस्य भेषजमतिमेदोऽग्निवातजित्। यन्मेदःक्षपणं तदग्निनाशकृद्वातहृच्च न। स्थूलस्य हि बृंहणेन मेदोऽतितरानुपचीयते लंघनेन मेदःक्षपणं भवति किंत्वग्निपवनावस्योपचीयेते। तस्माद् बृंहणं मांसक्षीरादि यच्च लंघनं कोद्रवश्यामाकादि तत्पूर्वस्माद्धेतोःस्थूलस्य न भेषजम् ॥ ३१ ॥

स्थूलता की अपेक्षा कृशता की श्रेष्ठता तथा उसके कारण—

वि०—स्थूलता से कृशता उत्तम है; क्योंकि स्थूलता के लिये बृंहण या लङ्घन कोई भी चिकित्सा समर्थ नहीं है। क्योंकि स्थूलता के लिये अतिशय मेद, अग्नि और वायुनाशक चिकित्सा चाहिये। [स्थूल में बृंहण करने से अग्नि और वायु शान्त होते हैं पर मेद बढ़ती है और लङ्घन कराने से मेद तो घटती है पर अग्नि और वायु की वृद्धि होती है।] ॥ ३१ ॥

मधुरस्निग्धसौहित्यैर्यत्सौख्येन च नश्यति ॥ ३२ ॥
कृशिमा स्थविमाऽत्यन्तविपरीतनिषेवणैः ।

स०—यतो यस्मात्कृशिमा मधुरस्निग्धतृप्तिभिः सौख्येनानायासेन नश्यति शाम्यति तस्मात्कार्श्यं स्थौल्याद्वरम्। यतश्च स्थविमा स्थूलत्वमत्यंतविपरीतनिषेवणैः शाम्यति। अत्यंतविपरीतानां निषेवणान्यत्यंतविपरीतनिषेवणानि तैस्तिक्तकटुकषायप्रायैरन्नपानौषधसेवनैः शाम्यतीत्यर्थः। स्थूलकृशयोश्च यदि बृंहणसाध्यस्तुल्यो व्याधिः स्यात्ततः स्थूलस्योपक्रमविरोधात्तथा सुखेन न शाम्यति। यथा कृशस्य लंघनसाध्यो विसूचिकादिर्यदि चैतयोः स्यात् सोऽपि कृशस्य सुखेनोपशाम्यति। स्थूलस्य विरुद्धोपक्रमत्वाद्दुःखेन शाम्यति। यथा ह्यत्र प्रधानोपक्रमः स्वेदः स च तावन्न घटते। न स्वेदयेदतिस्थूलमिति निषेधात्। अथैनं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लंघयति तदा। स्रोतःसु मेदोरुद्धेषु वायुः कोष्ठे विशेषतः। चरन् प्रज्वलयत्यग्निं क्षुत्तृषौ स्ततस्ततोऽधिकम्। स्थूलं कोटरवद्वृद्धौ दहतोऽग्न्यनिलौ च तौ। इत्यादिना यावद्वातसखेन वनवह्निना वनस्येवाऽस्य महती व्यापदुत्पद्यते। अथ बृंहणोपक्रमः क्रियते तदाऽऽमदोषो वर्धेत। कृशस्य त्वविरुद्धोपक्रमत्वाद्विसूचिकादिः सुखेनोपक्रम्यस्तस्मात्कार्श्यमेव स्थौल्याद्वरम्। क्रशिमेति कृशशब्दात्पृथ्वादिपाठादिमनिच्। रऋतो हलादेरिति रेफादेशः। स्थविमेति दृढादेराकृतिगणत्वादिमनिजिति केचित्। तस्मिंश्च सति स्थूलदूरेति यणादिपरस्य लोपः। ऋकारस्य च गुणः॥ ३२॥

वि०—कृशता—मधुर-स्निग्ध पदार्थों को तृप्तिपर्यन्त खाते रहने से बिना श्रम के नष्ट हो जाती है और स्थूलता—तिक्त-कटु या कषाय एवं रूक्ष पदार्थों के अभ्यास से नष्ट होती है। [हेमाद्रि के विचार से—सौख्येन-सुखमय जीवन व्यतीत करने से कृशता नष्ट होती है और उसके विपरीत दुःखमय जीवन व्यतीत करने से स्थूलता नष्ट होती है।] ॥ ३२॥

वक्तव्य—स्थूल और कृश में यदि एक ही रोग उत्पन्न हो जाय (चाहे वह लंघनसाध्य हो या बृंहणसाध्य) तो स्थूल में विरुद्ध उपक्रम होने से रोग कष्टसाध्य होता है किन्तु कृश में यह बात न होने से रोग सुखसाध्य होता है।

अथ कृशे कीदृशं भेषजमित्याह—

योजयेद् बृंहणं तत्र सर्वं पानान्नभेषजम्॥ ३३॥
अचिन्तया हर्षणेन ध्रुवं सन्तर्पणेन च।
स्वप्नप्रसङ्गाच्च कृशो वराह इव पुष्यति॥ ३४॥

स०—तत्र कृशे बृंहणं सर्वं पानाद्यौषधं योज्यम्। अचिंतया चेतसः शोककार्याद्यनाकुलत्वेन तथा हर्षणेन चित्तस्य तुष्ट्या तथा संतर्पणेनाहारविशेषादिना बृंहणेन तथा स्वप्नप्रसंगादतिनिद्रासेवनेन कृशः पुष्यति सर्वोपचितधातुः संपद्यते। क इव। वराहः शूकरो यथा। अन्येभ्यश्च पुष्टिहेतुभ्यः कृशविषये स्वप्न एव प्रधान इति च दर्शयितुं वराहो दृष्टांतत्वेनोपन्यस्तो ग्रन्थकृता। तथाहि। वराहस्य स्वप्नमंतरेण न कश्चित्तथाविधोऽभ्यवहारादिरुपलभ्यते। यथाऽसौ पुष्टोऽतिमेदुरो दृश्यते। अतिस्थूलाऽतिकृशयोश्च मुनिना लक्षणमभ्यधायि। मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः। अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते। तथा। शुष्कस्फिगुदरग्रीवो धमनीजालसंततः। त्वगस्थिशेषोऽतिकृशः स्थूलपर्वा नरो मत इति॥ ३३-३४॥

कृशता का उपचार—

वि०—कृशता में खान-पान और औषध सब बृंहण गुण वाले बरतने चाहिये।

चिन्ता न करने से; प्रसन्नता से; नित्य संतर्पण करने से और पर्याप्त नींद लेने से-कृश व्यक्ति सूअर की भाँति पुष्ट होता है॥ ३३-३४॥

वक्तव्य—अतिस्थूल का लक्षण—'मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः। अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते॥'
अतिकृश का लक्षण—'शुष्कस्फिगुदरग्रीवो धमनीजालसन्ततः। त्वगस्थिशेषोऽतिकृशः स्थूलपर्वा नरो मतः॥' (चरक सू० अ० २१।)

न हि मांससमं किञ्चिदन्यद्देहबृहत्त्वकृत्।
मांसादमांसं मांसेन सम्भृतत्वाद्विशेषतः॥ ३५॥

स०—मांसेन सममपरं देहबृहत्त्वकरं न च विद्यते। सर्वबृंहणत्वकरेभ्यो मांसमतिबृंहणमित्यर्थः। विशेषेण मांसादमांसं देहस्य बृहणत्वकृत्। कुत इत्याह। मांसेन संभृतत्वात्। पुष्टत्वात्॥ ३५॥

मांस-भक्षण श्रेष्ठ बृंहण है—

वि०—शरीर का बृंहण करने में मांस के समान अन्य कोई वस्तु नहीं है। विशेष कर मांस खाने वाले प्राणियों का मांस, मांस से पुष्ट होने के कारण शरीर के बृंहण के लिये श्रेष्ठ है॥ ३५॥

एवं विस्तरेण स्थूलकृशयोरुपक्रममुक्त्वा समासेनाह—

गुरु चातर्पणं स्थूले विपरीतं हितं कृशे।
यवगोधूममुभयोस्तद्योग्याहितकल्पनम्॥ ३६॥

स०—यद्गुरु तथापतर्पणं तत्समासेन स्थूलाय हितं माक्षिकशालूकादि। एतद्धि रौक्ष्यान्मेदः क्षपयति। गौरवाच्च शीघ्रं जरां न गच्छति। यदतो विपरीतं लघु संतर्पणं च तदतिकृशाय हितं शालिषष्टिकैणेयमांसलावकपिंजलादिकम्। अतिकृशस्य ह्यग्निरपि कृशो भवति। तस्माद्यदि तस्य गुर्वन्नपानौषधमुपयुज्यते। ततोऽग्निसादोऽस्य जायते। अथाऽस्य लघु अपतर्पणमुपयुज्यते तद्भूयः कार्श्यमेवाऽस्यापद्यते। तस्माल्लघु संतर्पणं च यत्तत्कृशाय हितम्। गुरु चेत्यत्र चशब्दाल्लघु च यदपतर्पणं श्यामाककोरदूषादिकं तथाऽन्यदपि यन्न गुरु नच लघु मेदोघ्नं जागरव्यवायव्यायामचिंतादिकं तच्च स्थूले हितं गमयति। उभयोः स्थूलकृशयोर्यवगोधूमं हितम्। किंभूतं यवगोधूममित्याह—तद्योग्येत्यादि। तयोः स्थूलकृशयोर्योग्या उचिताऽऽहिता कृता कल्पना संयोगसंस्कारादिनोपयोगोपायो वा यस्मिन् यवे गोधूमे तदेवं यवाः स्थूले हिताः गोधूमा कृशे इत्यर्थः। हितयोगे चतुर्थी वक्तव्येत्यस्य प्रायिकत्वात् स्थूले हितमित्यत्र न चतुर्थी। अन्येऽपि ह्येवं प्रयोगा दृश्यन्ते। यदा रुद्रटस्य। सामाजाधीमतां हितमिति। तथाऽस्यैव। विलेपी ग्राहिणी हृद्या तृष्णाघ्नी दीपनी हिता। व्रणाऽक्षिरोगसंशुद्धदुर्बलस्नेहपायिनामिति॥ ३६॥

स्थूल-कृश की सामान्य चिकित्सा—

वि०—स्थूल व्यक्ति में गुरु और अपतर्पण वस्तु (यथा—मधु आदि) उत्तम है; कृश व्यक्ति में लघु और सन्तर्पण वस्तु (शालि, साठी, एण मांसादि) श्रेष्ठ है। जौ स्थूल के लिये और गेहूँ कृश के लिये उत्तम है; इनको उचित कल्पना से देना चाहिये अर्थात् स्थूल के लिये-तैल-तक्रादि में

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बनवाये भक्ष्य; कृश के लिये घृत-दूध आदि में बनवाये भक्ष्य देने चाहिये[1] ॥ ३६ ॥

ननु चाऽतीसारज्वरगुल्मादीनामनेकरूपत्वाद्बनंता एवोपक्रमाः प्राप्तास्तत्कथमुपक्रमस्य हि द्वित्वाद्द्विधैवोपक्रमो मत इत्याह—

दोषगत्याऽतिरिच्यन्ते ग्राहिभेद्यादिभेदतः।
उपक्रमा न ते द्वित्वाद्भिन्ना अपि गदा इव ॥ ३७ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने द्विविधोपक्रमणीयो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

स०—दोषाणां पृथग्रूपाणां संसर्गसन्निपाततरतमभेदेनाऽऽनंत्यं यातानां या गतिस्तथा तेषामेव स्थानवृद्धिक्षयलक्षणाया गतिस्तिर्यगूर्ध्वाधोलक्षणा या गतिस्तथा शाखाकोष्ठास्थिसंधिलक्षणा च या गतिस्तयाऽतिरिच्यंते बहवो भवंत्युपक्रमाः। कथमित्याह। ग्राहिभेद्यादिभेदतः। ग्राही च भेदी च ग्राहिभेदिनौ तावादी येषां रोगानुरोधान्नानाविधानामुपक्रमाणां ते ग्राहिभेद्यादयस्तेषां भेदो विशेषो ग्राहिभेद्यादिभेदस्तस्मात्। यद्यप्यतिरिच्यंतेऽनंताः संपद्यंते तथाऽपि द्वित्वात्संतर्पणाऽपतर्पणरूपान्न तेऽतिरिच्यंते। संतर्पणरूपत्वमपतर्पणरूपत्वं वा वर्जयित्वा न तेषामुपक्रमाणां रूपांतरं संभवतीत्यर्थः। कथमिव नाऽतिरिच्यंत इत्याह। भिन्ना अपि गदा इव। यथा वातादिदोषवशान्नानाविधा अपि ज्वरादयो बृंहणलंघनसाध्यत्वं सामत्वं निरामत्वं वा नातिवर्तंते तथोपक्रमा अपीति ॥ ३७ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां द्विविधोपक्रमणीयो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

चिकित्सा के दो भेद—

वि०—जिस प्रकार दोष अपने गतिभेद से भिन्न होकर अनेक होने पर भी तथा उपक्रम आदि के अनुसार अनेक होने पर भी ग्राही, भेदक ये सब उपक्रम दो (सन्तर्पण और अपतर्पण) से भिन्न नहीं हैं। सबका इन दो में ही समावेश हो जाता है; जिस प्रकार सब भिन्न-भिन्न रोगों का लंघनजन्य और बृंहणजन्य इन दो भेदों में ही समावेश होता है ॥ ३७ ॥

वक्तव्य—चरक में—'द्दोषाणां बहुसंसर्गात् सङ्कीर्यन्ते ह्युपक्रमाः। षट्त्वं तु नातिवर्त्तन्ते त्रित्वं वातादयो यथा ॥'

छः उपक्रम—लङ्घन, बृंहण, रूक्षण, स्नेहन, स्वेदन और स्तम्भन हैं। यहाँ इन छहों का अपतर्पण तथा सन्तर्पण में ही समावेश किया गया है।

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का द्विविधोपक्रमणीय नामक चौदहवाँ अध्याय समाप्त हुआ ॥ १४ ॥

पञ्चदशोऽध्यायः

द्विविधोपक्रमणीयाध्यायादनंतरं शोधनादिगणसंग्रहाध्यायारंभः। यतो दोषोपक्रमणीये द्विविधोपक्रमणीये च नानाविधा उपक्रमा अभिहितास्ते च मदनमधुकादिभेषजाश्रया अतस्तानि शोधनान्युपयोगीनि सर्वोपक्रमाधिकाराणि संजिघृक्षुरध्यायमिममारेभे—

अथातः शोधनादिगणसंग्रहमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—शोधनं शोधनरूपो द्रव्यगण आदिर्येषां त एवम्। आदिशब्देन वातहरादिगणपरिग्रहः। तेषां संग्रहो यस्मिन्नध्याये स शोधनादिगणसंग्रहस्तं शोधनादिगणसंग्रहसंज्ञमध्यायं व्याख्यास्यामः। गणः समूहः। विक्षिप्तानां पदार्थानामेकत्र राशीकरणं संग्रहः। तत्र शोधनगणस्य सर्वदोषविजयत्वेन प्राधान्यात्पूर्वमुपन्यासः।

वि०—अब इसके आगे शोधनादिगणसंग्रह नामक अध्याय का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था।

शोधनं च चतुर्विधम्। वमनविरेचनास्थापनशिरोविरेचनद्रव्यभेदेन। तत्रापि वमनस्यौषधगणं तावत्पूर्वं वक्ति—

मदनमधुकलम्बानिम्बबिम्बीविशाला
त्रपुसकुटजमूर्वा देवदालीकृमिघ्नम्।
विदुलदहनचित्राः कोशवत्यौ करञ्जः
कणलवणवचैलासर्षपाश्छर्दनानि ॥ १ ॥

स०—मदनं राठः मधुकं मधुयष्टिका। लंबा तुंबी दीर्घतिक्ताऽलाबुसंज्ञा। निंबः पिचुमन्दः बिंबी गोह्वा ओष्ठोपमफलसंज्ञा। विशाला इंद्रवारुणी। त्रपुसं तिक्तत्रपुसं वेद्यम्। तस्य वमने योग्यत्वात्। कुटजं वत्सकम्। मूर्वा पीलुपर्णी। देवदाली घरघरा। कृमिघ्नं विडंगम्। विदुलो जलवेतसः। दहनश्चित्रकः। चित्रा मूषिकपर्णी। कोशवत्यौ घंटालिकेका धामार्गवो द्वितीया राजकोशातकी। करंजो नक्तमालम्। कणः पिप्पली। लवणं सैंधवम्। वचा गोलोमी। एला त्रुटिः। सर्षपो रक्षोघ्नः। एतानि मदनादीनि छर्दनानि छर्दिकृन्ति छर्दिकाराणि। अत्र मदनविशालात्रपुसकुटजविडंगैलासर्षपाणां फलानि वमनकृंति। मधुकविदुलचित्रकदंतीवचानां तु

१. 'यथावश्यक संस्कार द्वारा गेहूँ और जौ, कृश और स्थूल दोनों के लिये हितकारक होते हैं' यह अर्थ अधिक उचित प्रतीत होता है।

१. समस्तं वर्गमर्धं वा यथालाभमथाऽपि वा।
प्रयुञ्जीत भिषक् प्राज्ञो यथोद्दिष्टेषु कर्मसु। (सु. सू. अ. ३७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मूलानि। रोध्रसुवर्णक्षीरीकंपिल्लानां त्वचो रेचनाः। शेषाणां फलपत्रपुष्पाणीति। वसुमुनिविरतिश्चेन्मालिनी नौ मयौ यः॥ १॥

वमनकारक औषध—

वि०—वमन गण—मैनफल, मुलहठी, कडुई तुम्बी, नीम, कन्दूरी, इन्द्रायण; खीरा, कुडा; मूर्वा; बन्दाल; वायविडङ्ग; हिज्जल, चित्रक; चित्रा (जंगली परवल); मंगरैल, कोशातकी (तरोई)· धामार्गव (नेनुआ), करञ्ज, पिप्पली, सेंधा-नमक, वच, इलायची और सरसों ये द्रव्य वमन कराने वाले हैं॥ १॥

वक्तव्य—यह केवल निर्देश मात्र है—इस तरह के अन्य द्रव्य भी वामक हैं। इनमें से जो मिल सकें, उनको बरते और जो द्रव्य अयौगिक हो उसे छोड़ देवे।

निकुम्भकुम्भत्रिफलागवाक्षी-
स्नुक्शङ्खिनीनीलिनितिल्वकानि।
शम्याककम्पिल्लकहेमदुग्धा
दुग्धं च मूत्रं च विरेचनानि॥ २॥

स०—निकुंभो दंती। कुंभस्त्रिवृत्। त्रिफला वरा। गवाक्षी विशाला द्वितीयेंद्रवारुणी। स्नुग्गुडा। शंखिनी यवतिक्ता। नीलिनी नीलपुष्पा भारवाहीसंज्ञा। तिल्वको रोध्रः। शम्याकः कर्णिकारः। कंपिल्लको रंजनकः। हेमदुग्धा कनकक्षीरी। दुग्धं क्षीरम्। मूत्रं प्रसिद्धम्। निकुंभादीन्येतानि विरेचनानि। उपजातिवृंत्तम्॥ २॥

विरेचनकारक औषध—

वि०—विरेचन गण—दन्ती, द्रवन्ती, त्रिफला; इन्द्रायण; थूहर (सेहुँड); शंखिनी (यवतिक्ता-ऑखफुटामणी-गुजराती में); नीलिनी (नील); तिल्वक; अमलतास; कबीला; स्वर्णक्षीरी; दूध और मूत्र-ये विरेचन हैं॥ २॥

मदनकुटजकुष्ठदेवदाली-
मधुकवचादशमूलदारुरास्नाः।
यवमिशिकृतवेधनं कुलत्था
मधु लवणं त्रिवृता निरूहणानि॥ ३॥

स०—मदनं मदनफलम्। कुटजं वत्सत्वक्। कुष्ठं गदनाम। दारु देवदारुः। रास्ना युक्तरसा। मिसिः शतपुष्पा। कृतवेधनं धामार्गवः। निरूहणानि निरूहणसाधनानि। भवति जगति नौ ततः परौ यौ नजसहितैर्जरगैश्च पुष्पिताग्रा॥ ३॥

निरूहण औषध—

वि०—निरूह गण—मैनफल; कुड़ा, कूठ; बन्दाल, मुलहठी, वच, दशमूल, देवदारु, रास्ना; जौ, सौंफ, कडुवी तरोई, कुलथी; मधु, नमक और निशोथ ये निरूहवस्ति के उपयोगी द्रव्य हैं॥ ३॥

वेल्लापामार्गव्योषदार्वीसुराला
बीजं शैरीषं बार्हतं शैग्रवं च।
सारो माधूकः सैन्धवं तार्क्ष्यशैलं
त्रुट्यौ पृथ्वीका शोधयन्त्युत्तमाङ्गम्॥ ४॥

स०—वेल्लो विडंगः। अपामार्गः प्रत्यक्पुष्पी। व्योषं त्रिकटुकम्। दार्वी पीतद्रुः। सुराला श्रेष्ठसर्जरसः। शिरीषबीजं शैरीषम्। बृहत्या बीजं बार्हतम्। शिग्रोः बीजं शैग्रवम्। सारो माधूको मधुपुष्पसारः। सैंधवं सिंधूत्थम्। तार्क्ष्यशैलं शुष्करसांजनम्। त्रुटयौ सूक्ष्मैला स्थूलैला च। पृथ्वीका हिंगुपत्री। एतान्युत्तमांगं शोधयंति। मूर्धविरेचनानीत्यर्थः। मौ यौ पंचाश्चैर्वैश्वदेवीति नाम्ना॥ ४॥

शिरोविरेचन औषध—

वि०—नस्य गण—वेल्ल (विडंग); चिरचिटा, त्रिकटु, दारुहल्दी, राल, शिरस, बड़ी कटेरी और सहजने के बीज; महुवे का सार; सैन्धवनमक; रसौत; इलायची, बड़ी इलायची; पृथ्वीका (नाडीहिंगु); ये शिर का शोधन (नस्य द्वारा प्रयुक्त होने पर) करते हैं॥ ४॥

भद्रदारु नतं कुष्ठं दशमूलं बलाद्वयम्।
वायुं वीरतरादिश्च विदार्यादिश्च नाशयेत्॥ ५॥

स०—भद्रदारु द्रुकिलिमम्। नतं तगरम्। कुष्ठं गदः। दशमूलं द्विपंचमूलम्। बलाद्वयं बलाऽतिबला च। एतानि भद्रदार्वादीनि तथा वक्ष्यमाणो वीरतरादिर्विदार्यादिश्च गणो वायुं नाशयति॥ ५॥

वायुनाशक औषध—

वि०—वातघ्न गण—देवदारु, तगर, कूठ, दशमूल, खिरेटी और अतिबला (कंघी); तथा (आगे कहे जाने वाले) वीरतरादिगण और विदार्यादि गण के द्रव्य वायु का नाश करते हैं॥ ५॥

दूर्वाऽनन्ता निम्बवासाऽऽत्मगुप्ता
गुन्द्राऽभीरुः शीतपाकी प्रियङ्गुः।
न्यग्रोधादिः पद्मकादिः स्थिरे द्वे
पद्मं वन्यं सारिवादिश्च पित्तम्॥ ६॥

स०—दूर्वा शाद्वलम्। अनंता यवासः। निंबः प्रसिद्धः। वासा आटरूषकः। आत्मगुप्ता कपिकच्छूः। गुंद्रा पदप्रकः। अभीरुः शतावरी। शीतपाकी शिखंडिका काकणंतिकाभेदः। प्रियंगुः श्यामा। एष दूर्वादिगणस्तथा वक्ष्यमाणो न्यग्रोधादिस्तथा पद्मकादिर्गणस्तथा शालिपर्णीपृश्निपर्ण्यौ तथा पद्मं जलजं वन्यं कुरंनटं सारिवादिश्च गणः। एते पित्तं नाशयंति। म्तौ तो गौ चेच्छालिनी वेदलोकैः॥ ६॥

पित्तनाशक औषध—

वि०—पित्तनाशक गण—दूब, सारिवा; नीम, अडूसा, कौंच; गुन्द्रा, शतावरी; शीतपाकी (बला), प्रियंगु; शालपर्णी, पृश्निपर्णी; कमल; वन्य (केवटी मोथा); ये तथा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न्यग्रोधादि, पद्मकादि और सारिवादिगण पित्त को शान्त करते हैं ॥ ६ ॥

आरग्वधादिरर्कादिर्मुष्ककाद्योऽसनादिकः ।
सुरसादिः समुस्तादिर्वत्सकादिर्बलासजित् ॥ ७ ॥

स०—आरग्वधाद्यादयो गणाः सप्तैते बलासं श्लेष्माणं जयंति ॥ ७ ॥

कफनाशक औषध—

वि०—श्लेष्मनाशक गण—आरग्वधादि, अर्कादि, मुष्कादि; असनादि, सुरसादि, मुस्तादि; वत्सकादि ये गण कफनाशक हैं ॥ ७ ॥

जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च ।
ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः ॥ ८ ॥

स०—जीवंत्यादिर्गणो जीवनीयसंज्ञः उदाहरणमात्रं चेदम्। धीमता स्वादुशीतस्निग्धादीन् जीवंत्यादिषु साधारणगुणानालोच्य क्षीरेक्षुद्राक्षाऽक्षोडविदार्यादिषु तद्गुणेषु जीवनीयादित्वमवधारयितुं युक्तमिति । जीवंती जीववर्धना। काकोल्यौ द्वे एका काकोली कबडीसंज्ञा । अन्या क्षीरकाकोली पयस्विनी संज्ञा। द्वे मेदे एका मेदा मणिच्छिद्रसंज्ञा । अन्या महामेदा वृत्तसहासंज्ञा । मुद्गवर्ण्यादीनां प्रागुक्तानि नामानि । द्वयंतरादिगुरुभिः सोदधिलैः सप्तभिर्गणैर्गुरुणा । आर्यार्धे नाऽत्रायुजि जः षष्ठोऽयं नलघुकौ वा ॥ ८ ॥

जीवनीयगण—

वि०—जीवनीय गण—जीवन्ती, काकोली, क्षीरकाकोली, मेदा, महामेदा, मुद्गपर्णी, माषपर्णी; ऋषभक, जीवक और मुलहठी यह जीवनीय (जीवन के उपयोगी) गण हैं ॥ ८ ॥

विदारिपञ्चाङ्गुलवृश्चिकाली
वृश्चीवदेवाह्वयशूर्पपर्ण्यः ।
कण्डूकरी जीवनह्रस्वसंज्ञे
द्वे पञ्चके गोपसुता त्रिपादी ॥ ९ ॥
विदार्यादिरयं हृद्यो बृंहणो वातपित्तहा ।
शोषगुल्माङ्गमर्दोर्ध्वश्वासकासहरो गणः ॥ १० ॥

स०—विदारी वृष्यकंदा । पंचांगुल एरंडः । वृश्चिकाल्युष्ट्रधूमको मेषश्रृङ्गी । वृश्चीवः क्षुद्रवर्षाभूः । देवाह्वयः सुरदारुः । देवद्वयेति। पाठे एका सहदेवा द्वितीया विश्वदेवा चेति देवाद्वयम् । शूर्पपर्णी मुद्गपर्णी तथा माषपर्णी च । कंडूकरी कपिकच्छूः । जीवनेत्यादि । अभीरुवीराजीवंतीजीवकर्षभकैः स्मृतम् । जीवनाख्यमिति जीवनसंज्ञं पंचमूलम् । बृहती कंटकारिका । शालिपर्णी पृश्निपर्णी गोक्षुरकमिति ह्रस्वसंज्ञं पंचमूलम् । गोपसुता सारिवा । त्रिपादी हंसपादी कीटमारिकाख्या । उपजातिर्वृत्तम् एष। विदार्यादिगणो बृंहणो वातपित्तघ्नः शोषादिहरश्च ॥ ९-१० ॥

विदार्यादिगण—

वि०—विदार्यादि गण—बिदारी, एरण्ड, वृश्चिकाली (उतरन); पुनर्नवा, देवदारु, मुद्गपर्णी, माषपर्णी; कौंच, जीवन पञ्चमूल तथा लघु पञ्चमूल; सारिवा, त्रिपादी (हंसराज) यह विदार्यादिगण हृदय के लिये उत्तम; बृंहण करने वाला, वात-पित्तनाशक, शोष, गुल्म, अंगों का टूटना, उदावर्त, श्वास, कास का नाशक है । ९-१० ॥

सारिवोशीरकाश्मर्यमधूकशिशिरद्वयम् ।
यष्टी परूषकं हन्ति दाहपित्तास्रतृड्ज्वरान् ॥ ११ ॥

स०—सारिवोऽणवल्ली । उशीरं वीरतरुः । काश्मर्यः सर्वतोभद्रा । मधूको गुडपुष्पकः । शिशिरद्वयमेकं सितं चंदनं मलयजसंज्ञमन्यद्रक्तचंदनसंज्ञम् । यष्टी क्लीतकसंज्ञा । परूषकं मृदुफलम् । सारिवादिरयं दाहादीन् हंति ॥ ११ ॥

सारिवादि गण—

वि०—सारिवादिगण—सारिवा, खस, गम्भारी, महुआ, श्वेत और रक्त चन्दन, मुलहठी और फालसा-यह सारिवादिगण-दाह, पित्त, रक्त, प्यास और ज्वर को नष्ट करता है ॥ ११ ॥

पद्मकपुण्ड्रौ वृद्धितुगर्द्ध्यः
श्रृङ्ग्यमृता दश जीवनसंज्ञाः ।
स्तन्यकरा घ्नन्तीरणपित्तं
प्रीणनजीवनबृंहणवृष्याः ॥ १२ ॥

स०—पद्मकं हेमपद्मम् । पुंड्रः प्रपौंडरीकम् । वृद्धिः श्रावणी । तुगा तुगाक्षीरी । ऋद्धिर्महाश्रावणी । श्रृंगी कुलीरश्रृंगी । अमृता छिन्नरुहा, दश जीवनसंज्ञा जीवंत्यादिगणोक्ताः एते पद्मकादयः स्तन्यहेतवः । तथा वातपित्तं घ्नन्ति । तथा प्रीणनादियुक्ताः । अष्टाभ्यो भाद्रौ योज्या उपचित्रा ॥ १२ ॥

पद्मकादिगुण—

वि०—पद्मकादिगण—पद्माख, तिलक, वृद्धि, वंशलोचन, ऋद्धि, कर्कटश्रृङ्गी, गिलोय, जीवनीयगण के दस द्रव्य; (श्लोक ८) यह गण दुग्धवर्धक, वायु-पित्तनाशक; प्रीणन, जीवन, बृंहण और वृष्य है ॥ १२ ॥

परूषकं वरा द्राक्षा कट्फलं कतकात् फलम् ।
राजाह्वं दाडिमं शाकं तृण्मूत्रामयवातजित् ॥ १३ ॥

स०—परूषको मृदुफलो धन्वनच्छदः । वरा श्रेष्ठा। द्राक्षा मधुफला । कट्फलं रोहिणी सोमवल्कः । कतकाफलं वारिप्रसादनम् । राजाह्वं कर्णिकारम् । दाडिमं शुकेष्टम् । शाकं खरच्छदं वृक्षविशेषः । परूषकादिरेष तृडामयादिजित् ॥ १३ ॥

परूषकादिगण—

वि०—परूषकादिगण—फालसा, त्रिफला, द्राक्षा, कायफल, कतक का फल (निर्मली), राजाह्व (राजादन-खिरनी) अनार, सागौन का फल यह गण प्यास, मूत्ररोग और वातनाशक है ॥ १३ ॥

अञ्जनं फलिनी मांसी पद्मोत्पलरसाञ्जनम् ।
सैलामधुकनागाह्वं विषान्तर्दाहपित्तनुत् ॥ १४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—अंजनं द्विधा । एकं स्रोतोंजनं यामुनसंज्ञमपरं सौवीरांजनं नेत्रभूषणाख्यम् । फलिनी प्रियंगुः । मांसी कृष्णजटा । पद्मं पुष्करम् । उत्पलं शशिप्रियम् । रसांजनं तार्क्ष्यशैलम् । एला बहुला प्रसिद्धा । मधुकं मधुयष्टी । नागाह्वं नागकेसरम् । एषोऽजनादिर्विषादिजित् ॥ १४ ॥

अञ्जनादिगण—

वि०—अञ्जनादिगण—स्रोतोञ्जन, प्रियंगु, जटामांसी, कमल, उत्पल, रसौत, इलायची, मुलहठी, नागकेशर यह गण विष, अन्तर्दाह और पित्तनाशक है ॥ १४ ॥

पटोलकटुरोहिणीचन्दनं
मधुस्रवगुडूचिपाठान्वितम् ।
निहन्ति कफपित्तकुष्ठज्वरान्
विषं वमिमरोचकं कामलाम् ॥ १५ ॥

स०—पटोलं पांडुफलम् । कटुरोहिणी कटुकी । चंदनं गन्धसारम् । मधुस्रवा मरुद्री सुरंगी । गुडूची छिन्नरुहा । पाठांऽबष्ठा । एतैर्द्रव्यैर्युक्तमेतत् पटोलादिकं कफादीन् हंति । मात्रासमकं नवमोल्गंतम् ॥ १५ ॥

पटोलादिगण—

वि०—पटोलादिगण—पटोल, कुटकी; चन्दन, मूर्वा; गिलोय, पाठा, यह गण कफ, पित्त, कुष्ठ, ज्वर, विष, वमन, अरुचि और कामला को नष्ट करता है ॥ १५ ॥

गुडूचीपद्मकारिष्टधानकारक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्दिदाहतृष्णाघ्नमग्निकृत् ॥ १६ ॥

स०—गुडूची छिन्नोद्भवा । पद्मको मरुद्भवः । अरिष्टो निंबः । धानका धान्याकम् । रक्तकाष्ठम् । एष गुडूच्यादिः पित्तादीन् हंति ॥ १६ ॥

गुडूच्यादिगण—

वि०—गुडूच्यादिगण—गिलोय, पद्माख, नीम, धनियाँ, लालचन्दन, यह गण पित्त, कफ, ज्वर, वमन, दाह और तृष्णानाशक एवं अग्निवर्धक है ॥ १६ ॥

आरग्वधेन्द्रयवपाटलिकाकतिक्ता-
निम्बामृतामधुरसास्रुववृक्षपाठाः ।
भूनिम्बसैर्यकपटोलकरञ्जयुग्म-
सप्तच्छदाग्निसुषवीफलबाणघोण्टाः ॥ १७ ॥
आरग्वधादिर्जयतिच्छर्दिकुष्ठविषज्वरान् ।
कफं कण्डूं प्रमेहं च दुष्टव्रणविशोधनः ॥ १८ ॥

स०—आरग्वधः शम्याकः । इंद्रयवाः कलिंगकाः । पाटलिर्वसंतदूती । काकतिक्ता शार्ङ्गेष्टा । निंबः पारिभद्रकः । अमृता गुडूची । मधुरसा मूर्वा । स्रुववृक्षो विकंकतः कंटकीवृक्षः कंटकारिकेति प्रसिद्धः । पाठांऽबष्ठा । भूनिंबः कैरातः । सैर्यकः सहचरः । पटोलं कर्कशच्छदम् । करंजयुग्ममेकः पूतिककरंजश्चिरिबिल्वाख्योऽपरो नक्तमालाख्यः । सप्तच्छदोऽयुग्मच्छदः । अग्निश्चित्रकः । सुषवी कारवी पानीयवल्ली अजशृङ्गी । फलं मदनफलम् । बाणः सहचरः । घोंटा पूगविशेषः । अयमारग्वधादिश्छर्द्यादीन्निहंति । वसंततिलकावृत्तम् ॥ १७-१८ ॥

आरग्वधादिगण—

वि०—आरग्वधादिगण—अमलतास, इन्द्रजौ, पाटलि (पाटला), काकतिक्ता, नीम, गिलोय, मूर्वा, स्रुववृक्ष (विकङ्कत), पाठा, चिरायता, सैर्यक (कांटा सरैया), पटोल, नाटाकरञ्ज, पूतिकरञ्ज, सप्तच्छद (सतवन), चित्रक, सुषवी (करैला), फल (मैनफल), बाण (नील-झिंटी), घोण्टा (बेर), यह आरग्वधादि गण है तथा दूषित व्रणों का शोधक है ॥ १७-१८ ॥

असनतिनिशभूर्जश्वेतवाहप्रकीर्याः
खदिरकदरभण्डीशिंशिपामेषश्रृङ्ग्यः ।
त्रिहिमतलपलाशा जोङ्गकः शाकशालौ
क्रमुकधवकलिङ्गच्छागकर्णाश्वकर्णाः ॥ १९ ॥
असनादिर्विजयते श्वित्रकुष्ठकफक्रिमीन् ।
पाण्डुरोगं प्रमेहं च मेदोदोषनिबर्हणः ॥ २० ॥

स०—असनः पीतशालाख्यः । तिनिशः स्यंदनसंज्ञः । भूर्जो बहुपुटाख्यः । श्वेतवाहोऽर्जुनः । प्रकीर्यः पूतिकरंजः । खदिरो गायत्री । कदरः खदिराकृतिः श्वेतसारः । भंडी शिरीषः । शिंशपा मंडलपत्रिका । मेषशृङ्ग्यजशृङ्गी । त्रिहिमं चंदनत्रयं मलयजरक्तचंदनदारुहरिद्राभेदेन । तलस्तालः । पलाशः किंशुकः । जोंगकोऽगुरुसंज्ञः । शाकं वरदारु । शालो रसनिर्यासाख्यः । क्रमुकं पूगम् । धवः शकटाख्यः । कलिंगं शक्रयवाः । छागकर्णो बस्तकर्णः । अश्वकर्णः कुशिकः । मालिनीवृत्तम् । अथमसनादिः श्वित्रादीन् विजयते शमयति । विजयत इति विपराभ्यां जेरित्यात्मनेपदम् । तथा मेदोदोषं निबर्हति पराकरोति ॥ १९-२० ॥

असनादिगण—

वि०—असनादिगण—असन (बिजयसार), तिनिश, भोजपत्र, श्वेतवाह (अर्जुन), पूतिकरंज, खैर, कदर (श्वेत खदिर), भण्डी (शिरीष), शीशम, मेढासिंगी, त्रिहिम (तीन चन्दन-कालीयक, लालचन्दन, श्वेतचन्दन); ताल, पलाश, जोंगक (अगरु), सागौन, साल, सुपारी, धव, इन्द्रजौ, अजकर्ण, अश्वकर्ण यह असनादि गण-श्वित्र, कुष्ठ, कफ, क्रिमि, पाण्डुरोग तथा प्रमेह को नष्ट करता है, और मेदोदोष को शान्त करता है ॥ १९-२० ॥

वरुणसैर्यकयुग्मशतावरी-
दहनमोरटबिल्वविषाणिकाः ।
द्विबृहतीद्विकरञ्जजयाद्वयं
बहलपल्लवदर्भरुजाकराः ॥ २१ ॥
वरुणादिः कफं मेदो मन्दाग्नित्वं नियच्छति ।
आढ्यवातं शिरःशूलं गुल्मं चान्तःसविद्रधिम् ॥ २२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—वरुणो रुमालः। सैर्यकयुग्मं सहचरद्वयमेको रक्तपुष्पः कुरबकाख्योऽन्यः पीतपुष्पः कुरंटकाख्यः। शतावरी वरा। दहनो वह्निः। मोरटो मूर्वा। बिल्वः पूतिवातः। विषाणिकाऽजश्रृङ्गी। द्विबृहत्यौ कंटकारिकामोटिकाऽख्ये। करंजयुग्मं प्रागुक्तम्। तर्कारी हरीतकी चेति जयाद्वयम्। बहलपल्लवः शोभांजनः। दर्भाः कुशाः रुजाकरो हिताङ्गुः। द्रुतविलंबितमाह नभौ भरौ। वरुणादिरयं कफादीन् हंति॥ २१-२२॥

वरुणादिगण—

वि०—वरुणादिगण—वरुण (वरना); दोनों प्रकार की झिंटी (श्वेत और नील फूल की), शतावरी, चित्रक, मूर्वा, बिल्व, मेषश्रृङ्गी, कटेरी, बड़ी कटेरी, नाटाकरञ्ज और पूतिकरंज, जयाद्वय (अग्निमंथ और टेकार); सहजना, दाभ, रुजाकर (आर्त्तगल?)-यह वरुणादि गण कफ, मेद, अग्निमान्द्य, आढ्यवात (ऊरुस्तम्भ), शिरःशूल, गुल्म और अन्तर्विद्रधि को नष्ट करता है॥ २१-२२॥

ऊषकस्तुत्थकं हिङ्गु कासीसद्वयसैन्धवम्।
सशिलाजतु कृच्छ्राश्मगुल्ममेदःकफापहम्॥ २३॥

स०—ऊषको वृष्यकः कल्लर इति प्रसिद्धः। तुत्थकं कार्पूरं किटिहापरसंज्ञम्। हिंगु रामठम्। कासीसद्वयमेकं पांशुधातुसंज्ञमपरं पुष्पकासीसाख्यम्। सैंधवं माणिमन्थम्। शिलाजतु शिलाजम्। ऊषकादिरयं मूत्रकृच्छ्रादीनपहंति॥२३॥

ऊषकादिगण—

वि०—ऊषकादिगण—ऊषक (इस नाम का एक विशिष्ट गोंद); नीलाथोथा, हींग; हीरा कासीस, पुष्पकासीस, सैन्धव और शिलाजतु-यह गण मूत्रकृच्छ्र, अश्मरी, गुल्म, मेद और कफ का नाशक है॥ २३॥

वेल्लन्तरारणिकवूकवृषाश्मभेद-
गोकण्टकेत्कटसहाचरबाणकाशाः।
वृक्षादनीनलकुशद्वयगुण्ठगुन्द्रा
भल्लूकमोरटकुरण्टकरम्भपार्थाः॥ २४॥
वर्गो वीरतराद्योऽयं हन्ति वातकृतान् गदान्।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजाहरः॥ २५॥

स०—वेल्लंतरो वीरतर उशीराख्यः। अरणिकोऽग्निमंथः। वूक ईश्वरमल्लिका। वृष आटरूपकः। अश्मभेदः पाषाणभेदः। गोकंटको गोक्षुरकः। इत्कटा सूक्ष्मपत्रिका दीर्घलोहितयष्टिका काष्ठविशेषः। सहाचरः सहचरः। बाणो नीलपुष्पसैर्यकः। काशः श्वेतचामरकः। वृक्षादनी कामवृक्षकः। नलो मृत्युपुष्पाख्यः। कुशद्वयं स्थूलसूक्ष्मभेदेन दर्भद्वयम्। गुंठो वृंततृणम्। कुंद्रगुंठकामरसंज्ञः। गुंद्रा पदएरकः। भल्लूकः श्योनाकः। मोरटः क्षीरमोरटः। कुरंटः सितिवारकः। करंभ उत्तमारणिः। पार्थो सुवर्चला। वसन्ततिलकावृत्तम्। एष वीरतरादिर्वर्गो गणो वातजान् रोगान् हंति तथाऽश्मर्यादिहरः॥ २४-२५॥

वीरतरादिगण—

वि०—वीरतरादिगण—वेल्लन्तर, अग्निमन्थ, वूक (ईश्वरमल्लिका-या बकपुष्प); अडूसा, पाषाणभेद, गोखरू, इत्कट, झिण्टी, बाण (नील फूल की झिंटी), काश, वृक्षादनी (बन्दाक), नरकुल, कुशा, दाभ; गुण्ठ (वृत्ततृण), गुन्द्रा (एरक-एकड़ा); भल्लूक (श्योनाक), मोरट, कुरण्ट (सितिवारक), करम्भ (उत्तमारणी), पार्था (कपोतवंका), यह वीरतरादिगण वातजन्य रोग, अश्मरी, शर्करा, मूत्रकृच्छ्र और मूत्राघात की पीड़ा को नष्ट करती है॥ २४-२५॥

रोध्रशाबररोध्रपलाशा
जिङ्गिणीसरलकट्फलयुक्ताः।
कुत्सिताम्बकदलीगतशोकाः
सैलवालुपरिपेलवमोचाः॥ २६॥
एष रोध्रादिको नाम मेदःकफहरो गणः।
योनिदोषहरः स्तम्भी वर्ण्यो विषविनाशनः॥ २७॥

स०—रोध्रस्तिल्वकः। शाबररोध्रोऽभिषज्जापरसंज्ञः। पलाशः शठी। जिंगिणी जिंजिणी कृष्णशाल्मली। सरलं देवदारुः। कट्फलं कुमुदारोहिणी। युक्ता रास्ना गिरिकर्णिकेत्यन्ये। कुत्सितांबः कदंबः। कदली रंभा। गतशोकोऽशोकः। एलवालु ऐलेयम्। परिपेलवं कुटन्नटं गोपालदमनकाख्यम्। मोचा शल्लकी। स्वागतावृत्तम्। अयं रोध्रादिको गणो मेदःकफापहो योनिदोषघ्नश्च। तथा स्तंभी दोषाणां शकृदादेश्च। तथा वर्णाय हितो विषघ्नश्च॥ २६-२७॥

रोध्रादिगण—

वि०—रोध्रादिगण—लोध्र, शाबरलोध (पठानीलोध), पलाश (ढाक), जिंगण, चीड़, कायफल, युक्ता (फञ्जी), कदम्ब, केला, अशोक, एलवालु, परिपेलव (केवटी मोथा), मोचा (सल्लकी) यह रोध्रादिगण कफ और मेदनाशक, योनिदोषहर, स्तम्भक, वर्णकारक और विषनाशक है॥२६-२७॥

अर्कालर्कौ नागदन्ती विशल्या
भार्ङ्गी रास्ना वृश्चिकाली प्रकीर्या।
प्रत्यक्पुष्पी पीततैलोदकीर्या
श्वेतायुग्मं तापसानां च वृक्षः॥ २८॥
अयमर्कादिको वर्गः कफमेदोविषापहः।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः॥ २९॥

स०—अर्कः सदापुष्पी। अलर्को मंदारकाख्यः श्वेतकुसुमः। नागदंती पर्वपुष्पिका। विशल्या लांगली। भार्गी फंजी। रास्ना रस्या। वृश्चिकाल्युष्ट्रधूमकः। प्रकीर्या करंजकः। प्रत्यक्पुष्पी अपामार्गः। पीततैला काकादनी। उदकीर्या करंजकः। श्वेतायुग्ममेका किणिहिसंज्ञाऽन्या महाश्वेता पालिंदीसंज्ञा। तापसानां वृक्ष इंगुदी। शालिनीवृत्तम्। एषोऽर्कादिर्वर्गः कफादिघ्नोऽतिशयेन व्रणशोधनः॥२८-२९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्कादिगण—

वि०—अर्कादिगण—आक, श्वेत फूल का आक, नागदन्ती, कलिहारी, भार्ङ्गी, रास्ना, उत्तमारणी, पूतिकरंज, अपामार्ग, पीततैला (मालकंगनी), नाटा करंज, किणही और श्वेत अपराजिता, हिंगोट, यह अर्कादि वर्ग कफ, मेद और विषनाशक, कृमि एवं कुष्ठशामक, विशेष करके व्रणशोधक है ॥ २८-२९ ॥

सुरसयुगफणिज्जं कालमाला विडङ्गं
खरबुसवृषकर्णीकट्फलं कासमर्दः ।
क्षवकसरसिभार्ङ्गीकार्मुका काकमाची
कुलहलविषमुष्टीभूस्तृणो भूतकेशी ॥ ३० ॥

सुरसादिर्गणः श्लेष्मभेदःक्रिमिनिषूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥ ३१ ॥

स०—सुरसद्वयं तुलसीद्वयं गौरकृष्णभेदेन । फणिज्जो मरीचकः । कालमाला-कृष्णार्जकः कुबेरकभेदः । विडंगं वेल्लम् । खरबुसो मरुबकः । वृषकर्णी । मूषिककर्णी । कट्फलं सोमवल्कम् । कासमर्दः कासघ्नः । क्षवकः क्षुद्बिबोधनः । सरसी तुंबरपत्रिका । भार्गी अंगारवल्ली । कार्मुका रक्तमंजरी । अतिमुक्तक इत्यन्ये । काकमाची गुडफला । कुलहलो भूकुंबकोऽलंबुसाख्यः । विषमुष्टिः कुचिला । महानिंबक इत्येके । भूस्तृणं गुह्यबीजमतिच्छत्राख्यम् । भूतकेशी मांसीपुत्रचारा । मालिनीवृत्तम् । सुरसादिरयं गणः श्लेष्मादिघ्नः प्रतिश्यायादिहरो व्रणशुद्धिकृत् ॥ ३०-३१ ॥

सुरसादिगण—

वि०—सुरसादिगण—श्वेत और काली दो प्रकार की तुलसी, फणिज्जक, कालमाला (बर्बरी), विडंग, खरबुस (मरवा भेद), मूषिककर्णी, कायफल, कासमर्द, नकछिकनी, सरसी (कपित्थपत्री), भार्ङ्गी, कार्मुका (अतिमुक्ता), मकोय, कुलहल (मुण्डी) विषमुष्टि (महानिम्ब), भूस्तृण और भूतकेशी यह सुरसादिगण कफ, मेद, कृमि, प्रतिश्याय, अरुचि, श्वास, कासनाशक और व्रणशोधक है ॥ ३०-३१ ॥

मुष्ककस्नुग्वराद्वीपिपलाशधवशिंशपाः ।
गुल्ममेहाश्मरीपाण्डुमेदोर्शःकफशुक्रजित् ॥ ३२ ॥

स०—मुष्कको मोचकः । स्नुक् गुडा उग्रकांडः । वरादीनां प्रोक्तानि नामानि । मुष्ककादिरेष गुल्मादिजित् ॥३२॥

मुष्ककादिगण—

वि०—मुष्ककादिगण—मुष्कक (मोचक), थूहर, त्रिफला, चित्रक, ढाक, शीशम यह मुष्ककादिगण गुल्म, प्रमेह, अश्मरी, पाण्डु, मेद, अर्श, कफ और शुक्रनाशक है ॥ ३२ ॥

वत्सकमूर्वाभार्ङ्गी कटुका मरिचं घुणप्रिया च गण्डीरम् ।
एला पाठाऽजाजी कट्वङ्गफलाजमोदसिद्धार्थवचाः॥३३॥
जीरकहिङ्गुविडङ्गं पशुगन्धा पञ्चकोलकं हन्ति ।
चलकफमेदःपीनसगुल्मज्वरशूलदुर्नाम्नः ॥ ३४ ॥

स०—वत्सको वनतिक्तकः । मूर्वा मधुरसा । मरिचभूषणम् । घुणप्रियाऽतिविषा । गंडीरं स्नुही । एला वेला । पाठा प्राचीना । अजाजी जीरकः । कट्वंगफलमरलुकफलम् । केचित्तु कट्वंगं टुंटुकं फलं राठमित्याहुः । अजमोदो दीप्यकः । सिद्धार्थो गौरसर्षपः । वचादीनामुक्तानि नामानि । गुर्वंताष्टपदनभागार्यापूर्वसदृशकलद्वितया । आर्यैरार्यागीतिर्गीता संगीतगीतविधौ । पशुगंधा अजगंधा मकरंतराख्या । पंचकोलकं प्रागुक्तम् । वत्सकादयश्चलादीन् घ्नंति । आर्या ॥ ३३-३४ ॥

वत्सकादिगण—

वि०—वत्सकादिगण—वत्सक (कुटज), मूर्वा, भार्ङ्गी, कुटकी, मरिच, अतीस, गण्डीर (शिरीष), इलायची, पाठा, जीरा, श्योनाक का फल, अजमोदा, सरसों, वच, जीरा, हींग, वायविडङ्ग, अजगन्धा और पञ्चकोल (पीपर, पीपरामूल, चव्य, चीता और सोंठ) यह वत्सकादि गण वायु, कफ, मेद, पीनस, गुल्म, ज्वर, शूल और अर्शनाशक है ॥ ३३-३४ ॥

वचाजलददेवाह्वनागरातिविषाभयाः ।
हरिद्राद्वययष्ट्याह्वकलशीकुटजोद्भवाः ॥ ३५ ॥
वचाहरिद्रादिगणावामातीसारनाशनौ ।
मेदःकफाढ्यपवनस्तन्यदोषनिबर्हणौ ॥ ३६ ॥

स०—वचा गोलोमी । जलदोऽम्बुधरः । देवाह्वं किलिमम् । नागरं विश्वम् । अतिविषा भंगुरा । अभया हरीतकी । हरिद्राद्वयं पिंडा एका पचंपचा दार्वीसंज्ञान्या । यष्ट्याह्वं क्लीतिका । कलशी पृश्निपर्णी । कुटजोद्भवा इंद्रयवाः । एतौ वचादिहरिद्रादिगणावामातीसारघ्नौ मेदःकफादिहरौ च ॥ ३५-३६ ॥

वचादि और हरिद्रादिगण—

वि०—वचादिगण—वच, मोथा, देवदारु, सोंठ, अतीस, हरड । हरिद्रादिगण—हल्दी, दारुहल्दी, मुलहठी, पृश्निपर्णी, इन्द्रजौ । वचादि और हरिद्रादि ये दोनों गण—आमातीसारनाशक, मेद, कफ, आढ्यवात तथा स्तन्यदोषनाशक हैं ॥ ३५-३६ ॥

प्रियङ्गुपुष्पाञ्जनयुग्मपद्माः
पद्माद्रजो योजनवल्ल्यनन्ता ।
मानद्रुमो मोचरसः समङ्गा
पुन्नागशीतं मदनीयहेतुः ॥ ३७ ॥
अम्बष्ठा मधुकं नमस्करी
नन्दीवृक्षपलाशकच्छुराः ।
रोध्रं धातकिबिल्वपेशिके
कट्वङ्गः कमलोद्भवं रजः ॥ ३८ ॥
गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानामपि रोपणौ ॥ ३९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—प्रियंगुः श्यामा। पुष्पांजनं रीतिपुष्पम्। युग्मेत्यत्राऽनुवृत्तिकृतेन संबंधेनांऽजनमिति संबध्यते। तेनांऽजनयुग्मं स्रोतोऽजनमेकमन्यत्सौवीरमित्यर्थोऽवतिष्ठते। पद्मा पद्मचारिणी। पद्मात् कमलाद्‌द्रजः केसरम्। योजनवल्ली मंजिष्ठा। अनंता यवासकः। मानद्रुमः शाल्मली। मोचरसः शाल्मलीनिर्यासः। समंगा नमस्कारी रक्तमूलाख्या। पुन्नागस्तुंगो रक्तकेसराख्यः। शीतं चंदनम्। मदनीयहेतुर्धातुकी। उपजातिर्वृत्तम्। अंबष्ठा मयूरशिखाख्या। मधुकं मधुयष्टिका। नमस्करी समंगा। नंदीवृक्षः प्ररोही। पलाशः प्रसिद्धः। कच्छुरा फणिहारी धन्वयवासकाख्यः। बिल्वपेशिका बिल्वमज्जा। कट्वंगः स्योनाकः। कमलोद्भवं रजः पद्मरेणुः। एतौ प्रियंग्वंबष्ठादिगणौ पक्वातीसारनाशनौ संधानीयौ हितौ पित्ते व्रणरोपणौ च। अष्टाभ्योऽथो गुरावुपचित्रा ॥ ३७-३९ ॥

प्रियङ्ग्वादि तथा अम्बष्ठादिगण—

वि०—प्रियंग्वादि गण–प्रियंगु, रसांजन, स्रोतोऽञ्जन, भार्ङ्गी, कमल का केशर, मंजीठ, धमासा, सेमल, मोचरस (सेमल का गोंद), छुईमुई, पुन्नाग, चन्दन, धातकी। अम्बष्ठादि गण—पाठा, मुलहठी, लज्जावती (छुईमुई), नन्दीवृक्ष; ढाक, धमासा, लोध, धातकी, बेलफल की मज्जा, श्योनाक और कमल का केशर। ये प्रियंग्वादि एवं अम्बष्ठादि गण पक्वातीसारनाशक, सन्धान करने वाले, पित्त में उपयोगी तथा व्रणों का रोपण करते हैं ॥ ३७-३९ ॥

मुस्तावचाग्निद्विनिशाद्वितिक्ता-
भल्लातपाठात्रिफलाविषाढ्याः ।
कुष्ठं त्रुटी हैमवती च योनि-
स्तन्यामयघ्ना मलपाचनाश्च ॥ ४० ॥

स०—मुस्ता गांगेयी। तिक्ताद्वयमेका कटुकाऽन्या काकतिक्ता। विषाख्या शुक्लकंदा। हैमवती श्वेतवचा। एते योन्यामयघ्ना मलपाचनाश्च। तौ जगौ गुरुश्चेन्द्रवतींद्रवज्रा ॥ ४० ॥

मुस्तादिगण—

वि०—मुस्तादिगण–मुस्ता, वच, चित्रक, हल्दी, दारुहल्दी, कुटकी, काकतिक्ता, भिलावा, पाठा, त्रिफला, अतीस, कूठ, इलायची और सफेद वच ये योनिदोष एवं स्तन्यरोगनाशक और मल को पचाने वाले हैं ॥ ४० ॥

न्यग्रोधपिप्पलसदाफलरोध्रयुग्मं
जम्बूद्वयार्जुनकपीतनसोमवल्काः ।
प्लक्षाम्रवञ्जुलपियालपलाशनन्दी-
कोलीकदम्बविरलामधुकं मधूकम् ॥ ४१ ॥
न्यग्रोधादिर्गणो व्रण्यः सङ्ग्राही भग्नसाधनः ।
मेदःपित्तास्रतृड्दाहयोनिरोगनिबर्हणः ॥ ४२ ॥

स०—न्यग्रोधो वटवृक्षः। पिप्पलोऽश्वत्थः। सदाफल उदुंबरः। जंबूद्वयमेका राजजंबूर्बृहत्फलाऽन्या ह्रस्वफला काकजंबूः। अर्जुनः पार्थः। कपीतनः कपिचूडो वानीराख्यः। सोमवल्कः सितसारः खदिरः। प्लक्षः शृंगीप्लक्षकाख्यः। आम्रश्चूतः। वंजुलो वेतसः। प्रियालो द्राक्षारसप्रियः खरस्कंधाख्यः। नंदी जयवृक्षः। कोली बदरी। विरला तिंदुकी। मधुकं यष्टिः। मधूकं मधूकपुष्पम्। न्यग्रोधादिरयं संग्रहणादिगुणयुक्तः। वसंततिलकम् ॥ ४१-४२ ॥

न्यग्रोधादिगण—

वि०—न्यग्रोधादिगण—बरगद, पीपल, गूलर, लोध, पठानीलोध, छोटी व बड़ी जामुन, अर्जुन, कपीतन (पारीश), सोमवल्क (श्वेत खैर), पिलखन, आम, बेतस, पियाल (चिरौंजी), ढाक, नन्दी, बेरी, कदम्ब, विरला (तेंदू), मुलहठी, महुआ, यह न्यग्रोधादिगण-व्रण के लिये उत्तम, संग्राही, भग्न को जोड़ने वाला, मेद, पित्त, रक्तस्राव, प्यास, दाह और योनिरोगनाशक है ॥ ४१-४२ ॥

एलायुग्मतुरुष्ककुष्ठफलिनीमांसीजलध्यामकं
स्पृक्काचोरकचोचपत्रतगरस्थौणेयजातीरसाः ।
शुक्तिर्व्याघ्रनखोऽमराह्वमगुरुः श्रीवासकः कुङ्कुमं
चण्डागुग्गुलुदेवधूपखपुराःपुन्नागनागाह्वयम् ॥ ४३ ॥
एलादिको वातकफौ विषं च विनियच्छति ।
वर्णप्रसादनः कण्डूपिटिकाकोठनाशनः ॥ ४४ ॥

स०—एलायुग्मं सूक्ष्मैला स्थूलैला च। तुरुष्कः कृत्रिमो निर्यासविशेषः। कुष्ठं गदः। फलिनी गंधप्रियंगुः। मांसी नलदम्। जलं ह्रीबेरम्। ध्यामकं दवदग्धकम्। स्पृक्का देवी। चोरको ग्रंथिपर्णी। चोचं त्वक्। पत्रं गंधपत्रम्। तगरं चक्रम्। स्थौणेयं तैलपीतकम्। जातीरसो बोलः। शुक्तिर्नखः। व्याघ्रनखः समुद्रजः। अमराह्वं देवदारुः। अगुरुः प्रसिद्धः। श्रीवासः श्रीवेष्टकाख्यः। कुंकुमं बाह्लकम्। चंडा कोपना। गुग्गुलुः पुरः। देवधूपः सर्जरसः। खपुरः कुंदुरुकः। पुन्नागो रक्तकेसरः। नागाह्वयं नागकेसरम्। एलादिरयं वातादीन् हंति। तथा वर्णप्रसन्नत्वकृत् कंड्वादिहृच। म्सौ ज्सौ तौ गुरुकं च सूर्यतुरगैः शार्दूलविक्रीडितम् ॥ ४३-४४ ॥

एलादिगण—

वि०—एलादिगण—छोटी और बड़ी दोनों इलायची, तुरुष्क (सिह्लक), कूठ, प्रियंगु, जटामांसी, ह्रीबेर, गन्धतृण, स्पृक्का (असबर्ग), चोरक, दालचीनी, तेजपत्र, तगर, स्थौणेयक, बोल, नखी, व्याघ्रनखी, देवदारु, अगरु, श्रीवेष्टक (गन्धबिरोजा), केशर, चण्डा, गुग्गुलु, राल, कुन्दरु, पुन्नाग और नागकेसर, यह एलादि गण वात, कफ और विष को नष्ट करता है, वर्ण को निर्मल करता है; कण्डू, पिटिका और कोठ (चकत्ते) को नष्ट करता है ॥ ४३-४४ ॥

श्यामादन्तीद्रवन्तीक्रमुककुटरणाशङ्खिनीचर्मसाह्वा-
स्वर्णक्षीरीगवाक्षीशिखरिरजनकच्छिन्नरोहाकरञ्जाः ।
वस्तान्त्री व्याधिघातो बहलबहुरसस्तीक्ष्णवृक्षात्फलानि
श्यामाद्यो हन्ति गुल्मं विषमरुचिकफौ हृद्रुजं मूत्रकृच्छ्रम् ४५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—श्यामा मालविका त्रिवृत् मसूरविदनाख्या। दंती मुकूलकश्चित्राख्यः। द्रवंती उंदुरकर्णिका। क्रमुकः पट्टिकारोध्रः। कुटरणी शुक्ला त्रिवृत्। शंखिनी यवतिक्ता। चर्मसाह्वा सातला। ब्राह्मीत्यन्ये। स्वर्णक्षीरी पीतधतूरः। गवाक्षी गवादनी स्थाणुकर्णी संज्ञा। इंद्रवारुणीत्यन्ये। शिखरी अपामार्गः। रजनकः कंपिल्लकः। छिन्नरोहाऽमृतवल्ली। करंजः कैडर्यः। बस्तांत्री वृषगंधा। व्याधिघातः कृतमालः। बहल-बहुरस इक्षुः। तीक्ष्णवृक्षात् पीलोः फलानि। श्यामादिरेष गुल्मादीन् हंति। म्नौ म्नौ याश्च त्रयः स्यु स्वरमुनितुरगैः स्रग्धरा स्याद्विरामैः॥ ४५॥

श्यामादिगण—

वि०—श्यामादिगण—काली निशोथ, दन्ती, द्रवन्ती, सुपारी, श्वेतनिशोथ, शंखिनी (यवतिक्ता), चर्मसाह्वा (सातला), स्वर्णक्षीरी, इन्द्रायण, अपामार्ग, कमीला, गिलोय, करंज, बस्तांत्री (विधारा भेद), अमलतास, सहजना, ईख, पीलु के फल, यह श्यामादि गण—गुल्म, विष, अरुचि, कफ, हृदय की पीड़ा और मूत्रकृच्छ्र को नष्ट करता है॥ ४५॥

त्रयस्त्रिंशदिति प्रोक्ता वर्गास्तेषु त्वलाभतः।
युञ्ज्यात्तद्विधमन्यच्च द्रव्यं जह्यादयौगिकम्॥ ४६॥

स०—इति प्रकारे। त्रयस्त्रिंशदिति वर्गाः कथिताः। अत्र संख्योपादानमेषां प्राधान्यख्यापनार्थम्। अन्येऽप्येवं प्रकाराः संत्येते तु प्रधाना इत्यर्थः। सुखग्रहणार्थं वा संख्यावचनं कृतम्। एतेषु त्रयस्त्रिंशत्सु वर्गेष्वलाभतोऽलाभे सति तद्विधं रसवीर्यपाकैस्तुल्यं द्रव्यमन्यदनुक्तमपि युंज्यात्। नचैतावदत्र विधेयमित्याह। जह्यादयौगिकम्। न केवलमेषु वर्गेषु तद्द्रव्यालाभे यथालाभमन्यत्तद्विधं द्रव्यं युंज्याद्यावदयौगिकं यत्तु द्रव्यं तत्र त्यजेत्। दोषरोगातुराद्यपेक्षया पुरुषस्याऽस्मिन् काले वयसि वा यो गणः समस्तस्साध्यामयशमनाय च वारयितुं युक्तः। एकस्य द्रव्यस्याऽलाभे द्वयोर्बहूनां वा तत्प्रकारमेकमपरं द्रव्यं द्वे वा बहूनि वा द्रव्याणि संयोज्य प्रयोज्यः। एवं न समस्तद्रव्यापेक्षा कार्येति। यथा च सुश्रुतः। 'समीक्ष्य दोषभेदांश्च गणान् भिन्नान् प्रयोजयेत्। पृथङ्मिश्रान् समस्तांश्च गणान् वा व्यस्तसंहतानिति।' त्रयस्त्रिंशदिति त्रेस्त्रयश्चेति त्रयसादेशः। यौगिकमिति योगाय प्रभवतीत्यर्थे योगाद्यच्चेति ठञ्॥ ४६॥

उक्त तैंतीस गणों के अभाव में प्रतिनिधिद्रव्य—

वि०—ये तैंतीस वर्ग कहे हैं-इनमें से जो द्रव्य न मिले उसके स्थान पर उसी प्रकार का दूसरा द्रव्य मिला लेना चाहिये, और कहा हुआ भी जो द्रव्य देश-काल आदि की दृष्टि से यौगिक न हो; उसको छोड़ देना चाहिये॥ ४६॥

एते वर्गा दोषदूष्याद्यपेक्ष्य
कल्ककाथस्नेहलेहादियुक्ताः।
पाने नस्येऽन्वासनेऽन्तर्बहिर्वा
लेपाभ्यङ्गैर्घ्नन्ति रोगान् सुकृच्छ्रान्॥ ४७॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने शोधनादिगणसङ्ग्रहो नाम पञ्चदशोऽध्यायः॥ १५॥

स०—एते पूर्वोक्ता वर्गा दोषदूष्यवयोबलादीनपेक्ष्य कल्कादियुक्ताः सुकृच्छ्रान् रोगानामयान् घ्नंति। युक्ता इत्यत्रांऽतर्भावितण्यर्थो युजिः। ततः कल्कादिषु वैद्येन योजिता इत्यर्थोऽवतिष्ठते। आदिशब्देन फांटशीतकषायादिपरिग्रहः। कथमेते घ्नंतीति प्रकारं युक्त्याऽऽह। पाने इत्यादि। पानाद्युपयोगे सति। लेपाभ्यंगैरिति बहुवचनेन लेपाभ्यंगस्नानादिभिश्चेति योज्यम्। मालिनीवृत्तम्॥ ४७॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां पञ्चदशोऽध्यायः॥ १५॥

इनके कल्क-पानादि विधि से रोगनाशकता—

वि०—दोष एवं दूष्य का विचार करके इन वर्गों को कल्क-काथ, स्नेह, अवलेह आदि के रूप में पिलाने, नस्य, अनुवासन, अन्दर या बाहर लेपन या अभ्यंग द्वारा प्रयोग करने से कष्टसाध्य रोग नष्ट होते हैं॥ ४७॥

इस प्रकार विद्योतिनी टीका में शोधनादिगणसंग्रह नामक पन्द्रहवाँ अध्याय समाप्त हुआ॥ १५॥

षोडशोऽध्यायः

शोधनादिगणसंग्रहाऽध्यायादनंतरं स्नेहाध्यायारंभः। यतः शोधनं स्नेहस्वेदावंतरेण न संभवति। वक्ष्यति हि स्नेहस्वेदावनभ्यस्येत्यादि। तस्मात्स्नेहस्वेदाध्याययोरारंभो युक्त इत्याह—

अथातः स्नेहविधिमध्यायं व्याख्यास्यामः। इति ह स्माहुरात्रेयादयो महर्षयः।

स०—स्नेहस्य सर्पिरादेर्विधिः स्नेहविधिस्तं व्याख्यास्यामः। शेषं पूर्ववद्योज्यम्।

वि०—अब इसके आगे स्नेहविधि नामक अध्याय का व्याख्यान करेंगे-जैसा कि आत्रेय आदि महर्षियों ने कहा था।

गुरुशीतसरस्निग्धमन्दसूक्ष्ममृदुद्रवम्।
औषधं स्नेहनं प्रायो, विपरीतं विरूक्षणम्॥ १॥

स०—गुर्वादिगुणयुक्तं यद्द्रव्यं तत् स्नेहनं भवति। विपरीतमतो यल्लघूष्णस्थिररूक्षतीक्ष्णस्थूलकठिनसांद्रगुणोपेतं तद्विरूक्षणम्। प्रायोग्रहणं विरूक्षणे स्नेहने च योज्यम्। तथा च लघ्वपि सार्षपं तैलं छागं च दुग्धं तथा विष्किरप्रतुद-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मृगाख्यं वर्गत्रयं स्नेहनं भवति। तथोष्णमपि मत्स्यमहिषमांसं स्नेहनं भवति। एवं रूक्षणेऽपि वेद्यम्। तथा च यवो गुरुशीतसरादिगुणयुक्तोऽपि विरूक्षणस्तथा राजमाषोऽपि। स्नेहने प्रकृतेऽपि विरूक्षणोपन्यासोऽन्वयव्यतिरेकेण सुतरां स्नेहस्य तारतम्यप्रतिपादनार्थः॥ १॥

स्नेहन और विरूक्षण द्रव्य—

वि०—स्नेहन द्रव्य-प्रायः करके गुरु, शीतल, सर, स्निग्ध, मन्द, सूक्ष्म, मृदु और द्रव गुणवाले होते हैं एवं विरूक्षण द्रव्य इन गुणों से विपरीत होते हैं॥ १॥

वक्तव्य—शोधन के पूर्व स्नेहादि कर्म आवश्यक हैं; यथा-'प्राक् पाचनं स्नेहविधिस्ततश्च स्वेदस्ततः स्याद् वमनं विरेकः। निरूहणान्वासनबस्तिकर्म नस्यं क्रमश्चेति भिषग्वराणाम्॥' चिकित्साकलिका। प्रायः शब्द से स्नेहन और रूक्षण द्रव्यों के उपर्युक्त गुणों के अपवाद भी हैं; यथा-सरसों का तेल एवं बकरी का दूध लघु होने पर भी स्नेहन करते हैं; विष्किर, प्रतुद एवं मृगवर्ग का मांस लघु किन्तु स्नेहन है। मछली, भैंस का मांस गरम होने पर भी स्नेहन करता है। जौ गुरु, शीत एवं सर होने पर भी रूक्षता करता है।

सर्पिर्मज्जा वसा तैलं स्नेहेषु प्रवरं मतम्।
तत्रापि चोत्तमं सर्पिः संस्कारस्यानुवर्तनात्॥ २॥
माधुर्यादविदाहित्वाज्जन्माद्येव च शीलनात्।

स०—स्नेहेषु क्षीरानूपाऽमिषादिषु मध्ये सर्पिरादयश्चत्वारः स्नेहाः प्रकर्षेण वराः। आशु स्वकार्यकरणात्। तत्रापि च तेष्वपि चतुर्षु मध्ये सर्पिरुत्तमं संस्कारस्याऽनुवर्तनात्। ननु यदि संस्कारमनुरुध्यते सर्पिस्तदानीं मरिचचित्रकादिद्रव्यादिभिः संस्कृतस्य घृतस्य शैत्यादिगुणविपर्यासः प्राप्तः। न चेदं दृष्टम्। यदस्य शैत्यादयो गुणा विनश्यंत्यौष्ण्याद्यश्चोत्पद्यंत इति। अत्रोच्यते। अनुशब्दोऽत्र सहार्थे। अनेकार्थत्वान्निपातानाम्। तेनात्रायमर्थः। सर्पिषो गुणाः संस्कारगुणैः सह वर्तते नतु तैलादीनाम्। तैलवसामज्जानो हि संस्कारवशात् स्वगुणांस्त्यजंति। अत्र चोदाहरणं चंदनाद्यं तैलम्। अतो द्रव्यगुणांतरैरनभिभूतगुणत्वात्सर्पिष इतरेषां तैलादीनां द्रव्यैरभिभूतगुणत्वादुत्तमत्वम्। अत एवच वातपित्तज्वरादिषु विकारेषु घृतसाध्येषु भेषजं तैलं नेष्टमनिष्टसंपादनात्। तैलसाध्येषु तु विकारेषु तदुपशांत्यर्थं तथाविधद्रव्यसंस्कृतं घृतमपीष्टम्। तद्धि न तथाऽनिष्टहेतुः। तस्मात्सर्वस्नेहेभ्यः सर्पिरेवोत्तमम् संस्कारस्याऽनुवर्तनादिति न्यायात् व्याख्यमेव। माधुर्यादिहेतोश्च॥ २॥

स्नेहन द्रव्यों में घृत की श्रेष्ठता—

वि०—स्नेहों में-घी, मज्जा, वसा और तैल उत्तम हैं। इन चारों में भी घी सबसे उत्तम है; क्योंकि यह संस्कार का अनुवर्तन करता है-संस्कार के साथ चलता है (संस्कार से इसमें गुणाधान अच्छा होता है) और मधुर होने से, अविदाही होने से तथा जन्म से ही इसका अभ्यास होने के कारण घृत सबसे श्रेष्ठ है॥ २॥

वक्तव्य—चन्दनादि तैल, अगुर्वादि तैल आदि में तैल भी गुणों का कुछ अनुवर्तन करता है, परन्तु घी की अपेक्षा कम करता है।

पित्तघ्नास्ते यथापूर्वमितरघ्ना यथोत्तरम्॥ ३॥

स०—यो यः पूर्वो यथापूर्वं यो य उत्तरो यथोत्तरमिति यथासादृश्य इत्यव्ययीभावः। उत्तरमपेक्ष्य पूर्वः पूर्वं चापेक्ष्योत्तरः। तेन चतुर्णां स्नेहानां यथाविहितानां सर्पिरादीनां त्रय एव स्नेहा वसामज्जसर्पिः संज्ञका यथापूर्वत्वेन संबंध्यंते नतु तैलाख्यः स्नेहस्तस्य पूर्वत्वाभावात्। न ह्यन्योऽस्मात्कश्चिदुत्तरोऽस्ति यदपेक्षयैष पूर्वत्वमात्मन आसादयेत्तस्मान्नास्ति पूर्वत्वसंबंधस्तैलस्य। तथा चतुर्णां स्नेहानां त्रय एव स्नेहा मज्जावसातैलाख्या यथोत्तरत्वेनाऽभिसंबध्यंते न सर्पिः संज्ञकः स्नेह उत्तरत्वाभावात्। न ह्यन्यः कश्चिदस्य पूर्वो विद्यते यदपेक्षयैवोत्तरत्वमात्मन आसादयतीत्युक्तम्। तदेवं यथापूर्वं पित्तघ्नत्वं वसामज्जसर्पिषां सामान्येनोक्तम्। विशेषेण च वसा पित्तघ्नी मज्जा पित्तघ्नतरः सर्पिः पित्तघ्नतममित्यर्थः। इतरघ्ना इति। इतरौ वातकफौ पित्तापेक्षया तौ घ्नंति पराकुर्वंतीतीतरघ्नाः। यथोत्तरं त्रयः स्नेहा मज्जवसातैलाख्या वातश्लेष्मघ्नाः। तेन मज्जा वातश्लेष्मघ्नो वसा वातश्लेष्मघ्नतरा तैलं वातश्लेष्मघ्नतममिति प्रकृतम्। अन्ये त्वेवं व्याचक्षते। श्लेष्मणि स्नेहनिषेधादितरघ्ना इति सामान्योक्तावपि वातघ्ना इति सामान्योक्तावपि वातघ्ना इति गम्यते। अथवा द्रव्यांतरसंस्कृतसर्पिराद्यपेक्षया कफस्याऽपीतरशब्देन ग्रहणमिति॥ ३॥

घृतादि की पित्तनाशकता—

वि०—इनमें पूर्व क्रम की दृष्टि से ये पित्तनाशक हैं, और उत्तर क्रम की अपेक्षा वातकफनाशक हैं॥ ३॥

वक्तव्य—घी उत्तम पित्तशामक है, मज्जा उससे कम, वसा उससे भी और तैल सबसे कम (प्रायः नहीं के बराबर) पित्तशामक है एवं घी अत्यल्प वातकफशामक, वसा उससे अधिक, मज्जा उससे भी अधिक तथा तैल सबसे अधिक वात और कफ शामक होता है।

घृतात्तैलं गुरु वसा तैलान्मज्जा ततोऽपि च।

स०—घृताद् गुरुणः सकाशात्तैलं गुरु गुरुतरमित्यर्थः। वसा तु तैलाद् गुरुतरा ततोऽप्यतिशयेन मज्जा गुरुतमः।

घृत से तैलादि की गुरुता—

वि०—घी से तैल गुरु, तैल से वसा गुरु और वसा से मज्जा अधिक गुरु है।

इदानीं यमकस्नेहस्त्रिवृतस्नेहो महास्नेह इति तन्त्रतन्त्रोच्यते न च ते चायंत इत्याह—

द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्त्रिवृतो महान्॥ ४॥

स०—द्वाभ्यां स्नेहाभ्यां यमको नाम्ना स्नेहः। यथा सर्पिर्वसाभ्यां, सर्पिस्तैलाभ्यां, सर्पिर्मज्जभ्यामित्यादि। एवं त्रिभिः स्नेहैस्त्रिवृतश्चतुर्भिर्महास्नेह उच्यत इति शेषः॥ ४॥

यमकस्नेहादि का कथन—

वि०—दो स्नेहों के मिलने से यमक, तीन स्नेहों के

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मिलने से त्रिवृत, चार स्नेहों के मिलने से महान् (महास्नेह) संज्ञा होती है ॥ ४ ॥

संप्रति स्नेह्यान्निरूपयति—

स्वेद्यसंशोध्यमद्यस्त्रीव्यायामासक्तचिन्तकाः ।
वृद्धबालाबलकृशा रूक्षाः क्षीणास्ररेतसः ॥ ५ ॥
वातार्तस्यन्दतिमिरदारुणप्रतिबोधिनः ।
स्नेह्याः—

स०—स्वेद्यादयः स्नेह्याः स्नेहार्हाः। न ह्यस्नेहितः स्वेद्य इत्यर्थः एवं योऽपि शोध्यः सोऽपि पूर्वं स्नेह्यः। स्वेदार्हाः स्वेद्याः। अर्हार्थे कृत्यप्रत्ययोऽत्र ण्यः। एवं संशोध्याः शोधनार्हाः मद्यासक्तस्त्रीसक्तव्यायामसक्ताश्च तथा येऽपि चिंतकास्तथा वृद्धा बाला अबला अल्पबला इत्यर्थः। तथा कृशा रूक्षाः क्षीणरुधिराः क्षीणशुक्राश्च। वातार्ता वातपीडिताः। आर्तशब्दः स्यंदादिषु प्रत्येकस्मिन् योज्यः। स्यंदोऽभिष्यंदस्तिमिरोऽक्षिरोगः। दारुणप्रतिबोधिनः कृच्छ्रोन्मीलिन इत्यर्थः। एते स्नेह्या स्नेहार्हाः ॥ ५ ॥

स्नेहनीय मनुष्य—

वि०—स्नेह के योग्य—जिनका स्वेदन या संशोधन करना हो, मद्य, स्त्री और व्यायाम में आसक्त, चिन्ताशील, (मानसिक परिश्रम करनेवाले), वृद्ध, बालक, निर्बल, कृश, रूक्ष, क्षीण-रुधिर, क्षीणशुक्र, वातपीड़ित, अभिष्यन्द (आँख आना) और तिमिर रोग से पीड़ित एवं जो कठिनाई से आँख खोल सकते हैं-ये स्नेहन के योग्य हैं ॥५॥

—न त्वतिमन्दाग्नितीक्ष्णाग्निस्थूलदुर्बलाः ॥ ६ ॥
ऊरुस्तम्भातिसारामगलरोगगरोदरैः ।
मूर्च्छाच्छर्द्यरुचिश्लेष्मतृष्णामद्यैश्च पीडिताः ॥ ७ ॥
अपप्रसूता युक्ते च नस्ये बस्तौ विरेचने।

स०—अतिमंदाग्न्यादयो न स्नेह्याः। अतिशब्दो यावद्दुर्बलेषु प्रत्येकं योज्यः। तेनाऽतिदुर्बला न स्नेह्या इत्यर्थः। अत एवाल्पबलाः स्नेह्या नत्वतिदुर्बला इति न पूर्वापरविरोधः। अतितीक्ष्णाग्नेः स्नेहनादत्यग्निवृद्धिः। अतिस्थूलस्य चाऽग्निमेदसोर्वृद्धिः। अतिदुर्बलस्य च जरणाशक्तेः स्नेहस्य व्यापत् ऊरुस्तंभादिभिर्यान्मद्येन च पीडिता न स्नेह्याः। अत्र शोधनप्रसंगे तु स्नेहनं विना शोधनं न कार्यमिति यावत्। अपप्रसूता सुतगर्भा न स्नेह्येति लिंगवचनविपरिणामः। प्रयुक्ते च नस्यादिकर्मणि सर्व एव न स्नेह्याः ॥ ६-७ ॥

अस्नेहनीय मनुष्य—

वि०—स्नेहन के अयोग्य—अतिमन्दाग्नि, अतितीक्ष्णाग्नि, अतिस्थूल, अतिदुर्बल, ऊरुस्तम्भरोगी, अतिसाररोगी, आमरोगी, गलरोगी, गररोगी, उदररोगी, मूर्च्छा, वमन, अरुचि, कफ, तृष्णा और मद्य से पीड़ित एवं सुतगर्भा स्त्री को तथा नस्य, वस्ति और विरेचन देने पर, स्नेहन नहीं करना चाहिये ॥ ६-७ ॥

सांप्रतं चतुर्णां स्नेहानां मध्ये यो येभ्यो हितस्तं दर्शयन्नाह—

तत्र धीस्मृतिमेधादिकाङ्क्षिणां शस्यते घृतम् ॥ ८ ॥

स०—तत्र तेषु स्नेहेषु मध्ये धीस्मृत्याद्यभिलाषिणां घृतं शस्यते यावदग्निकांक्षिणाम् अन्ये तु मेधादिकांक्षिणामिति पठंति। आदिशब्देन स्वरायुर्वर्णादिपरिग्रहः ॥ ८ ॥

चतुर्विध स्नेह द्रव्यों की उपयोगिता—

वि०—घी-इन स्नेहों में से-बुद्धि, स्मृति और मेधा की चाह रखने वालों के लिये उत्तम है ॥ ८ ॥

ग्रन्थिनाडीकृमिश्लेष्ममेदोमारुतरोगिषु ।
तैलं लाघवदार्ढ्यार्थिक्रूरकोष्ठेषु देहिषु ॥ ९ ॥

स०—तैलं ग्रंथ्यादिरोगिषु शस्यते। लाघवदार्ढ्यार्थिषु क्रूरकोष्ठेषु प्राणिषु च शस्यते ॥ ९ ॥

वि०—तैल-ग्रन्थि, नाडीव्रण, कृमिरोग, कफ, मेद और वात रोगियों में तथा लघुता एवं दृढ़ता की चाह रखने वाले तथा क्रूरकोष्ठ इनके लिये उत्तम है ॥ ९ ॥

वातातपाध्वभारस्त्रीव्यायामक्षीणधातुषु ।
रूक्षक्लेशक्षमात्यग्निवातावृतपथेषु च ॥ १० ॥
शेषौ—

स०—वातादीनां क्षीणधातुना प्रत्येकं संबंधः। वातक्षीणधातुषु एवमातपक्षीणधातुष्वित्यादि। शेषौ घृततैलाभ्यामुक्ताभ्यामन्यौ वसामज्जानौ शस्येते। तथा रूक्षेषु क्लेशसहेषु। अत्यग्निषु बलवदग्निष्विति द्रष्टव्यम्। अन्यथाऽत्यग्निषु स्नेहनिषेधात्पूर्वापरविरोधः स्यात्। अथवा। अत्यग्निष्वपि वसामज्जानावनुज्ञे अपवादवाक्यत्वादस्येति व्याख्येयम्। वातेनाऽऽवृताः पंथानश्छिद्राख्या येषां तेषु च शस्येते शेषौ ॥ १० ॥

वि०—शेष वसा और मज्जा—वायु, धूप, मुसाफिरी, भार उठाना, स्त्री-सेवन और व्यायाम से क्षीण धातु वालों में, रूक्ष, क्लेश को सहने वाले, अतिप्रबल अग्नि वाले व्यक्तियों में तथा वायु से शरीर के स्रोतों में अवरोध होने पर श्रेष्ठ होते हैं ॥ १० ॥

वसायास्त्वन्यदपि विशेषांतरमाह—

—वसा तु सन्ध्यस्थिमर्मकोष्ठरुजासु च।
तथा दग्धाहतभ्रष्टयोनिकर्णशिरोरुजि ॥ ११ ॥

स०—तुर्विशेषे। चः समुच्चये रुजाशब्दः प्रत्येकं संबध्यते। संधिरुजास्वस्थिरुजास्वित्यादिषु। तथा दग्धरुज्याहतरुजि तथा भ्रष्टयोनिरुजीत्येवं संबंधः कार्यः ॥ ११ ॥

वि०—विशेषतः वसा सन्धि, अस्थि, मर्म और कोष्ठ के रोगों में तथा अग्नि से जलने एवं डण्डे आदि से चोट लगने पर एवं स्थानच्युत योनि, कर्णरोग और शिरोरोग में भी हितकारक है ॥ ११ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इदानीं कस्मिन्काले कस्य स्नेहस्योपयोगः शस्त इति दर्शयन्नाह—

तैलं प्रावृषि वर्षान्ते सर्पिरन्यौ तु माधवे।

स०—तैलं प्रावृषि शस्यत इति संबंधः। एवमुत्तरत्रापि योजनीयम्। स्वस्थस्य स्नेहनार्थं सर्वत्रैव स्नेहस्य प्रसंगे नियमोऽयं क्रियते। तैलं प्रावृष्येव वर्षांत एव सर्पिर्वसामज्जानौ माधव एवेति।

तैलादि स्नेह द्रव्यों का काल—

वि०—प्रावृट् काल में तैल, वर्षा की समाप्ति—शरद् में घृत और वसन्त में मज्जा एवं वसा को बरतना चाहिये।

ननु वर्षासु तैलं वर्षांते सर्पिर्वसामज्जानौ माधव इति योऽयं नियमः स किंचिदपेक्ष्य वर्तते आहोस्विदनपेक्ष्येत्यस्मिन् पर्यनुयोग इदमाह—

ऋतौ साधारणे स्नेहः शस्तोऽह्नि विमले रवौ ॥१२॥

स०—साधारणे ऋतौ श्रावणादौ संशोधनान् पूर्वं स्नेहनार्थं स्नेहस्तैलादिकः शस्तः। तथाऽह्नि वासरे। न निशि। तथा विमले रवौ जलदनीहारादिनाऽनाच्छादिते खरांशौ। स्नेह इति सामान्यशब्दप्रयोगात्सर्वः स्नेहः सर्पिरादिश्चतुष्प्रकारो गृह्यते ॥ १२ ॥

दिन में स्नेह की श्रेष्ठता—

वि०—साधारण ऋतु में-दिन में-सूर्य के निर्मल होने पर (बादल आदि न होने पर) स्नेह का प्रयोग करना चाहिये ॥ १२ ॥

तैलं त्वरायां शीतेऽपि घर्मेऽपि च घृतं निशि।

स०—त्वरायां सत्यां व्याधिक्रियां प्रति प्राप्ते काले स्नेहयोग्यतायां सत्यां शीते हेमंतशिशिराख्ये काले तैलं संशोधनात्पूर्वं स्नेहनार्थं शस्तं नान्यस्नेहः। अपिशब्दान्न केवलं वर्षास्ववर्षासु च शस्तमित्यर्थः। न केवलं शरदि घृतं प्रयुंजीत यावद्घर्मेऽपि निश्युपयुंजीत।

विशेषावस्था में रात्रि में भी स्नेहन—

वि०—यदि कोई शीघ्रता—आत्ययिक स्थिति हो तो शीतकाल में तैल (वर्षा से अतिरिक्त काल में भी) और ग्रीष्म काल में घी (शरद्भिन्न ऋतु में भी) रात में भी प्रयुक्त कर सकते हैं।

सर्वस्य स्नेहस्याऽह्न्युपयोगाद्रात्रावप्रयोगः प्राप्त इत्याह—

निश्येव पित्ते पवने संसर्गे पित्तवत्यपि ॥ १३ ॥

स०—नच घर्म एव निश्युपयुंजीत यावत्पित्ते कुपिते पित्तजे वा विकारे तथा पवने कुपिते तज्जे वा विकारे स्नेहसाध्ये घर्मे घृतं निश्युपयुंजीत न दिवा न च तैलं वसामज्जानौ वा। तथा पित्तवति पित्ताधिके संसर्गे वातपित्ताख्ये श्लेष्मपित्ताख्ये कुपिते तज्जे वा विकारे स्नेहसाध्ये घर्मे घृतं निश्युपयुंजीत। पित्ते पवन इत्येतद्दोषविकारोभयोपलक्षणार्थं वेद्यम्। पित्तवतीति भूम्नि मतुप् ॥ १३ ॥

वि०—ग्रीष्मकाल में पित्तप्रकोप, वातप्रकोप तथा पित्तप्रधान संसर्गज (वातपैत्तिक एवं पित्तश्लेष्मज) विकारों में घी का प्रयोग रात में ही करना चाहिये अर्थात् इन विकारों के ग्रीष्म काल में होने पर अन्य स्नेहों का प्रयोग न कर घी का ही प्रयोग करना चाहिये और वह भी रात में ही, दिन में नहीं ॥ १३ ॥

निश्यन्यथा वातकफाद्रोगाः स्युः पित्ततो दिवा।

स०—अन्यथोक्तप्रकारादपरेण प्रकारेण यथा शीतकाले निशि घृतोपयोगाद्वातकफाद्धेतो रोगा भवेयुः। तथा दिवा घर्मे काले तैलोपयोगात्पित्ततः पित्ताद्रोगाः स्युः। वसामज्जोस्त्वनिश्चितस्वरूपत्वान्नोष्णकाले नाऽपि शीतकाले त्वरायां सत्यामुपयोगस्तंत्रकारेण दर्शितः। तथा चोक्तम्। यथासत्त्वं तु शैत्योष्णे वसामज्ज्ञोस्तु निर्दिशेदिति।

वि०—उपर्युक्त नियम का पालन न करने से अर्थात्-शीतकाल में रात्रि के समय घी पिलाने से, वातकफजन्य रोग होते हैं। इसी प्रकार ग्रीष्म ऋतु में दिन के समय तैल पिलाने से पित्तजन्य रोग होते हैं।[1]

कथं स्नेह उपयोज्य इत्याह—

युक्त्याऽवचारयेत्स्नेहं भक्ष्याद्यन्नेन बस्तिभिः ॥१४॥
नस्याभ्यञ्जनगण्डूषमूर्द्धकर्णाक्षितर्पणैः।

स०—युक्तिर्योग उपायलक्षणः। युक्त्या मात्राकालक्रियाभूमिदेहदोषस्वभावया स्नेहं सर्पिरादिकमवचारयेदुपयुंजीत। केन सहेत्याह। भक्ष्याद्यन्नेन आदिशब्देन भोज्यलेह्यपेयस्य त्रिविधस्याऽप्यन्नस्य ग्रहणम्। तथा बस्तिभिर्नस्येनाभ्यंजनेन गंडूषेण च स्नेहमवचारयेत्। मूर्धादीनां तर्पणशब्देन प्रत्येकं संबंधः। तेन मूर्धतर्पणेन शिरोबस्त्याख्येन तथा कर्णतर्पणेन कर्णपूरणाख्येन तथाऽक्षितर्पणेन तर्पणपुटपाकविध्युक्तेन। भक्ष्यं शशांककिरणावि तेन भक्ष्येण सह। आदिग्रहणादोदनादयो मुन्युक्ता गृह्यंते। तथा च मुनिः ओदनश्च विलेपी च रसो मांसं पयो दधि। यवागूः सूपशाके च यूषः कांबलिकः खलः॥ सक्तवस्तिलपिष्टं च मद्यं लाजास्तथैव च। भक्ष्यमभ्यंजनं बस्तिस्तथैवोत्तरबस्तय इत्यादि। बस्तिभिरिति बहुवचननिर्देशो बस्तित्रयग्रहणार्थः। तेन निरूहोऽन्वासनं बस्तिरुत्तर इति ॥ १४ ॥

स्नेहोपयोग की विधि—

वि०—स्नेह को भक्ष्यादि अन्न के साथ, बस्ति से, नस्य, अभ्यंग, अञ्जन, गण्डूष, शिर, कान और आँख का तर्पण के द्वारा युक्तिपूर्वक बरते ॥ १४ ॥

वक्तव्य—भक्ष्यादि से चरकोक्त ओदन आदि लेना चाहिये यथा-'ओदनश्च विलेपी च रसो मांसं पयो दधि। यवागूः

१, वसा और मज्जा के लिये दिन या रात्रि का काल-नियम नहीं है तथा आत्ययिक अवस्थाओं में इनका प्रयोग भी वर्णित नहीं है। इसीलिये इनका प्रयोग आवश्यकतानुसार कर सकते हैं। 'यथासत्त्वं तु शैत्योष्णे वसामज्ज्ञोस्तु निर्दिशेत्।'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूपशाके च यूषः काम्बलिकः खलः ॥ सक्तवस्तिलपिष्टं च मद्यं लेहास्तथैव च । भक्ष्यमभ्यञ्जनं बस्तिस्तथैवोत्तरबस्तयः ॥
(चरक सू. अ. १३।२३)

रसभेदैककत्वाभ्यां चतुःषष्टिर्विचारणाः ॥ १५ ॥
स्नेहस्यान्याभिभूतत्वादल्पत्वाच्च क्रमात्स्मृताः ।

स०—रसभेदश्चैककत्वं च ताभ्यां रसभेदैककत्वाभ्यां स्नेहस्याऽवचार्यमाणस्य चतुःषष्टिर्विचारणा भवति । रसभेदैकैकहीनानित्यादिग्रंथनिर्दिष्टेन त्रिषष्टिसंख्यावच्छिन्नेन सहोपयुक्तस्य स्नेहस्य तथैककत्वेनाऽसहायेन केवलेन स्नेहेन सहाऽस्य चतुःषष्टिर्विचारणाः स्नेहप्रयोगकल्पना या एता भक्ष्याद्यन्नेन तथा रसभेदेन मूर्धकर्णाक्षितर्पणेन च या एताः क्रमाद्यथाक्रमं निर्दिष्टास्ताः कल्पनाः स्नेहस्याऽन्याभिभूतत्वादन्येन भक्ष्यादिना बहुना तथा रसभेदेन सहोपयुक्तस्याऽभिभूतत्वात्तथाऽल्पत्वादल्पोपयोगित्वान्मूर्धाऽक्षितर्पणादौ पानद्रवप्रभूतस्येवावचारयितुमशक्यत्वाच्च विचारणाः स्मृताः । आयुर्वेदस्य कर्तृभिरिति शेषः ॥ १५ ॥

स्नेह की चौंसठ विचारणा—

वि०—रसभेदों के साथ तथा केवल प्रयोगभेद से स्नेह की चौंसठ विचारणायें बनती हैं । दूसरे भक्ष्य पदार्थों के साथ मिलने पर अल्पवीर्य बनने से तिरसठ और बस्ति, तर्पण आदि द्वारा अल्पमात्रा में प्रयुक्त केवल स्नेह एक भेद- इस प्रकार क्रम से चौंसठ विचारणायें हैं ।

[अर्थात् विविध भक्ष्य के साथ रसभेद से तथा अभ्यङ्गादि द्वारा प्रयुक्त केवल स्नेह एक, इस प्रकार चौंसठ कल्पनायें स्नेह की हैं ।] ॥ १५ ॥

यथोक्तहेत्वभावाच्च नाच्छपेयो विचारणा ॥ १६ ॥

स०—स्नेहस्य विचारणासंज्ञात्वे यथानिर्दिष्टो हेतुस्तस्य यथोक्तस्य हेतोरभावादविद्यमानहेतुत्वाद्योऽच्छपेयः स्नेहः केवल एव न सा विचारणा केवलोपयोगित्वाद्बहूपयोगित्वाच्चेत्यर्थः । नन्विह केवलः स्नेहो न विचारणेत्युच्यते । प्राक्केवलस्यैव स्नेहस्य बस्त्याद्युपयोगो विचारणेत्यभ्यधायि तदेतत्पूर्वापरव्याहतमिव मन्यामहे । नैतदस्ति अच्छपेय इत्यस्य ह्ययमर्थः । अच्छः केवलो यः स्नेहः पीयते सा विचारणा न भवति मूर्धादितर्पणादिना तु केवलस्य स्नेहस्य य उपयोगः सा च विचारणेति ॥ १६ ॥

अच्छपेय स्नेह—

वि०—पूर्वोक्त अभिमतत्व (शक्तिहीनता) एवं अल्पत्व के अभाव होने से केवल शुद्ध रूप में स्नेह का जो पान है, उसको विचारणा नहीं कहते, अर्थात् किसी से न मिलने के कारण यह उद्भूत शक्ति वाला होता है, मात्रा में बहुत होने से भी प्रभूत वीर्यशाली होता है ॥ १६ ॥

स्नेहस्य कल्पः स श्रेष्ठः स्नेहकर्माशुसाधनात् ।

स०—सोऽच्छपेयाख्यः कल्पः प्रयोगः स्नेहस्य श्रेष्ठः प्रशस्यतमः । कुत इत्याह । स्नेहकर्माशुसाधनात् स्नेहकर्मणां तर्पणमार्दवादीनां शीघ्रं संपादनात् ।

वि०—यह अच्छपेय स्नेह की श्रेष्ठ कल्पना है; क्योंकि इससे स्नेह के कर्म (तर्पण-मार्दव आदि) शीघ्र हो जाते हैं ।

अधुना स्नेहस्य त्रिविधमात्रालक्षणमधिकृत्याह—

द्वाभ्यां चतुर्भिरष्टाभिर्यामैर्जीर्यन्ति याः क्रमात् ॥१७॥
ह्रस्वमध्योत्तमा मात्रास्तास्ताभ्यश्च ह्रसीयसीम् ।
कल्पयेद्वीक्ष्य दोषादीन् प्रागेव तु ह्रसीयसीम् ॥१८॥

स०—द्वाभ्यां यामाभ्यां या स्नेहस्य मात्रा प्रयुक्ता जाठरानलवशाज्जरां यति सा तस्य ह्रस्वा मात्रा । चतुर्भिर्यामैर्या जीर्यति सा तस्य मध्यमा मात्रा । अष्टभिर्यामैर्या जीर्यति सोत्तमा मात्रा । क्रमाद्यथाक्रमं ते ह्रस्वमध्यमोत्तमा मात्रास्ताभ्यश्च तिसृभ्य मात्राभ्यो ह्रसीयसीमतिशयेन ह्रस्वां कल्पयेत् । वैद्य इति शेषः । ह्रस्वमध्योत्तमा इति निर्देशे ङ्यापोरित्यादिना ह्रस्वः । ह्रस्वा मात्रा यामद्वयजरणलक्षणा ततोऽप्यर्वाक्कालेन या जरां याति सा ह्रसीयसीति । दोषदीन् दोषभेषजदेशकालबलशरीराऽऽहाररसत्त्वसात्म्यप्रकृतीर्वीक्ष्याकलय्य प्राक् पूर्वमेवाऽज्ञातकोष्ठे पुरुष उत्तममात्राविषये ह्रसीयसी कल्पयेत् । ततो ह्रस्वामनंतरं मध्यमामनंतरमुत्तमाम् । एवं मध्यममात्राविषये ह्रसीयसीं ह्रस्वमात्राविषयेऽपि ह्रसीयसीं प्राक्कल्पयेत् । अतिप्रत्यवायभयात् । एवकारोऽवधारणे । तुशब्दो यथोत्तरमिति क्रमनिर्देशार्थः । संग्रहेऽप्युक्तम् । अज्ञातकोष्ठे हि बहुः कुर्याज्जीवितसंशयमिति इयं ह्रस्वेयं ह्रस्वा इयमनयोरतिशयेन ह्रस्वा ह्रसीयसीतीयसुन् स्थूलदूरेत्यादिना लोपः । अन्यैस्तु पलद्वयपलचतुष्टयपलषट्कसंख्यावच्छिन्ना मात्रा उक्तः । न चैतद्युज्यते । यतो जठरानलशक्तिमनपेक्ष्य स्नेवमात्रा प्रयुज्यमानाऽनर्थायैव । अतोऽस्माभिः पलद्वयादिसंख्याऽवच्छिन्ना नोक्ता । मुनेरपि नैतन्मतम् । तद्ग्रन्थो हि । अहोरात्रमहः कृत्स्नमर्धाहं च प्रतीक्ष्यते प्रधाना मध्यमा ह्रस्वा स्नेहमात्रा जरां प्रतीति ॥ १७-१८ ॥

स्नेह की त्रिविध मात्रा का लक्षण—

वि०—दो याम, चार याम और आठ याम में जीर्ण होने वाली स्नेह की मात्रा क्रमशः हीन, मध्यम और उत्तम है । इनमें अज्ञात कोष्ठ वाले व्यक्ति में दोष, भेषज, काल, देश, बल, शरीर, आहार, सत्त्व, सात्म्य एवं प्रकृति की विवेचना करके प्रारम्भ में ह्रस्व मात्रा से भी छोटी अर्थात् दो याम से भी जल्दी जीर्ण होने वाली मात्रा को वैद्य देवे ॥ १७-१८ ॥

अधुना शोधनशमनबृंहणभेदात्त्रिविधस्य स्नेहस्य कालमात्रालक्षणमधिकृत्याह—

ह्यस्तने जीर्ण एवान्ने स्नेहोऽच्छः शुद्धये बहु ।

स०—ह्यस्तनेऽन्न आहारे जीर्ण एव जीर्णमात्र एव न त्वन्नाभिलाषे सति शुद्धये शोधनार्थं बहुरुत्तमया मात्रया स्नेहोऽच्छः केवलः पेयत्वेन शस्यते । संजातबुभुक्षेण तु पीतो जाठरानलस्य दीप्तत्वाच्छोधनकार्यमकुर्वाणस्तद्योग्यतां चाऽनुत्पादयन्नाश्वेव जैरामुपैति । वमनमपि बुभुक्षितस्य न संपद्यते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कफाऽपचितेः पूर्वोक्ताद्धेतोः। तस्माद्युक्तमुक्तं ह्यस्तने जीर्ण एवान्न इति।

वि०—शोधन के लिये-सायंकाल में खाये हुए अन्न के जीर्ण हो जाने पर बहुत मात्रा में शुद्ध स्नेह पिलाना चाहिये।

शमनः क्षुद्वतोऽनन्नो मध्यमात्रश्च शस्यते ॥ १६ ॥

स०—शमनो यो रोगस्य शमनायोपयुज्यते स्नेहः स क्षुद्वतो जातबुभुक्षस्य शस्यते जातायां बुभुक्षायां न जीर्णमात्र एवान्ने शोधन इव शमनः स्नेहो यत्र तत्रस्थं दोषं कुपितं सर्वशरीरव्यापित्वात् शमयति। यदि पुनर्जीर्णमात्र एवान्ने स्नेहोऽयमबुभुक्षितस्यैवोपयुज्यते तदानीं स्रोतसां कफाद्युपलेपानि वर्तनात्तत्संपृक्तोऽसौ स्नेहो न सर्वं शरीरं व्याप्नुते अव्याप्नुवंश्च न दोषं शमयेत्। तस्मात्क्षुद्वत एवायं शस्यते। स च मध्यममात्रयाऽनन्नः केवल एव। भक्ष्यादिविचारणारहितः। अच्छ एव पेय इत्यर्थः। अत्र चोत्तमया मात्रया स्नेहपानादिनानंतरं पथ्यं कार्यम्। पुनः स्नेहप्रयोगः पुनरन्यस्मिन्नहनि पथ्यं कार्यम्। मध्यममात्रया स्नेहपाने तु लघुभोजिनो न याममात्रेऽन्नाकांक्षा भवति। तदा च स्नेहोपयोगे रात्र्यारंभे रात्रियामार्धे गते वा रसकौदनप्रायं भोजनं भोज्यं मात्रयैव। ग्रंथकारो हि शमने स्वल्पभोजनमेवाऽनुजज्ञे। वक्ष्यति हि। उपचारस्तु शमने कार्यः स्नेहे विरिक्तवदिति। सुश्रुते चोक्तम्। परिषिच्याऽद्भिरुष्णाभिर्जीर्णस्नेहं ततः परम्। यवागूं पाययेदुष्णामक्लिन्नामल्पतंडुलाम्। पेयो यूषो रसो वा स्यादकृतः सौरभायुतः। कृतो वाऽप्यल्पसर्पिष्को विलेपी वा विधीयत इति ॥ १९ ॥

बुभुक्षित के लिये स्नेहोपयोग—

वि०—शमन के लिये-भूख लगने पर एवं बिना भोजन किये मध्यम मात्रा में शुद्ध स्नेह पिलाना चाहिये ॥ १९ ॥

बृंहणो रसमद्याद्यैः सभक्तोऽल्पः—

स०—बृंहणः स्नेहो रसमद्याद्यैः सह शस्यते। रस इत्यविशेषोक्तौ ज्ञेयो मांसभवो रस इति तन्त्रांतरोक्त्या रसशब्देन मांसरसोऽत्र बोद्धव्यः। आद्यशब्देन क्षीरखंडादेर्द्रवरूपस्य ग्रहणम्। तथा सह भक्तेनौदनेनाऽसौ वर्तते इति सभक्तः शस्यते। एष च स्नेहो ह्रसीयसीतोऽपि मात्रातोऽल्पः।

रसादि के साथ स्नेहोपयोग—

वि०—बृंहण के लिये स्नेह को मांस, मद्य आदि भक्ष्य पदार्थों के साथ मिलाकर भोजन के साथ थोड़ी मात्रा में लेना चाहिये।

—हितः स च।

बालवृद्धपिपासार्तस्नेहद्विण्मद्यशीलिषु ॥ २० ॥
स्त्रीस्नेहनित्यमन्दाग्निसुखितक्लेशभीरुषु।
मृदुकोष्ठाल्पदोषेषु काले चोष्णे कृशेषु च ॥ २१ ॥

स०—स च स्नेहो बालादिषु हितः। बालादीनामितरेतरद्वंद्वः। पिपासार्तास्तृट्पीडिताः। स्नेहद्विषो ये स्वभावेनैव स्नेहं द्विषंति। स्त्रीस्नेहयोर्नित्यशब्देन संबंधः। स्त्रीनित्येषु स्नेहनित्येषु चेत्यर्थः। काले चोष्णे ग्रीष्मादौ कृशेषु नरेषु च हितः ॥ २०-२१ ॥

वि०—यह स्नेह-बालक, वृद्ध, प्यास से पीडित, स्नेह से द्वेष करने वाले, मद्यप, स्त्रीसेवी, स्नेहसेवी, मन्दाग्नि, सुखी जीवन व्यतीत करने वाले, क्लेश से डरने वाले, मृदुकोष्ठ, अल्प दोष वाले तथा कृश व्यक्तियों के लिये एवं ग्रीष्मकाल में श्रेष्ठ होता है ॥ २०-२१ ॥

स चोपयुक्तः किं करोतीत्याह—

प्राङ्मध्योत्तरभक्तोऽसावधोमध्योर्ध्वदेहजान्।
व्याधीञ्जयेद्बलं कुर्यादङ्गानां च यथाक्रमम् ॥ २२ ॥

स०—प्राक् च मध्यं चोत्तरं च तत् प्राङ्मध्योत्तरं भक्तं यस्मिन्स्नेहे स प्राङ्मध्योत्तरभक्तः। तेनाऽयमर्थः। भक्तस्याऽदावुपयुक्तोऽसौ स्नेहोऽधोदेहजान् व्याधीन् जयेत्। मध्य उपयुक्तो मध्यदेहजान् भक्तस्योपर्युपयुक्त ऊर्ध्वदेहजानिति यथाक्रमम्। तथांऽगानां शरीरावयवानामोमध्यध्योर्ध्वसंज्ञकानां बलं कुर्यात्। इदं चोक्तम्। मारुतेऽभ्यधिके सर्पिः सदा सलवणं हितम्। केवलं चाधिके पित्ते कफे सव्यूषणं तथेति ॥ २२ ॥

उक्त स्नेहोपयोग का फल—

वि०—भोजन से पूर्व पिया स्नेह-शरीर के अधोभाग के रोगों को, भोजन के मध्यभाग में पिया स्नेह शरीर के मध्यभाग के रोगों को और भोजन के उपरान्त पिया स्नेह शरीर के ऊर्ध्वभाग के रोगों को नष्ट करता है और उन्हीं अङ्गों को बलवान् बनाता है ॥ २२ ॥

वार्युष्णमच्छेऽनुपिबेत् स्नेहे तत्सुखपक्तये।
आस्योपलेपशुद्ध्यै च, तौवरारुष्करे न तु ॥ २३ ॥
जीर्णाजीर्णविशङ्कायां पुनरुष्णोदकं पिबेत्।
तेनोद्गारविशुद्धिः स्यात्ततश्च लघुता रुचिः ॥ २४ ॥

स०—अच्छे पेये स्नेह उत्तममध्यमह्रस्वमात्रोपयोजितेऽनु पश्चादुष्णं वारि पिबेत्। किमर्थम्। तत्सुखपक्तये तस्य स्नेहस्य सुखपक्तिः सुखेन पाकस्तदर्थम्। तथाऽऽस्योपलेपशुद्ध्यै स्नेहलिप्तस्य मुखस्य शुद्धिनिमित्तम्। तुवरतैले भल्लातकतैले वाऽच्छे पेयेऽप्युष्णोदकं न पिबेत्। तयोरत्युष्णवीर्यत्वादिति भावः। तुवरस्याऽयं विकारः स्नेहस्तौवरस्तस्य विकार इत्यण्। एवमारुष्करे च। चिरपीते च स्नेहे जीर्णाऽजीर्णे प्रति संशये सति भूयोऽप्युष्णं जलं पिबेत्। अनुपानापेक्षं पुनर्ग्रहणं न वीप्सार्थम्। तेनोष्णोदकपानेनोद्गारस्य विशुद्धिर्भवेत्। ततश्च जीर्णाऽजीर्णशंकातोऽधिकमंगलाघवं रुचिश्च स्नेहस्य पातुः स्यात्। संग्रहेऽप्यन्यदप्युक्तम्। यथा। ततो गुरुप्रावरणो निवाते शयने स्थितः। जरणांतं प्रतीक्षेत तृष्यन्नुष्णाऽल्पवारिपः। शिरोरुग्भ्रमनिष्ठीवमूर्छादाहारुचिक्लमैः। जानीयाद्धेवजं जीर्यज्जीर्णं तच्छांतिलाघवात्। अनुलोमानिलस्वास्थ्यक्षुत्तृष्णोद्गारशुद्धिभिरिति ॥ २३-२४ ॥

वि०—शुद्ध स्नेह के पीने के उपरान्त गरम पानी पिये, इससे स्नेह भली प्रकार जीर्ण होता है, तथा स्नेह से लिप्त

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मुख का शोधन होता है। तुवरकतैल और भिलावे के तैल में शीतल पानी पिये, गरम नहीं। स्नेह जीर्ण हो गया या नहीं इस सन्देह में फिर गरम पानी पिये। गरम पानी पीने से उद्गार की शुद्धि, फिर शरीर में हल्कापन और भोजन में रुचि होती है ॥ २३-२४ ॥

भोज्येऽन्नं मात्रया पास्यन् श्वः पिबन् पीतवानपि ।
द्रवोष्णमनभिष्यन्दि नातिस्निग्धमसङ्करम् ॥२५॥

स०—भोज्यो भोजयितव्यो नरः। किं तत्। अन्नम्। कीदृशम्। द्रवोष्णम्। अत्र चोभयथा समासः। द्रवेण मुद्गयूषादिना सहोष्णमन्नं द्रवोष्णम्। तथा केवलं द्रवं च तदुष्णं द्रवोष्णं पेयादिकं केवलमेवेति। तथाऽनभिष्यंदि न कफकृत्। तथा नाऽतिस्निग्धमर्थादीषत्स्निग्धम्। तथाऽसंकरमसंकीर्णमपथ्येनामिश्रितमित्यर्थः। कः पुरुषः किं कुर्वन्नीदृशमन्नं मात्रया भोजयितव्य इत्याह। श्वः स्नेहं पास्यन्पातुमिच्छन्। तथा तस्मिन्नेव दिने स्नेहं पिबन्। तथा पीतवानपि यः स्नेहम्। अपिः समुच्चये। ननु मात्राशी सर्वकालं स्यादिति प्रागुक्तमेव तत्किमिह पुनर्मात्राग्रहणेन। ब्रूमः। मात्राशब्दस्तत्र प्रामाणार्थः इह स्वल्पार्थः। तेनायमर्थः। यावदन्नमस्य सम्यग्यथाकालं परिणमति तावतोऽप्यन्नादनेन स्वल्पं भोज्यमिति ॥ २५ ॥

स्नेह पीनेवाले के लिये भोजनविधि—

वि—भोजन का नियम—जिसको कल-अगले दिन स्नेह पीना हो या उसी दिन पीना हो; या जिसने स्नेहपान किया हो, वह द्रव-एवं उष्ण; जो अभिष्यन्दी—कफवर्धक न हो; थोड़ा स्निग्ध हो तथा पथ्य-अपथ्य से अमिश्रित (बहुत मिलावट न हो) अन्न को खाये।

[जितने दिन स्नेह पिया हो-या पीना हो-उतने दिन तक ऐसा भोजन करे] ॥ २५ ॥

उष्णोदकोपचारी स्याद् ब्रह्मचारी क्षपाशयः ।
न वेगरोधी व्यायामक्रोधशोकहिमातपान् ॥ २६ ॥
प्रवातयानयानाध्वभाष्यात्यासनसंस्थितीः ।
नीचात्युच्चोपधानाहःस्वप्नधूमरजांसि च ॥ २७ ॥
यान्यहानि पिबेत्तानि तावन्त्यन्यान्यपि त्यजेत् ।

स०—तथाऽसौ स्नेहस्य पाता उष्णोदकोपचारी स्यात्। उष्णोदकमुपचरितुं सेवितुं शीलमस्य स एवम्। तथा ब्रह्मचारी ललनासंगरहितः। क्षपाशयः इत्यधिकरणे शेतेरिस्यच्। क्षपाशय इत्यनेन दिवास्वप्नस्य रात्रिजागरस्य च निषेधः। स्नेहं पिबति यावंत्यहानि तावंत्यन्यान्यपि स्नेहपानरहितानि व्यायामादींस्त्यजेत् ॥ २६-२७ ॥

स्नेह पीनेवाले के कर्तव्य—

वि०—विहार नियम—स्नान-पान आदि में गरम पानी बरते; ब्रह्मचारी रहे; रात्रि में सोये; उपस्थित वेगों को न रोके, व्यायाम, क्रोध, शोक, ठण्डक और धूप से अपने को बचाये; तेज वायु, सवारी पर यात्रा, पैदल मुसाफिरी, बहुत बोलना, बहुत देर बैठना, बहुत देर खड़े रहना, सिर को (तकिये को) बहुत नीचे रखना या बहुत ऊँचा रखना, दिन में सोना, धूवाँ और धूल इनको छोड़ देवे—इनसे बचे। जितने दिन स्नेहपान किया है उतने ही दिन और अधिक इन वस्तुओं से परहेज करे ॥ २६-२७ ॥

सर्वकर्मस्वयं प्रायो व्याधिक्षीणेषु च क्रमः ॥ २८ ॥

स०—सर्वकर्मसु वमनविरेचनादिष्वयमुष्णोदकोपचारीत्यादिक्रमो विधिरित्यर्थः। व्याधिक्षीणेषु च प्रायोऽयमेव विधिः। अत्राऽप्यतीसारादिष्वहःस्वप्नादिनामनुज्ञानात्प्रायोग्रहणम् ॥ २८ ॥

वि०—प्रायः करके वमन-विरेचनादि सब कर्मों में तथा रोग से क्षीण पुरुषों में यही (उपर्युक्त) नियम है ॥ २८ ॥

उपचारस्तु शमने कार्यः स्नेहे विरिक्तवत् ।

स०—तुर्व्यतिरेके। शमने स्नेहे तूपयुक्ते उपचारो भोजनादिविधिर्विरिक्तवत्कार्यः। यथा विरिक्ते पेयादिकः क्रमस्तथाऽस्मिन्नपीत्यर्थः।

वि०—शमन स्नेह में भोजनादि उपचार विरेचन की भाँति करना चाहिये, अर्थात् पेया, विलेपी आदि संसर्जन क्रम का पालन करना चाहिये।

त्र्यहमच्छं मृदौ कोष्ठे क्रूरे सप्तदिनं पिबेत् ॥ २९ ॥
सम्यक्स्निग्धोऽथवा यावदतः सात्म्यीभवेत्परम् ।

स०—मृदौ कोष्ठे सति पुरुषस्त्रिदिनमच्छं स्नेहं पिबेत्। क्रूरकोष्ठे सप्ताहम्। मध्यकोष्ठस्तु षडहात्रम्। मध्यकोष्ठस्त्वत एव लक्षणादधिगम्यते। मृदुकोष्ठे च स्नेहगो दोषः संग्रहे कथितः। यथा चात्वार्यहानि पंच वा स्नेहं पिबेदिति। यदि च त्र्यहेण सम्यक्स्निग्धलक्षणं न स्यात्ततश्चतुष्पंचरात्रमपि स्नेहं पिबेत्। मध्यकोष्ठस्तु षडहात्रं पिबेदित्याह। सम्यक्स्निग्धोऽथवा यावदित्यादि। अथवा नैष नियमः सम्यक्स्निग्धलक्षणोत्पत्तिरेव नियमोऽतः सप्ताहादप्यूर्ध्वमच्छस्नेहः पेयो यावत्स्निग्धलक्षणं स्यात्। अतः परं स्नेहः सात्मीभवेत् सात्मीभूते च स्नेह यो दोषः स संग्रहे कथितः। यथा। सात्मीभूतो हि कुरुते न मलानामुदीरणम्। अतियोगेन वा व्याधीन् यथांऽभो ह्यतियोजनादिति। यदि तु सप्ताहेनाऽपि स्नेहलक्षणं नोत्पद्यते तदा दिनमेकं विश्रमय्य पुनः स्नेहो योज्य इति सद्वैद्याः ॥ २९ ॥

स्नेहपान की अवधि—

वि०—मृदु कोष्ठ वाला व्यक्ति तीन दिन शुद्ध स्नेह पिये, क्रूर कोष्ठ वाला सात दिन पिये, अथवा जब तक भली प्रकार स्निग्ध न हो तब तक स्नेह पिये। इसके आगे स्नेह सात्म्य हो जाता है [सात्म्य होने से अभीष्ट गुण नहीं करता] ॥२९॥

वक्तव्य—वस्तुतः तीन से सात दिन तक स्नेहन करना चाहिये, मध्यकोष्ठ में ४-५ दिन में सम्यक्स्नेहन हो जाता है।

वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम् ॥३०॥
स्नेहोद्वेगः क्लमः सम्यक्स्निग्धे, रूक्षे विपर्ययः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतिस्निग्धे तु पाण्डुत्वं घ्राणवक्त्रगुदस्रवाः ॥ ३१ ॥

स०—सम्यक्स्निग्धे पुरुषे तु वातानुलोम्यादि क्लमांतं लक्षणं भवति। वर्चः शकृत् स्निग्धं तथाऽसंहतं शिथिलम्। रूक्षेऽस्निग्धे विपर्ययो वैपरीत्यम्। अतिस्निग्धे तु स्नेहस्याऽतियोजनात्पुनः पाण्डुत्वादयो भवंति। स्रवशब्दस्य घ्राणादिभिः प्रत्येकं संबन्धः ॥ ३०-३१ ॥

सम्यक् स्निग्ध आदि के लक्षण--

वि०—सम्यक् स्निग्ध के लक्षण—वायु का अनुलोमन होना, अग्नि की दीप्ति, मल का स्निग्ध एवं ढीला होना, स्नेह से ऊब जाना एवं थकान; ये सम्यक् स्निग्ध के लक्षण होते हैं। रूक्ष (अस्निग्ध) में इससे विपरीत लक्षण होते हैं। अतिशय स्निग्ध होने पर-पाण्डुत्व; नाक, मुख और गुदा से (कफ का) स्राव होता है ॥ ३०-३१ ॥

अमात्रयाऽहितोऽकाले मिथ्याहारविहारतः।
स्नेहः करोति शोफार्शस्तन्द्रास्तम्भविसंज्ञताः ॥ ३२ ॥
कण्डूकुष्ठज्वरोत्क्लेशशूलानाहभ्रमादिकान् ।

स०—अमात्रः पीतः स्नेहः सर्पिरादिः शोफादीन् करोति। आदिशब्देन तु बलक्षयजाड्यवाग्ग्रहादयः संग्रहोक्ता गृह्यंते। अहितो यो यस्य प्रतिषिद्धः स्नेहः। तथाऽकाले ग्रीष्मादौ पूर्वं प्रतिषिद्धे। तथा मिथ्याऽऽहारतो द्रवोष्णमित्यादिविपर्ययेण। तथा मिथ्याविहारत उष्णोदकोपचारी स्यादित्यादिविपर्ययेण ॥ ३२ ॥

मात्राविरुद्ध स्नेहपान का फल—

वि०—अनुचित मात्रा से; अनुचित स्नेह; अयोग्य काल में तथा आहार-विहार को ठीक प्रकार न पालने से पिया हुआ स्नेह शोफ, अर्श, तन्द्रा, जडता, संज्ञानाश, कण्डू, कुष्ठ, ज्वर, जी मिचलाना, शूल, आनाह और भ्रम आदि रोगों को करता है ॥ ३२ ॥

क्षुत्तृष्णोल्लेखनस्वेदरूक्षपानान्नभेषजम् ॥ ३३ ॥
तक्रारिष्टखलोद्दालयवश्यामाककोद्रवम् ।
पिप्पलीत्रिफलाक्षौद्रपथ्यागोमूत्रगुग्गुलु ॥ ३४ ॥
यथास्वं प्रतिरोगं च स्नेहव्यापदि साधनम्।

स०—स्नेहव्यापदि स्नेहविधिविभ्रंशे सति क्षुत्तृष्णादि साधनं चिकित्सा। क्षुत्तृष्णानिग्रहौ क्षुत्तृष्णाशब्देनाऽत्रोक्तौ। उल्लेखनं वमनम्। रूक्षशब्दस्य पानादिभिस्त्रिभिर्योगः। तक्राणि चारिष्टाश्चेत्येवं समासः। खलो व्यंजनविशेषः प्रागुक्तः। उद्दालः शालिविशेषः। यथास्वं दोषानुगुण्येन प्रतिरोगं यद्यस्मिन् रोगे स्वेऽध्याय उक्तं तदपि साधनम् ॥ ३३-३४ ॥

स्नेहव्यापद् का उपचार—

वि०—चिकित्सा—स्नेहव्यापद् (स्नेहन से उत्पन्न उपद्रव में भूख-प्यास को रोकना (लंघन), वमन, स्वेदन, रूक्ष अन्नपान और औषध, तक्रारिष्ट, खल (व्यञ्जन विशेष), उद्दालक, जौ, सांवाँ, कोदो, पिप्पली, त्रिफला, मधु, गोमूत्र; हरड़, गुग्गुलु; इनको दोष के अनुसार तथा प्रत्येक रोग की दृष्टि से स्नेहव्यापद् में प्रयुक्त करे अर्थात् विरूक्षण करे ॥ ३३-३४ ॥

स्नेहव्यापत्साधनस्य विरूक्षस्वभावत्वात्प्रसंगेन विरूक्षणस्य सम्यक्कृताऽतिकृतलक्षणमाह—

विरूक्षणे लङ्घनवत्कृतातिकृतलक्षणम् ॥ ३५ ॥

स०—विरूक्षणे सम्यगुत्पन्ने तथाऽत्यर्थोत्पन्ने च लंघनवत् कृतातिकृतलक्षणं ज्ञेयम्। कृतं चाऽतिकृतं च कृतातिकृतं तयोर्लक्षणं कृतातिकृतलक्षणम्। कृतशब्देन सम्यक्कृतमुच्यते। विरूक्षणाऽतियोगलक्षणं तु स्नेहाऽतियोगलक्षणेनैवोक्तम्। तत्र सम्यक्कृतस्य लंघनस्य यल्लक्षणं विमलेंद्रियतादि तदेव विरूक्षणे कृते लक्षणं बोध्यम्। तथाऽतिकृते विरूक्षणेऽतिलंघितस्य लक्षणं कार्श्यादिकं वेद्यम् ॥ ३५ ॥

विरूक्षण के कृतातिकृत लक्षण—

वि०—लंघन के सम्यग्योग के जो लक्षण (विमलेन्द्रियता आदि) तथा लंघन के अतियोग के जो लक्षण (अतिकार्श्य आदि) हैं, वे ही विरूक्षण के सम्यग्योग और अतियोग में जानने चाहिये ॥ ३५ ॥

स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्वेदमाचरेत् ।
स्निग्धस्त्र्यहं स्थितः कुर्याद्विरेकं, वमनं पुनः ॥ ३६ ॥
एकाहं दिनमन्यच्च कफमुत्क्लेश्य तत्करैः।

स०—स्निग्धश्चाऽसौ द्रवोष्णधन्वोत्थरसश्च तं भुंक्ते यः स स्निग्धद्रवोष्णधन्वोत्थरसभुक् धन्वोत्थरसो जांगलदेशमांससमुद्भूतो रसः। मांसरसस्य स्वभावत एव स्निग्धद्रवत्वात्स्निग्धद्रवग्रहणमधिकयोगायेति वेद्यम्। उष्णमुभयथा वीर्यतोऽग्निसंयोगाच्च। एवंभूतः पुरुषः पूर्वं स्निग्धोऽनंतरं स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्वेदमाचरन् दिनत्रयं स्थितः सन् विरेकं कुर्यात्। वमनं पुनरिति। यदा तु स्नेहादनंतरं वमनमेवोपयुंक्ते तदैकाहमनेनैव प्रकारेण स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्वेदमाचरन् स्थितोऽन्यच्च दिनं द्वितीयमहः कफमुत्क्लेश्य स्थानात् प्रच्याव्याऽवस्थितौ वमनं कुर्यात्। केनोत्क्लेश्य तत्करैः कफकरणहेतुभिर्माषक्षीरमत्स्यगुडादिभिः। तत्करैरित्यादि कृञो हेत्वादिना हेतौ टः ॥ ३६ ॥

स्निग्धादि के पश्चात् कर्तव्य—

वि०—स्निग्ध, द्रव और उष्ण जांगल पशु-पक्षियों का मांसरस खाने वाले को स्वेद देवे। स्नेहन के तीन दिन पीछे विरेचन लेवे तथा स्नेहन के बाद एक दिन विश्राम लेकर दूसरे दिन (माष, दूध आदि) कफकारक द्रव्यों से कफ को उत्क्लेशित (बाहर आने की प्रवृत्ति वाला) करके तीसरे दिन वमन का प्रयोग करे ॥ ३६ ॥

मांसला मेदुरा भूरिश्लेष्माणो विषमाग्नयः ॥ ३७ ॥
स्नेहोचिताश्च ये स्नेह्यास्तान् पूर्वं रूक्षयेत्ततः।
संस्नेह्य शोधयेदेवं स्नेहव्यापन्न जायते ॥ ३८ ॥

स०—मांसलत्वादियुक्ताः पुरुषा ये शोध्यत्वेन स्नेहयितुमभीष्टास्तान् पूर्वं प्रथमं रूक्षयेत्। ततो रूक्षयित्वानंतरं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संस्नेह्य शोधयेत्। किमेवं स्यादित्याह। एवं स्नेहव्यापन्न जायते। मांसला उपचितमांसाः। मेदुरा मेदस्विनः ॥३७-३८॥

स्थूल स्नेहनीयों के नियम—

वि०—जो व्यक्ति अतिशय मांस वाले, मेदवाले, बहुत कफ वाले, तथा विषम अग्निवाले हैं और जिनको स्नेह सात्म्य हो; इनका यदि शोधन के लिये स्नेहन करना अभीष्ट हो तो प्रथम इनका रूक्षण करे। फिर स्नेहन करके इनका शोधन करे—इस प्रकार करने से स्नेहजन्य रोग नहीं होते ॥ ३७-३८ ॥

अलं मलानीरयितुं स्नेहश्चासात्म्यतां गतः।

स०—न केवलं स्नेहव्यापदेव न स्यात्। यावत् स्नेहोऽसात्म्यतां गतः सन् मलान् वातादीन् पुरीषादींश्चेरयितुं प्रेरयितुमलं प्रर्याप्तः।

वि०—जो स्नेह सात्म्य नहीं हुआ है; वह स्नेह मलों के प्रेरित करने में समर्थ होता है—

बालवृद्धादिषु स्नेहपरिहारासहिष्णुषु ॥ ३६ ॥
योगानिमाननुद्वेगान् सद्यःस्नेहान् प्रयोजयेत्।

स०—बालादिषु तथा यः स्नेहविषयः परिहारः शीतोदकादिस्तदसहिष्णुष्वक्षमेषु सद्यः स्नेहाख्यानतुद्वेगाननुद्वेजकानेतान् योगान् प्रयोजयेत्॥ ३९ ॥

बालक-वृद्धादि का शीघ्र स्नेहकरण—

वि०—बालक, वृद्ध आदि जो कि स्नेहसम्बन्धी परहेज का पालन नहीं कर सकते, उनके लिये तुरन्त स्नेहन करने वाले तथा उद्वेग पैदा न करने वाले निम्न योगों को बरते ॥ ३९ ॥

कांस्तानित्याह--

प्राज्यमांसरसास्तेषु पेया वा स्नेहभर्जिता॥ ४० ॥
तिलचूर्णश्च सस्नेहफाणितः, कृशरा तथा।
क्षीरपेया घृताढ्योष्णा दध्नो वा सगुडः सरः ॥ ४१ ॥
पेया च पञ्चप्रसृता स्नेहैस्तण्डुलपञ्चमैः।
सप्तैते स्नेहनाः सद्यः, स्नेहाश्च लवणोल्बणाः॥ ४२ ॥
तद्ध्यभिष्यन्द्यरूक्षं च सूक्ष्ममुष्णं व्यवायि च।

स०--तेषु बालादिषु प्राज्यमांसरसाः प्रभूतमांसानामेव रसास्तथा स्नेहभर्जिता पेया तथा तिलचूर्णः पललाख्यः स स्नेहफाणितः सर्पिरादिना युक्तः क्षुद्रगुडेन च युक्तस्तथा क्षैरेयी वा पेया सर्पिष्मत्युष्णा च दधिसरो वा सगुडः। पेया च पंचप्रसृता। द्वे पले प्रसृतं विदुः पंच प्रसृतानि यस्यां सा पंचप्रसृता। केषां पंच प्रसृतानीति युक्त्याह। स्नेहैस्तंडुलपंचमैरिति। सर्पिस्तैलं वसा मज्जेति चतुर्णां स्नेहानां चत्वारि प्रसृतानि तंडुलाश्च प्रसृतमित्यर्थः। एते सप्त पूर्वोक्ताः सद्यः शीघ्रं स्नेहना निष्परिहाराश्च। न केवलमेत एव स्नेहना इत्याह। स्नेहाश्च लवणोल्बणाः सर्पिरादयो लवणाढ्याश्च सद्यःस्नेहनाः। कस्मादित्याह—यस्माल्लवणमभिष्यन्दि स्रोतसां स्रावकमरूक्षत्वादिगुणयुक्तं सूक्ष्मं सूक्ष्मस्रोतोगामि व्यवायि देहमखिलं व्याप्य पाकाय कल्पते॥ ४०-४२॥

अनुद्वेगकर सात स्नेहन योग—

वि०—सात योग—(१) प्रचुर मांस से बनाये मांसरस (२) मांसरस में बनी और स्नेह में भूनी पेया, (३) घी आदि स्नेह और राब के साथ तिलों का चूर्ण, (४) घी और राब के साथ कृशरा (तिल और तण्डुल की यवागू), (५) प्रचुर घृत डाली हुई और दूध में बनाई उष्ण पेया, (६) दही की मलाई गुड़ के साथ, (७) पञ्च प्रसृति पेया—घी, तैल, वसा और मज्जा—इन चार स्नेहों की एक-एक प्रसृति (दो-दो पल) और चावलों की कणियाँ एक प्रसृति। ये सात योग तुरन्त स्नेहन करने वाले हैं और लवणप्रचुर (अपक्व) स्नेह भी सद्यःस्नेहन करते हैं क्योंकि लवण अभिष्यन्दि, अरूक्ष, सूक्ष्म, उष्ण और व्यवायी होता है॥ ४०-४२॥

गुडानूपामिषक्षीरतिलमाषसुरादधि ॥ ४३ ॥
कुष्ठशोफप्रमेहेषु स्नेहार्थं न प्रकल्पयेत्।

स०—कुष्ठादिषु स्नेहयोग्यत्वे सति गुडादि स्नेहनार्थं न प्रकल्पयेन्न योजयेत्॥ ४३ ॥

कुष्ठादि में गुडादि त्याज्यता—

वि०—कुष्ठ-शोफ और प्रमेह में स्नेहन के लिये-गुड़, आनूप मांस, दूध, तिल, उड़द, सुरा और दही इनको नहीं बरते॥ ४३ ॥

तर्हि ते कथं स्नेह्या इत्याह—

त्रिफलापिप्पलीपथ्यागुग्गुल्वादिविपाचितान् ॥ ४४ ॥
स्नेहान् यथास्वमेतेषां योजयेदविकारिणः।

स०—एतेषां कुष्ठादीनां यथास्वमध्यायेषु पथ्यत्वेनाऽभिहितैस्त्रिफलादिभिः पाचितान् साधितानविकारिणः स्नेहान् योजयेत्। कुष्ठादीनां सम्बन्धी यो विकारस्तद्वताम्। तेन कुष्ठिनां शोफिनां मेहिनामित्यर्थोऽवतिष्ठते॥ ४४ ॥

कुष्ठादि में स्नेहनविधि—

वि०—इन कुष्ठादि रोगों में-त्रिफला, पिप्पली, हरड़, गुग्गुलु आदि से सिद्ध किये-विकार न करने वाले-स्नेहों को दोषों के अनुसार बरतना चाहिये॥ ४४ ॥

क्षीणानां त्वामयैरग्निदेहसन्धुक्षणक्षमान् ॥ ४५ ॥

स०—आमयैर्व्याधिभिः क्षीणानां पुंसामग्निदेहसन्धुक्षणक्षमान् स्नेहान् योजयेत्। अग्निश्च देहश्चाग्निदेहौ। संधुक्षणाश्च क्षमाश्च संधुक्षणक्षमास्तान्। यथासंख्येनाऽत्र संबंधः। अग्नेः संधुक्षणास्तद्दीपकाः देहस्य क्षमाः पुष्ट्यावहाः। अत्र चाऽयं भावः। किल व्याधिभिः क्षीणानां वह्निरपि क्षीणो भवति। अतस्तेषां न केवलं ये पुष्ट्यावहाः कुतः ते वह्निमांद्यमावहंति। अथवा वह्निसंधुक्षणा न पुष्ट्यावहाः स्नेहा उपयोक्तुं युक्ताः। किं तर्ह्युभयकारिण एव योक्तुं युक्ता इति॥ ४५॥

वि०—रोगों से जो क्षीण हो गये हों-उनके लिये अग्नि तथा शरीर को बढ़ाने वाले स्नेह बरते॥ ४५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यक्तव्य—'तैलं सुराया मण्डेन वसां मज्जानमेव वा। पिबेत्सफाणितं क्षीरं नरः स्निह्यति वातिकः॥ धारोष्णं स्नेहसंयुक्तं पीत्वा सशर्करं पयः। नरः स्निह्यति पीत्वा वा सरं दध्नः सफाणितम् ॥' (चरक. सू. अ. १३।८७)

दीप्तान्तराग्निः परिशुद्धकोष्ठः
प्रत्यग्रधातुर्बलवर्णयुक्तः।
दृढेन्द्रियो मन्दजरः शतायुः
स्नेहोपसेवी पुरुषः प्रदिष्टः। ४६॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने स्नेहविधिर्नाम षोडशोऽध्यायः॥ १६॥

स०—यः पुमानाभीक्ष्ण्येन स्नेहमुपसेवते स दीप्तांतराऽग्नित्वादिगुणयुक्तो भवतीति प्रदिष्टः। सद्वैद्यैरिति शेषः। उपजातिर्वृत्तम्॥ ४६॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वाङ्गसुन्दराख्यायां षोडशोऽध्यायः॥ १६॥

स्नेहोपसेवन का सुपरिणाम—

वि०—स्नेहसेवन का फल—स्नेह का सेवन करने वाले पुरुष की अग्नि प्रदीप्त रहती है, कोष्ठ शुद्ध होता है, समस्त इन्द्रियाँ दृढ होती हैं, बुढ़ापा देर में आती है, एक सौ वर्ष की आयु होती है, स्नेह के सेवन के ये गुण कहते हैं॥ ४६॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का स्नेहविधि नामक सोलहवाँ अध्याय समाप्त हुआ॥ १६॥

सप्तदशोऽध्यायः

शोधनप्रसंगेन स्नेहोपयोगः स्निग्धे च देहे दोषाणां मार्दवीकरणाय स्वेदस्य प्रसंगोऽतस्तत्परिज्ञानार्थोऽयमध्याय आरभ्यते—

अथातः स्वेदविधिमाध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—अथाऽत इति। स्वेदनं स्वेदस्तस्य विधिर्विधानं व्याख्यास्यामः। शेषं पूर्ववत्।

वि०—अब इसके आगे स्वेदविधि अध्याय का व्याख्यान करेंगे-जैसा कि आत्रेय आदि महर्षियों ने कहा था।

स्वेदस्य चातुर्विध्यमाह—

स्वेदस्तापोपनाहोष्मद्रवभेदाच्चतुर्विधः।

स०—स्वेदश्चतुर्विधस्तापादिभेदात्।

स्वेद के चार प्रकार—

वि०—स्वेद चार प्रकार के हैं—तापस्वेद, उपनाहस्वेद, ऊष्मस्वेद और द्रवस्वेद।

तत्र तापादीनेव लक्षयितुमाचष्टे—

तापोऽग्नितप्तवसनफालहस्ततलादिभिः॥ १॥

स०—तापः स्वेदोऽग्नितप्तेन वसनेन तथा फालेनाऽयोमयेनाऽग्निना तप्तेन तथा हस्ततलेनाऽपि आदिग्रहणाद्वालुकाकांस्यपात्रादयो गृह्यंते॥ १॥

तापस्वेद का लक्षण—

वि०—तापस्वेद—अग्नि से गरम किये वस्त्र, फाल (लोहा) हाथ की हथेली आदि (रेती पात्र), से किया जाता है॥ १॥

उपनाहो वचाकिण्वशताह्वादेवदारुभिः।
धान्यैः समस्तैर्गन्धैश्च रास्नैरण्डजटामिषैः॥ २॥
उद्रिक्तलवणैः स्नेहचुक्रतक्रपयःप्लुतैः।
केवले पवने, श्लेष्मसंसृष्टे सुरसादिभिः॥ ३॥
पित्तेन पद्मकाद्यैस्तु साल्वणाख्यैः पुनः पुनः।

स०—किण्वं सुराप्रकृतिः। धान्यैरिति सामान्योक्तावपि तिलाऽतसीमाषादीनि योग्यत्वाद्यान्युष्णवीर्याणि स्निग्धानि वा तानि प्रायेण प्रयोज्यानीति। समस्तग्रहणं गंधैरेव युज्यते। अत एव संग्रहेऽवदत्। सर्वगंधानीति। गंधैर्गंधद्रव्यैः कुष्ठागुरुतगरसुरसादिभिस्तथा रास्नादिभिः। किंभूतैः पूर्वोक्तैः उद्रिक्तलवणैर्लवणाढ्यैः। तथा स्नेहश्च चुक्रं च तक्रं च पयश्चतैः प्लुतैरालोडितैः। चुक्रमम्लम्। तक्रस्य चुक्रत्वादेव ग्रहणे सिद्धे तक्रग्रहणमतिशयाय। अतिशयेन साल्वणाख्ये स्वेदे तक्रं प्रयोज्यमिति। केवले पवने वचादिभिरुपनाहः स्वेदः कार्यः। श्लेष्मसंसृष्टे पवने सुरसादिभिः सुरसयुगादिना गणेन। पित्तेन संसृष्टे पवने पद्मकाद्यैः पद्मकपुंड्रावित्यादिभिः। पित्तेन संसृष्टे पवन इत्यत्र किंचिदेव पित्तेन संसृष्टे पवने पद्मकादिभिरुपनाहः कार्य इत्यादि योज्यं नाऽधिकेन पित्तेन युक्ते पवने नाऽपि तुल्येन पित्तेन युक्ते पवन इति। एवं ह्युक्तम्। ग्रैष्मः प्रायो मरुपित्ते विधिः कार्य इति। ग्रैष्मश्च विधिः प्रायेण सर्वः शीतस्तत्र स्वेदो दूरोत्सारित एव। तस्मात् किंचित्पित्तेन संसृष्टे पवने पद्मकाद्यैरुपनाहः कार्य इति वेद्यम्। एते च त्रय उपनाहाः केवले वायौ तथा कफयुक्ते पित्तयुक्ते च क्रमेण योज्याः। एते च साल्वणाभिधाना स्वेदा इत्याह। साल्वणाख्यैरिति। पुनः पुनरिति। असकृत्तैः स्वेदयोजना कार्येत्यर्थः। निरपायो हि यथाऽयं साल्वणापरसंज्ञ उपनाहाख्यः स्वेदो न तथाऽपरे स्वेदा इति। उपनह्यते बध्यते चर्मपट्टादिनेत्यन्वर्थं नामाऽस्योपनाह इति। साल्वण इत्यस्य च तंत्रांतरे प्रसिद्धं नाम। तथा च धन्वंतरिः—काकोल्यादिः स वातघ्नः सर्वाम्लद्रव्यसंयुतः। सानूपोदकमांसस्तु सर्वस्नेहसमन्वितः। सुखोष्णः स्पष्टलवणः साल्वणः परिकीर्तित इति। उद्रिक्तलवणैः स्नेहचुक्रतक्रपयःप्लुतैरिति त्रिष्वपि स्वेदेषु योज्यम्॥ २-३॥

उपनाहस्वेद का लक्षण—

वि०—उपनाहस्वेद—वच, किण्व (मद्यसन्धान में बचा तलछट), सौंफ, देवदारु, जौ, मंग, कुलथी आदि धान्य,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समस्त गन्धद्रव्य, रास्ना, एरण्डमूल, जटामांसी और गुग्गुल–इनमें प्रचुर सैन्धव आदि लवण मिलाकर, तैलादि स्नेह; शुक्त (अम्ल), तक्र, दूध आदि मिलाकर इन द्रव्यों से शुद्ध वायुजन्य रोगों में उपनाह करे। कफ से मिश्रित वायु में सुरसादि गण मिलाकर इन द्रव्यों से स्वेद करे। पित्त के साथ वायु का मेल होने पर पद्मकादिगण के द्रव्यों को मिलाकर स्वेद देवे। इनका नाम साल्वण स्वेद है–इनको बार-बार करना चाहिये। [सुगन्धित द्रव्य–कुष्ठ आदि] ॥ २–३ ॥

वक्तव्य—'साल्वण' संज्ञा सुश्रुत में दी गई है यथा–'काकोल्यादिः सवातघ्नः सर्वाम्लद्रव्यसंयुतः। सानूपौदकमांसस्तु सर्वस्नेहसमन्वितः। सुखोष्णः स्पष्टलवणः साल्वणः परिकीर्तितः॥' (सु. चि. अ. ४।१४) चरक में तेरह प्रकार के स्वेद हैं—यथा–'संकरः प्रस्तरो नाडी परिषेकोऽवगाहनम्। जेन्ताकोऽश्मघनः कर्षूः कुटी भूः कुम्भिकैव च। कूपो होलाक इत्येते स्वेदयन्ति त्रयोदश॥' इन सबका इनमें ही समावेश सुश्रुत ने किया है। उपनाह का अर्थ बन्धन है। चर्म या पट्टी से बाँध जाने को उपनाह कहते हैं।

बंधात्मकश्चाऽयं स्वेद इति बंधात्मकस्वेदोपायभूतांश्चर्मपट्टादीनाह—

स्निग्धोष्णवीर्यैर्मृदुभिश्चर्मपट्टैरपूतिभिः ॥ ४ ॥
अलाभे वातजित्पत्रकौशेयाविकशाटकैः।
बद्धं रात्रौ दिवा मुञ्चेन्मुञ्चेद्रात्रौ दिवाकृतम् ॥ ५ ॥

स०—चर्मपट्टैर्बद्धमुपनद्धमंगं रात्रौ दिवा मुंचेत्। किंभूतैः। स्निग्धोष्णवीर्यैस्तथाऽपूतिभिरदुर्गन्धैः। सुपरिकर्मितत्वात्। अलाभे चर्मपट्टादीनामभावे वातजित्पत्रैरेरंडजादिभिस्तथा कौशेयादिभिः। कौशेयं रांकवादिवस्त्रविशेषः। आविकं कंबलम्। तैर्बद्धं रात्रौ दिवा मुंचेत्। दिवा बद्धं रात्रौ मुंचेद्रात्रौ मोक्तव्यम् ॥ ४–५ ॥

बन्धनार्थ चर्मपट्टादि—

वि०—स्निग्ध, उष्णवीर्य एवं मृदु तथा दुर्गन्धिरहित चमड़े की पट्टियों से उपनाह के द्रव्यों को (स्वेद्य अंग पर) बाँधे। चर्मपट्टियाँ न मिलें तब एरण्ड आदि वातनाशक पत्तों से, रेशम से, या कम्बल से अथवा सूती कपड़े से बाँध देवे। रात्रि में किये उपनाह को दिन में खोल देना चाहिये, दिन में बाँधे हुए को रात्रि में खोल देना चाहिये ॥ ४–५ ॥

ऊष्मा तूत्कारिकालोष्टकपालोपलपांशुभिः।
पत्रभङ्गेन धान्येन करीषसिकतातुषैः ॥ ६ ॥
अनेकोपायसन्तप्तैः प्रयोज्यो देशकालतः।

स०—ऊष्मोष्णबाष्पः। ऊष्माख्यः स्वेद उत्कारिकादिभिः प्रयोज्यः। तत्र यवमाषैरंडबीजातसीकुसुंभबीजादिभिःपिष्टखिन्नैर्लपसिकाकृतिर्यः स्वेदनोपायः सा उत्कारिका। लोष्टं मृत्पिंडः। कपालं कर्परम्। उपलः पाषाणः। पांसुर्धूलिः तथा पत्रभंगेन छदसमूहेन। तथा धान्येन। करीषो गवादिशकृच्चूर्णम्। सिकता वालुका तुषो धान्यत्वक्। एतैरुत्कारिकादिभिस्तुषांतैः स्वेदो विधातव्यः। किंभूतैः। अनेके च त उपायास्तैः संतप्तोष्णीकृता ये उत्कारिकादयस्तैरनेकोपायसंतप्तैः। कथं प्रयोज्य इत्याह। देशकालतः। ल्यब्लोपे पंचमी चेयम्। तेन देशकालावपेक्ष्य उपलक्षणं चेदम्। तेन दोषदूष्यादीनपेक्ष्य स्वेदोऽयं प्रयोज्यः। लोष्टकपालपाषाणानग्निवर्णान्संदेशेन गृहीत्वा स्वेद्यदोषाद्यपेक्षयाऽम्भस्यम्ले धान्याम्ले शुक्तादौ वा निमज्जयेत्। तदुद्भूतबाष्पैः स्वेदः शयनस्थस्य कार्यः। अथवा गवादिशकृता पिंडीकृतेनोष्णेन स्वेदः स च पिंडस्वेदसंज्ञः। अथवैरंडादिद्रव्ययुक्तानि यवादीनि धान्यानि साम्लकादीनि गृहीत्वा पिहितमुखायां मूषायां सम्यगुपस्वेद्य निवाते गृहे शयनस्थे किलिंजे प्रस्तीर्याऽविककौशेयवातहरपत्रान्यतमोत्तरप्रच्छदे रौरवाजिनप्रावारादिष्ववच्छन्नं स्वेदयेत्। अथवा पूर्ववत्स्वेद्यद्रव्याणि कुंभ्यामुत्क्वाथ्यं तत्रिकटोपविष्टो घनवस्त्रप्रावृत ऊष्माणं गृह्णीयात्। एष संस्तरस्वेदः। एवमनेकोपायसंतप्तत्वं दोषदूष्याद्यपेक्षया निरूप्य स्वेदो योज्यः ॥ ६ ॥

ऊष्मस्वेद—

वि०—ऊष्मस्वेद—उत्कारिका (लप्सी), मिट्टी का ढेला, कपाल (मिट्टी का ठीकरा), उपल (पत्थर), धूली, पत्रभङ्ग, (वातनाशक-एरण्ड आदि पत्तों के समूह), गेहूँ आदि धान्य, करीष (सूखा गोबर), सिकता (बालू), तुष (भूसी) इनको अनेक विधियों से गरम करके देश एवं काल के अनुसार स्वेद देना चाहिये ॥ ६ ॥

वक्तव्य—अष्टांङ्गसंग्रह में ऊष्मा स्वेद आठ प्रकार का वर्णित है—पिण्ड, संस्तर, नाडी, घनाश्म, कुम्भी, कुटी, कूप, जेन्ताक। इनका विस्तृत वर्णन वहीं देखें (अ. सं. सू. अ. २६)

अथ द्रवस्वेदमाह—

शिग्रुवारणकैरण्डकरञ्जसुरसार्जकात् ॥ ७ ॥
शिरीषवासावंशार्कमालतीदीर्घवृन्ततः।
पत्रभङ्गैर्वचाद्यैश्च मांसैश्चानूपवारिजैः ॥ ८ ॥
दशमूलेन च पृथक् सहितैर्वा यथामलम्।
स्नेहवद्भिः सुराशुक्तवारिक्षीरादिसाधितैः ॥ ९ ॥
कुम्भीर्गलन्तीर्नाडीर्वा पूरयित्वा रुजार्दितम्।
वाससाच्छादितं गात्रं स्निग्धं सिञ्चेद्यथासुखम् ॥ १० ॥

स०—शिग्रुवादिजैः पत्रसमूहैस्तथा वचाद्यैर्वचादिगणोक्तैस्तथा मांसैरनूपजैर्जलजैश्च दशमूलेन च पृथग्द्रव्यस्तैर्द्वित्रादिभिः सहितैः समस्तैर्वा यथामलं स्नेहवद्भिर्दोषहरघृताद्यन्यतमस्नेहयुक्तैर्यथादोषं सुराशुक्तवारिक्षीरादिसाधितैः कुंभीः स्थालीः पूरयित्वा तथा गलंतीर्गर्गरीश्च वंशादिमयीर्नाडीर्वा पूरयित्वा रुजार्दितं पीडार्तं गात्रमंगं वाससाच्छादितं तथा स्निग्धं सद्यथासुखं सुखस्पर्शं कदाचिदत्युष्णं कदाचिदीषदुष्णं दोषपीडावशात् सिंचेदिति ॥ ७–१० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्रवस्वेद—

वि०—द्रवस्वेद—सहजना, वरुण, एरण्ड, करंज, तुलसी, अर्जक, शिरस, अडूसा, बाँस, आक, चमेली, श्योनाक; इनके पत्रसमूहों, वचादिगण के द्रव्य, आनूप मांस तथा वारिज मांस और दशमूल को अलग अलग या मिलाकर दोष के अनुसार घृत आदि स्नेहों से स्निग्ध बना कर सुरा, शुक्त, पानी, दूध आदि से पकाकर इनसे घड़िया अथवा जिससे बाष्प निकल सके ऐसी नलिका वाले पात्र में भरकर रुग्ण अङ्ग को स्निग्ध कर कपड़ों से ढाँप कर, सुख के अनुसार सेचन द्वारा सेक करे ॥ ७-१० ॥

वक्तव्य—सहजना आदि को घृत आदि से स्निग्ध करके सुरा आदि द्रव्यों से पकाकर एक घड़िया में भर देना चाहिये। इस घड़िया के ऊपर छिद्रदार ढक्कन लगा देना चाहिये। अथवा इसमें नाली लगा दे-जिससे द्रव फव्वारे के रूप में निकले। जिस अङ्ग पर सेक करना हो उस पर स्नेह लगाकर वस्त्र से ढांप कर तेज या हल्का गरम सेक करना चाहिये।

परिषेकस्वेदमाख्यायाऽवगाहस्वेदं द्रवभेदमाह—

तैरेव वा द्रवैः पूर्णं कुण्डं सर्वाङ्गगेऽनिले।
अवगाह्यातुरस्तिष्ठेदर्शःकृच्छ्रादिरुक्षु च ॥११॥

स०—तैरेव पूर्वोक्तैः स्वेदद्रवैः पूर्णं कुंडं भृशमवगाह्य प्रविश्याऽऽतुरो रोगी तिष्ठेत्। कीदृशे दोषे इत्याह। सर्वांगेऽनिले सर्वशरीरव्यापिनि वायौ तथाऽर्शःप्रभृतिरोगकष्टपीडासु। आदिग्रहणेन हस्तपादपीडासु वा। कुंडग्रहणमुपलक्षणार्थम्। तेन कूपकुटी स्वेदौ च वेद्यौ। संग्रहे उक्तम्। शयनस्याऽधोविस्तारद्विगुणखाते कूपे वातहरदारुकरीषाद्यन्यतरपूर्णदग्धे विगतधूमे स्वास्तीर्णशयनस्थं स्वेदयेदिति कूपस्वेदः। कुटीं नाऽत्युच्चविस्तारां वृत्तामच्छिद्रामुपनाहद्रव्यकल्कघनप्रदिग्धकुड्यां सर्वतो विधूमप्रदीप्तखदिरांगारपूर्णहसंतिकासमूहपरिवृतां विधाय तन्मध्यस्थितशय्यास्थं स्वेदयेदिति कुटीस्वेदः। पद्मोत्पलादिभिः सक्तुपिंडया वाऽऽच्छाद्य चक्षुषी। शीतैर्मुक्तावलीपद्ममुकुलोत्पलभाजनैः। मुहुः करैश्च सजलैः स्विद्यतो हृदयं स्पृशेदिति ॥ ११ ॥

अवगाह स्वेद—

वि०—सम्पूर्ण अंगों में वायु का प्रकोप होने पर अथवा अर्श आदि कष्टसाध्य रोगों में इन्हीं सहजना आदि से बने स्वेदन द्रव्यों से कुण्ड को भरकर उसमें रोगी बैठे ॥ ११ ॥

वक्तव्य—संग्रह में चरकोक्त कुटी और कूपस्वेद का समावेश इसी अवगाहस्वेद में किया है। यह द्रवस्वेद का ही भेद है अर्थात् द्रवस्वेद परिषेक और अवगाहन भेद से दो प्रकार का होता है ॥ ११ ॥

निवातेऽन्तर्बहिः स्निग्धो जीर्णान्नः स्वेदमाचरेत्

स०—अपगतवाते देशे स्वेदमाचरेत्। किंभूतः। अंतः स्नेहपानेन बहिश्चाऽभ्यंगादिना स्निग्धः। तथा जीर्णान्नश्च येन भुक्तमन्नं जीर्णम्। आमाजीर्णाद्याक्रांतं नरं वर्जयित्वा तेन स्वेदार्हेण नरेण स्वेद आचरणीयः। आमाजीर्णाद्याक्रांतेन तु पुरुषेणाऽजीर्णेऽन्ने च नैव स्वेद आचरणीयः।

स्वेदविधि—

वि०—स्वेदविधि—वायुरहित स्थान में (खान-पान से) अन्तः और (अभ्यंग आदि से) बाह्य स्नेहन कर पहली रात के किये भोजन के जीर्ण हो जाने पर मनुष्य स्वेद का प्रयोग करे।

कीदृशं स्वेदमाचरेदित्याह—

व्याधिव्याधितदेशर्तुवशान्मध्यवरावरम् ॥१२॥
कफार्तो रूक्षणं रूक्षो, रूक्षः स्निग्धं कफानिले।

स०—व्याध्यपेक्षया व्याधितापेक्षया देशापेक्षया ऋत्वपेक्षया धात्वपेक्षया च यथाविध एव मध्यममुत्कृष्टं हीनं वा स्वेदमाचरेत्। कफार्तः कफग्रस्तो रूक्षः सर्वंतर्बहिरस्निग्धो रूक्षणं न च स्निग्धं स्वेदमाचरेत्। अथ श्लेष्मवाते रूक्षस्निग्धं केनचिदंगेन रूक्षं केनचिदंगेन स्निग्धमेवंविधं स्वेदमाचरेत् ॥ १२ ॥

वि०—रोग, रोगी, देश और ऋतु की अपेक्षा से मध्यम, उत्कृष्ट या हीन स्वेद करना चाहिये। कफ से पीड़ित व्यक्ति अन्तः और बाह्य स्नेहन न करके रूक्ष स्वेद (रूक्ष द्रव्यों से) करे। कफ मिश्रित वायु में रूक्ष रह कर अर्थात् स्नेहन न करके स्निग्ध द्रव्यों से स्वेदन करे। तात्पर्य है कि कफव्याधि में बिना स्नेहन किए ही रूक्ष द्रव्यों से तथा कफयुक्त वायु में बिना स्नेहन किए ही किन्तु स्निग्ध द्रव्यों से स्वेदन करना चाहिए ॥ १२ ॥

आमाशयगते वायौ कफे पक्वाशयाश्रिते ॥१३॥
रूक्षपूर्वं तथा स्नेहपूर्वं स्थानानुरोधतः।

स०—आमाशयगते वात आदौ रूक्षः स्वेदः कार्यः पश्चात्स्निग्धः। तथा पक्वाशयगते कफ आदौ स्निग्धः स्वेदः पश्चाद्रूक्ष इत्यर्थः। कुत एवं नियम इत्याह। स्थानानुरोधतः स्थानवशात्। वायुर्यतः आमाशय आगंतुः स्थानं च तत् श्लेष्मणस्तद्वशात्तत्रादौ रूक्ष एव स्वेदो योऽयः पश्चात् स्निग्ध इति। कफश्च पक्वाशय आगंतुः। स्थानं च तद्वायोरतः पूर्वं स्वेदः पश्चाद्रूक्ष इति पूर्वोक्त एव न्यायो न्याय्यः। तथा चोक्तम्। तत्राऽन्यस्थानसंस्थेषु तदीयामिति। तथा। आगंतुं शमयेद्दोषं स्थानिनं प्रतिकृत्य वेति तस्मात्पूर्वं रूक्षेण स्थानिनं कफं प्रतिकृत्य पश्चादागंतुकस्य वायोः शमनं स्निग्धस्वेदाख्यं प्रयोऽयमिति। ननु वायोरामाशये कोपोऽनुपपन्नः। यतो मरुल्लघ्वादिगुणयुक्तः। आमाशयस्तु गुरुमृदुत्वादियुक्तः। अतः शम एवोपपन्न इति चेत्। एतच्चायुक्तम्। बलिनो ह्यन्याश्रयस्थयाऽपि कोपो युक्तः। मार्गरोधाच्च वायोरामाशयेऽपि प्रकोपः संभवतीति। तथाच वचपति। प्रायोऽनिलो रुद्धगतिः कुप्यत्यामाशये गत इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथा चोक्तम्। ते कालादिबलं लब्ध्वा कुप्यंत्यन्याश्रयेष्वपीति ॥ १३ ॥

स्थानभेद से स्वेदविधि—

वि०—वायु आमाशय में पहुँची हो तो प्रथम रूक्ष स्वेद करे और पीछे स्निग्ध स्वेद देवे। कफ पक्वाशय में हो तब पहले स्निग्ध सेक करना चाहिये और पीछे रूक्ष स्वेद करना चाहिये। यह नियम स्थान के विचार से है। आमाशय कफ का स्थान है इसलिये पहले वहाँ रूक्ष स्वेद तथा पक्वाशय वायु का स्थान है इसलिये पहले वहाँ स्निग्ध स्वेद करना चाहिये ॥ १३ ॥

अल्पं वङ्क्षणयोः स्वल्पं दृङ्मुष्कहृदये न वा ॥१४॥

स०—वंक्षणयोरल्पमेवेति योज्यम्। दृशोर्मुष्कयोर्हृदि चाऽत्यल्पम्। न वेति। अथवा दृगादिषु स्वेदं नाचरेदेव ॥१४॥

अवयवभेद से स्वेदविधि—

वि०—वंक्षण भाग पर थोड़ा स्वेद करना चाहिये। आँख, वृषण और हृदय पर बहुत ही थोड़ा स्वेद अथवा बिल्कुल नहीं करना चाहिये ॥ १४ ॥

शीतशूलक्षये स्विन्नो जातेऽङ्गानां च मार्दवे।
स्याच्छनैर्मृदितः स्नातस्ततः स्नेहविधिं भजेत् ॥१५॥

स०—शीतशूलयोः क्षये संजाते सत्यंगानां पाणिपादादीनां च मृदुत्वे जाते स्विन्नो नरः स्यात्। स च स्विन्नः शनैर्मृदितो संदमर्दितांगः स्नात उष्णोदकेनानंतरं स्नेहोक्तविधिमुष्णोदकोपचारी स्यादित्यादिकं भजेदिति ॥ १५ ॥

सम्यक् स्वेदित पुरुष का लक्षण और कर्तव्य—

वि०—सम्यक् स्विन्न का लक्षण—शीत और शूल का नाश हो जाने पर, पसीना आने पर तथा अङ्गों में कोमलता उत्पन्न हो जाने पर, शनैः शनैः अङ्गों का मर्दन करके, स्नान करके [गरम पानी से–'उष्णोदकोपचारी स्यात्']–स्नेह विधि में कहे नियमों का पालन करे ॥ १५ ॥

स्वेदस्य सम्यग्लक्षणमुक्त्वाऽतियोगलक्षणमाह—

पित्तास्रकोपतृण्मूर्च्छास्वराङ्गसदनभ्रमाः।
सन्धिपीडा ज्वरः श्यावरक्तमण्डलदर्शनम् ॥१६॥
स्वेदातियोगाच्छर्दिश्च तत्र स्तम्भनमौषधम्।
विषक्षाराग्न्यतीसारच्छर्दिमोहातुरेषु च ॥१७॥

स०—स्वेदस्याऽतियोगाद्रक्तपित्तकोपादयो भवंति छर्दिश्च। मूर्च्छा मोहः। स्वरांगयोः सदनेन संबंधः। भ्रमोऽज्ञानम्। श्यावानि च रक्तानि च श्यावरक्तानि। तत्र तेषु स्तंभनमौषधं कार्यम्। तथा विषाद्यातुरेष्वपि स्तंभनमेवौषधं न्याय्यमित्यर्थः ॥ १६–१७ ॥

अतिस्वेद से उपद्रव तथा उसमें कर्तव्य—

वि०—अतिस्विन्न के लक्षण—अतिस्वेदन से पित्त एवं रक्त का कुपित होना, प्यास, मूर्च्छा, स्वर का बैठना, अंगों की शिथिलता, चक्कर आना, सन्धिपीड़ा, ज्वर, काले और लाल चकत्तों का दिखाई देना और वमन होता है। इसमें स्तम्भन औषध देनी चाहिये। विष, क्षार, अग्नि, कफ, अतिसार, वमन और मोह के रोगियों में भी स्तम्भन हितकारक होता है ॥ १६–१७ ॥

स्वेदनं गुरु तीक्ष्णोष्णं प्रायः, स्तम्भनमन्यथा।
द्रवस्थिरसरस्निग्धरूक्षसूक्ष्मं च भेषजम् ॥१८॥
स्वेदनं, स्तम्भनं श्लक्ष्णं रूक्षसूक्ष्मसरद्रवम्।
प्रायस्तिक्तं कषायं च मधुरं च समासतः ॥१९॥

स०—गुरु यद्द्रव्यं तीक्ष्णमुष्णं च तद्बाहुल्येन स्वेदनं भवति। प्रायोग्रहणात् भयशोकादिकमगुर्वपि गृह्यते। अन्यथाऽतो वैपरीत्येन स्तंभनं भवति। द्रवादिगुणयुक्तं यत्तद् द्रव्यं स्वेदनं भवति। तथा श्लक्ष्णादियुक्तं तत् स्तंभनं भवति। अधुना रसतः स्तंभनं निर्दिशन्नाह—प्रायः समासतः संक्षेपेण तिक्तं कषायं च मधुरं च स्तंभनं भवति ॥१८–१९॥

स्वेदन तथा स्तम्भन औषधियाँ—

वि०—प्रायः करके गुरु, तीक्ष्ण और उष्ण औषध स्वेदन होती है। इससे विपरीत लघु, मन्द और शीत औषध स्तम्भन होती है। द्रव, स्थिर, सर, स्निग्ध, रूक्ष और सूक्ष्म औषध स्वेदन होती है। श्लक्ष्ण, रूक्ष, सूक्ष्म, सर, द्रव, तिक्त, कषाय और मधुर औषध सामान्यतः स्तम्भन होती है ॥ १८–१९ ॥

स्तंभितस्य लक्षणमाह—

स्तम्भितः स्याद् बले लब्धे यथोक्तामयसङ्क्षयात्।

स०—बले लब्धे जाते सति यथोक्तानां रोगाणां च संक्षयात्स्तंभितो नरः स्यात।

स्तम्भित के लक्षण—

वि०—स्तम्भित का लक्षण—बल (शक्ति) उत्पन्न हो जाने पर तथा कहे हुए स्तम्भनसाध्य रोगों के नाश होने से स्तम्भन हुआ जानना चाहिये।

अतिस्तंभितं लक्षयति—

स्तम्भत्वक्स्नायुसङ्कोचकम्पहृद्वाग्घनुग्रहैः ॥२०॥
पादौष्ठत्वक्करैः श्यावैरतिस्तम्भितमादिशेत्।

स०—त्वक् च स्नायुश्च तयोः संकोचः। हृदयादीनां ग्रहेण संबंधः। ततः स्तंभादीनां द्वंद्वः। स्तंभादिभिस्तथा श्यावैः पादादिभिरतिस्तंभितं कथयेत् ॥ २० ॥

अतिस्तम्भित के लक्षण—

वि०—अतिस्तम्भित के लक्षण—शरीर में जड़ता, त्वचा और स्नायु का संकोच, कम्पन; हृदय, वाणी और हनु का जकड़ जाना, पैर, ओठ, त्वचा और हाथ का काला पड़ जाना ये अतिस्तम्भित के लक्षण हैं ॥ २० ॥

न स्वेदयेदतिस्थूलरूक्षदुर्बलमूर्च्छितान् ॥२१॥
स्तम्भनीयक्षतक्षीणक्षाममद्यविकारिणः।
तिमिरोदरवीसर्पकुष्ठशोषाढ्यरोगिणः ॥२२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पीतदुग्धदधिस्नेहमधून् कृतविरेचनान् ।
भ्रष्टदग्धगुदग्लानिक्रोधशोकभयार्दितान् ॥२३॥
क्षुत्तृष्णाकामलापाण्डुमेहिनः पित्तपीडितान् ।
गर्भिणीं पुष्पितां सूतां मृदु चात्ययिके गदे ॥२४॥

स०—अतिस्थूलादीन्न स्वेदयेत्। अतिस्थूलस्य स्वेदेन मेदोविलयनादत्यंतं शरीरक्षोभः स्यात्। रूक्षादीनां च कार्श्यमिति। आढ्यरोगो वातरक्तम्। भ्रष्टदग्धगुदोऽतिसारक्षाराग्न्यादिभिः। ग्लान्यादीनामन्वितेन संबंधः। क्षुदादीनां मेहांतानां द्वंद्वः। क्षुद्वतः स्वेदादत्यंतं देहग्लानिः। कामलापाण्डुमतोः स्वेदेन पित्तवृद्ध्या रोगवृद्धिः। पित्तप्रधानस्य स्वेदाद्रोगवृद्धिः। गर्भिण्याः स्वेदेन गर्भव्यापत्। पुष्पिताया रक्तातिप्रवृत्तिः। सूतायाः कार्श्यम्। मृदु चेति। यदैषामतिस्थूलादीनामात्यंतिको व्याधिर्विसूचिकादिः स्यात्तदैते मृदु स्वेदयितव्याः॥ २१-२४॥

अस्वेद्य रोगी—

वि०—स्वेदन के अयोग्य—अतिस्थूल, अतिरूक्ष, अतिदुर्बल, मूर्छित, स्तम्भन के योग्य, क्षतक्षीण, कृश, मद्य के विकार वाले, तिमिर, उदर, वीसर्प, कुष्ठ, शोष एवं आढ्यवात रोगियों को, जिन्होंने दूध, दही, स्नेह या मधु पिया हो, जिन्होंने विरेचन लिया हो, गुदा स्थानच्युत हो गई या जल गई हो, ग्लानि, शोक, क्रोध, भय से पीड़ित, भूख, प्यास, कामला, पाण्डु, प्रमेह तथा पित्त से पीड़ित, गर्भवती, ऋतुमती और प्रसूता को स्वेद अनिवार्य हो तो मृदुकोमल स्वेद देवे॥ २१-२४॥

श्वासकासप्रतिश्यायहिध्माध्मानविबन्धिषु ।
स्वरभेदानिलव्याधिश्लेष्मामस्तम्भगौरवे ॥२५॥
अङ्गमर्दकटीपार्श्वपृष्ठकुक्षिहनुग्रहे ।
महत्त्वे मुष्कयोः खल्ल्यामायामे वातकण्टके ॥२६॥
मूत्रकृच्छ्रार्बुदग्रन्थिशुक्राघाताढ्यमारुते ।
स्वेदं यथायथं कुर्यात्तदौषधविभागतः ॥२७॥

स०—श्वासादिमत्सु यथास्वं स्वेदं कुर्यात्। क्वचित्तापं क्वचिदुपनाहं क्वचिदूष्माणं क्वचिद्द्रवमिति। कथम्। तेष्वौषधानि तदौषधानि तेषां विभागो यथास्वमुपयोगस्तेन तदौषधविभागेन स्वेदं कुर्यात्। खल्ली तीव्ररुजान्वितेति वातव्याधौ वक्ष्यते। आयामवातकंटकौ च। आढ्यमारुत ऊरुस्तंभः॥ २५-२७॥

स्वेद से साध्य रोग—

वि०—स्वेदसाध्य रोग—श्वास, कास, प्रतिश्याय, हिक्का, आध्मान, विबन्ध, स्वरभेद, वातव्याधि, कफ रोग, आम रोग, स्तम्भ (जड़ता), भारीपन, अङ्गमर्द, कटिग्रह, पृष्ठग्रह, पार्श्वग्रह, कुक्षिग्रह और हनुग्रह में तथा अण्डवृद्धि; खल्ली, आयाम, वातकण्टक, मूत्रकृच्छ्र, अर्बुद, ग्रन्थि, शुक्राघात और आढ्यवात रोगों में—इन रोगों की औषध की दृष्टि से जैसा योग्य हो वैसा तापस्वेद, उपनाहस्वेद, ऊष्मास्वेद या द्रवस्वेद जो उचित हो वह करना चाहिए। ॥ २५-२७॥

स्वेदो हितस्त्वनाग्नेयो वाते मेदःकफावृते ।
निवातं गृहमायासो गुरुप्रावरणं भयम् ॥२८॥
उपनाहाहवक्रोधा भूरिपानं क्षुधाऽऽतपः ।

स०—मेदःकफाभ्यां पवन आवृते सत्यनाग्नेयः स्वेदो हितः। कोऽसावनाग्नेय इत्याह—निवातगृहादयोऽनाग्नेयाः स्वेदाः। आयासो व्यायामः। गुरुप्रावरणं रल्लकादि। भयं खड्गहस्तराजपुरुषदर्शनादिना। उपनाहोऽप्यनाग्नेयः स्वेदः। उपनाहस्य द्वैविध्यात्। तत्रोपनाहो वचाकिण्वेत्यादिराग्नेयः। तत्र तापोऽग्नितप्तवसनेत्यनुवृत्तेः। अनाग्नेयस्तु स्निग्धोष्णवीर्यैर्मृदुभिश्चर्मपट्टैरित्यादिकः। आहवः समरः। भूरिपानं बहुमद्यपानम्॥ २८॥

अग्निरहित स्वेद—

वि०—वायु के मेद और कफ से आवृत होने पर अनाग्नेय (अग्निरहित) स्वेद उत्तम है। इसके लिये वायुरहित घर में रहना, परिश्रम करना, भारी ओढ़ना, भय उत्पन्न करना, उपनाह (गरम चमड़े आदि की पट्टी से बाँधना मात्र), कुश्ती आदि युद्ध, क्रोध, अतिमद्यपान तथा भूख (उपवास) और धूप अग्निरहित स्वेद है॥ २८॥

स्नेहक्लिन्नाः कोष्ठगा धातुगा वा
स्रोतोलीना ये च शाखास्थिसंस्थाः।
दोषाः स्वेदैस्ते द्रवीकृत्य कोष्ठं
नीताः सम्यक् शुद्धिभिर्निर्ह्रियन्ते ॥ २९॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने स्वेदविधिर्नाम सप्तदशोऽध्यायः॥ १७॥

स०—ते दोषाः सम्यक् सुष्ठु शुद्धिभिर्वमनविरेचनलक्षणाभिर्निर्ह्रियंते निष्कास्यंते। के दोषा इत्याह। स्नेहक्लिन्ना ये तथा कोष्ठगा धातुस्थाश्च स्रोतोलीनास्तथा शाखास्वस्थिषु च स्थिताः। किंभूताः। स्वेदैर्द्रवीकृत्य कोष्ठं नीता उदरं प्रापिता इति॥ २९॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां स्वेदप्रकरणं नाम सप्तदशोऽध्यायः॥ १७॥

स्वेदन का प्रधान कार्य—

वि०—स्नेह से क्लिन्न हुए, कोष्ठ में या धातु में पहुँचे, अथवा स्रोतों में छिपे या शाखा एवं अस्थि में आश्रित दोष स्वेदन क्रिया से द्रवीभूत होकर कोष्ठ में आ जाते हैं और कोष्ठ में से शोधन क्रिया द्वारा (जिसका वर्णन अगले अध्याय में होगा) भली प्रकार बाहर निकाले जा सकते हैं॥ २९॥

वक्तव्य—स्वेदन का फल—'अग्नेर्दीप्तिर्मार्दवं त्वक्प्रसादं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भक्तश्रद्धां स्रोतसां निर्मलत्वम्। कुर्यात्स्वेदो जाड्यतन्द्रापहारं स्तब्धान् सन्धींश्चेष्टयत्याशु चास्य ॥' संग्रह।

इस प्रकार विद्योतिनी टीका में स्वेदविधिनामक सत्रहवाँ अध्याय समाप्त हुआ ॥ १७ ॥

अष्टादशोऽध्यायः

शुद्धिभिर्निर्दिष्टयंत इत्युक्तं कारताः शुद्धय इति शुद्ध्यर्थं वमनविरेचनाधिकारः—

अथातो वमनविरेचनविधिमध्यायं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः॥

स०—अथाऽत इत्यादि। वमनं च विरेचनं च तयोर्विधिः। शेषं पूर्ववत्।

वि०—अब इसके आगे विरेचनविधि नामक अध्याय का व्याख्यान करेंगे जैसा कि आत्रेय आदि महर्षियों ने कहा था।

तत्र वमनविधिमाह—

कफे विदध्याद्वमनं संयोगे वा कफोल्बणे।

तद्वद्विरेचनं पित्ते विशेषेण तु वामयेत्॥ १॥

नवज्वरातिसाराधःपित्तासृग्राजयक्ष्मिणः।

कुष्ठमेहापचीग्रन्थिश्लीपदोन्मादकासिनः॥ २॥

श्वासहृल्लासवीसर्पस्तन्यदोषोर्ध्वरोगिणः।

स०—श्लेष्मणि वमनं कुर्यात्। अत्र पूर्वं वमनकथनं विरेच्यते मंदकफस्तु सम्यगिति प्रतिपादनार्थम्। संयोगे च कफादिके वमनं कुर्यात्। पित्ते विरेचनं तद्वत् यथा कफे कफाधिकेऽके वा संयोगे च वमनं तथैव पित्ते पित्ताऽधिके वा संयोगे विरेचनं कुर्यादिति तद्वच्छब्दस्यार्थः। विशेषेण पुनर्नवज्वराऽतिसारादीनूर्ध्वरोगपर्यन्तान्वामयेत्॥ १-२॥

वमन-विरेचनकाल तथा वमनीय रोगी--

वि०—कफ में या कफप्रधान संयोग में वमन करे, उसी प्रकार पित्त में या पित्तप्रधान संयोग में विरेचन करे। वमन के विषय-विशेष करके नवज्वर, अतिसार, अधोगामी रक्तपित्त, राजयक्ष्मा, कुष्ठ, प्रमेह, अपची, ग्रन्थि, श्लीपद, उन्माद, कास, श्वास, हृल्लास, वीसर्प, स्तन्यदोष तथा जत्रु से ऊपर के रोगों में वमन करावे। क्योंकि ये रोग वमन से ही नष्ट होते हैं, यथा—'विषपीत···पाण्डुरोगाः दोषभेदीयोक्ताश्च श्लेष्मव्याधयः, एते परं वमनेन नाशमुपयान्ति सलिलापगमादनिष्पन्नशाश्यादिवत्॥' संग्रह (सू. अ. २७) ॥ १-२ ॥

अवाम्या गर्भिणी रूक्षः क्षुधितो नित्यदुःखितः॥ ३॥

बालवृद्धकृशस्थूलहृद्रोगिक्षतदुर्बलाः।

प्रसक्तवमथुप्लीहतिमिरक्रिमिकोष्ठिनः॥ ४॥

ऊर्ध्वप्रवृत्तवाय्वस्रदत्तबस्तिहतस्वराः।

मूत्राघात्युदरी गुल्मी दुर्वमोऽत्यग्निरर्शसः॥ ५॥

उदावर्तभ्रमाष्ठीलापार्श्वरुग्वातरोगिणः।

ऋते विषगराजीर्णविरुद्धाभ्यवहारतः॥ ६॥

स०—गर्भिण्यादयो वातरोगान्ता अवम्याः। अर्शांसि विद्यंते यस्य सोऽर्शसः। अर्शआदिभ्यश्चेत्यच्। तत्र गर्भिण्या वमनाद्गर्भव्यापद्गर्भभ्रंशश्च। क्षुधितस्य च वायुना क्षपितशरीरत्वाद्बलक्षयः स्यात्। बालादीनामौषधबलाक्षमत्वाद्बलोपरोधः स्यात्। हृद्रोगादीनां हृदयोपरोधः। प्रसक्तच्छर्दं नानामुदानो वायुरुत्क्षिप्य प्राणानपि हिंस्यात्। एवमन्यत्राऽपि रोगोद्गमश्चिंत्यः। किं सर्वदैव गर्भिण्यादयोऽवम्या उत कस्यांचिदवस्थायां वम्या इत्याह—विषाद्यभ्यवहारमंतरेण विषाद्यभ्यवहारे तु वम्याते एवै ॥ ३-६ ॥

वमन के अयोग्य रोगी—

वि०—वमन के अयोग्य—गर्भवती, रूक्ष, भूखा, सदा दुःखी, बालक, वृद्ध, कृश, स्थूल, हृद्रोगी, उरःक्षत से दुर्बल, जिसे वमन निरन्तर हो रहा हो, प्लीहा एवं तिमिररोगी, जिसके कोष्ठ में क्रिमि बहुत हों, जिसे ऊर्ध्ववात हो या मुख, नासिका आदि से रक्त जाता हो, जिसको वस्ति दी गयी हो, स्वर बैठ गया हो, मूत्राघात रोगी, उदररोगी, गुल्मरोगी, ठीक प्रकार से जिसको वमन न होता हो, अत्यग्नि, अर्शरोगी, उदावर्त्त, भ्रम, अष्ठीला, पार्श्वशूल तथा वातरोगी इनको वमन नहीं देना चाहिये, किन्तु विषपान, गर विष, अजीर्ण और विरुद्ध भोजन की अवस्था में इनको भी वमन करना चाहिये ॥ ३-६ ॥

प्रसक्तवमथोः पूर्वं प्रायेणामज्वरोऽपि च।

धूमान्तैः कर्मभिर्वर्ज्याः, सर्वैरेव त्वजीर्णिनः॥ ७॥

स०—प्रसक्तवमथोः पूर्वस्थिता एकादशातुरा दुर्बलांतास्तथाऽऽमज्वरिणश्च ते सर्वे धूमांतैः कर्मभिर्वर्ज्या न केवलं वमनेनैव। धूमग्रहणं गंडूषादिकर्मणोऽपि परिहारार्थम्। प्रायोग्रहणमष्टमासाया गर्भिण्या निरूहा न वर्ज्या इति सूचनार्थं तथा सद्योभुक्तस्य ज्वरितस्य सतो वमनानुज्ञानार्थम्। तु पुनरजीर्णिनः पुरुषा वमनादिभिर्गंडूषादिभिश्च वर्ज्याः। सद्योऽजीर्णिनां हि वमनमनुज्ञातमेव॥ ७॥

वमनादि के अयोग्य रोगी—

वि०—गर्भवती से लेकर दुर्बल पर्यन्त प्रसक्त वमथु से पूर्व गिने हुए ग्यारह व्यक्तियों में तथा आमज्वरी में भी विरेचन, वस्ति, नस्य और धूम ये कर्म (शोधन) प्रायः नहीं करने चाहिये। अजीर्ण रोगी में-सभी कार्यों का—विरेचन, बस्ति, नस्य, धूम, गण्डूष, अञ्जन का—निषेध है॥७॥

वक्तव्य—प्रायः शब्द से अष्टमास वाली गर्भवती को निरूह दे सकते हैं, यथा—'नवमे तु खल्वेनां मासे मधुरौषधसिद्धेन तैलेनानुवासयेत्॥' चरक शा. अ. ८।३२। इसी प्रकार सद्योभुक्त ज्वर में वमन विधेय है। अजीर्ण रोगी को भी वमन नहीं करवाना चाहिये यह अरुणदत्त का मत है, यथा 'अजीर्णिनः पुरुषाः सर्वैरेव वमनादिभिर्गण्डूषादिभिश्च वर्ज्याः॥'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किन्तु सद्यः अजीर्ण में वमन कराना उन्होंने भी ठीक माना है, यथा--अत्रापि प्रायोग्रहणमनुवर्तते। सद्योऽजीर्णिनां हि वमनमनुज्ञातमेव।' परन्तु हेमाद्रि के मत से अजीर्णी को विरेचन से लेकर गण्डूष तक के कार्य निषिद्ध है-वमन विधेय है—इसके लिये संग्रह का प्रमाण है-'अजीर्णे तु सर्वैरेव वमनवर्ज्यैरामदोषभयात, नवज्वरैश्च दोषस्तम्भयात्।' यह पाठ दिया है।

विरेकसाध्या गुल्मार्शोविस्फोटव्यङ्गकामलाः।
जीर्णज्वरोदरगरच्छर्दिप्लीहहलीमकाः ॥ ८॥
विद्रधिस्तिमिरं काचः स्यन्दः पक्वाशयव्यथा।
योनिशुक्राश्रया रोगाः कोष्ठगा कृमयो व्रणाः॥ ९॥
वातास्रमूर्ध्वगं रक्तं मूत्रघातः शकृद्ग्रहः।
वाम्याश्च कुष्ठमेहाद्याः—

स०—विरेकेण साध्या उपक्रम्या गुल्मादयः शकृद्ग्रहपर्यंताः। पक्वाशये व्यथा पक्वाशयव्यथा। वम्याश्चेति चः समुच्चये। ये च कुष्ठाद्या ऊर्ध्वरोगपर्यंता वमनार्हा उक्तास्ते च विरेच्याः॥ ८-९॥

विरेचन से साध्य रोग—

वि०—विरेचन के विषय—गुल्म, अर्श, विस्फोट, व्यङ्ग, कामला, जीर्णज्वर, उदर, गर, वमन, प्लीहा, हलीमक, विद्रधि, तिमिर, काच (नेत्ररोग), अभिष्यन्द, पक्वाशय रोग, योनि रोग, शुक्र रोग, कोष्ठगत रोग, कृमि रोग, व्रण, वातरक्त, ऊर्ध्वगामी रक्तपित्त, मूत्राघात, शकृद्ग्रह (मलावरोध) तथा कुष्ठमेह, से लेकर 'ऊर्ध्वरोगिणः' शब्द तक जितने वमन के योग्य गिने हैं, वे सब रोग विरेचनसाध्य हैं—(क्योंकि-'एते हि परं विरेचनेन नाशमुपयान्ति, अग्न्यपनयनेनाग्निगृहतापवत्॥' संग्रह सू. अ. २७) ॥ ८-९॥

—न तु रेच्या नवज्वरी ॥ १०॥
अल्पाग्न्यधोगपित्तास्रक्षतपाय्वतिसारिणः ।
सशल्यास्थापितक्रूरकोष्ठातिस्निग्धशोषिणः ॥११॥

स०—न तु रेच्य इति। तुरवधारणे। नवज्वरी नैव रेच्यः तस्य हि विरेचनमपक्वान् दोषान् निर्हरद्वातकोपायैव स्यात्। यक्ष्मादीनां स्ववस्थावशान्मृदुविरेच्यत्वमनुज्ञातमेव तथाऽपि चाऽऽध्मानगुरुताशूलस्तैमित्यकारिणीत्यादिनाऽतीसारस्याऽपि मृदुविरेचनमनुज्ञातं नैवं नवज्वरस्य स्वल्पविरेच्यत्वं कदाऽपि। अल्पाग्न्यादयः शोष्यंता न विरेच्याः। तत्राऽल्पाग्निरबलत्वाद्भेषजवेगं न सहते। अधोगरक्तपित्ताऽतिसारिणावतिप्रवृत्त्या हन्यात्। क्षतपायोः प्राणापहारकारिणी रुक् स्यात्। सशल्यस्य क्षते वायुराश्रितो जीवितं हन्यात्। आस्थापितस्य भेषजवेगासहनाद्बलोपरोधः स्यात्। क्रूरकोष्ठस्यौषधाद्धेतोर्दोषा ह्यप्रवर्तमाना हृदयशूलपर्वभेदाऽऽनाहच्छर्दिमूर्च्छाक्लमान् जनयित्वा प्राणान् हन्युः अतिस्निग्धस्याऽतियोगाय स्यात्। शोषिणः क्षीणधातुतया मलबलत्वं तदभावाद्देहविनाशनं स्यादिति॥ १०-११॥

विरेचन के अयोग्य रोगी—

वि०—विरेचन के अयोग्य—नवज्वर रोगी, कल्पाग्नि, अधोगामिरक्तपित्त-रोगी, क्षतगुद, अतीसार एवं शल्य युक्त रोगी जिसे निरूह दिया हो, क्रूरकोष्ठ, अतिस्निग्ध एवं राजयक्ष्मा रोगी-इनको विरेचन नहीं देवे॥ १०-११॥

वक्तव्य—राजयक्ष्मा एवं अतिसार में मृदु विरेचन अवस्था भेद से विधेय है-यथा-अतिसार में 'कृच्छ्रे वा वहतां दद्यादभयां संप्रवर्त्तनीम्-' चरक चि. अ. १९।१७ तथा—'बलिनो बहुदोषस्य स्निग्धस्विन्नस्य शोधनम्। ऊर्ध्वाधोयक्ष्मिणः कुर्यात् सस्नेहं यन्न कर्षणम्॥' अ. हृ. चि. अ. ५।

अथ साधारणे काले स्निग्धस्विन्नं यथाविधि।
श्वोवम्यमुत्क्लिष्टकफं मत्स्यमाषतिलादिभिः ॥१२॥
निशां सुप्तं सुजीर्णान्नं पूर्वाह्णे कृतमङ्गलम्।
निरन्नमीषत्स्निग्धं वा पेयया पीतसर्पिषम् ॥१३॥
वृद्धबालाबलक्लीबभीरून् रोगानुरोधतः।
आकण्ठं पायितान्मद्यं क्षीरमिक्षुरसं रसम् ॥१४॥
यथाविकारपिहितां मधुसैन्धवसंयुताम्।
कोष्ठं विभज्य भैषज्यमात्रां मन्त्राभिमन्त्रिताम् ॥१५॥
'ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः ।
ऋषयः सौषधिग्रामा भूतसङ्घाश्च पान्तु वः ॥१६॥
रसायनमिवर्षीणाममराणामिवामृतम् ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥१७॥
ओं नमो भगवते भैषज्यगुरवे वैडूर्यप्रभराजाय।
तथागतायार्हते सम्यक्सम्बुद्धाय तद्यथा।
ॐ भैषज्ये भैषज्ये महाभैषज्ये समुद्गते स्वाहा॥'
प्राङ्मुखं पाययेत्—

स०—एतत पूर्वोक्तं वम्यावम्यत्वमवगम्याऽनंतरं साधारणे श्रावणादौ काले यथाविधि स्नेहस्वेदाध्यायोदितेन क्रमेण स्निग्धस्विन्नमातुरं भैषज्यमात्रां प्राङ्मुखं पाययेदिति वक्ष्यमाणेन संबंधः। श्वोवम्यं प्रातर्वमनार्हम्। वम्यमित्यर्हे कृत्यतृचश्चेत्यर्हार्थे पोरदुपधादिति यत्। उत्क्लिष्टः स्थानाच्चलितः कफो यस्य तमुत्क्लिष्टकफम्। कैः। मत्स्यादिभिः। अंतर्भावितण्यर्थोऽत्र। उत्क्लेशितकफमित्यर्थः। तथा रात्रिं सुप्तम्। कालाध्वनोरिति द्वितीया। अत एव सकलनिशास्वापोऽत्र लक्ष्यते। सुष्ठु जीर्णमन्नमाहारो यस्य तम्। कदा पाययेत्। प्रातः काले। किंभूतम्। कृतं मंगलं स्वस्त्ययनादि यस्य तम्। कृतमंगलमित्युपलक्षणार्थम्। कृतदेवद्विजाग्निगुरुवृद्धार्चनमपीति द्रष्टव्यम्। तथा निरन्नमकृताहारमातुरवशात् किंचित्स्निग्धम्। कथमित्याह। पेयया पीतसर्पिषम्। वृद्धेत्यादि। अथ असौ वृद्धो वा बालो वा दुर्बलो वा क्लीबः खेदासहिष्णुर्वा भवति भीरुर्वा कातरो भवति। तदा रोगानुरोधादाकंठमतिमात्रं मद्यक्षीरादिकं पाययेत्तदनंतरं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भैषज्यमात्रां पाययत्। संग्रहेऽप्युक्तम्। भीरुकृशबालसुकुमारत्वाद्दोषानुरोधेनाऽऽकंठं पीतयूपेक्षुरसक्षीरमांसरसमद्यतुषोदकयवागूमंडान्यतममिति किंभूतां मात्राम्। यथाविकारविहितां रोगानुसारेण साधितां तथा मधुसैंधवाभ्यां युताम्। किं कृत्वा। कोष्ठं मृदुमध्यक्रूरलक्षणं विभज्य विचार्य। श्लेष्माधिक्येन मृदुत्वं श्लेष्ममध्यत्वेन मध्यत्वं श्लेष्महीनत्वेन क्रूरत्वमिति मानं कोष्ठस्य बोध्यम्। तथा चोक्तम्। श्लेष्मोत्तरं छर्दयते ह्यदुःखमिति। भैषज्यमात्रां किंभूताम्। मंत्राभिमंत्रिताम्। तानेव मंत्रानाह। ब्रह्मेत्यादिग्रंथेन॥ १२-१७॥

वमन की विधि—

वि०—वमन विधि—प्रावृट् आदि साधारण ऋतु में विधिपूर्वक स्नेहन और स्वेदन करके जिसे कल वमन कराना है उसे एक दिन पूर्व ही मछली, उड़द, तिल आदि कफ को उत्क्लिष्ट करने वाले पदार्थ खिलाये। फिर सारी रात आराम से सोने पर तथा अन्न को भली प्रकार जीर्ण हुआ जानकर प्रातःकाल में स्वस्ति-पाठ कराये। भोजन दिये बिना, अथवा पेया के साथ भी पिलाकर कुछ स्नेहन कर तथा यदि वृद्ध, बालक, निर्बल, नपुंसक और डरपोक हो तो रोग के अनुसार मद्य, दूध, गन्ने का रस अथवा मांसरस को गले तक पिला कर रोग के अनुसार बनाई औषध मात्रा में मधु एवं सेंधा नमक मिलाकर, नीचे लिखे मन्त्र से अभिमन्त्रित करके—मृदु, मध्य एवं कठिन कोष्ठ को समझकर पिलाये।

मन्त्रार्थ—ब्रह्मा, दक्ष, अश्विनी, रुद्र, इन्द्र, पृथिवी, चन्द्रमा, सूर्य, वायु, अग्नि, ऋषि, सम्पूर्ण ओषधि-समूह और भूत-समूह तुम्हारी रक्षा करें। ऋषियों के लिये जैसे रसायन, देवताओंके लिये जैसे अमृत और उत्तम नागों के लिये जैसे सुधा है, वैसे तुम्हारे लिये यह औषध हो। भैषज्य के गुरु, वैडूर्य के समान कान्ति वाले, भगवान् तथागत अर्हत जो भली प्रकार ज्ञान वाले हैं उनको नमस्कार है।

ओं भैषज्ये भैषज्ये—प्रत्येक औषधि में समुद्गते-विशेष-रूप में प्राप्त, महाभैषज्ये! विशिष्ट शक्ति! तुम्हें स्वाहाकार है।

इस मंत्र से अभिमंत्रित करके औषध को पिलाये, पिलाते समय रोगी का मुख पूर्व दिशा में रक्खे॥ १२-१७॥

—पीतो मुहूर्तमनुपालयेत्।
तन्मना जातहृल्लासप्रसेकश्छर्दयेत्ततः ॥१८॥
अङ्गुलिभ्यामनायस्तो नलेन मृदुनाऽथवा।
गलताल्वरुजन् वेगानप्रवृत्तान् प्रवर्तयन् ॥१९॥
प्रवर्तयन् प्रवृत्तांश्च जानुतुल्यासने स्थितः।
उभे पार्श्वे ललाटं च वमतश्चास्य धारयेत् ॥२०॥
प्रपीडयेत्तथा नाभिं पृष्ठं च प्रतिलोमतः।

स०—भैषज्यमात्रां पीतं संतमातुरं मुहूर्तं तन्मना वमिगतचित्तोऽनुपालयेत् प्रतीक्षेत। ततोऽनंतरं संजातहृल्लासप्रसेकः सन् छर्दयेत्। हृल्लासो हृदुपरोधः। प्रसेको निष्ठीवनम्। कथं वमेत्। अंगुलिभ्यां द्वाभ्याम्। यद्वा कोमलेन सुवर्चलैरंडादिजेन नालेन मृदुना वमेत्। कीदृशः अनायस्तोऽनायासेनेत्यर्थः। अपरं गलताल्वपीडयन् तथाऽप्रवृत्तान् वेगान् प्रेरयन् प्रवृत्तांश्च प्रवर्तयन्। जानुप्रमाणे पीठे स्थितः। अपरमस्य नरस्य वमनं कुर्वतो द्वे पार्श्वे ललाटं च धारयेत्। परिचारक इति शेषः। प्रतिलोमतोऽसन्मार्गेण॥ १८-२०॥

वि०—औषध की मात्रा पीकर रोगी वमन में मन को लगाकर कुछ देर प्रतीक्षा करे।

जी मिचलाना और मुख से लाला-स्राव आरम्भ होने पर वमन करे। बिना किसी मेहनत के दो अंगुलियों से, एरण्ड या कमल आदि कोमल नाल से गले और तालु में किसी प्रकार की पीड़ा न पहुँचाये हुए अप्रवृत्त वेगों को प्रवृत्त करे। और जो प्रवृत्त हो रहे हैं उनको भी प्रवृत्त करता हुआ घुटनों के बराबर ऊँचे आसन पर स्थित होकर बैठ जाये। दूसरा सहायक इसके वमन करते समय दोनों पार्श्व और माथे को पकड़े रहे और नाभि तथा पीठ को प्रतिलोम रूप में (नीचे से ऊपर) दबाये॥ १८-२०॥

कफे तीक्ष्णोष्णकटुकैः पित्ते स्वादुहिमैरिति ॥२१॥
वमेत् स्निग्धाम्ललवणैः संसृष्टे मरुता कफे।
पित्तस्य दर्शनं यावच्छेदो वा श्लेष्मणो भवेत् ॥२२॥

स०—कफे तीक्ष्णोष्णकटुकैर्द्रव्यैर्वमेत्। पित्ते स्वादुशीतैर्द्रव्यैर्वमेत्। स्निग्धाम्ललवणैर्वायुयुक्ते कफे वमेत्। कियंतं कालं वमेदित्याह। यावत् पित्तस्य दर्शनं कफांतो वा तावद्वमेत्॥ २१-२२॥

दोषानुसार वमन के द्रव्य—

वि०—दोष भेद से वमन द्रव्य—तीक्ष्ण, उष्ण और कटु द्रव्यों से कफ में; मधुर व शीतल द्रव्यों से पित्त में, स्निग्ध, अम्ल और लवण द्रव्यों से वायु मिश्रित कफ में वमन कराये।

पित्त का आना आरम्भ होने अथवा कफ की समाप्ति दीखने तक वमन कराये॥ २१-२२॥

हीनवेगः कणाधात्रीसिद्धार्थलवणोदकैः।
वमेत्पुनः पुनः—

स०—हीनवेगो नरः कणाधात्रीसिद्धार्थलवणोदकैरसकृद्वमेत्।

हीनवेग गमन में कर्तव्य—

वि०—जिस रोगी को वमन पूरी तरह न हुआ हो, वह पिप्पली, आँवला, सरसों और नमक के पानी से बार-बार वमन करे।

—तत्र वेगानामप्रवर्तनम् ॥२३॥
प्रवृत्तिः सविबन्धा वा केवलस्यौषधस्य वा।
अयोगस्तेन निष्ठीवकण्डूकोठज्वरादयः ॥२४॥

स०—तत्र तेषु सम्यग्योगाऽतियोगायोगेषु मध्याद्वेगानामप्रवर्तनमसावयोगः। सविबंधा च या प्रवृत्तिः सोऽप्य-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योगः। केवलस्य दोषादिरहितस्यौषधस्य या प्रवृत्तिः सोऽप्ययोगः। तेनाऽयोगेन निष्ठीवनादयः स्युः ॥ २३-२४ ॥

अयोग का लक्षण—

वि०—वमन वेगों की प्रवृत्ति न होना, या रुकावट के साथ वेगों का प्रवृत्त होना, या अकेली औषध का ही बाहर आना अयोग है। इससे थूक का आना (जी मचलाना), कण्डू कोठ, ज्वर आदि होते हैं ॥ २३-२४ ॥

निर्विबन्धं प्रवर्तन्ते कफपित्तानिलाः क्रमात्।
(मनःप्रसादः स्वास्थ्यं चावस्थानं च स्वयं भवेत्।
वैपरीत्यमयोगानां न चातिमहती व्यथा ॥ १ ॥)
सम्यग्योगे—

स०—सम्यग्योगे कफपित्ताऽनिलाः क्रमेण निर्विबंधं निःसंगं प्रवर्तंते।

सम्यग्योग का लक्षण—

वि०—वमन—के सम्यक् योग होने से क्रमशः कफ, पित्त और वायु बिना रुकावट के प्रवृत्त होते हैं। [मन की प्रसन्नता, स्वस्थता और वेगों का स्वयं बन्द हो जाना; यह सम्यग् योग का लक्षण है। अयोग में इससे विपरीत लक्षण होते हैं; तथा बहुत पीड़ा नहीं होती ॥ ११ ॥]

—अतियोगे तु फेनचन्द्रकरक्तवत् ॥२५॥
वमितं क्षामता दाहः कण्ठशोषस्तमो भ्रमः।
घोरा वाय्वामया मृत्युर्जीवशोणितनिर्गमात् ॥२६॥

स०—अतियोगे पुनः फेनचंकरक्तवद्वमितं भवति। चंद्रकश्च रक्तं च तानि विद्यंते यस्य वमितस्य तदेवम्। तथा क्षामतादयो भवंति। तमस्तिमिरदर्शनं दारुणाश्च वातरोगास्तथा मृत्युर्भवति। जीवाख्यस्य शोणितस्य निर्गमान्निष्कासात् ॥ २५-२६ ॥

अतियोग का लक्षण—

वि०—वमन के अतियोग में—वमन द्रव्य में झाग, चन्द्रिकायें (मोर की पांख का रंग) और रक्त आता है तथा 'कृशता, दाह, गले में शोष, अन्धकार, चक्कर आना; भयानक वातरोग तथा जीव-रक्त (शुद्ध रक्त) के निकलने से मृत्यु भी हो जाती है ॥ २५-२६ ॥

सम्यग्योगेन वमितं क्षणमाश्वास्य पाययेत्।
धूमत्रयस्यान्यतमं स्नेहाचारमथादिशेत् ॥ २७ ॥

स०—सम्यग्योगेन वमिते सति मुहूर्तमाश्वस्य शीतवातादिना धूमत्रयस्य स्निग्धमध्यतीक्ष्णाख्यस्याऽन्यतममेकं पाययेद्वैद्यः। अथाऽनंतरं स्नेहाचारमुष्णोदकोपचारी स्यादित्यादिकमादिशेत् ॥ २७ ॥

सम्यग्वमन के बाद कर्तव्य—

वि०—भली प्रकार वमन होने पर थोड़ी देर आश्वासन-आराम देकर स्निग्ध मध्य-तीक्ष्ण इनमें से कोई एक धूम पिलाये तथा स्नेह विधि में बताया आहार-विहार (उष्णोदकोपचारी स्यात्-आदि) का पालन करे ॥ २७ ॥

ततः सायं प्रभाते वा क्षुद्वान् स्नातः सुखाम्बुना।
भुञ्जानो रक्तशाल्यन्नं भजेत्पेयादिकं क्रमम् ॥ २८ ॥

स०—तदूर्ध्वं सायमपराह्णे प्रभाते पूर्वाह्णे वा बुभुक्षित उष्णोदकेन स्नातो रक्तशाल्यन्नं भुंजानः पेयादिकं क्रमं भजेत् ॥ २८ ॥

वमन किये व्यक्ति के पथ्य—

वि०—उसके बाद सायंकाल या प्रातःकाल में भूख लगने पर गरम पानी से स्नान करके-पेयादि क्रम के अनुसार लाल चावलों का भात खाये ॥ २८ ॥

तमेव पेयादिकं क्रममाह—

पेयां विलेपीमकृतं कृतं च
यूषं रसं त्रीनुभयं तथैकम्।
क्रमेण सेवेत नरोऽन्नकालान्
प्रधानमध्यावरशुद्धिशुद्धः ॥ २९ ॥

स०—प्रधाना च मध्या चाऽवरा च प्रधानमध्यावराः। प्रधानमध्यावराश्च ताः शुद्धयश्च ताभिः शुद्धो नरः क्रमेण यथासंख्यं पेयां त्रीनन्नकालान् द्वावन्नकालावेकमन्नकालं भजेदिति। विलेप्यादिष्वप्येवं योज्यम्। एतदेव स्पष्टीक्रियोच्यते। यथा। प्रधानशुद्ध्या शुद्धो नरो द्वावन्नकालावेकस्मिन् दिने द्वितीयेऽह्न्येककालं च पेयां भजेदिति। द्वितीयेऽह्न्येकमन्नकालं विलेपीं तृतीये वासरे द्वावन्नकालौ विलेपीमेव। चतुर्थे दिवसे अकृतं शुंठीलवणाद्यसंस्कृतमन्नं कृतं शुंठीलवणादिसंस्कृतं यूषं च द्वावन्नकालौ भजेत्। एवं पंचमेऽह्नि प्रथमेऽन्नकाले च। चः समुच्चये। ततः विभज्य तावद्गम्यते। एवं कालत्रयं कृतं रसं विभज्य भोजयेत्। सप्तमे दिने प्रकृतिभोजनं क्रमेण सेवेत। एवं यथास्वं मध्यशुद्धिशुद्धस्याऽवरशुद्धिशुद्धस्य च योजना कार्या। मुनिस्त्वाह। अथैनं सायाह्नेऽपरे वाऽह्नि सुखोदकपरिषिक्तं पुराणानां लोहितशालितंडुलानां स्ववक्लिन्नां मंडपूर्वां सुखोष्णां यवागूं पाययेदग्निबलमभिसमीक्ष्य। एवं द्वितीये तृतीये वाऽन्नकाले। चतुर्थे तु तथाविधानामेव शालितंडुलानां सुस्विन्नां विलेपीमुष्णोदकद्वितीयामस्नेहलवणामल्पस्नेहलवणां वा भोजयेत्। एवं पंचमे षष्ठे चाऽन्नकाले। सप्तमे त्वन्नकाले तथाविधानामेव शालीनां द्विःप्रसृतं सुस्विन्नमोदनमुष्णोदकानुपानं तनुना तनुस्नेहलवणोपपन्नेन मुद्गयूषेण भोजयेत्। एवमष्टमे नवमे चाऽन्नकाले। दशमे त्वन्नकाले लावकपिंजलादीनामन्यतमस्य मांसस्य रसेन दकलावणिकेन नाऽतिसारवता नाऽतिसारवता भोजयेदुष्णोदकानुपानम्। एवमेकादशे द्वादशे चाऽन्नकाले। अत ऊर्ध्वमन्नगुणान् क्रमेणोपयुंजानः सप्ताहात्प्रभृति भोजनमागच्छेदिति। त्रीनिति कालाध्वनोरत्यंतसंयोगे द्वितीया ॥२९॥

पेयादि का क्रम—

वि०—पेयादि क्रम—प्रधान, मध्य और अवर (हीन) शुद्धियों से शुद्ध हुआ मनुष्य पेया, विलेपी, अकृतयूष एवं कृतयूष, अकृतमांसरस; कृतमांसरस, इनको तीन भोजन-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समयों में; दो भोजन-समयों में और एक भोजन-समय में क्रमशः बरते।

[अर्थात्—जिस मनुष्य की शुद्धि प्रधान रूप में हुई है, वह प्रथम दिन प्रातः सायं दोनों समय, तथा दूसरे दिन प्रातःकाल (कुल तीन समय) पेया को लेवे। चौथे दिन अकृत-यूष दोनों समय; पाँचवें दिन प्रातः भी यही ले। पाँचवें दिन सायंकाल कृतयूष और छठे दिन दोनों समय कृतयूष ले। इसी प्रकार मांसरस खाने वाला यूष के स्थान पर मांसरस लेवे। अर्थात् सातवें दिन भोजन पर आ जावे। इसी प्रकार मध्यशोधन के बाद दो-दो भोजन कालों में एवं अवरशुद्धि में केवल एक भोजन-काल में पेया आदि ले और मध्य शुद्धि में पाँचवें तथा अवर शुद्धि में तीसरे दिन प्राकृत भोजन ले] ॥ २९ ॥

वक्तव्य—अकृतयूष-शुण्ठी-लवण आदि कटु द्रव्यों से नहीं बनाया। कृतयूष-सोंठ आदि कटु द्रव्यों से बनाया। चरक सूत्रस्थान अ० १५ में-भोजनविधि में-'पुराणानां लोहितशालितण्डुलानां स्ववक्लिन्नां मण्डपूर्वां सुखोष्णां पाययेदग्निबलमभिसमीक्ष्य। एवं द्वितीये तृतीये चान्नकाले। चतुर्थे त्वन्नकाले तथाविधानामेव शालीनां सुस्विन्नां विलेपीमुष्णोदकद्वितीयामस्नेहलवणामल्पस्नेहलवणां वा भोजयेत्। एवं पञ्चमे षष्ठे चान्नकाले। सप्तमे त्वन्नकाले······इत्यादि।' इस प्रकार सातवें दिन प्रकृति आहार का विधान दिया है—'सप्ताहात् प्रकृतिभोजनमागच्छेत्।'

अधुना पेयादिक्रमस्य फलं वक्ति—

यथाऽणुरग्निस्तृणगोमयाद्यैः
सन्धुक्ष्यमाणो भवति क्रमेण।
महान् स्थिरः सर्वपचस्तथैव
शुद्धस्य पेयादिभिरन्तराग्निः ॥ ३० ॥

स०—यथा बाह्योऽग्निरणुरल्पस्तृणगोमयकाष्ठदलादिभिः संधुक्ष्यमाण उद्दीप्यमानो महान् स्थिरः सर्वपचो भवति। सर्वपच इति पचेरजंतस्य सर्वशब्देन सह षष्ठीसमासः। तेनैव प्रकारेण पेयादिभिः शुद्धस्योदर्योऽग्निर्महान् स्थिरः सर्वपचश्च भवति। खरनादेऽप्युक्तम्। विरेके वमने श्रेष्ठे पेयादीनां त्रिकक्रमः। त्रिशो द्विशो मध्यमे स्यादेकशस्तु कनीयसीति ॥ ३० ॥

पेयादि-क्रम का फल—

वि०—पेयादि क्रम का फल—जिस प्रकार थोड़ी सी अग्नि तिनक गोबर आदि से उद्दीप्त बनकर धीरे-धीरे महान्, स्थिर तथा सबको भस्म करने वाली हो जाती है; उसी प्रकार वमनादि से शुद्ध मनुष्य की अन्तराग्नि पेया, विलेपी आदि क्रम से महान, स्थिर और सब कुछ पचानेवाली हो जाती है ॥ ३० ॥

जघन्यमध्यप्रवरे तु वेगा-
श्चत्वार इष्टा वमने षडष्टौ।
दशैव ते द्वित्रिगुणा विरेके
प्रस्थस्तथा स्याद् द्विचतुर्गुणश्च ॥ ३१ ॥

स०—जघन्यं च मध्यं च प्रवरं च तस्मिन्वमने क्रमेण वेगाश्चत्वारः षडष्टेष्टास्तंत्रकृतामिति शेषः। ते वेगा दशैव द्वित्रिगुणा जघन्यमध्यप्रवरे द्विरेके क्रमेण भवंति। तथेति समुच्चये। न केवलं वेगानां मानं प्रस्थश्च द्विचतुर्गुणो मानं स्यादिति तथाशब्दस्यार्थः। त्रीण्येतान्युपजातिवृत्तानि ॥३१॥

वमनादि के वेग का नियम—

वि०—जघन्य वमन में चार; मध्य वमन में छः और प्रवर वमन में आठ वेग होते हैं। जघन्य विरेचन में दस; मध्य में बीस और प्रवर विरेचन में तीस वेग होते हैं। परिमाण में—विरेचन के जघन्य वेग में एक प्रस्थ, मध्य वेग में दो प्रस्थ और प्रवर वेग में चार प्रस्थ होते हैं। [प्रस्थ का मान यहाँ पर साढ़े तेरह पल है—यथा-'वमने च विरेके च तथा शोणितमोक्षणे। सार्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः॥'] ॥ ३१ ॥

पित्तावसानं वमनं विरेका-
दर्द्धं कफान्तं च विरेकमाहुः।

स०—पित्तांतं वमनं वदंति। विरेकादर्धं वमनं कथयंति विरेचनं कफांतमाहुः।

वमनादि का अन्त—

वि०—वमन पित्त के आने तक तथा विरेचन से आधे परिमाण में अर्थात् हीन वेग में आधा प्रस्थ, मध्य वेग में एक प्रस्थ और उत्तम वेग में दो प्रस्थ होना चाहिए। विरेचन कफ के आने तक होना ठीक समझना चाहिए।

द्वित्रान् सविट्कानपनीय वेगान्
मेयं विरेके, वमने तु पीतम् ॥ ३२ ॥

स०—द्वे वा त्रयो वा द्वित्राः। संख्ययाऽव्ययेति बहुव्रीहिः। बहुव्रीहौ संख्येये डजिति वा समासांतः। सह विशा पुरीषेण वर्तत इति सविट्को विड्वान् वेगान् सविट्कानपनीय गणनयाऽनया रुद्धविरेके मेयं मातव्यम्। वमने पुनः पीतं यदौषधं तदपनीय मेयम्। इंद्रवज्रावृत्तम् ॥ ३२ ॥

वमनादि का परिमाण—

वि०—विरेचन में-मल मिश्रित दो-तीन वेगों को छोड़कर गिनना चाहिए; वमन में-पी हुई औषध को छोड़कर शेष वेगों को गिनना चाहिये ॥ ३२ ॥

अथैनं वामितं भूयः स्नेहस्वेदोपपादितम्।
श्लेष्मकाले गते ज्ञात्वा कोष्ठं सम्यग्विरेचयेत् ॥ ३३ ॥

स०—एनं नरं वामितं भूयः पुनरपि स्नेहस्वेदाभ्यामुपपादितमनंतरं सम्यग्विरेचयेत्। कदा। श्लेष्मणः कालः संविभागप्रहरस्तस्मिन् गते सति। किं कृत्वा। कोष्ठं मृदुमध्यक्रूरलक्षणं ज्ञात्वाऽवगम्य ॥ ३३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वामित को विरेचन—

वि०—विरेचन विधि—वमन किये हुए व्यक्ति को फिर से स्नेहन और स्वेदन देकर-कफ का समय बीत जाने पर मृदु, मध्य, क्रूर कोष्ठ का विचार करके विरेचन देवें ॥ ३३ ॥

बहुपित्तो मृदुकोष्ठः क्षीरेणापि विरिच्यते।

स०—यो बहुपित्तः कोष्ठः स मृदुर्भवति। स च क्षीरेणाऽपि विरिच्यते। अपिशब्दादारग्वधादिभिरपि।

मृदुकोष्ठ को विरेचन—

वि०—बहुत पित्त वाला तथा जिसका कोष्ठ मृदु है; उसको दूध से भी विरेचन हो जाता है।

प्रभूतमारुतः क्रूरः कृच्छ्राच्छ्यामादिकैरपि ॥३४॥

स०—प्रभूतमारुतः क्रूरः कोष्ठो भवति। स कृच्छ्रेण कथंचिदपि श्यामादिकैर्विरेच्यते। आदिशब्देन द्रवंतिसुधादीनां ग्रहणम्। अपिशब्दादारग्वधादिना विरेच्यते ॥३४॥

क्रूरकोष्ठ का विरेचन—

वि०—प्रचुर वायु वाला कोष्ठ क्रूर होता है; इसे निशोथ आदि से भी कठिनाई से विरेचन होता है ॥ ३४ ॥

कषायमधुरैः पित्ते विरेकः, कटुकैः कफे।
स्निग्धोष्णलवणैर्वायौ—

स०—कषायमधुरैरारग्वधादिभिः पित्ते विरेकः। कटुकैः कफे विरेकः। स्निग्धाम्ललवणैरेरंडतैलादिभिर्वायौ विरेकः कार्यः।

पित्तादि दोषों में विरेचक द्रव्य—

वि०—पित्त में कषाय और मधुर द्रव्यों से, कफ में कटु द्रव्यों से और वायु में स्निग्ध-उष्ण-लवण द्रव्यों से (एरण्ड-तैल आदि से) विरेचन देना चाहिए। (आरग्वधादि से पित्त में, कुटकी आदि से कफ में विरेचन दें।)

—अप्रवृत्तौ तु पाययेत् ॥ ३५ ॥
उष्णाम्बु, स्वेदयेदस्य पाणितापेन चोदरम्।

स०—विरेकाप्रवृत्तावुष्णांबु पाययेद्वैद्यः। अस्य चाऽऽतुरस्य पाणितापेन जठरं स्वेदयेत् ॥ ३५ ॥

विरेचन की अप्रवृत्ति में कर्तव्य—

वि०—विरेचन प्रवृत्त न हो तो गरम पानी पिलाये। हाथ को अग्नि पर गरम करके इस रोगी के उदर पर सेक करे ॥ ३५ ॥

उत्थानेऽल्पे दिने तस्मिन्भुक्त्वाऽन्येद्युः पुनः पिबेत् ॥
अदृढस्नेहकोष्ठस्तु पिबेदूर्ध्वं दशाहतः।
भूयोऽप्युपस्कृततनुः स्नेहस्वेदैर्विरेचनम् ॥ ३७ ॥
यौगिकं सम्यगालोच्य स्मरन्पूर्वमतिक्रमम्।

स०—तस्मिन् विरेकस्य दिनेऽल्प उत्थाने स्तोकायां प्रवृत्तौ सत्यां भुक्त्वाऽन्नमन्येद्युरन्यस्मिन् दिने पुनर्विरेचनौषधं पिबेदातुरः। दृढस्नेहकोष्ठो यस्य स दृढस्नेहकोष्ठः। न दृढस्नेहकोष्ठोऽदृढस्नेहकोष्ठः स भूयोऽपि स्नेहस्वेदैः संस्कृतशरीरो दशाहादूर्ध्वं यौगिकं विरेचनं पिबेत्। यथावन्निरूप्य पूर्वमनुक्रमं भैषज्यमात्रां मंत्राभिमंत्रितामित्यादिकं तथाऽप्रवृत्तौ तु पाययेत्। उष्णांबु स्वेदयेदस्य पाणितापेनेत्यादिकं च तथापि अतिक्रमं स्मरन् पिबेदिति ॥ ३६-३७ ॥

वि०—विरेचन थोड़ा प्रवृत्त हो तो—उस दिन भोजन करके दूसरे दिन फिर विरेचक औषध पिये। किन्तु निर्बल तथा स्निग्ध कोष्ठ व्यक्ति दस दिन के उपरान्त-शरीर का स्नेहन और स्वेदन द्वारा संस्कार करके-प्रथम अतिक्रम (भूल) को ध्यान में रखते हुए—यौगिक (उचित) योग्य विरेचन को भली प्रकार विचार करके पिये ॥ ३७-३७ ॥

हृत्कुक्ष्यशुद्धिररुचिरुत्क्लेशः श्लेष्मपित्तयोः ॥ ३८ ॥
कण्डूर्विदाहः पिटकाः पीनसो वातविड्ग्रहः।
अयोगलक्षणम्—

स०—अयोगलक्षणं हृत्कुक्ष्यशुद्धिरित्यादिकम् ॥ ३८ ॥

अयोगादि के लक्षण—

वि०—अयोग के लक्षण—हृदय की अशुद्धि, उदर की अशुद्धता, अरुचि, कफ और पित्त का उत्क्लेश, कण्डू, जलन, पिटिका, पीनस; वात एवं मल का अवरोध-ये विरेचन के अयोग के लक्षण हैं ॥ ३८ ॥

—योगो वैपरीत्ये यथोदितात् ॥ ३९ ॥

स०—यथोक्ताद्वैपरीत्ये हृत्कुक्षिशुद्धिरित्यादिको योगो योगलक्षणम् ॥ ३९ ॥

वि०—विरेचन के सम्यग् योग में—हृदय की अशुद्धि आदि उपर्युक्त लक्षणों से विपरीत लक्षण होते हैं ॥ ३९ ॥

विट्पित्तकफवातेषु निःसृतेषु क्रमात्स्रवेत्।
निःश्लेष्मपित्तमुदकं श्वेतं कृष्णं सलोहितम् ॥ ४० ॥
मांसधावनतुल्यं वा मेदःखण्डाभमेव वा।
गुदनिःसरणं तृष्णा भ्रमो नेत्रप्रवेशनम् ॥ ४१ ॥
भवन्त्यतिविरिक्तस्य तथाऽतिवमनामयाः।

स०—अतिविरिक्तस्य विट्पित्तकफवातेषु क्रमान्निःसृतेषु जलं स्रवेत्। किंभूतम्। निःश्लेष्मपित्तं तथा श्वेतं कृष्णं सलोहितं पीतरक्तमथवा मांसधावनसदृशमथवा मेदःशकलाभं स्रवेत्। तथा गुदनिःसरणादयोऽतिवमनामयाश्च क्षामतादयो भवंति ॥ ४०-४१ ॥

वि०—अतियोग के लक्षण—मल, पित्त, कफ और वायु के क्रमशः निकल चुकने पर कफ और पित्त से रहित, श्वेत, काला या रक्त-मिश्रित पानी बाहर आता है। इस पानी का रङ्ग मांस के धोवन के समान अथवा मेद के टुकड़े के समान झांईवाला होता है। रोगी की गुदा बाहर आती है, प्यास, भ्रम, आँखों का अन्दर गड़ना, तथा अतिवमन में कहे लक्षण-विरेचन के अतियोग में होते हैं ॥ ४०-४१ ॥

सम्यग्विरिक्तमेनं च वमनोक्तेन योजयेत् ॥ ४२ ॥
धूमवर्ज्येन विधिना—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—एनं च नरं सम्यग्विरिक्तं वमनविहितेन विधिना विधूमेनोपपादयेत् ॥ ४२ ॥

विरेचन के बाद कर्तव्य—

वि०—भली प्रकार विरेचन होने पर रोगी को वमन में कहे उपचार देवे, परन्तु इसमें धूम पान न करावे ॥ ४२ ॥

—ततो वमितवानिव ।
क्रमेणान्नानि भुञ्जानो भजेत्प्रकृतिभोजनम् ॥ ४३ ॥

स०—ततोऽनंतरं क्रमेण पूर्वोक्तेन रक्तशाल्यन्नसहित-पेयादीन्यन्नान्यश्नन् प्रकृतिभोजनं भजेत् ॥ ४३ ॥

वि०—इसके उपरान्त वमन किये हुए की भाँति क्रमशः (श्लोक २९ में वर्णित क्रम के अनुसार) पेया आदि अन्न को खाता हुआ स्वाभाविक भोजन पर आ जाये (सातवें दिन स्वाभाविक भोजन करे) ॥ ४३ ॥

मन्दवह्निमसंशुद्धमक्षामं दोषदुर्बलम् ।
अदृष्टजीर्णलिङ्गं च लङ्घयेत्पीतभेषजम् ॥ ४४ ॥

स०—पीतभेषजं मंदवह्न्यादीन् पंच लंघयेत्। अदृष्टं जीर्णलिंगं पीतभेषजस्य यस्येति योज्यम् ॥ ४४ ॥

औषधसेवन के बाद उपवास—

वि०—औषध पीने से—अग्निमांद्य हो, जिसका भली प्रकार शोधन न हुआ हो; औषध-सेवन से जितनी कृशता होनी चाहिए वह न हुई हो एवं दोष-वृद्धि से निर्बल हो, तथा जिसमें औषध के जीर्ण होने के लक्षण न दीखते हों, इन पाँच अवस्थाओं में लंघन कराये ॥ ४४ ॥

वक्तव्य—जीर्ण औषध के लक्षण–'अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णा सुमनस्कता । लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः ॥' अजीर्णौषध के लक्षण–'क्लमो दाहोऽङ्गसदनं भ्रमो मूर्च्छा शिरोरुजा। अरतिर्बलहानिश्च सावशेषौषधाकृतिः ॥' (च. सि. अ. ६।२२)

एवं लंघिते यो गुणो भवति तमाह—

स्नेहस्वेदौषधोत्क्लेशसङ्गैरिति न बाध्यते ।

स०—उत्क्लेशाश्च संगाश्चोत्क्लेशसंगाः। स्नेहश्च स्वेदश्चौषधं च तानि तेषामुत्क्लेशसंगाः स्नेहस्वेदौषधोत्क्लेशसंगास्तैः इत्येवं लंघिते सति मंदाग्न्यादिर्न बाध्यते ।

उक्तोपवास से लाभ—

वि०—स्नेहन, स्वेदन और औषध इनसे उत्पन्न हुए उत्क्लेष (बाहर निकलने की प्रवृत्ति) अथवा उनके रुक जाने से जो मन्दाग्नि आदि विकार होते हैं, वे लंघन करने से नहीं होते ।

संशोधनास्रविस्रावस्नेहयोजनलङ्घनैः ॥ ४५ ॥
यात्यग्निर्मन्दतां तस्मात् क्रमं पेयादिमाचरेत् ।

स०—संशोधनादिभिर्यतोऽग्निर्मन्दतां यात्यतो हेतोः पेयादिं क्रममाचरेत् । संशोधनं सम्यक्शुद्धिः । अस्रविस्रावो रक्तस्रुतिः । स्नेहयोजनं स्नेहयोगः । ननु शुद्धयाग्निमांद्यमिहोच्यते । वक्ष्यति च । बुद्धिप्रसादमित्यादिना ज्वलनस्य दीप्तिं संशोधनं करोतीति । तदिमे वचसी परस्परं व्याहतः। अत्रोच्यते । कालभेदाद् दोषसंशोधने क्रियमाणेऽग्निमांद्यं भवति । कृते च संशोधने पेयादिक्रममासेवमानस्याग्निदीप्तिरिति न कश्चिदत्र व्याघातः ॥ ४५ ॥

संशोधनादि के बाद पेयादि—

वि०—संशोधन, रक्तमोक्षण, स्नेहपान और लंघन इन कार्यों से अग्नि मन्द हो जाती है, इसलिए पेया-विलेपी आदि के क्रम का पालन करना चाहिए ॥ ४५ ॥

स्रुतात्पपित्तश्लेष्माणं मद्यपं वातपैत्तिकम् ॥ ४६ ॥
पेयां न पाययेत्तेषां तर्पणादिक्रमो हितः ।

स०—स्रुताल्पपित्तश्लेष्माणमिति । स्रुतौ पतितावल्पौ पित्तश्लेष्माणौ यस्य तं तथा मद्यपो यो नरस्तं मद्यपं तथा वातपैत्तिकमेतांस्त्रीन्पेयां न पाययेत्। तर्हि एषां किं कार्यमित्याह। प्रथमेऽन्नकाले लाजसक्तवो द्वितीयेऽन्नकाले जीर्णशाल्योदनं तृतीये मांसरसौदनमित्येष तर्पणादिक्रमस्तेषां हितः ॥ ४६ ॥

पेयादि के अयोग्य रोगी—

वि०—जिस रोगी के पित्त और कफ कम बाहर आये हों, या जो मद्यपी हो, अथवा बात-पित्त विकार या प्रकृति वाला हो, इन तीनों में पेयाविधान न बरत कर तर्पण आदि विधान (लाजसत्तू) का मन्थ, फलों के रस, मांसरस आदि देवे ॥ ४६ ॥

ननु विरेचनस्येव वमनस्य कस्मात्पाको न प्रतीक्ष्यत इत्याह—

अपक्वं वमनं दोषान् पच्यमानं विरेचनम् ॥ ४७ ॥
निर्हरेद्वमनस्यातः पाकं न प्रतिपालयेत् ।

स०—वमनमपक्वं सद्दोषान्निर्हरेत् । विरेचनं तु पच्यमानं दोषान्निर्हरेत्। अतो वमनस्य पाको न प्रतिपाल्यते ॥ ४७ ॥

वामक औषध का पाक अनावश्यक—

वि०—वमन बिना पचे ही दोषों को बाहर करता है, विरेचन पच्यमानावस्था में बाहर निकालता है। इसीलिये वमन के पचने की प्रतीक्षा नहीं करनी चाहिये (विरेचन के पचने की प्रतीक्षा करनी चाहिये) ॥ ४७ ॥

दुर्बलो बहुदोषश्च दोषपाकेन यः स्वयम् ॥ ४८ ॥
विरिच्यते भेदनीयैर्भोज्यैस्तमुपपादयेत् ।

स०—दुर्बलो बहुदोषश्च दोषपाकेन हेतुना स्वयमौषधमंतरेण यो विरिच्यते भिद्यते तं नरं भेदनीयैर्भोज्यैर्भक्ष्यैर्योजयेत् ॥ ४८ ॥

स्वतः विरेचनीय का उपचार—

वि०—जिस दुर्बल एवं बहुत दोष वाले व्यक्ति को दोषों के पचने से स्वयं ही विरेचन होता है, उसे भेदनीय भक्ष्य पदार्थों से विरेचन देवे। [ऐसे व्यक्ति को विरेचक औषध न देवे।] ॥ ४८ ॥

दुर्बलः शोधितः पूर्वमल्पदोषः कृशो नरः ॥ ४९ ॥
अपरिज्ञातकोष्ठश्च पिबेन्मृद्वल्पमौषधम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वरं तदसकृत्पीतमन्यथा संशयावहम् ॥ ५० ॥
हरेद्बहूँश्चलान् दोषानल्पानल्पान् पुनः पुनः ।
दुर्बलस्य मृदुद्रव्यैरल्पान् संशमयेत्तु तान् ॥ ५१ ॥
क्लेशयन्ति चिरं ते हि हन्युर्वैनमनिर्हृताः ।

स०—दुर्बलादयः पिबेयुः । किमित्याह मृद्वल्पमिति । यस्माद्विरेचनौषधं पुनः पुनः पीतं वरम् । अन्यथा बहु तीक्ष्णं चौषधं पीतं संशयावहं प्राणसंदेहाकारि । तथा पुनः पुनः प्रयुक्तमौषधं बहूँश्चलान् दोषानल्पानल्पान् हरेत् एवं बलहानिं विना दोषनिर्हारः कृतः स्यात् । तुरवधारणे । दुर्बलस्य नरस्य मृदुद्रव्यैर्निर्हरेदल्पानेव तान् दोषान् सम्यक् शमयेत् । ते तु दोषा अनिर्हृताश्चिरमेतमातुरं क्लेशयंति हन्युर्वा मारयेयुः ॥ ४९-५१ ॥

दुर्बल का उपचार तथा उसके बिना हानि

वि०—दुर्बल, पहले जिसका शोधन हो गया है, थोड़ा दोष वाला, कृश मनुष्य तथा किसके कोष्ठ का ज्ञान नहीं—इन पाँच व्यक्तियों को मृदु और अल्प औषध पिलाना चाहिये। कोमल और अल्प औषध को बार-बार पिलाना उत्तम है, क्योंकि एक साथ तीक्ष्ण औषध पिलाने से प्राणों का भय होता है। बार-बार दी हुई औषध बहुत एवं चलायमान दोषों में भी, उनका थोड़ा-थोड़ा करके बार-बार निकालती और दुर्बलता भी नहीं बढ़ाती है। दुर्बल व्यक्ति में वे दोष थोड़े हों तो उनको मृदु द्रव्यों से शमन कर देवे (शोधन न देवे किन्तु बहुत दोष हो तो पूर्वोक्त विधि से थोड़ा-थोड़ा शोधन देवे)। क्योंकि वे बहुत अधिक दोष शरीर से बाहर न करने पर रोगी को देर तक पीड़ित करते हैं या मार देते हैं ॥ ४९-५१ ॥

मन्दाग्निं क्रूरकोष्ठं च सक्षारलवणैर्घृतैः ॥ ५२ ॥
सन्धुक्षिताग्निं विजितकफवातं च शोधयेत् ।

स०—मंदाग्निं क्रूरकोष्ठं च नरं सह क्षारलवणाभ्यां वर्तते यानि घृतानि तैर्यथासंख्यमुद्दीपितानलं विजितकफवातं च शोधयेत् ॥ ५२ ॥

मन्दाग्नि तथा क्रूर कोष्ठ का शोधन—

वि०—मन्द अग्नि वाले और क्रूर कोष्ठ वाले व्यक्ति की अग्नि को यवक्षार आदि क्षार एवं लवणमिश्रित घृतों से प्रदीप्त करके कफ और वायु की शान्ति हो जाने पर शोधन करे ॥ ५२ ॥

रूक्षबह्वनिलक्रूरकोष्ठव्यायामशीलिनाम् ॥ ५३ ॥
दीप्ताग्नीनां च भैषज्यमविरेच्यैव जीर्यति ।
तेभ्यो वस्तिं पुरा दद्यात्ततः स्निग्धं विरेचनम् ॥ ५४ ॥
शकृन्निर्हृत्य वा किञ्चित्तीक्ष्णाभिः फलवर्तिभिः ।
प्रवृत्तं हि मलं स्निग्धो विरेको निर्हरेत्सुखम् ॥ ५५ ॥

स०—रूक्षादीनां भैषज्यमविरेच्यैव विरेचनमकृत्वैव परिणतिमेति । तेभ्यो रूक्षादिभ्यः पूर्वं वस्तिं दद्यादनंतरमेरंडतैलबिंदुघृतादिकं विरेचनं योजयेत् । अथवा फलवर्तिभिस्तीक्ष्णाभिः पुरीषं किंचिदल्पं निर्हृत्य निःसार्य स्निग्धं विरेचनं दद्यात् । किमिति बस्तिनाऽथवा तीक्ष्णाभिः फलवर्तिभिश्च किंचिच्छकृन्निर्हारः क्रियत इत्याह—यस्मान्मलं प्रवृत्तं संतं किंचित्पतितं स्निग्धो विरेकः सुखं मलप्रेरणेन निर्हरेत् ॥५३-५५॥

रूक्षादि का विरेचन—

वि०—रूक्ष, बहुत वायु वाले, क्रूरकोष्ठ, व्यायाम करने वाले और प्रदीप्त अग्नि वाले—इन पाँच प्रकार के व्यक्तियों में विरेचन औषध बिना विरेचन किये ही जीर्ण हो जाती है। इनको प्रथम निरूहवस्ति देवे, फिर (एरण्डतैल या बिन्दुघृत आदि स्निग्ध विरेचन देवे अथवा तीक्ष्ण फलवर्त्तियों से मल को थोड़ा बाहर निकाल कर विरेचन देवे क्योंकि प्रवृत्त हुए मल को स्निग्ध विरेचन सुखपूर्वक निकाल देता है ॥५३-५५॥

विषाभिघातपिटिकाकुष्ठशोफविसर्पिणः ।
कामलापाण्डुमेहार्तान्नातिस्निग्धान् विशोधयेत् ॥५६॥

स०—नातिशब्दोऽत्रेषदर्थे । नातिशीतगुरुमित्यत्र यथा । विषाद्यार्तानीषत्स्निग्धान् विरेचयेत् ॥ ५६ ॥

विषादि से पीड़ित का विरेचन—

वि०—विषपीड़ित, अभिघातपीड़ित, पिटिका, कुष्ठ, शोफ, विसर्प, कामला, पाण्डु और प्रमेह इन रोगों से पीड़ित व्यक्ति को थोड़ा सा स्निग्ध करके शोधन देवे ॥ ५६ ॥

सर्वान् स्नेहविरेकैश्च, रूक्षैस्तु स्नेहभावितान् ।

स०—सर्वानीषत्स्निग्धान् विषाद्यार्तादीन् स्नेहविरेकैः शोधयेत् । स्नेहभावितांश्च पुरुषान् रूक्षैर्विरेकैः शोधयेत् ।

वि०—सबको स्निग्ध विरेचन देना चाहिये, स्निग्ध पुरुषों को रूक्ष विरेचन देना चाहिये ।

कर्मणां वमनादीनां पुनरप्यन्तरेऽन्तरे ॥ ५७ ॥
स्नेहस्वेदौ प्रयुञ्जीत, स्नेहमन्ते, बलाय च ।

स०—वमनादीनां कर्मणामंतरेऽतरे मध्ये मध्ये पुनरपि भूयः स्नेहस्वेदौ प्रयुंजीत । अंते च कर्मणां बलाय शरीरस्य बलाधानार्थं स्नेहं प्रयुञ्जीत । तदेषोऽर्थो बोद्धव्यः । आदौ स्नेहस्वेदौ ततो वमनं पुनः स्नेहस्वेदौ ततो विरेचनं पुनः स्नेहस्वेदौ ततोऽनुवासनं पुनः स्नेहस्वेदौ ततो निरूहबस्तिरिति ॥ ५७ ॥

स्नेहन और स्वेदन का बार-बार प्रयोग—

वि०—वमन आदि कर्मों के बीच-बीच में बार-बार स्नेह स्वेदन बरतना चाहिये और अन्त में शरीर में बल लाने के लिये स्नेहन करना चाहिये ॥ ५७ ॥

किमित्येवं विधीयत इत्याह—

मलो हि देहादुत्क्लेश्य ह्रियते वाससो यथा ॥ ५८ ॥
स्नेहस्वेदैस्तथोत्क्लिष्टः शोध्यते शोधनैर्मलः ।

स०—मलो हि देहादुत्क्लेश्य पतनोन्मुखीकृत्य शोधनैर्विरेचनादिभिर्ह्रियते । कथमिव वाससो वस्त्राद्यथा स्नेहस्वेदैः ॥ ५८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उक्त विधि से मल निकालने में दृष्टान्त—

वि०—जिस प्रकार कपड़े के मल को पानी से धोना या भिगोना और उबालना इत्यादि क्रियाओं से उत्क्लिष्ट कर दूर किया जाता है उसी प्रकार शरीर के मलों को स्नेहन-स्वेदन से प्रवृत्युन्मुख बनाकर शोधनों द्वारा निकाला जाता है ॥ ५८ ॥

स्नेहस्वेदानभ्यासं दोषमाह—

स्नेहस्वेदावनभ्यस्य कुर्यात् संशोधनं तु यः ॥ ५९ ॥
दारु शुष्कमिवानामे शरीरं तस्य दीर्यते ॥

स०—यो नरः स्नेहस्वेदावनभ्यस्याऽशीलयित्वा शोधनं कुर्यात्तस्य शरीरं दीर्यते । कथमिव । आनामे आनमने काष्ठं शुष्कं यथा दीर्यते ॥ ५९ ॥

स्नेहनस्वेदन के बिना मलशोधन से हानि—

वि०—जो मनुष्य स्नेहन एवं स्वेदन न करके संशोधन करता है, वह नष्ट हो जाता है, जिस प्रकार कि सूखी लकड़ी झुकाने में टूट जाती है [स्नेहन और स्वेदन करके मोड़ने पर नहीं टूटती] ॥ ५९ ॥

सांप्रतं संशुद्धेः फलमाह—

बुद्धिप्रसादं बलमिन्द्रियाणां
धातुस्थिरत्वं ज्वलनस्य दीप्तिम् ।
चिराच्च पाकं वयसः करोति
संशोधनं सम्यगुपास्यमानम् ॥ ६० ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने वमनविरेचनविधिर्नामाष्टादशोऽध्यायः ॥ १८ ॥

स०—यौवनादेः पाकः परिणाम इति । उपजातिवृत्तम् ॥ ६० ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां वांतिरेकप्रकरणं नामाऽष्टादशोऽध्यायः ॥ १८ ॥

सम्यक् शोधन का फल—

वि०—शोधन का फल—भली प्रकार किया हुआ शोधन बुद्धि की निर्मलता; इन्द्रियों में बल; धातुओं की स्थिरता, अग्नि की दीप्ति और बुढ़ापे का देर में आना—इन पाँच कार्यों को करता है ॥ ६० ॥

इस प्रकार विद्योतिनी टीका में वमनविरेचन नामक अट्ठारहवाँ अध्याय समाप्त हुआ ॥ १८ ॥

एकोनविंशोऽध्यायः

मलहरणार्थं पूर्वाध्याय उक्तः । बस्तिनाऽपि मला निर्ह्रियंत इति वमनविरेचनविधेरनंतरं बस्तिविधेरुपदेशो युक्त इत्याह—

अथातो वस्तिविधिमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

स०—अथाऽत इति । बस्तिना दीयत इति बस्तिस्तस्य विधिः शेषं पूर्ववद्व्याख्येयम् ।

वि०—अब इसके आगे वस्तिविधि का व्याख्यान करेंगे· जैसा कि आत्रेय आदि महर्षियों ने कहा था ।

वातोल्बणेषु दोषेषु वाते वा बस्तिरिष्यते ।
उपक्रमाणां सर्वेषां सोऽग्रणीस्त्रिविधस्तु सः ॥ १ ॥
निरूहोऽन्वासनं बस्तिरुत्तरः—

स०—वात उल्बणोऽधिको येषां दोषाणां तेषु बस्तिरिष्यते । आचार्यैरिति शेषः । तत्र वातपित्ते वातश्लेष्मण्यथवा केवले वायौ बस्तिरिष्यते । उपक्रमाणां चिकित्सानां सर्वेषां स बस्तिरग्रणीः प्रधानतमः । स च त्रिप्रकारः । तदेव त्रैविध्यमाह । निरूहोऽन्वासनो बस्तिरुत्तर इति यदा तूत्तरेण मार्गेण मेढ्रादिना दीयत इत्युत्तरबस्तिः ॥ १ ॥

वस्ति के भेद—

वि०—वातप्रधान दोषों में अथवा केवल वायु में बस्ति दी जाती है । वमनादि सब साधनों में बस्ति ही सबसे श्रेष्ठ है । यह बस्ति तीन प्रकार की है- निरूहबस्ति, अनुवासनबस्ति और उत्तरबस्ति (बस्तिना दीयते इति बस्तिः) ॥१॥

—तेन साधयेत् ।
गुल्मानाहखुडप्लीहशुद्धातीसारशूलिनः ॥ २ ॥
जीर्णज्वरप्रतिश्यायशुक्रानिलमलग्रहान् ।
वर्ध्माश्मरीरजोनाशान् दारुणांश्चानिलामयान् ॥ ३ ॥

स०—तेनेत्यनेन निरूहः परामृश्यते । कथमितिचेत् । ब्रूमः । अनास्थाप्याश्चेत्यधीयते । तत्र के निरूह्या इत्यपि । ते सत्यत्राऽनिरूह्याः पुनरिमे प्रतिवक्तुं युज्यंते । अपि च । आस्थाप्या एव चान्वास्या इति पठति के आस्थाप्या इति न गम्येत यदीह निरूहो न परामृश्येत । तस्मात्तेनेत्यनेन निरूहस्य ग्रहणं न्याय्यम् । तेन निरूहेण गुल्मादींस्तथा जीर्णज्वरादीन् कृच्छ्रान् वातरोगांश्चोपक्रमेत् । गुल्मादीनां शूलांतानां द्वंद्व इनिः कार्यः । शुक्रादीनां ग्रहेण संबंधः । शुक्रग्रहो रेतोविबंधः । अनिलग्रहो वायोरसंचारः । रजोनाशः स्त्रियाः पुष्पनाशः ॥ २–३ ॥

बस्ति के योग्य रोगी—

वि०—निरूहबस्ति से—गुल्म, आनाह, खुड (वातरक्त), प्लीहा निरामातीसार, शूल, जीर्णज्वर, प्रतिश्याय, शुक्रग्रह, वात ग्रह, मलग्रह, वर्ध्म, अश्मरी, रजोनाश तथा दारुण वातरोगियों की चिकित्सा करे ॥ २–३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनास्थाप्यास्त्वतिस्निग्धः क्षतोरस्को भृशं कृशः ।
आमातिसारी वमिमान् संशुद्धो दत्तनावनः ॥ ४ ॥
श्वासकासप्रसेकार्शोहिध्माध्मानाल्पवह्नयः ।
शूनपायुः कृताहारो बद्धच्छिद्रोदकोदरी ॥ ५ ॥
कुष्ठी च मधुमेही च मासान् सप्त च गर्भिणी ।

स०—अतिस्निग्धादयः सप्तममासगर्भिण्यंता अनास्थाप्या अनिरूह्याः । वमिमान् प्रसक्तच्छर्दिः । बद्धादेरुदरेण संबंधः । तत इनिर्मत्वर्थीयः । यद्वाऽतिसारिणि आस्थाप्या इत्यनेनाऽऽमातिसारिणोऽनास्थाप्यत्वे लब्धे पुनर्वचनमतिप्रमाथित्वेनाऽऽमातिसारिणः कथंचिदप्यनास्थाप्या इति । तत्राऽतिस्निग्धस्य दोषानुत्क्लेश्य निरूहः श्वयथुमुदरं च जनयेत् । क्षतोरस्ककृशयोः क्षोभव्यापन्नं शरीरमाशु पीडयेत् । आमातिसारिणो दोषस्य सम्यगनिबर्हणाद्देहस्य क्षामत्वादतिपीडां कुर्यात् । प्रसक्तच्छर्दिषो दोषोत्क्लेशो निरूहमूर्ध्वं नयेत् । कृतवमनविरेकयोः सुरिक्तं देहं क्षतं क्षार इव दहेत् । कृतनस्यस्य विवृतोर्ध्वस्रोतस्तया विभ्रंशं कुर्यात् । कासश्वासादीनामुत्क्लिष्टदोषत्वान्निरूह ऊर्ध्वं व्रजेत् । अर्शःप्रभृतीनां भृशतरमाध्मानान्मृत्युर्वा स्यात् । अल्पवर्चस्कादीनां स्तंभजाड्यादीनावहेत् । गर्भिण्याः पूर्वोक्ता एव दोषाः ॥ ४-५ ॥

निरूह वस्ति के अयोग्य व्यक्ति—

वि०—निरूह (आस्थापन) के अयोग्य—अतिस्निग्ध, उरःक्षत, अतिकृश, आमातिसारी, निरन्तर वमन रोगी, वमन विरेचनादि से शुद्ध, नस्य दिया, श्वास, कास, मुख से लालास्राव, अर्श, हिक्का, आध्मान, मन्दाग्नि के रोगी, जिसकी गुदा सूजी हो, भोजन किया हुआ, बद्धोदरी, छिद्रोदरी, दकोदरी, कुष्ठी, मधुमेह रोगी तथा सात मास तक की गर्भवती इनको निरूह नहीं देना चाहिये ॥ ४-५ ॥

आस्थाप्या एव चान्वास्या विशेषादतिवह्नयः ॥ ६ ॥
रूक्षा केवलवातार्ताः—

स०—य एवाऽऽस्थाप्यास्त एवानुवास्याः । आङ्पूर्वात्तिष्ठतेर्णिजंतादनुपूर्वाच्च वसतेरर्हार्थे ण्यत् । विशेषेणातिवह्न्यादयोऽनुवास्याः ॥ ६ ॥

अनुवासन के योग्य रोगी—

वि०—अनुवासन बस्ति के योग्य—गुल्मी आदि जो रोगी निरूह के योग्य हैं; वे ही अनुवासन के योग्य हैं; विशेष करके अति अग्नि वाले; रूक्ष तथा शुद्ध वायु से पीड़ित अनुवासन के योग्य हैं ॥ ६ ॥

—नानुवास्यास्त एव च ।
येऽनास्थाप्यास्तथा पाण्डुकामलामेहपीनसाः ॥ ७ ॥
निरन्नप्लीहविड्भेदिगुरुकोष्ठकफोदराः ।
अभिष्यन्दिभृशस्थूलकृमिकोष्ठाढ्यमारुताः ॥ ८ ॥
पीते विषे गरेऽपच्यां श्लीपदी गलगण्डवान् ।

स०—त एवेति । य एवाऽनास्थाप्या अनिरूह्यास्ते चाऽपि नानुवास्याः । तथा पांड्वादयो नानुवासनार्हाः । एतेषां हि दोषानुत्क्लेश्य स्नेहबस्तिरुदरं जनयेत् । निरन्नस्याऽनुवासनात् स्नेहविपत्तिः । तथा चोक्तं खरनादेन । अभुक्तदत्तश्च तथा स्नेहबस्तिर्विपद्यत इति । प्लीहादीनां स्तंभजाड्यादीनावहेत् । कृमिकोष्ठस्याऽनुवासनात्पूर्वमनिर्हृतैः कृमिभिरिति बहुत्वादशेषनिःसरणेन हृदयमतिकर्षद्भिः श्छर्दयेयुः । आढ्यमारुतस्य सम्यग्दोषनिर्हरणादामवृद्धिः । पीते विषे गरे च नाऽनुवास्या इति योज्यम् । अपच्यां च क्रमेण । श्लीपदीती निर्गलगंडवानिति मतुप् । अपच्यादयो नाऽनुवास्या इति । संग्रहे चोक्तम् । अभुक्ते रिक्तकोष्ठस्य प्रयुक्तमनुवासनम् । सारदूरगसूक्ष्मत्वैः क्षिप्रमूर्ध्वं प्रपद्यते । तेन वायोर्जयो न स्याद्वातधामन्यतिष्ठता । कायाग्नेराशु नाशश्च विशेषादनिवर्तिना । स्नेहः सद्योऽशिताहाररुद्धे स्वाशयेऽनिलम् । पक्वस्थं हंति पक्वस्थश्च्यवते चान्नपाकतः । निरूहश्च समीरश्च तीक्ष्णवेगावुभावपि । तावन्नमूर्च्छितौ तीक्ष्णावधोऽन्नेन सहागतौ । ऊर्ध्वं वा शकृता सार्धं संस्थितौ कोष्ठ एव वा । समलाहारविष्टब्धौ हरेतामाशु जीवितम् । भुक्त एवानुवास्योऽस्मान्न निरूह्योऽत्र भुक्तवानिति ॥ ७-८ ॥

अनुवासन के अयोग्य रोगी—

वि०—और जो निरूह के अयोग्य हैं वे ही अनुवासन के अयोग्य हैं; उनके सिवाय पाण्डु; कामला, प्रमेह एवं, पीनस रोगी, बिना भोजन किया; प्लीहा-रोगी, अतिसार-रोगी, भारी उदर वाला; कफोदर-रोगी, अभिष्यन्दी (नेत्र-रोगी), अतिस्थूल, कृमिकोष्ठ, आढ्यवातरोगी, विष पीने पर, गर विष में, अपची में, श्लीपद में और गलगण्ड रोग में अनुवासन नहीं देना चाहिये ॥ ७-८ ॥

निरुहान्वासनयोर्यंत्रस्य लक्षणमाह—

तयोस्तु नेत्रं हेमादिधातुदार्वस्थिवेणुजम् ॥ ९ ॥
गोपुच्छाकारमच्छिद्रं श्लक्ष्णर्जुगुलिकामुखम् ।

स०—तयोर्निरूहान्वासनयोर्नेत्रं भवति । नीयते प्राप्यते स्नेहकल्काद्यपानमिति नेत्रम् । नेत्रेति नेः ष्ट्रन् प्रत्ययः । किंभूतं नेत्रम् । हेमादीति । आदिशब्दः प्रकारे । तेन रूप्यरीतिकायस्कांस्यत्रपुसीसादयो गृह्यंते । दारु शिंशपादिकाष्ठम् । अस्थि गजादेः । वेणुर्वंशः । एतेषां द्वंद्वः । एभ्यो जातं तयोर्निरूहान्वासनयोर्नेत्रं भवति । किंभूतम् । गोपुच्छाकारम् । गोपुच्छ इवाऽकारो यस्य तत् । तथाऽच्छिद्रं निर्विवरम् । तथा श्लक्ष्णं कोमलं तथाऽप्यृजवक्रम् । गुलिकासदृशमतीक्ष्णं मुखं यस्य तदेवम् ॥ ९ ॥

निरूह तथा अनुवासन यन्त्र के लक्षण—

वि०—निरूह और अनुवासन यंत्र का नेत्र—स्वर्णादि धातु का, लकड़ी का, अस्थि या बांस का बना होना चाहिये। इसका आकार गाय की पूँछ की भाँति क्रमशः आगे को पतला होता हुआ होना चाहिये । इसकी दिवार में कोई छेद

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नहीं होना चाहिये, चिकना, सीधा तथा मुख पर गोल (धार रहित) होना चाहिये ॥ ९ ॥

अथास्य प्रमाणमाह—

ऊनेऽब्दे पञ्च, पूर्णेऽस्मिन्नासप्तभ्योऽङ्गुलानि षट् ॥१०॥
सप्तमे सप्त, तान्यष्टौ द्वादशे, षोडशे नव ।
द्वादशैव परं विंशाद्वीक्ष्य वर्षान्तरेषु च ॥ ११ ॥
वयोबलशरीराणि प्रमाणमभिवर्द्धयेत् ।

स०—अपूर्णे वर्षे नेत्रस्य पंचांगुलानि । आतुरांगुलप्रमाणमिति गम्यते । दैर्घ्येण चेत्येतदप्यनुक्तं गम्यते । वक्ष्यति हि । स्वांगुष्ठेन समं मूले स्थौल्येनेति । आसप्तभ्यः सप्तवर्षाणि मर्यादीकृत्य षडंगुलानि प्रमाणम् । आङत्र मर्यादायां नाभिविधौ । तेन षड्वर्षे बाले षडंगुलानि नेत्रम् । अन्यथा सप्तवर्षस्याऽपि षडेवेति प्राप्नोति । वक्ष्यति तु सप्तमे सप्तेति । एवं च पूर्वापरं व्याहतं स्यात् । तस्मान्मर्यादायामाङित्यवेहि । सप्तमे वर्षे सप्तांगुलानि द्वादशे वत्सरे तान्यंगुलान्यष्टौ नेत्रम् । द्वादशानां पूरण इति तस्य पूरणे डडिति डट् । एवं षोडश इत्यत्र । षोडशसंवत्सरे नवांगुलानि नेत्रम् । विंशाद्वत्सरात् तस्मादूर्ध्वमेकविंशप्रभृतिवर्षेषु द्वादशांगुलानि नेत्रम् । नातोऽप्यधिकानीत्येवशब्दार्थः । विंशतिशब्दात्पूरणे डडितिविंशतेर्डितीति तिलोपाद्विंशशब्दः । वर्षांतरेष्वंतरालावच्छिन्नेषु वर्षेषु नवमदशमादिषु वीक्ष्य पर्यालोच्य नेत्रस्य प्रमाणमभिवर्धयेत् । चशब्दो भिन्नक्रमः । न केवलं वर्षांतरेषु प्रमाणमभिवर्धयेत् । यावद्वयोबलादीनि निरूप्य प्रमाणं चाऽभिवर्धयेत् ॥ १०-११ ॥

उक्त यन्त्र की लम्बाई आदि—

वि०—नेत्र प्रमाण—एक वर्ष से कम बच्चे के लिये पाँच अङ्गुल, दो वर्ष से लेकर ६ वर्ष तक ६ अङ्गुल, सातवें वर्ष में सात अङ्गुल, बारह वर्ष के लिए आठ अङ्गुल, सोलह वर्ष के लिए नौ अङ्गुल, बीस के आगे बारह अङ्गुल नेत्र होना चाहिये । बीच के वर्षों के लिये तथा वय, बल और शरीर को देखकर भी बस्तिनेत्र का प्रमाण बढ़ाना चाहिये ॥१०-११॥

स्वाङ्गुष्ठेन समं मूले स्थौल्येनाग्रे कनिष्ठया ॥ १२ ॥

स०—स्थौल्येन परिणाहेन स्वांगुष्ठेन तुल्यं मूले नेत्रं तथाऽग्नं प्रांतस्तस्मिन् कनिष्ठयांऽगुल्या समं नेत्रं स्यात् । खरनादेऽप्युक्तम् । बस्तिनेत्रमृजु श्लक्ष्णं सद्वृत्तं गुलिकामुखम् । भवेद्गोपुच्छसंस्थानं सुप्रवाहं त्रिकर्णिकम् । या त्रिभागप्रणयने मर्यादा कर्णिका भवेत् । द्वे कर्णिके चोपरिष्टाद्बस्त्याधारेऽथवान्तरे । स्वांगुष्ठकपरीणाहं मूलं नेत्रस्य शस्यते । मध्यं त्वनामिकातुल्यमग्रं तुल्यकनिष्ठिकम् । स्वेनांगुलिप्रमाणेन दैर्घ्यं स्याद्द्वादशांगुलम् । कर्कंधु प्रवहच्छिद्रं श्रेष्टमन्यद्यथावयः । विंशद्द्वादशषड्वर्षे द्वादशाष्टषडंगुलम् । कर्कंधुकसतीनाग्रमुखं छिद्रवहमित्यादि । सुनिरूप्य चोषत् । षड्द्वादशाष्टांगुलसंमितानि षड्विंशतिद्वादशवर्षजानाम् । स्युर्मंहरकर्कंधुसतीनवाहिच्छिद्राण्यपिहितानि चैव । यथा वर्योऽगुष्ठकनिष्ठिकाभ्यां मूलाग्रयोः स्यात् परिणाह इति ॥ १२ ॥

वि०—अपने अंगूठे के समान मूल में और आगे कनिष्ठिका अङ्गुलि के समान मोटा होना चाहिये ॥ १२ ॥

अधुना बिंदुद्वारेण नेत्रस्थौल्यप्रमाणमधिकं दर्शयन्नाह—

पूर्णेऽब्देऽङ्गुलमादाय तदर्द्धार्द्धप्रवर्द्धितम् ।
त्र्यङ्गुलं परमं छिद्रं मूलेऽग्रे वहते तु यत् ॥ १३ ॥
मुद्गं माषं कलायं च क्लिन्नं कर्कन्धुकं क्रमात् ।

स०—वर्षे पूर्णे सत्यंगुलमादाय स्वांगुलात्प्रभृति क्रमेण त्र्यंगुलं छिद्रं मूले नेत्रस्य भवति । किंभूतं छिद्रम् । अर्धस्याऽर्धमर्धार्धम् । तस्यांगुलस्यार्धार्धं तेन प्रवर्धितम् । तत्र प्रथमे वर्षेऽगुलमात्रं छिद्रं यावद्वर्षाणि षट् । सप्तमे वर्षे सपादमंगुलं यावदेकादश वर्षाणि । द्वादशे वर्षे सार्धमंगुलं यावत्षोडशवर्षाणि । षोडशे वर्षे पादोनमंगुलद्वयम् । सप्तदशे वर्षेऽगुलद्वयम् । अष्टादशे वर्षे सपादमंगुलद्वयम् । एकोनविंशतिवर्षे सार्धमंगुलद्वयम् । विंशतिवर्षस्य पादोनमंगुलत्रयम् । एकविंशतिवर्षस्य त्र्यंगुलं छिद्रमिति क्रमो वेद्यः । परममित्यनेनैतद्गमयति । परममुत्कर्षमाश्रित्येदं मूलच्छिद्रम् । मध्यमं तु यत्तच्छिद्रं स्वांगुष्ठेनेत्यनेनोक्तम् । ऊनवर्षस्य त्वर्धांगुलं छिद्रमेतदपेक्षया कल्प्यम् । अग्रे तु छिद्रं तद्भवति यन्मुद्गादि वहति । तत्र वार्षिकस्य मुद्गवाहि यावत्षड्वर्षम् । सप्तवर्षस्य माषवाहि यावदेकादशोऽब्दः । द्वादशवर्षस्य कलायवाहि षोडशवर्षस्य क्लिन्नकलायवाहि एकविंशतिवर्षस्य कर्कंधुवाहीति क्रमाद्वयःप्रमाणम् । ऊनवर्षस्य च न मुद्गादिवाहि कल्प्यम् । अग्रच्छिद्रप्रमाणं चैतदग्रे कनिष्ठयेत्यत्राऽपि संगच्छत एव । दैर्घ्यप्रमाणं चाऽत्र पक्षे पूर्वमेव योज्यम् । स्वांगुष्ठेन समं मूले स्थौल्येनेत्यनेन छिद्रप्रमाणं स्वमत्या भिषजा प्रकल्प्यम् । तथा त्र्यंगुलं परमं छिद्रमित्यत्र स्थौल्यप्रमाणं स्वधियैव निरूप्यम् । तंत्रकृता तु ग्रंथगौरवभयादुक्तप्रायत्वाच्चेह नोक्तम् ॥ १३ ॥

वि०—यन्त्र छिद्र—एक साल के बच्चे के लिए ६ अङ्गुल लम्बे यन्त्र का छिद्र मूल में एक अङ्गुष्ठ होना चाहिये, इस प्रकार इसको आधा का आधा अर्थात् एक चौथाई अङ्गुल बढ़ाते हुए तीन अङ्गुल परिमाण तक ही छेद को बढ़ाये । अगला छेद मूँग, उड़द, सूखी कलाय, क्लिन्न कलाय और बेर की गुठली निकालने योग्य क्रमशः होना चाहिये ॥ १३ ॥

वक्तव्य—प्रथम वर्ष में मूल में छेद अङ्गुलमात्र-जब तक आयु ६ साल, तथा नोक का छिद्र मूंग जाने योग्य । सात से लेकर ग्यारह वर्ष तक मूल में छेद $1\frac{1}{4}$ अङ्गुल नोक में उड़द जाने योग्य । बारह से सोलह वर्ष तक $1\frac{1}{2}$ अङ्गुल नोक में मटर जाने योग्य । सोलहवें में $1\frac{3}{4}$ अङ्गुल, सत्रहवें में दो अङ्गुल, अठ्ठारहवें में $2\frac{1}{4}$ अङ्गुल, उन्नीसवें में $2\frac{1}{2}$ अङ्गुल, बीसवें में $2\frac{3}{4}$ अङ्गुल और नोक में गीले मटर के जाने योग्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इक्कीसवें वर्ष में तीन अङ्गुल मूलछिद्र और नोक का छेद बेर के बराबर होना चाहिये।

मूलच्छिद्रप्रमाणेन प्रान्ते घटितकर्णिकम् ॥ १४ ॥
वर्त्याऽग्रे पिहितं मूले यथास्वं द्व्यङ्गुलान्तरम्।
कर्णिकाद्वितयं नेत्रे कुर्यात्

स०—मूले यच्छिद्रमुक्तं तत्प्रमाणेन प्रांते घटिता संपादिता कर्णिका छत्राकारा गुदाधिकांतःप्रवेशरोधिनी यस्मिंस्तदेवम्। तथा वर्त्या दशादिकृतया प्रांते पिहितं स्थगितम्। मूले यथास्वमूनवर्षादिकस्य तदंगुलप्रमाणेन तद्द्वयंगुलांतरं कर्णिकायुगलं मूलप्रदेशे नेत्रे विदधीत बस्तिपुटयोजनार्थम्॥१४॥

उक्त यन्त्र में कर्णिकादि का जोड़ना—

वि०—मूलछिद्र के प्रमाण से अगले किनारे पर एक कर्णिका (आड़) बनाये (जिससे नलिका आगे गुदा में अधिक न जाये)। इस नेत्र का अगला भाग रूई की बत्ती से बन्द रखे। मूल में अपनी दो अङ्गुलियों के अन्तर से दूसरी कर्णिका (बस्ति को बाँधने के लिये) नेत्र में करे ॥ १४ ॥

अत एवाह—

--तत्र च योजयेत् ॥ १५ ॥
अजाविमहिषादीनां बस्तिं सुमृदितं दृढम्।
कषायरक्तं निश्छिद्रग्रन्थिगन्धसिरं तनुम् ॥ १६ ॥
ग्रथितं साधु सूत्रेण सुखसंस्थाप्यभेषजम्।

स०—तत्रेत्यादि। तस्मिंश्च कर्णिकाद्वितयेऽजादीनां बस्तिं योजयेत्। आदिशब्देन गोहरिणवराहमहिषाणां ग्रहणम्। अजादीनामित्येवं निर्देशेऽप्यविमहिषग्रहणे लब्धे सात्वादेतयोर्ग्रहणमन्यजेभ्यो बस्तिभ्य एतद्वस्तेर्योग्यतरत्वप्रतिपादनार्थम्। किंभूतं बस्तिम्। सुमृदितं सस्नेहं मुहुः सुष्टु मर्दितं तथा दृढं तथा कषायेण हरीतक्यादिना रक्तं तथा छिद्रं च ग्रंथिश्च गंधश्च शिराश्च ताः निर्गता न संति यस्य तन्निश्छिद्रग्रंथिगंधशिरम्। तथा तनुं न स्थूलं तथा साधु सम्यक् सूत्रेण ग्रंथितं बद्धं तथा सुखेनाऽकृच्छ्रेण संस्थापनीयमौषधं यत्र तदेवम् ॥ १५-१६ ॥

वि०—इस दूसरी कर्णिका में बकरी, भेड़, भैंस आदि की मजबूत अच्छी प्रकार मली हुई बस्ति को बाँध देना चाहिये। बस्ति-हरड़ या कीकर से रँगने के कारण लाल, छिद्ररहित, गाँठरहित; गन्ध एवं शिराओं से रहित, पतली; उत्तम धागे से भली प्रकार बँधी भली प्रकार सुगमता से जिसमें औषध रखी जा सके, ऐसी होनी चाहिये ॥ १५-१६ ॥

बस्त्यभावेऽङ्कपादं वा न्यसेद्वासोऽथवा घनम् ॥ १७ ॥

स०—बस्तेरभावे सत्यंकपादं छागैणाद्यवयवविशेषं वा न्यसेन्नेत्रे योजयेत्। अथवा वस्त्रं घनं न्यसेत् ॥ १७ ॥

बस्ति के अभाव में कर्तव्य—

वि०—बस्ति के अभाव में चिमगादड़ का चर्म; या मजबूत वस्त्र को काम में ले आना चाहिये ॥ १७ ॥

वक्तव्य—हेमाद्रि ने अङ्कपाद का अर्थ ऊरुचर्म या पादचर्म किया है। अरुणदत्त ने चरणादि अवयवविशेष किया है।

निरूहमात्रा प्रथमे प्रकुञ्चो वत्सरे परम्।
प्रकुञ्चवृद्धिः प्रत्यब्दं यावत्षट्प्रसृतास्ततः ॥ १८ ॥
प्रसृतं वर्द्धयेदूर्ध्वं द्वादशाष्टादशस्य तु।
आसप्ततेरिदं मानं, दशैव प्रसृताः परम् ॥ १९ ॥

स०—निरूहस्य मात्रा प्रथमे वर्षे कषायस्नेहसहितस्य प्रकुंचः पलप्रमाणम्। षण्मासादौ त्वेतदनुसारेणार्धपलादि कल्प्यम्। वर्षात्परं प्रकुञ्चवृद्धिः प्रतिसंवत्सरं कार्या यावत्षट् प्रसृता द्वादश पलानि। तत ऊर्ध्वं प्रसृतं वर्धयेत्। प्रत्यब्दमित्यनुवर्तते। ततो द्वादशवर्षस्यैव द्वादश पलानि। अनंतरं त्रयोदशवर्षादिषु प्रतिवर्षं पलद्वयं निरूहमात्रायां वर्धयितव्यं क्रमेणैव यावत्सप्तदशवर्षाणि। अष्टादशवर्षस्य तु द्वादश प्रसृताश्चतुर्विंशतिपलानि। इदं मानं प्रमाणं सप्ततिवर्षाणि। यावत्। परं सप्ततेरूर्ध्वं दशैव प्रसृता मानं नाऽधिकम्॥१८-१९॥

निरूह बस्ति की मात्रा—

वि०—प्रथम वर्ष में निरूह की मात्रा एक प्रकुञ्च (पल प्रमाण) है; इसके आगे प्रत्येक वर्ष के लिये एक प्रकुञ्च मात्रा बढ़ाते जाना चाहिये, जब तक कि यह मात्रा ६ प्रसृत न हो जाये, इसके आगे प्रतिवर्ष एक प्रसृत मान को बढ़ाये। अट्ठारह वर्ष की आयु के लिये बारह प्रसृत (२४ पल) देवे। सत्तर वर्ष की आयु तक यह प्रमाण है। सत्तर वर्ष के आगे दस प्रसृत ही प्रमाण है—इससे अधिक नहीं ॥ १८-१९ ॥

एवं सांवत्सरिकादारभ्य यावद्वर्षशतिकस्तावन्निरूहमात्रामभिधायाऽनुवासनमात्रामधिकृत्याह—

यथायथं निरूहस्य पादो मात्राऽनुवासने।

स०—यथायथं यथास्वं वार्षिकस्यैकविंशतिवत्सरादेर्वा निरूहस्य पादश्चतुर्भागो मात्राऽनुवासनेऽनुवासनविषये मात्रा यस्य पलं निरूहस्तस्य कर्षप्रमाणमनुवासनमित्यर्थः। एवं सर्वत्र कल्प्यम्।

अनुवासन बस्ति की मात्रा—

वि०—अनुवासन की मात्रा—निरूह के अनुसार प्रतिवर्ष निरूह की मात्रा का $\frac{1}{4}$ चौथाई अर्थात् कर्ष परिमाण है। अर्थात् एक पल के स्थान में एक कर्ष, दो पल के स्थान में दो कर्ष आदि।

आस्थाप्यं स्नेहितं स्विन्नं शुद्धं लब्धबलं पुनः ॥ २० ॥
अन्वासनार्हं विज्ञाय पूर्वमेवानुवासयेत्।
शीते वसन्ते च दिवा रात्रौ केचित्ततोऽन्यदा ॥ २१ ॥
अभ्यक्तस्नातमुचितात्पादहीनं हितं लघु।
अस्निग्धरूक्षमशितं सानुपानं द्रवादि च ॥ २२ ॥
कृतचङ्क्रमणं मुक्तविण्मूत्रं शयने सुखे।
नात्युच्छ्रिते न चोच्छीर्षे संविष्टं वामपार्श्वतः ॥ २३ ॥
सङ्कोच्य दक्षिणं सक्थि प्रसार्य च ततोऽपरम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—आस्थाप्यं निरूहणार्हं स्निग्धं तथा स्विन्नं तथा शुद्धमूर्ध्वाधस्तथा भूयोऽपि लब्धबलं तथाऽनुवासनयोग्यं विदित्वा पूर्वमेव निरूहादनुवासयेत्। शीते हेमंतशिशिरयोर्ऋत्वोस्तथा वसंते दिवाऽनुवासयेत्। केचिदाचार्या अन्यदा शीताद्वसंताच्चाऽन्यस्मिन् ग्रीष्मप्रावृट्शरदाख्ये ऋतौ रात्रावनुवासयेत्। केचिदिति भिन्नक्रमस्ततोऽन्यदेत्यतोऽनंतरं द्रष्टव्यः। इति केचिदाहुरिति वाक्यशेषः। धान्वंतरास्तु सर्वथैव रात्रावनुवासनं नेच्छंति। धन्वंतरिमतमधिकृत्य संग्रहेऽधिजगे। न रात्रौ प्रणयेद्बस्तिं दोषोत्क्लेशो हि रात्रिजः। स्नेहो वीर्ययुतः कुर्यादाध्मानं गौरवं ज्वरमिति। तदेवं तद्देशांतरादिवशात् प्रमाणयितव्यम्। किंभूतं नरम्। अभ्यक्तस्नातं पूर्वमभ्यक्तः पश्चात्स्नातः पूर्वकालेति समासः। उचिताद्यदन्नेन भोजनमभ्यस्तं तस्माच्चतुर्थभागहीनमशितं तथा हितं लघुगुणयुक्तं तथा किंचिदस्निग्धरूक्षं तथा सानुपानं द्रव्यादि च। आदिशब्देन द्रवोष्णमनभिष्यंदीत्यादि विशिष्टं भुक्तवंतमिति गम्यते। उक्तं च संग्रहे। अतिस्निग्धाशिनो ह्युभयमार्गात् स्नेहो मदमूर्च्छाऽग्निसादहृल्लासादीन् जनयति। रूक्षाशिनो विष्टंभं बलवर्णहानिं च। अल्पमात्रद्रवाशिनोऽविसृष्टविण्मूत्रस्य चान्नावृतेन तदावरणाद्व्यापदमिति। किंभूतम्। कृतचंक्रमणं तथा त्यक्तमूत्रपुरीषं तथा शयने सुखावहे सविष्टं स्थितम्। किंभूते। नाऽत्युच्छ्रिते नाऽत्युन्नते न चोच्छीर्षे त्यक्तोच्छीर्षे। कथं संविष्टम्। वामपार्श्वतो वामपार्श्वेन। संकोच्य दक्षिणं सक्थि वामसक्थ्न उपरीति वृद्धवैद्याः। ततो दक्षिणसक्थ्नोऽपरं वामं सक्थि प्रसार्य। संग्रहे चोक्तम्। शयने नात्युच्छ्रिते स्वास्तृत ईषदुन्नतपाददेशे वामपार्श्वेन प्राक्शिरसं संवेशयेदिति॥ २०-२३॥

अनुवासन की विधि—

वि०—आस्थापन बस्ति देने के योग्य मनुष्य का स्नेहन-स्वेदन करके वमन-विरेचन से शुद्ध होने पर फिर से शरीर में बल आ जाने पर अनुवासन के योग्य जान कर निरूह देने से पूर्व अनुवासन बस्ति दे। शीत ऋतु में और वसन्त में दिन के समय में ही और शेष ग्रीष्म, शरद् और वर्षा में रात्रि में बस्ति देनी चाहिये ऐसा कुछ लोगों का मत है। (वस्तुतः रात्रि में बस्ति सर्वथा त्याज्य है, 'न बस्तिं प्रणयेद्रात्रौ।' अ. सं. सू. अ. २८)। अभ्यङ्ग और स्नान करके प्रतिदिन जो भोजन की मात्रा हो उसमें से चौथाई मात्रा कम करके हितकारी एवं लघु तथा ईषत् स्निग्ध-रूक्ष भोजन को द्रव आदि अनुपान के साथ खाकर, थोड़ा टहलकर मल-मूत्र को त्याग करके सुखद शय्या, जो बहुत ऊँची न हो तथा शिरहाना ऊँचा न हो, पर वामपार्श्व से लेट कर दक्षिण टाँग को मोड़कर (जिससे पेट पर दबाव पड़े) और वाम टाँग को पसार कर रखे॥ २०-२३॥

वक्तव्य—सुश्रुत ने रात्रि में बस्ति देना निषिद्ध कहा है किन्तु अष्टाङ्गसंग्रह में रात्रि में सामान्यतः निषेध करते हुए भी दोष-कालादि के विचार से रात्रि में भी अनुवासन देने को कहा है—यथा-'न रात्रौ प्रणयेद् बस्तिं दोषोत्क्लेशो हि रात्रिजः। स्नेहवीर्ययुतः कुर्यादाध्मानं गौरवज्वरम्॥' 'अल्पपित्तकफं रूक्षं भृशं वातरुजार्दितम्। भुक्ते जीर्णाशनं कामं रात्रावप्यनुवासयेत्॥ केवलानिलातिपीडितं स्वशुद्धमप्य निरूपितवेलमप्यनुवासयेदात्ययिकत्वात्।' सं. सू. अ. २८।

अथास्य नेत्रं प्रणयेत्स्निग्धे स्निग्धमुखं गुदे॥ २४॥
उच्छ्वास्य बस्तेर्वदने बद्धे हस्तमकम्पयन्।
पृष्ठवंशं प्रति ततो नातिद्रुतविलम्बितम्॥ २५॥
नातिवेगं न वा मन्दं सकृदेव प्रपीडयेत्।
सावशेषं च कुर्वीत वायुः शेषे हि तिष्ठति॥ २६॥

स०—अस्यैवंभूतावस्थस्यातुरस्य गुदे स्निग्धे कृते बस्तेर्वदन उच्छ्वासवातं निःसार्य बद्धे सति नाऽतिशीघ्रं नाऽविलंबितं नाऽतिवेगं वा न मंदं तथा पृष्ठवंशाभिमुखमेकवारमेव नेत्रं स्निग्धप्रांतं प्रपीडयेत्। कथं प्रपीडयेत् हस्तमकंपयन्। अतिद्रुतादिपीडनदोषा बस्तिव्यापदि वक्ष्यमाणाः। सावशेषं च स्नेहं कुर्वीत। कुतो हेतोरित्याह। यस्मात् शेषे स्नेहे वायुस्तिष्ठति॥ २४-२६॥

बस्ति-प्रयोग-विधि—

वि०—इसके उपरान्त स्निग्ध गुदा में स्निग्धमुख किया नेत्र प्रविष्ट करे। बस्ति के शरीर को दबाकर वायु निकाल देवे। फिर नेत्र से बस्ति को बाँधकर पृष्ठवंश की दिशा में नेत्र को प्रविष्ट करे। हाथ को न हिलाते हुए, न बहुत जल्दी और न बहुत धीरे; न बहुत जोर से और न बहुत मन्द रूप में अपितु एक समानवेग से एक बार ही बस्ति को दबाना चाहिये। बस्ति में बस्ति-द्रव्य थोड़ा बचा ले; क्योंकि सम्पूर्ण खाली हो जाने पर बस्ति में वायु रह जाती है॥ २४-२६॥

दत्ते तूत्तानदेहस्य पाणिना ताडयेत्स्फिजौ।
तत्पाष्णिभ्यां तथा शय्यां पादतश्च त्रिरुत्क्षिपेत्॥ २७॥
ततः प्रसारिताङ्गस्य सोपधानस्य पार्ष्णिके।
आहन्यान्मुष्टिनाऽङ्गं च स्नेहेनाभ्यज्य मर्दयेत्॥ २८॥
वेदनार्तमिति स्नेहो न हि शीघ्रं निवर्तते।
योज्यः शीघ्रं निवृत्तेऽन्यःस्नेहोऽतिष्ठन्न कार्यकृत्॥२९॥

स०—दत्ते च स्नेहे सत्युत्तानगात्रस्य तु तस्य स्फिजौ हस्तेनाहन्यात्। तथा तेनैव प्रकारेण तत्पार्ष्णिभ्यां स्फिजौ ताडयेत्। शय्यां खट्वां पादतश्चरणदेशात्त्रीन्वारानुत्क्षिपेत्तु मूर्धतः। ततः शय्योत्क्षेपादनंतरं प्रसारितशरीरस्य दत्तगेंडुकस्य पार्ष्णिके पार्ष्ण्यौ मुष्ट्या हन्यात्। अंगं शरीरं च स्नेहेन तैलादिनाऽभ्यज्य मर्दयेत्। किमेवं क्रियत इत्याह। अंगं वेदनार्तं पीडातुरमिति हेतोर्यस्मादाशु स्नेहो न निवर्तते। शीघ्रमपयाते च स्नेहे सत्यपरः स्नेहो देयः। कस्मादेवं विधीयत इत्याह। स्नेहश्च शरीराभ्यंतरेऽतिष्ठन्नैव कार्यकृत् स्नेहने समर्थ इत्यर्थः॥ २७-२९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बस्ति देने के बाद कर्तव्य और स्नेहनिवृत्ति—

वि०—बस्ति देने के उपरान्त रोगी को चित्त लिटाकर उसके नितम्बों पर हाथों से थपथपाये। फिर रोगी की एड़ियों से उसके नितम्बों को थपथपाये। पैर से रोगी की शय्या को तीन बार ऊपर उठा-उठा कर नीचे छोड़े (जिससे औषध द्रव्य ठीक तरह आंत्र में पहुँच जाये)। फिर शरीर को फैला कर एड़ियों में तकिया लगा देवे। पीड़ा होने पर मुट्ठियों से अङ्गों पर हल्की चोट करे; शरीर पर स्नेह का अभ्यङ्ग करके मर्दन करे। इस प्रकार करने से स्नेह शीघ्र वापिस नहीं आता। यदि स्नेह शीघ्र वापिस आ जाये तो दूसरी बार फिर स्नेह देना चाहिये क्योंकि शरीर में न रुका स्नेह कार्य करने में असमर्थ होता है ॥ २७-२९ ॥

दीप्ताग्निं त्वागतस्नेहं सायाह्ने भोजयेल्लघु।

स०—दीप्ताग्निं तु पुरुषं निवृत्तस्नेहं संतं लघुमात्रया स्वभावतश्चाशयेत्।

स्नेहनिवृत्ति के बाद कर्तव्य—

वि०—स्नेह बाहर आ जाने पर अग्नि प्रदीप्त हो, भूख लग गई हो तो सायंकाल में लघु भोजन देवे।

निवृत्तिकालः परमस्त्रयो यामास्ततः परम् ॥ ३० ॥
अहोरात्रमुपेक्षेत परतः फलवर्तिभिः।
तीक्ष्णैर्वा वर्तिभिः कुर्याद्यत्नं स्नेहनिवृत्तये ॥ ३१ ॥

स०—स्नेहस्य त्रयः प्रहराः परो निवृत्तिकालः। ततः प्रहरत्रयात् परतो रात्रिंदिवमुपेक्षेत। न तदाकृष्टयै यत्नं कुर्यात्। परतोऽहोरात्रात्फलवर्तिभिर्वक्ष्यिकिर्सितोक्ताभिरथवा तीक्ष्णैर्बस्तिकल्पोक्तैर्बस्तिभिः स्नेहागमनार्थं यतेत ॥३०-३१॥

स्नेहनिवृत्ति का समय—

वि०—स्नेह के लौटने का उत्तम समय तीन प्रहर है। इतने समय में वापिस न आये तो दिन-रात अर्थात् चौबीस घण्टेतक प्रतीक्षा करे। इतने समय में भी वापिस न आये तो तीक्ष्ण फलवर्तियों से या तीक्ष्ण बस्तियों द्वारा उसको वापिस लाने का यत्न करना चाहिये ॥ ३०-३१ ॥

अतिरौक्ष्यादनागच्छन्न चेज्जाड्यादिदोषकृत्।
उपेक्षेतैव हि ततोऽध्युषितश्च निशां पिबेत् ॥ ३२ ॥
प्रातर्नागरधान्याम्भः कोष्णं केवलमेव वा।

स०—अतिरौक्ष्यादनागच्छन् स्नेहो यदि जाड्याग्निसादादिदोषान्न विधत्ते तदोपेक्षेतैव न निष्कासने यतेतेत्यर्थः। ततो निशां रात्रिमध्युषितः पुमान् प्रातः प्रभाते शुंठीधान्यांबु कदुष्णं पिबेत्। केवलमेव वा नागरधान्याकरहितं कोष्णं जलं पिबेत् ॥ ३२ ॥

स्नेहनिवृत्ति के अभाव में कर्तव्य—

वि०—अतिरूक्षता के कारण यदि स्नेह वापिस न आकर भी जड़ता आदि दोष उत्पन्न न करे तो इसकी उपेक्षा ही कर देवे—इसको बाहर निकालने का प्रयास न करे। रात्रि बीत जाये तब प्रातः सोंठ-धनिये का गुनगुना पानी अथवा केवल गरम पानी पिये ॥ ३२ ॥

अन्वासयेत्तृतीयेऽह्नि पञ्चमे वा पुनश्च तम् ॥ ३३ ॥
यथा वा स्नेहपक्तिः स्यादतोऽत्युल्बणमारुतान्।
व्यायामनित्यान् दीप्ताग्नीन् रूक्षांश्च प्रतिवासरम् ॥ ३४ ॥

स०—तमातुरं भूयस्तृतीये दिवसे पंचमे वाऽनुवासयेत्। अथवा यथा स्नेहपाको भवेदित्यनन्यपेक्षया सप्तरात्रेऽधिके न्यूने वा त्रिरात्रे वा यथायोग्यमनुवासयेत्। अतोऽस्मादेव हेतोरधिकपवनान्व्यायामशीलानग्निदीप्तान् रूक्षांश्च पुरुषान् प्रत्यहमनुवासयेत् ॥ ३३-३४ ॥

अनुवासन का समय—

वि०—इस रोगी को तीसरे दिन अथवा पाँचवें दिन फिर अनुवासन देना चाहिए। अथवा जितने समय में स्नेह का पाचन हो; उतने समय बाद अग्नि के अनुवासन देवे। (अधिक से अधिक सात दिन, कम से कम तीन दिन) जिनमें वायु की प्रधानता हो, जो नित्य व्यायाम करते हों, जिनकी अग्नि दीप्त हो और जो रूक्ष हों—उन्हें प्रतिदिन अनुवासन देना चाहिये ॥ ३३-३४ ॥

इति स्नेहैस्त्रिचतुरैः स्निग्धे स्रोतोविशुद्धये।
निरूहं शोधनं युञ्ज्यादस्निग्धे स्नेहनं तनोः ॥ ३५ ॥

स०—इति पूर्वोक्तेन प्रकारेण स्नेहैस्त्रिचतुरैर्वा स्निग्धे सति स्रोतोविशोधनार्थं निरूहं शोधनं प्रयोजयेत्। अस्निग्धे सति तनोः शरीरस्य स्नेहनं प्रयोजयेत्। त्रयो वा चत्वारो वा त्रिचतुराः। संख्ययाऽव्ययेति समासः। चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानमित्यच् समासांतः ॥ ३५ ॥

निरूह का समय—

वि०—इस प्रकार तीन या चार स्नेहों से स्निग्ध हो जाने पर स्रोतों के शोधन के लिये शोधन निरूह देना चाहिये। शरीर के अस्निग्ध होने पर स्नेहन देना चाहिये; निरूह नहीं ॥ ३५ ॥

पञ्चमेऽथ तृतीये वा दिवसे साधके शुभे।
मध्याह्ने किञ्चिदावृत्ते प्रयुक्ते बलिमङ्गले ॥ ३६ ॥
अभ्यक्तस्वेदितोत्सृष्टमलं नातिबुभुक्षितम्।
अवेक्ष्य पुरुषं दोषभेषजादीनि चादरात् ॥ ३७ ॥
बस्तिं प्रकल्पयेद्वैद्यस्तद्विद्यैर्बहुभिः सह।

स०—अथानुवासनादनंतरं 'तृतीये पंचमे वा वासरे मध्याह्ने किंचिदावृत्तेऽतिक्रांते तथा बलिमंगले विहिते सति पुरुषं कृताभ्यक्तस्वेदितं त्यक्तमलं किंचिद् बुभुक्षितं तथा प्रकृत्यादिभिर्ज्ञात्वा दोषादीन् विदित्वा। आदिशब्देन सात्म्यबलादिपरिग्रहः। इत्येवं सर्वमधिगत्य वैद्यो बस्तिं प्रकल्पयेत्। ननु दूष्यं देशमित्यादिना सर्वमुक्तमेवैतत्तत्किमनेनेति। ब्रूमः। निरूहमपि सापायं पश्यताचार्येणैतदुक्तम्। दूष्यदेशादि महता यत्नेनाऽऽलोचनीयमिति प्रतिपादनार्थं निरूह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मात्रा प्रथममित्यादि सर्वमालोच्यम् । कथं प्रकल्पयेदित्याह । मद्विधैर्वैद्यकशास्त्रज्ञैर्बहुभिः सह सार्धम् ॥ ३६-३७ ॥

निरूहण बस्ति की विधि—

वि०—निरूह विधि—पाँचवें या तीसरे दिन शुभ दिन निश्चित करके मध्याह्न के कुछ बीत जाने पर बलि एवं मंगलाचार करके, शरीर पर तैल का अभ्यंग और स्वेदन कर, मल का त्याग करके, थोड़ी भूख का अनुभव होने पर रोगी की आयु आदि तथा दोष, औषध आदि का विचार कर-वस्ति को जानने वाले अनेक वैद्यों के साथ बस्ति की कल्पना पर विचार करे। ('तद्विद्यैः बस्तिकुशलैः-वैद्यकशास्त्रज्ञैः') ॥ ३६-३७ ॥

अथ निरूहकल्पनामाह—

क्राथयेद्विंशतिपलं द्रव्यस्याष्टौ फलानि च ॥ ३८ ॥
ततः क्राथाच्चतुर्थांशं स्नेहं वाते प्रकल्पयेत् ।
पित्ते स्वस्थे च षष्ठांशमष्टमांशं कफेऽधिके ॥ ३९ ॥
सर्वत्र चाष्टमं भागं कल्काद्भवति वा यथा ।
नात्यच्छसान्द्रता बस्तेः पलमात्रं गुडस्य च ॥ ४० ॥
मधुपट्वादिशेषं च युक्त्या—

स०—द्रव्यस्य बस्तिकल्पोक्तस्य निरूहकल्पनार्थं विंशतिपलानि तथाऽष्टौ फलानि मदनफलानि सामान्यपरिभाषया षोडशगुणं जलं दत्त्वा क्राथयेत् । चतुर्भागावशेषश्च ग्राह्यः । तस्मादेवंकृतात् क्राथाच्चतुर्थांशं स्नेहं वाते प्रकल्पयेत् । द्वादशप्रसृतो हि निरूहः । तत्र स्नेहं षट्पलिकं कल्पयेदित्यर्थः । पित्तेऽधिके स्वस्थे च पुरुषे षष्ठांशं स्नेहं चतुष्पलिकं प्रकल्पयेदिति प्रकृतम् । कफेऽधिके स्नेहमष्टमांशं त्रिपलिकं प्रकल्पयेत् । सर्वत्र च वातपित्तकफेष्वधिकेषु स्वस्थवृत्तेश्चाष्टमं भागं त्रीणि पलानि कल्कस्य प्रयोजयेदिति प्रकृतम् । ननु स्वस्थस्य प्रयोजयेदिति प्रकृतम् । ननु स्वस्थस्य दोषचालनं प्रतिषिद्धं तंत्रांतरीयैः । तदुग्रंथो हि । यो हि संचालयेत्सुप्तं वने सिंहं करादिभिः । स दोषांश्चालयेत् स्वस्थान् प्रच्छर्दनविरेचनैरिति । तस्मात् स्वस्थे निरूहस्य कल्पना न युक्तेति । तदेतदसत् । यस्मात् प्रागभिहितम् । शीतोद्भवं दोषचयं वसंते विशोधयन् ग्रीष्मजमभ्रकाले । घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगानृतुजान्न जात्विति । तस्मादाचार्यवचनाज्ज्ञायते स्वस्थवृत्तेरपि शुद्धिविधानं संमतमिति तंत्रकृतस्तंत्रांतरीयं मतं त्वसदेव शिष्टव्यवहारविरुद्धत्वात् । सर्वत्र वाते पित्ते कफे च कल्कात् पेष्यद्रव्यादष्टमं भागं त्रीणि पलानि कल्पयेत् । भवति वेत्यादि । यथा नाऽत्यच्छसांद्रता बस्तेः । यथा वा बस्तिरत्यच्छोऽतिसांद्रो वा घनो न भवति तथा कल्कः कल्पयितव्यः । पलमात्रं गुडस्य चेति पित्ते तदधिकं नेति ज्ञापनार्थं मात्रग्रहणम् । मधुपट्वादिशेषं च युक्त्या प्रकल्पयेत् । तत्रेयं युक्तिः । माक्षिकस्य पलचतुष्टयं सैंधवस्य च कर्षः । तथा क्वचिद्यवक्षारस्य कर्षः । आदिग्रहणान्मांसरससुरासवमूत्रक्षीरकांजिकानां ग्रहणम् ॥ ३८-४० ॥

निरूह कल्पना, दोषानुसार स्नेहप्रमाण—

वि०—निरूहकल्प—द्रव्य (बस्तिकल्पोक्त दशमूल आदि) के बीस पल; मैनफल के आठ फल; (इन आठ फलों की मात्रा एक पल होती है) इनमें सोलहगुना जल मिला कर चौथाई क्वाथ करना चाहिये। इस क्वाथ से चौथाई स्नेह वातदोष में मिलाये : पित्तदोष में और स्वस्थ अवस्था में क्वाथ का षष्ठांश; कफ की अधिकता में अष्टमांश स्नेह मिलाये अथवा सब स्थानों पर कल्क का अष्टमांश स्नेह मिलाना चाहिये। अथवा वस्ति-द्रव न तो बहुत पतला हो और न बहुत गाढ़ी हो ऐसा करे। इसमें गुड़ एक पल मिलाये; मधु और नमक आदि शेष द्रव्य युक्ति से मिलाने चाहिये ॥ ३८-४० ॥

वक्तव्य—वृन्द में—'मधुस्नेहनकल्काख्यकषायावापतः क्रमात् । त्रीणि षड् द्वे दश त्रीणि पलान्यनिलरोगिणाम् ॥' आदि शब्द से मूत्र, फल, दूध, मांसरस आदि लेने चाहिये।

—सर्वं तदेकतः ।
उष्णाम्बुकुम्भीबाष्पेण तप्तं खजसमाहतम् ॥ ४१ ॥
प्रक्षिप्य बस्तौ प्रणयेत्पायौ नात्युष्णशीतलम् ।
नातिस्निग्धं न वा रूक्षं नातितीक्ष्णं न वा मृदु ॥ ४२ ॥
नात्यच्छसान्द्रं नो नातिमात्रं नापटु नाति च ।
लवणं तद्वदम्लं च—

स०—तदेतत्सर्वमौषधमेकत एकस्मिन् कृत्वा भेषजपाकातिक्रांतिपरिहारार्थमुष्णांबु कुंभीबाष्पेण तप्तं खजेन दर्व्या हननकाष्ठेन समाहतमालोडितं तथा ब्रह्मदत्तेत्यादिना चाऽभिमंत्रितं बस्तौ प्रक्षिप्य पायौ गुदे प्रणयेत् । नाऽत्युष्णं नाऽतिशीतलं नाऽतिस्निग्धं न वा रूक्षं नाऽतितीक्ष्णं न वा मृदु नाऽत्यच्छं नाऽतिसांद्रं नाऽतिघनं नोनमात्रं न चाऽतिमात्रं नाऽपटु नातिलवणं तद्वदम्लं चेत्यादिना नाऽत्यम्लम् । अतिशब्दप्रयोगादत्र मध्यमावस्थानुगमः ॥ ४१-४२ ॥

वि०—सब वस्तुओं को मिलाकर गरम पानी से भरे पात्र के बाष्प से गरम कर मथानी से खूब मथे। इस द्रव्य को बस्ति यन्त्र में डालकर न बहुत गरम, न बहुत ठण्डा गुदा में देवे। यह द्रव्य न बहुत स्निग्ध, न बहुत रूक्ष; न बहुत तीक्ष्ण, न बहुत मृदु, न बहुत पतला और न बहुत गाढ़ा, न मात्रा में कम और न मात्रा में अधिक; न नमकरहित और न बहुत नमक वाला; न बहुत अम्ल और न बहुत थोड़े अम्ल का होना चाहिये ॥ ४१-४२ ॥

वक्तव्य—दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतद्वयम् । विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतत्रयम् ॥ एकीभूते ततः स्नेहे कल्कस्य प्रसृतं क्षिपेत् । संमूर्च्छिते कषायं तु चतुष्प्रसृतसम्मितम् ॥ वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम् । एवं प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत् ॥ सु. चि. अ. ३८ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सांप्रतमन्यमतमभिधत्ते—

—पठन्त्यन्ये तु तद्विदः ॥ ४३ ॥

मात्रां त्रिपलिकां कुर्यात्स्नेहमाक्षिकयोः पृथक् ।
कर्षार्द्धं माणिमन्थस्य स्वस्थे कल्कपलद्वयम् ॥ ४४ ॥
सर्वद्रवाणां शेषाणां पलानि दश कल्पयेत् ।

स०—पठंतीत्यादि । तद्विदो बस्तिविद् एवं पठंति । यथा । मात्रां त्रिपलिकां कुर्यादित्यादि ॥ ४३-४४ ॥

अन्य मत—

वि०—बस्ति को जानने वाले कुछ आचार्य दूसरे प्रकार से पढ़ते हैं यथा—स्वस्थ अवस्था में—स्नेह और मधु की पृथक्-पृथक् मात्रा तीन पल, सेन्धानमक आधा कर्ष, कल्क दो पल, शेष सब द्रव्य दस पल लेकर बस्ति बनाये ॥ ४३-४४ ॥

माक्षिकं लवणं स्नेहं कल्कं क्काथमिति क्रमात् ॥ ४५ ॥
आवपेत निरूहाणामेष संयोजने विधिः ।

स०—संप्रति निरूहावयवानां माक्षिकादीनां संयोजनविधिमाह । माक्षिकमित्यादि । माक्षिकादि क्रमादावपेत् । कुंडके माक्षिकं प्रथमं प्रक्षिप्य मर्दयेत् । ततस्तत्रैव लवणं क्षिप्त्वा मेलयेत् । ततो लवणं मर्दयित्वा मिश्रयेत् । एवं स्नेहं ततोऽनु कल्कं ततः क्काथमित्यनेन क्रमेण मिश्रयेदित्यर्थः । एवं योजितानि द्रव्याणि समरसतां यांति । समरसभावेन निरूहस्य सम्यग्योगो भवति । निरूहाणां संयोजने मिश्रण एष विधिरेतद्विधानम् ॥ ४५ ॥

वि०—मधु, नमक, स्नेह, कल्क और क्काथ इनको क्रमशः मिलाये । यह निरूहों में द्रव्यों के मिश्रण का नियम है ॥ ४५ ॥

उत्तानो दत्तमात्रे तु निरूहे तन्मना भवेत् ॥ ४६ ॥
कृतोपधानः सञ्जातवेगश्चोत्कटुकः सृजेत् ।

स०—निरूहे दत्तमात्रे तूत्तानः संस्तन्मना निरूहवेगे दत्तावधानस्तथा कृतोपधानः संतिष्ठेत् । समुद्गतवेगश्चोत्कटुकः संस्यजेद्वेगमिति शेषः ॥ ४६ ॥

निरूहण के पश्चात् कर्तव्य—

वि०—निरूह ले लेने पर रोगी पीठ के बल उत्तान लेटकर निरूह में मन को लगाये । शिर के नीचे तकिया रखकर लेटे, मल-प्रवृत्ति होने पर उकडू बैठकर मलत्याग करे ॥ ४६ ॥

आगतौ परमः कालो मुहूर्तो मृत्यवे परम् ॥ ४७ ॥
तत्रानुलोमिकं स्नेहक्षारमूत्राम्लकल्पितम् ।
त्वरितं स्निग्धतीक्ष्णोष्णं बस्तिमन्यं प्रपीडयेत् ॥ ४८ ॥
विदध्यात्फलवर्तिं वा स्वेदनोत्त्रासनादि च ।

स०—आगतौ प्रत्यागमने कालः परमो मुहूर्तः । अपरस्तस्मान्मुहूर्तादन्यो विट्श्रद्धागमनकालो मृत्यवे मरणाय । तत्र तस्मान्मुहूर्तात्परमनागतनिरूहस्य त्वरितमपरं बस्तिं निरूहं प्रपीडयेदिति संबंधः । किंभूतं निरूहम् । आनुलोमिकमनुलोमकरम् । स्नेहस्तथा क्षारो यवक्षारादिस्तथा मूत्रं गोमूत्रमम्लं तक्रकांजिकादि तैः कल्पितं निरूहितम् । तथा स्निग्धं च तीक्ष्णमुष्णं च । स्नेहयोगादेव स्निग्धत्वे सिद्धे स्निग्धग्रहणं निरूहाणामस्निग्धतरत्वप्रतिपादनार्थम् । आनुलोमिकमित्यध्यात्मादित्वाट्ठञ् । अथवा फलवर्तिं विदध्यात् । फलेन मदनफलेन युक्ता वर्तिः सा चार्शश्चिकित्सिते वक्ष्यमाणा । स्वेदनोत्त्रासनादि च । स्वेदनं स्वेदः । उत्त्रासनं खड्गहस्तयोधदर्शनादिना । कुपितनृपखड्गव्यग्रोग्रबाहुदर्शनादिनाऽऽकुलं कुर्यात् ॥ ४७-४८ ॥

निरूहण की अवधि—

वि०—निरूह बस्ति के लौटने का अधिक से अधिक समय एक मुहूर्त (दो घटिका) है । इससे अधिक समय लगाना मृत्यु के लिये (घातक) है । इस अवस्था में अनुलोमकारक-स्नेह-एरण्डतैलादि, क्षार-यवक्षार आदि, मूत्र-गोमूत्रादि, अम्ल-कांजी आदि से बनाई, स्निग्ध, तीक्ष्ण और उष्ण दूसरी बस्ति रोगी को जल्दी से देवे । अथवा फलवर्ति बरते और स्वेदन करे तथा त्रासन (भय देना) आदि का प्रयोग करे ॥ ४७-४८ ॥

स्वयमेव निवृत्ते तु द्वितीयो बस्तिरिष्यते ॥ ४९ ॥
तृतीयोऽपि चतुर्थोऽपि यावद्वा सुनिरूढता ।

स०—फलवर्त्याद्यायासं विनापि निवृत्ते निरूहे सति द्वितीयो निरूह इष्यते । यत्नविशेषेण तु निरूहे निवृत्ते सति नाऽन्यं बस्तिं प्रपीडयेदित्युक्तं भवति । तृतीयोऽपीत्यपिः समुच्चये । एवं चतुर्थोऽपीति । यावद्वेति । पंचमादयोऽपि बस्तयो देया यावत्सम्यङ्निरूढत्वं स्यात् ॥ ४९ ॥

स्वयं निरूहण होने पर कर्तव्य—

वि०—यदि बस्ति अपने आप (अतिशीघ्र) वापिस निकल आये तब दूसरी बस्ति देनी चाहिये । तीसरी और चौथी भी बस्ति देवे, जबतक भली प्रकार निरूह के लक्षण न दिखाई दें—तब तक बस्ति देनी चाहिये ॥ ४९ ॥

कानि पुनः सम्यङ्निरूढलिंगानीत्याह—

विरिक्तवच्च योगादीन्विद्यात्—

स०—निरूहे विरिक्त इव योगादीन् विद्यात् । तत्र चोक्तम् । हृत्कुक्षिशुद्धिरित्यारभ्य यावल्लङ्घयत्यतिविरिक्तस्य तथाऽतिवमनामया इति ।

सम्यक् निरूह के लक्षण तथा पथ्यादि—

वि०—निरूह में सम्यक् योग, अयोग और अतियोग के लक्षण विरेचन की भाँति जानने चाहिये ।

—योगे तु भोजयेत् ॥ ५० ॥
कोष्णेन वारिणा स्नातं तनुधन्वरसौदनम् ।

स०—योगे तु निरूहस्य सम्यग्योगे सति सुखोष्णजलस्नातं संतं भोजयेत् । किम् । धन्वरसो जांगलरसश्चौदनश्च तद्धन्वरसौदनम् । किंभूतं धन्वरसौदनम् । तनु अघनम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ननु यूषक्षीररसैः क्रमादिति वक्ष्यति तत्कथमिहेदमभ्युपपद्यते । ब्रूमः । वातविकारशमनार्थो हि निरूहः प्रायेणेष्यते । तस्मिंश्च रसकौदनमेव पथ्यं श्रेयः । अग्रे च दोषाऽपेक्षया पथ्यं विशेषेणैवोपदेक्ष्यतेऽतो नाऽत्र किंचिदनुपपन्नम् । ननु दोषनिर्हरणं वमनविरेकाभ्यां द्रवादेव क्रियते । तत्र पेयादिक्रमो युक्तस्तथेहाऽपि युक्तः स्यात् । नैवम् । विरेकवमनाभ्यां हि वह्निस्थानमाच्छाद्यते तेनाऽग्निमाद्यं भवति । निरूहस्तु नाभेरूर्ध्वमगच्छन्नेव दोषनिर्हरणं करोति । तेन नाऽन्याग्निमांद्यापत्तिः । तस्मान्नाऽत्र पेयादिक्रमः । अपि च वातविकारविषयत्वाच्च रसौदनप्रायमेव पथ्यं युक्तम् ॥ ५० ॥

वि०—सम्यक् प्रकार निरूह होने पर गुनगुने पानी से स्नान कराके पतले जांगल, मांसरस के साथ चावल देवे। (वातविकार के लिये निरूह है, वात की शान्ति के लिये जांगल मॉंसरस श्रेष्ठ है। वमन-विरेचन में अग्निमान्द्य होता है, परन्तु निरूह के नाभि के ऊपर न जाने से अग्निमान्द्य नहीं होता, इसलिये पेयादि क्रम यहाँ पर नहीं कहा है) ॥ ५० ॥

विकारा ये निरूढस्य भवन्ति प्रचलैर्मलैः ॥ ५१ ॥
ते सुखोष्णाम्बुसिक्तस्य यान्ति भुक्तवतः शमम् ।

स०—प्रकर्षेण चलैर्दोषैर्ये विकारा भवंति ते कोष्णसलिलस्नातस्य कृतभोजनस्य सतः शमं गच्छंति । अत एव तत्कार्यमिति भावः ॥ ५१ ॥

पथ्य देने से लाभ—

वि०—निरूह दिये हुए व्यक्ति में-अतिशय चलायमान हुए दोषों के कारण जो विकार उत्पन्न होते हैं, वे गरम पानी से स्नान करके भोजन करने से शान्त हो जाते हैं ॥ ५१ ॥

अथ वातार्दितं भूयः सद्य एवानुवासयेत् ॥ ५२ ॥

स०—अथ निरूहादनंतरं वातपीडितं पुरुषं सद्य एव तस्मिन्नेव दिनेऽनुवासयेत् ॥ ५२ ॥

अनुवासन देने का समय—

वि०—निरूह के बाद वातपीडित मनुष्य को तुरन्त अनुवासन देवे ॥ ५२ ॥

सम्यग्घीनातियोगाश्च तस्य स्युः स्नेहपीतवत् ।

स०—तस्याऽनुवासनस्य स्नेहपानस्येव सम्यग्योगादयः स्युः । स्नेहपीतस्येव स्नेहपीतवत् । षष्ठ्यंताद्वतिः ।

अनुवासित का लक्षण—

वि०—इस अनुवासन के सम्यग् योग, अयोग और अतियोग के लक्षणों को स्नेहपान के लक्षणों की भाँति समझना चाहिये।

तत्र वातानुलोम्यमित्यादि घ्राणवक्त्रगुदस्रवा इत्युक्तं स्नेहपानसम्यग्योगातियोगलक्षणम् । अन्यदनुवासनस्य सम्यग्योगलक्षणमाह—

किञ्चित्कालं स्थितो यश्च सपुरीषो निवर्तते ॥ ५३ ॥
सानुलोमानिलः स्नेहस्तत्सिद्धमनुवासनम् ।

स०—चशब्दः पूर्वोक्तं सम्यग्योगलक्षणं समुच्चिनोति । किंचिदल्पमात्रं कालं कोष्ठाभ्यंतरे स्थितः सन् सविट्कः सानुगुणपवनो निवर्तते निःसरति यः स एवंभूतः स्नेहस्तत्सिद्धमभिमतकार्यमनुवासनम् । उक्तं च व्यस्तं समस्तं चेदं सिद्धानुवासनलक्षणम् ॥ ५३ ॥

अनुवासन के सम्यक् योग का लक्षण—

वि०—जिसमें स्नेह शरीर में कुछ समय रहकर मल के साथ बाहर निकल जाता है तथा जिससे वायु का अनुलोमन है, उसे सफल स्नेह अनुवासन वस्ति समझना चाहिये ॥५३॥

एकं त्रीन् वा बलासे तु स्नेहवस्तीन् प्रकल्पयेत् ॥ ५४ ॥
पञ्च वा सप्त वा पित्ते नवैकादश वाऽनिले ।
पुनस्ततोऽप्ययुग्मांस्तु पुनरास्थापनं ततः ॥ ५५ ॥

स०—स्नेहवस्तीननुवासनानि एकं त्रीन्वा श्लेष्मविकारे प्रकल्पयेत् । कार्ये कारणोपचारादेवमुक्तम् । एवमग्रेऽपि चिंत्यम् । पित्ते पंच स्नेहबस्तीनथवा सप्त दद्यात् । नव एकादश वा वायौ दद्यात् । ततः पुनरयुग्मान् स्नेहबस्तीन् दद्यात् । ततः पुनरप्यास्थापनं दद्यात् । अयुग्मवचनं स्नेहबाहुल्येनाऽयं व्यवहारो युक्त इति प्रतिपादयितुम् । वातार्तस्य तु युग्मा अपि देया एव । तथाचाऽमुनैवाऽभ्यधायि व्यायामनित्यान् दीप्ताग्नीन् रूक्षांश्च प्रतिवासरमिति ॥ ५४-५५ ॥

अनुवासन की दोषानुसार संख्या—

वि०—कफ दोष में—एक या तीन अनुवासन वस्ति देवे, पित्त में पाँच या सात और वायु में नौ या ग्यारह स्नेहवस्ति देवे। इसके आगे भी यदि जरूरत हो तो अयुग्म-विषम अनुवासन देवे। पीछे से फिर आस्थापन वस्ति देवे ॥ ५४-५५ ॥

कफपित्तानिलेष्वन्नं यूषक्षीररसैः क्रमात् ।

स०—कृतास्थापनस्य च पथ्यं श्लेष्मपित्तपवनेषु यथासंख्यं यूषादिभिः सहान्नमुपभोक्तव्यम् ।

अनुवासित का भोजन—

वि०—आस्थापन देने के पीछे कफ में यूष, पित्त में दूध और वायु में मॉंसरस का भोजन देवे।

वातघ्नौषधनिष्क्वाथत्रिवृतासैन्धवैर्युतः ॥ ५६ ॥
वस्तिरेकोऽनिले स्निग्धः स्वाद्वम्लोष्णो रसान्वितः ।

स०—बस्तिर्निरूहोऽनिले वातविषये वातघ्नौषधानि दशमूलादीनि तेषां निःक्वाथो यावक्कार्दसिद्ध त्रिवृतासैंधवैर्युतस्तथा स्निग्धो मधुराम्लोष्णरसयुक्त पवने हितः ॥ ५६ ॥

वात रोग में वस्ति—

वि०—वायु में निरूह—वातविकार में दशमूलादि वातघ्न औषधियों के क्वाथ में निशोथ, सैंधव मिलाकर स्निग्ध-मधुर-अम्ल एवं उष्ण मॉंसरसों से युक्त एक वस्ति देनी चाहिये ॥ ५६ ॥

न्यग्रोधादिगणक्वाथपद्मकादिसितायुतौ ॥ ५७ ॥
पित्ते स्वादुहिमौ साज्यक्षीरेक्षुरसमाक्षिकौ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—पित्ते मधुरशिशिरौ सघृतदुग्धेक्षुरसमधू द्वौ बस्ती हितौ ॥ ५७ ॥

पित्त रोग में वस्ति—

वि०—पित्त में—न्यग्रोधादि एवं पद्मकादि दोनों गणों के क्वाथ में शर्करा मिलाकर तथा घी-दूध-इक्षुरस एवं मधु के साथ-मधुर एवं शीत दो वस्तियाँ उत्तम हैं ॥ ५७ ॥

आरग्वधादिनिष्काथवत्सकादियुतास्त्रयः ॥ ५८ ॥
रूक्षाः सक्षौद्रगोमूत्रास्तीक्ष्णोष्णकटुकाः कफे ।

स०—तथाऽऽरग्वधेंद्रयवेत्यादिकषायवत्सकमूर्वेत्यादिकषायाभ्यां युक्ता रूक्षा माक्षिकगोमूत्राभ्यां सहितास्तीक्ष्णादिगुणयुक्तास्त्रयो बस्तयः कफे हिताः ॥ ५८ ॥

कफ रोग में बस्ति—

वि०—कफ में—आरग्वधादि, वत्सकादि ये दोनों गण मिलाकर इनके क्वाथ से मधु और गोमूत्र के साथ रूक्ष, तीक्ष्ण, कटु और उष्ण गुण वाली तीन बस्तियाँ देनी चाहिये ॥ ५८ ॥

त्रयस्ते सन्निपातेऽपि दोषान् घ्नन्ति यतः क्रमात् ॥५९॥

स०—सन्निपाते त्रय एव बस्तयो हिताः । यस्मादेते त्रीन् दोषान् क्रमेण पराकुर्वंति ॥ ५९ ॥

सन्निपात में वस्ति—

वि०—सन्निपात में भी—तीन ही बस्तियाँ देवे-क्योंकि ये क्रमशः तीनों दोषों को नष्ट करती हैं (संसर्ग में दो ही वस्ति देवे) ॥ ५९ ॥

त्रिभ्यः परं वस्तिमतो नेच्छन्त्यन्ये चिकित्सकाः ।
न हि दोषश्चतुर्थोऽस्ति पुनर्दीयेत यं प्रति ॥ ६० ॥

स०—अत एव हेतोस्त्रिभ्यो बस्तिभ्यः परमपरे भिषजो निरूहं नेच्छंति । यतस्त्रयो दोषास्त्रिभिर्बस्तिभिर्निर्वर्तिता इति चतुर्थो दोषो न विद्यते यं लक्षीकृत्य भूयश्चतुर्थः पुटको दीयते ॥ ६० ॥

चौथी वस्ति का निषेध—

वि०—दूसरे चिकित्सक तीन से अधिक वस्ति देना उत्तम नहीं मानते, क्योंकि चौथा कोई दोष नहीं जिसके लिये चौथी बस्ति दी जाये ॥ ६० ॥

उत्क्लेशनं शुद्धिकरं दोषाणां शमनं क्रमात् ।
त्रिधैव कल्पयेद्बस्तिमित्यन्येऽपि प्रचक्षते ॥ ६१ ॥

स०—अन्ये वैद्यास्तृतीयो बस्तिर्दोषाणाम् उत्क्लेशनं सिद्धिकरं शमनं क्रमादित्यनया युक्त्या बस्तित्रयं कल्पयेदिति जगदुः ॥ ६१ ॥

अन्य हेतु—

वि०—दूसरे चिकित्सक भी तीन ही तरह की वस्ति मानते हैं-पहली वस्ति-दोषों का उत्क्लेश करती है, दूसरी वस्ति इनका शोधन करती है और तीसरी दोषों का शमन करती है, इस क्रम से भी तीन ही बस्तियाँ उचित हैं ॥ ६१ ॥

तत्र किं क्रियतामित्याह—

दोषौषधादिबलतः सर्वमेतत प्रमाणयेत् ।

स०—तदत्र दोषभेषजसात्म्यादिवशात्सर्वमप्येतत्प्रमाणीकार्यम् ।

दोनों पक्षों की प्रामाणिकता—

वि०—दोष एवं औषध के बल का विचार करके सबको स्वीकार करना चाहिये (अर्थात् दोषाधिक्य होने पर तथा बल की अधिकता में औषध मृदु हो तो अधिक बस्तियाँ भी देनी चाहिये)।

अथ पूर्वमतानुग्राहि स्वमतमाह—

सम्यङ्निरूढलिङ्गं तु नासम्भाव्य निवर्तयेत् ॥ ६२ ॥

स०—सम्यङ्निरूढलिंगं त्वसंभाव्याऽसंपाद्य न निवर्तयेत् । वस्तिदानं कारयेदेवेति ॥ ६२ ॥

उक्त विषय में स्वमत—

वि०—जब तक सम्यक् निरूह के लक्षण न हों तब तक वस्ति देनी चाहिये (यह सिद्धान्त है) ॥ ६२ ॥

इदानीं कर्मकालयोगाख्यान् बस्तिविशेषानाह—

प्राक्स्नेह एकः पञ्चान्ते द्वादशास्थापनानि च ।
सान्वासनानि कर्मैवं वस्तयस्त्रिंशदीरिताः ॥ ६३ ॥

स०—प्राक् पूर्वमेकः स्नेहबस्तिः । अंतेऽवसाने पंच स्नेहाः तथा निरूहा द्वादश सहानुवासनाः । एवं त्रिंशद्बस्तयः कर्मेति गदिताः ॥ ६३ ॥

कर्मादि बस्तियों की संख्या—

वि०—कर्मबस्तियाँ तीस हैं, यथा—प्रथम स्नेह बस्ति-एक, सबसे अन्त में स्नेह बस्ति-पाँच तथा बारह निरूह वस्तियाँ, बारह अनुवासनों के साथ (एक निरूह, एक अनुवासन-इस प्रकार) मिलाकर देवे ॥ ६३ ॥

कालः पञ्चदशैकोऽत्र प्राक् स्नेहोऽन्ते त्रयस्तथा ।
षट् पञ्चवस्त्यन्तरिताः—

स०—पंचदश बस्तयः काल उच्यते । कथमुच्यते एकः पूर्वस्नेहस्तथांऽते त्रयः स्नेहास्तथा षट् स्नेहाः पंचभिर्बस्तिभिरंतरिता इति ।

वि०—कालबस्तियाँ पन्द्रह हैं—यथा-प्रथम में एक स्नेह वस्ति, और अन्त में तीन स्नेह वस्ति और छै अनुवासन वस्तियों को पांच निरूह वस्तियों को बीच में करके (एक स्नेह वस्ति, दूसरी निरूह वस्ति) देवे ।

—योगोऽष्टौ वस्तयोऽत्र तु ॥ ६४ ॥
त्रयो निरूहाः स्नेहाश्च स्नेहावाद्यन्तयोरुभौ ।

स०—योगोऽत्राष्टौ बस्तयः । कथमित्याह । त्रयो निरूहास्त्रीणि चानुवासनानि तथाऽद्यंतयोर्द्वौ स्नेहबस्ती इति ॥ ६४ ॥

वि०—योगवस्तियाँ आठ हैं—यथा-प्रथम एक स्नेह वस्ति और अन्त में एक स्नेह वस्ति ये दो और तीन निरूह

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बस्ति और तीन अनुवासन बस्ति, इनको बीच में करके (एक निरूह बस्ति, एक स्नेह बस्ति) देवे ॥ ६४ ॥

स्नेहवस्तिं निरूहं वा नैकमेवातिशीलयेत् ॥ ६५ ॥
उत्क्लेशाग्निवधौ स्नेहान्निरूहान्मरुतो भयम् ।

स०—स्नेहबस्तिमथवा निरूहमेकमेव केवलमतिशयेन न शीलयेत् । यतः स्नेहादतिसेवितादुत्क्लेशोऽग्निमांद्ये जायेते । निरूहादतिसेवितात्पवनाद्भयं जायते ॥ ६५ ॥

एक बस्ति के अतिशीलन का निषेध—

वि०—अकेली स्नेहबस्ति या अकेली निरूहबस्ति का ही अधिक व्यवहार न करे । अधिक स्नेहबस्तियों से उत्क्लेश एवं अग्निमान्द्य होता है और अधिक निरूह बस्तियों से वायु के प्रकोप का भय रहता है ॥ ६५ ॥

तस्मान्निरूढः स्नेह्यः स्यान्निरूह्यश्चानुवासितः ॥ ६६ ॥

स०—तस्मात्कारणान्निरूढो नरः स्नेहनार्हः स्यात् । अनुवासितश्च पुरुषो निरूहणार्हो भवेत् ॥ ६६ ॥

उपसंहार—

वि०—इसलिए जिसे निरूह दिया गया है उसको स्नेहबस्ति देवे और जिसको स्नेहबस्ति दी हो उसे निरूह बस्ति देवे ॥ ६६ ॥

स्नेहशोधनयुक्त्यैवं वस्तिकर्म त्रिदोषजित् ।

स०—एवं पूर्वोक्तया स्नेहशोधनयुक्त्या बस्तिकर्म सेवितं त्रीन् दोषान् जयति ।

वि०—स्नेहन और शोधन के इस प्रकार युक्ति पूर्वक प्रयोग से ही बस्तिकर्म त्रिदोषनाशक होता है; अर्थात् स्निग्ध का शोधन, शुद्ध का स्नेहन, स्निग्ध का पुनः शोधन यह नियम ही त्रिदोषनाशक है ।

अधुना मात्राबस्तिं लक्षयति—

ह्रस्वया स्नेहपानस्य मात्रया योजितः समः ॥ ६७ ॥
मात्रावस्तिः स्मृतः स्नेह—:

स०—ह्रस्वया यामद्वयजरणलक्षणया स्नेहमात्रया समस्तुल्यो योजितः स्नेहो मात्राबस्तिसंज्ञः स्मृतः सद्भिरिति शेषः । अन्यैश्चान्यथा स्नेहमात्रोक्ता । यथा । षट्पला तु भवेज्ज्येष्ठा त्रिपला मध्यमा भवेत् । कनीयस्यध्यर्धपला त्रिधा मात्रानुवासना इति ॥ ६७ ॥

मात्रावस्ति के लक्षणादि—

वि०—मात्रावस्ति—स्नेह पान की ह्रस्वमात्रा (दो याम में जीर्ण होने वाली) के बराबर स्नेह की मात्रा जिस बस्ति में दी जाती है उसको मात्रावस्ति कहते हैं ॥ ६७ ॥

वक्तव्य—कई आचार्य 'षट्पला तु भवेज्ज्येष्ठा, त्रिपला मध्यमा भवेत् । कनीयस्यध्यर्द्धपला त्रिधा मात्राऽनुवासने ॥' ऐसा मानते हैं ।

—शीलनीयः सदा च सः ।
बालवृद्धाध्वभारस्त्रीव्यायामासक्तचिन्तकैः ॥ ६८ ॥
वातभग्नाबलाल्पाग्निनृपेश्वरसुखात्मभिः ।
दोषघ्नो निष्परीहारो बल्यः सृष्टमलःसुखः ॥ ६९ ॥

स०—स च मात्राबस्तिर्बालादिभिः सततमेव शीलयितव्यः । स च शीलितो दोषापहस्तथा निष्परीहारोऽनियंत्रणो बलाय हितो निर्गतपुरीषादिकः सुखकारी स्यात् ॥ ६८-६९ ॥

वि०—और यह मात्रावस्ति बालक, वृद्ध, मुसाफिरी, भार उठाना, स्त्रीसेवन और व्यायाम में आसक्त, चिन्ता करने वाले, वातप्रकृति, अस्थिभग्न, निर्बल, मन्दाग्नि, राजा, ऐश्वर्यवान् एवं सुखी व्यक्तियों को सदा सेवन करना चाहिये । क्योंकि यह मात्रा बस्तिदोषनाशक है, इसमें किसी प्रकार का परहेज नहीं, यह बलकारक, मल को निकालने वाली और सुखकारक है ॥ ६८-६९ ॥

वस्तौ रोगेषु नारीणां योनिगर्भाशयेषु च ।
द्वित्रास्थापनशुद्धेभ्यो विदध्याद्वस्तिमुत्तरम् ॥ ७० ॥

स०—बस्तिस्थाने रोगेषु नराणामित्यर्थाल्लभ्यते । नारीणां योनिगर्भाशयेषु च द्वाभ्यां त्रिभिर्वाऽऽस्थापनैः शुद्धेभ्यस्तेभ्यो नरेभ्यः स्त्रीभ्यश्चोत्तरबस्तिं दद्यात् । द्वे वा त्रीणि वा द्वित्राणि च तान्यास्थापनानि च द्वित्रास्थापनानि तैः शुद्धा द्वित्रास्थापनशुद्धाः । पुमान्स्त्रियेत्येकशेषः । गुदादुत्तरेण मार्गेण दीयत इत्युत्तरबस्तिः ॥ ७० ॥

उत्तरबस्ति का विधान—

वि०—उत्तरबस्ति—मूत्राशय के रोगों में तथा (स्त्रियों को) योनि एवं गर्भाशय के रोगों में दो या तीन अस्थापन बस्तियों से शोधन करके उत्तरबस्ति देनी चाहिये ॥ ७० ॥

अथ नेत्रस्य परिमाणमाह—

आतुराङ्गुलमानेन तन्नेत्रं द्वादशाङ्गुलम् ।
वृत्तं गोपुच्छवन्मूलमध्ययोः कृतकर्णिकम् ॥ ७१ ॥
सिद्धार्थकप्रवेशाग्रं श्लक्ष्णं हेमादिसम्भवम् ।
कुन्दाश्वमारसुमनःपुष्पवृन्तोपमं दृढम् ॥ ७२ ॥

स०—तन्नेत्रमुत्तरबस्तियंत्रकमातुरांगुलप्रमाणेन द्वादशांगुलं दैर्घ्येणेत्यर्थादेव प्रतीयते । पुरुषाणामेवैतदिति वेद्यम् । स्त्रीणां हि वक्ष्यति । नेत्रं दशांगुलं मुद्गप्रवेशमिति । तच्च वृत्तं वर्तुलं गोपुच्छाकृति तथा मूले मध्ये चोत्पादितकर्णिकं तथा सिद्धार्थकः प्रविशत्यस्मिन्निति सिद्धार्थकप्रवेशं तादृशमग्रं प्रांतो यस्य नेत्रस्य तत् सिद्धार्थकप्रवेशाग्रं तथा श्लक्ष्णमतिकोमलं तथा हेमादिजम् । आदिशब्देन धात्वादयः प्रागुक्ता गृह्यंते । कुंदकरवीरजातीपुष्पवृंतसदृशं दृढं च । अश्वमारः करवीरः ॥ ७१-७२ ॥

उत्तरबस्ति के यंत्र का प्रमाण—

वि०—नेत्र का परिमाण—रोगी की अपनी अङ्गुलियों के माप से इस बस्ति का नेत्र बारह अङ्गुल लम्बा, गोल; गाय की पूंछ के समान-जड़ में मोटा और आगे से क्रमशः पतला

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होना चाहिये। इसके मूल में तथा मध्य में दो गुलिकायें (कर्णिकायें) बनानी चाहिये। अगला छेद सरसों के जाने योग्य होना चाहिये। नेत्र चिकना तथा स्वर्ण आदि धातु का बनाना चाहिये। इसकी आकृति कुन्द, कनेर या चमेली के पुष्प की डंडी के समान और मजबूत होनी चाहिये ॥ ७१-७२ ॥

तस्य वस्तिर्मृदुर्लघुर्मात्रा शुक्तिर्विकल्प्य वा।

स०—तथा तस्य नेत्रस्य बस्तिर्मृदुर्लघुर्योज्य इति शेषः। मात्रा शुक्तिः कर्षद्वयम्। शुक्तिः स्नेहस्येति शेषः। विकल्प्य वा बलवयः सत्त्वदेहसात्म्यादि निरूप्य वा मात्रा कार्येत्यर्थः।

उत्तरवस्ति की मात्रा—

वि०—उत्तरवस्ति के लिये वस्तिपुट कोमल और छोटा होना चाहिये, इसमें द्रव की मात्रा दो कर्ष अथवा दोष की दृष्टि से कम या अधिक करनी चाहिये।

अथ स्नाताशितस्यास्य स्नेहवस्तिविधानतः ॥ ७३ ॥
ऋजोः सुखोपविष्टस्य पीठे जानुसमे मृदौ।
हृष्टे मेढ्रे स्थिते चर्जौ शनैः स्रोतोविशुद्धये ॥ ७४ ॥
सूक्ष्मां शलाकां प्रणयेत्तया शुद्धेऽनुसेवनि।
आमेहनान्तं नेत्रं च निष्कम्पं गुदवत्ततः ॥ ७५ ॥
पीडितेऽन्तर्गते स्नेहे स्नेहवस्तिक्रमो हितः।

स०—अथेति मंगले। अस्य रोगिणो निरूहवत्कृतमङ्गलस्य तथा पूर्वं स्नातस्य पश्चादशितस्य। कथमशितस्य। स्नेहवस्तिविधानतः। तृतीयार्थे तसिः। स्नेहवस्तौ यादृश आहारो विहितस्तेन कृतभोजनस्येत्यर्थः। तथर्जोः स्पष्टं स्थितस्य तथा सुखेनाऽऽसीनस्य। क्व। पीठ आसने। किंभूते। जानतुल्ये। तथा मृद्वावकठिने च। प्रहृष्टे स्तब्धे तथा ऋजौ स्पष्टं कृत्वा स्थिते सति शनैर्न त्वरया सूक्ष्मां शलाकां प्रणयेत्। स्थूलायां तत्र क्षतकरणात्। तया शलाकया शुद्धे मेढ्रे सत्यनुसेवनीं सेवनीमनुलक्षीकृत्य आमेढ्रान्तं नेत्रं प्रणयेत्। षडंगुलं प्रायेण प्रवेशयेदित्यर्थः। कथम्। गुद इव निष्कंपम्। ततो निष्कंपं स्थापनादनंतरं पीडिते पुटके स्नेहे चाऽन्तःप्रविष्टे सत्यनुवासनक्रमो हितः। पाणिना ताडयेत् स्फिजौ तस्य पार्ष्णिभ्यामित्यादिकः ॥ ७३-७५ ॥

उत्तरवस्ति की प्रयोगविधि—

वि०—विधि—रोगी को स्नान कराके तथा स्नेहवस्ति के अनुसार भोजनविधि पूरी कराके घुटनों के बराबर ऊंचे कोमल आसन पर सीधा एवं सुखपूर्वक आराम से बिठा दे। फिर मेहन को स्तब्ध एवं सीधा करके स्रोतों की शुद्धि के लिये सूक्ष्म पतली शलाका को धीरे से शिश्न में प्रविष्ट करे। इस शलाका से मार्ग का शोधन हो जाने पर सेवनी के साथ-साथ मेहन के अन्त तक, गुदा में दी जाने वाली वस्ति की भाँति हाथ को न हिलाते हुए नेत्र को पहुँचाये। फिर वस्तिपुट को दबाने से स्नेह के अन्दर पहुँच जाने पर स्नेहवस्ति क्रम को बरतना हितकारी है ॥ ७३-७५ ॥

वस्तीननेन विधिना दद्यात्त्रींश्चतुरोऽपि वा ॥ ७६ ॥
अनुवासनवच्छेषं सर्वमेवास्य चिन्तयेत्।

स०—त्रींश्चतुरो वा वस्तीननेन विधानेन दद्यात्। शेषं विधिपरिहारादि सम्यग्दत्तव्यापदादिकमस्योत्तरवस्तेरनुवासनस्येव दापयेत्। यदुक्तं खरनादेन। यथाशेषं प्रवेश्याऽथ स्नेहस्यार्धपलं नयेत्। प्रत्यागते द्वितीयं वा तृतीयं वा प्रदापयेत्। स चेदनुवसेत्तत्र स्याक्रियेयं विशेषतः। पिप्पल्यागारधूमवरसकसैंधवैः। मूत्राऽम्लपिष्टैर्गुलिकाः सर्षपा माषसन्निभाः। छायासु शुष्कास्ताः शिश्ने दद्यात्सर्षपसन्निभाः। पूर्वं माषोपमाः पश्चात्ताभिः स्नेहं समानयेत्। स्नेहे प्रत्यागते च स्यादानुवासनिको विधिरिति ॥ ७६ ॥

उत्तरवस्ति की संख्या—

वि०—इस विधि से तीन या चार उत्तरवस्ति देवे। शेष विधान अनुवासनवस्ति की भाँति बरतना चाहिये ॥ ७६ ॥

वक्तव्य—यदि वस्ति वापिस न आये तो इसके लिये भी वर्ति रखने की प्रथा है। यथा-(१) 'पिप्पल्यारग्वधागारधूमवरसकसैन्धवैः। मूत्राम्लपिष्टैर्गुलिकाः सर्षपा माषसन्निभाः। छायासु शुष्कास्ताः शिश्ने दद्यात् सर्षपसन्निभाः ॥ पूर्वं माषोपमाः पश्चात्ताभिः स्नेहं समानयेत् ॥' (२) 'मूत्रे विबद्धे कर्पूरचूर्णं लिङ्गे प्रवेशयेत् ॥'

एवं पुरुषाणामुत्तरबस्तिविधानमुक्त्वा स्त्रीणां वक्ति—

स्त्रीणामार्तवकाले तु योनिर्गृह्णात्यपावृतेः ॥ ७७ ॥
विदधीत तदा तस्मादनृतावपि चात्यये।
योनिविभ्रंशशूलेषु योनिव्यापद्यसृग्दरे ॥ ७८ ॥

स०—ललनानामृतुकाल एवाऽऽर्तवकाल ऋतुस्तु द्वादश निशा इत्यादिनोक्तस्तत्र ऋतौ योनिः कर्ता उत्तरवस्तिस्वभावं स्नेहं गृह्णाति। कुतः अपावृतेरपावरणात् कारणात्। अन्यदा तु संवृतत्वान्न स्नेहमादत्ते गर्भवत्। तस्माद्धेतोस्तदा ऋतुकाले विदधीत। प्रकृतत्वादुत्तरवस्तिम्। आत्ययिके व्याधावनृतावपि विदधीत। तमेवात्ययं दर्शयति। योनीत्यादि। योनिविभ्रंश उत्तरे वक्ष्यमाणः। योनिशूलो योनिरुजा तेषु तथा योनिव्यापत्तौ तथाऽसृग्दरं रक्तपित्तं योनिमुखेनागच्छत् स्त्रीणामसृग्दरमुच्यते। एतेषु रोगेषूत्तरवस्तिमात्ययिकत्वादनृतावपि दद्यात् ॥ ७७-७८ ॥

स्त्रियों को उत्तरवस्ति—

वि०—स्त्रियों के लिये उत्तरवस्ति—स्त्रियों के ऋतुकाल में योनि खुली होने से वस्ति को लेती है; इसलिए ऋतुकाल में वस्ति देनी चाहिए। अत्ययिक अवस्था में तथा योनिभ्रंश, योनिशूल और योनिरोगों में या रक्तप्रदर में बिना ऋतुकाल के भी उत्तरवस्ति देनी चाहिए। (ऋतु—गर्भधारण का समय; बारह दिन या आर्तव काल को गिनकर सोलह दिन) ॥ ७७-७८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथाऽत्र नेत्रस्य प्रमाणमाह—

नेत्रं दशाङ्गुलं मुद्गप्रवेशं चतुरङ्गुलम् ।
अपत्यमार्गे योज्यं स्याद् द्व्यङ्गुलं मूत्रवर्त्मनि ॥ ७९ ॥
मूत्रकृच्छ्रविकारेषु, बालानां त्वेकमङ्गुलम् ।

स०—दशांगुलप्रमाणं दैर्घ्येण तत्तथा मुद्गः प्रविशत्यस्मिन्निति मुद्गप्रवेशं तदिवाग्रं प्रवेशाप्रमिति वेद्यमंतलोपाख्यया तंत्रयुक्त्या। वृत्तगोपुच्छाकारादि शेषं पूर्वोक्तमत्र वेद्यम्। पुष्पवृंतोपमत्वं त्वत्र न युज्यते । यतो मूत्रस्रोतःपरिणाहं यत्तद्विधातव्यं पुरुषे स्त्रियां चैवंप्रकारम् । यदुक्तं मुनिना । पुष्पनेत्रप्रमाणं तु प्रमदानां दशांगुलम् । मूत्रस्रोतःपरीणाहमिति । तत्र चतुरंगुलं यावत् प्रवेश्यम् । चतुरंगुला चोर्ध्वकर्णिका कार्या । अधिकप्रवेशनिवारणार्थं नतु मेहननेत्र इव मध्यमकर्णिकेति । अयमर्थोऽत्र साक्षान्नोपात्तो गम्यमानत्वात् । अत एतत्प्रवेशप्रमाणमाह । चतुरंगुलमपत्यमार्गे योज्यं स्यादिति । अपत्यमार्ग इत्यनेन स्त्री गर्भग्रहणप्रसवादिसमर्था सूच्यते । एवंविधायाः स्त्रियाश्चतुरंगुलं प्रवेशयितव्यमिति । मूत्रवर्त्मनि द्व्यंगुलं योज्यम् । या स्त्री सुरतव्यवहारगर्भग्रहणायोग्या अथवा बाला या अप्रौढा तस्या योनिर्मूत्रस्यैव केवलं मार्गस्तस्या नेत्रं द्व्यगुलं प्रवेश्यम् । अत ऊर्ध्वं तु प्रवेशात्तासां मांसक्षतिः स्यात् । केषु रोगेषु । मूत्रकृच्छ्रविकारेषु । बालानां तु स्त्रीणामेकमंगुलं प्रवेश्यम् ॥ ७९ ॥

स्त्रियों के उत्तरबस्ति यन्त्र का प्रमाण—

वि०—स्त्रियों में उत्तरबस्ति का नेत्र दस अङ्गुल लम्बा तथा मूंग के जाने योग्य छेद का होना चाहिये। योनिमार्ग में इसको चार अङ्गुल तक प्रविष्ट करना चाहिये। मूत्रकृच्छ्र आदि रोगों में मूत्रमार्ग के अन्दर दो अङ्गुल प्रविष्ट करना चाहिये। बाला जो गर्भधारण के अयोग्य हों; उनके मूत्रमार्ग में एक अङ्गुल प्रविष्ट करना चाहिये ॥ ७९ ॥

प्रकुञ्चो मध्यमा मात्रा, बालानां शुक्तिरेव तु ॥ ८० ॥

स०—स्त्रीणामुत्तरबस्तौ स्नेहस्य प्रकुंचो मध्यमा मात्रा नोत्तमा कनिष्ठा वा। बालानां तु शुक्तिरेव मध्यमा मात्रा स्नेहस्य ॥ ८० ॥

स्त्रियों के उत्तरबस्ति का प्रमाण—

वि०—स्त्रियों की उत्तरबस्ति में स्नेह की मध्यम मात्रा एक प्रकुञ्च (एक पल) और बालाओं में एक शुक्ति (दो कर्ष-आधा पल) मध्यम मात्रा होती है ॥ ८० ॥

अधुनोत्तरबस्त्यवस्थानं त्रिविधाया अपि स्त्रिया वदति—

उत्तानायाः शयानाया सम्यक् सङ्कोच्य सक्थिनी ।
ऊर्ध्वजान्वास्त्रिचतुरानहोरात्रेण योजयेत् ॥ ८१ ॥
बस्तींस्त्रिरात्रमेवं च स्नेहमात्रां विवर्द्धयन् ।
त्र्यहमेव च विश्रम्य प्रणिदध्यात्पुनस्त्र्यहम् ॥ ८२ ॥

स०—उत्तानाया न स्वबाङ्मुखायाःपार्श्वस्थिताया वा। शयानाया न त्वासीनायास्तथोर्ध्वजान्वा बस्तींस्त्रिचतुरानहोरात्रेण योजयेत् । किं कृत्वा । सक्थिनी संकोच्य । अनुवासने त्वेक एवाहोरात्रेण योज्य इत्यस्य भेदः । बस्तिदानं कार्यं न त्वत्राऽनुवासनवत्त्र्यहे पंचमे वाऽहनीति । किं कुर्वन् । स्नेहमात्रां यथास्वमर्धकर्षकर्षादिक्रमेण वर्धयेत् । त्र्यहमेव च विश्रम्य त्रीणि दिनानि विलंब्य च पुनः पूर्वोक्तेनैव प्रकारेण प्रणिदध्यात् प्रकुर्यात् । एष एव च न्यायो मेढ्रेऽपि योज्यः । तज्जातीयत्वादस्यार्थस्य । अत एवांतेऽयमुपदिष्ट उभयसंबंधार्थम् ॥ ८१-८२ ॥

स्त्रियों के उत्तरबस्ति की विधि—

वि०—स्त्री को पीठ के बल उत्तान लिटाकर, टांगों को भली प्रकार संकुचित करके; घुटनों को खड़ा रखते हुए दिनरात में तीन या चार बस्ति देवे। प्रत्येक बस्ति में स्नेह की मात्रा को बढ़ाते हुए लगातार तीन दिन बस्ति दे फिर तीन दिन आराम लेकर फिर तीन दिन बस्ति देवे। (अनुवासन में चौबीस घण्टे में एक बार स्नेहबस्ति देते हैं, तथा अनुवासन बस्ति तीसरे या पाँचवें दिन दी जाती है; इसमें बस्ति चौबीस घण्टे में तीन चार बार तथा तीन दिन लगातार देकर फिर तीन दिन छोड़ना पड़ता है) ॥८१-८२॥

युक्त्योक्तमेवाऽमुमर्थं संक्षेपेण संग्राह्य पुनराह—

पक्षाद्विरेको वमिते ततः पक्षान्निरूहणम् ।
सद्यो निरूढश्चान्वास्यः सप्तरात्राद्विरेचितः ॥ ८३ ॥

स०—उत्तमशुद्ध्या शुद्धे वमिते पक्षादनंतरं विरेकः कार्यः । यस्मात्प्रवरया शुद्ध्या शुद्धे तु वमिते पेयादिक्रमेण सप्ताहात् प्रकृतिभोजनापत्तिः । सप्ताहेनैकांतराऽनुवासनदानेन स्निग्धस्य विरेक इति पक्षेणैव युज्यते । ततोऽनंतरं पक्षात्परतो निरूहो यतः कृतविरेकस्य सप्ताहात् प्रकृतिभोजनापत्तौ स्नेहनार्थमनुवासनेनैकांतरितेन स्निग्धस्य निरूहो युज्यत इति पक्षेणैव युक्तः । निरूढश्च सद्य एवाऽनुवास्यः । तथा च प्रागभ्यधायि । अथ वातार्दितं भूयः सद्य एवानुवासयेदिति । विरेचितः सप्तरात्रादूर्ध्वमनुवास्यो यतः सप्ताहेन प्रकृतिभोजनापत्तिस्ततः स्नेहार्थमनुवासनं युक्तम् ॥ ८३ ॥

बस्ति देने का नियम—

वि०—वमन के पन्द्रह दिन पीछे विरेचन, विरेचन के पन्द्रह दिन पीछे निरूहबस्ति, निरूह के तुरन्त पीछे अनुवासन बस्ति देनी चाहिए ॥ ८३ ॥

ननु दोषाणां धातूनां च स्नेहस्वेदाभ्यामेकलोलीभावात् कथं बस्तिर्दोषानेव निर्हरेन्न धातूनित्येतच्चोद्यं दृष्टांतद्वारेण परिजिहीर्षुरिदमाह—

यथा कुसुम्भादियुतात्तोयाद्रागं हरेत्पटः ।
तथा द्रवीकृताद्देहाद्बस्तिर्निर्हरते मलान् ॥ ८४ ॥

स०—कुसुंभकुंकुमादियुक्ताज्जलाद्यथा पटो वासो रागं हरेद् गृह्णीयान्न कुसुंभादिकं तथैव द्रवीकृतात्कायाद्दोषधातूनामेकलोलीभावेऽपि बस्तिर्दोषान्निर्हरेन्न धातून् ॥ ८४ ॥

बस्ति की दोषहारिता में दृष्टान्त—

वि०—जिस प्रकार कुसुम्भ आदि से मिले जल में से

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वस्त्र रङ्ग को ग्रहण कर लेता है, उसी प्रकार द्रवीभूत शरीर में से वस्ति मलों को ले लेती है; (दूसरी धातुओं को नहीं लेती अर्थात् दोषमात्र को बाहर निकालती है, धातुओं को नहीं) ॥ ८४ ॥

अधुना वायोः स्वरूपं प्रथयन् वस्तिं श्लाघयन्नाह—

शाखागताः कोष्ठगताश्च रोगा
मर्मोर्ध्वसर्वावयवाङ्गजाश्च।
ये सन्ति तेषां न तु कश्चिदन्यो
वायोः परं जन्मनि हेतुरस्ति ॥ ८५ ॥
विट्श्लेष्मपित्तादिमलोच्चयानां
विक्षेपसंहारकरः स यस्मात्।
तस्यातिवृद्धस्य शमाय नान्य-
द्वस्तेर्विना भेषजमस्ति किञ्चित् ॥ ८६ ॥
तस्माच्चिकित्सार्द्ध इति प्रदिष्टः
कृत्स्ना चिकित्साऽपि च वस्तिरेकैः

स०—सक्थिनी द्वे द्वौ बाहू इति शाखास्तासु गतास्तत उत्पन्नाः। एवं कोष्ठो महास्रोतस्तत्र गताः कोष्ठगताः। तथा मर्माणि च ऊर्ध्वं च सर्वे चाऽवयवाश्च मर्मोर्ध्वसर्वावयवास्तेषामंगं तत्र जाता मर्मोर्ध्वसर्वावयवांगजाः। तत्र मर्माणि मर्मविभागे वक्ष्यंते। ऊर्ध्वशब्देनोर्ध्वजत्रु गृह्यते। तत्र जाता ऊर्ध्वांगजा मुखरोगादयः। सर्वांगजा ज्वरादयः। अवयवजाः श्विन्त्रादयश्च ये रोगा विद्यंते तेषां जन्मन्युत्पत्तौ वायोरपरः कश्चिदपि हेतुर्नास्ति। कथम्। परमतिशयेन। किंचिन्मात्रेणाऽनुबलभावेन पित्तश्लेष्माणावपि हेतू भवत एव। यथा पामादद्रुवादीनाम्। अथाऽवयवग्रहणेनैवोर्ध्वग्रहणं लब्ध ऊर्ध्वग्रहणं प्राधान्यख्यापनार्थम्। यथा ब्राह्मणा आयाताः वसिष्ठोऽप्यायात इति। तदेवाधिकृत्य वक्ष्यमाणाः पंच विधयः सकलमेवोत्तरे च तंत्रे प्रधानं तस्मात्प्रधाना ऊर्ध्वांगजाः। ननु कुतो हेतोर्मरुत एतेषु कारणत्वमित्याह—विट् च श्लेष्मा च पित्तं च विट्श्लेष्मपित्तानि तान्यादिर्येषाम्। आदिशब्देन मूत्रस्वेदादिपरिग्रहः। त एव शरीरमलिनीकरणान्मलास्तेषामाचयाः संचयास्तेषां च वायुर्यस्माद्विक्षेपसंहारकरः। विक्षेपश्च संहारश्च विक्षेपसंहारौ तौ करोतीति कृञो हेतुताच्छील्येत्यादिना हेतौ टः। विक्षेपसंहारकरणहेतुरित्यर्थः। तस्य क्रियावत्त्वात्। वायुश्च शेषदोषाभ्यां न कदाचिद्विक्षिप्यते संह्रियते वा। तयोर्निष्क्रियत्वात्। तस्य च वायोः प्रवृद्धस्य शमनार्थं वस्तिमंतरेणाऽपरं भेषजं नास्ति। स्नेहस्वेदादिकं तु विद्यमानमपि न तथा समर्थमित्यगण्यत्वात्तदविद्यमानमुच्यते। तस्माद्दोषप्रधानस्य पवनस्य शमनार्थात्कारणाद्बस्तिश्चिकित्सार्धं इति कथितः। एकैश्चाऽऽचार्यैर्निरवशेषाऽपि चिकित्सा वस्तिः प्रदिष्टः। ननु चतुर्णां भिषजादीनामित्यादिलक्षणा चिकित्सा तत्कथं तस्या भागकल्पना कर्तुं युज्यते। नच सर्वा चिकित्सा बस्तिरिति वक्तुं शक्यते। शेषचिकित्साशास्त्रविस्तरस्यानर्थक्यप्रसंगात्। तस्मादेतदयुक्तमिवाऽऽभाति। अत्रोच्यते। तथाऽपि वायुविकारा अशीतिरुक्ताः। पित्तश्लेष्मविकाराश्च षष्टिरुक्ताः। तत्र वातविकाराणां प्रधानोपक्रमो बस्तिस्तस्माच्चिकित्सार्धो बस्तिः कार्यद्वारेणोक्तः। अथवा मारुतं पित्तश्लेष्मविट्सहितं बस्तिः समूलमेवापकर्षतीत्युक्त्वा सर्वा चिकित्सा कार्यद्वारेकैरुपदिष्टः। अन्यत्राऽपि चैवं प्रायो निदर्शितं आचार्यैः। तथाच मुनिः। यानीह कर्माण्युक्तानि विसर्पविनिवृत्तये। एकतस्तानी सर्वाणि रक्तमोक्षणमेकत इति। चिकित्सार्धमित्ययं तु पाठो न युक्त एव। अर्धशब्दस्य हि समविभाग एव नपुंसकत्वम्। नचाऽत्र समप्रविभागो गम्यते तस्मान्नपुंसकत्वमत्राऽन्याय्यम्। तथेत्यादि। न केवलं बस्तिर्यावच्छिराव्यधोऽपि चिकित्सार्धः सर्वा वा चिकित्सेत्युपदिष्टः। कुतः। निजेत्यादिना ॥ ८५-८६ ॥

वायु की प्रधानता तथा वस्ति की वायुशामकता—

वि०—शाखा अर्थात् हाथ-पैर में होने वाले, कोष्ठ में होने वाले, मर्म स्थानों में एवं जत्रु से ऊपर के भाग में, सम्पूर्ण अवयवों में तथा एक अङ्ग में होने वाले-जो भी कोई रोग हैं; उनमें वायु के सिवाय और कोई दूसरा मुख्य उत्पादक कारण नहीं है। क्योंकि यही वायु मल, कफ, पित्त आदि (मूत्र, स्वेद आदि) मल समूहों का विक्षेप (प्रसार) और संहार (नाश) करने वाली है। अतः अतिशय बढ़ी इस वायु की शान्ति के लिये वस्ति के सिवाय और दूसरी ओषध नहीं है। इसलिए चिकित्सा का आधा भाग वस्ति है, और कइयों के विचार से तो वस्ति ही सम्पूर्ण चिकित्सा है ॥ ८५-८६ ॥

वक्तव्य—वातजन्य रोग अस्सी, पित्तजन्य चालीस और कफजन्य बीस हैं। इस दृष्टि से वातचिकित्सा—वस्ति आधी चिकित्सा है। वायु ही कफ और पित्त को शरीर में ले जाने वाला है, वायु ही कफ के साथ मिलकर शीताधिक्य, पित्त के साथ मिलकर उष्णताधिक्य करता है, इस दृष्टि से वायु को मुनि ने 'तन्त्रयन्त्रधरः' कहा है। उसकी शान्ति ही सम्पूर्ण चिकित्सा है क्योंकि नेता के नाश होने से सेना का नाश हो जाता है।

तथा निजागन्तुविकारकारि-
रक्तौषधत्वेन सिराव्यधोऽपि ॥ ८७ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने बस्तिविधिर्नामैकोनविंशोऽध्यायः ॥ १९ ॥

स०—निजा वातादिसमुत्था आगंतवो विषवह्न्यादिसमुत्थाः। निजाश्चाऽगंतवश्च ते च ते विकाराश्च निजागंतुविकारास्तान्कर्तुं शीलमस्य तन्निजागंतुविकारकारि तच्च तद्रक्तं च निजागंतुविकारकारिरक्तं तस्यौषधत्वेन। तत्र विसर्पविद्रधिप्रभृतिरोगविशेषोशमकरणाच्चिकित्सार्धः शिराव्यध उपदिष्टः। तथाऽपरेऽपि ये रोगाः शीतोष्णस्निग्धरूक्षाद्यै

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रुपक्रमैरनुपशांतास्तेऽपि शिराव्यधसाध्याः। अत एव सर्वाऽपि चिकित्सा शिराव्यध उक्त इति ॥ ८७ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायामेकोनविंशोऽध्यायः ॥ १९ ॥

वि०—वायु की भाँति निज एवं आगन्तुज रोगों को उत्पन्न करने वाले रक्त की औषध होने से सिरावेध भी वस्ति की भाँति सम्पूर्ण चिकित्सा है ॥ ८७ ॥

वक्तव्य—सुश्रुत में रक्त को भी शरीर का मुख्य धारक माना है, यथा-'नर्त्ते देहःकफादस्ति, न पित्तान्न च मारुतात्। शोणितादपि वा नित्यं देह एतैस्तु धार्यते ॥'. रक्त दोष के लिये शिरावेध ही उत्तम है-यथा विषरोग में- (१) 'रक्ते निर्ह्रियमाणे तु कृत्स्नं निर्ह्रियते विषम्। (२) 'यानीह कर्माण्युक्तानि विसर्पविनिवृत्तये। एकतस्तानि सर्वाणि रक्तमोक्षणमेकतः ॥' —चरक. चि. अ. २१।१४०

इस प्रकार विद्योतिनी टीका में सूत्रस्थान में दोषादिविज्ञानीय नामक उन्नीसवाँ अध्याय समाप्त हुआ ॥ १९ ॥

विंशोऽध्यायः

पंचकर्मोक्तिप्रस्तावे वमनविरेकान्वासननिरूहानुक्त्वा नस्यविधिमाह—

अथातो नस्यविधिमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

वि०—अब इसके आगे नस्यविधि अध्याय का व्याख्यान करेंगे जैसा कि आत्रेय आदि महर्षियों ने कहा था।

ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते।
नासा हि शिरसो द्वारं तेन तद्व्याप्य हन्ति तान् ॥१॥

स०—जत्रु वक्षोंऽसयोः संधिः। जत्रुण ऊर्ध्वमूर्ध्वजत्रु। मयूरव्यंसकादित्वात्समासः। तत्र विकारा ऊर्ध्वजत्रुविकारास्तेषूर्ध्वजत्रुविकारेषु शिरोरोगादिषु विषये वमनशिराव्यधादयोऽपीष्यंत एव। विशेषेण तु नस्यमिष्यते। नासायां भवं नस्यम्। तत्र भव इति यत्। नासिकायाः पद्यन्न इति नसादेशः। ननु किमिति नस्यमेतेषु रोगेषु विशेषेणेष्टमित्याह—यस्माद् घ्राणं शिरोद्वारं तेन द्वारेण श्रोत्रशृंगाटकप्राप्तमूर्ध्वं नेत्रकंठादिशिरामुखानुप्रवेशेन तच्छिरो व्याप्य तान्विकारान् हंति ॥ १ ॥

नस्यसाध्य विकार—

वि०—जत्रु से ऊपर के रोगों में विशेष कर नस्य बरता जाता है; क्योंकि शिर का द्वार नासा है; इस नासामार्ग से नस्य शिर में फैलकर उन रोगों को नष्ट करता है ॥ १ ॥

विरेचनं बृंहणं च शमनं च त्रिधाऽपि तत्।

स०—तत्र नस्यं विरेचनबृंहणशमनादिभेदेन त्रिधा स्यात्।

नस्य के भेद—

वि०—वह नस्य विरेचन, बृंहण और शमन भेद से तीन प्रकार का है।

तत्र पूर्वं विरेचनाख्यस्योपयोगमाह—

विरेचनं शिरःशूलजाड्यस्यन्दगलामये ॥ २ ॥
शोफगण्डकृमिग्रन्थिकुष्ठापस्मारपीनसे ।

स०—शिरः शूलादिषु विरेचनं नस्यमिष्यते। अपस्मारो यद्यप्यूर्ध्वजत्रुस्थितो न भवति तथाऽपि विरेचननस्येन शाम्यतीति तदुपादानम्। उपलक्षणं चेदम्। कफप्रकोपास्यवैरस्यगंधाज्ञानादिष्वपि विरेचनमेव हितम् ॥ २ ॥

शिरःशूलादि में विरेचन नस्य—

वि०—विरेचन नस्य—शिर के शूल में, शिर की जड़ता में, अभिष्यन्द (नेत्र रोग) में, गल रोग में; शोफ, गण्ड, कृमि, ग्रन्थि, कुष्ठ, अपस्मार और पीनस में बरतना चाहिये ॥ २ ॥

बृंहणं वातजे शूले सूर्यावर्ते स्वरक्षये ॥ ३ ॥
नासास्यशोषे वाक्सङ्गे कृच्छ्रबोधेऽवबाहुके।

स०—वातोद्भवशूलादि बृंहणं नस्यं हितम्। सूर्यावर्तः शिरोरोगविशेषः। कृच्छ्रबोधः कृच्छ्रोन्मीलनम्। अवबाहुको वातव्याधिविशेषः ॥ ३ ॥

वातज शूल में बृंहण नस्य—

वि०—बृंहण नस्य-वातजन्य शिरःशूल में; सूर्यावर्त्त में, स्वरक्षय में, नासा और आस्यशोष में, वाणी के जड़ होने पर, कठिनाई से नेत्र खोलने में तथा अवबाहुक रोग में बरते ॥ ३ ॥

शमनं नीलिकाव्यङ्गकेशदोषाक्षिराजिषु ॥ ४ ॥

स०—नीलिकादिषु शमनं नस्यं हितम्। नीलिकाव्यंगौ क्षुद्ररोगेषु वक्ष्यमाणौ। केशदोषः केशशातः ॥ ४ ॥

नीलिकादि में शमन नस्य—

वि०—शमन नस्य—नीलिका, व्यंग, केश रोग (बालों का गिरना और पकना) तथा अक्षिराजि में (आँखों में रेखा की भाँति सिराएँ होने पर) बरतना चाहिये ॥ ४ ॥

यथास्वं यौगिकैः स्नेहैर्यथास्वं च प्रसाधितैः।
कल्ककाथादिभिश्चाद्यं मधुपट्वासवैरपि ॥ ५ ॥

स०—ये ये स्नेहा यथास्वं तैः। किंभूतैः। यौगिकैर्योगार्हैः सर्षपतैलादिभिर्न तु घृतादिभिः। तथा यथास्वं मरीचशुण्ठ्यादिभिः प्रसाधितैः संस्कृतैः। यथाकल्ककाथस्वरसादिभिश्च यथास्वं कफघ्नैर्गिरिकर्णिकादिजैराद्यं विरेचनाख्यं नस्यं भवति। न केलमेतैर्यावन्माक्षिकादिभिश्च। पटुः सैंधवादिः। आसवो मद्यविशेषः ॥ ५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विरेचन नस्य की औषधें—

वि०—जो-जो स्नेह जिन-जिन दोषों के लिये यौगिक (उचित) हों एवं दोष तथा रोग के अनुसार मरिच, सोंठ आदि से संस्कृत हों तथा कल्क-क्वाथ आदि से, मधु, सेंधा-नमक तथा आसव से भी विरेचन नस्य देना चाहिये ॥ ५ ॥

बृंहणं धन्वमांसोत्थरसासृक्खपुरैरपि ।
शमनं योजयेत्पूर्वैः क्षीरेण सलिलेन वा ॥ ६ ॥

स०—बृंहणं नस्यं धन्वोत्थमांसोद्भवरसैः स्यात् । तथाऽसृजा रक्तेन धन्वोत्थेनैव । तथा खपुरैर्निर्यासविशेषैः । अपि शब्दादन्यैरपि पूर्वोक्तैः स्नेहैरतीक्ष्णैर्बृंहणं भवति । शमनं नस्यं पूर्वोक्तैरतीक्ष्णैः स्नेहैर्घृतादिभिस्तथा मांसरसादिभिर्योजयेत् । तथा क्षीरेण जलेन चेति । सुश्रुतस्तु स्पष्टतरमुवाच । तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्यशोषापबाहुकाऽकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु वातपैत्तिकेषु चान्येषु मुखरोगेषु वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति । शिरोविरेचनं श्लेष्मणाऽभिव्याप्ततालुकंठशिरसामरोचकशिरोगौरवशूलपीनसाऽर्धावभेदकक्रिमिप्रतिश्यायाऽपस्मारगंधाज्ञानेष्वन्येषु चोर्ध्वजत्रुगतेषु कफजेषु विकारेषु शिरोविरेचनद्रव्यैस्तत्सिद्धेन वा स्नेहेनेति । तथा सम्यग्विशुद्धे शिरसि सर्पिर्नस्यं विरेचयेत् । अवपीडस्तु शिरोविरेचनवदभिष्यंदसर्पदष्टविसंज्ञेभ्यो दद्याच्छिरोविचनद्रव्याणामन्यतममवपीड्याऽवपिष्य चेतोविरेकारक्रिमिविषाभिपन्नानां चूर्णं प्रधमेत् । शर्करेक्षुरसक्षीरघृतमांसरसानामन्यतमं क्षीणानां शोणितपित्ते च विदध्यात् । कृशदुर्बलभीरूणां सुकुमारस्य योषिताम् । श्रुताः स्नेहाः शिरःशुद्धे कल्करतेभ्यो यथा हित इति ॥ ६ ॥

बृंहण और शमन नस्य की औषधें—

वि०—बृंहण नस्य—जांगल मांस से बनाये रस से, तथा गोंद से तथा अन्य अतीक्ष्ण स्नेह (घी आदि) से भी देवे । शमन नस्य-जांगल मांसरस आदि से या पूर्वोक्त घी-तैल आदि से, एवं दूध या पानी से देना चाहिये ॥ ६ ॥

अधुनाऽन्यानपि नस्यविशेषानाह—

मर्शश्च प्रतिमर्शश्च द्विधा स्नेहोऽत्र मात्रया ।
कल्काद्यैरवपीडस्तु स तीक्ष्णैर्मूर्द्धरेचनैः ॥ ७ ॥
ध्मानं विरेचनश्चूर्णो—

स०—एषु नस्यभेदेषु मध्ये मर्शाख्यः प्रतिमर्शाख्यश्चेति स्नेहो द्विधा भेदद्वयेन भवति । कथम् । मात्रया मात्राभेदेन नतु वस्तुभेदेन । तुरवधारणे भिन्नक्रमः । कल्काद्यैरेवाऽवपीडो न स्नेहेन । स चाऽवपीडस्तीक्ष्णैः शुद्ध्यादिभिः कल्कक्वाथरसाद्यैर्न मृदुभिः । मूर्धविरेचनाख्यं नामांतरमस्य । अतीक्ष्णैस्तु शमनसंज्ञमेव । विरेचनस्य प्रकारांतरमाह—चूर्णो मरीचादिभिः कृतो विरेचनो बहिर्दोषनिरसनो ध्मानं प्रध्मानाख्यं नस्यं स्यात् । कथं नासया प्रणीयमानः ॥ ७ ॥

नस्य प्रकार—

वि०—मात्रा के विचार से स्नेहनस्य मर्श और प्रतिमर्श भेद से दो प्रकार का है । पत्र, फल आदि के कल्क, स्वरस आदि का नस्य अवपीड कहलाता है । यह मरिच आदि तीक्ष्ण द्रव्यों से युक्त होने पर शिरोविरेचन होता है । मरिचादि के चूर्ण को विरेचन के लिये फूत्कार से नासिका में देना ध्मान या प्रधमन नस्य है ॥ ७ ॥

कथं पुनरसौ नासायां ध्मापयितव्य इत्याह—

—युञ्ज्यात्तं मुखवायुना ।
षडङ्गुलद्विमुखया नाड्या भेषजगर्भया ॥ ८ ॥
स हि भूरितरं दोषं चूर्णत्वादपकर्षति ।

स०—युंज्यात्तं चूर्णं मुखवायुना फूत्काराख्येन प्रवेशयेत् । कथम् । नाड्या कारणभूतया । किंभूतया । षडंगुलानि यस्याः सा षडङ्गुला । मुखे यस्याः सा द्विमुखा । षडङ्गुला चाऽसौ द्विमुखा च षडङ्गुलद्विमुखा तया । तथा भेषजगर्भया त्रिकटूवादिचूर्णभरितया । स हि चूर्णो भूरितरं बहुतरं दोषं चूर्णत्वादपकर्षति निर्हरति । यथा कल्कक्वाथादयः । ततस्तस्माद्विरेचनाख्योऽयमित्यर्थः ॥ ८ ॥

नस्य की प्रयोग-विधि और फल—

वि०—प्रधमन नस्य में चूर्ण को मुख की वायु से नासा में प्रविष्ट करे । इसके लिये ६ अङ्गुल लम्बी-दोनों ओर मुख वाली नाड़ी बनाकर उसमें औषध भरकर फूंक से नासा में देवे । यह औषध चूर्ण होने से दोष को अधिक मात्रा में खींचती है ॥ ८ ॥

अधुना मर्शस्नेहस्य परिमाणमधिकृत्याह—

प्रदेशिन्यङ्गुलीपर्वद्वयान्मग्नसमुद्धृतात् ॥ ९ ॥
यावत्पतत्यसौ बिन्दुर्दशाष्टौ षट् क्रमेण ते ।
मर्शस्योत्कृष्टमध्योना मात्रास्ता एव च क्रमात् ॥ १० ॥
बिन्दुर्द्वयोनाः कल्कादेः—

स०—प्रदेशिन्यंगुष्ठसमीपजांगुली तस्याः पर्वद्वयं तस्मात् । किंभूतात् पूर्वं मग्नं पश्चात्समुद्धृतम् तस्मान्मग्नसमुद्धृतात् तर्जनीपर्वद्वयाद्यावत्परिमाणं पतत्यसौ बिंदुरुच्यत इति शेषः । ते बिंदवो यथासंख्यं मर्शस्य दशोत्कृष्टा मात्रा । अष्टौ मध्यमा मात्रा । षट् कनिष्ठा मात्रा । ता एव क्रमान्मात्रा बिंदुद्वयेनोनाः कल्कस्वरसादेः । तेनाष्टौ बिंदव उत्तमा मात्रा षण्मध्यमा चत्वारः कनिष्ठेत्यवतिष्ठते । यावदिति यत्परिमाणमस्येति यत्तदेतेभ्यः परिमाणे वतुप् । आ सर्वनाम्न इत्याकारादेशः ॥ ९—१० ॥

मर्शस्नेह का परिमाण—

वि०—तर्जनी अङ्गुली के दो पर्वों को द्रव में डुबोकर निकाल लेने से जितना स्नेह या स्वरस गिरता है, उसका नाम बिन्दु है (इस प्रकार अङ्गुली से नासा में औषध टपकाना मर्श कहलाता है)। मर्श नस्य में दस बिन्दु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्कृष्ट मात्रा; आठ बिन्दु मध्यम मात्रा और ६ बिन्दु ह्रस्व मात्रा है। अवपीडक नस्य से कल्कादि की आठ बिन्दु उत्तम मात्रा, ६ बिन्दु मध्यम मात्रा और चार बिन्दु ह्रस्व मात्रा है ॥ ९-१० ॥

अधुना येषां नस्यमयुक्तं तानाह—

—योजयेन्न तु नावनम् ।
तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ॥ ११ ॥
भुक्तभक्तशिरःस्नातस्नातुकामस्रुतासृजाम् ।
नवपीनसवेगार्तसूतिकाश्वासकासिनाम् ॥ १२ ॥
शुद्धानां दत्तवस्तीनां तथाऽनार्तवदुर्दिने ।
अन्यत्रात्ययिकाद्व्याधेः—

स०—तोयादि पीतं यैस्तेषाम् । आहिताग्न्यादित्वात्परनिपातः । तथा पातुमिच्छतां नावनं नस्यं नैव योजयेत् । तोयादिपीतानां पातुमिच्छतां च प्रयोजितं नस्यं नासास्यदोषदेहतिमिरशिरोरोगान् कुर्यात् । भुक्तभक्तस्य च दोषा ऊर्ध्वस्रोतांस्यावृत्य छर्दिश्वासकासप्रतिश्यायान् जनयेयुः । शिरःस्नातस्य शिरोऽक्षिकर्णशूलकंठरोगपीनसहनुमन्यास्तंभार्दितशिरःकंपान् । स्नातुकामस्य च मूर्ध्नि स्तिमितो दोषो जाड्यारुचिपीनसान् । स्रुतरक्तस्य च क्षामतामरुचिमग्निसदनं च । नवप्रतिश्यायस्य स्रोतोरोधाद् दुष्टप्रतिश्यायकृमिकंडूविचर्चिकारोगान् । मूत्रितोच्चारिताद्विवेगार्तानां भृशतरं वेगविधारणजान् विकारान् । सूतिकायाः स्रुतरक्तदोषान् । श्वासकासिनोर्व्याधिविवृद्धिम् । शुद्धानां कृतवमनविरेचनानां श्वासकासस्वरेंद्रियहानिशिरोगौरवकृमिकंडूदोषान् । दत्तबस्तीनां विवृतस्रोतस्तयाऽतिव्याप्त्या श्वासकासादीन् । तथाऽनार्तवदुर्दिनेऽपि सहसैव शैत्याच्छिरोरुग्वेपथुस्तैमित्यतालुनेत्रकंडूपाकमन्यास्तंभकंठरोगप्रतिश्यायारुंषिकाः । एषु च नस्यदोषेषु जातेषु यथास्वमायतनं दोषोद्रेकं चाऽवेक्ष्य स्नेहस्वेदशिरोविरेकवक्त्रलेपसेकतीक्ष्णावपीडधूमगंडूषादीनि यथास्वं कुर्यात् । संग्रहे चोक्तम् । गर्भिण्या भक्तद्वेषज्वरमूर्च्छाऽर्धावभेदकाः स्युः । अपत्यं च व्यंगं विकलेंद्रियमुन्मादापस्मारयुक्तं वा स्यात् । विशेषेण तु गर्भिणी रूक्षे नस्यकर्मणि वर्षाभूकाकोलीकपिकच्छुभिः शृतं पयः पिबेत् । बलाविदार्यंशुमतीमेदाभिर्वृंभिरेव च शृतं हविर्वातहरसिद्धश्च स्नेहः शिरोबस्तौ कर्णपूरणे च योज्यः । सर्वं च बृंहणमन्नपानमिति । तोयपीतादिषु सदैव किं न योज्यमित्याह । अन्यत्रेत्यादि । आत्ययिके व्याधौ नस्यं योज्यमेव ॥ ११-१२ ॥

नस्य के अयोग्य व्यक्ति—

वि०—नस्य का निषेध—जिन्होंने पानी; मद्य, गरविष या स्नेह पिया हो अथवा जिनको पीने की इच्छा हो; जिन्होंने भोजन किया हो; शिर से स्नान किया हो, या स्नान की जिनको इच्छा हो; जिनका रक्तस्राव किया गया हो; नूतन पीनस रोग से पीडित, मल, मूत्र आदि का वेग होने पर; सूतिका, श्वास, कास से पीडित, वमन-विरेचन से शुद्ध, जिनको बस्ति दी गई हो; ऋतु के बिना जिस दिन बादल आये हों, इनको बिना आत्ययिक रोग के नस्य नहीं देना चाहिये। (इन अवस्थाओं में नस्य देने से हानि होती है। विस्तृत वर्णन अ. सं. सू. अ. २९ में देखिए।) ॥ ११-१२ ॥

साम्प्रतं यत्र काले यत्र च दोषे नस्यं प्रयोज्यं तद्दर्शनार्थमाह—

अथ नस्यं प्रयोजयेत् ॥ १३ ॥
प्रातः श्लेष्मणि, मध्याह्ने पित्ते सायंनिशोश्चले ।
स्वस्थवृत्ते तु पूर्वाह्ने शरत्कालवसन्तयोः ॥ १४ ॥
शीते मध्यन्दिने ग्रीष्मे सायं वर्षासु सातपे ।
वाताभिभूते शिरसि हिध्मायामपतानके ॥ १५ ॥
मन्यास्तम्भे स्वरभ्रंशे सायंप्रातर्दिने दिने ।
एकाहान्तरमन्यत्र—

स०—श्लेष्मरोगे प्रातर्नस्यं प्रयोजयेत् । पित्तरोगेषु मध्याह्ने । वातेऽपराह्ने रात्रौ च । कारणे कार्योपचारात्कफरोगः श्लेष्मशब्देनोक्तः । तेन श्लेष्मरोगादिषु प्रातर्नस्यं योज्यम् । संग्रहे विशेषः । लालास्रावसुप्तिप्रलापदंतकटकटायनक्कथनकृच्छ्रोन्मीलनपूतिमुखकर्णनादतृष्णार्दितशिरोरोगश्वासकासोच्छिद्रेषु रात्रावपीति । तुरवधारणे । स्वस्थवृत्ते शरदि वसंते च पूर्वाह्ने एव नस्यं योज्यम् । शीते हेमंतशिशिरलक्षणे मध्याह्ने । ग्रीष्मे सायमपराह्ने । वर्षासु सातपे दृश्यमाने रवौ वासरे प्रयोजयेत् । अधुना दोषापेक्षया नस्यकालनियमाम—वाताभिभूतमूर्धादिषु स्वरभ्रंशांतेषु सायंप्रातः पूर्वाह्णाऽपराह्णयोः प्रतिदिनं च नैकाहांतरितम् । अन्यत्र वाताभिभूतमूर्धादिभ्योऽन्यस्मिन् रोगे एकाहांतरम् ॥ १३-१५ ॥

नस्य के योग्य काल तथा दोष—

वि०—कफ में प्रातः, पित्त में मध्याह्न तथा वायु में सायं और रात्रि में नस्य देवे। स्वस्थ अवस्था में, शरत् और वसन्त के पूर्वाह्न में नस्य देना चाहिये। शीतकाल में मध्याह्न समय में; ग्रीष्मकाल में सायंकाल में और वर्षाकाल में जब सूर्य दीखता हो तब नस्य देना चाहिये। वात से आक्रान्त शिरोरोग में, हिक्का में, अपतानक में; मन्यास्तम्भ में तथा स्वरभ्रंश में, प्रतिदिन सायं और प्रातः नस्य देवे। अन्य अवस्थाओं में एक दिन छोड़कर नस्य देना चाहिये ॥१३-१५॥

—सप्ताहं च तदाचरेत् ॥ १६ ॥

स०—सप्ताहं च नस्यमनाचरेत् । सप्ताहादूर्ध्वं नस्यं न विदध्यादित्यर्थः ॥ १६ ॥

वि०—नस्य को सात दिन तक करना चाहिये ॥ १६ ॥

इदानीं यादृशस्य पुरुषस्य यथास्थितस्य नस्यं देयं तदाह—

स्निग्धस्विन्नोत्तमाङ्गस्य प्राक्कृतावश्यकस्य च ।
निवातशयनस्थस्य जत्रूर्ध्वं स्वेदयेत् पुनः ॥१७॥
अथोत्तानर्जुदेहस्य पाणिपादे प्रसारिते ।
किञ्चिदुन्नतपादस्य किञ्चिन्मूर्द्धनि नामिते ॥१८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नासापुटं पिधायैकं पर्यायेण निषेचयेत् ।
उष्णाम्बुतप्तं भैषज्यं प्रणाड्या पिचुनाऽथवा ॥१९॥
दत्ते पादतलस्कन्धहस्तकर्णादि मर्दयेत् ।
शनैरुच्छिद्य निष्ठीवेत्पार्श्वयोरुभयोस्ततः ॥२०॥
आभेषजक्षयादेवं द्विस्त्रिर्वा नस्यमाचरेत् ।

स०—पूर्वं स्निग्धं पश्चात्स्विन्नमुत्तमांगं शिरो यस्य तस्य तथा प्राक् पूर्वं कृतमावश्यकमवश्यकरणीयमुच्चारमूत्रोत्सर्गदंतधावनादिकं येन स प्राक्कृतावश्यकस्तस्य तथा निवातस्थाने शयनं यत्तत्र स्थितस्य सतो भूयो जत्रूर्ध्वं स्वेदयेत् । अथाऽनंतरमुत्तानस्पष्टस्थितशरीरस्य सतो हस्तचरणे प्रसारिते तथा किंचिदुन्नतचरणस्य किंचिच्छिरसि नामिते सति नासापुटमेकं पिधाय स्थगयित्वा पर्यायेण नतु युगपद्भैषज्यं निषेचयेत् । कीदृशमुष्णांबुतप्तमुष्णोदकोष्णीकृतम् । केन परिषेचयेत् । प्रनाड्याऽथवा पिचुना कार्पासादिमयेन । दत्ते नस्ये सति पादतलस्कंधहस्तकर्णादि मर्दयेत् । आदिशब्देन ग्रीवाललाटादिपरिग्रहः । सुश्रुते चाऽभ्यधायि । वस्त्रावच्छादितनेत्राय वामहस्तप्रदेशिन्योन्नामितनासिकाग्राय विशुद्धस्रोतसि दक्षिणहस्तेन स्नेहमुष्णांबुप्रतप्तं रजतादिशुक्तीनामन्यतमस्थमनवच्छिन्नधारमासिंचेदिति । ततो मर्दनानन्तरं शनैरुच्छिद्य पार्श्वयोरुभयोर्निष्ठीवेत् अनभ्यवहरन् । कफसहितमभ्यवहृतमग्निमवसादयेद्दोषं च संवर्धयेत् । एकपार्श्वनिष्ठीवने न सर्वाः शिरा भेषजेन सम्यग्व्याप्यंते । एवमनेन क्रमेणाऽऽभेषजक्षयाद् द्विस्त्रिर्वा नस्यं कुर्याद् । ननु नस्यमात्रा सकृदेव प्रक्षेप्तव्या हीनमात्रं चौषधं न देयम् । तद्धि दोषानुत्क्लेश्यानिर्हरद्भौरवारुचिकासप्रसेकपीनसच्छर्दिकंठरोगान् कुर्यात् । अधिकमतियोगाद्दोषान् कुर्यात् । सकृदेव सर्वं दत्तमुच्छिद्यमानं शिरोरोगप्रतिश्यायघ्राणक्लेदानुच्छ्वासोपरोधं च कुर्यात् । अत्युष्णं दाहपाकज्वररक्तांगमूर्च्छाश्रमान् । अतिशीतं हीनदाषानेव । अत्युन्नतशिरसोऽसम्यक्प्रतिपद्यमानं तानेव हीनदोषान् । अत्यवनतशिरसो दूरगमनान्मूर्छाजाड्यज्वरान् संकुचितगात्रस्य सम्यग्धमनीरप्राप्नुवद्दोषोत्क्लेशं कुर्यात् ॥ १७-२० ॥

नस्य की विधि—

वि०—विधि—शिर का स्नेह और स्वेदन करके; मलत्याग, दन्तधावन आदि आवश्यक कार्य पहले निपटाकर, वायुरहित स्थान में रोगी को चारपाई पर बिठाकर जत्रु से ऊपर पुनः स्वेद देवे। उत्तान-चित्त-पीठ के भार-सीधा शरीर को रख कर हाथ और पाँव को फैलाकर; पायते को कुछ ऊंचा रखकर और शिर को कुछ थोड़ा सा नीचा करे। फिर गरम पानी में रखने से या उसके बाष्प से औषध को गरम करके; औषध को नलिका या पिचु से-एक नासापुट को बन्द करके अदल-बदल कर नासाछिद्र में निचोड़े या डाले। नस्य देकर पैर के तलवे, स्कन्ध, हाथ, कान आदि का मर्दन करे। फिर धीमे से नासा द्वारा श्वास को ऊपर खींचकर दोनों पार्श्वों में (लेटता हुआ श्वास खींचे और आए हुए कफ या स्राव को) थूक देवे। इस प्रकार सम्पूर्ण औषध निकलने तक करे तथा दो या तीन बार नस्य लेवे ॥ १७-२० ॥

यदि च नस्ये दीयमाने भेषजवेनादसात्म्येन संजातमूर्छायां प्रतीकारमाह—

मूर्च्छायां शीततोयेन सिञ्चेत्परिहरञ् शिरः ॥ २१ ॥

स०—मूर्छायां सत्यां शीतजलेन मूर्धवर्जं सिंचेत् । संग्रहेऽप्युक्तम् । न च नस्ये निषिच्यमाने कोपहासव्याहारस्यंदनोच्छिङ्कनान्याचरेत् । तथाहि शिरोरुक्प्रतिश्यायकासतिमिरखलितपलितव्यंगतिलकालकमुखदूषकानां संभव इति ॥ २१ ॥

नस्य से मूर्च्छा आने पर कर्तव्य—

वि०—मूर्च्छा होने पर शिर को छोड़कर शीत जल से परिषेक करे ॥ २१ ॥

स्नेहं विरेचनस्यान्ते दद्याद्दोषाद्यपेक्षया ।

स०—विरेचनस्यावसाने देशदोषसात्म्याद्यपेक्षया स्नेहमनुसंन्यसेत् । तंत्रांतरे चोक्तम् । अथ नस्यार्हं नरमव्याहतवेगं धौतांतर्बहिर्मुखमवस्थितशिरसं प्रायोगिकधूमपानविशुद्धस्रोतसं स्वास्तीर्णनिवातशयनस्थमुत्तानशीर्षमीषदुन्नतपादं प्रसारितचरणं च जत्रूर्ध्वं पाणितापेन पुनः पुनः स्वेदयेदिति ।

विरेचन नस्य के पश्चात् कर्तव्य—

वि०—विरेचन नस्य के पीछे दोष आदि की अपेक्षा से स्नेह देना चाहिये (स्नेह नस्य से विरेचन नस्य की तीक्ष्णता कम हो जाती है)।

नस्यान्ते वाक्शतं तिष्ठेदुत्तानः—

स०—नस्यावसाने वाक्शतं मात्राशतमुत्तानो निद्रामासेवमानस्तिष्ठेत् ।

वि०—नस्य लेने के उपरान्त उत्तान स्थिति में एक से सौ तक गिनने के समय तक लेटे रहे (सोये नहीं)।

—धारयेत्ततः ॥ २२ ॥
धूमं पीत्वा कवोष्णाम्बुकवलान् कण्ठशुद्धये ।

स०—ततो वाक्शतावस्थानादनंतरमीषदुष्णजलकवलान् धारयेत् । किमर्थम् । कंठशुद्धये उत्क्लिष्टदोषशांतये । किं कृत्वा । धूमं विरेचनाद्यन्यतमं यथायोगं पीत्वा ततोऽस्य स्नेहोक्तविधिमाचारमादिशेत् ॥ २२ ॥

वि०—फिर धूमपान करके गुनगुने पानी के कवलों को कण्ठशुद्धि के लिये धारण करना चाहिये ॥ २२ ॥

सम्यक् स्निग्धे सुखोच्छ्वासस्वप्नबोधाक्षपाटवम् ॥ २३ ॥

स०—सम्यक्स्निग्धे शिरसि सुखोच्छ्वासादयः स्युः । संग्रहे चोक्तम् । सम्यक्स्निग्धे मूर्ध्नि विरिक्ते वा सुखोच्छ्वासनिःश्वाससुखसुप्तबोधाक्षिपाटवानि स्युः ॥ २३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नस्य के सम्यक् योग आदि का लक्षण—

वि०—सम्यक् स्नेहन होने पर सुखपूर्वक उच्छ्वास, सुखपूर्वक नींद आना और जागना; इन्द्रियों में निर्मलता सक्रियता आती है ॥ २३ ॥

रूक्षेऽक्षिस्तब्धता शोषो नासास्ये मूर्द्धशून्यता ।

स०—रूक्षे तु शिरस्यक्षिस्तब्धता तथा नासायामास्ये च शोषो मूर्धशून्यता च स्यात् ।

वि०—स्नेहन नस्य के हीन योग में—आँखों में जड़ता; नासा और मुख में शुष्कता और शिर में शून्यता होती है ।

स्निग्धेऽतिकण्डूगुरुताप्रसेकारुचिपीनसाः ॥ २४ ॥

स०—अतिस्निग्धे कंड्वादयः स्युः ॥ २४ ॥

वि०—स्नेहन नस्य से अतिस्निग्ध होने पर कण्डू, भारीपन; मुख एवं नासा से लालास्राव, अरुचि और पीनस होते हैं २४ ॥

सुविरिक्तेऽक्षिलघुतावक्त्रस्वरविशुद्धयः ।

स०—सुविरिक्ते सम्यग्विरिक्तेऽक्षिलघुतादयः स्युः ।

सुविरिक्त और दुर्विरिक्त का लक्षण—

वि०—भली प्रकार विरेचन नस्य होने पर—आंखों में लघुता एवं मुख और स्वर की शुद्धि होती है ।

दुर्विरिक्ते गदोद्रेकः क्षामताऽतिविरेचिते ॥ २५ ॥

स०—दुर्विरिक्ते गदोद्रेको रोगस्याऽधिक्यमतिविरेचिते क्षामता कृशता स्यात् ॥ २५ ॥

वि०—भली प्रकार विरेचन न होने पर—रोग बढ़ता है और अतिविरेचन से कृशता हो जाती है ॥ २५ ॥

अधुना प्रतिमर्शस्य विषयं सूचयितुमाह—

प्रतिमर्शः क्षतक्षामबालवृद्धसुखात्मसु ।
प्रयोज्योऽकालवर्षेऽपि—

स०—प्रतिमर्शः क्षतादिषु प्रयोज्यः । अकालवर्षणेऽपि कार्यः ।

प्रतिमर्श का विषय—

वि०—प्रतिमर्श नस्य[1]—उरःक्षत, क्षीण, बालक, वृद्ध तथा सुखी जीवन व्यतीत करने वालों में तथा अनार्त्तव—दुर्दिन में भी देना चाहिये ।

—न त्विष्टो दुष्टपीनसे ॥ २६ ॥
मद्यपीतेऽबलश्रोत्रे क्रमिदूषितमूर्द्धनि ।
उत्कृष्टोत्क्लिष्टदोषे च हीनमात्रतया हि सः ॥ २७ ॥

स०—दुष्टपीनसे तु न प्रयोज्यः । दुष्टपीनसो नासारोगेषु वक्ष्यमाणः । तथा मद्यपीते तथाऽबलश्रोत्रे रुद्धश्रवणमार्गे तथा क्रमिभिर्दूषितो मूर्धा यस्य तस्मिन् क्रमिपीडितशिरसि तथोत्कृष्टो वृद्धिं गतस्तथोत्क्लिष्टः प्रचलो दोषो यस्य तस्मिंश्च प्रतिमर्शो न योज्यः । केन प्रकारेण न योज्य इत्याह—हि यस्मात् हीनमात्रतया हीना मात्रा यस्य स हीनामात्रस्तस्य भावो हीनमात्रता तया यस्मादसौ प्रयुज्यते । एषां चोदीर्णदोषत्वात् तावता दोषोत्क्लेश एव भवति न शमः ॥ २६–२७ ॥

दुष्ट पीनस में उसका निषेध—

वि०—दुष्ट पीनस में (प्रतिमर्श) नहीं देना चाहिये । मद्यपान के बाद, बहरेपन में, शिर में कृमि होने पर, बढ़े हुये तथा चलायमान हुये दोष की अवस्था में प्रतिमर्श नस्य हीन मात्रा होने से नहीं देना चाहिये । (हीन मात्रा के कारण रोग बढ़ने की सम्भावना रहती है) ॥ २६–२७ ॥

निशाहर्भुक्तवान्ताहःस्वप्नाध्वश्रमरेतसाम् ।
शिरोऽभ्यञ्जनगण्डूषप्रस्रावाञ्जनवर्चसाम् ॥ २८ ॥
दन्तकाष्ठस्य हासस्य योज्योऽन्तेऽसौ द्विबिन्दुकः ।

स०—असौ प्रतिमर्शो द्विबिंदुको निशादीनां पंचदशानां कालानामंते प्रयोज्यः ॥ २८ ॥

प्रतिमर्श का काल तथा मात्रा—

वि०—प्रतिमर्श—रात्रि या दिन में, भोजन के बाद, वमन करके, दिन में सोकर, मुसाफिरी, थकान एवं स्त्रीसंग करने पर; शिरोभ्यंग, गण्डूष, मूत्रत्याग, अञ्जन, मलत्याग व दातुन करके तथा हास्य के उपरान्त इन पन्द्रह अवस्थाओं में प्रतिमर्श नस्य दो बिन्दु मात्रा में बरतना चाहिये ॥ २८ ॥

पञ्चसु स्रोतसां शुद्धिः क्लमनाशस्त्रिषु क्रमात् ॥ २९ ॥
दृग्बलं पञ्चसु ततो दन्तदार्ढ्यं मरुच्छमः ।

स०—तत्र निशाहर्भुक्तवांताहःस्वप्नाख्येषु पंचसु कालेषु प्रतिमर्शे प्रयुक्ते स्रोतसां शुद्धिर्भवति । क्रमात्क्रमेणैव पठितेष्वध्वश्रममैथुनानां त्रयाणामंते प्रतिमर्शे दत्ते सति श्रमनाशः स्यात् । उपलक्षणं चेदम् । मनःप्रसादशिरोलाघवे अपि भवतः । एवं शिरोऽभ्यंजनादिषु पंचस्वंते प्रतिमर्शे योजिते सति दृष्टेर्बलं स्यात् । ततोऽनंतरं दंतकाष्ठहासयोरंते यथासंख्येन द्विजदृढत्वं पवनशमश्च स्यात् ॥ २९ ॥

प्रतिमर्श का फल—

वि०—प्रथम (भोजन से दिवास्वप्न पर्यन्त) पांच कालों में प्रतिमर्श नस्य देने से स्रोतों का शोधन होता है, अगले तीन (अध्व, श्रम और स्त्रीसंग) कालों में नस्य देने से थकान मिटती है । अगले पांच (शिरोऽभ्यङ्ग से मलत्यागपर्यन्त) कालों में बरतने से आँखों की दीप्ति बढ़ती है, आगे (दातुन के बाद) दाँतों में दृढ़ता होती है, और (हास्य के बाद वायु की शान्ति होती है ॥ २९ ॥

अधुनांऽजनस्य धूमादीनां च पुरुषविशेषे नियमं करोति—

न नस्यमूनसप्ताब्दे नातीताशीतिवत्सरे ॥ ३० ॥

[1] केवल दो बिन्दु स्नेह को नाक में डालने अथवा स्नेह द्रव्य में अङ्गुलि डुबाकर उसे नासा में डाल कर घुमा देने को प्रतिमर्श कहते हैं । सुश्रुत ने एक बार खींचने से जितना स्नेह नासा से गले तक पहुँच जाय उसे प्रतिमर्श कहा है ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न चोनाष्टादशे धूमः कवलो नोनपञ्चमे ।
न शुद्धिरूनदशमे न चातिक्रान्तसप्ततौ ॥ ३१ ॥

स०—ऊनसप्तवर्षे नस्यं न योज्यम् । तथाऽतिक्रांताशीतिवर्षे च नस्यं न प्रयोज्यम् । अपूर्णाऽष्टादशे वर्षे धूमो न प्रयोज्यः । कवलोऽपूर्णपंचवत्सरे न प्रयोज्यः । ऊनदशमवर्षे शुद्धिर्वमनविरेकादिका न प्रयोज्या । तथा अतीतसप्ततिवर्षे शुद्धिर्न योज्या ॥ ३०-३१ ॥

अवस्थानुसार नस्यादि का विधान—

वि०—सात वर्ष से कम तथा अस्सी वर्ष के उपरान्त आयु में नस्य नहीं देना चाहिये। अट्ठारह साल से कम आयु वाले को धूम नहीं देना चाहिये। पाँच साल से कम आयु में कवल नहीं देना चाहिये। दस साल से कम और सत्तर साल के उपरान्त आयु में वमन-विरेचन द्वारा शोधन नहीं करना चाहिये ॥ ३०-३१ ॥

आजन्ममरणं शस्तः प्रतिमर्शस्तु बस्तिवत् ।
मर्शवच्च गुणान् कुर्यात्स हि नित्योपसेवनात् ॥ ३२ ॥
न चात्र यन्त्रणा नापि व्यापद्भ्यो मर्शवद्भयम् ।

स०—प्रतिमर्शः पुनर्बस्तिरिव शस्तो हितः । कथम् । आजन्ममरणं जन्ममरणे चावधिं कृत्वा प्रतिमर्शो हित इत्यर्थः । स च प्रतिमर्शो नित्योपसेवनात् संततमभ्यस्यमानो मर्श इव गुणान् सुखोच्छ्वासादीन् कुर्यात् । अत्र च प्रतिमर्शे यंत्रणोष्णोदकोपचारी स्यादित्यादिका नास्ति । न च व्यापद्भ्योऽक्षिस्तब्धता शोष इत्यादिभ्यो भयं मर्श इव अस्तीति । मर्श इव मर्शवत् । सप्तम्यंताद्वतिः ॥ ३२ ॥

प्रतिमर्श का सर्वदा प्रयोग—

वि०—प्रतिमर्श नस्य बस्ति की भांति जन्म से लेकर मृत्यु पर्यन्त उत्तम है। नित्य सेवन करने से मर्श नस्य की भांति गुणकारी है। इसमें न तो किसी प्रकार का कोई परहेज है, और न मर्श के समान अक्षिस्तब्धता आदि किसी रोग का भय है ॥ ३२ ॥

तैलमेव च नस्यार्थे नित्याभ्यासेन शस्यते ॥ ३३ ॥
शिरसः श्लेष्मधामत्वात्स्नेहाः स्वस्थस्य नेतरे ।

स०—तैलमेव नित्याभ्यासेन प्रतिमर्शन्यायेन नस्यार्थे श्रेष्ठं भवति । कुतो हेतोर्मूर्ध्नः कफस्थानत्वात् न चापरे स्नेहास्तेषां श्लेष्मलत्वादिति भावः ॥ ३३ ॥

नस्य में तैल की श्रेष्ठता—

वि०—स्वस्थ पुरुष को नित्य प्रति बरतने के लिये नस्य में तैल ही उत्तम है। क्योंकि शिर कफ का स्थान होता है अतः दूसरे स्नेह इतने गुणकारी नहीं, (तैल से कफ-वृद्धि नहीं होती है; अन्य स्नेहों से कफ-वृद्धि होकर विकार उत्पन्न हो सकते हैं।) ॥ ३३ ॥

आशुकृच्चिरकारित्वं गुणोत्कर्षापकृष्टता ॥ ३४ ॥
मर्शे च प्रतिमर्शे च विशेषो न भवेद्यदि ।
को मर्शं सपरीहारं सापदं च भजेत्ततः ॥ ३५ ॥
अच्छपानविचाराख्यौ कुटीवातातपस्थिती ।
अन्वासमात्राबस्ती च तद्वदेव विनिर्दिशेत् ॥ ३६ ॥

स०—आशुकारी मर्शश्चिरकारी तु प्रतिमर्शः । गुणोत्कर्षत्वयुक्तो मर्शो गुणापकृष्टताविन्वतश्च प्रतिमर्श इत्यनयोर्भेदः । यदि च मर्शे प्रतिमर्शे च विशेषो न स्यात्तदा मर्शं सपरीहारं सव्यापदं च को भजेत् । न कश्चिद्भजेदित्यर्थः । प्रतिमर्शविशेषवदच्छपानविचाराख्यौ स्नेहौ शीघ्रकारित्वादिना विशेषेण निर्दिशेत् । तथा कुटीप्रवेशस्थित्या यद्रसायनमुपयुज्यते यच्च वातातपाद्यपरिहारस्थित्या रसायनं क्रियते ते च द्वे अपि यथैव विशेषेण निर्दिशेत् । तथान्वासनं मात्राबस्तिश्च तावप्येवं चिरकारिशीघ्रकारित्वादिगुणैर्विनिर्दिशेत् ॥ ३३-३६ ॥

मर्श तथा प्रतिमर्श के भेद—

वि०—मर्श नस्य शीघ्रकारी एवं गुणों में उत्कृष्ट है, प्रतिमर्श देर में काम करने वाला और गुणों में हीन है अन्यथा यदि मर्श और प्रतिमर्श में कोई भेद न हो तो कौन मनुष्य परहेज वाले एवं आपत्तियुक्त मर्श नस्य का सेवन करेगा? इसी प्रकार अच्छा प्रावेशिक स्नेह और विचारणा स्नेहपान, कुटी और वातातक तथा अनुवासन बस्ति और मात्रा बस्ति में शीघ्रकारित्व और चिरकारित्व तथा गुणों की श्रेष्ठता और हीनता रहती है ॥ ३४-३६ ॥

इदानीमणुतैलं निर्दिदिक्षुराह—

जीवन्तीजलदेवदारुजलदत्वक्सेव्यगोपीहिमं
दार्वीत्वङ्मधुकप्लवागुरुवरीपुण्ड्राह्वबिल्वोत्पलम् ।
धावन्यौ सुरभिं स्थिरे कृमिहरं पत्रं त्रुटिं रेणुकां
किञ्जल्कं कमलाद्बलां शतगुणे दिव्येऽम्भसि क्वाथयेत् ।
तैलाद्रसं दशगुणं परिशेष्य तेन
तैलं पचेत सलिलेन दशैव वारान् ।
पाके क्षिपेच्च दशमे सममाजदुग्धं
नस्यं महागुणमुशन्त्यणुतैलमेतत् ॥ ३८ ॥

स०—जीवंतीत्यादि । जीवंत्यादीनि द्रव्याणि दिव्ये जले क्वाथयेत् । गोपी सारिवा । प्लवं गोपालदमनाख्यम् । पुंड्राह्वं पौण्डरीकम् । धावन्यौ कंटकारिकामहोटिकाख्ये । सुरभिः सल्लकी । स्थिरे शालिपर्णीपृश्निपर्ण्यौ । कृमिहरं विडंगम् । अत्र तैलसमानि द्रव्याणि ग्राह्याणीति वैद्यव्यवहारः । आकाशादेः पटादिभिर्गृहीतं जलं दिव्यमुच्यते । तत्तैलाच्छतगुणं गृहीत्वा तावत्क्वाथयेत् । यावद्दशगुणो रसस्तैलात्स्यात् । तेन क्वाथेन च तैलं दशवारान्पचेत् । दशमे च पाके तैलसममजाक्षीरं क्षिपेत् । ततः पुनः पचेत् । इति तत्तैलं महागुणमणुतैलसंज्ञं कथयंति । अणुषु तैलमणुतैलम् । अणूनींद्रियस्रोतांसि प्रविशतीत्यर्थः ॥ ३७-३८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अणुतैल—

वि०—अणुतैल—जीवन्त, जल (ह्रीवेर), देवदारु, मुस्ता, दालचीनी, खस, सारिवा, चंदन, दारुहल्दी की छाल, मुलहठी, केवटीमोथा, अगरु, शतावरी, तिलक, छोटी इलायची, उत्पल, कटेरी, बड़ी कटेरी, रास्ना, शालपर्णी, पृश्निपर्णी, वायविडङ्ग, तेजपत्र, हरेणु, कमल का केशर और बला इनको परस्पर समान भाग लेकर एक सौ गुणे वर्षा जल में क्वाथ करे। जब तैल से दसगुना क्वाथ शेष रह जाय तब उतार कर छान लेवे। इस क्वाथ के दस भाग करे। एक एक भाग के साथ तेल को पकाये। इस प्रकार नौ बार तैल पका कर दसवीं बार तैल के बराबर बकरी का दूध मिलाये। फिर पाक करे। इस अणु तैल का नस्य अतिशय गुणकारी कहा जाता है ॥ ३७-३८ ॥

घनोन्नतप्रसन्नत्वक्स्कन्धग्रीवास्यवक्षसः ।
दृढेन्द्रियास्त्वपलिता भवेयुर्नस्यशीलिनः ॥ ३९ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-
यामष्टाङ्गहृदयसंहितायां सूत्रस्थाने नस्यविधि-
र्नाम विंशोऽध्यायः ॥ २० ॥

स०—नस्यशीलिनो निबिडोन्नततररमणीयत्वगादयः स्युः। त्वक् च स्कंधश्च ग्रीवा चाऽऽस्यं च वक्षश्च एतेषां समाहारः त्वक्स्कंधग्रीवास्यवक्षः। घनोन्नतप्रसन्नं त्वक्स्कंध ग्रीवास्यवक्षो येषां ते घनोन्नतप्रसन्नत्वक्स्कंधग्रीवास्यवक्षसः। तथा पुष्टेंद्रियाः पलितवर्जिताश्च भवेयुः ॥ ३९ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचिताया-
मष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां
विंशोऽध्यायः ॥ २० ॥

नस्य के गुण—

वि०—नस्य सेवन का फल—नस्य सेवन करने वाले की त्वचा मोटी और निर्मल होती है, कन्धे, ग्रीवा, मुख और छाती दृढ़, भरे हुए और निर्मल रहते हैं, इन्द्रियाँ मजबूत तथा बाल काले रहते हैं ॥ ३९ ॥

इस प्रकार विद्योतिनी टीका में स्नेहविधि नामक
बीसवाँ अध्याय समाप्त हुआ ॥ २० ॥

एकविंशतितमोऽध्यायः

ऊर्ध्वांगचिकित्साप्रसङ्गाद्धूमपानविधिं जिगदिषुराह—

अथातो धूमपानविधिमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

वि०—अब इसके आगे धूम्रपान विधि नामक अध्याय का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था।

जत्रूर्ध्वकफवातोत्थविकाराणामजन्मने ।
उच्छेदाय च जातानां पिबेद् धूमं सदात्मवान् ॥ १ ॥

स०—आत्मवान् सुमतिर्हिताहारविहारो जत्रुण ऊर्ध्वं श्लेष्मवातोद्भवानां विकाराणां रोगाणामजन्मनेऽनुत्पत्त्यै तथोत्पन्नानामुच्छेदाय विनाशाय सदा धूमं पिबेत् ॥ १ ॥

धूमपान की आवश्यकता—

वि०—जितेन्द्रिय मनुष्य को चाहिये कि जत्रु से ऊपर कफ-वातजन्य रोग उत्पन्न न हो इसलिए तथा उत्पन्न रोगों की शान्ति के लिए धूम पिये ॥ १ ॥

स्निग्धो मध्यः स तीक्ष्णश्च वाते वातकफे कफे ।
योज्यः—

स०—स च धूमः स्निग्धमध्यतीक्ष्णभेदेन त्रिधा। यथाक्रमं वाते स्निग्धो वातकफे मध्यः कफे तीक्ष्णो योज्यः।

धूमपान के भेद तथा दोषानुसार प्रयोग—

वि०—यह धूम तीन प्रकार का है इसको क्रमशः वात में स्निग्ध, वात-कफ में मध्यम और कफ में तीक्ष्ण धूम बरते।

—न रक्तपित्तार्तिविरिक्तोदरमेहिषु ॥ २ ॥
तिमिरोर्ध्वानिलाध्मानरोहिणीदत्तबस्तिषु ।
मत्स्यमद्यदधिक्षीरक्षौद्रस्नेहविषाशिषु ॥ ३ ॥
शिरस्यभिहते पाण्डुरोगे जागरिते निशि ।

स०—रक्तपित्तार्त्यादिषु धूमो नावचारणीयः। ननु वाते वातकफे कफे च धूमस्योक्तत्वात्पित्तार्तौ प्राप्तिरेव नास्ति तत्किं प्रतिषेधेन। ब्रूमः। वातप्रकृतेर्वातपित्तार्तौ सत्यां कश्चिन्निषक्पाशो भ्रांत्या प्रकृत्यनुरूपोपक्रमचिकीर्षया धूमं योजयेत्तन्निषेधार्थमिदमुक्तम्। अथवा पित्तार्तप्रकृतेर्वातश्लेष्मव्याध्युत्पत्तौ धूमो न योज्य इति प्रतिपादनार्थमिदं गदितम्। अशिशब्दो मत्स्यादिषु विशतेषु प्रत्येकं योज्यः। अत्र च यथासंभवं पानं मद्यादेरशनं च मत्स्यादेरशनशब्देनेहोच्यते। चतुर्विधेष्वाहारेष्वशनशब्देनास्त्येव व्यवहारः। यथा मात्राशी सर्वकालं स्यादिति। केचिच्च यावगूपायिन्यपि धूमपानं नेच्छंति ॥ २-३ ॥

धूमपान के अयोग्य रोगी—

वि०—धूम का निषेध—रक्तपित्त रोगी को, विरेचन लिये तथा उदर और प्रमेह रोगी को, तिमिर, ऊर्ध्ववात, आध्मान, रोहिणी रोगों में एवं वस्ति देने पर तथा मछली, मद्य, दही, दूध, मधु, स्नेह या विष खाने पर, शिर पर चोट लगने पर, पाण्डुरोग में और रात में जागने पर धूम नहीं देना चाहिये ॥ २-३ ॥

रक्तपित्तान्ध्यबाधिर्यतृण्मूर्च्छामदमोहकृत् ॥ ४ ॥
धूमोऽकालेऽतिपीतो वा तत्र शीतो विधिर्हितः ।

स०—मूर्च्छा संज्ञानाशः। मोहश्चित्तनाशः। मुहवैचित्र्य इति पाठात्। आंध्यबाधिर्यग्रहणमुत्तमांगरोगोपलक्षणार्थम्। तेन संग्रहोक्तमर्दितमपि गृह्यते। धूमोऽकाले पूर्वोक्ते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रक्तपित्तार्त्यादौ पीतो रक्तं पित्तादीन् कुर्यात्। अप्रतिषिद्धेऽपि काले क्षुतादावतिशयेन पीतो रक्तादिकृत्। तत्र रक्तपित्ताद्यार्तौ विधिरुपक्रमो यथास्वं सर्पिः पाननस्यालेपपरिषेकादिः शीतो विधिर्हितः॥ ४॥

धूमपान के उपद्रव तथा उनकी चिकित्सा—

वि०—अकाल में अथवा अधिक मात्रा में धूमपान करने से रक्त-पित्त, अन्धता, बहरापन, प्यास, मूर्च्छा, मद और मोह होता है। इस अवस्था में शीतल उपचार करना चाहिये॥ ४॥

इदानीं त्रयाणां धूमानां पृथक्कालं दर्शयन्नाह—

क्षुतजृम्भितविण्मूत्रस्त्रीसेवाशस्त्रकर्मणाम् ॥ ५॥
हासस्य दन्तकाष्ठस्य धूममन्ते पिबेन्मृदुम्।
कालेष्वेषु निशाहारनावनान्ते च मध्यमम्॥ ६॥
निद्रानस्याञ्जनस्नानच्छर्दितान्ते विरेचनम्।

स०—क्षुतादीनामष्टानामंते मृदुं स्नेहनाख्यं धूमं पिबेत्। एषु क्षुतादिषु कालेषु निशाहारानावनांतेषु च मध्यमं धूमं पिबेत्। मध्यममिति मध्यान्म इति मः। विरेचनाख्यं धूमं निद्रादीनामन्ते पिबेत्। नावननस्ययोरेकार्थयोरिहोपादानान्नस्यक्रमेण धूमं पिबेदिति ग्रन्थकृता प्रतिपादितम्। तेन स्निग्धनस्यांते स्निग्धं मृद्वपरपर्यायं धूमं पिबेत्। आचार्योपदेशाच्च क्षुताद्यंतेषु च स्निग्धं धूमं पिबेत्। मध्याह्नस्यांते मध्यमं धूमं पिबेत्। कालेष्विति बहुवचनाच्च क्षुदादीनामष्टानामन्तादिषु च मध्यमं धूमं पिबेत्। एवं निद्रानस्यांते विरेचनं धूमं पिबेत्। कालेष्विति वचनान्निशाशब्दोऽत्र विरेचनपर्यायः॥५॥

त्रिविध धूमपान के पृथक्-पृथक् काल—

वि०—धूमपान के समय—छींक, जम्भाई, मलत्याग, मूत्रत्याग, स्त्रीसंग, शस्त्रकर्म, हास्य और दातुन इन आठ कार्यों के अन्त में मृदु धूम (स्निग्ध) पिये। उपर्युक्त कालों में तथा रात्रि में भोजन के उपरान्त और नस्य के पीछे मध्यम धूम पिये। निद्रा, नस्य, अञ्जन, स्नान और वमन करने के पीछे तीक्ष्ण विरेचन धूम पिये[1]॥ ५-६॥

सांप्रतमत्र नेत्रस्वरूपमाह—

बस्तिनेत्रसमद्रव्यं त्रिकोशं कारयेदृजु॥ ७॥
मूलाग्रेऽङ्गुष्ठकोलास्थिप्रवेशं धूमनेत्रकम्।

स०—बस्तौ नेत्रं बस्तिनेत्रं बस्तिनेत्रेण समं बस्तिनेत्रतुल्यं द्रव्य धातुदार्वस्थिवेणुजं यस्य धूमनेत्रस्य तद्बस्तिनेत्रसमद्रव्यं धूमनेत्रं शिल्पिना कारयेद्भिषक्। किंभूतं नेत्रम्। त्रयः कोशाः पर्वाणि यस्य तत्त्रिकोशम्। ऋजु न वक्रम्। तथा मूलं चाऽग्रं च तस्मिन्यथा सख्यमंगुष्ठबदरास्थिप्रवेशम्। अङ्गुष्ठश्च कोलास्थि चेति समाहारद्वंद्वः। तत्प्रविशत्यस्मिन्निति पदरुजविशेति घञ्॥ ७॥

धूमपान-नलिका का स्वरूप—

वि०—धूमनेत्र को बस्तिनेत्र बनाने वाले द्रव्यों से बनाये, इस को सीधा तथा तीन कोषवाला, तथा मूल में अंगूठा जाने योग्य और सिरे पर बेर की गुठली जाने योग्य बनाये॥ ७॥

दैर्ध्येण प्रमाणमिदानीं तीक्ष्णादिकत्रिविधधूमनेत्रस्याऽऽह—

तीक्ष्णस्नेहनमध्येषु त्रीणि चत्वारि पञ्च च॥ ८॥
अङ्गुलीनां क्रमात्पातुः प्रमाणेनाष्टकानि तत्।

स०—यथासख्यं दैर्ध्येण तीक्ष्णस्य त्रीण्यष्टकानि चतुर्विंशतिरङ्गुलानि स्युः। स्नेहने च धूमे चत्वार्यष्टकानि द्वात्रिंशदंङ्गुलानि स्युः। मध्यमे च धूमे पञ्चाष्टकानि चत्वारिंशदङ्गुलानि स्युः। पर्वानेकत्वं सूक्ष्मत्वं दैर्ध्यं च नेत्रस्येह कृतम्। एवं हि नयनकर्णादीनां न बाधको धूमः स्यात्। तथा च मुनिः। दूराद्विनिर्गतः पर्वच्छिन्नो नाडीतनूकृतः। नेंद्रियं बाधते धूम इति॥ ८॥

धूमपान-नलिका की लम्बाई—

वि०—धूमपान करने वाले मनुष्य की अङ्गलियों के प्रमाण की तीक्ष्ण धूम के लिये तीन अष्टक अर्थात् चौबीस, स्नेहन धूम के लिये (४×८) बत्तीस और मध्यम धूम के लिए (५×८) चालीस अंगुल लम्बाई का धूमनेत्र होना चाहिए।

(इसका फल—'दूराद्विनिर्गतः पर्वच्छिन्नो नाडीतनूकृतः। नेन्द्रियं बाधते धूमः॥' चरक सू. अ. ५।५८)॥ ८॥

कीदृशः सन् धूमं पिबेदित्याह—

ऋजूपविष्टस्तच्चेता विवृतास्यस्त्रिपर्ययम्॥ ९॥
पिधायच्छिद्रमेकैकं धूमं नासिकया पिबेत्।

स०—ऋजु स्पष्टमुपविष्ट आसीनः। तथा तच्चेता धूमपानगतचित्तः तथा प्रसारितमुखः तथा नेत्रगतदृष्टिरित्यादि द्रष्टव्यम्। कथं पिबेत्। त्रिपर्ययमाक्षेपविसर्गावपनैस्त्रिपर्ययैः। तथा छिद्रमेकैकं पिधाय प्रकृतत्वान्नासिकाया एव। तदेवंविधः सन्नासिकया पिबेत्। एकैकमित्येकं बहुव्रीहिवदिति द्वित्वसुब्लोपौ। तेनाऽयमर्थः। एकं नासापुटं पिधायाऽपरेण नासापुटेनाऽऽकृष्य धूमं पिबेत्। अपरं नासापुटं पिधाय तदपरेणाऽऽकृष्य तथैव पिबेदित्यर्थः॥ ९॥

धूमपान विधि तथा क्रम—

वि०—धूम पीते समय सीधा बैठकर, धूमपान में मन को लगा कर, मुख को खोलकर तीन घूट (कश) भरे। नासा से एक-एक छिद्र को बन्द करके धूम पिये॥ ९॥

प्राक् पिबेन्नासयोत्क्लिष्टे दोषे घ्राणशिरोगते॥ १०॥
उत्क्लेशनार्थं वक्त्रेण विपरीतं तु कण्ठगे।

स०—नासागते शिरोगते वा दोष उत्क्लिष्टे स्वस्थानाच्चलिते सति प्राक् पूर्वं नासया पिबेत्। अनुत्क्लिष्टे दोष उत्क्लेशनार्थं वक्त्रेण प्राक् पिबेत् पश्चान्नासिकया।

१. चरक ने कुछ भिन्न आठ धूमपान कालों का उल्लेख किया है—
'स्नात्वा भुक्त्वा समुल्लिख्य क्षुत्वा दन्तान्निघृष्य च।
नावनाञ्जननिद्रान्ते चात्मवान् धूमपो भवेत्॥' (च.सू.५)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कण्ठरोधदोषोत्क्लेशनार्थं प्राङ्नासिकया पिबेत् पश्चाद्वक्त्रेणेति विपरीतम् ॥ १० ॥

वि०—नासिका और शिर में स्वयं उत्क्लिष्ट हुए दोष में पहले नासिका से; फिर मुख से धूम पिये और उत्क्लेशित करने के लिये पहले मुख से और फिर नासा से पिये। कण्ठगत दोष के स्वयं उत्क्लेशित होने पर पहले मुख से, फिर नाक से धूमपान करे। कण्ठगत दोष के उत्क्लेशनार्थ पहले नासिका से और फिर मुख से पिये ॥ १० ॥

मुखेनैवोद्वमेद् धूमं नासया दृग्विघातकृत् ॥११॥

स०—नासयाऽऽस्येन वा पीतं धूम वक्त्रेणैवोत्सृजेत्। ननु घ्राणेनैव कस्मान्न मुच्यतेत्याह। नासयेत्यादि। घ्राणेनोत्सृज्यमानो धूमो दृष्टिविघाततिमिरादीन् करोति। तस्मान्मुखेनैवोत्सृजेत् ॥ ११ ॥

वि०—नासा या मुख से पिये धूम को मुख से ही निकालना चाहिये। नासा से निकालने पर आंखों को नुकसान होता है ॥ ११ ॥

आक्षेपमोक्षैः पातव्यो धूमस्तु त्रिस्त्रिभिस्त्रिभिः।

स०—आक्षेपमोक्षैरादानविसर्गैस्त्रिभिस्त्रिभिस्त्रिन्वारान् धूमः पातव्यः। त्रिरिति द्वित्रिचतुर्भ्यः सुच्।

वि०—धूम को पीने और छोड़ने में तीन तीन घूंट करना चाहिये।

अह्नः पिबेत् सकृत् स्निग्धं द्विर्मध्यं शोधनं परम् ॥१२॥
त्रिश्चतुर्वा—

स०—अह्नः सकृदेकवारं स्निग्धं धूमः पिबेत्। मध्यमं धूमं द्वौ वारौ पिबेत्। अह्न इत्यत्राऽप्यनुवर्तते। तीक्ष्णं धूमं त्रीन् वारांश्चतुरो वा दिवसस्य पिबेत्। अह्न इति कृत्वोऽर्थप्रयोगे कालेऽधिकरण इति षष्ठी ॥ १२ ॥

दिन में धूमपान की संख्या—

वि०—दिन में एक बार स्निग्ध धूमपान करे, मध्यम धूम को दो बार और शोधन (तीक्ष्ण) धूम को दिन में तीन या चार बार पिये ॥ १२ ॥

—मृदौ तत्र द्रव्याण्यगुरुगुग्गुलु।
मुस्तस्थौणेयशैलेयनलदोशीरबालकम् ॥१३॥
वराङ्गकौन्तीमधुकबिल्वमज्जैलवालुकम्।
श्रीवेष्टकं सर्जरसो ध्यामकं मदनं प्लवम् ॥१४॥
शल्लकी कुङ्कुमं माषा यवाः कुन्दुरुकस्तिलाः।
स्नेहः फलानां साराणां मेदो मज्जा वसा घृतम् ॥१५॥

स०—तत्र तेषु त्रिषु धूमेषु मध्यान्मृदौ प्रायोगिकाख्ये धूमे-द्रव्याण्यगुरुप्रभृतीनि। प्लवो गोपालमदनकः। स्नेह इति। फलानामक्षोडनालिकेरादीनां स्नेहः तथा साराणां खदिरासनादीनां च स्नेहः। मधुकमदनयोरेकयोनित्वादुक्तस्योपयोगो मदनस्याऽत्र विरुद्ध इति केचित्। तच्चाऽयुक्तम्। द्रव्यांतरत्वान्मदनस्य पिण्याकादिवत्तिलादेः। घृतं चाऽत्र गव्यमेव ग्राह्यं मुख्यत्वात्। उक्तं हि। गव्ये क्षीरघृते श्रेष्ठ इति ॥ १३-१५ ॥

मृदु धूम के द्रव्य—

वि०—मृदु धूम के द्रव्य—अगर, गुग्गुलु, मुस्ता, स्थौणेय, शिलारस, जटामांसी, खस, शीबेर, दालचीनी, रेणुका, मुलहठी, बिल्व की मज्जा, ऐलवालुका, राल, गन्धाबिरोजा, गन्धतृण, मदन (मैनफल), (प्लव केवटी मोथा), शल्लकी, केशर, उड़द, जौ, कुन्दरु, तिल, फलों के स्नेह—(बादाम का तेल आदि), सारों के तेल—(देवदारु आदि का तेल), मेद, मज्जा वसा और घृत—ये मृदु (स्नेहन) धूम के द्रव्य हैं ॥ १३-१५ ॥

शमने शल्लकी लाक्षा पृथ्वीका कमलोत्पलम्।
न्योग्रोधोदुम्बराश्वत्थप्लक्षरोध्रत्वचः सिता ॥१६॥
यष्टीमधु सुवर्णत्वक् पद्मकं रक्तयष्टिका।
गन्धाश्चाकुष्ठतगराः—

स०—शमने धूमे शल्लक्यादीनि गंधद्रव्याणि कुष्ठतगरवर्ज्यानि ॥ १६ ॥

शमन धूम के द्रव्य—

वि०—शमन धूम के द्रव्य—शल्लकी, लाख, बड़ी इलायची, कमल, उत्पल, बड़गद, गूलर, पीपल; पिलखन और लोध की छाल, शर्करा, मुलहठी, अमलतास, पद्माख, मजीठ एवं कूठ और तगर को छोड़कर दूसरे सब गन्ध द्रव्य शमन धूम में उपयोगी हैं ॥ १६ ॥

—तीक्ष्णे ज्योतिष्मती निशा ॥१७॥
दशमूलमनोह्वालं लाक्षा श्वेता फलत्रयम्।
गन्धद्रव्याणि तीक्ष्णानि गणो मूर्द्धविरेचने ॥१८॥

स०—तीक्ष्णे विरेचनाख्ये धूमे ज्योतिष्मत्यादीनि गंधद्रव्याणि च तीक्ष्णानि कुष्ठतगरादीनि गणश्च शोधनादिसंग्रहोक्तो वेल्लापामार्गेत्यादिको मूर्धविरेचनः ॥ १७-१८ ॥

तीक्ष्ण धूम के द्रव्य—

वि०—तीक्ष्ण धूम के द्रव्य—मालकंगनी, हल्दी, दशमूल; मैनसिल, हरताल, लाक्षा, कोयल, त्रिफला, तीक्ष्ण गंध द्रव्य और शिरोविरेचनगण (वेल्लापामार्ग इत्यादि)—ये तीक्ष्ण धूम के द्रव्य हैं ॥ १७-१८ ॥

संप्रति धूमवर्तिविधानमाह—

जले स्थितामहोरात्रमिषीकां द्वादशाङ्गुलाम्।
पिष्टैर्धूमौषधैरेवं पञ्चकृत्वः प्रलेपयेत् ॥१९॥
वर्तिरङ्गुष्ठकस्थूला यवमध्या यथा भवेत्।
छायाशुष्कां विगर्भां तां स्नेहाभ्यक्तां यथायथम् ॥२०॥
धूमनेत्रार्पितां पातुमग्निप्लुष्टां प्रयोजयेत्।

स०—रात्रिंदिवं सलिले उषितां दैर्घ्येण द्वादशांगुलामिषीकां दर्भमूलतृणं पंचकृत्वः पंचवारान् धूमोक्तैरौषधैः पिष्टैः प्रकर्षेण लेपयेत्। यथांगुष्ठवत्स्थूला यव-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मध्या वर्तिः स्यात्। एतदाकृतिविधानं च त्रिविधेऽपि नेत्रके वर्तेः सुखप्रवेशार्थम्। तामिषीकां छायाविशुष्कां विगतगर्भामपनीतेषीकां तथा स्नेहेन घृतादिना यथास्वमभ्यक्तां तथा धूमनेत्रस्य यदंगुष्ठप्रमाणं छिद्रं तत्रार्पितां तथाग्निप्लुष्टामंगारप्रदीप्तां पातुं पानार्थे प्रयोजयेत् ॥ १९-२० ॥

धूमवर्ति का विधान—

वि०—धूमवर्ति—बारह अङ्गुल लम्बा सरकण्डा लेकर चौबीस घण्टे पानी में भीगा रहने दे (जिससे फूल जाये)। फिर धूम औषधि के द्रव्यों को पीस कर इस पर पाँच बार (पाँच तह) लेप करे। लेपने में वर्ति की मोटाई अंगूठे के बराबर तथा आकार में जौ के समान अर्थात् बीच में से मोटी और किनारों पर पतली बनाये। इसको छाया में सुखाकर बीच में से सरकण्डा निकालने से खोखली करके, घी आदि से स्निग्ध करके, योग्य धूमनेत्र में रखकर अग्नि से जलाकर पीने के लिये प्रयोग में लावे ॥ १९-२० ॥

अधुनाऽपरमपि धूमप्रकारमाह—

शरावसम्पुटच्छिद्रे नाडीं न्यस्य दशाङ्गुलाम् ॥ २१ ॥
अष्टाङ्गुलां वा वक्त्रेण कासवान् धूममापिबेत्।

स०—शरावयोः संपुटं युग्मं तस्य छिद्रे नाडीं दशांगुलामष्टांगुलप्रमाणां वा निक्षिप्य कासी धूममापिबेत्। तदयमत्राऽर्थः। अपगतधूमखदिरबदिरादिदारुस्थिरांगारप्रखरपूर्णशरावे कासहरचूर्णं सस्नेहं गुलिकां वा न्यस्य मध्यकृतच्छिद्रशरावेण पिधाय नाडीमष्टांगुलां दशांगुलं वा निवेश्य कासवान् कासी वक्त्रेण मुखेन धूमं पिबेदिति ॥ २१ ॥

धूमपान का दूसरा प्रकार—

वि०—दो शरावों के सम्पुट में दस अथवा आठ अङ्गुल लम्बी नलिका लगाकर कासरोगी धूम को मुख से पिये ॥२१॥

कासः श्वासः पीनसो विस्वरत्वं
पूतिर्गन्धः पाण्डुता केशदोषः।
कर्णास्याक्षिस्रावकण्ड्वर्तिजाड्यं
तन्द्रा हिध्मा धूमपं न स्पृशन्ति ॥ २२ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने धूमपानविधिर्नामैकविंशतितमोऽध्यायः ॥ २१ ॥

स०—कासादयो धूमपं न स्पृशंति। धूमं पातुरेते न संभवंतीति भावः। तत्र पूतिगंध आस्यनासयोः। पांडुता मुखस्य। केशस्य दोषाः सितपिंजरत्वादयः। कर्णौ चाऽस्यं चाऽक्षिणी च कर्णाऽऽस्याक्षि। स्रावश्च कंडूश्चाऽर्तिश्च जाड्यं च स्रावकंडवर्तिजाड्यम्। कर्णादिषु प्रत्येकं स्रावादिचतुष्टयं योज्यमिति। शालिनीवृत्तम् ॥ २२ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायामेकविंशतितमोऽध्यायः ॥ २१ ॥

धूमपान का फल—

वि०—धूम-पान का फल—कास, श्वास, पीनस, स्वरभेद, मुख आदि की पूतिगन्धता, पाण्डुरोग, बालों के रोग, कान, मुख, आँख का स्राव, कण्डू, जडता, तन्द्रा, हिक्का ये रोग धूम पीने वाले को छूते नहीं—ये रोग उनको नहीं होते ॥२२॥

इस प्रकार विद्योतिनी टीका के सूत्रस्थान में धूमपानविधिनामक इक्कीसवाँ अध्याय समाप्त हुआ ॥ २१ ॥

द्वाविंशतितमोऽध्यायः

इदानीं द्वाविंशाध्यायारम्भणप्रस्तावो गंडूषादिविधानप्रदर्शनार्थमित्याह—

अथातो गण्डूषादिविधिमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—गंडूषादयो विधीयन्ते यस्मिन्निति गंडूषादिविधिः। आदिशब्देन कवलादिपरिग्रहः।

वि०—अब इसके आगे गण्डूषादि विधि नामक अध्याय का व्याख्यान करेंगे जैसा कि आत्रेय आदि महर्षियों ने कहा था।

चतुष्प्रकारो गण्डूषः स्निग्धः शमनशोधनौ।
रोपणश्च त्रयस्तत्र त्रिषु योज्याश्चलादिषु ॥ १ ॥
अन्त्यो व्रणघ्नः—

स०—चत्वारः प्रकारा भेदा यस्य स चतुष्प्रकारो गंडूषः स्निग्धादिभेदेन। तत्र तेषु गंडूषेषु मध्याद्यथासंख्यं पवनपित्तश्लेष्मसु त्रयः स्निग्धादयो गंडूषा योज्याः। तत्र वाते स्निग्धो गंडूषः। पित्ते शमनः। कफे शोधन इत्यर्थः। अन्त्यो रोपणाख्यो व्रणघ्नो व्रणसाधन उपयुज्यते ॥ १ ॥

गण्डूष के भेद एवं विधि—

वि०—गण्डूष चार प्रकार का है, यथा—स्निग्ध, शमन, शोधन, और रोपण। इनमें प्रथम तीन क्रमशः वातादि दोषों में यथा स्निग्ध गण्डूष वायु में, शमन गण्डूष पित्त में और शोधन गण्डूष कफ में बरते और चौथा रोपण गण्डूष व्रणनाशक है ॥ १ ॥

इदानीमेषां लक्षणं निर्वक्ति—

—स्निग्धोऽत्र स्वाद्वम्लपटुसाधितैः।
स्नेहैः संशमनस्तिक्तकषायमधुरौषधैः ॥ २ ॥
शोधनस्तिक्तकट्वम्लपटूष्णै रोपणः पुनः।
कषायतिक्तकैः—

स०—अत्रैषु गंडूषेषु मध्ये स्निग्धो मधुरादिसाधितैः स्नेहैर्भवति। शमनस्तिक्तादिभिरौषधैः। पटोलाऽरिष्टजंबवाम्रमधुककाथशर्करोदकक्षौद्रादिभिः स्यात्। शोधनो गंडूषस्तिक्तकट्वम्लादिभिरौषधैर्भवति। रोपणस्तु गण्डूषः कषायतिक्तकैः स्यात् ॥ २ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—इसमें स्निग्ध गण्डूष मधुर, अम्ल और लवण से सिद्ध किये हुए स्नेहों से, शमन गण्डूष तिक्त, कषाय तथा मधुर औषधि से तथा शोधन गण्डूष तिक्त, कटु, अम्ल, लवण और उष्ण द्रव्यों से किया जाता है। रोपण गण्डूष कषाय एवं तिक्त द्रव्यों से किया जाता है ॥ २ ॥

ननु द्रव्याणां शुष्कत्वाद्गण्डूषानुपपत्तिरिति चेत्तत्राह—

—तत्र स्नेहः क्षीरं मधूदकम् ॥ ३ ॥
शुक्तं मद्यं रसो मूत्रं धान्याम्लं च यथायथम्।
कल्कैर्युक्तं विपक्वं वा यथास्पर्शं प्रयोजयेत् ॥ ४ ॥

स०—तत्र तेषु पूर्वोक्तेषु गण्डूषेषु मध्ये स्नेहादिकं कल्कैर्यथायथं युक्तं विपकं वा यथास्पर्शं शीतमुष्णं वा प्रयोजयेत् ॥ ३-४ ॥

वि०—इनमें स्नेह, दूध, मधु का पानी, शुक्त, मद्य, मांसरस, मूत्र, धान्याम्ल इनको दोषादि के अनुसार कल्कों से मिला कर सिद्ध करके अथवा बिना सिद्ध किये ही शीतल या उष्ण जैसा योग्य हो, वैसा बरते ॥ ३-४ ॥

दन्तहर्षे दन्तचाले मुखरोगे च वातिके।
सुखोष्णमथवा शीतं तिलकल्कोदकं हितम् ॥ ५ ॥

गण्डूषधारणे—

स०—दंतहर्षादौ कवोष्णमथवा शीतं दोषवशात् तिलकल्कोदकं हितम् गंडूषधारणे ॥ ५ ॥

दन्तहर्षादि में गण्डूष—

वि०—दन्तहर्ष-दन्त के हिलने और वातजन्य मुखरोग में थोड़ा गरम अथवा शीतल तिलकल्क का पानी गण्डूष धारण में उत्तम है ॥ ५ ॥

—नित्यं तैलं मांसरसोऽथवा।

स०—नित्यं तैलं मांसरसो वा हितः।

सामान्य गण्डूष—

वि०—नित्य गण्डूष धारण में तिल का तैल या मांसरस उत्तम है।

ऊषादाहान्विते पाके क्षते चागन्तुसम्भवे ॥ ६ ॥
विषे क्षाराग्निदग्धे च सर्पिर्धार्यं पयोऽथवा।

स०—ऊषादियुक्ते पाके क्षते वाऽऽगंतुजे तथा विषे क्षाराग्निभ्यां दग्धे च सर्पिर्गंडूषे हितं क्षीरं वा ॥ ६ ॥

सामान्य गण्डूष—

वि०—क्षारादि से होने वाली ऊषा (जलन) और दाह युक्त पाक में, आगन्तुज व्रण में, विषपान में, एवं क्षार या अग्नि से जलने पर घी या दूध मुख में धारण करना चाहिये ॥ ६ ॥

वैशद्यं जनयत्याशु सन्दधाति मुखे व्रणान् ॥ ७ ॥
दाहतृष्णाप्रशमनं मधुगण्डूषधारणम्।

स०—माक्षिकगण्डूषधारणं मुखे वैशद्यं जनयति न पैच्छिल्यम्। मुखव्रणांश्च संदधाति तथा दाहं तृष्णां च शमयति ॥ ७ ॥

मधु-गण्डूष से लाभ—

वि०—मधु का गण्डूष धारण करने से मुख में विशदता (निर्मलता) शीघ्र उत्पन्न होती है, मुख में व्रण भरते हैं तथा प्यास और दाह होती है ॥ ७ ॥

धान्याम्लमास्यवैरस्यमलदौर्गन्ध्यनाशनम् ॥ ८ ॥
तदेवालवणं शीतं मुखशोषहरं वरम्।
आशु क्षाराम्बुगण्डूषो भिनत्तिश्लेष्मणश्चयम् ॥ ९ ॥
सुखोष्णोदकगण्डूषैर्जायते वक्त्रलाघवम्।

स०—धान्याम्लं गण्डूषं उपयुक्तं वदनवैरस्यं तथा मलं दौर्गंध्यं चाऽपनयति। तदेव कांजिकमलवणं शीतं परमतिशयेनास्यशोषहरम्। क्षारेण स्वर्जिकादिना युक्तं जलं कफस्य चयमाशु भिनत्ति। कोष्णपानीयगण्डूषैर्वदनलाघवं संपद्यते ॥ ८-९ ॥

धान्याम्लादि के गण्डूष का फल—

वि०—कांजी का गण्डूष मुख की विरसता और मल को नष्ट करता है। कांजी का गण्डूष नमक के बिना और शीतल धारण करने पर अतिशय मुखशोषनाशक है। क्षार (सर्जक्षार) आदि के पानी का गण्डूष तुरन्त कफ के संचय को तोड़ देता है। गुनगुने गरम पानी से गण्डूष करने पर मुख में लघुता उत्पन्न होती है ॥ ८-९ ॥

कियंतं कालमित्याह—

निवाते सातपे स्वङ्गमृदितस्कन्धकन्धरः ॥ १० ॥
गण्डूषमपिबन् किञ्चिदुन्नतास्यो विधारयेत्।
कफपूर्णास्यता यावत् स्रवद्घ्राणाक्षताऽथवा ॥ ११ ॥

स०—वातरहिते रव्यालोके स्थाने। स्कंधौ च कंधरा च स्कंधकंधरम्। पूर्वं स्विन्नं पश्चान्मृदितं स्कन्धकन्धरं यस्य स एवम्। तथा गण्डूषमपिबंस्तथा किंचिदुन्नतं मुखं यस्य स एवंविधः सन् गण्डूषं धारयेत्। कफेन कफपूर्णमास्यं यस्य स कफपूर्णास्यस्तस्य भावः कफपूर्णास्यता यावद्भवेत्। अथवा स्रवत् घ्राणाक्षियस्य स स्रवद्घ्राणाक्षः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्। तस्य भावः स्रवद्घ्राणाक्षता यावत्स्यात्तावद्गंडूषान् धारयेत् ॥ १०-११ ॥

गण्डूषधारणविधि तथा समय—

वि०—वातरहित स्थान में धूप में रोगी को बैठा कर उसके कन्धे और ग्रीवा पर पहले स्वेदन करके मर्दन करे। फिर गण्डूष को बिना पिये ही मुख को कुछ ऊँचा करके मुख में रखे रहे। ऐसा तब तक करे जब तक कि मुख कफ से न भर जाये अथवा नासिका और आँखों से कफ न बहने लगे ॥

असञ्चार्यो मुखे पूर्णे गण्डूषः कवलोऽन्यथा।

स०—एवं गण्डूषाः पञ्च सप्त धारयितव्या यावत्स्वास्थ्यं स्यात्। मुखे पूर्णे सति यः सञ्चारयितुमशक्यः स्यात् स

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गण्डूष उच्यते। अन्यथा च सञ्चारयितुं शक्यते मुखेऽपूर्णे यः स कवल उच्यते।

गण्डूष और कवल के भेद—

वि०—मुख के भरने पर जो हिलाया-डुलाया नहीं जा सकता, वह गण्डूष कहलाता है। मुख के भरने पर जो हिलाया-डुलाया जा सके, वह कवल है।

मन्याशिरःकर्णमुखाक्षिरोगाः
प्रसेककण्ठामयवक्त्रशोषाः ।
हृल्लासतन्द्रारुचिपीनसाश्च
साध्या विशेषात् कवलग्रहेण ॥ १२ ॥

स०—मन्यादीनां रोगेण सम्बन्धः। प्रसेकादीनां द्वंद्वः। आमयशब्दस्य कण्ठेन सम्बन्धो विविधकण्ठरोगसूचनार्थः। मन्यारोगादयो विशेषेण कवलधारणेन साध्याश्चिकित्स्याः ॥१२॥

मान्यादि रोग में कवल-धारण—

वि०—मन्या, शिर, कान, मुख और आंख के रोग, लाला प्रसेक, कण्ठरोग, मुखशोष, हृल्लास, तन्द्रा, अरुचि और पीनस ये रोग विशेषतः कवलग्रह से अच्छे होते हैं ॥ १२ ॥

कल्को रसक्रिया चूर्णस्त्रिविधं प्रतिसारणम् ॥ १३ ॥
युञ्ज्यात्तत् कफरोगेषु गण्डूषविहितौषधैः ।

स०—कल्कादिभेदेन प्रतिसारणं त्रिधा स्यात्। कल्को जलादिपिष्टः। माक्षिकादिनां यद्द्रवीक्रियते द्रव्यं सा रसक्रिया। चूर्णं प्रथितमेव। तत्प्रतिसारणं श्लेष्मरोगेषु गण्डूषोक्तैरौषधैर्योज्यम् सामान्योक्तावपि कफरोगविषयत्वात शोधनगण्डूषोक्तैरिति वेद्यम् ॥ १३ ॥

प्रतिसारण का भेद तथा प्रयोग—

वि०—प्रतिसारण-कल्क, रसक्रिया, और चूर्ण भेद से तीन प्रकार का होता है। इसी प्रतिसारण को कफजन्य रोगों में गण्डूष के लिये कही हुई (शोधन गण्डूष की) ओषधियों से करना चाहिये ॥ १३ ॥

मुखालेपस्त्रिधा दोषविषहा वर्णकृच्च सः ॥ १४ ॥
उष्णो वातकफे शस्तः शेषेष्वत्यर्थशीतलः ।

स०—मुखालेपस्त्रिप्रकारो दोषघ्नो विषघ्नो वर्णकरश्च। स च मुखालेपो वातश्लेष्मण्युष्णो हितः। शेषेषु पित्ते विषे च शिशिरो हितः। स च त्रिप्रमाणः ॥ १४ ॥

मुखलेप के भेद तथा प्रयोग—

वि०—मुख का आलेप तीन प्रकार का है—दोषनाशक, विषनाशक और वर्णकारक। यह वात और कफ में गरम लगाना चाहिये, शेष पित्त और विष में या वर्ण के लिये अतिशय शीतल लगाना चाहिये ॥ १४ ॥

कथमित्याह—

त्रिप्रमाणश्चतुर्भागत्रिभागार्द्धाङ्गुलोन्नतिः ॥ १५ ॥

स०—चतुर्भागत्रिभागार्धाङ्गुलोन्नतिः। उन्नतिरुत्सेधः॥१५॥

मुखालेप के प्रमाण आदि—

वि०—लेप की मोटाई तीन प्रकार की है, अङ्गुलि का ¼ भाग जितना मोटा, अङ्गुलि के ⅓ भाग जितना मोटा और अङ्गुलि के ½ भाग जितना मोटा लेप करना चाहिये ॥ १५ ॥

अशुष्कस्य स्थितिस्तस्य शुष्को दूषयतिच्छविम् ।
तमार्द्रयित्वाऽपनयेत्तदन्तेऽभ्यङ्गमाचरेत् ॥१६॥

स०—तस्य मुखालेपस्याऽशुष्कस्य स्थितिः। शुष्कस्तु मुखालेपश्छविं त्वचं दूषयति। मुखालेपमार्द्रयित्वाऽपसारयेत्। तस्यांते तस्मिन्नपनीतेऽभ्यंगं कुर्यात् ॥ १६ ॥

वि०—मुख का आलेप गीला ही स्थित रहता है, सूखा हो जाने पर कान्ति को दूषित करता है। सूखे लेप को गीला करके हटाये। लेप को हटाने के पीछे अभ्यङ्ग करे। (मुख पर लेप तभी तक लगे रहने देना चाहिये, जब तक यह गीला रहे)।

विवर्जयेद्दिवास्वप्नभाष्याग्न्यातपशुक्क्रुधः ।
न योज्यः पीनसेऽजीर्णे दत्तनस्ये हनुग्रहे ॥ १७ ॥
अरोचके जागरिते—

स०—मुखालेपी दिवास्वप्नादीन् वर्जयेत्। अहःस्वप्नादिसेवनात् कंडूस्वक्शोफपीनसदृष्ट्युपघातादिभयं स्यात्। पीनसादौ मुखालेपो न योज्यः ॥ १७ ॥

मुखालेप में निषिद्ध कार्य तथा व्यक्ति—

वि०—मुख पर लेप करके दिन में सोना, बोलना, अग्नि, धूप, चिन्ता और क्रोध का परित्याग करना चाहिये। पीनस में, अजीर्ण में, नस्य देने पर, हनुग्रह में, अरोचक में तथा रात्रिजागरण में मुख पर लेप न करे ॥ १७ ॥

—स तु हन्ति सुयोजितः ।
अकालपलितव्यङ्गवलीतिमिरनीलिकाः ॥ १८ ॥

स०—स च मुखालेपः सुयोजितो विधिना सेवितोऽकालपलितादीन् पराकरोति ॥ १८ ॥

मुखालेप से लाभ—

वि०—विधिपूर्वक लगाने से मुख का आलेप-असमय में वृद्धावस्था, व्यङ्ग, वली, तिमिर और नीलिका को नष्ट करता है ॥ १८ ॥

कोलमज्जा वृषान्मूलं शाबरं गौरसर्षपाः ।
सिंहीमूलं तिलाः कृष्णा दार्वीत्वङ्निस्तुषा यवाः॥१९॥
दर्भमूलहिमोशीरशिरीषमिशितण्डुलाः ।
कुमुदोत्पलकह्लारदूर्वामधुकचन्दनम् ॥२०॥
कालीयकतिलोशीरमांसीतगरपद्मकम् ।
तालीसगुन्द्रापुण्ड्राह्वयष्टीकाशनतागुरु ॥२१॥
इत्यर्द्धार्द्धोदिता लेपा हेमन्तादिषु षट् स्मृताः ।

स०—कोलमज्जादयोऽर्धश्लोकोक्ताः षण्मुखालेपा इत्येवं षट्सु हेमंतादिषु ऋतुषु स्मृताः। मुनीन्द्रैरिति शेषः। तत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बदरमज्जादयो हेमंते। व्याघ्र्यादयः शिशिरे। दर्भमूलाद्यो वसंते। कुमुदादयो ग्रीष्मे। कालीयकादयः प्रावृषि। तालीसादयः शरदि ॥ १९-२१ ॥

ऋतु के अनुसार मुखालेप—

वि०—छः लेप—(१) बेर की गुठली, अडूसे का मूल, शाबरलोध, श्वेत (पीली) सरसों, (२) कटेरी की जड़, काले तिल, दारुहल्दी की छाल; तुष रहित जौ, (३) दाभ की जड़, चन्दन, खस, शिरिस, सौंफ, (४) कुमुद, उत्पल, कह्लार, दूब, मुलहठी, चन्दन, (५) कालीयक, तिल, खस, जटामांसी, तगर और पद्माख, (६) तालीस, गोंदर, पुण्डरीक, मुलहठी, काश, तगर और अगरु, ये आधे-आधे श्लोक में कहे ६ लेप क्रमशः हेमन्तः आदि ६ ऋतुओं में लगाने चाहिये ॥ १९-२१ ॥

मुखालेपनशीलानां दृढं भवति दर्शनम् ॥ २२ ॥
वदनं चापरिम्लानं श्लक्ष्णं तामरसोपमम् ।

स०—मुखालेपाभ्यासवतां नराणां दर्शनं दृष्टिर्दृढं स्यात्। मुखं च विकसितमिव तथा कोमलं पद्मतुल्यं च जायते ॥ २२ ॥

नित्य मुखालेप से सौन्दर्यादि—

वि०—जो लोग मुख पर नित्य आलेप करते हैं, उनकी दृष्टि बलवती होती है, मुख खिला हुआ तथा कोमल एवं कमल के समान होता है ॥ २२ ॥

अभ्यङ्गसेकपिचवो वस्तिश्चेति चतुर्विधम् ॥ २३ ॥
मूर्द्धतैलं बहुगुणं तद्विद्यादुत्तरोत्तरम् ।

स०—अभ्यंगादिभेदात् चतुर्धा शिरसि तैलं स्यात्। तच्चोत्तरोत्तरं बहुगुणं विद्यात्। अभ्यंगात् सेको बहुगुणस्ततोऽपि पिचुस्तस्मादपि बस्तिरिति क्रमेण ॥ २३ ॥

मस्तक में तेल मालिश के भेद—

वि०—शिर पर तेल लगाना-अभ्यङ्ग, परिषेक, पिचु और बस्ति के भेद से चार प्रकार का है। इनमें उत्तरोत्तर अधिक गुण समझना चाहिये ॥ २३ ॥

तत्राभ्यङ्गः प्रयोक्तव्यो रौक्ष्यकण्डूमलादिषु ॥ २४ ॥

स०—तत्र तेषु मध्ये रौक्ष्यादिष्वभ्यंगः कार्यः ॥ २४ ॥

दोषानुसार अभ्यङ्गादि का प्रयोग—

वि०—इनमें से अभ्यङ्ग—शिरोऽभ्यङ्ग रूक्षता, कण्डू और मल आदि में बरतना चाहिये ॥ २४ ॥

अरुंषिकाशिरस्तोददाहपाकव्रणेषु तु ।
परिषेकः—

स०—अरूंषिकादिषु परिषेकः।

वि०—परिषेक—अरूंषिका, शिर में दर्द, दाह, पाक तथा व्रण में परिषेक बरतना चाहिये।

—पिचुः केशशातस्फुटनधूपने ॥ २५ ॥
नेत्रस्तम्भे च—

स०—केशशातादिषु पिचुः प्रयोक्तव्यः ॥ २५ ॥

वि०—पिचु—बालों के गिरने में, शिर की त्वचा के फटने में, धूपन में और नेत्रस्तम्भ में पिचु बरतना चाहिये ॥ २५ ॥

—बस्तिस्तु प्रसुप्त्यर्दितजागरे ।
नासाऽऽस्यशोषे तिमिरे शिरोरोगे च दारुणे ॥ २६ ॥

स०—बस्तिः पुनः प्रसुप्त्यादौ योज्यः ॥ २६ ॥

वि०—बस्ति—स्पर्शाज्ञान में, अर्दित में, रात्रि-जागरण में, नासाशोष में, मुखशोष में, तिमिर में और तीव्र शिरोरोग में बस्ति बरतनी चाहिये ॥ २६ ॥

विधिस्तस्य निषण्णस्य पीठे जानुसमे मृदौ ।
शुद्धाक्तस्विन्नदेहस्य दिनान्ते गव्यमाहिषम् ॥ २७ ॥
द्वादशाङ्गुलविस्तीर्णं चर्मपट्टं शिरःसमम् ।
आकर्णबन्धनस्थानं ललाटे वस्त्रवेष्टिते ॥ २८ ॥
चैलवेणिकया बद्ध्वा माषकल्केन लेपयेत् ।
ततो यथाव्याधि शृतं स्नेहं कोष्णं निषेचयेत् ॥ २९ ॥
ऊर्ध्वं केशभुवो यावदङ्गुलम्—

स०—तस्य शिरोबस्तेर्विधानमुच्यते। निषण्णस्योपविष्टस्य नरस्य। क्व। पीठे जानुतुल्ये तथा मृदौ न कठिने। किंभूतस्य। शुद्धो वमनादिनाऽक्तस्तैलादिना स्विन्नः स्वेदेन देहो यस्य तस्य शुद्धाक्तस्विन्नदेहस्य। कदा। दिनांतेऽपराह्णे विभावर्यां वा। चर्मपट्टं गव्यं माहिषं वा तथा द्वादशांगुलविस्तीर्णं तथा शिरस्तुल्यं तथाऽकर्णं कर्णं यावद्बंधनस्थानं यस्य तदेवंविधं चर्मपट्टं चैलवेणिकया संयम्य माषकल्केन लेपयेत्। कथम्। ललाटे वस्त्रवेष्टिते। संग्रहे तूक्तम्। अथ शुद्धतनोः सायं रात्रौ वा निवातस्थस्य स्वभ्यक्तस्विन्नस्य सोपाश्रयासनोपविष्टस्य केशांते श्लक्ष्णं द्व्यंगुलं माषपिष्टेन सूक्ष्मेण सद्यः सुखांबुना मृदितेनोभयतः प्रदिग्धं वस्त्रपट्टं बध्नीयात्। ततस्तस्योपरि संधाय बस्तिं बस्तिमूलं च दृढमवलीकं समं चैलवेणिकया बद्ध्वा पुनर्माषपिष्टेनापरिस्रावि कृत्वा यथाव्याधिदोषदूष्यहितं सिद्धमन्यतमं स्नेहं सुखोष्णमासेचयेदिति। तत एवं कृते सति व्याधिवशेन पक्वं स्नेहं कोष्णमपरिच्छिद्रेणाऽवसेचयेत्। केशभूमेरुपरिष्टाद् द्व्यंगुलं यावत् ॥ २७-२९ ॥

शिरोबस्ति की विधि—

वि०—शिरोबस्ति की विधि—घुटनों के बराबर ऊँचे, कोमल आसन पर रोगी को बिठाये। वमनादि से शुद्ध करके तैल का अभ्यंग किये हुए स्वेदन कराके सायंकाल में बस्ति देवे। बस्ति के लिये शिर के बराबर बारह अङ्गुल चौड़ा गाय या भैंस का चमड़ा लेकर इसको वस्त्र से ढाँपे हुए माथे पर कानों तक फैलाकर कपड़े की बनी रस्सी से बांध देवे। इस पर माष का कल्क लगा देवे। फिर रोग के अनुकूल सिद्ध किये हुए गुनगुने स्नेह को शिर पर इतना डाले कि वह स्नेह बालों की भूमि से एक अङ्गुल ऊपर आ जाये ॥ २७-२९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स च स्नेहः कियत्कालं धार्य इत्याह—

धारयेच्च तम् ।

आवक्त्रनासिकोत्क्लेदाद्दशाष्टौ षट् चलादिषु ॥ ३१ ॥

मात्रासहस्राण्यरुजे त्वेकं—

स०—तं च स्नेहं यावद्वक्त्रनासिकास्रुतिः स्यात्ताव-द्धारयेत् । चल आदिर्येषां ते चलादयस्तेषु यथासंख्यं दशाष्टौ षट् मात्रासहस्राणि यावत्स्नेहं धारयेत् । वाते दशमात्रा-सहस्राणि पित्तेऽष्टौ मात्रासहस्राणि कफे षण्मात्रासहस्राणीत्यर्थः। अरुजे तु स्वस्थवृत्त एकं मात्रासहस्रं धारयेत् ॥ ३० ॥

वि०—इस स्नेह को तब तक धारण करे, जब तक मुख और नासिका से स्राव न हो । वायु रोग में दस हजार मात्रा तक, पित्त में आठ हजार मात्रा तक और कफ में छै हजार मात्रा तक स्नेह को धारण करना चाहिये । स्वस्थ अवस्था में एक हजार मात्रा तक स्नेह को धारण करना चाहिये ॥३०॥

स्कन्धादि मर्दयेत् ।

मुक्तस्नेहस्य परमं सप्ताहं तस्य सेवनम् ॥ ३१ ॥

स०—मुक्तस्नेहस्याऽपनीतशिरोबस्तेः स्कंधशिरोग्रीवादि मर्दयेत् । स्नेहबस्तिर्हि स्नेहशब्देनाऽत्र गृह्यते । तत् उष्णोद-कोपचारी स्यादित्यादिकमाचरेत् तत्र ह्यवोचत् । सर्वकर्मस्वयं प्रायो व्याधिक्षीणेषु च क्रम इति । तस्य च स्नेहबस्तेः परमं सेवनं सप्त दिनानि । तस्मात्त्रिपंचसप्त वाऽहानि कार्यः शिरोबस्तिरित्यवतिष्ठते ॥ ३१ ॥

वि०—शिरोबस्ति के हटा लेने पर स्कन्ध, ग्रीवा आदि का मर्दन करे । इस स्नेहबस्ति को अधिक से अधिक सात दिन तक ही सेवन करना चाहिये । (इस प्रकार तीन दिन, पांच दिन या सात दिन ही बस्ति देनी चाहिये) ॥ ३१ ॥

धारयेत्पूरणं कर्णे कर्णमूलं विमर्दयन् ।

रुजः स्यान्मार्दवं यावन्मात्राशतमवेदने ॥ ३१ ॥

स०—कर्णपूरणं धारयेत् । किं कुर्वन् । कर्णमूलं विमर्दयन् । कियत्कालं यावत्पीडाया मार्दवं भवेत् । स्वस्थचित्ते तु मात्राशतं यावद्बिभृयात् ॥ ३२ ॥

कान में तैलधारणविधि तथा उसकी मात्रा—

वि०—कान को तैल भरने में कान की जड़ को मलते हुए कान में भरे तैल को तब तक धारण करना चाहिये, जब तक कि दर्द कम न हो । स्वस्थ अवस्था में एक सौ मात्रा तक कान में तैल धारण करना चाहिये ॥ ३२ ॥

अथ मात्रायाः किं प्रमाणमित्याह—

यावत्पर्येति हस्ताग्रं दक्षिणं जानुमण्डलम् ।

निमेषोन्मेषकालेन समं मात्रा तु सा स्मृता ॥ ३३ ॥

स०—दक्षिणं हस्ताग्रं कर्तृ जानुमंडलं दक्षिणं पर्येति परिवर्तते । दक्षिणशब्दोऽत्र काकाक्षिगोलकन्यायेन द्वयेनाऽपि युज्यते । कियत्कालेनेत्याह । निमेषोन्मेषकालेन समं न तु विश्रम्य सा मात्रा स्मृता मुनिभिरिति शेषः ॥ ३३ ॥

वि०—मात्रा का लक्षण—दक्षिण हाथ का अग्रभाग दक्षिण घुटने पर जितने समय में चारों ओर घूमता है या आँख के बन्द करने और खुलने में जितना समय लगता है उतने समय को 'मात्रा' कहते हैं ॥ ३३ ॥

कचसदनसितत्वपिञ्जरत्वं
परिफुटनं शिरसः समीररोगान् ।
जयति जनयतीन्द्रियप्रसादं
स्वरहनुमूर्द्धबलं च मूर्द्धतैलम् ॥ ३४ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां सूत्रस्थाने गण्डूषा-दिविधिर्नाम द्वाविंशोऽध्यायः ॥ २२ ॥

स०—कचानां सदनादिभिः सम्बन्धः । परिफुटनं कचानामेव प्रकृतत्वात् । शिरसो मरुदामयांश्च हन्ति । इन्द्रियाणां चक्षुरादीनां प्रसादं जनयति । तथा स्वरादिबलं च मूर्धतैलं जनयति ॥ ३४ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचिताया-मष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां द्वाविंशतितमोऽध्यायः ॥ २२ ॥

मस्तकतैल का गुण—

वि०—शिर पर तैल लगाने का फल—शिर पर तैल लगाने से बालों का गिरना, बालों का सफेद या भूरा होना, शिर की त्वचा का फटना और वातजन्य रोग नष्ट होते हैं। इन्द्रियों की निर्मलता एवं स्वर, हनु और शिर में बल आता है ॥ ३४ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का गण्डूषादि-विधिनामक बाइसवाँ अध्याय समाप्त हुआ ॥ २२ ॥

त्रयोविंशोऽध्यायः

त्रयोविंशाध्यायारम्भो जत्रूर्ध्वरोगप्रस्तावाल्लोचने आश्चो-तनविधानप्रदर्शनार्थमित्याह—

अथातो आश्च्योतनाञ्जनविधिमध्यायं व्याख्यास्यामः ।

इति ह स्माहुरात्रेयादयो महर्षयः ॥

स०—आश्चोतनं चांऽजनं च तयोर्विधिर्यस्मिन्नध्याये स एवम् । शेषं पूर्ववत् ।

वि०—अब इसके आगे आश्चोतन अंजन विधि नामक अध्याय का व्याख्यान करेंगे, जैसा कि आत्रेय आदि महर्षियों ने कहा था ।

सर्वेषामक्षिरोगाणामादावाश्च्योतनं हितम् ।

रुक्तोदकण्डूघर्षाश्रुदाहरागनिबर्हणम् ॥ १ ॥

स०—सकलानामपि नयनामयानां प्रथममाश्चोतनं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परिषेको हितम्। यतस्तदाश्चोतनमुपयुक्तं रुजादिघ्नं स्यात्। संग्रहे चोक्तम्। अव्यक्तेष्वेवंगुणमेव पक्ष्मपरिहारेणाऽक्षिकोशालेपनं तच्च बिडालकसंज्ञकमिति ॥ १ ॥

नेत्ररोगों में आश्चोतन—

वि०—आँख के सब रोगों में सबसे प्रथम 'आश्चोतन' करना हितकारी है। इससे पीड़ा, चुभना, कण्डु, रगड़, आँसू आना, दाह और लालिमा नष्ट होती है ॥ १ ॥

वक्तव्य—आश्चोतन-परिषेक।

उष्णं वाते, कफे कोष्णं तच्छीतं रक्तपित्तयोः।

स०—तदाश्चोतनं मरुत्युष्णम्। कफे किंचिदुष्णम्। रक्ते पित्ते च शीतं हितम्।

वि०—यह आश्चोतन वायु में उष्ण, कफ में थोड़ा गरम, पित्त और रक्त में शीतल करना चाहिये।

संप्रत्याश्चोतनस्य विधिमाह—

निवातस्थस्य वामेन पाणिनोन्मील्य लोचनम् ॥ २ ॥
शुक्तौ प्रलम्बयाऽन्येन पिचुवर्त्त्या कनीनिके।
दश द्वादश वा बिन्दून् द्व्यङ्गुलादवसेचयेत् ॥ ३ ॥
ततः प्रमृज्य मृदुना चैलेन कफवातयोः।
अन्येन कोष्णपानीयप्लुतेन स्वेदयेन्मृदु ॥ ४ ॥

स०—निवातस्थानस्थितस्याऽऽतुरस्य वैद्यो वामेन पाणिनोन्मील्य लोचनमपांगदेशे भाजनं निधायाऽन्येन दक्षिणकरेण पिचुवर्त्या शुक्त्या प्रलम्बया दश द्वादश वा बिंदून् द्व्यंगुलान्नातिनिकटान्नातिदूरात् कनीनिकेऽवसेचयेत्। तत इति अनन्तरं कोमलेन वस्त्रखण्डेनाऽप्रमृज्य शोधयित्वाऽन्येन शोधनाच्चैलेन कोष्णजलप्लुतेनाऽक्षि मृदु स्वेदयेन्नातिशयेन। कयोर्दोषयोः। वातकफयोः। न तु पित्तरक्तयोरित्यर्थः ॥ २–४ ॥

आश्चोतन की विधि—

वि०—रोगी को वायुरहित स्थान में बैठाकर वैद्य अपने बायें हाथ से रोगी की आँख को खोले। फिर दूसरे दक्षिण हाथ से सिप्पी में रखी हुई तथा लटकती हुई रूई की बत्ती से कनीनिका पर दस या बारह बिन्दुओं को दो अंगुलि की दूरीसे परिषेक करे। फिर कोमल वस्त्र के टुकड़े से (या रूईसे) पोंछ देवे। कफ और वायु में सुहाते हुए गरम पानी के दूसरे फोये से मृदु स्वेदन देवे ॥ २–४ ॥

अत्युष्णतीक्ष्णं रुग्रागदृङ्नाशायाक्षिसेचनम्।
अतिशीतं तु कुरुते निस्तोदस्तम्भवेदनाः ॥ ५ ॥
कषायवर्त्मतां घर्षं कृच्छ्रादुन्मेषणं बहु।
विकारवृद्धिमत्यल्पं संरम्भमपरिस्रुतम् ॥ ६ ॥

स०—अत्यर्थमुष्णमतितीक्ष्णं चाऽऽश्चोतनं रुजे रागाय दृग्विनाशाय च स्यात्। अतिशीतं त्वक्षिसेचनं निस्तोदादीन् विधत्ते। निस्तोदः सूच्येव व्यधः। स्तम्भोऽक्ष्णः स्तंभनमिव। वेदना शूलम्। कषायवर्त्मत्वं कुरुते। घर्षो वर्त्मनः परस्परं सश्लेषः। बह्वतिमात्रमाश्चोतनं कृच्छ्रेणोन्मेषणं विधत्ते। अत्यल्पमक्षिसेचनं विकारवृद्धिं कुरुते अपरिस्रुतमक्षिसेचनं संरम्भं नेत्रक्षोभं विधत्ते ॥ ५–६ ॥

अत्युष्ण तीक्ष्ण आश्चोतन से रोगोत्पत्ति—

वि०—आश्चोतन अति उष्ण या तीक्ष्ण हो तो वह आँख में पीड़ा, लालिमा और दृष्टिनाश करता है। अति शीतल आश्चोतन चुभने का सा दर्द, स्तम्भ और वेदना करता है। मात्रा में बहुत आश्चोतन से आँखों में रूक्षता, रगड़ तथा कठिनाई से खोलना होता है। मात्रा में थोड़ा आश्चोतन रोग में वृद्धि करता है तथा अपरिस्रुत अर्थात् अश्रु के साथ नेत्र के बाहर न आकर नेत्र में ही रुका हुआ आश्चोतन नेत्र में क्षोभ उत्पन्न करता है ॥ ५–६ ॥

कया रीत्या नेत्रे प्रयुक्तमौषधं दोषानपनयतीत्याह—

गत्वा सन्धिशिरोघ्राणमुखस्रोतांसि भेषजम्।
ऊर्ध्वगान्नयने न्यस्तमपवर्तयते मलान् ॥ ७ ॥

स०—सन्ध्यादीनां द्वंद्वः। ततः स्रोतःशब्देन षष्ठीसमासः। सन्धिशब्देनेहाक्षिकोशसम्बन्धिनः सन्धयो गृह्यन्ते। तेनाक्षिकोशसम्बन्धिस्रोतांसि शिरोघ्राणामुखस्रोतांसि गत्वा नयने क्षिप्तमौषधमूर्ध्वगान्मलानपवर्तयते ॥ ७ ॥

नेत्र में प्रयुक्त औषध से लाभ—

वि०—आँखों में डाली हुई औषध—अक्षिकोशसम्बन्धी संधियों के स्रोत; शिरास्रोत, नासिकास्रोत एवं मुखस्रोतों में जाकर ऊपर की ओर प्रवृत्त मलों को नेत्र में ला कर बाहर निकालती है।

अथाञ्जनं शुद्धतनोर्नेत्रमात्राश्रये मले।
पक्वलिङ्गेऽल्पशोफातिकण्डूपैच्छिल्यलक्षिते ॥ ८ ॥
मन्दघर्षाश्रुरागेऽक्षिण प्रयोज्यं घनदूषिके।
आर्ते पित्तकफासृग्भिर्मारुतेन विशेषतः ॥ ९ ॥

स०—अथश्चोतनादन्यदंजनं प्रयोक्तव्यम्। कीदृशस्याऽऽतुरस्य। शुद्धा तनुर्यस्य स तस्य। मले नेत्रमात्राश्रये न त्वधिकशरीरव्यापिनि। तथा पक्वलिङ्गे। पक्वलिङ्गता कथं वेद्येति विशेषणद्वारेणाऽऽह। अल्पशोफेनातिकण्ड्वा पैच्छिल्येन च लक्षितेऽवगते पक्वलिङ्गे सति। कीदृशेऽक्षिण। मन्दा अल्पा घर्षा अश्रुरोगा यस्य तस्मन्। तथा घना दूषिका नेत्रमलो यस्मिन्नयने तस्मिन्। एदपि पक्वलिङ्गमेव। पित्तेन कफेन रक्तेन चाऽऽतुरे। मारुतेन चाऽऽतुरे विशेषेणांजनं प्रयोज्यम् ॥ ८–९ ॥

अञ्जनप्रयोग—

वि०—अंजन—(वमनादि संशोधनों द्वारा) शुद्ध शरीर वाले पुरुष में आश्चोतन के बाद अञ्जन बरतना चाहिये। अञ्जन केवल नेत्र में ही मल होने पर; दोषों के पक्व होने पर जिनके लक्षण: थोड़ा शोफ, अति कण्डू तथा पिच्छिलता है। रगड़, आँसू और लाली कम होने पर तथा नेत्रमल गाढ़ा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होने पर पित्त, कफ और रक्त से पीड़ित रोगी में विशेष करके वायु में अंजन बरतना चाहिये ॥ ८-९ ॥

लेखनं रोपणं दृष्टिप्रसादनमिति त्रिधा ।
अञ्जनम्—

स०—अञ्जनं च लेखनादिभेदेन त्रिभेदम् । लिख्यते शस्त्रेणेव शुक्रमांदीति लेखनम् । रोप्यते संरोह्यतेऽनेनाऽभिष्यंदादीति रोपणम् । प्रसाद्यते निर्मलीक्रियतेऽनेनेति प्रसादनम् । दृष्टेः प्रसादनं दृष्टिप्रसादनम् । संग्रहोक्तस्य स्नेहस्य अञ्जनस्य रोपणदृष्टिप्रसादनयोरेवांतर्भूतत्वात् तदिह पृथङ् नोक्तम् ।

अञ्जन के भेद—

वि०—यह अञ्जन लेखन, रोपण और दृष्टिप्रसादन भेद से तीन प्रकार का है ।

—लेखनं यत्र कषायाम्लपटूषणैः ॥ १० ॥
रोपणं तिक्तकैर्द्रव्यैः स्वादुशीतैः प्रसादनम् ।
तीक्ष्णाञ्जनाभिसन्तप्ते नयने तत्प्रसादनम् ॥ ११ ॥
प्रयुज्यमानं लभते प्रत्यञ्जनसमाह्वयम् ।

स०—तत्र तेषु त्रिष्वंजनेषु मध्याल्लेखनमञ्जनं कषायादिभिर्द्रव्यैः शुक्रामादिषु प्रयोज्यम् । रोपणमञ्जनं तिक्तकैर्द्रव्यैः स्यात् । तिक्तग्रहणमुपलक्षणार्थं संग्रहोक्तस्य । तेन कषायद्रव्यैः संस्नेहैः रोपणमञ्जनं वेद्यम् । स्वादुशीतैर्द्रव्यैः प्रसादनमेव प्रसादनमञ्जनम् । स्वादुशीतद्रव्यैश्चूर्णं श्लक्ष्णांजनं सन्तप्ते चक्षुषि प्रयुज्यमानं प्रत्यञ्जनसंज्ञां लभते ॥ १०-११ ॥

लेखनादि अञ्जन के द्रव्य—

वि०—इनमें लेखन अञ्जन-कषाय, अम्ल, लवण और उष्ण द्रव्यों से तथा रोपण अञ्जन-तिक्त द्रव्यों से करना चाहिये । प्रसादन अञ्जन-स्वादु (मधुर) एवं शीतल द्रव्यों से करना चाहिये । तीक्ष्ण अञ्जन से अभिसन्तप्त आँख में (तीक्ष्ण अञ्जन के बाद) प्रयोग करने पर प्रसादन की संज्ञा प्रत्यञ्जन हो जाती है[1] ॥ १०-११ ॥

दशाङ्गुला तनुर्मध्ये शलाका मुकुलानना ॥ १२ ॥
प्रशस्ता, लेखने, ताम्री रोपणे काललोहजा ।
अङ्गुली च, सुवर्णोत्था रूप्यजा च प्रसादने ॥ १३ ॥

स०—दशांगुला राजमाषस्थूला शलाका प्रशस्यते । मध्ये तनुस्तथा मुकुलाकारे आनने मुखे द्वे अपि यस्याः सा मुकुलानना । लेखनेंऽजने ताम्री शलाका प्रशस्यते । रोपणे काललोहोत्था कृष्णशस्त्रोद्भवा । अंगुली च हस्तावयवविशेषो एव शस्तः । एवं प्रसादनेंऽजने सुवर्णोत्था कनकोद्भवा च शलाका प्रशस्ता ॥ १२-१३ ॥

१. दृष्टिप्रसादन अञ्जन का प्रयोग स्वस्थावस्था में नेत्रों की निर्मलता के लिए करना उचित है :—

'सौवीरमञ्जनं नित्यं हितमक्ष्णोः प्रयोजयेत् ।' (च. सू. ५)

अञ्जन की शलाका—

वि०—अञ्जनशलाका—दस अङ्गुल लम्बी; बीच में पतली; सिरों पर गोल (डोढी के आकार की) शलाका उत्तम है । लेखन कार्य में ताम्र की बनी; रोपण में काललोह (तीक्ष्ण लोह) की बनी हो या केवल अङ्गुलि से अञ्जन करे । प्रसादन में स्वर्ण या चाँदी की बनी शलाका उत्तम है ॥ १२-१३ ॥

अंजनकल्पना त्रिप्रकारा स्यात् कथमित्याह—

पिण्डो रसक्रिया चूर्णस्त्रिधैवाञ्जनकल्पना ।
गुरौ मध्ये लघौ दोषे ताः क्रमेण प्रयोजयेत् ॥ १४ ॥

स०—पिंडादिभेदेन त्रिप्रकारांऽजनकल्पना स्यात् । पिंडादयो बहुदोषादिषु क्रमेण प्रयोज्याः । गुरौ दोषे पिंडः प्रयोज्यो मध्ये दोषे रसक्रिया लघुदोषे चूर्ण इत्यर्थः ॥१४॥

अञ्जन की त्रिविध कल्पना—

वि०—अञ्जन की कल्पना—पिण्ड, रसक्रिया और चूर्ण भेद से तीन प्रकार की है । इनमें गुरु दोष में पिण्ड; मध्यम दोष में रसक्रिया और लघु दोष में चूर्ण बरतना चाहिये ॥१४॥

हरेणुमात्रा पिण्डस्य वेल्लमात्रा रसक्रिया ।
तीक्ष्णस्य, द्विगुणं तस्य मृदुनः—

स०—तीक्ष्णद्रव्यकृतस्य पिंडस्य हरेणुमात्रं प्रमाणं कथयंति । मृदुद्रव्यकृतस्य पिंडस्य तद् द्विगुणं द्विहरेणुमात्रं वदंति । रसक्रियाया विडंगं प्रमाणमाहुः ।

तीक्ष्णादि चूर्ण का प्रमाण—

वि०—तीक्ष्ण पिण्ड द्रव्य की मात्रा हरेणु (मेवड़ी के बीज) के समान तथा तीक्ष्ण रसक्रिया की मात्रा वेल्लज (विडंग) के बराबर होती है । मृदु द्रव्यों से बने पिण्ड अथवा रसक्रिया की मात्रा दुगुनी होती है ।

—चूर्णितस्य च ॥ १५ ॥
द्वे शलाके तु तीक्ष्णस्य, तिस्रस्तदितरस्य च ।

स०—चूर्णे तीक्ष्णे द्विगुणां शलाकां मृदौ त्रिगुणां शलाकामभिदधुः । तंत्रांतरे चोक्तम् । लेखनमंजनं ताम्ररजतकांस्याद्यन्यतमेषु धार्यम् । रोपणं सुवर्णवटशंखान्यतमेषु । प्रसादनं स्फटिकप्रवालचंदनान्यतमेषु धार्यम् । एवं ह्यंजनमप्यापन्नगुणं भवति । वर्तेर्घर्षणार्थं शिला निम्नमध्याऽनुन्नारिणी पंचागुलायता त्र्यंगुलविस्तारेति ॥ १५ ॥

वि०—चूर्ण में—तीक्ष्ण चूर्ण की मात्रा दो शलाका है, और मृदु चूर्ण की मात्रा तीन शलाका है ॥ १५ ॥

निशि स्वप्ने न मध्याह्ने म्लाने नोष्णगभस्तिभिः ॥१६॥
अक्षिरोगाय दोषाः स्युर्वर्धितोत्पीडितद्रुताः ।
प्रातः सायं च तच्छान्त्यै व्यभ्रेऽर्केऽतोऽञ्जयेत्सदा ॥

स०—निशि रात्रावंजनं न प्रयोज्यम् । तथा स्वप्ने स्वप्नकालेऽजनं न प्रयोज्यम् । तथा मध्यंदिनेंऽजनं न प्रयोज्यम् । न च म्लाने लोचनेंऽजनं प्रयोज्यम् । केन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्लाने। उष्णाभिर्दीधितिभिः। तस्मादेषु कालेष्वंजनेन प्रयुक्तेन दोषा वृद्धिं नीतास्तथाऽन्यस्थानगतत्वादुत्पीडितास्तथा द्रुताः कालस्योष्णत्वाद्विलयं गता अचिरोगाय स्युस्तस्मादेषु कालेष्वंजनं न प्रयोज्यम्। यतः पूर्वोक्तेषु कालेषु पूर्वोक्ता दोषास्तस्मात्पूर्वाह्ले अपराह्ले च तच्छांत्यै तस्याक्षिरोगस्योपशमाय गताभ्रे रवौ सदैव नेत्रमंजयेत् ॥ १६-१७ ॥

रात्रि आदि में अञ्जन करने का निषेध—

वि०—रात्रि में, सोने के समय, मध्याह्न में तथा धूप से मुरझायी आँखों में अञ्जन नहीं लगाना चाहिये क्योंकि इन अवस्थाओं में अञ्जन करने से दोष बढ़कर (अन्यस्थानगत होने से) उत्पीडित होकर तथा द्रव होकर आँख के रोग उत्पन्न करते हैं। इनकी शान्ति के लिये या इनसे बचने के लिये प्रातःकाल और सायंकाल में साफ आकाश में (बादलों से रहित सूर्य) होने पर सदा अञ्जन करना चाहिए ॥ १६-१७ ॥

वदन्त्यन्ये तु न दिवा प्रयोज्यं तीक्ष्णमञ्जनम्।
विरेकदुर्बलं चक्षुरादित्यं प्राप्य सीदति ॥ १८ ॥

स०—अन्ये त्वाचार्या एवं मन्यंते। तीक्ष्णमंजनं दिवा न प्रयोज्यम्। कस्मादित्याह। यस्माच्चक्षुरादित्यं प्राप्य सीदति। किंभूतम्। विरेकदुर्बलम्। तीक्ष्णांजनेन विरेचितत्वात्। तस्माद्दिवसे तीक्ष्णमंजनं न प्रयोज्यम् ॥ १८ ॥

अन्याचार्यों के मत—

वि०—दूसरे (चरक आदि)-दिन में तीक्ष्ण अञ्जन करने का निषेध करते हैं क्योंकि तीक्ष्ण अञ्जन से आँख का विरेचन होने के कारण दुर्बल हुई दृष्टि सूर्य के प्रकाश से पीडित हो जाती है ॥ १८ ॥

अत एवाऽऽह—

स्वप्नेन रात्रौ कालस्य सौम्यत्वेन च तर्पिता।
शीतसात्म्या दृगाग्नेयी स्थिरतां लभते पुनः ॥ १९ ॥

स०—यस्मात्स्वप्नेन रात्रौ तर्पिताः तथा कालस्य राज्याख्यस्य सौम्यत्वेन तर्पिता दृष्टिः पुनः स्थैर्यं प्राप्नोति तीक्ष्णांजनक्षोभितापि। कीदृग्दृष्टिः। आग्नेय्यग्न्युत्कटभूतसम्भवा। तथा शीतसात्म्या। तस्माद्रात्रावञ्जनं प्रयोज्यम्। आग्नेयीति सर्वत्राग्निकलिभ्यां ढग्वक्तव्य इति ढक्। शीतं सात्म्यं यस्याः। पैत्तिकज्वरस्येव ॥ १९ ॥

वि०—रात्रि में सोने से और समय के सौम्य होने के कारण तर्पित हुई-आग्नेयी होते हुए भी शीतसात्म्य वाली दृष्टि रात्रि में प्रयुक्त किये अञ्जन से पुनः स्थिरता प्राप्त करती है ॥ १९ ॥

वक्तव्य—चरक में 'दिवा तन्न प्रयोक्तव्यं नेत्रयोस्तीक्ष्णमञ्जनम्। विरेकदुर्बला दृष्टिरादित्यं प्राप्य सीदति। तस्मात् स्राव्यं निशायां तु ध्रुवमञ्जनमिष्यते ॥' चरक, सू. अ. ५।१७ ॥

तदेतदन्यमतमव्यापकमिति दूषयन्नाह—

अत्युद्रिक्ते बलासे तु लेखनीयेऽथवा गदे।
काममह्न्यपि नात्युष्णे तीक्ष्णमक्षिण प्रयोजयेत् ॥ २० ॥

स०—अत्युत्कृष्टे कफेऽथवा लेखनार्हे शुक्रार्मादौ रोगे दिनेऽपि नात्युष्णे तीक्ष्णमञ्जनं प्रयोजयेत्। काममनुगतमेतत्। कालस्यात्यौष्ण्यादंजनस्य तैक्ष्ण्याच्चाऽतियोगेन दृष्ट्युपघातः स्यात् ॥ २० ॥

अन्य मत का अपवाद—

वि०—कफ के अत्यधिक बढ़े होने पर; अथवा शुक्र अर्म आदि लेखनीय रोगों में, अधिक उष्ण काल न होने पर आँखों में तीक्ष्ण अञ्जन का इच्छानुसार दिन में भी प्रयोग कर सकते हैं।

अत एवाह—

अश्मनो जन्म लोहस्य तत एव च तीक्ष्णता।
उपघातोऽपि तेनैव तथा नेत्रस्य तेजसः ॥ २१ ॥

स०—पाषाणाच्छस्त्रस्योत्पत्तिस्तस्मादेव चाऽश्मनः श्लक्ष्णतादियोगात्तीक्ष्णता। उपघातोऽतिकुण्ठत्वादिकस्तेनैव पाषाणेन न केवलं तैक्ष्ण्यम्। तथा तेनैवाश्मशस्त्रन्यायेन नेत्रस्य तेजसोऽग्नेरश्मस्थानीयाज्जन्म रविसंज्ञात्तेजसः सकाशात्तीक्ष्णता दर्शनपटुत्वमत्युष्णेन तु तेन तस्योपघातः। तस्माद्यदन्ये गन्दंति सामान्येनैव दिवांऽजनं न प्रयोज्यमिति तदसदेव ॥ २१ ॥

उक्त विषय में दृष्टान्त—

वि०—लोह की उत्पत्ति पत्थर से होती है, उस शस्त्र की तीक्ष्णता भी उसी पत्थर से है, और शस्त्र का कुण्ठित होना भी पत्थर से ही होता है; इसी प्रकार दृष्टि भी तेज से उत्पन्न होती है; तैजस तीक्ष्ण अञ्जन से ही तीव्र बनती है और तेज से ही दूषित होती है ॥ २१ ॥

न रात्रावपि शीतेऽपि नेत्रे तीक्ष्णाञ्जनं हितम्।
दोषमस्रावयत्स्तब्धं कण्डूजाड्यादिकारि तत् ॥ २२ ॥

स०—अपि च रात्रावपि नेत्रे कफाधिक्येनातिशीते कण्डूपैच्छिल्याद्यनुमिते तीक्ष्णमञ्जनं न प्रयोज्यम्। यतो निशि तीक्ष्णमञ्जनमुपयुक्तं कालस्य सौम्यात्वाद्दोषस्रवणेऽयोग्यमस्रावयदञ्जनं कण्डूजाड्यादिकृत् स्यान्न तु शमकारि। तस्माच्छीतसात्म्या दृगाग्नेयी स्थिरतां लभते पुनरित्येतदप्यसत्। तस्मात्पूर्वोक्तमेवाऽनवद्यम् ॥ २२ ॥

रात को भी अतिशीत में तीक्ष्णाञ्जननिषेध—

वि०—रात्रि में भी अतिशीत होने पर तीक्ष्ण अञ्जन आँख में नहीं लगाना चाहिये क्योंकि शीत काल होने से अञ्जन दोष का स्राव न करा के स्तब्धता, कण्डू, जड़ता आदि उत्पन्न करता है ॥ २२ ॥

नाञ्जयेद्भीतवमितविरिक्ताशितवेगिते।
क्रुद्धज्वरिततान्ताक्षिशिरोरुक्शोकजागरे ॥ २३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अदृष्टेऽर्के शिरःस्नाते पीतयोर्धूममद्ययोः ।
अजीर्णेऽग्न्यर्कसन्तप्ते दिवासुप्ते पिपासिते ॥ २४ ॥

स०—भीतादीनामक्षिणी वैद्यो नांजयेत्। अशितोऽत्र सद्योभुक्तो वेद्यः। सद्योभुक्तस्य नरस्य नयने नांजयेदित्यर्थः। तांते सूक्ष्मभापुरादिदर्शनादभिघातत्वाच्च ग्लानेऽक्षिणी यस्य स एवं तस्मिन्। अदृष्टेऽर्के जलदच्छन्नत्वात् तथा शिरःस्नातादिषु ॥ २३-२४ ॥

अञ्जन के अयोग्य व्यक्ति—

वि०—अंजननिषेध—डरे हुए, वमन किये; विरेचन लिये; भोजन करने पर, मलमूत्र के उपस्थित वेग पर; क्रुद्ध एवं ज्वरयुक्त होने पर, नितान्त-सूक्ष्म-चमकते आदि रूपों के दर्शन से थकी या चकित दृष्टि में, शिरोरुक्, शोक तथा रात्रि-जागरण में, सूर्य के छिपे होने पर, शिर से स्नान करने पर, मद्य या धूम के पीने पर; अजीर्ण में, अग्नि या सूर्य से सन्तप्त होने पर; दिन में सोने पर, प्यास लगी होने पर अञ्जन नहीं करना चाहिये ॥ २३-२४ ॥

सांप्रतं यादृशमञ्जनं न योज्यं तद्दर्शयति—

अतितीक्ष्णमृदुस्तोकबहुच्छघनकर्कशम् ।
अत्यर्थशीतलं तप्तमञ्जनं नावचारयेत् ॥ २५ ॥

स०—अतिशब्दस्य तीक्ष्णादिभिर्घनांतैः सम्बन्धः। अत्यर्थशीतलमित्येतस्मादत्यर्थशब्दस्तप्तमित्यत्राऽनुवृत्तिकृतेन सम्बन्धेन योज्यः। अतितीक्ष्णादिगुणमञ्जनं न प्रयोजयेत्। तन्त्रान्तरे चांऽजनविधिरुक्तः। सुखोपविष्टस्याऽऽतुरस्य सूपविष्टो वैद्यो वामांगुष्ठेनोत्तरं वर्त्मोत्क्षिप्य कृष्णभागस्याधः कनीनिकादपांगं यावदञ्जनं नयेदिति ॥ २५ ॥

प्रयोग के अयोग्य अञ्जन—

वि०—अतितीक्ष्ण; अतिमृदु, अत्यल्प, अतिमात्रा में, अतिपतला, अतिगाढ़ा, कर्कश, अतिशीतल, अत्युष्ण अञ्जन आँखों में नहीं करना चाहिये ॥ २५ ॥

वक्तव्य—अञ्जनविधि—'सुखोपविष्टस्य सुखो पविष्टो वैद्यो वामाङ्गुष्ठेनोत्तरं वर्त्मोत्क्षिप्य कृष्णभागस्याधः कनीनिकादपाङ्गं यावदञ्जनं नयेत् ॥'

अथानुन्मीलयन् दृष्टिमन्तः सञ्चारयेच्छनैः ।
अञ्जिते वर्त्मनी किञ्चिच्चालयेच्चैवमञ्जनम् ॥ २६ ॥
तीक्ष्णं व्याप्नोति सहसा न चोन्मेषनिमेषणम् ।
निष्पीडनं च वर्त्मभ्यां क्षालनं वा समाचरेत् ॥ २७ ॥

स०—अद्यवमञ्जनस्वरूपमवेत्य नेत्रेऽञ्जिते सति दृष्टिगोलकमनुन्मीलयन्मध्ये शनैः शनैः सञ्चारयेत्। कथम्। वर्त्मनी चालयेत्। एवमञ्जनं नेत्रं व्याप्नोत्यनुप्रविशति। न च सहसा विध्यतिक्रमेणोन्मेषनिमेषणं कुर्यात्। चशब्दोऽवधारणे। नैव समाचरेदित्यर्थः। वर्त्मभ्यां च निष्पीडनं न समाचरेत। वा शब्दोऽवधारणे क्षालनं च नैव कुर्यात् ॥ २६-२७ ॥

अञ्जन के पश्चात् कर्तव्य—

वि०—अञ्जन लगाने के उपरान्त आँखों को बन्द रख कर ही धीरे से दृष्टिगोलक को अन्दर ही चलाये। पलकों को भी थोड़ा चलाये; इस प्रकार करने से तीक्ष्ण अंजन फैल जाता है। सहसा आँखों को खोलना, बन्द करना; पलकों को दबाना, अथवा आँखों को धोना नहीं चाहिये ॥२६-२७॥

अपेतौषधसंरम्भं निर्वृतं नयनं यदा ।
व्याधिदोषर्तुयोग्याभिरद्भिः प्रक्षालयेत्तदा ॥ २८ ॥

स०—अपेतोऽपगत औषधसंरम्भो भेषजक्षोभो यस्मान्नेत्रात्तदेवमपेतौषधसंरम्भम्। अत एव निर्वृतमपेतदुःखानुबन्धि यदा लोचनं स्यात्तदा व्याध्यादियोग्यैर्जलैः प्रक्षालयेत्। तत्र व्याधिरभिष्यन्दादिः। दोषो वातादिः। ऋतुर्वसन्तादिः ॥ २८ ॥

नेत्र धोने की विधि—

वि०—जब औषध की कड़ुआहट मिट जाय और नेत्र पीडारहित हो जाँय तब रोग, दोष तथा ऋतु के अनुसार जल से इसको धोये ॥ २८ ॥

दक्षिणाङ्गुष्ठकेनाक्षि ततो वामं सवाससा ।
ऊर्ध्ववर्त्मनि सङ्गृह्य शोध्यं वामेन चेतरत् ॥ २९ ॥

स०—ततो नयनप्रक्षालनादनन्तरं दक्षिणांगुष्ठेन सवस्त्रेण वामं नयनमूर्ध्ववर्त्मनि सम्यगादाय शोधनीयम्। वामेनांऽगुष्ठेन सवाससेतरत् दक्षिणमूर्ध्ववर्त्मनि संगृह्य शोध्यम् ॥२९॥

नेत्र धोने की विधि—

वि०—दक्षिण हाथ के अंगूठे को वस्त्र में लपेट कर-वाम आँख को ऊपर के पलक से पकड़ कर साफ करना चाहिये। दक्षिण आँख को ऊपर के पलक से पकड़ कर वाम हाथ के अंगूठे पर वस्त्र लपेट कर उससे साफ करना चाहिये ॥ २९ ॥

किमिति शोध्यमित्याह—

वर्त्मप्राप्ताऽञ्जनाद्दोषो रोगान् कुर्यादतोऽन्यथा ।

स०—अतोऽन्यथाऽशोध्यमाने वर्त्मनि प्राप्तं च तदञ्जनं वर्त्मप्राप्तांजनं तस्माद्दोषो रोगान् कुर्यात्। तस्मात्तच्छोध्यं नयनम् ॥ २९ ॥

नेत्रशोधन नहीं करने से हानि—

वि०—अन्यथा (आँखों का शोधन न करने से) अञ्जन द्वारा पलकों में आया हुआ दोष रोगों को उत्पन्न करता है।

कण्डूजाड्येऽञ्जनं तीक्ष्णं धूमं वा योजयेत् पुनः ॥३०॥

स०—कण्डूश्च जाड्यं चेति समाहारद्वन्द्वः। तस्मिन् सति तीक्ष्णमञ्जनं योजयेत्। अथवा तीक्ष्णं धूमं योजयेत् ॥ ३० ॥

वि०—आँख में कण्डू या जडता होने पर तीक्ष्ण अञ्जन फिर बरतना चाहिये या धूमपान करना चाहिए ॥ ३० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तीक्ष्णाञ्जनाभितप्ते तु चूर्णं प्रत्यञ्जनं हिमम् ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थान आश्चोतनाञ्जनविधिर्नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

स०—पुनस्तीक्ष्णेनांजनेनाऽभितप्ते लोचने पूर्णं प्रत्यञ्जनं चोक्तं हितमिति ।

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वाङ्गसुन्दराख्यायां त्रयोविंशोऽध्यायः ॥ २३ ॥

वि०—तीक्ष्ण अंजन से अभितप्त आँख में शीतल चूर्ण से प्रत्यञ्जन करे।

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का आश्चोतनाञ्जन विधि नामक तेइसवाँ अध्याय समाप्त हुआ ॥ २३ ॥

चतुर्विंशतितमोऽध्यायः

अस्मादनन्तरं चतुर्विंशाऽध्यायारम्भ आश्चोतनांजनाभ्यां हि नयनस्य प्रायो दौर्बल्यमतस्तर्पणादेरुपयोगो युक्त इत्याह—

अथातस्तर्पणपुटपाकविधिमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

स०—तर्पणं च पुटपाकश्च तर्पणपुटपाकौ तयोर्विधिस्तम् । शेषं पूर्ववत् ।

वि०—अब इसके आगे तर्पणपुटपाकविधि नामक अध्याय का व्याख्यान करेंगे, जैसा कि आत्रेय आदि महर्षियों ने कहा था।

नयने ताम्यति स्तब्धे शुष्के रूक्षेऽभिघातिते ।
वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे ॥ १ ॥
कृच्छ्रोन्मीलसिराहर्षसिरोत्पाततमोऽर्जुनैः ।
स्यन्दमन्थान्यतोवातवातपर्यायशुक्रकैः ॥ २ ॥
आतुरे शान्तरागाश्रुशूलसंरम्भदूषिके ।
निवाते तर्पणं योज्यं शुद्धयोर्मूर्द्धकाययोः ॥ ३ ॥
काले साधारणे प्रातः सायं चोत्तानशायिनः ।

स०—चक्षुषि ग्लायति सति तथा स्तब्धादिगुणे तर्पणं कार्यम् । तथा शीर्णे पक्ष्मणी यस्य तदेवम् । आविलमस्पष्टमीक्षणं दर्शनं यस्य तदेवम् । शीर्णपक्ष्म च तदाविलेक्षणं च तस्मिन् । तथा कृच्छ्रोन्मीलादयोऽक्षिरोगेषु वक्ष्यन्ते । कृच्छ्रोन्मीलश्च शिराहर्षश्च शिरोत्पातश्च तमश्चातैरातुरे । तथा स्यन्दश्च मन्थश्चान्यतो वातश्च वातपर्यायश्च शुक्रकं च तैरातुरे । यथा नस्याऽनर्हे । यतो वक्ष्यति । तर्पणं पुटपाकं च नस्यानर्हे न योजयेत् । तथा शांताः शमंगता रागाश्रुशूलसंरम्भदूषिका यस्मिन्नयये तस्मिन् । कीदृशि स्थाने । निवाते विगताऽनिले । उपलक्षणं चेदम् । विगतातपरजोधूमादिका इत्यपि द्रष्टव्यम् कीदृशयोर्मस्तकदेहयोः । शुद्धयोर्यथायोगं वमनविरेचननस्यैः कृतशुद्धयोरित्यर्थः । कीदृशे काले । साधारणे वसन्तादिके । कदा । सायं प्रातर्वा दोषदूष्याद्यपेक्षया । कीदृशस्याऽऽतुरस्य । उत्तानशायिन इति । शयनस्थस्योत्तानस्येत्यर्थः ॥ १-३ ॥

वि०—तर्पण का विषय—आँख के म्लान होने पर (देखने में अशक्त होने पर), स्तब्ध, शुष्क, रूक्ष या चोट लगने पर, वायु-पित्त से पीड़ित होने पर, बरौनियों के गिरने पर, दृष्टि मलिन होने पर (देखने से जब आँखों से पानी आ जाये), कठिनाई से आँख खुलने पर, शिराहर्ष में, शिरोत्पात में, आँखों के सामने अंधेरा होने पर, अर्जुन रोग में, अभिष्यन्द में, अधिमन्थ में, अन्यतोवात में, वातविपर्यय में तथा शुक्ररोग में तर्पण बरतना चाहिये। तर्पण का समय-जब आँख में लालिमा, अश्रु, शूल, शोथ (या रगड़) तथा आँख की मैल शान्त हो जाये तब वमन, विरेचन और नस्य से शरीर एवं शिर का आवश्यक शोधन करके वायुरहित स्थान में रोगी को बिठाकर, साधारण ऋतु में प्रातः या सायंकाल रोगी को चित्त (उत्तान) लिटाकर तर्पण देना चाहिये ॥ १-३ ॥

यवमाषमयीं पालीं नेत्रकोशाद् बहिः समाम् ॥ ४ ॥
द्व्यङ्गुलोच्चां दृढां कृत्वा यथास्वं सिद्धमावपेत् ।
सर्पिर्निमीलिते नेत्रे तप्ताम्बुप्रविलायितम् ॥ ५ ॥
नक्तान्ध्यवाततिमिरकृच्छ्रबोधादिके वसाम् ।
आपक्ष्माग्रात्—

स०—यवैर्मिश्रा माषा यवमाषास्ते प्रकृता यस्यां सा यवमाषमयी ताम् । तादृशीं पालीं नेत्रकोशाद्बाह्यत उभयपार्श्वयोः समामनिम्नोन्नतां कृत्वा यथायोगं दोषदूष्याद्यनुरोधात्पक्वं घृतं निमीलितेऽनुन्मीलिते लोचने क्षिपेत् । अथ पाल्या उच्छ्रायमाह । द्व्यंगुलोच्चां द्व्यंगुलोच्छ्रायवतीम् । तथा दृढां निबिडाम् । यथा स्नेहो न प्रस्रवेदित्यर्थः । कीदृशं सर्पिः । तप्तेन जलेन प्रकर्षेण विलापितं द्रवीकृतम् । रात्र्यांध्यादिषु वसां यथास्वौषधसिद्धां तथैव विलापितामावपेत् । कथम् । आपक्ष्माग्रात् पक्ष्माग्राणि यावन्निमग्नानि तावत्सर्पिरादिरावपेदिति ॥ ४-५ ॥

तर्पण की विधि—

वि०—(उत्तान लेटे हुए रोगी के) नेत्रकोशों के बाहर जौ और उड़द के आटे से समान जो ऊँची-नीची न हो पाली (थाल्हा) बनाये। यह पाली दो अङ्गुल ऊँची और मजबूत बनानी चाहिये। दोष-दूष्य के अनुसार सिद्ध किये घृत को गरम पानी में रखकर पिघला कर इसको नेत्र के चारों ओर बनी पाली में डाल देवे। रतौंधी, वातजन्य तिमिर और कठिनाई से आँख खुलने आदि में वसा को घी के

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थान पर बरते। पाली में घी या वसा को बरौनियों के अगले भाग डूबने तक भरे ॥ ४-५ ॥

—अथोन्मेषं शनकैस्तस्य कुर्वतः ॥ ६ ॥
मात्रा विगणयेत्तत्र वर्त्मसन्धिसितासिते।
दृष्टौ च क्रमशो व्याधौ शतं त्रीणि च पञ्च च ॥ ७ ॥
शतानि सप्त चाष्टौ च दश मन्थे दशानिले।
पित्ते षट् स्वस्थवृत्ते च बलासे पञ्च धारयेत् ॥ ८ ॥

स०—अथ घृताद्यावपनादनन्तरं शनैःशनैरुन्मीलनं विदधतस्तस्याऽऽतुरस्य मात्राः पूर्वोक्ता विगणयेत्। तत्र तेषु वर्त्मादिके व्याधौ सर्पिषि क्षिप्ते शतसंख्यादीर्मात्रा विगणयेत् क्रमेण। तत्र वर्त्मरोगे मात्राशतम्। सन्धिरोगे त्रीणि शतानि। सितरोगे पञ्च शतानि। असितरोगे सप्त शतानि। दृष्टिरोगेऽष्टौ शतानि धारयेदिति। क्रमशो यथासंख्येन। मन्थाख्यं रोगे दश शतानि। वातरोगे दशैव शतानि। पित्तरोगे षट् शतानि। स्वस्थवृत्ते च षट् शतानि। कफे पंच शतानि धारयेत् ॥ ६-८ ॥

रोगानुसार औषधधारण का समय—

वि०—घृत का आताप करने के उपरान्त रोगी धीमे धीमे आँखों को खोलता रहे। रोगी के इस प्रकार करने में वैद्य मात्रा को गिने। यथा-वर्त्म रोगों में एक सौ मात्रा, सन्धिरोग में तीन सौ, सित रोग में पाँच सौ, असित रोग में सात सौ, दृष्टि रोग में आठ सौ, अधिमन्थ और वात रोग में एक हजार मात्रा तक, पित्त में छः सौ, स्वस्थवृत्त में भी छः सौ और कफ में पाँच सौ मात्रा तक धारण करे ॥ ६-८ ॥

कृत्वाऽपाङ्गे ततो द्वारं स्नेहं पात्रे निगालयेत्।
पिबेच्च धूमं, नेक्षेत व्योम रूपं च भास्वरम् ॥ ९ ॥

स०—यथोक्तमात्राधारणादनन्तरमपांगदेशे पाल्या द्वारं कृत्वा स्नेहं भाजने निक्षिपेत्। ततः सक्तुपिण्ड्याक्षिकोशं प्रमृज्य स्नेहेरितकफोपशांतये। धूमं च पिबेन्न केवलं तर्पणं कुर्यात्। प्रक्षालितनेत्रं स्वेनं मात्रया भोजयेत्। न दिवसे तथा व्योम न पश्येद्भास्वरं रूपं च। उपलक्षणं चेदम्। एवमातपमपि न पश्येत् ॥ ९ ॥

अपाङ्गदेश में द्वारविधानादि—

वि०—इसके बाद अपांगप्रदेश (कान की तरफ के नेत्रकोण) में (पाली में) छेद करके स्नेह को दूसरे पात्र में निकाल लेवे और धूम पिये तथा आकाश एवं चमकीले रूपों को न देखे।

इत्थं प्रतिदिनं वायौ पित्ते त्वेकान्तरं कफे।
स्वस्थे च द्व्यन्तरं दद्यादातृप्तेरिति योजयेत् ॥ १० ॥

स०—इत्थममेन क्रमेण पवने प्रत्यहं तर्पणं दद्यात्। पित्ते पुनरेकांतरं तर्पणं दद्यात्। कफे स्वस्थे च द्विदिनांतरं योजयेत्। इत्येवं यावन्नयनस्य तृप्तिः स्यात्तावत्तर्पणं योज्यम् ॥ १० ॥

वायु आदि में तर्पणप्रयोगकाल—

वि०—इस प्रकार वायु रोग में प्रतिदिन, पित्त रोग में एक दिन छोड़ कर, स्वस्थवृत्त तथा कफ रोग में दो दिन छोड़ कर तर्पण तब तक करे जब तक आँख की तृप्ति न हो ॥ १० ॥

तृप्तस्य किं लक्षणमित्याह—

प्रकाशक्षमता स्वास्थ्यं विशदं लघु लोचनम्।
तृप्ते विपर्ययोऽतृप्तेऽतितृप्ते श्लेष्मजा रुजः ॥ ११ ॥

स०—प्रकाशक्षमत्वादिकं तृप्तस्य सम्यक्तर्पितस्य लक्षणम्। प्रकाशक्षमता प्रभाभास्वरादिरूपसहत्वम्। अतृप्ते वैपरीत्यं पूर्वनिर्दिष्टम्। अतितृप्ते सति कफोद्भवाः कण्डूपैच्छिल्यादिका रुजः स्युः ॥ ११ ॥

तृप्ति और अतृप्ति का लक्षण—

वि०—तृप्ति का लक्षण—नेत्र के तृप्त होने पर प्रकाश की सहिष्णुता, स्वस्थता, निर्मलता और आँख में हल्कापन आ जाता है। अतृप्ति में इससे विपरीत लक्षण होते हैं तथा अतितृप्ति में कफजन्य रोग होते हैं ॥ ११ ॥

स्नेहपीता तनुरिव क्लान्ता दृष्टिर्हि सीदति।
तर्पणानन्तरं तस्माद्दृग्बलाधानकारिणम् ॥ १२ ॥
पुटपाकं प्रयुञ्जीत पूर्वोक्तेष्वेव यद्मसु।

स०—स्नेहपीता दृष्टिः क्लांता तनुरिव यतोऽवसीदति तस्मात्कारणात्तर्पणानन्तरं पुटपाकं प्रयुञ्जीत। कीदृशम्। दृशोर्बलं तस्याऽऽधानं प्रबन्धेन वृत्तिस्तत्करोति तं दृग्बलाधानकारिणम्। हेतोर्द्वितीया। दृग्बलाधानकारित्वात् प्रयुञ्जीतेत्यर्थः। पूर्वोक्तेष्वेव तर्पणोक्तेष्वामयेषु ॥ १२ ॥

पुटपाकविधान—

वि०—स्नेह पी हुई दृष्टि थक कर शिथिल बन जाती है, जिस प्रकार कि स्नेहपान से शरीर शिथिल बन जाता है। इसलिये तर्पण के बाद दृष्टि के बल को बढ़ाने वाला पुटपाक पूर्वोक्त तर्पण रोगों में ही बरतना चाहिये ॥ १२ ॥

सवाते स्नेहनः श्लेष्मसहिते लेखनो हितः ॥ १३ ॥
दृग्दौर्बल्येऽनिले पित्ते रक्ते स्वस्थे प्रसादनः।

स०—स च पुटपाको वाते स्नेहनो हितः। कफसहिते मारुते लेखनो हितः। दृष्टिदौर्बल्यादिषु प्रसादनो हितः ॥१३॥

वि०—(यह पुटपाक तीन प्रकार का है, स्नेहन, लेखन और प्रसादन।) इसमें स्नेहन पुटपाक वात रोगों में, लेखन पुटपाक कफ मिश्रित वायु में और प्रसादन पुटपाक दृष्टिदुर्बलता, वात, पित्त, रक्त और स्वस्थ अवस्था में बरतना चाहिये ॥ १३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इदानीमेषां पुटपाकानां कल्पनामाह—

भूशयप्रसहानूपमेदोमज्जवसामिषैः ॥ १४ ॥
स्नेहनं पयसा पिष्टैर्जीवनीयैश्च कल्पयेत् ।

स०—भूशया बिलेशया भेकगोधाद्याः प्रसहा गोखरादयः। अनूपा महामृगवारिचरवारिशयाः तेषां मेदोमज्जावसामिषाणि तैस्तथा जीवनीयैर्जीवन्तीकाकोल्यादिभिश्च क्षीरपिष्टैः स्नेहनं पुटपाकं कल्पयेद्वैद्यः ॥ ४ ॥

स्नेहनपुटपाक की कल्पना—

वि०—बिलेशय (मेढक, गोह आदि), प्रसह (गाय, गधा आदि), आनूप (भैंस, शूकर आदि) इनके मेद मज्जा, वसा और मांस से तथा जीवनीय गण की औषधियों को दुग्ध के साथ पीस कर स्नेहन पुटपाक बनाये ॥ १४ ॥

मृगपक्षियकृन्मांसमुक्तायस्ताम्रसैन्धवैः ॥ १५ ॥
स्रोतोजशङ्खफेनालैर्लेखनं मस्तुकल्कितैः ।

स०मृगा हरिणाद्याः पक्षिणो विष्किरप्रतुदास्तेषां यकृन्मांसानि तैः। तथा मुक्तादिभिर्मस्तुकल्पितैर्लेखनं पुटपाकं कल्पयेद्वैद्यः। प्रसहानां मृगपक्षिणां स्नेहने पुटपाक उपयुक्तत्वाज्जांगला एव मृगपक्षिणोऽत्रग्राह्याः ॥ १५ ॥

लेखन पुटपाक की कल्पना—

वि०—जांगल मृग-पक्षियों के यकृत् और मांस से तथा मुक्ता, लोह, ताम्र, सैन्धव, स्रोतांजन, शंख, समुद्रफेन, हरताल इनको मस्तु के साथ पीसकर कल्क बनाकर लेखन पुटपाक बनाये।

मृगपक्षियकृन्मज्जवसान्त्रहृदयामिषैः ॥ १६ ॥
मधुरैः सघृतैः स्तन्यक्षीरपिष्टैः प्रसादनम् ।

स०—मृगपक्ष्यादीनां यकृन्मज्जावसांत्रहृदयामिषाणि तैः। तथा मधुरैर्मधुरवर्गौक्तैर्घृतान्वितैः स्तन्यक्षीरपिष्टैः प्रसादनं पुटपाकं कल्पयेद्वैद्यः। अत्र स्तन्यं स्त्रिया एव ॥ १६ ॥

प्रसादन पुटपाक की कल्पना—

वि०—मृग-पक्षियों के यकृत्, मज्जा, वसा, आन्त्र, हृदय और मांस से तथा मधुर (काकोल्यादिगण) की ओषधियों के घी के साथ, स्त्री तथा गाय आदि के दूध के साथ पीस कर प्रसादन पुटपाक बनाये ॥ १६ ॥

अधुना पुटपाकस्य कल्पनामाह—

बिल्वमात्रं पृथक् पिण्डं मांसभेषजकल्कयोः ॥ १७ ॥
उरुबूकवटाम्भोजपत्रैः स्नेहादिषु क्रमात् ।
वेष्टयित्वा मृदा लिप्तं धवधन्वनगोमयैः ॥ १८ ॥
पचेत्प्रदीप्तैरग्न्याभं पक्वं निष्पीड्य तद्रसम् ।
नेत्रे तर्पणवद्युञ्ज्यात्—

स०—मांसं च भेषजकल्कश्च तयोः पृथक्। बिल्वफलमात्रं पिंडमेरंडादिपत्रैर्वेष्टयित्वा कृष्णमृत्तिकालिप्तं वृद्धवैद्यव्यवहारात् द्व्यंगुलोत्सेधं मृत्तिकालेपं कृत्वा क्रमेण धवादीधनैः प्रदीप्तैः पचेत्। तत्र स्नेहने पुटपाक एरंडपत्रैर्वेष्टनं धवकाष्ठैः प्रदीपनम्। लेखने वटपत्रैर्वेष्टनं धन्वनकाष्ठैः प्रदीपनम्। प्रसादने जलजपत्रैर्वेष्टनं गोमयेंधनेन प्रदीपनमिति क्रमार्थः। अग्न्याभमिति। अग्निवर्णं सत पक्वं ज्ञात्वाऽपनीतपत्रं विधाय वाससा निष्पीड्य तद्रसं नयने तर्पणमिव युंज्यात् ॥१७–१८॥

वि०—पुटपाक विधि—मांस और औषध के कल्प की अलग-अलग एक-एक पल मात्रा पिण्डरूप में लेकर इसको स्नेहन पुटपाक के लिए एरण्ड के पत्तों से, लेखन अपुटमें बरगद के पत्तों से, प्रसादन पुटपाक में कमल के पत्तों से लपेटे। इसके ऊपर काली मिट्टी का लेप (दो अंगुल मोटा) चढ़ाये। फिर इसे प्रदीप्त धव और धन्वन की लकड़ी तथा जांगल गोमयों से पकाये। जब पिण्ड लाल अंगारे जैसा हो जाये तब निकाल लेवे। निचोड़ कर इसका रस आँखों में तर्पण की भाँति प्रयोग करे ॥ १७-१८ ॥

वक्तव्य—अरुणदत्त का मत है कि स्नेहन पुटपाक में धव से; लेखन में धन्वन और प्रसादन में गोमय से पकाये, परन्तु हेमाद्रि को तथा संग्रह को यह नियम मान्य नहीं है।

—शतं द्वे त्रीणि धारयेत् ॥ १९ ॥

लेखनस्नेहनान्त्येषु—

स०—लेखनादिषु शतादीनि धारयेत्। तत्र लेखने शतं मात्राणां धारयेत्। स्नेहने द्वे शते। अंन्त्ये प्रसादने त्रीणि शतानि धारयेत् ॥ १९ ॥

वि०—लेखन पुटपाक में एकसौ मात्रा, स्नेहन पुटपाक में दो सौ मात्रा एवं प्रसादन पुटपाक में तीन सौ मात्रा तक धारण करना चाहिये ॥ १९ ॥

—कोष्णौ पूर्वौ हिमोऽपरः ।

स०—पूर्वौ स्नेहनलेखनौ कोष्णौ योज्यौ। हिमोऽपरः प्रसादनाख्यः।

वि०—स्नेहन और लेखन पुटपाक को सुहाता हुआ गरम तथा प्रसादन को ठण्डा बरतना चाहिये।

धूमपोऽन्ते तयोरेव योगास्तत्र च तृप्तिवत् ॥ २० ॥
तर्पणं पुटपाकं च नस्यानर्हे न योजयेत् ।
यावन्त्यहानि युञ्जीत द्विस्ततो हितभाग्भवेत् ॥ २१ ॥
मालतीमल्लिकापुष्पैर्बद्धाक्षो निवसेन्निशाम् ।

स०—तयोराद्ययोः पुटपाकयोरंते धूमपः स्यात्। स्नेहेरितकफोपशांत्यै न तु प्रसादनांत इत्येवशब्दार्थः। तत्र तेषु च पुटपाकेषु योगास्तर्पण इव स्युः। तृप्तिवदिति सप्तम्यंताद्वतिः। योगा इति बहुवचननिर्देशात् सम्यग्योगायोगातियोगा गृह्यंते। तर्पणपुटपाकौ नस्यायोग्ये न योजयेत्। नस्यानर्हाः योजयेत्तु नावनमित्याद्युक्ताः। यावन्मात्राणि दिनानि तर्पणपुटपाकौ कुर्वीत तावंत्यहानि ततो द्विगुणानि च दिनानि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हितसेवी स्यात्। कृततर्पणपुटकाको मालत्यादिपुष्पैर्बद्धाक्षः सन् विभावरीं वसेत्। मालती सुमनाः। मल्लिका गंधवार्षिका ॥ २०-२१ ॥

स्नेहन-लेखन पुटपाक के बाद कर्तव्यादि—

वि०—स्नेहन और लेखन पुटपाक के ही पीछे धूमपान करना चाहिये (प्रसादन के बाद नहीं)। पुटपाक में सम्यग् योग, अतियोग और योग के लक्षण तर्पण की भाँति ही समझना चाहिये। नस्य के लिये जो अयोग्य है—उनमें तर्पण और पुटपाक नहीं बरतना चाहिये। जितने दिनों तक तर्पण और पुटपाक को बरते उनसे दुगुने दिनों तक हितसेवी रहे। तर्पण और पुटपाक करके आँखों पर चमेली या मल्लिका के फूल बाँध कर रात्रि में रहे ॥ २०-२१ ॥

सर्वात्मना नेत्रबलाय यत्नं
कुर्वीत नस्याञ्जनतर्पणाद्यैः ।
दृष्टिश्च नष्टा विविधं जगच्च
तमोमयं जायत एकरूपम् ॥ २२ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने तर्पणपुटपाकविधिर्नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

स०—सर्वेण प्रकारेण नेत्रबलाय चक्षुःसामर्थ्याय नस्यादिभिर्यत्नं कुर्यात्। दृष्टिश्चेति चो हेतौ। यतो दृष्टिर्यदि न स्यात्तो जगद्विविधमपि तमोमयमंधकाररूपमेकलक्षणं संपद्यत इति। उपजातिर्वृत्तम् ॥ २२ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां चतुर्विंशोऽध्यायः ॥ २४ ॥

नेत्रबल के लिये नस्यादि की आवश्यकता—

वि०—सम्पूर्ण प्रयत्न से—नस्य, अञ्जन, तर्पण आदि के द्वारा नेत्रों के बल के लिये यत्न करना चाहिये क्योंकि दृष्टि के नष्ट होने से यह नाना प्रकार का जगत् अन्धकारमय एक जैसा हो जाता है ॥ २२ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का तर्पणपुटपाक विधि नामक चौबीसवाँ अध्याय समाप्त हुआ ॥ २४ ॥

पञ्चविंशतितमोऽध्यायः

अथेदानीं पंचविंशाऽध्यायारंभो यंत्रप्रविधानप्रदर्शनार्थः। यतो बस्तिनस्यांजनक्षारादीनि यंत्राश्रयाण्येवेत्याह—

अथातो यन्त्रविधिमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

स०—यंत्रस्य विधिर्यंत्रविधिः। शेषं पूर्ववत्। अर्शोभगंदरादिषु निरुजेंऽगे यम्यते नियम्यते शस्त्रक्षाराग्निकर्मेति यंत्रम्।

वि०—अब इसके आगे यन्त्रविधि अध्याय का व्याख्यान करेंगे-जैसा कि आत्रेय आदि महर्षियों ने कहा था।

एतदेव स्पष्टयन्नाह—

नानाविधानां शल्यानां नानादेशप्रबाधिनाम् ।
आहर्तुमभ्युपायो यस्तद्यन्त्रं यच्च दर्शने ॥ १ ॥
अर्शोभगन्दरादीनां शस्त्रक्षाराग्नियोजने ।
शेषाङ्गपरिरक्षायां तथा बस्त्यादिकर्मणि ॥ २ ॥
घटिकालाबुशृङ्गं च जाम्बवौष्ठादिकानि च ।

स०—अनेकप्रकाराणि यानि शल्यानि शल्यवेणुपाषाणादिरूपाणि विविधेषु शरीरप्रदेशेषु निविशंते तेषामाहरणमाक्रष्टुं योऽभ्युपायस्तद्यंत्रमुच्यत इति शेषः। तथाऽर्शोभगंदरनाडीव्रणादीनां शस्त्रादियोजने सति शेषस्य विरुजांगस्य परिरक्षायां रक्षानिमित्तम्। स्वस्थस्यांऽगस्य शल्यबाधानिवृत्त्यर्थमित्यर्थः। तथा बस्तिनस्यादिकर्मणि य उपायस्तच्च यंत्रम्। तथा घटिकादि च यंत्रं पिचुना रक्ताद्याकर्षणाय च। जांबवोष्ठसंदंशादीनि च यंत्राणि ॥ १-२ ॥

यन्त्रों का स्पष्टीकरण—

वि०—नाना प्रकार के एवं नाना स्थानों को पीड़ित करने वाले शल्यों को बाहर निकालने का जो उपाय (साधन) है उसको यंत्र कहते हैं और जो साधन अर्श, भगन्दर आदि के दर्शन कार्य में उपयुक्त होते हैं तथा शस्त्र, क्षार एवं अग्नि-कर्म में बरते जाते हैं अथवा शस्त्रादिच्छेदन में शेष अंग की रक्षा में तथा बस्ति आदि कर्मों में बरते जाते हैं तथा घटिका, अलातु, सींग, जाम्बवौष्ठ आदि भी यंत्र कहलाते हैं ॥ १-२ ॥

वक्तव्य—उपायविशेष का नाम यंत्र है। जिससे रोग या रोगी यंत्रित-नियंत्रित किया जाता है।

यंत्राणां किं रूपं किं कार्यमित्याह—

अनेकरूपकार्याणि यन्त्राणि विविधान्यतः ॥ ३ ॥
विकल्प्य कल्पयेद् बुद्ध्या यथास्थूलं तु वक्ष्यते ।

स०—रूपाणि च कार्याणि च रूपकार्याणि। अनेकानि विचित्राणि रूपकार्याणि येषां तानि नानाप्रकाराणि। तत्र रूपं कंकमुखस्वस्तिकाद्याकारत्वम्। कार्यमस्थ्यादिलग्नशल्याहरणादिकम्। यतश्चैवं नानाविधत्वं यंत्राणामतस्तानि बुद्ध्या विकल्प्य कार्यानुरोधात्कल्पयेत्। ननु यंत्राणां दिङ्मात्रेऽप्यनभिज्ञः कथमिव कल्पनां कर्तुं पारयेदित्याह—यानि यानि स्थूलानि यथास्थूलम्। यथाऽसादृश्ये इत्यव्ययीभावः। यथास्थूलयंत्रकरणेन व्युत्पन्नमतिः शेषाणामपि यंत्राणामुत्पादने विकल्पं कर्तुं समर्थो भवत्येवेति भावः ॥ ३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रूप एवं कार्य के अनुसार यन्त्रों की अनेकता—

वि०—यन्त्रों की आकृति और कार्य अनेक होने से यंत्र भी अनेक होते हैं, अतः आवश्यकतानुसार अपनी बुद्धि से यन्त्रों की कल्पना कर सकते हैं, किन्तु कुछ मोटे-मोटे (सामान्यतः प्रयोग में आने वाले) यन्त्रों का आगे वर्णन करेंगे ॥ ३ ॥

अथ यंत्राण्याह—

तुल्यानि कङ्कसिंहर्क्षकाकादिमृगपक्षिणाम् ॥ ४ ॥
मुखैर्मुखानि यन्त्राणां कुर्यात्तत्संज्ञकानि च ।
अष्टादशाङ्गुलायामान्यायसानि च भूरिशः ॥ ५ ॥
मसूराकारपर्यन्तैः कण्ठे बद्धानि कीलकैः ।
विद्यात्स्वस्तिकयन्त्राणि मूलेऽङ्कुशनतानि च ॥ ६ ॥
तैर्दृढैरस्थिसंलग्नशल्याहरणमिष्यते ।

स०—येन पार्श्वेन शल्यमुद्ध्रियते तद्यंत्रं मुखं वेधम् । कंकादीनां पक्षिमृगादीनां मुखैस्तुल्यानि यंत्राणां मुखानि कुर्यात् । आदिशब्देन गृध्रहरिणादिपरिग्रहः । त! तत्संज्ञकानि । च एवार्थे । तानि यंत्राणि तन्नामान्येव । यथा कंकमुखं सिंहमुखमित्यादि । स्वस्तिकाख्यानि यंत्राणि विद्यात् । कीदृशानि । अष्टादशांगुलदैर्घ्याणि भूरिशो बाहुल्येनायसानि शस्त्रमयानि । दंतादिमयानामपि क्वचिद्दर्शनाद् भूरिश इत्युक्तम् । तथा कंठप्रदेशे कीलकैर्बद्धानि । कीदृशैः कीलकैः मसूराकाराः पर्यंता येषां तैः । यत्र प्रदेशे यंत्राणां हस्तग्रहस्तत्र तन्मूलम् । तत्रांऽकुशवन्नतानि परिणतानि । तैः कंकमुखादिभिरस्थिसंलग्नशल्यस्य काण्डफलादेराहरणमाकर्षणमिष्यते ॥ ४-६ ॥

स्वस्तिक यन्त्रों के स्वरूप तथा कार्य—

वि०—स्वस्तिक यन्त्र—कंक, सिंह, ऋक्ष (रीछ), काक आदि मृग एवं पक्षियों के मुखों के समान मुख वाले यन्त्रों को उन्हीं (पशु-पक्षी) के नाम से बनाये । इनकी लम्बाई अट्ठारह अङ्गुल और ये प्रायः लोहे के बने होते हैं । कण्ठ प्रदेश पर मसूर के आकार वाली कीलों से जुड़े हुए होते हैं और ये स्वस्तिक यन्त्र, मूल में (पकड़ने के स्थान पर) अंकुश के समान मुड़े होते हैं । इन मजबूत यन्त्रों से अस्थि में लगे हुए शल्य को निकालना चाहिये ॥ ४-६ ॥

कीलबद्धविमुक्ताग्रौ सन्दंशौ षोडशाङ्गुलौ ॥ ७ ॥
त्वक्सिरास्नायुपिशितलग्नशल्यापकर्षणौ ।

स०—कीलेन मसूराकारांतेन बद्धं विमुक्तमग्रं मुखं ययोस्तौ कीलबद्धविमुक्ताग्रौ संदंशौ भवतः । कीदृशौ । षोडशांगुलप्रमाणौ । क उपयोग एतयोः स्यादित्याह । त्वगित्यादि । त्वगादीनां द्वंद्वः । त्वक्शिरास्नायुपिशितलग्नं च तच्छल्यं च तस्याऽपकर्षण आहरणे तावुपयुज्येते ॥ ७ ॥

सन्दंश यन्त्रों के स्वरूप तथा कार्य—

वि०—दो सन्दंश-मसूर के समान कील से जुड़े हुए और आगे खुले हुए और सोलह अङ्गुल लम्बे होते हैं । इसका उपयोग त्वचा, शिरा, स्नायु और मांस में फंसे शल्य को खींचने में होता है ॥ ७ ॥

षडङ्गुलोऽन्यो हरणे सूक्ष्मशल्योपपक्ष्मणाम् ॥ ८ ॥

स०—षोडशांगुलसंदंशादन्यः संदंशः सूक्ष्मशल्यानां नासारोमादीनां हरण आकर्षणे तथोपपक्ष्मणां वर्त्मादिभवानामाहरणे युज्यते ॥ ८ ॥

वि०—दूसरा छः अङ्गुल वाला सन्दंश सूक्ष्म शल्यों को निकालने में तथा पलकों के दूसरे बालों को (जो आंख में पैदा हो जाते हैं) निकालने के काम में आता है' ॥ ८ ॥

मुचुण्डी सूक्ष्मदन्तर्जुर्मूले रुचकभूषणा ।
गम्भीरव्रणमांसानामर्मणः शेषितस्य च ॥ ९ ॥

स०—स च मुचुंडीसंज्ञः । किंभूता मुचुंडी । सूक्ष्मा दंता यस्याः सा सूक्ष्मदंता तथर्जुरवक्रा न च संदंशवद्बद्धा द्विबाहुरित्यर्थः । तथा मूले हस्तग्रहणस्थाने रुचकमंगुलीयकरूपं भूषणं यस्याः सा रुचकभूषणा । रुचकपीडनेन सा कर्म करोतीत्यर्थः । गंभीरश्चासौ व्रणश्च गंभीरव्रणस्तस्मिन् मांसानि तस्याधिमांसमेतद्विषय आहरणे । अर्मणश्च शेषितस्य छिन्नशेषस्याऽऽहरणे मुचुंडी ॥ ९ ॥

मुचुण्डी यन्त्र का स्वरूप तथा कार्य—

वि०—मुचुण्डी (मोचना)-सूक्ष्म दांतों वाला और सीधा होता है । जड़ में पकड़ने के स्थान में एक गोल छल्ले वाला होता है । इसका उपयोग गहरे व्रणों के मांस को निकालने में, अर्म रोग में तथा छिन्न शेष वस्तु को निकालने में है । (हेमाद्रि ने 'शेषितस्य' का अर्थ काटने पर शेष बचा अर्म माना है ।) ॥ ९ ॥

द्वे द्वादशाङ्गुले मत्स्यतालवद् द्व्येकतालके ।
तालयन्त्रे स्मृते कर्णनाडीशल्यापहारिणी ॥ १० ॥

स०—द्वे तालयंत्रे भवतः । किंप्रमाणे द्वादशांगुले । संस्थानमाह । मत्स्यतालवन्मीनगलतालवत् द्वितालके द्वयोः पार्श्वयोर्मत्स्यमुखसदृशमपरमेकतालकमेकपार्श्वे मत्स्यमुखाकारमेवं द्वितीये । ते द्वे तालयंत्रे स्याताम् । कर्णेत्यादि । कर्णना॰ शल्यमपहरतः कर्णनाडीशल्यापहारिणी ॥ १० ॥

तालयन्त्रों के स्वरूप तथा कार्य—

वि०—ताल यन्त्र दो हैं-(१) एक ताल, (२) द्विताल इनकी लम्बाई बारह अङ्गुल होती है । इनमें एक ताल यन्त्र में एक ताल-मछली के गले के समान, छोटे चम्मच के समान दोनों सिरों में होता है । दूसरे में केवल एक सिरे में ताल होता है । इनका उपयोग कर्ण एवं नाड़ी के शल्य को निकालने में होता है ॥ १० ॥

नाडीयन्त्राणि सुषिराण्येकानेकमुखानि च ।
स्रोतोगतानां शल्यानामामयानां च दर्शने ॥ ११ ॥

१. संदंश यन्त्र चार होते हैं (१) सोलह अङ्गुल लम्बा और सिरे पर पकड़ वाला, (२) सोलह अङ्गुल बिना पकड़ का, (३) छः अंङ्गुल पकड़ के साथ और (४) बिना पकड़ के छः अंङ्गुल लम्बा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रियाणां सुकरत्वाय कुर्यादाचूषणाय च।
तद्विस्तारपरीणाहदैर्घ्यं स्रोतोनुरोधतः ॥ १२ ॥

स०—नाडीयंत्राणि बस्तिनेत्रादिवत् सुषिराणि स्युः। एकं चाऽनेकं चैकानेकं मुखं येषां तानि च कानिचिदेकमुखान्येकद्वाराणि कानिचिदनेकमुखान्यनेकद्वाराणि। एतत्कर्माचष्टे। स्रोत इत्यादि। तानि च कर्णादिस्रोतोगतानां शल्यानां दर्शननिमित्तं विदधीत। तथा कंठादिस्रोतोगतानां रोगाणां दर्शने दर्शननिमित्तं विदधीत। तथा क्रियाणां शस्त्रक्षाराग्निप्रक्षालनौषधप्रणिधानादीनां सुकरत्वार्थम्। तथा विषदिग्धांगादीनामाचूषणाय विदधीत। तद्विस्तारेत्यादि। तेषां नाडीयंत्राणां विस्तारश्च परीणाहश्च दैर्ध्यं च तानि स्रोतोवशाद्भवंति। यथाऽनुवासनोत्तरबस्तिनस्यनाडिकादिषु निर्दिष्टम् ॥ ११-१२ ॥

नाडीयन्त्रों के स्वरूप तथा कार्य—

वि०—नाडी यन्त्र बीच से खोखले, एक अथवा अनेक मुख वाले होते हैं। इनका उपयोग स्रोतों में स्थिर शल्य और रोगों को देखने में, क्रियाओं (शस्त्र-क्षार आदि प्रयोग) की सरलता के लिये और आचरण के लिये होता है। इनका विस्तार (चौड़ाई), परिणाह (मोटाई) और लम्बाई स्रोतों के अनुसार होती है ॥ ११-१२ ॥

दशाङ्गुलाऽर्धनाहाऽन्तःकण्ठशल्यावलोकनी।
नाडी—

स०—कंठे शल्यं कंठशल्यम्। कंठाभ्यंतरशल्यावलोकनार्थं दशांगुला नाडयर्धनाहा पंचांगुलपरिणाहा।

कुछ नाडीयन्त्रों के स्वरूप तथा कार्य—

वि०—कण्ठ के अन्दर के शल्य को देखने के लिये नाडी दस अङ्गुल लम्बी और मोटाई में पाँच अङ्गुल होती है।

पञ्चमुखच्छिद्रा चतुष्कर्णस्य सङ्ग्रहे ॥ १३ ॥
वारङ्गस्य द्विकर्णस्य त्रिच्छिद्रा तत्प्रमाणतः।
वारङ्गकर्णसंस्थानानाहदैर्घ्यानुरोधतः ॥ १४ ॥

स०—पंचमुखानि छिद्राणि यस्याः सा चतुष्कर्णस्य वारंगस्य संग्रहे संग्रहणनिमित्तमिदं यंत्रम्। चत्वारः कर्णा यस्य वारंगस्येति समासः। तत्र शरादिदंडप्रवेशः शिखाकारः कीलको वारंग उच्यते। द्विकर्णवारंगस्य संग्रहार्थे त्रिच्छिद्रा नाडी स्यात्। त्रीणि छिद्राणि यस्याः सा त्रिच्छिद्रा। छिद्रशब्दस्योपलक्षणार्थत्वात्त्रिमुखेत्येतदपि द्रष्टव्यम्। तस्य वारंगस्य प्रमाणं तत्प्रमाणं तस्माद्वारंगप्रमाणस्तदनुसारेण नाडीप्रमाणं ज्ञेयम्। वारंगकर्णस्य संस्थानं चाऽऽनाहश्च दैर्घ्यं च तान्येव वारंगकर्णसंस्थानानाहदैर्घ्याणि तेषामनुरोधस्तस्मात् ॥ १३-१४ ॥

वि०—चतुष्कर्ण वारङ्ग (चार फलकों वाली कील) को पकड़ने के लिए मुख में पांच छिद्रों वाली नाड़ी तथा द्विकर्ण-वारङ्ग को पकड़ने के लिये तीन मुखच्छिद्र वाली नाड़ी, वारङ्ग के कर्ण की आकृति लम्बाई और चौड़ाई के अनुसार लम्बी और चौड़ी होती है ॥ १३-१४ ॥

वक्तव्य—वारङ्ग—'शरादिदण्डप्रवेशः शिखाकारः किलको वारङ्ग उच्यते।

नाडीरेवंविधाश्चान्या द्रष्टुं शल्यानि कारयेत्।

स०—एवं प्रकारा अन्या अपि नाडीः शल्यानि शरीरांतर्गतानि द्रष्टुं कारयेत्।

शल्य देखने के लिये अन्य नाडी—

वि०—इसी प्रकार दूसरे भी नाडीयन्त्र शल्यों को देखने के लिये बनाये।

पद्मकर्णिकया मूर्ध्नि सदृशी द्वादशाङ्गुला ॥ १५ ॥
चतुर्थसुषिरा नाडी शल्यनिर्घातनी मता।

स०—मूर्ध्नि मूर्धभागे पद्मकर्णिकया जलजकर्णिकया सदृशी। कियत्प्रमाणा। द्वादशांगुला। तथा चतुर्थश्चतुर्भागः सुषिरो यस्याः। अंगुलसुषिरेति यावत्। सा नाडी शल्यनिर्घातिनी मता। मुनीनामिति शेषः ॥ १५ ॥

शल्यनिर्घातनी नाडी का स्वरूप—

वि०—शल्यनिर्घातनी—शिर पर कमलकर्णिका के समान बारह अङ्गुल लम्बी तथा चौथाई भाग से खोखली नाड़ी को शल्यनिर्घातनी कहा जाता है ॥ १५ ॥

अर्शोयंत्रं दर्शयितुमाह—

अर्शसां गोस्तनाकारं यन्त्रकं चतुरङ्गुलम् ॥ १६ ॥
नाहे पञ्चाङ्गुलं पुंसां प्रमदानां षडङ्गुलम्।
द्विच्छिद्रं दर्शने व्याधेरेकच्छिद्रं तु कर्मणि ॥ १७ ॥
मध्येऽस्य त्र्यङ्गुलं छिद्रमङ्गुष्ठोदरविस्तृतम्।
अर्धाङ्गुलोच्छ्रितोद्वृत्तकर्णिकं च तदूर्ध्वतः ॥ १८ ॥

स०—अर्शसां संबंधि यंत्रकं गोस्तनाकृति चतुरंगुलं मानतो दैर्घ्येण स्यात्। यंत्रकमित्याकारकं स्यात्। नाहे परिणाहे पंचांगुलम्। यत्पंचांगुलदीर्घेण सूत्रेण वेष्ट्यते तत्प्रमाणं स्थौल्यमित्यर्थः। पुंसामेव पंचांगुलं नाहे स्यात्। स्त्रीणां परिणाहे तु षडंगुलं यंत्रकं स्यात्। स्वभावत एव तासां गुदस्य महत्त्वात्। व्याधेर्दर्शने द्विच्छिद्रमुभयपार्श्वे द्विच्छिद्रं यंत्रम्। कर्मणि शस्त्रक्षाराद्यवचारण एकच्छिद्रं यंत्रकम्। अस्य यंत्रस्य मध्ये त्र्यंगुलं छिद्रमंगुष्ठमध्यतुल्यविस्तारं तथा तदूर्ध्वतोऽर्धांगुलोच्छ्रिता उद्धृता कर्णिका यस्य तदेवम् ॥ १६-१८ ॥

अर्शोयन्त्र—

वि०—अर्श यन्त्र—गौ के स्तन के आकार के, चार अङ्गुल लम्बे, मोटाई में पाँच अङ्गुल पुरुषों के लिये और स्त्रियों के लिये छः अङ्गुल होता है। रोग को देखने के लिए दो छिद्रवाला तथा चिकित्साकर्म के लिए एक छिद्रवाला यन्त्र होता है। इस यन्त्र के मध्य में तीन अङ्गुल का एक छेद होता है—यह छेद अङ्गुठे के मध्य भाग के समान विस्तृत होता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

है। इसके ऊपर में आधा अङ्गुल ऊँची उठी हुई कर्णिका होती है ॥ १६-१८ ॥

शम्याख्यं तादृगच्छिद्रं यन्त्रमर्शः प्रपीडनम् ।

स०—शमाख्यं शमीसंज्ञं तृतीयं यंत्रकं तादृग् गोस्तनाकारमित्यादिलक्षणलक्षितयंत्रसदृशं स्यात्। अत्र विशेषमाह। अच्छिद्रमित्यादि। अत्र यंत्रे छिद्रं न विधेयमित्यर्थः। इदं च यंत्रमर्शःप्रपीडनं स्यात्।

शमीयन्त्र—

वि०—शमीयन्त्र—यह यन्त्र अर्शोयन्त्र के समान होता है, परन्तु इसमें छेद नहीं होता। इसका उपयोग अर्श को दबाने में होता है।

सर्वथाऽपनयेदोष्ठं छिद्रादूर्ध्वं भगन्दरे ॥ १९ ॥

स०—सर्वथा भगंदरे भगंदरयंत्रे ओष्ठमपनयेत्। कुतः प्रभृति। छिद्रादूर्ध्वम्। उपरिष्टादर्धांगुलमपकर्षेदित्यर्थः। कर्णिका तु कार्यैव ॥ १९ ॥

भगन्दरयन्त्र—

वि०—भगन्दर यन्त्र में—(अर्शोयन्त्र में ही) छिद्र से ऊपर के भाग में से ओष्ठ को (पार्श्वभाग को) सम्पूर्ण रूप में हटा देना चाहिये ॥ १९ ॥

घ्राणार्बुदार्शसामेकच्छिद्रा नाड्यङ्गुलद्वया ।
प्रदेशिनीपरीणाहा स्याद्भगन्दरयन्त्रवत् ॥ २० ॥

स०—घ्राणार्बुदे घ्राणार्शसि चैकच्छिद्रा नाडी दैर्घ्येणांगुलद्वयप्रमाणा तथा प्रदेशिनीतुल्यः परीणाहो यस्याः सैवम्। सा च भगंदरयंत्रतुल्या स्यात्। अपनीतौष्ठेत्यर्थः ॥ २० ॥

नासायन्त्र—

वि०—घ्राणार्बुद और घ्राणार्श में एक छेद वाली, दो अङ्गुल लम्बी नाड़ी होनी चाहिये। इसकी मोठाई प्रदेशिनी अङ्गुलि के बराबर होनी चाहिये। यह यन्त्र भगन्दर यन्त्र के समान होता है ॥ २० ॥

अङ्गुलित्राणकं दान्तं वार्क्षं वा चतुरङ्गुलम् ।
द्विच्छिद्रं गोस्तनाकारं तद्वक्त्रविवृतौ सुखम् ॥ २१ ॥

स०—अंगुलित्राणकाख्यं यंत्रं दंतमयं काष्ठमयं वा चतुरंगुलप्रमाणमर्शसां यंत्रसदृशं द्विच्छिद्रं गोस्तनाकृति स्यात्। तच्च वक्त्रस्य विवृतौ प्रसारणे। अंगुलैर्दंतेभ्यो रक्षणार्थत्वादंगुलित्राणमिति नाम ॥ २१ ॥

अङ्गुलित्राणयन्त्र—

वि०—अङ्गुलित्राणक यन्त्र—दाँत का या लकड़ी का बना होना चाहिये। इसकी लम्बाई चार अङ्गुल होती है। इसमें दो छेद होते हैं, इसका आकार गाय के स्तन जैसा होता है। इसका उपयोग मुख के खोलने में है। दाँतो से अंगुलि न कटे, उसकी रक्षा हो इसलिये इसका नाम अंगुलित्राण हुआ ॥ २१ ॥

योनिव्रणेक्षणं मध्ये सुषिरं षोडशाङ्गुलम् ।
मुद्राबद्धं चतुर्भित्तमम्भोजमुकुलाननम् ॥ २२ ॥
चतुःशलाकमाक्रान्तं मूले तद्विकसेन्मुखे ।

स०—योनिव्रणमीक्षतेऽनेन तद्योनिव्रणेक्षणं यंत्रकम्। मध्ये मध्यभागे सुषिरम्। तथा दैर्घ्येण षोडशांगुलम्। तथा मुद्रिकयोर्मिकया संचारिण्या बद्धं युक्तम्। तथा चत्वारो भित्ताः पत्राणि यस्य तच्चतुर्भित्तम्। मूले शलाकाक्रमणान्मुखे विकसेत् प्रसरेत् ॥ २२ ॥

योनिव्रणेक्षणयन्त्र—

वि०—योनिव्रणेक्षण यन्त्र बीच में खोखला, सोलह अङ्गुल लम्बा; मुद्रिका से बँधा, चार दीवाल वाला, कमल की कली के मुख के समान आकार का, मूल में चार शलाकायें इस प्रकार से जुड़ी हों, कि दबाने से मुख पर यह खुल जाये ॥ २२ ॥

वक्तव्य—इस यन्त्र की कल्पना में चार टुकड़े ऐसे बनाये जिनका आकार कमल की पंखुड़ी के आकार का हो और छल्ले से चारों को बाँधने पर चारों मिलकर बीच में खोखला और मोटाई में छः अङ्गुल हो। इसमें प्रत्येक खण्ड में चार शलाकाएँ ऐसी बँधी होनी चाहिये कि शलाका मूल के दबाने से यन्त्र का मुख खुल जाये अर्थात् चारों टुकड़े फैल जायें।

यन्त्रे नाडीव्रणाभ्यङ्गक्षालनाय षडङ्गुले ॥ २३ ॥
बस्तियन्त्राकृती मूले मुखेऽङ्गुष्ठकलायखे ।
अग्रतोऽकर्णिके मूले निबद्धमृदुचर्मणी ॥ २४ ॥

स०—यंत्रे द्वे षडंगुले भवतः। किमर्थम्। अभ्यंगश्च क्षालनं चाऽभ्यंगक्षालने तदर्थमुपयुज्येते। आकरणमाकृत्। संपदादित्वात् क्विप्। बस्तियंत्रस्य आकृती आकारौ ययोस्ते बस्तियंत्राकृती वृत्तगोपुच्छाकारे। तथा यथासंख्यं मूले मुखेऽङ्गुष्ठकलायखे मूलेऽङ्गुष्ठतुल्यच्छिद्रे मुखे कलायसमच्छिद्रे। अग्रतोऽकर्णिके कर्णिकारहित इति बस्तियंत्राद्विशेषः। मूले तु कर्णिके द्वेऽपि पुटकयोजनार्हे कार्ये पूर्वेल्यप्रग्रहणम्। मूले मूलदेशे निबद्धं योजितं मृदु चर्म बस्तिपुटकाकारं ययोस्ते निबद्धमृदुचर्मणी ॥ २३-२४ ॥

षडङ्गुल दो यन्त्र—

वि०—दो यन्त्र नाडीव्रण के अभ्यङ्ग के लिये और नाडीव्रण को धोने के लिये होते हैं। इनकी लम्बाई छः अङ्गुल होती है इनका आकार बस्ति यन्त्र के समान, मूल में अङ्गठे के समान और मुख में मटर के समान छिद्र होता है। आगे से कर्णिका रहित और मूल में कोमल, चर्म (बस्तिपुटक) बँधा होता है ॥ २३-२४ ॥

द्विद्वारा नलिका पिच्छनलिका वोदकोदरे ।

स०—उदकोदरे जलस्रावणार्थं नलिका द्विद्वारोभयमुखी स्यात्। अथवा पिच्छनलिका मयूरपिच्छजेत्यर्थः।

नलिका और पिच्छनलिका यन्त्र—

वि०—उदकोदर में जल निकालने के लिये दो मुख वाली नाड़ी बनाये या पंख की नलिका-मोर की पिच्छ की नली बरते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धूमवस्त्यादियन्त्राणि निर्दिष्टानि यथायथम् ॥ २५ ॥

स०—धूमादियंत्राणि यथायथं यथास्वं धूमपानाद्यध्याये-षूक्तानि ॥ २५ ॥

धूमादियन्त्र--

वि०—धूमयन्त्र, बस्ति आदि यन्त्र, धूमपान आदि अध्यायों में कह दिये हैं ॥ २५ ॥

त्र्यङ्गुलास्यं भवेच्छृङ्गं चूषणेऽष्टादशाङ्गुलम् ।
अग्रे सिद्धार्थकच्छिद्रं सुनद्धं चूचुकाकृति ॥ २६ ॥

स०—श्रृंगं त्र्यंगुलमुखं दुष्टवातविषरक्तांबुदुष्टस्तन्यादेश्चूषणे चूषणनिमित्तमष्टादशांगुलं स्यात्। अष्टादशेति द्व्यष्टन इत्यादिनाऽऽकारादेशः। तथाऽग्रे प्रांते सर्पपप्रमाणच्छिद्रम्। यः प्रदेशश्चूषणाय शरीरे योज्यते तदग्रम्। तथा सुष्टु नद्धं सम्यग्बद्धम्। चूचुकस्य स्त्रीकुचाग्रस्याऽऽकृतिराकारो यस्य तदेवम् ॥ २६ ॥

श्रृङ्गयन्त्र--

वि०—रक्त आदि के आचूषण के लिये तीन अङ्गुल मुख वाला सींग होना चाहिये, इसकी लम्बाई अट्ठारह अङ्गुल और सिरे पर सरसों के समान छेद हो, भली प्रकार बँधा हुआ तथा आकार में स्त्री-चूचुक के आकार का होना चाहिये। (वाग्भट) ने संग्रह में बारह अङ्गुल का भी सींग कहा है) ॥ २६ ॥

स्याद् द्वादशाङ्गुलोऽलाबुर्नाहे त्वष्टादशाङ्गुलः ।
चतुस्त्र्यङ्गुलवृत्तास्यो दीप्तोऽन्तः श्लेष्मरक्तहृत् ॥२७॥

स०—अलाबुस्तुंबं द्वादशांगुलो दैर्घ्येण स्यात्। परिणाहेऽष्टादशांगुलः। चत्वारि वा त्रीणि वांगुलानि यस्य तच्चतुस्त्र्यंगुलं तत्तादृशं वृत्तं वर्तुलं मुखं यस्य स एवम्। तथांऽतर्मध्ये दीप्तो ज्वलितः पिचुभूर्जादिगर्भ इत्यर्थः। स ईदृशो दुष्टकफरक्तहरः स्यात् ॥ २७ ॥

अलाबु (तुम्बी) यन्त्र--

वि०—अलाबु (तुम्बी) लम्बाई में बारह अङ्गुल और मोटाई-गोलाई में अट्ठारह अङ्गुल इसके मुख की गोलाई तीन या चार अङ्गुल होनी चाहिये। इसके अन्दर में पिचु-भोजपत्र आदि जलाकर गरम करके लगाये (वायु निकाल कर)। यह कफदूषित रक्त को निकालने में बरता जाता है ॥ २७ ॥

तद्वद्घटी हिता गुल्मविलयोन्नमने च सा ।

स०—तद्वत्तेनाऽलाबुना तुल्यदैर्घ्यानाहादिस्तुल्यकार्याकारा च घटी स्यात्। सा च गुल्मस्य विलय उन्नमने च हिता न केवलं कफरक्तहृदिति चार्थः।

घटीयन्त्र--

वि०—घटीयन्त्र भी अलाबु के समान होता है, यह गुल्म को विलयन करने में तथा ऊपर उठाने में प्रयुक्त होता है।

शलाकाख्यानि यन्त्राणि नानाकर्माकृतीनि च ॥२८॥
यथायोगप्रमाणानि तेषामेषणकर्मणि ।
उभे गण्डूपदमुखे स्रोतोभ्यः शल्यहारिणी ॥२९॥
मसूरदलवक्त्रे द्वे स्यातामष्टनवाङ्गुले ।

स०—शलाकासंज्ञानि यंत्राणि विविधकर्माणि विविधाकाराणि यथायोगप्रमाणानि स्युः। तेषां मध्य उभे गंडूपदतुल्यास्य एषणकर्मणी। तथा स्रोतोभ्यः शल्यहारिणी शलाकायंत्रे भवतः। किंभूते। मसूरेत्यादि। मसूरदलमिव वक्त्रं ययोस्ते मसूरदलमुखे द्वे शलाकेऽष्टांगुले नवांगुले वा स्याताम् ॥ २८-२९ ॥

अनेकविध शलाकायन्त्र--

वि०—शलाकायन्त्र नाना प्रकार के कर्म करने के लिये भिन्न-भिन्न आकार के होते हैं। इनका प्रमाण आवश्यकतानुसार होता है।

इनमें एषण—(ढूँढने के) कार्य के लिये दो शलाकायें केंचुए के मुख के आकार की होती हैं।

स्रोतों से शल्य को निकालने के लिये मसूर की दाल के समान मुख वाली दो, ये आठ या नौ अङ्गुल लम्बी होती हैं ॥ २८-२९ ॥

शङ्कवः षट् उभौ तेषां षोडशद्वादशाङ्गुलौ ॥३०॥
व्यूहनेऽहिफणावक्त्रौ द्वौ दशद्वादशांगुलौ ।
चालने शरपुङ्खास्यौ आहार्ये बडिशाकृती ॥३१॥

स०—शंकवः षट् स्युः। तेषां मध्ये द्वौ षोडशांगुलौ द्वादशांगुलौ वा भवतः। व्यूहने व्यूहनकर्मणि सर्पफणामुखौ। द्वौ शंकू दशांगुलौ द्वादशांगुलौ वा भवतः। चालने कांडवाज इव मुखं ययोस्तौ शरपुंखास्यौ भवतः। आहार्ये आकर्षणे बडिशाकारौ ॥ ३०-३१ ॥

षड्विध शङ्कुयन्त्र—

वि०—शंकु छः हैं। इनमें से दो सोलह अङ्गुल और बारह अङ्गुल के व्यूहन कार्य के लिये साँप के फण-मुख के समान होते हैं। (व्यूहन--ऊर्ध्वीकरण। चूर्णित अश्मरी आदि को इकट्ठा करना-हाराणचन्द्रः। व्यूहनम्-प्रसृतमांसादीनां यथास्थानं विन्यासः। व्रणौष्ठयोः संहतीकरणम्--गणनाथः)। दस अङ्गुल और बारह अङ्गुल के दो शंकु चालन के लिए होते हैं; इनका मुख शरपुंख के समान होता है। (शरपुंख—शरगुणसन्धानस्थान)।

निकालने के लिए बडिश (मछली पकड़ने का काँटा) के आकार के दो शङ्कु होते हैं ॥ ३०-३१ ॥

षट्शंकुव्याख्याय गर्भशंकुमाह—

नतोऽग्रे शङ्कुना तुल्यो गर्भशङ्कुरिति स्मृतः ।
अष्टाङ्गुलायतस्तेन मूढगर्भं हरेत् स्त्रियाः ॥ ३२ ॥

स०—नतोऽग्रेऽग्रतोभागे तथा शंकुना समः कीलकाकारोऽष्टांगुलदीर्घः स गर्भशंकुरिति स्मृतः। मुनिभिरिति शेषः। तेन शंकुना मूढगर्भमनिःसरंतं हरेत् ॥ ३२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गर्भशङ्कु यन्त्र—

वि०—गर्भशङ्कु—आगे से झुका, शंकु के आकार का, आठ अङ्गुल लम्बा गर्भशंकु होता है। इससे स्त्री के मूढ गर्भ को निकाले ॥ ३२ ॥

अश्मर्याहरणं सर्पफणावद्वक्रमग्रतः।

स०—अश्मर्याकर्षणे सर्पफणावदग्रे वक्त्रं स्यात्। सर्पफणाख्यमेवैतद्यंत्रम्।

सर्पफणा यन्त्र—

वि०—पथरी को निकालने के लिये साँप के फण के समान आगे से टेढ़ा एक यन्त्र होता है।[1]

शरपुङ्खमुखं दन्तपातनं चतुरङ्गुलम् ॥ ३३ ॥

स०—शरपुंखमुखाख्यं चतुरंगुलं दंतपातनं स्यात्। अनेन हि दंताश्चलंतः पात्यंते कृम्यादिभक्षिता वा ॥ ३३ ॥

शरपुङ्खमुख यन्त्र—

वि०—शरपुंख के समान एक (शङ्कु) यन्त्र दाँतों को गिराने निकालने के लिये होता है; इसकी लम्बाई चार अङ्गुल होती है ॥ ३३ ॥

कार्पासविहितोष्णीषाः शलाकाः षट् प्रमार्जने।
पायावासन्नदूरार्थे द्वे दशद्वादशाङ्गुले ॥ ३४ ॥
द्वे षटसप्ताङ्गुले घ्राणे, द्वे कर्णेऽष्टनवाङ्गुले।

स०—प्रमार्जने क्षालने क्षारक्लेदादेः षट् शलाकाः स्युः। किंभूताः। कार्पासेन विहितमुष्णीषं शिरोवेष्टनमिव यासां तास्तथोक्ताः। पायावासन्नदूरार्थे दशद्वादशांगुले द्वे भवतः। द्वादशांगुला दूरार्थे आसन्नार्थे दशांगुला इत्यर्थः। घ्राणे षट्सप्तांगुले द्वे भवतः। आसन्नदूरार्थेऽत्राप्यनुवर्तते। तथैव कर्णेऽष्टनवांगुले भवतः ॥ ३४ ॥

षड्विध शलाकाएँ—

वि०—सिर पर रूई लिपटी हुई छः शलाकायें प्रमार्जन शोधन के काम में आती हैं, पायु (गुदा) के प्रमार्जन के लिये दो शलाकायें, इनमें एक शलाका समीप के लिये दस अङ्गुल लम्बी और दूर के लिये—बारह अङ्गुल लम्बी होनी चाहिये। लम्बी और दूर के लिये—बारह अङ्गुल लम्बी होनी चाहिये। नासिका को साफ करने के लिये छः और सात अङ्गुल की दो, कान को साफ करने के लिये आठ एवं नौ अङ्गुल लम्बी दो होती हैं ॥ ३४ ॥

कर्णशोधनमश्वत्थपत्रप्रान्तं स्रुवाननम् ॥ ३५ ॥

स०—कर्णशोधनाख्यं यंत्रमश्वत्थपत्रस्येव प्रांतो यस्य तत्तथा। तथा स्रुवस्येवाननं यस्य तदेवम् ॥ ३५ ॥

वि०—कान का मैल का शोधन करने के लिए पीपल के पत्र के समान प्रान्त-किनारा एवं स्रुवे के आकार के मुख वाला (कर्णशोधन) यन्त्र होता है ॥ ३५ ॥

१. गर्भशङ्कु आदि तीनों भी शङ्कु ही हैं।

शलाकाजाम्बवौष्ठानां क्षारेऽग्नौ च पृथक् त्रयम्।
युञ्ज्यात् स्थूलाणुदीर्घाणाम्—

स०—शलाकाश्च जांबवोष्ठानि च तेषां पृथक् त्रयं क्षारे क्षारपातनेऽग्निदाहकरणे च युंज्यात्। किंभूतानां शलाकाजांबवोष्ठानाम्। स्थूलाश्चाऽणवश्च दीर्घाश्च तेषाम्। तत्र शलाकास्तिस्रो जांबवोष्ठानि च त्रीणि क्षारे तथा दाहने एवं द्वादशैतानि शलाकाख्यानि यंत्राणीति।

क्षाराग्निकर्मयोग्य शलाकायें—

वि०—क्षारपातन और अग्निकर्म के लिये स्थूल, अणु और दीर्घ (बड़ी या मोटी, छोटी या पतली और मझोली) तीन शलाकायें और तीन जाम्बवौष्ठ होते हैं।

वक्तव्य—जाम्बवौष्ठ—यह भी शलाका ही है किन्तु इसका सिरा जामुन की गुठली की भाँति होता है। संग्रह में 'क्षाराग्निकर्मार्थं जाम्बवौष्ठानि द्वादशदशाष्टाङ्गुलानि क्रमाद् द्व्यङ्गुलाङ्गुलार्द्धाङ्गुलफलानि। शलाकाश्च स्थूलसूक्ष्मह्रस्वदीर्घमध्याः॥' संग्रह सू. अ. ३४

—शलाकामन्त्रवर्ध्मनि ॥ ३६ ॥
मध्योर्ध्ववृत्तदण्डां च मूले चार्धेन्दुसन्निभाम्।

स०—अंत्रवर्ध्मन्यंत्रवृद्धौ शलाकां युंज्यात्। कीदृशीम्। मध्यादूर्ध्वं वृत्तो दंडो यस्यास्ताम्। तथा मूले मूलभागेऽर्धेंदुसन्निभामर्धचंद्राकाराम् ॥ ३६ ॥

अन्त्रवर्ध्मोपयोगी शलाका—

वि०—अन्त्रवर्ध्म—अन्त्रवृद्धि में उपयोग के लिये एक शलाका होती है जिसका दण्ड बीच में ऊपर की ओर मुड़ा रहता है एवं मूल (पकड़ने की जगह) में अर्धचन्द्राकृति मुड़ा होता है ॥ ३६ ॥

कोलास्थिदलतुल्यास्या नासार्शोर्बुददाहकृत् ॥ ३७ ॥

स०—बदरास्थिखंडसमं मुखं यस्याः सा कोलास्थिदलतुल्यास्या। सा नासार्शःसु नासार्बुदेषु च दाहं करोति ॥३७॥

नासार्श आदि के उपयोगी शलाका—

वि०—नासार्श और नासार्बुद में दाह करने के लिये—बेर की गुठली के टुकड़े के समान मुखवाली एक शलाका होती है ॥ ३७ ॥

अष्टाङ्गुला निम्नमुखास्तिस्रः क्षारौषधक्रमे।
कनीनीमध्यमानामीनखमानसमैर्मुखैः ॥ ३८ ॥

स०—क्षारौषधक्रमे तिस्रः शलाका निम्नमुखा अष्टांगुलाः स्युः। कीदृश्यः। कनीनी च मध्यमा चाऽनामी च तासां नखास्तेषां प्रमाणं तेन मानेन समैस्तुल्यैर्मुखैरुपलक्षिताः स्युः ॥ ३८ ॥

क्षारौषधोपयोगी शलाका—

वि०—क्षारौषध कार्य के लिये दबे हुए चिपटे मुख वाली, आठ अंगुल लम्बी तीन शलाकायें चाहिये। इनका मुखप्रमाण कनीनिका, मध्यमा और अनामिका अङ्गुलि के नखों

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

के समान होना चाहिये। अर्थात् इनका मुख इनके नखों के बराबर होना चाहिये ॥ ३८ ॥

स्वं स्वमुक्तानि यन्त्राणि मेढ्रशुद्ध्यञ्जनादिषु ।

स०—मेढ्रादिषु विषय उत्तरबस्त्यादिषु स्वंस्वं यथास्वं यंत्राणि गदितानि । आदिशब्देन नावनादिपरिग्रहः ।

मेढ्रशोधनाञ्जनोपयोगी शलाका—

वि०—मेहन की शुद्धि (उत्तरबस्ति), अञ्जन आदि के लिए अपने-अपने यन्त्र पहले कह दिये गये हैं ।

अनुयन्त्राण्ययस्कान्तरज्जुवस्त्राश्ममुद्गराः ॥ ३९ ॥
वध्रान्त्रजिह्वाबालाश्च शाखानखमुखद्विजाः ।
कालः पाकः करः पादो भयं हर्षश्च तत्क्रियाः ॥ ४० ॥
उपायवित्प्रविभजेदालोच्य निपुणं धिया

स०—अयस्कांतादीन्येकोनविंशत्यनुयंत्राणि कल्पयेत् । स्वल्पयंत्रकार्यकरणात् । तेषां क्रियास्तत्क्रिया निर्घातनादिका बुद्ध्या निपुणमालोच्य प्रतिभजेत् । निर्घातनादिकर्माणि प्रविभज्य युंज्यादित्यर्थः ॥ ३९-४० ॥

उन्नीस प्रकार के अनुयन्त्र—

वि०—अनुयन्त्र—अयस्कान्त (चुम्बक), रज्जु, वस्त्र, पत्थर (लोढ़ा), मुद्गर, वध्र (फीता), आँत, जिह्वा, बाल, शाखा, नख, मुख, दाँत, काल, पाक, पैर, भय, हर्ष ये उन्नीस हैं। बुद्धि से भली प्रकार विचारकर उपाय को जानने वाला वैद्य आवश्यकतानुसार इन यन्त्रों की क्रियाओं का निश्चय करें ॥ ३९-४० ॥

तान्येव यंत्राणां कर्माण्याह—

निर्घातनोन्मथनपूरणमार्गशुद्धि-
संव्यूहनाहरणबन्धनपीडनानि ।
आचूषणोन्नमननामनचालभङ्ग-
व्यावर्तनर्जुकरणानि च यन्त्रकर्म ॥ ४१ ॥

स०—निर्घातनादि यंत्रस्य कर्म । निर्घातनं ताडनं परिपातनम् । उन्मथनमुन्मूलनम् एवमन्यदपि चिंत्यम् । चः समुच्चये । तेन प्रक्षालनादीनि समुच्चीयंते ॥ ४१ ॥

वि०—यन्त्र कर्म—निर्घातन (ताडन करके गिराना), उन्मथन, पूरण, मार्ग का शोधन, संव्यूहन (हिलाना-डुलाना), आहरण, बन्धन, पीडन, आचूषण, उन्नमन, नमन, चालन, भङ्ग, व्यावर्त्तन (घुमाना) और ऋजुकरण (सीधा करना)—ये यन्त्रकर्म हैं ॥ ४१ ॥

निवर्तते साध्ववगाहते च
ग्राह्यं गृहीत्वोद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं-
स्थानेषु सर्वेष्वधिकारि यच्च ॥ ४२ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने यन्त्रविधिर्नाम पञ्चविंशतितमोऽध्यायः ॥ २५ ॥

स०—निवर्तनादिभिश्चतुर्भिः कारणैर्यंत्रेषु मध्ये कंकमुखं श्रेष्ठमिति यस्माच्च सर्वेषु प्रदेशेष्वधिकार्यधिक्रियते इति । वसंततिलकोपजाती वृत्ते ॥ ४२ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायां यन्त्रविध्यध्यायः नाम पञ्चविंशोऽध्यायः ॥२५॥

कङ्कमुखयन्त्र की श्रेष्ठता—

वि०—सब यन्त्रों में कङ्कमुख यन्त्र प्रधान है—क्योंकि-कङ्कमुख विवर्त्तन करता है (घूम सकता है), अच्छी प्रकार गहराई तक पहुँचता है, पकड़ने वाली वस्तु को पकड़ कर बाहर कर देता है और सब स्थानों पर यह बरता जा सकता है ॥ ४२ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का यंत्रविधि नामक पचीसवाँ अध्याय समाप्त हुआ ॥ २५ ॥

षड्विंशोऽध्यायः

अथेदानीं षड्विंशोऽध्यायारंभः शस्त्रस्वरूपविज्ञानार्थः ।

अथातः शस्त्रविधिमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

वि०—अब इसके आगे शस्त्रविधि नामक अध्याय का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था ।

षड्विंशतिः सुकुर्मारैर्घटितानि यथाविधि ।
शस्त्राणि रोमवाहीनि बाहुल्येनाङ्गुलानि षट् ॥ १ ॥
सुरूपाणि सुधाराणि सुग्रहाणि च कारयेत् ।
अकरालानि सुध्मातसुतीक्ष्णवर्तितेऽयसि ॥ २ ॥
समाहितमुखाग्राणि नीलाम्भोजच्छवीनि च ।
नामानुगतरूपाणि सदा सन्निहितानि च ॥ ३ ॥
स्वोन्मानार्धचतुर्थांशफलान्येकैकशोऽपि च ।
प्रायो द्वित्राणि युञ्जीत तानि स्थानविशेषतः ॥ ४ ॥

स०—बाहुल्येन शस्त्राणि षडंगुलानि भवंति । तथा षड्विंशतिसंख्यानि । तथा सुकुर्मारैः कर्मकुशलैर्लोहकारैर्यथाविधि सम्यङ्निष्पादितानि तथा रोमवाहीनि लोमशातनसमर्थानि तथा सुरूपाणि शोभनाकाराणि । तथा सुधाराणि शोभनधाराणि । तथा सुखेन गृह्यंते सुखग्रहाणि च कारयेत् । क अयसि । कीदृशे । सुष्ठु ध्मातं सुतीक्ष्णं तथाऽऽवर्तितं च यदयः तीक्ष्णं तस्मिन् । कीदृशानि च शस्त्राणि । अकरालानि सुदर्शनानि । समाहितं सुष्ठु कृतं मुखाग्रं फलं येषां तानि समाहितमुखाग्राणि । तथा नीलोत्पलद्युतीनि । तथा नामानुगतं रूपं येषां तान्यन्वर्थनामानीत्यर्थः । तथा सर्वकाल

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संनिहितानि समीपस्थानि। स्वं च तदुन्मानं च स्वोन्मानमात्मीयं प्रमाणं तस्मात्सकाशादर्धं तस्य चतुर्थांशोऽष्टभागोऽङ्गुलषट्कस्य सप्तमांशद्वयसहितं यवदशकं तत्परिमाणं फलं येषां तान्येवम्। अपि चेति समुच्चये। एवंविधानि शस्त्राण्येकैकशः स्थानविशेषाद्द्वित्राणि प्रयुंजीत। एकैकश इत्येकं बहुव्रीहिवदिति द्विरवसुब्लोपौ। ततः शस्त्रप्रत्ययः॥ १-४॥

छब्बीस प्रकार के शस्त्र—

वि०—शस्त्र छब्बीस प्रकार के होते हैं। यह कुशल कारीगरों द्वारा विधिपूर्वक बनाये हुए, रोम को काटने वाले, प्रायः करके ६ अङ्गुल, देखने में उत्तम रूप वाले, अच्छी धार के, पकड़ने में सुन्दर, देखने में भयानक न हों तथा अच्छी प्रकार फूंके गये (आध्मात), सुतीक्ष्ण तथा आवर्त्तित लोहे से बनाये हुए, अच्छी प्रकार आगे से मुख मिलाने वाले, नीले कमल की-आभा वाले, नाम के अनुकूल रूप वाले और सदा पास में रखे हुए होने चाहिये। अपने परिमाण से अष्टमांश फलक वाले होने चाहिये। इनको अकेले-अकेले पृथक्-पृथक् या दो अथवा तीन को मिलाकर स्थान की भिन्नता (आवश्यकता) के अनुसार बरते॥ १-४॥

(मण्डलाग्रं वृद्धिपत्रमुत्पलाध्यर्द्धधारके।
सर्षपण्यौ वेतसाख्यं शरार्यास्यत्रिकूर्चके॥ १॥
कुशास्यं साटवदनमन्तर्वक्त्रार्धचन्द्रके (कम्)।
व्रीहिमुखं कुठारी च शलाकाङ्गुलिशस्त्रके॥ २॥
बडिशं करत्राख्यं कर्तरी नखशस्त्रकम्।
दण्डलेखनकं सूच्यः कूर्चो नाम खजाह्वयम्॥ ३॥
आरा चतुर्विधाकारा तथा स्यात्कर्णवेधनी (नम्)।
मण्डलाग्रं फले तेषां तर्जन्यन्तर्नखाकृति।
लेखने छेदने योज्यं पोथकीशुण्डिकादिषु॥ ५॥

स०—तेषां शस्त्राणां मध्ये मंडलाग्रं नाम शस्त्रम्। कीदृशम्। फलोद्देशे तर्जन्या अंतर्नखस्तर्जन्यंतर्नखस्तस्येवाकृतिर्यस्य तदेवम्। क्वैतद्योज्यमित्याह। लेखने छेदने पोथक्यादिषु योज्यम्। आदिशब्देन वर्त्मरोगादयो गृह्यन्ते॥५॥

मण्डलाग्र शस्त्र—

वि०—(मण्डलाग्र, वृद्धिपत्र, उत्पल, अध्यर्द्धधारक, सर्पमुख, एषणी, वेतस, शरारिमुख, त्रिकूर्चक, कुशामुख, आटीमुख) अन्तर्वक्त्रार्धचन्द्र, (कुछ लोग अन्तर्वक्त्र और अर्धचन्द्र पृथक्-पृथक् मानते हैं किन्तु दोनों को अलग-अलग मानने से संख्या २७ हो जाती है।) व्रीहिमुख, कुठारी, शलाका, अङ्गुलिशस्त्रक, बडिश, करपत्र, कर्त्तरी, नखशस्त्र, दन्तलेखन, सूची, कूर्च, खज, चार प्रकार की आरा और कर्णवेधन-ये छब्बीस शस्त्र हैं।)

इनमें मण्डलाग्र शस्त्र, तर्जनी के अन्तर्नख के समान आकार के फल वाला होता है और पोथकी, शुण्डिका आदि के लेखन और छेदन में यह बरता जाता है॥ ५॥

वृद्धिपत्रं क्षुराकारं छेदभेदनपाटने।
ऋज्वग्रमुन्नते शोफे गम्भीरे च तदन्यथा॥ ६॥
नताग्रं पृष्ठतो दीर्घह्रस्ववक्त्रं यथाशयम्।

स०—वृद्धिपत्रं नाम शस्त्रं क्षुराकारं स्यात्। तच्च छेदनादिषु योज्यमिति प्रकृतम्। फलपरिमाणं तूक्तमेव। कीदृक्। ऋजु स्पष्टमग्रं यस्य तदृज्वग्रं तदुन्नते शोफे स्यात्। गंभीरे तु शोफे तद्वृद्धिपत्रमन्यथा कथमन्यथेत्याह। नतेत्यादि। पृष्ठदेशे नतमग्रं यस्य तन्नताग्रं भवतीति। उत्पलं चाऽध्यर्धधारं च ते आख्ये ययोस्त उत्पलाध्यर्धधाराख्ये शस्त्रे यथाक्रमं दीर्घह्रस्ववक्त्रे भवतः॥ ६॥

वृद्धिपत्र शस्त्र—

वि०—वृद्धिपत्र—छुरे (उस्तरे) के आकार का होता है और छेदन, भेदन और पाटन कार्य में इसका व्यवहार होता है। उन्नत और गम्भीर शोफ में आगे से सीधा वृद्धिपत्र एवं नीचे तथा कम गहरे शोफ में पीछे से आगे को झुका होना चाहिये तथा स्थान के अनुसार लम्बा या छोटा होना चाहिये॥ ६॥

उत्पलाध्यर्धधाराख्ये भेदने छेदने तथा॥ ७॥

स०—उत्पलपत्रं दीर्घमुखमध्यर्धधारं तु ह्रस्ववक्त्रमित्यर्थः। तच्छेदने तथा भेदने च योज्यम्॥ ७॥

उत्पल और अध्यर्द्धधार शस्त्र—

वि०—उत्पल और अध्यर्धधार नामक शस्त्र भेदन एवं छेदन कार्य में प्रयुक्त होते हैं (अरुणदत्त ने उत्पलपत्र को दीर्घमुख एवं अर्धधार को ह्रस्वमुख कहते हैं)॥ ७॥

सर्पास्यं घ्राणकर्णार्शश्छेदनेऽर्धाङ्गुलं फले।

स०—सर्पवक्त्रं नाम शस्त्रं नामानुगताकारं घ्राणार्शश्छेदने च योज्यम्। तथेति समुच्चये। भेदनेऽपि योज्यम्। तच्च फलेऽर्धांगुलं भवति। एषणी नाम शस्त्रं गतेर्व्रणानामन्वेषणे योज्यम। कीदृशी। श्लक्ष्णा कोमलस्पर्शा। तथा गंडूपदमुखमिव मुखं यस्याः सा गण्डूपदमुखा।

सर्पास्य शस्त्र—

वि०—सर्पवक्त्र—का उपयोग नाक एवं कान के अर्श को काटने में होता है। इसका फलक आधा अङ्गुल होता है।

द्वितीयामेषणीमाह—

गतेरन्वेषणे श्लक्ष्णा गण्डूपदमुखैषणी॥ ८॥

स०—अपरैषणी भेदनार्थे सूचीमुखा स्यात्। मूले निविष्ट कृतं खं छिद्रं यस्याः सा मूलनिविष्टखा।

एषणी शस्त्र—

वि०—एषणी नामक शस्त्र व्रण की गति (मार्ग) को ढूंढने में बरती जाती हैं; यह चिकनी तथा गण्डूपद (केंचुए) के मुख के आकार की होती है॥ ८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भेदनार्थेऽपरा सूचीमुखा मूलनिविष्टखा ।

स०—वेतसं वेतसपत्राकारं शस्त्रं षडंगुलं पूर्वोक्तफलं तच्च व्यधने योज्यम् ।

द्वितीय एषणी शस्त्र—

वि०—दूसरी एषणी—सूई के मुख के समान नोकीली और जड़ में छेद वाली होती है । (इसका उपयोग क्षारसूत्र के प्रवेश के लिए है)

वेतसं व्यधने—

वेतसशस्त्र—

वि०—वेतस (पत्राकार) शस्त्र वेधन में बरता जाता है ।

—स्राव्ये शरार्यास्यत्रिकूर्चके ॥ ६ ॥
कुशाटवदने स्राव्ये द्व्यङ्गुलं स्यात्तयोः फलम् ।

स०—शरारिराटिः पक्षिविशेषः । शरार्यास्यं नाम शस्त्रं त्रिकूर्चके च स्राव्ये योज्यम् । कुशाटा नाम शस्त्रं वदने स्राव्ये योज्यम् । तयोः शरारिकुशाटयोः फलं द्व्यंगुलप्रमाणं स्यात् ॥ ९ ॥

शरार्यास्य, कुशपत्र तथा आटीमुख शस्त्र—

वि०—शरारिमुख और त्रिकूर्चक शस्त्र रक्तादि-स्रावण में (पाछने में) बरते जाते हैं । कुशपत्र और आटीमुख ये दो शस्त्र भी स्रावण-रक्तस्राव में बरते जाते हैं, इनका फल दो अङ्गुल होता है । (शरारि और आटी पक्षियों की जातियाँ हैं ।) ॥ ९ ॥

वक्तव्य—अरुणदत्त ने 'कुशाटा' और 'वदने' का पृथक् पाठ कर शस्त्र का नाम 'कुशाटा' किया है यह उनका प्रमाद है ।

तद्वदन्तर्मुखं तस्य फलमध्यर्धमङ्गुलम् ॥ १० ॥
अर्धचन्द्राननं चैतत्—

स०—अंतर्मुखं नाम शस्त्रं तद्वत्कुशाटातुल्यम् । तस्यांऽतर्मुखस्य फलमध्यर्धमंगुलं स्यात् । तथा कुशाटातुल्यं तदप्यर्धचंद्रास्यसंज्ञंशस्त्रम् ॥ १० ॥

अन्तर्मुखशस्त्र—

वि०—अन्तर्मुख शस्त्र कुशपत्र या आटीमुख के समान होता है । इसका फलक डेढ़ अङ्गुल सीधा और अर्ध चन्द्राकार होता है ॥ १० ॥

—तथाऽध्यर्धाङ्गुलं फले ।
व्रीहिवक्त्रं प्रयोज्यं च तच्छिरोदरयोर्व्यधे ॥ ११ ॥

स०—चः समुच्चये भिन्नक्रमे । व्रीहिवक्त्रमप्यध्यर्धांगुलफलं स्यात । तच्च शिराव्यध उदरव्यधे च योज्यम् ॥ ११ ॥

व्रीहिवक्त्र शस्त्र—

वि०—व्रीहिमुख भी फलक में डेढ़ अङ्गुल होता है । इसका उपयोग शिर एवं उदर के वेधन में होता है ॥ ११ ॥

पृथुः कुठारी गोदन्तसदृशाऽर्धाङ्गुलानना ।
तयोर्ध्वदण्डया विध्येदुपर्यस्थ्नां स्थितां सिराम् ॥१२॥

स०—कुठारी नाम शस्त्रं पृथुर्विस्तीर्णसंस्थानदंडा तथा गोदंतसदृशमर्धांगुलमाननं यस्याः सैवम् । तया कुठारिकयोर्ध्वदंडया सत्या शिरामस्थ्नामुपरि स्थितां विध्येत् ॥१२॥

कुठारी शस्त्र—

वि०—कुठारी—चिपुटी, गाय के दाँत के समान, मुख पर आध अङ्गुल चौड़ी होती है । इसके ऊपरी भाग में दण्ड होना चाहिये उससे पकड़ कर अस्थियों के ऊपर स्थित (अस्थि से आच्छादित ?) सिरा का वेधन करे ॥ १२ ॥

ताम्री शलाका द्विमुखी मुखे कुरुबकाकृतिः ।
लिङ्गनाशं तया विध्येत्—

ताम्रमयी द्विमुखी शलाका—

वि०—ताम्र की बनी शलाखा दो मुख वाली, मुख पर कुरुबक (फूल की कली) के आकार की होती है; इससे लिंगनाश का वेधन करे ।

—कुर्यादंगुलिशस्त्रकम् ॥ १३ ॥
मुद्रिकानिर्गतमुखं फले त्वर्धांगुलायतम् ।
योगतो वृद्धिपत्रेण मण्डलाग्रेण वा समम् ॥ १४ ॥
तत्प्रदेशिन्यग्रपर्वप्रमाणार्पणमुद्रिकम् ।
सूत्रबद्धं गलस्रोतोरोगच्छेदनभेदने ॥ १५ ॥

स०—ताम्रमयी शलाका द्विमुखा स्यात् । स च मुखे कुरुबकाकृतिः रक्तसहचरपुष्पमुकुलाकारा । तया शलाकया लिंगनाशं कफोत्थपटलसंज्ञं विध्येत् । अंगुलिशस्त्रकं कुर्यात् । कीदृशम् । मुद्रिकाया ऊर्मिकाया निर्गतं निष्क्रांतं मुखं यस्य तन्मुद्रिकानिर्गतमुखम् । फले तु तस्मिन्मुखेऽर्धांगुलदीर्घं योगतः संस्थानेन वृद्धिपत्रेण मंडलाग्रेण वा तुल्यम् । कियत्प्रमाणाऽस्य मुद्रिका कार्येत्याह । तत्प्रदेशिन्यग्रेत्यादि । तस्य वैद्यस्य या प्रदेशिनी तस्या यदग्रं पर्व तस्य यत्प्रमाणं तेनार्प्यत इति तत्प्रदेशिन्यग्रपर्वप्रमाणार्पणी मुद्रिका यस्मिंस्तद्भिषक्तर्जन्यग्रपर्वप्रमाणार्पणमुद्रिकम् । तया सूत्रेण बद्धं सूत्रबद्धम् । सूत्रेण बद्ध्वा मणिबंधे योज्यमित्यर्थः । गलस्रोतो रोगाणां छेदने च तद्योज्यम् ॥ १३–१५ ॥

अंगुलिशस्त्र—

वि०—अंगुलिशस्त्र–मुद्रिका (छल्ले) में से मुख निकला तथा फलक आध अङ्गुल बड़ा एवं रूप में मण्डलाग्र अथवा वृद्धिपत्र के समान होना चाहिये । वैद्य की तर्जनी अंगुली के अग्रिम पर्व में पहनने योग्य इसकी मुद्रिका होनी चाहिये । इसको सूत्र (धागे) से बाँध (कर-मणिबन्ध में बाँध) रखे । इसका उपयोग गले के स्रोतों के रोगों के छेदन एवं भेदन में होता है ॥ १५ ॥

ग्रहणे शुण्डिकार्मादेर्बडिशं सुनताननम् ।

स०—बडिशं नाम शस्त्रं शुण्डिकार्मादेर्ग्रहणे योज्यम् । आदिशब्देन पतिजिह्वादेर्ग्रहणम् । कीदृशं तत् । सुनतमङ्कुशवदानतमाननं मुखं यस्य तदेवम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बडिश शस्त्र—

वि०—बडिश शस्त्र—आगे से भली प्रकार झुका (अंकुश के आकार का होता है; इसका उपयोग शुण्डिका; अर्म आदि को पकड़ने में हैं।

छेदेऽस्थ्नां करपत्रं तु खरधारं दशांगुलम् ॥ १६ ॥
विस्तारे द्व्यङ्गुलं सूक्ष्मदन्तं सुत्सरुबन्धनम् ।

स०—करपत्रं नाम शस्त्रं खरधारं तथा दशांगुलं दैर्घ्येण द्व्यङ्गुलं विस्तारेण । सूक्ष्मा दंता यस्य तत्सूक्ष्मदंतम् । तथा । त्सरुर्मुष्टिर्बंधनं ग्रहणम् । शोभने त्सरुबंधने यस्य तत्सरुबंधनम् । अभिधानकोशे यद्यपि त्सरुरसिमुष्टिरित्यभ्यधायि तथाऽपि मुष्टिमात्रस्येहोपलक्षणार्थत्वान्मुष्टावप्युपपन्नमेव ॥ १६ ॥

करपत्र शस्त्र—

वि०—करपत्र—अस्थियों के छेदन में बरता जाता है। इसकी धारा खर (कर्कश) होती है; लम्बाई दस अङ्गुल और चौड़ाई दो अङ्गुल; बारीक दाँतों वाला; उत्तम मुट्ठी से जुड़ा होता है। (इसे लोकभाषा में 'आरी' कहते हैं।) ॥१६॥

स्नायुसूत्रकचच्छेदे कर्तरी कर्तरीनिभा ॥ १७ ॥

स०—कर्तरी नाम शस्त्रं कर्तरीसदृशं स्नाय्वादिच्छेदे योग्यम् ॥ १७ ॥

कर्तरी शस्त्र—

वि०—कर्तरी—स्नायु, सूत्र और बालों को काटने में—कर्तरी (कैंची) के समान कर्तरी होती है ॥ १७ ॥

वक्रर्जुधारं द्विमुखं नखशस्त्रं नवाङ्गुलम् ।
सूक्ष्मशल्योद्धृतिच्छेदभेदप्रच्छानलेखने ॥ १८ ॥

स०—नखशस्त्रं नखच्छेदकं प्रसिद्धम्। तच्च वक्रा ऋजुश्च धारा यस्य तदेवम् । तस्यैकं मुखं वक्रमन्यदृजु स्पष्टम् । तथा नवांगुलं नवांगुलप्रमाणं नतु षडंगुलम् । एतच्च सूक्ष्मशल्यस्य कंटकादेरुद्धरणादौ नखच्छेदने भेदने च योग्यम् ॥१८॥

नख शस्त्र—

वि०—नखशस्त्र—जिसकी एक धारा टेढ़ी और एक धारा सीधी हो ऐसा दो मुखवाला; नौ अङ्गुल लम्बा होता है और काँटे आदि सूक्ष्म शल्य को निकालने में, छेदन, भेदन, प्रच्छान (पाछना) और लेखन में बरता जाता है (एक तरफ टेढ़े मुख का, दूसरी ओर सीधे मुख का) ॥ १८ ॥

अधुना दंतलेखनशस्त्रमाह—

एकधारं चतुष्कोणं प्रबद्धाकृति चैकतः ।
दन्तलेखनकं तेन शोधयेद्दन्तशर्कराम् ॥ १९ ॥

स०—एकधारमेकस्मिन् प्रदेशे तथा चतुष्कोणं तथा एकत एकस्मिन्देशे प्रबद्धा आकृतिर्यस्य तद्दंतलेखनकम् । तेन दंतशर्करां शोधयेत् ॥ १९ ॥

दन्तलेखनशस्त्र—

वि०—दन्तलेखन शस्त्र—एक धार का, चार कोने (पार्श्व) वाला, एक पार्श्व में बढ़ा हुआ होता है। इससे दन्तशर्करा का शोधन करे ॥ १९ ॥

अधुना सूचीशस्त्रमाह—

वृत्ता गूढदृढाः पाशे तिस्रः सूच्योऽत्र सीवने ।

स०—अत्र एषु शस्त्रेषु मध्ये सीवने सीवनविषये तिस्रः सूच्यः स्युः । किंभूताः । वृत्ता वर्तुलाः पाशे गूढास्तथा दृढाः सारत्वात् । आसां च प्रत्येकं संस्थानविशेषेण विशेषोपयोगमाह ।

सूची शंख—

वि०—सूइयाँ—सीने के लिये तीन (ह्रस्व, मध्य और दीर्घ) सूइयाँ; ये गोल एवं धागा डालने के स्थान पर गूढ (गहरी) एवं दृढ होनी चाहिये ।

मांसलानां प्रदेशानां त्र्यस्रा त्र्यङ्गुलमायता ॥ २० ॥
अल्पमांसास्थिसन्धिस्थव्रणानां द्व्यङ्गुलायता ।
व्रीहिवक्त्रा धनुर्वक्त्रा पक्वामाशयमर्मसु ॥ २१ ॥
सा सार्द्धद्व्यङ्गुला—

स०—मांसलानां बहुमांसानां शरीरदेशानां त्र्यस्रा मुखे सूची स्यात् । संग्रहेऽप्यवोचत् । त्र्यस्राग्रेति । त्र्यस्रेति चिंत्यम् । तथा त्र्यंगुलमायता त्र्यंगुलदीर्घेत्यर्थः । वृत्तत्वं दृढपाशत्वं चोक्तमेव सामान्यलक्षणेन । अल्पमांसानां व्रणानां संध्यस्थिसंश्रितानां च द्व्यंगुलमायता दीर्घा । वृत्तमुखत्वं चाऽस्याः सामान्योक्तम् । तृतीयामाह व्रीहीत्यादि । व्रीहिमुखा चापवत् कुटिला । दैर्घ्येण द्वे अंगुले सार्धे स्यात् । सा च पक्वाशय आमाशये मर्मसु च व्रणानां सीवने योज्या ॥२०-२१॥

स्थानविशेष से इनकी विशेषता—

वि०—मांसल प्रदेशों को सीने के लिये तीन पार्श्व वाली और तीन अङ्गुल लम्बी सूई चाहिये।

थोड़े मांस-अस्थि-सन्धि के व्रणों के लिये दो अङ्गुल लम्बी सूई चाहिये।

तीसरी सूई व्रीहि (धान) के समान मुख (नोक) वाली और धनुष के समान झुकी-पक्वाशय, आमाशय और मर्मों में सीने के काम आती है। यह डेढ़ अङ्गुल लम्बी होती है ॥ २०-२१ ॥

अधुना कूर्चं लिलक्षयिषुराह—

सर्ववृत्तास्ताश्चतुरङ्गुलाः ।
कूर्चो वृत्तैकपीठस्थाः सप्ताष्टौ वा सुबन्धनाः ॥ २२ ॥
स योज्यो नीलिकाव्यङ्गकेशशातेषु कुट्टने ।

स०—ताः सूचयः सर्वतो वर्तुला दैर्घ्येण चतुरंगुलाः कूर्च इत्युच्यते । किंभूताः वृत्त एकस्मिन् पीठे संस्थिताः । तथा सप्तसंख्या अष्टौ वा । तथा शोभनं बंधनं यासां ताः । सुबंधनाः । अत एवेदं शस्त्रं सूचीकूर्चसंज्ञमिति । तथा चाऽर्शश्चिकित्सिते जगाद । अर्शोभ्यो जलजाशस्त्रसूचीकूर्चैरित्यादि । स च बद्धसप्ताष्टसूचिकः कूर्चो नीलिकादिषु लेपे कुट्टनविषये च योज्यः । उपलक्षणत्वाच्चाऽस्य श्वित्रेंद्रलुप्तादिष्वपि योज्यः ॥ २२ ॥

कूर्च शस्त्र—

वि०—एक गोल पीठ में लगी हुई सात या आठ सूइयाँ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जिनमें सभी गोल और चार अंगुल लम्बी हों तथा भली प्रकार बँधी हों, इसे कूर्च कहते हैं। यह निलिका व्यङ्ग और इन्द्रलुप्त में कुट्टन (गोदने) के कार्य में उपयोगी है ॥२२॥

अर्धाङ्गुलमुखैर्वृत्तैरष्टाभिः कण्टकैः खजः ॥ २३ ॥
पाणिभ्यां मथ्यमानेन घ्राणात्तेन हरेदसृक् ।

स०—अष्टाभिः कंटकैः खजा उच्यते । कीदृशैः । अर्धांगुलप्रमाणं मुखं येषां तैरर्धांगुलमुखैः । तथा वर्तुलैः । तेन खजेन हस्ताभ्यां विलोड्यमानेन नासिकातोऽस्रं हरेत् ॥ २३ ॥

खज शस्त्र—

वि०—खज—आधे अंगुल लम्बे और गोल-आठ कण्टकों से खज बनता है। हाथों से मथकर इससे नासिका से रक्त निकाला जाता है ॥ २३ ॥

व्यधनं कर्णपालीनां यूथिकामुकुलाननम् ॥ २४ ॥

स०—कर्णपालीनां व्यधने यूथिका नाम शस्त्रं स्यात्। कीदृशी । मुकुलानना ॥ २४ ॥

कर्णव्यधन या यूथिका शस्त्र—

वि०—कर्णपाली का बेधन करने के लिये यूथिका (जूही) की कली के समान मुख वाला कर्णव्यधन शस्त्र होता है। (अरुणदत्त ने इसे यूथिका शस्त्र कहा है) ॥ २४ ॥

आराऽर्धाङ्गुलवृत्तास्या तत्प्रवेशा तथोर्ध्वतः ।
चतुरस्रा तया विध्येच्छोफं पक्वामसंशये ॥ २५ ॥
कर्णपालीं च बहलां—

स०—अर्धांगुलप्रमाणं वृत्तं मुखं यस्याः साऽर्धांगुलवृत्तास्या । तथा स एवार्धांगुलप्रमाणः प्रवेशो यस्याः सा तत्प्रवेशा । तथोर्ध्वत इति । वृत्तार्धांगुलादुपरिष्टात्तथैव चार्धांगुलप्रमाणैव चतुरस्रा स्यात्। सा आरा नाम शस्त्रम् । तया आरया शोफं विध्येत्। कदा पक्वामसंशये किमयं पक्वः शोफ उताम इति संदेहे । बहुलां च कर्णपालीं तया विध्येत् ॥२५॥

आरा शस्त्र—

वि०—आरा—आधे अंगुल गोल मुख का; एवं उतना ही अंश प्रवेश करने योग्य होता है और इसके (आधे अङ्गुल के) ऊपर चौकोर होता है। कच्चे एवं पके शोथ के सन्देह में तथा मोटी कर्णपाली में इससे वेधन करे ॥ २५ ॥

—बहलायाश्च शस्यते ।
सूची त्रिभगसुषिरा त्र्यङ्गुला कर्णवेधनी ॥ २६ ॥

स०—बहुलाया अतिमांसलायाः कर्णपाल्याश्च सूची शस्यते न केवलमारा । कीदृशी सूची । त्रिभागः प्रांतभागात्सुषिरो यस्याः सैवम् । तथा त्र्यंगुलादैर्घ्येण । सा च कर्णवेधनी स्यात् ॥ २६ ॥

कर्णवेधनी सूची शस्त्र—

वि०—बहल (मोटी) कर्णपाली के वेधन में कर्णवेधनी सूई उत्तम है। यह सूई ⅓ भाग खोखली एवं तीन अंगुल लम्बी होनी चाहिये ॥ २६ ॥

जलौकःक्षारदहनकाचोपलनखादयः ।
अलौहान्यनुशस्त्राणि, तान्येवं च विकल्पयेत् ॥ २७ ॥
अपराण्यपि यन्त्रादीन्युपयोगं च यौगिकम् ।

स०—जलौकःप्रभृतीन्यनुशस्त्राणि रक्तस्रावादिकार्यकरणात् । तानि चाऽलौहानि लोहवर्जितानि । आदिशब्देनायस्कांतशाकशेफालिकापत्रादीनां ग्रहणम् । एवंचोक्तेन न्यायेनाऽन्यान्यपि यंत्रादीनि विकल्पयेत् । आदिशब्देन शस्त्राणां ग्रहणम् । उपयोगं च यौगिकं साधुतरं बुद्ध्या निरूपयेत् ॥ २७ ॥

जलौका आदि अनुशस्त्र—

वि०—जोंक, क्षार, अग्नि, काच, पत्थर, नख आदि (शेफालिका आदि के पत्र); और लोहरहित अन्य वस्तुएँ अनुशस्त्र हैं। उनको तथा इसी प्रकार दूसरे यन्त्र शस्त्रों की आवश्यकतानुसार कल्पना कर बुद्धिपूर्वक उत्तम रूप में व्यवहार करे ॥ २७ ॥

उत्पाट्यपाट्यसीव्यैष्यलेख्यप्रच्छानकुट्टनम् ॥ २८ ॥
छेद्यं भेद्यं व्यधो मन्थो ग्रहो दाहश्च तत्क्रियाः ।

स०—उत्पाटादीनि तत्क्रियास्तेषां षड्विंशतिशस्त्राणां क्रियाः कर्माणि तत्क्रियाः । तानि षड्विंशतिशस्त्राणि संग्रहोक्तानि । तद्यथा । दंतलेखनमंडलाग्रवृद्धिपत्रोत्खरशरारिमुखत्रिकूर्चकुठारिकाव्रीहिमुखशलाकावेतसपत्रारार्कर्णव्यधनसूचीकूर्चखजैषणीबडिशनखशस्त्राणीति । उत्पाट्यमूर्ध्वनयनं तत्र नखशस्त्रं योज्यम् । पाटने वृद्धिपत्रादि । सेवने सूच्यः । लेखने मंडलाग्रादिः । कुट्टने कूर्चः । छेदने करपत्रादि । भेदने एषणी सूचीमुखा । व्यधने वेतसादि । मंथने खजः । ग्रहे संदंशः । दाहे शलाकादिरिति ॥ २८ ॥

उक्त शस्त्रों के कार्य—

वि०—शस्त्रकार्य—उत्पाटन (उखाड़ना), पाटन (फाड़ना), सीना, एषण, लेखन, पाछना, कुट्टन, छेदन, भेदन, बेधन, मन्थन, पकड़ना तथा जलाना ये सब शस्त्रों के कार्य हैं ॥२८॥

शस्त्रदोषानाह—

कुण्ठखण्डतनुस्थूलह्रस्वदीर्घत्ववक्रताः ॥ २९ ॥
शस्त्राणां खरधारत्वमष्टौ दोषा प्रकीर्तिताः ।

स०—स्पष्टम् ॥ २९ ॥

शस्त्रों के दोष—

वि०—शस्त्रदोष—कुण्ठित होना; टूटा होना, पतला, छोटा या लम्बा होना, टेढ़ा होना और धार का खुरदरा होना—ये आठ दोष शस्त्रों के हैं ॥ २९ ॥

अधुना शस्त्राणां ग्रहणविधिं दर्शयति—

छेदभेदनलेख्यार्थं शस्त्रं वृन्तफलान्तरे ॥ ३० ॥
तर्जनीमध्यमाङ्गुष्ठैर्गृह्णीयात्सुसमाहितः ।
विस्रावणानि वृन्ताग्रे तर्जन्यङ्गुष्ठकेन च ॥ ३१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तलप्रच्छन्नवृन्ताग्रं ग्राह्यं व्रीहिमुखं मुखे।
मूलेष्वाहरणार्थानि क्रियासौकर्यतोऽपरम् ॥ ३२ ॥

स०—छेदभेदनलेख्यार्थं तर्जनीमध्यमांगुष्ठैर्मीलितैः शस्त्रं वृंतफलांतरे वृंतफलमध्यभागे गृह्णीयात्। कीदृक्। सुसमाहितस्तद्गतमनाः। विस्रावणकार्याणि शरार्यास्यादीनि शस्त्राणि वृंताग्रे तर्जन्यंगुष्ठाभ्यां गृह्णीयात्। गृह्णीयादित्यनुवर्तते। तलशब्देन पाणितलमुच्यते। आदिलोपाख्यया तन्त्रयुक्त्या। तलेन प्रच्छन्नं वृंतमग्रं यस्य तद्व्रीहिमुखं मुखे गृह्णीयात्। शेषं शस्त्रं क्रियासौकर्यतो गृह्णीयात्। सुकरस्य भावः सौकर्यम्। यथा सुकरा पाटनादिका क्रिया स्यात्तथा गृह्णीतेत्यर्थः ॥ ३०-३२ ॥

शस्त्रों के पकड़ने की विधि—

वि०—छेदन-भेदन तथा लेखन कार्य में शस्त्र को फलक और बेंठ (हस्ते) के बीच में से तर्जनी, मध्यमा और अङ्गुष्ठ द्वारा सावधानीपूर्वक पकड़ना चाहिये। विस्रावण शस्त्रों को तर्जनी और अंगूठे से वृन्त (बेंट) के अग्रभाग से पकड़े। हथेली से वृन्त के अगले भाग को ढाँप कर व्रीहिमुख को मुख पर से पकड़े। आहरण के लिये शस्त्रों को जड़ से पकड़े। दूसरे शस्त्रों को चिकित्सा की सरलता के लिये जहाँ सुभीता हो, वहाँ से पकड़े ॥ ३०-३२ ॥

शस्त्रकोशमाचष्टे—

स्यान्नवाङ्गुलविस्तारः सुघनो द्वादशाङ्गुल।
क्षौमपत्रोर्णकौशेयदुकूलमृदुचर्मजः ॥ ३३ ॥
विन्यस्तपाशः सुस्यूतः सान्तरोर्णास्थशस्त्रकः।
शलाकापिहितास्यश्च शस्त्रकोशः सुसञ्चयः ॥ ३४ ॥

स०—नवांगुलविस्तारः शस्त्रकोशः स्यात्। तथा सुष्ठु घनो निबिडः। तथा द्वादशांगुलप्रमाणो दैर्घ्येण। तथा तथा क्षौमादिजः। विन्यस्तः कृतः पाशो यस्य स विन्यस्तपाशः। तथा सुष्ठु स्यूतः। तथा सांतराणि सव्यवधानान्यूर्णास्थानि शस्त्राणि यस्मिन् स सांतरोर्णास्थशस्त्रकः। तथा शलाकया पिहितं स्थगितमास्यं यस्य स एवम्। तथा शोभनः संचयो यस्य शस्त्रकोशस्य स सुसंचयः। नापितभांडिकावत्। तंत्रांतरे चोक्तम्। निशानी तु शस्त्राणां सूक्ता शिलैका माषमुद्गप्रभेत्यादि ॥ ३३-३४ ॥

शस्त्रकोश—

वि—शस्त्रकोष—नौ अंगुल चौड़ा, अच्छा मजबूत; बारह अङ्गुल लम्बा, क्षौम, पत्र, ऊन, कौशेय (रेशम), दुकूल (वस्त्र) एवं कोमल चमड़े से बना, जिसमें बंधन के लिए डोरा डाला हो; भली प्रकार सिया हुआ; पर्याप्त अन्तर में ऊन का स्तर लगाकर शस्त्र रक्खे हुए; शलाका से मुख बन्द किया जा सके ऐसा उत्तम संचय वाला, शस्त्रकोश उत्तम है ॥ ३३-३४ ॥

सुकुमारबालानामस्रविस्रावणार्थं जलौकसो निर्दिदिक्षुराह—

जलौकसस्तु सुखिनां रक्तस्रावाय योजयेत्।

स०—सुखिनां सुखोचितानां रक्तस्रावणार्थं जलौकसो योजयेत्। ताश्च द्विप्रकाराः। सविषा निर्विषाश्च। तत्र सविषाणां सापायत्वात्ता एव तावल्लक्षयति।

जोंक का प्रयोग—

वि०—सुखी—सुकुमार प्रकृतिवाले लोगों में रक्तस्राव के लिये जोंक का प्रयोग करे।

दुष्टाम्बुमत्स्यभेकाहिशवकोथमलोद्भवाः ॥ ३५ ॥
रक्ताः श्वेता भृशं कृष्णाश्चपलाः स्थूलपिच्छिलाः।
इन्द्रायुधविचित्रोर्ध्वराजयो रोमशाश्च ताः ॥ ३६ ॥

सविषा वर्जयेत्—

स०—दुष्टांबूद्भवाश्च जलौकसः सविषा इति वर्जयेत्। तथा मत्स्यभेकसर्पादिशवकोथोद्भवास्तथा तेषामेव मत्स्यादीनां ये मलमूत्रपुरीषादयस्तदुद्भवाश्च सविषा इति वर्जयेत्। सविषाणां लक्षणमाह। रक्ता इत्यादि। यावल्लोमशांतास्ताः सविषा यतस्ता वर्जयेत्ता न योजयेत् ॥ ३५-३६ ॥

सविष जोंकों के लक्षण तथा उनका निषेध—

वि०—सविष जोंक—दूषित जल, मछली, मेंढक और साँप के शवों के सड़ने से एवं उनके मल से उत्पन्न, लाल, श्वेत, अतिकाली, चंचल, स्थूल, पिच्छिल, इन्द्रधनुष के समान विचित्र ऊपर की ओर रेखा वाली और लोम युक्त जलौकायें विषैली होती हैं—इनका उपयोग नहीं करना चाहिये ॥ ३५-३६ ॥

—ताभिः कण्डूपाकज्वरभ्रमाः।
विषपित्तास्रनुत्कार्यं तत्र—

स०—ताभिर्हि योजिताभिः कंड्वादयः स्युः। उपलक्षणं चेदम्। दाहशोषमूर्च्छादयोऽपि स्युः। तासु मोहाद्योजितासु विषादिजित् कार्यम्।

सविष जोंक के प्रयोग से हानि तथा चिकित्सा—

वि०—इनके कारण कण्डू, पाक, ज्वर और भ्रम होता है। इनके लिये विषनाशक, रक्तपित्तनाशक चिकित्सा करे।

—शुद्धाम्बुजाः पुनः ॥ ३७ ॥
निर्विषाः शैवलश्यावा वृत्ता नीलोर्ध्वराजयः।
कषायपृष्ठास्तन्वङ्ग्यः किञ्चित्पीतोदराश्च याः ॥ ३८ ॥

स०—जलौकस इति वर्तते। शुद्धजलोद्भवाः सौगंधिकोत्पलकमलविपुलसलिलशैवालजा जलौकसो निर्विषाः स्युः। आसां च लक्षणमाह। शैवलेत्यादि। शैवलमिव श्यावास्तथा वृत्तास्तथा नीलोर्ध्वराजयस्तथा कषायं न्यग्रोधादिवल्कलसदृशवर्णं पृष्ठं यासां ता एवम्। तथा तनुशरीराः किंचित्पीतवर्णजठराश्च निर्विषा वेद्याः ॥ ३७-३८ ॥

निर्विष जोंकों के लक्षण—

वि०—शुद्ध जल में उत्पन्न शैवाल के समान श्यामवर्ण, गोल, नीली ऊर्ध्व रेखा वाली, कपिश रङ्ग की पीठवाली, कोमल अङ्गों की तथा कुछ पीले उदरवाली जलौका निर्विष हैं ॥ ३७-३८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ता अप्यसम्यग्वमनात् प्रततं च निपातनात् ।
सीदन्तीः सलिलं प्राप्य रक्तमत्ता इति त्यजेत् ॥ ३९ ॥

स०—सुनिर्विषा अपि जलौकसो रक्तमत्ता इति त्यजेत्। न केवलं सविषा इति प्रतिपादनार्थोऽपि शब्दः। रक्तमत्तत्वे हेतुद्वयमाह। असम्यग्वमनात्। दुष्टरक्तस्येति शेषः। प्रततं च लागनाद् दुष्टरक्तापायित्वेन रक्तमताश्च ताः स्युः। ताश्च कथं लक्ष्यंत इत्याह। सीदंतीरित्यादि। जलं प्राप्य तोयपूर्णभांडमासाद्य सीदंतीस्तथाऽचेष्टमाना इति ज्ञात्वा त्यजेत् ॥३९॥

निर्विषों में भी त्याज्य जोंक—

वि०—ये निर्विष जोंक भी ठीक प्रकार वमन न करने से, और निरन्तर लगाते रहने से, जल में पड़कर शिथिल हो जायं तो रक्त से मत्त हुई समझकर इनको छोड़ दे ॥ ३९ ॥

अथेतरा निशाकल्कयुक्तेऽम्भसि परिप्लुताः ।
अवन्तिसोमे तक्रे वा पुनश्चाश्वासिता जले ॥ ४० ॥
लागयेद्घृतमृत्स्तन्यरक्तशस्त्रनिपातनैः ।
पिबन्तीरुन्नतस्कन्धाश्छादयेन्मृदुवाससा ॥ ४१ ॥

स०—अथ परीक्षातोऽनंतरमितरा लागयेत्। किंभूताः। हरिद्राकल्कयुक्तजले परिप्लुताः कांजिके तक्रे वा परिप्लुताः पुनश्च जले समाश्वासिताः सात्म्यभूते जले प्लवनार्हाः सोत्साहाः सतीर्योजयेत्। अलगंतीः कथं लागयेदित्याह। घृतेत्यादि घृतादिपातनैस्ता योजयेत्। पातनशब्दः प्रत्येकं योज्यः। शस्त्रेणांऽगे रक्तं मोक्षयित्वा वा ता योजयेत्। ताश्च पिबंतीः सूक्ष्मवाससाऽऽच्छादयेत्। एवं हि तासां मक्षिकाद्यनुपद्रवात् सम्यग्योजना स्यात्। अथ किमेताः पिबंत्युत नेति कथं ज्ञायत इत्यत्र विशेषणद्वारेण हेतुमाह। उन्नतस्कंधा इति। उन्नतः स्कंधो यासां ता एवम्। उन्नतस्कंधत्वेन तासां पानं ज्ञायत इत्यर्थः ॥ ४०-४१ ॥

जोंक लगाने की बिधि—

वि०—परीक्षा के उपरान्त दूसरी (निर्दुष्ट) जोंक लगाये। इसके लिये जोंक को हल्दीकल्क घुले पानी में, कांजी में या तक्र में डुबोकर (रखकर) फिर शुद्ध जल में सान्त्वना देकर स्थान पर लगाये। यदि न लगे तब घी, मिट्टी, दूध, रक्त, एवं शस्त्र पाछकर लगा दे। जब वह कन्धों को ऊँचा करके रक्त पी रही हो उस समय उसे कोमल वस्त्र से ढाँप देवे ॥ ४०-४१ ॥

ननु शुद्धरक्तदुष्टरक्तयोरेकलोलीभूतत्वाच्छुद्धरक्तधात्वाकर्षणाज्जलौका दोषाय स्यादित्यत आह—

सम्पृक्ताद् दुष्टशुद्धास्राज्जलौका दुष्टशोणितम् ।
आदत्ते प्रथमं हंसः क्षीरं क्षीरोदकादिव ॥ ४२ ॥
(गुल्मार्शोविद्रधीन् कुष्ठवातरक्तगलामयान् ।
नेत्ररुग्विषवीसर्पान् शमयन्ति जलौकसः ॥ १ ॥)

स०—दुष्टशुद्धास्रान्मिलितादपि दुष्टरक्तं जलौकाः पूर्वमादत्ते न शुद्धं देहधातुस्थमिति दृष्टांतेन दर्शयति। हंस इत्यादि। हंसो यथा क्षीरजलान्मिश्रितात्प्राग्दुग्धमादत्ते न तु जलं तथा जलौकाः प्रागशुद्धं रक्तमादत्ते पश्चादितरदिति न्याय्यमेतत् ॥ ४२ ॥

जोंक द्वारा दूषित रक्त का पहले ग्रहण—

वि०—जिस प्रकार दूध मिले जल में से हंस दूध को अलग कर लेता है; उसी प्रकार दूषित और शुद्ध रक्त के मिश्रण में से जोंक पहले दूषित रक्त को ग्रहण करती है ॥४२॥

[गुल्म, अर्श, विद्रधि, कुष्ठ, वातरक्त गलरोग, नेत्ररोग, विष एवं विसर्प रोग जोंक से अच्छे होते हैं ॥ ४२ ॥]

दंशस्य तोदे कण्ड्वां वा मोक्षयेद् वामयेच्च ताम् ।
पटुतैलाक्तवदनां श्लक्ष्णकण्डनरूषिताम् ॥ ४३ ॥

स०—दंशस्य तोदे सति कंड्वां वा सत्यां मोक्षयेत्। शुद्धरक्तरक्षार्थमतियोगभयाच्च। तामित्येकवचननिर्देशादेकैकां मोक्षयेन्न तु सर्वाः सकृदेवेति गमयति। अथ पानलौल्याद्दंशं न त्यजेत्ततो हरिद्राचूर्णं लवणचूर्णं वा आनने दत्वा मोक्षयेत्। मोक्षितां च जलौकसं वामयेत्। वमनविधानमाह—सैंधवयुतेन तैलेन रूक्षितास्यां तथा सूक्ष्मेण तंडुलकंडनेन रूक्षितामवकीर्णां वामयेत्। तंडुलशब्दस्याऽत्र लोपो ज्ञेयस्तंत्रयुक्त्या ॥ ४३ ॥

जोंक का छुड़ाना और वमन कराना—

वि०—दंश में चुभने की दर्द या कण्डू होने पर इनको अलग कर ले। उतारने पर इसको वमन कराये। इसके लिये नमक और तैल से मुख को मले। तथा चावल की भूसी या कने से इसको रगड़े। [कण्डनम्-तुषः; रूषिताम्-चर्चिताम्] ॥ ४३ ॥

वक्तव्य—यदि जोंक स्वयं न उतरे तो उसके मुख पर नमक पानी छोड़ देवे। खींचकर न उतारे।

रक्षन् रक्तमदाद् भूयः सप्ताहं ता न पातयेत् ।

स०—ताः कृतवमना जलौकसो रक्तमदाद्रक्षन् पुनः सप्ताहं न योजयेत्।

रक्तपान के बाद पुनः रक्तपान का निषेध—

वि०—वमन कराके रक्तमद से रक्षा करने के लिये इसको सात दिन तक न लगाये।

पूर्ववत् पटुता दार्ढ्यं सम्यग्वान्ते जलौकसाम् ॥ ४४ ॥

स०—जलौकसां सम्यग्वांते सति पूर्ववदलगितानामिव पटुतादि भवति ॥ ४४ ॥

जोंक को सम्यग्वमन कराने से लाभ—

वि०—भली प्रकार वमन होने पर जोंक में पहले की भाँति चंचलता और दृढ़ता आ जाती है ॥ ४४ ॥

क्लमोऽतियोगान्मृत्युर्वा दुर्वान्ते स्तब्धता मदः ।

स०—अतियोगाद्वमनस्य क्लमो मृत्युर्वास्यात्। दुर्वांते सति स्तब्धता मदश्च स्यात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतिवमनादि से जोंक को क्षति—

वि०—वमन के अतियोग से थकान या मृत्यु होती है। भली प्रकार वमन न होने से जड़ता या मद होता है।

अन्यत्रान्यत्र ताः स्थाप्या घटेमृत्स्नाम्बुगर्भिणि ॥ ४५ ॥
लालादिकोथनाशार्थं सविषाः स्युस्तदन्वयात् ।

स०—ताश्चाऽन्यस्मिन्नन्यस्मिन्घटे त्र्यहात्पंचाहाद्वा स्थाप्याः। किंभूते। मृत्स्नापृक्तेन जलेन गर्भिणि तद्युक्त इत्यर्थः। प्रशस्ता मृन्मृत्स्ना। सस्नौ प्रशंसायामिति स्नप्रत्ययः। अनेकभाजनस्थापने कोऽर्थ इत्याह। लालादिकोथनाशार्थम्। आदिशब्देन मूत्रपुरीषादिपरिग्रहः। लालादीनां जलौकसा संबंधः। कोथः कुथितत्वं क्लिन्नता तन्नाशाय। तदन्वयाल्लालादियोगात्ताः सविषाः स्युः ॥ ४५ ॥

जोंकों के अलग २ पालन का विधान—

वि०—पालनविधि—लाला-मूत्र-मल की सड़न से बचाने के लिये इनको (सातवें या पाँचवे दिन) उत्तम मिट्टी युक्त जल वाले घड़ों में बदलते रहना चाहिए। क्योंकि लाला आदि के मिलने से ये विषैली हो जाती हैं ॥ ४५ ॥

अशुद्धौ स्रावयेद्दंशान् हरिद्रागुडमाक्षिकैः ॥ ४६ ॥
शतधौताज्यपिचवस्ततो लेपाश्च शीतलाः

स०—अशुद्धावशुद्धलिंगानुमिते रक्ते सति दंशान् हरिद्रादिभिः स्रावयेत्। अनंतरं शतधौतघृतसंपृक्ताः पिचवो योज्या इति शेषः। शतशब्दोऽनेकपर्यायो बहुकृत्वो धौतेत्यर्थः। तथा शिशिरा लेपा यष्टीचंदनोशीरादयो योज्याः। दंशस्थितचलितरक्तप्रसादनायेति भावः ॥ ४६ ॥

अशुद्ध रक्त निकलने पर कर्तव्य—

वि०—(जलौका प्रयोग के बाद भी) अशुद्ध रक्त की सम्भावना होने पर हल्दी, गुड़ और मधु के दंश को स्रावित करे। बाद में शतधौत घृत में मिलाये पिचु लगाये। और (मुलहठी, चन्दन, खस आदि) शीतल वस्तुओं का लेप करे ॥ ४६ ॥

दुष्टरक्तापगमनात्सद्यो रागरुजां शमः ॥ ४७ ॥

स०—दुष्टरक्तस्याऽपगमान्निःसरणात्सद्यो रागरुजादिशमः स्यात्। उपलक्षणं चेदम्। श्वयथुशैथिल्यदाहशमोऽपि भवत्येव ॥ ४७ ॥

दुष्टरक्त निकलने से लाभ—

वि०—दूषित रक्त के निकलने से रक्तिमा और वेदना तुरन्त शान्त हो जाती है ॥ ४७ ॥

अशुद्ध चलितं स्थानात्स्थितं रक्तं व्रणाशये।
व्यम्लीभवेत्पर्युषितं तस्मात्तत्स्रावयेत्पुनः ॥ ४८ ॥

स०—अशुद्धं रक्तं स्वाशयाच्चलितं व्रणस्थाने स्थितं पर्युषितं तद्व्यम्लीभवेद्यतस्तस्मात्तद्रक्तंभूयः स्रावयेत ॥ ४८ ॥

शेष अशुद्ध रक्त को पुनः निकालना आवश्यक—

वि०—अपने स्थान से चलायमान हुआ अशुद्ध रक्त व्रणस्थान में रुकने से पर्युषित होने पर विदग्ध हो जाता है। इसलिये (अगले दिन) पुनः इसको निकाले ॥ ४८ ॥

युञ्ज्यान्नालाबुघटिका रक्ते पित्तेन दूषिते।
तासामनलसंयोगात्, युञ्ज्यात्तु कफवायुना ॥ ४९ ॥

स०—रक्ते पित्तेन दूषिते सत्यलाबुघटिका न लागयेत्। तासामलाबूनां घटिकानां चाऽग्निसंयोगात्पित्तरक्तकोपोत्पत्तेरिति भावः। तास्तु कफवायुना दुष्टेऽसृजि युंज्यात् ॥४९॥

दूषित रक्त में अलाबु घटी शस्त्र का निषेध तथा प्रयोग—

वि०—पित्त से दूषित रक्त में अलाबु या घटीयन्त्र नहीं बरतना चाहिये क्योंकि इनमें अग्नि का सम्बन्ध होता है किन्तु कफ और वायु से दूषित रक्त में तुम्बी या घटीयन्त्र बरते ॥ ४९ ॥

कफेन दुष्टं रुधिरं न शृङ्गेण विनिर्हरेत्।
स्कन्नत्वाद्, वातपित्ताभ्यां दुष्टं शृङ्गेण निर्हरेत् ॥ ५० ॥

स०—कफेन दुष्टं रक्तं सत् शृंगैर्नाकर्षेत्। स्कन्नत्वास्त्यानत्वाद्धेतोः। शृंगस्य चाऽग्निसंयोगाभावेन कफविलयने सामर्थ्याभावात्। वातपित्ताभ्यां तु दुष्टं रुधिरं शृंगेण निर्हरेत् ॥ ५० ॥

दूषित रक्त में शृङ्ग शस्त्र का निषेध तथा प्रयोग—

वि०—कफ से दूषित रक्त को सींग से नहीं निकालना चाहिये; क्योंकि वह जमा हुआ होता है किन्तु वात-पित्त से दूषित रक्त को सींग से निकाले ॥ ५० ॥

गात्रं बद्ध्वोपरि दृढं रज्ज्वा पट्टेन वा समम्।
स्नायुसन्ध्यस्थिमर्माणि त्यजन् प्रच्छानमाचरेत् ॥ ५१ ॥
अधोदेशप्रविसृतैः पदैरुपरिगामिभिः।
न गाढघनतिर्यग्भिर्न पदे पदमाचरन् ॥ ५२ ॥
प्रच्छानेनैकदेशस्थं ग्रथितं जलजन्मभिः।
हरेच्छृङ्गादिभिः सुप्तमसृग्व्यापि शिराव्यधैः ॥ ५३ ॥

स०—गात्रं रज्ज्वा पट्टेन वा दृढं बद्ध्वोपरि प्रच्छनीयप्रदेशस्य तथा स्नाय्वादि परिहरन् प्रच्छानं कुर्यात्। कथम्। अधोदेशात्प्रवृत्तैः पदैरुपरिगामिभिरूर्ध्वं प्रसारिभिः। किंभूतैः पदैः। न गाढैर्न खरैर्न निरंतरैर्न च तिर्यग्भिस्तिरश्चीनैः तथा पदे पदं नाचरन् पदस्योपरि पदमकुर्वन्नित्यर्थः। एकदेशस्थितं रक्तं प्रच्छानेनाकर्षेत्। ग्रथितं जलजन्मभिर्हरेत्। ग्रथितं ग्रंथ्यर्बुदादिषु रक्तं जलौकाभिर्हरेत्। शृङ्गादिभिः सुप्तं निश्चेतनसंस्थानं प्रसुप्त्यादिविकारि शृङ्गादिभिर्हरेत्। व्यापि शिराव्यधैः। व्यापि सर्वशरीरस्य लोहितं शिराव्यधेनाऽऽकर्षेत् ॥ ५१-५३ ॥

प्रच्छानविधि—

वि०—विधि—पाँछने के स्थान से ऊपर अंग को रस्सी या पट्टी से दृढतापूर्वक समान रूप में बाँध कर स्नायु-सन्धि-अस्थि और मर्म को बचाते हुए पाँछ लगाये। ये रेखायें निचले भाग से आरम्भ करके ऊपर की ओर जाती हुई होनी चाहिये। और ये न तो बहुत गहरी, न पास

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पास, न तिरछी होनी चाहिये। एक निशान पर दूसरा निशान नहीं करना चाहिये। एक स्थान में स्थित रक्त को पाछने से बाहर करे। जमे हुए रक्त को जोंक से निकाले। सुप्त-निश्चेतन रक्त को सींग आदि से बाहर करे। सम्पूर्ण शरीर में फैले रक्त (दूषित) को शिरावेध से निकाले ॥ ५१-५३ ॥

प्रच्छानं पिण्डिते वा स्यादवगाढे जलौकसः।
त्वक्स्थेऽलाबुघटीशृङ्गं सिरैव व्यापकेऽसृजि ॥ ५४ ॥
वातादिधाम वा शृङ्गजलौकोऽलाबुभिः क्रमात्।

स०—पिंडिते रक्ते प्रच्छानं वा स्यात्। अवगाढे रक्ते जलौकसः स्युः। त्वक्स्थ उत्ताने रक्तेऽलाबुघटीशृङ्गाणि स्युः। सर्वशरीरव्यापके रक्ते शिरैव। शिरायां मतविकल्पो नास्त्ये-वेत्येवशब्दार्थः। अथवा वातादिस्थानस्थितं रक्तं यथाक्रमं शृङ्गादिभिर्हरेत ॥ ५४ ॥

प्रच्छान आदि के अन्य प्रयोग—

वि०—अथवा पिण्डित रक्त में पाछना चाहिये। अवगाढ (गहरे) रक्त को जोंक लगानी चाहिये। त्वचा में स्थित दूषित रक्त में तुम्बी, घटी या सींग बरतना चाहिये। सर्व शरीर में फैले दूषित रक्त में सिरावेध करना चाहिये।

अथवा—वात से दूषित रक्त को सींग से, पित्त से दूषित रक्त को जोंक से; कफ से दूषित रक्त को तुम्बी से निकाले ॥ ५४ ॥

सुतासृजः प्रदेहाद्यैः शीतैः स्याद्वायुकोपतः ॥ ५५ ॥
सतोदकण्डूः शोफस्तं सर्पिषोष्णेन सेचयेत्।

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने शस्त्रविधिर्नाम षड्विंशोऽध्यायः ॥ २६ ॥

स०—स्नुतरक्तस्य नरस्य शीतलैः प्रलेपादिभिस्तोद-कंडूयुतः शोफो वा स्यात्। तं सर्पिषोष्णेन सेचयेत्। तं तादृशं शोफं घृतेनोष्णेन सेचयेदिति ॥ ५५ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां षड्विंशोऽध्यायः ॥ २६ ॥

उष्ण घृत का सेवन—

वि०—जिस व्यक्ति का रक्त निकाला गया है उसे शीतल प्रदेह आदि के कारण वायु का प्रकोप होने से तोद एवं कण्डूयुक्त शोफ हो जाता है; उस पर गरम घी से सिञ्चन करे ॥ ५५ ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का शस्त्रविधि नामक छब्बीसवाँ अध्याय समाप्त हुआ।

सप्तविंशोऽध्यायः

अनंतराऽतीताध्याये शृङ्गादीन् लोहितावसेचनोपाया-नुक्त्वा प्रच्छानेनैकदेशस्थेत्यादिना वाक्येन तेषां विषयो दर्शितः। सिराव्यधस्य तु बहुवक्तव्यत्वात्पृथगध्यायो युक्त इत्याह—

अथातः सिराव्यधविधिमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—सरत्याभी रक्तमिति सिरास्तासां व्यधस्तस्य विधिस्तमध्यायं व्याख्यास्यामः। शेषं पूर्ववत्।

वि०—अब इसके आगे सिराव्यधविधि नामक अध्याय का व्याख्यान करेंगे जैसा कि आत्रेय आदि महर्षियों ने कहा था।

मधुरं लवणं किञ्चिदशीतोष्णमसंहतम्।
पद्मेन्द्रगोपहेमाविशशलोहितलोहितम् ॥ १ ॥
लोहितं प्रभवः शुद्धं, तनोस्तेनैव च स्थितिः।

स०—लोहितं मधुरगुणं तथा किंचिल्लवणं तथाऽ-शीतोष्णम्। नञ्जीषदर्थे। ईषच्छीतमीषदुष्णमसंहतं द्रवं शुद्धं स्यात्। संप्रति वर्णेन शुद्धलोहितलक्षणमाह। पद्मेत्यादि। इंद्रगोपः मृगनक्षत्रोत्पन्नः। कीटकविशेषः। हेम कनकम्। अविमेषः शशस्तयोर्लोहितशब्देन रक्तवाचिना संबंधः। पद्मादीनां द्वंद्वः पद्मेंद्रगोपहेमाविशशलोहितमिव लोहितं रक्तवर्णं यद्रक्तं तच्छुद्धं स्यात्। तच्च तनोः शरीरस्य प्रभव उत्पत्तिहेतुः। तेनैव रक्तेन च तनोः स्थितिः प्रबंधाविच्छेद-लक्षणा। अनेकदृष्टांतोपादानं च शुद्धरक्तस्याऽनेकवर्ण-दर्शनात् ॥ १ ॥

शुद्ध रक्त का लक्षण—

वि०—शुद्ध रक्त का लक्षण—शुद्ध रक्त-मधुर, कुछ लवण रस; अशीतोष्ण (थोड़ा शीत-थोड़ा उष्ण) तथा द्रवरूप होता है। इसका रङ्ग कमल (लाल)-वीरबहूटी-स्वर्ण तथा भेड़-खरगोश रक्त के समान लाल होता है। शुद्ध रक्त शरीर का उत्पत्तिकारण है; इसी रक्त से शरीर की स्थिति रहती है ॥ १ ॥

वक्तव्य—सुश्रुत में रक्त को अनुष्णाशीत कहा है; यथा—'अनुष्णशीतं मधुरं स्निग्धं रक्तं च वर्णतः। शोणितं गुरु विस्रं स्याद् विदाहश्चास्य पित्तवत् ॥' (सु. सू. अ. २१।१७)। यहाँ पर कमल-स्वर्ण-वीरबहूटी की जो उपमा दी है, वह भिन्न-भिन्न रक्त की है; सब मनुष्यों के रक्त में एक समान लाली नहीं होती।

तत्पित्तश्लेष्मलैः प्रायो दूष्यते—

स०—तच्च रक्तं बाहुल्येन पित्तश्लेष्मलैर्दूष्यते। पित्तलैः क्षारोष्णतीक्ष्णादिभिः। श्लेष्मलैर्माषतिलादिभिः। तथा पुरा-कृताद्दैवादपि। शरत्कालस्वभावात्कदाचिद्वातलैर्दूष्यत इति प्रायोग्रहणम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पित्तादि से रक्त का दूषित होना—

वि०—यह रक्त पित्तकारक (क्षार-उष्ण-तीक्ष्ण आदि) तथा कफकारक (उड़द-तिल आदि) वस्तुओं से दूषित होता है।

—कुरुते ततः ॥ २ ॥

विसर्पविद्रधिप्लीहगुल्माग्निसदनज्वरान् ।
मुखनेत्रशिरोरोगमदतृड्लवणास्यताः ॥ ३ ॥
कुष्ठवातास्रपित्तास्रकट्वम्लोद्गिरणभ्रमान् ।
शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः ॥ ४ ॥
सम्यक्साध्या न सिध्यन्ति ते च रक्तप्रकोपजाः।

स०—ततो दूषणात्कारणाद्विसर्पादीन् अमांतान्कुरुते। तथा शीतोष्णादिभिरुपक्रांताश्च ये गदाः सम्यकूचिकित्सिताः साध्याः अपि रोगा ये न सिध्यंति ते च रक्तप्रकोपजाः। न केवलं विसर्पादय इति चार्थः। आदिशब्देन स्तंभवेदनादिपरिग्रहः ॥ २-४ ॥

दूषित रक्त से हानि—

वि०—दूषित होने से—रक्त विसर्प, विद्रधि, प्लीहा, गुल्म, अग्निमान्द्य, ज्वर, मुखरोग, नेत्ररोग, शिरोरोग, मद, प्यास, मुख नमकीनपना, कुष्ठ, वातरक्त, रक्तपित्त, कटु एवं अम्ल उद्गार, भ्रम; तथा शीत-उष्ण-स्निग्ध-आदि (स्तम्भन, स्वेदन आदि) से भली प्रकार चिकित्सा करने पर भी जो रोग अच्छे नहीं होते, वे भी रक्तप्रकोपजन्य हैं ॥ २-४ ॥

तेषु स्रावयितुं रक्तमुद्रिक्तं व्यधयेत्सिराम् ॥ ५ ॥

स०—तेषु विसर्पादिषु रोगेषु रक्तमुल्बणं स्रावयितुं सिरां व्यधयेत्। अदंतत्वादत्र वृद्धेरभावः ॥ ५ ॥

विसर्पादि में सिराव्यध—

वि०—इन रोगों में उल्बण रक्त को निकालने के लिये सिरा का वेधन करना चाहिये ॥ ५ ॥

न तूनषोडशातीतसप्तत्यब्दस्रुतासृजाम् ।
अस्निग्धास्वेदितात्यर्थस्वेदितानिलरोगिणाम् ॥ ६ ॥
गर्भिणीसूतिकाजीर्णपित्तास्रश्वासकासिनाम् ।
अतीसारोदरच्छर्दिपाण्डुसर्वाङ्गशोफिनाम् ॥ ७ ॥
स्नेहपीते प्रयुक्तेषु तथा पञ्चसु कर्मसु ।
नायन्त्रितां सिरां विध्येन्न तिर्यङ्नाप्यनुत्थिताम् । ८॥
नातिशीतोष्णवाताभ्रेष्वन्यत्रात्ययिकाद् गदात् ।

स०—ऊनषोडशवर्षादीनां सिरां न व्यधयेत्। स्नेहपीते पीतस्नेह इत्यर्थः। आहिताग्न्यादित्वात् परनिपातः। तथा पंचसु वमनादिषु कर्मसु विहितेषु सत्सु सिरां न व्यधयेत्। तथाऽयं त्रितामबद्धां सिरां न व्यधयेत्। न तिर्यङ् न चानुत्थितां नातिशीते नात्युष्णे नातिवाते न च मेघोदये सिरां व्यधयेत्। आत्ययिकाद्रोहिणीविषादिकादन्यत्र न व्यधयेत्। आत्ययिके तु रोगे शीतोष्णवृष्टीनां यथायथं प्रतीकारं विधाय सिरां मोक्षयेदेव ॥ ६-८ ॥

सिरावेध के अयोग्य रोगी—

वि०—सिरावेध का निषेध—सोलह वर्ष से कम और सत्तर वर्ष से अधिक आयु में जिनका रक्त निकाला गया हो; जिनका स्नेहन न किया हो, जिनका स्वेदन न हुआ हो, जिनको बहुत स्वेद किया हो; वातरोगियों को, गर्भवती, सूतिका, अजीर्ण, रक्तपित्त, श्वास, कास, अतिसार; उदर, वमन, पाण्डु और सर्वाङ्गशोफ रोगों से पीडित में स्नेहपान करने पर एवं वमन-विरेचनादि पञ्चकर्म किये जाने पर सिरावेध नहीं करना चाहिये। बिना बाँधकर नियन्त्रित किए, तिरछी उठी और जो सिरा उठी (उभरी) न हो उसका वेधन न करे। अतिशीत या अति उष्ण-काल में, अति वायु के चलने में, बादलों के होने पर, बिना आत्ययिक रोगी के (रोहिणी आदि आत्ययिक रोगों को छोड़ कर) सिरावेध न करे। [आत्ययिक रोगों में शीत, उष्ण, वृष्टि का योग्य प्रतिकार करके सिरा वेधन करे] ॥ ६-८ ॥

शिरोनेत्रविकारेषु ललाट्यां मोक्षयेत्सिराम् ॥ ९ ॥
अपाङ्ग्यामुपनास्यां वा कर्णरोगेषु कर्णजाम् ।
नासारोगेषु नासाग्रे स्थितां नासाललाटयोः ॥ १० ॥
पीनसे—

स०—शिरोनयनविकारेषु ललाट्यां सिरां मोक्षयेत्। ललाटे भवा ललाट्या। शरीरावयवात्। एवमग्रेऽप्यपांगे भवां नासिकासमीपे भवां वा। कर्णामयेषु कर्णजां कर्णसमीपभवां सिरां विध्येत्। नासामयेषु नासाग्रे स्थितां विध्येत्। पीनसे प्रतिश्याये नासाललाटयोः स्थितां सिरां विध्येत् ॥ ९-१० ॥

रोगानुसार सिरावेध के स्थान—

वि०—शिरोरोग एवं नेत्ररोगों में ललाट की सिरा का अथवा अपांग प्रदेश की या नासा के समीप की सिरा का वेधन करे। कर्ण रोगों में कर्ण के समीप की सिरा का वेधन करे।

नासा रोगों में नासा के अग्रभाग में स्थित सिरा का वेधन करे। पीनस में नासा और ललाट के मध्य की सिरा का वेधन करना चाहिये ॥ ९-१० ॥

—मुखरोगेषु जिह्वौष्ठहनुतालुगाः ।
जत्रूर्ध्वग्रन्थिषु ग्रीवाकर्णशङ्खशिरःश्रिताः ॥ ११ ॥
उरोऽपाङ्गललाटस्था उन्मादे—

स०—मुखरोगेषु जिह्वादिगाः सिरा विध्येत्। जत्रूर्ध्वं वक्षोंऽसयोः संध्यूर्ध्वं ये ग्रंथयस्तेषु ग्रीवाद्याश्रिताः सिरा विध्येत्। उन्माद उरःस्था अपांगस्था ललाटाश्रिताश्च विध्येत् ॥ ११ ॥

वि०—मुख रोग में जिह्वा, ओष्ठ, हनु और तालु में जाने वाली सिरा वेधन करना चाहिये। जत्रु से ऊपर की ग्रन्थियों में ग्रीवा, कान, शंख और शिर में आश्रित सिराओं का वेधन करना चाहिये।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उन्माद रोग में—वक्ष, अपाङ्ग और ललाट में स्थित सिरा का वेधन करना चाहिये ॥ ११ ॥

—ऽपस्मृतौ पुनः।
हनुसन्धौ समस्ते वा सिरां भ्रूमध्यगामिनीम् ॥ १२ ॥
विद्रधौ पार्श्वशूले च पार्श्वकक्षास्तनान्तरे।

स०—अपस्मारे हनुसंधौ स्थितां सिरां विध्येत्। समस्ते सर्वस्मिन् वा हनौ सिरां विध्येत्। सिरां भ्रूमध्यगामिनीं भ्रूमध्यस्थां वाऽपस्मृतौ विध्येदिति वाशब्दोऽत्रानुवर्त्यं योज्यः। विद्रधौ पार्श्वशूले च पार्श्वस्थाः कक्षास्तनांतरस्थाश्च सिरा विध्येत् ॥ १२ ॥

वि०—अपस्मार में—समस्त हनुसन्धि में स्थित; या भ्रुवों के मध्य में जाने वाली सिरा का वेधन करे।

विद्रधि (उरोविद्रधि) और पार्श्वशूल में—पार्श्वस्थ या कक्षा या स्तनान्तरों में स्थित सिरा का वेधन करे ॥ १२ ॥

तृतीयकेंऽसयोर्मध्ये स्कन्धस्याधश्चतुर्थके ॥ १३ ॥
प्रवाहिकायां शूलिन्यां श्रोणितो द्व्यङ्गुले स्थिताम्।
शुक्रमेढ्रामये मेढ्रे ऊरुगां गलगण्डयोः ॥ १४ ॥

स०—तृतीयके ज्वरेंऽसयोर्मध्ये स्कंधसंधौ स्थितां सिरां विध्येत्। चतुर्थके ज्वरे स्कंधस्याधोगतां सिरां विध्येत्। प्रवाहिकायां शूलयुक्तायां श्रोणितः कट्या द्व्यंगुले स्थितां सिरां विध्येत्। शुक्ररोगे मेढ्ररोगे च मेढ्रस्थितां सिरां विध्येत्। गलगंडयोश्चोभयोरुरुस्थां सिरां विध्येत् ॥ १३-१४ ॥

वि०—तृतीयक ज्वर में स्कन्धों के बीच में स्थित सिरा का तथा चतुर्थक ज्वर में स्कन्धों के नीचे (किसी एक पार्श्व की) सिरा का वेधन करे।

शूलयुक्त प्रवाहिका में कटि से दो अंगुल दूर स्थित सिरा का वेधन करना चाहिये।

शुक्र और मेहन के रोगों में—मेहन की सिरा का वेधन करे। गलगण्डरोग में ऊरु की सिरा का वेधन करे ॥१३-१४॥

गृध्रस्यां जानुनोऽधस्तादूर्ध्वं वा चतुरङ्गुले।
इन्द्रवस्तेरधोऽपच्यां द्व्यङ्गुले चतुरङ्गुले ॥ १५ ॥
ऊर्ध्वं गुल्फस्य सक्थ्यर्तौ, तथा क्रोष्टुकशीर्षके।
पाददाहे खुडे हर्षे विपाद्यां वातकण्टके ॥ १६ ॥
चिप्पे च द्व्यङ्गुले विध्येदुपरि क्षिप्रमर्मणः।
गृध्रस्यामिव विश्वाच्याम्—

स०—गृध्रस्यां जानुनोऽधस्ताच्चतुरंगुल ऊर्ध्वं वा जानुनश्चतुरंगुले स्थितां सिरां विध्येत्। अपचीसंज्ञे रोग इंद्रबस्तेरधो द्व्यङ्गुले सिरां विध्येत्। इंद्रबस्तिर्जंघांतरे वक्ष्यमाणः। सक्थिपीडायां गुल्फस्योर्ध्वं चतुरंगुले विध्येत्। ऊरुपर्वगवातरोगविशेषे गुल्फस्योर्ध्वं चतुरंगुले विध्येत्। पाददाहादिषु क्षिप्रमर्मण उपरि द्व्यंगुले विध्येत्।

स०—विश्वाच्यां गृध्रस्यामिव सिरां विध्येत्। गृध्रस्यां जानुनोऽधस्तादिति ॥ १५-१६ ॥

वि०—गृध्रसी रोग में घुटने से चार अंगुल नीचे अथवा घुटने से चार अंगुल ऊपर स्थित सिरा वेधन करे।

अपचीरोग में—इन्द्रबस्तिमर्म के दो अंगुल नीचे सिरा का वेधन करे।

सक्थि (टांग) की पीड़ा में तथा क्रोष्टुक शीर्षक रोग में गुल्फ के चार अंगुल ऊपर सिरा का वेधन करे।

पाददाह, खुड (वातरक्त), पादहर्ष, विपादिका, वातकण्टक तथा चिप्परोग में, क्षिप्र मर्म के दो अंगुल ऊपर सिरा का वेधन करे।

विश्वाची रोग में—गृध्रसी की भाँति सिरा वेधन करे। ॥ १५-१६ ॥

वक्तव्य—अरुणदत्त की मान्यता है कि 'गृध्रसी प्रोक्तां सिरां विध्येत्'—अर्थात् गृध्रसी में कही सिरा का वेधन करे। परन्तु यहाँ पर विश्वाची रोग हाथ का है; इसलिए गृध्रसी की भाँति बाहु की सिरा का (कर्पूर के दो चार अङ्गुल नीचे या ऊपर) वेधन करे-यह अर्थ संगत है।

सिरादर्शन के अभाव में मर्महीन सिरा का वेधन—

—यथोक्तानामदर्शने ॥ १७ ॥
मर्महीने यथासन्ने देशेऽन्यां व्यधयेत् सिराम्।

स०—यथोक्तानां सिराणामदर्शने सति मर्मवर्जिते यथासन्ने स्थाने व्याधिवशादपरां विध्येत् ॥ १७ ॥

वि०—कही हुई सिरा (यदि रोग या अन्य कारण से) दिखाई न दे, तब उसके समीपस्थ मर्मरहित स्थान में दूसरी सिरा का वेधन करे ॥ १७ ॥

अथ स्निग्धतनुः सज्जसर्वोपकरणो बली ॥ १८ ॥
कृतस्वस्त्ययनः स्निग्धरसान्नप्रतिभोजितः।
अग्नितापातपस्विन्नो जानूच्चासनसंस्थितः ॥ १९ ॥
मृदुपट्टात्तकेशान्तो जानुस्थापितकूर्परः।
मुष्टिभ्यां वस्त्रगर्भाभ्यां मन्ये गाढं निपीडयेत् ॥ २० ॥
दन्तप्रपीडनोत्कासगण्डाध्मानानि चाचरेत्।
पृष्ठतो यन्त्रयेच्चैनं वस्त्रमावेष्टयेन्नरः ॥ २१ ॥
कन्धरायां परिक्षिप्य न्यस्यान्तर्वामतर्जनीम्।
एषोऽन्तर्मुखवर्ज्यानां सिराणां यन्त्रणे विधिः ॥ २२ ॥

स०—अथेत्यानंतर्ये। स्निग्धा तनुर्यस्य स स्निग्धतनुः। तथा सज्जानि प्रगुणान्युपकरणानि वस्त्रपीडाऽनपादकस्नेहगैरिकादीनि यस्य स सज्जोपकरणः। तथा बली पुष्टः। तथा कृतं स्वस्त्ययनं बलिमंगलहोमादिकं यस्य स कृतस्वस्त्ययनः। तथा स्निग्धरसयुक्तेनाऽन्नेन प्रतिभोजितः। तथाऽग्नितापश्चातपश्च ताभ्यां स्विन्नः। तथा जानुतुल्यमुच्चमासनं तत्र संस्थितः समुपविष्टः। तथा मृदुना सुसूक्ष्मेण वस्त्रपट्टेनात्तो गृहीतो बद्धः केशांतो यस्य स एवम्। तथा जानुनि स्थापितं कूर्परं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येन स एवम्। तथा मुष्टिभ्यां वस्त्रगर्भाभ्यां मन्येऽतिशयेन पीडयेत्। तथा दंतप्रपीडनाद्याचरेत्। एनं चातुरं पृष्ठदेशे वसनमावेष्टयन्नरो यंत्रयेत्। कथम्। कंधरायां ग्रीवायां वस्त्रं परिक्षिप्य तथांऽतर्मध्ये वामतर्जनीं न्यस्य। सिराणां यंत्रण एष विधिरेतद्विधानम्। किंभूतानाम्। अंतर्मुखवर्जानाम् ॥ १८-२२ ॥

सिरावेध के प्रथम कर्तव्य—

वि०—सिराव्यध विधि—रोगी के शरीर का स्नेहन कराके, वस्त्र खण्ड, पानी, स्नेह आदि आवश्यक सब साधनों को तैयार करके, वैद्य, बलवान् रोगी को स्वस्ति वाचन कराके; स्निग्ध रस-युक्त अन्न के साथ प्रतिभोजन[1] (यवागू-पेया आदि) दे कर अग्नि या धूप से पसीना लाकर घुटनों के बराबर ऊँचे आसन पर बिठा देवे। फिर रोगी के सिर को कोमल वस्त्र से बालों के प्रान्त को बांध कर पकड़ाये। रोगी की कोहनी को घुटने पर रखवा दे। वस्त्रों को मुट्ठी में दबा कर उससे रोगी की मन्याओं को जोर से वैद्य दबाये। रोगी को दांतों का दबाना, खांसना, गाल का फुलाना, आध्मान (पेट फुलाना) आदि कराए। दूसरा मनुष्य वस्त्र को लपेट कर पीठ से रोगी को बाँध ले। इसके लिये ग्रीवा में वस्त्र को डाल कर दोनों कक्षाओं में से निकाल कर पीठ में ले जाकर वाम अङ्गुली को बीच में रखकर पकड़े। यह यन्त्रण विधि मुख के अन्दर की सिराओं को छोड़कर शेष अन्य सिराओं के लिए है ॥ १८-२२ ॥

सिरा की उत्थापनविधि—

ततो मध्यमयाऽङ्गुल्या वैद्योऽङ्गुष्ठविमुक्तया।
ताडयेदुत्थितां ज्ञात्वा स्पर्शाद्वांऽगुष्ठपीडनैः ॥ २३ ॥
कुठार्या लक्षयेन्मध्ये वामहस्तगृहीतया।
फलोद्देशे सुनिष्कम्पं सिरां, तद्वच्च मोक्षयेत् ॥ २४ ॥
ताडयन् पीडयंश्चैनां विध्येद् व्रीहिमुखेन तु।

स०—ततो यंत्रणादनंतरं वैद्योऽगुष्ठविमुक्तया वामपाणिजया मध्यमयांगुल्या ताडयेत्। स्पर्शेन वांऽगुष्ठपीडनैर्वोत्थितां ज्ञात्वा ऊर्ध्वदंडया सिरायां मध्ये न्यस्य फलोद्देशे सुनिष्कंपं वामहस्तगृहीतया कुठार्या सिरां लक्षयेत्। तद्वच्च मोक्षयेत्। यथैव लक्षयेत्तथैवेत्यर्थः। व्रीहिमुखेन पुनस्ताडयन् विध्यंस्तथांऽगुष्ठादिना पीडयेत्। एनां कुठारिकाविषयजां सिरां विध्येत्। ननु कुठारिकाविषये कथं व्रीहिवक्त्रस्य प्रयोगः। यतोऽपवादविषयं परिहृत्योत्सर्गाः प्रवर्तते इति न्यायः। व्रीहिवक्त्रस्यैव सामान्येन प्रयोगोऽनुज्ञातः। तथाचाह। व्रीहिवक्त्रं प्रयोज्यं वा तस्सिरोदरयोर्व्यध इति। कुठार्याः पुनर्विशेषोऽभिहितः। तयोर्ध्वदंडया विध्येदुपर्यस्थनां स्थितां सिरामिति। तस्मादयुक्तमेतत्। अत्रोच्यते ज्ञापकम्। कुठारिकाविषये व्रीहिवक्त्रस्य प्रयोगो न्याय्य एव। यदयमाचार्यो वक्ष्यति। मांसले निक्षिपेद्देशे व्रीह्यास्यं व्रीहिमात्रकमिति। अनेन हि वचनेन ग्रंथकार इदं प्रत्यपादयत्। बहुमांसे शरीरावयवे व्रीहिमुखं व्रीहिमात्रं निक्षेप्यम्। अन्यत्र स्वाशयानुरोधेन व्रीहिवक्त्रस्य प्रयोगः कार्य इति। अनेनैवाऽभिप्रायेण शास्त्रकृत प्रमाणपरिमाणाभ्यां संख्यायाश्चाऽपि विषये मात्रच् वक्तव्य इत्यनेन मात्रच् कृतः। अन्यथा तु स्पष्टं कृत्वा व्रीहिप्रमाणं मांसले निक्षिपेद्व्यध इति पाठं कुर्यात्। तस्माद्युक्तो व्रीहिमुखस्य कुठारिकाविषयेऽपि प्रयोग इति ॥ २३-२४ ॥

वि०—फिर वैद्य अंगूठे से पकड़ कर झटके से छोड़ी हुई वाम हाथ की मध्यमांगुलि से सिरा पर चोट करे। स्पर्श द्वारा या अङ्गूठे से दबाकर उठी हुई सिरा को जान कर वाम हाथ से फल (नोक) के पास दृढ़तापूर्वक पकड़ी हुई कुठारिका से-सिरा के मध्य भाग में (जहाँ पर वेधन करने का निश्चय हो वहाँ पर) सिरा पर निशान करे—और इस प्रकार हाथ को न हिलाते हुए सिरा का मोक्षण करे। इस सिरा पर कुठारिका से या मध्यमांगुलि से चोट करता रहे और अङ्गूठे से सिरा दबाता रहे—जिससे रक्त भली प्रकार बहे। सिरा का वेधन व्रीहिमुख से करना चाहिये[2] ॥२३-२४॥

अंगुष्ठेनोन्नमय्याग्रे नासिकामुपनासिकाम् ॥ २५ ॥

स०—अग्रेऽग्रदेशे नासिकामंगुष्ठेनोन्नमय्योपनासिकासन्नदेशस्थां सिरां विध्येत् ॥ २५ ॥

उपनासिका का सिरावेधन—

वि०—नासिका की सिरा के वेधन में—नासिका को अग्रभाग में अंगूठे से ऊँचा उठाकर नासिका के समीप प्रदेश में सिरा का वेधन करे ॥ २५ ॥

अभ्युन्नतविदष्टाग्रजिह्वस्याधस्तदाश्रयाम् ।

स०—आभिमुख्येनोन्नतोपरि तालुदेशे नीता तथा विशेषेण दंतैर्दष्टा अग्रे जिह्वाऽग्रजिह्वा येनासावभ्युन्नतविदष्टाग्रजिह्वस्तस्याधः प्रकृतत्वाज्जिह्वाया एवाधस्तात्तदाश्रयां जिह्वाधःस्थां सिरां विध्येत्। तदित्यनेन जिह्वाधः परामृश्यते। जिह्वाध आश्रयो यस्याः सिरायास्ताम्।

जिह्वास्थ सिरा का वेधन—

वि०—जिह्वा के नीचे सिरावेध करने में जिह्वा को तालुदेश में ऊपर लगवाकर तथा (ऊपर की ओर मुड़कर दोहरी) जीभ को दांतों से कटवा (दबवा) कर जिह्वा के नीचे की सिरा का वेधन करे।

यन्त्रयेत्स्तनयोरूर्ध्वं ग्रीवाश्रितसिराव्यधे ॥ २६ ॥

स०—ग्रीवाश्रितानां सिराणां व्यधो ग्रीवाश्रितसिराव्यधस्तस्मिन्स्तनयोरूर्ध्वं यंत्रयेद्वाससा वेष्टयेत् ॥ २६ ॥

१. रसान्नप्रतिभोजितः—प्रतिभोजन-वमनादि शोधने के पूर्व या पश्चात् जो भोजन दिया जाता है उसे प्रतिभोजन कहते हैं (चन्द्र)। हेमाद्रि के मत से प्रति शब्द का मात्र अर्थ है इससे केवल स्वल्प स्निग्ध रसान्न भोजन के लिए दे।

२. यहाँ सिरावेधविधि में कुठारिका और व्रीहिमुख दो शस्त्रों का उपयोग वर्णित हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रीवास्थ सिरावेधन—

वि०—ग्रीवा में आश्रित सिराओं के वेधन में स्तनों के ऊपर वस्त्र से रोगी को यंत्रित करे॥ २६ ॥

पाषाणगर्भहस्तस्य जानुस्थे प्रसृते भुजे।
कुक्षेरारभ्य मृदिते विध्येद्बद्धोर्ध्वपट्टके ॥ २७ ॥

स०—पाषाणगर्भौ हस्तौ यस्य तस्य नरस्य भुजे जानुस्थे जानुष्वेव स्थिते प्रसृते प्रसारिते। भुज इति वचनमतंत्रम्। द्वावपि हि भुजौ गृह्येते। कुक्षेरारभ्य यावद्ग्रीवा तावन्मृदिते मलिते। कस्मिन्। ग्रीवाश्रितसिराव्यधाङ्गे। यथा बद्ध ऊर्ध्वं पट्टको यस्मिंस्तस्मिन् विध्येत्। प्रकृतत्वात्सिराम् ॥ २७ ॥

ग्रीवा की सिरा का वेधन—

वि०—रोगी के हाथ में पत्थर को पकड़वाकर हाथ को घुटने पर रख कर लम्बा कर देवे। फिर कुक्षि से आरम्भ करके ग्रीवा तक मले और (सिरावेधस्थल से) ऊपर वस्त्र की पट्टी से बांध कर सिरावेधन करे ॥ २७ ॥

विध्येद्धस्तशिरां बाहावनाकुञ्चितकूर्परे।
बद्ध्वा सुखोपविष्टस्य मुष्टिमङ्गुष्ठगर्भिणम् ॥ २८ ॥
ऊर्ध्वं वेध्यप्रदेशाच्च पट्टिकां चतुरङ्गुले।

स०—हस्तसिरां विध्येत्। कथम्। बाहावनाकुंचितकूर्परे। अनाकुंचितः प्रसारितः कूर्परो यस्य बाहोस्तस्मिन्। तथा सुखोपविष्टस्य सुखासीनस्य। तथा मुष्टिं बद्ध्वा। किंभूताम्। अंगुष्ठेन गर्भिणीमंगुष्ठगर्भिणीम्। गूढांगुष्ठां मुष्टिं बद्ध्वेत्यर्थः। तथा वेध्यस्थानादुपरि चतुरंगुलपरिमाणे स्थाने पट्टिकां बद्ध्वा विध्येत् ॥ २८ ॥

हस्तसिरा का वेधन—

वि०—हाथ की सिरा के वेध में—रोगी को सुखपूर्वक बिठाकर, कोहनी को बिना सिकोड़े अर्थात् फैलाये हुए तथा अंगूठे को अन्दर रखकर मुट्ठी बन्द करवा कर, वेधन स्थान से चार अंगुल ऊपर एक पट्टी बांधकर सिरा का वेधन करे॥

विध्येदालम्बमानस्य बाहुभ्यां पार्श्वयोः सिराम् ॥२९॥

स०—बाहुभ्यामालंबमानस्याऽवलंब्यं वस्तु भुजाभ्यामासजतः पार्श्वयोः सिरां विध्येत् ॥ २९ ॥

पार्श्वसिरा का वेधन—

वि०—पार्श्व की सिराओं के वेधन में—दोनों हाथों को लम्बा लटकवा कर पार्श्व में सिराओं का वेधन करे ॥ २९ ॥

प्रहृष्टे मेहने, जङ्घासिरां जानुन्यकुञ्चिते।

स०—प्रहृष्टे स्तब्धे मेढ्रे तदाश्रितां सिरां विध्येत्। जानुन्यकुंचिते स्पष्टे स्थिते सति जंघायां सिरां विध्येत्।

मेढ्रस्थ तथा जङ्घा की सिरा का वेधन—

वि०—मेढ् के स्तब्ध (कड़ा) होने पर उसके आश्रित सिरा का वेधन करे तथा घुटनों को बिना संकुचित किये जंघा सिरा का वेधन करे।

पादे तु सुस्थितेऽधस्ताज्जानुसन्धेर्निपीडिते ॥ ३० ॥
गाढं कराभ्यामागुल्फं चरणे तस्य चोपरि।
द्वितीये कुञ्चिते किञ्चिदारूढे हस्तवत्ततः ॥ ३१ ॥
बद्ध्वा विध्येत्सिराम्—

स०—सुखं कृत्वा भूम्यादिदेशे स्थिते पादे सति पादसिरां विध्येत्। तथा जानुसंधेरधस्तादागुल्फं गुल्फं यावत् कराभ्यां गाढं कृत्वा पीडिते सति तस्य चरणस्योपर्युपरिष्टाद् द्वितीये चरण ईषत्संकुचिते। तथा आरूढे तत्काले सति ततो हस्तवद्वेध्यस्थानादुपरि चतुरंगुले पट्टकं बद्ध्वा सिरां विध्येत् ॥ ३०-३१ ॥

पादसिरा का वेधन—

वि०—पैर की सिरा के वेधन में—पैर को सुखपूर्वक भूमि आदि पर रखवा कर जानुसन्धि के नीचे से लेकर गुल्फ तक बीच के भाग को जोरसे दबाकर, रुग्ण पैर के ऊपर दूसरा पैर कुछ संकुचित कर रखवाये जिससे कि पहला रुग्ण पैर कुछ दब जाये। फिर हाथ की भाँति वेधन स्थान से चार अंगुल ऊपर वस्त्र बांध कर सिरा का वेधन करे ॥ ३०-३१ ॥

—इत्थमनुक्तेष्वपि कल्पयेत्।
तेषु तेषु प्रदेशेषु तत्तद्यन्त्रमुपायवित् ॥ ३२ ॥

स०—इत्थमनेन प्रकारेण यंत्रलक्षणोद्देशेनानुक्तमपि यंत्रं तत्तद्देशे माहात्म्यात् क्रियासौकर्यार्थं तेषु-तेषु शरीरावयवेषु स्वबुद्ध्या तत्तद्यंत्रं यथायोगं कल्पयेदुपायज्ञो वैद्यः ॥ ३२ ॥

अनुक्त स्थानों में स्वबुद्धि से कल्पना—

वि०—इस प्रकार जिनका उल्लेख यहाँ नहीं किया जा रहा है उन सिराओं में भी उपायज्ञ वैद्य क्रियासौकर्य के लिए उन-उन शरीरावयवों के अनुसार अपनी बुद्धि से विचार कर आवश्यक यंत्रों को बरते ॥ ३२ ॥

मांसले निक्षिपेद् देशे व्रीह्यास्यं व्रीहिमात्रकम्।
यवार्धमस्थ्नामुपरि सिरां विध्यन् कुठारिकाम् ॥ ३३ ॥

स०—मांसले शरीरावयवे व्रीहिमुखं शस्त्रं व्रीहिप्रमाणं निक्षिपेत्। अस्थ्नामुपरि यवार्धमात्रं कुठारिकां निक्षिपेत्। किं कुर्वन्। सिरां विध्यन् ॥ ३३ ॥

मांसल आदि स्थानों में व्रीहिमुखादि से वेधन—

वि०—मांस वाले स्थानों में व्रीहिमुख को व्रीहि (धान्य) के बराबर गहरा ले जाये। अस्थियों के ऊपर की सिराओं का वेधन करते हुए कुठारिका को आधा जौ गहराई तक ले जाना चाहिये ॥ ३३ ॥

सम्यग्विद्धा स्रवेद्धारां यन्त्रे मुक्ते तु न स्रवेत्।
अल्पकालं वहत्यल्पं दुर्विद्धा तैलचूर्णनैः ॥
सशब्दमतिविद्धा तु स्रवेद् दुःखेन धार्यते।

स०—सम्यग्विद्धे सति धारां स्रवेत्। यंत्रे च मुक्ते सति न स्रवेत्। अल्पं विद्धा सती सिरा स्तोकं कालं वहति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दुर्विद्धाऽसम्यग्विद्धा तु सिरा सशब्दं स्रवेत्। दुःखेन कृच्छ्रेण धार्यते ॥ ३४ ॥

सम्यग्विद्ध अल्पविद्धादि सिरा का लक्षण—

वि०—भली प्रकार वेधन होने पर धारा के रूप में रक्त बहता है और यन्त्र (बन्धन) को छोड़ देने पर रक्त बहना बन्द हो जाता है। अल्प वेधन होने पर थोड़ा ही रक्त बहता है। दुर्विद्ध (अनुचित रूप में इधर-उधर) सिरावेध होने पर तैल की छोटी-छोटी बूँदों के समान रक्त निकलता है। अतिशय वेधन होने पर शब्द के साथ रक्त बहता है और यह रक्त कठिनाई से बन्द होता है ॥ ३४ ॥

भीमूर्च्छायन्त्रशैथिल्यकुण्ठशस्त्रातितृप्तयः ॥ ३५ ।
क्षामत्ववेगितास्वेदा रक्तस्याऽस्रुतिहेतवः ।

स०—भीमूर्च्छादयो रक्तस्याऽस्रावहेतवः । भीर्भयम्। मूर्छा मोहस्तमसीव प्रवेशः । यंत्रशैथिल्यमगाढं कृत्वा यंत्रपीडनम् । तथा कुंटं भग्नं शस्त्रम् । तथाऽतितृप्तिरतिसौहित्यम्। क्षामत्वं निर्बलता । वेगिता संजातवेगत्वम्। अस्वेदः स्वेदायोगः। यतश्चैते रुधिरस्यास्रुतिहेतवोऽतो रक्तस्रुतावेते परिहार्याः ॥३५॥

रक्तस्राव न होने के कारण—

वि०—रक्त के न बहने के कारण—भय, मूर्च्छा, यन्त्र की शिथिलता (ठीक प्रकार से न दबाना), शस्त्र का कुण्ठित होना, अतिसौहित्य (भर पेट भोजन), निर्बलता, मल-मूत्र का उपस्थित वेग, स्वेदन न होना, ये रक्त न बहने के कारण हैं ॥ ३५ ॥

असम्यगस्रे स्रवति वेल्लव्योषनिशानतैः ॥ ३६ ॥
सागारधूमलवणतैलैर्दिह्यात्सिरामुखम् ।
सम्यक्प्रवृत्ते कोष्णेन तैलेन लवणेन च ॥ ३७ ॥

स०—असम्यगस्रे स्रवति वेल्लादिभिः सिरावदनं दिह्यात्प्रलेपयेत्। सम्यक्प्रवृत्ते रक्ते सति सिरामुखं कोष्णाभ्यां तैललवणाभ्यां दिह्याल्लेपयेत् ॥ ३६-३७ ॥

असम्यक् और सम्यक् स्राव में कर्तव्य—

वि०—रक्त के ठीक प्रकार न बहने पर वेल्ल (वायविडंग) त्रिकटु; हल्दी, तगर, घर का धूवाँ; नमक और तैल इनसे सिरा में मुख पर लेप करे। भली प्रकार रक्त बहने पर सिरामुख पर सुहाते हुए गरम तैल में नमक मिलाकर लेप करे ॥ ३६-३७ ॥

अग्रे स्रवति दुष्टास्रं कुसुम्भादिव पीतिका ।

स०—यथा रागपीतिका मिश्रीभूतात् कुसुंभादग्रे पूर्वं पीतिका स्रवति तथा दुष्टादुष्टरक्तादेकलोलीभूतादग्रे पूर्वं दुष्टास्रं स्रवति ।

दूषित रक्त का प्रथम स्राव—

वि०—रक्तस्राव में पहले दूषित रक्त आता है और फिर शुद्ध रक्त आता है, जिस प्रकार कुसुम्भ में से पहले पीला रङ्ग आता है, फिर लाल रङ्ग आता है।

अग्रग्रहणात्पश्चाददुष्टमपि रक्तमवश्यं स्रवतीत्याशंक्येदाह—
सम्यक्स्रुत्वा स्वयं तिष्ठेच्छुद्धं तदिति नाहरेत् ॥ ३८ ॥

स०—यथावत्प्रस्रुत्य स्वयं यत्नेन विना यत्तिष्ठेन्न स्रवेत्। शुद्धं तदिति नाहरेन्न स्रावयेत्। जीवितहेतुत्वात् ॥ ३८ ॥

शुद्ध रक्तस्राव का निषेध—

वि०—(सम्यक् वेधन के बाद) भली प्रकार बहकर जो रक्त स्वयं रुक जाये वह शुद्ध रक्त है और उसे फिर न निकाले ॥ ३८ ॥

यन्त्रं विमुच्य मूर्च्छायां वीजिते व्यजनैः पुनः ।
स्रावयेन्मूर्च्छति पुनस्त्वपरेद्युस्त्र्यहेऽपि वा ॥ ३९ ॥

स०—मूर्छायां सत्यां यंत्रं विमुच्य व्यजनैर्वीजिते समाश्वस्ते नरे सति पुनरस्रं स्रावयेत्। पुनर्मूर्छति त्वातुरेऽशुद्धमपि रक्तं तस्मिन्नहनि न स्रावयेत् । अपरेद्युस्त्र्यहेऽपि वा स्रावयेत् ॥ ३९ ॥

मूर्च्छा में कर्तव्य—

वि०—रक्तस्राव में रोगी को मूर्छा आ जाय तो यन्त्र (बन्धन) को छोड़कर पंखों से हवा करने के बाद पुनः स्रावण करे। फिर भी यदि मूर्च्छा आ जाय तो उस दिन पुनः रक्तस्राव न करे; अपि तु दूसरे दिन या तीसरे दिन करे ॥ ३९ ॥

वाताच्छ्यावारुणं रूक्षं वेगस्राव्यच्छफेनिलम् ।
पित्तात् पीतासितं विस्रमस्कन्द्यौष्ण्यात्सचन्द्रिकम् ॥
कफात् स्निग्धमसृक्पाण्डु तन्तुमत्पिच्छिलं घनम् ।
संसृष्टलिङ्गं संसर्गात् त्रिदोषं मलिनाविलम् ॥ ४१ ॥

स०—वातात् श्यावादिलक्षणं रक्तं स्यात् । पित्तात् पीतादिलक्षणमस्रं स्यात्। अस्कंद्यस्त्यानमुष्णत्वात्सचंद्रकं च। कफात् स्निग्धादिलक्षणमसृक् स्यात्। संसर्गाद्दोषाणां संसृष्टलिंगं रक्तं स्यात्। त्रिदोषं रक्तं मलिनं कलुषं तथाऽऽविलं घनं च। एतच्च दोषत्रयसंसर्गलक्षणाधिकं लक्षणं मंतव्यम्। नचैतावदेव त्रिदोषलक्षणं मंतव्यम् ॥ ४०-४१ ॥

वातादि दूषित रक्तों के लक्षण—

वि०—वायु के कारण रक्त—श्याव-अरुण वर्ण, रूक्ष, वेग से बहने वाला; निर्मल और झागदार होता है। पित्त के कारण रक्त—पीला-काला, आमगन्धि, न जमने वाला, गरम और चन्द्रिका युक्त होता है। कफ के कारण रक्त—स्निग्ध, पाण्डुवर्ण, रेशेदार, पिच्छिल और घट्ट (गाढ़ा) होता है। दो दोषों के मिलने से दो दोषों के लक्षणों वाला और तीन दोषों के मिलने से मैला और घट्ट होता है ॥४०-४१॥

अशुद्धौ बलिनोऽप्यस्रं न प्रस्थात्स्रावयेत्परम् ।
अतिस्रुतौ हि मृत्युः स्याद्दारुणा वा चलामयाः ॥ ४२ ॥

स०—अशुद्धमस्रं बलिनोऽपि किं पुनरबलिनः प्रस्थात्परमधिकं न स्रावयेत्। कस्मादित्याह—अतिस्रावे हि रक्तस्य मृत्युर्भवेत् अथवा वातरोगाश्च कृच्छ्राः स्युः ॥ ४२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अशुद्ध रक्तस्राव का प्रमाण—

वि०—बलवान् मनुष्य में भी अशुद्ध रक्त एक प्रस्थ (रक्त मोचण में-साढ़े तेरह पल) से अधिक नहीं निकालना चाहिये। क्योंकि अधिक रक्तस्राव से मृत्यु होती है; या भयानक वात रोग होते हैं ॥ ४२ ॥

तत्राभ्यङ्गरसक्षीररक्तपानानि भेषजम् ।

स०—तत्र रक्तातिस्रुतावभ्यंगादीनि भेषजम् ।

अधिक रक्तस्राव में कर्तव्य—

वि०—अतिशय रक्तस्राव में—अभ्यङ्ग, माँसरस, दूध और रक्तपान ये औषध हैं।

स्रुते रक्ते शनैर्यन्त्रमपनीय हिमाम्बुना ॥ ४३ ॥
प्रक्षाल्य तैलप्लोताक्तं बन्धनीयं सिरामुखम् ।

स०—स्रुते रक्ते सति यंत्रं शनैर्विमुच्य मंदं मंदमपनीय सिरामुखं शीतोदकेन प्रक्षाल्य तैलप्लोताक्तं सद्बंधनीयम् ॥४३॥

रक्तस्राव के पश्चात् कर्तव्य—

वि०—पश्चात् कर्म—रक्त के निकल जाने पर धीरे से यन्त्र को हटाकर बर्फ जैसे शीतल जल से धोकर; सिरामुख पर तैल से भीगा वस्त्र रखकर उसे बाँध देना चाहिये ॥४३॥

अशुद्धं स्रावयेद् भूयः सायमह्न्यपरेऽपि वा ॥ ४४ ॥
स्नेहोपस्कृतदेहस्य पक्षाद्वा भृशदूषितम् ।

स०—अशुद्धं वातादिदुष्टरुधिरलक्षणाद्दुष्टं ज्ञात्वा भूयः पुनः स्रावयेत् । कदा सायमपराह्णे तस्मिन् दिवसे । अथवाऽपरेऽह्नि द्वितीये दिवसे । अथवा स्नेहोपस्कृतो भावितो देहो यस्य तथाविधस्य भृशं दूषितमतिशयेन दुष्टं रक्तं पक्षादूर्ध्वं पुनः स्रावयेत् । एवमशुद्धं रक्तं यथायोगं सायमह्न्यपरे पक्षादूर्ध्वं वा प्रस्थपरिमाणमेव स्रावयेन्न ततोऽधिकमिति रक्तस्रुतौ मूमः । प्रस्थपरिमाणं च तंत्रांतरे गदितम् । वमने व विरेके च रक्तातीसारयोरपि । सार्धत्रयोदशपलं प्रस्थमाहुर्मनीषिण इति ॥ ४४ ॥

अशुद्ध रक्त का पुनः स्रावण—

वि०—यदि रक्त फिर भी अशुद्ध रहा हो तो सायंकाल में या दूसरे दिन पुनः स्नेह से शरीर को भावित करके पन्द्रह दिन पीछे रक्तमोचण करे ॥ ४४ ॥

किंचिच्छेष दुष्टरक्तं स्थापयेदुत सर्वं स्रावयेदिति संशयापनोदार्थमिदमाह—

किञ्चिद्धि शेषे दुष्टास्रे नैव रोगोऽतिवर्तते ॥ ४५ ॥
सशेषमप्यतो धार्यं न चातिस्रुतिमाचरेत्

स०—यस्मात्किंचिच्छेषे दुष्टे रक्ते नैव रोगो दुष्टरक्तोद्भवो व्याधिरतिवर्तते क्रियापथमतिक्रम्य मार्गांतरमसौ नासादयति। अतो दुष्टमपि रक्तं सशेषं धार्यम् । न दुष्टरक्तस्याऽतिस्रुतिमाचरेत् प्राणायतनत्वात् । सुश्रुतोऽप्यध्यगीष्ट—रक्तं सशेषदोषं तु कुर्यादपि विचक्षणः । नचातिप्रस्रुतं कुर्याच्छेषं संशमनैर्जयेदिति ॥ ४५ ॥

अधिक रक्तस्राव का निषेध—

वि०—थोड़ा-अशुद्ध रक्त रह भी जाय तो रोग बढ़ता नहीं—अर्थात् चिकित्सा से साध्य हो जाता है। इसलिये थोड़े दोष वाले रक्त को रोक देना ही उत्तम है, परन्तु रक्त का अतिस्राव उत्तम नहीं ॥ ४५ ॥

अथ किंचिच्छेषं रक्तमुपेक्षणीयमुत प्रतिक्रिया कापि कार्येत्याह—

हरेच्छृङ्गादिभिः शेषं प्रसादमथवा नयेत् ॥ ४६ ॥
शीतोपचारपित्तास्रक्रियाशुद्धिविशोषणैः ।
दुष्टं रक्तमनुद्रिक्तमेवमेव प्रसादयेत् ॥ ४७ ॥

स०—स्रुतशेषं दुष्टरक्तं शृंगतुंबघटिकादिभिर्हरेन्न तु सिरया। अथवा शीतोपचारेण पित्तरिक्तक्रियया शुद्ध्या वमनविरेचनादिरूपया विशोषणेन लंघनरूपेण तद् दुष्टं रक्तमनुद्रिक्तमेव प्रसादयेत्कलुषतां परित्यज्य तस्य प्रसन्नत्वमभ्युपपादयेन्न तु केवलं स्रुतशेषं रुधिरं शीतोपचारेण प्रसादयेत् । यावदनुद्रिक्तमप्रवृद्धं दुष्टं रुधिरमेवममुनैव शीतोपचारादिना प्रसादं नयेन्न तु तन्निर्हरणे सिराव्यधादिना यतनीयमनुद्रिक्तरक्तनिर्हरणस्य सापायत्वात् ॥ ४६-४७ ॥

शेष दूषित रक्त में कर्तव्य—

वि०—सिरावेध से बचे दूषित रक्त को सींग, तुम्बी, प्रच्छान आदि से निकाले अथवा शीतोपचार, रक्तपित्त चिकित्सा, वमन-विरेचनादि शुद्धि और लंघन आदि शोषण उपाय से दूषित रक्त को निर्मल करे। इसी प्रकार अप्रवृद्ध (मात्रा में न बढ़े) रक्त को भी निर्मल करे ॥ ४६-४७ ॥

रक्ते त्वतिष्ठति क्षिप्रं स्तम्भनीमाचरेत्क्रियाम् ।
रोध्रप्रियङ्गुपत्तङ्गमाषयष्ट्याह्वगैरिकैः ॥ ४८ ॥
मृत्कपालाञ्जनक्षौममषीक्षीरित्वगङ्कुरैः ।
विचूर्णयेद् व्रणमुखं पद्मकादिहिमं पिबेत् ॥ ४९ ॥
तामेव वा सिरां विध्येद्व्यधात्तस्मादनन्तरम् ।
सिरामुखं वा त्वरितं दहेत्तप्तशलाकया ॥ ५० ॥

स०—रक्ते त्वतिष्ठति स्थितिमलभमाने त्वरितमेवं स्तंभनीं क्रियां वक्ष्यमाणां कुर्यात् रक्तस्य प्राणायतनत्वात् । तदेतस्तंभनविशेषमाह—रोध्रादिभिः सिराव्रणमुखं विचूर्णयेत् । पद्मकादिहिमं शीतकषायं पिबेत् । तामेव प्राग्विद्धां सिरां तस्मात् प्राग्व्यधादनंतरमव्यवहितं विध्येत् । अथवा सिराद्वारं क्षिप्रं कृत्वाऽग्निनोपतप्तया शलाकया दहेत् ॥ ४८-५० ॥

रक्तस्राव नहीं रुकने पर स्तम्भनी क्रिया का विधान—

वि०—बहता हुआ रक्त बन्द न हो तो तुरन्त स्तम्भन चिकित्सा आरम्भ करे। इसके लिये—

लोध, पियङ्गु, पत्तंग, उड़द, मुलहठी, गेरू, मिट्टी ठीकरा; सुरमा, अलसी या सन की राख, बरगद आदि की छाल एवं कोपल इनके चूर्णों को व्रण के मुखपर छिड़के और पद्मकादि गण का हिम (शीत) पीने को देवे। पहले वेधन के ऊपर

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फिर उसी सिरा का वेधन करे; अथवा गरम की हुई शलाका से सिरामुख को तुरन्त जला देवे ॥ ४८-५० ॥

वक्तव्य—रक्त के अतिस्राव से वायु का प्रकोप होता है; उसकी चिकित्सा आवश्यक है यथा—'धातुक्षयात् स्रुते रक्ते मन्दः सञ्जायतेऽनलः। पवनश्च परं कोपं याति तस्मात् प्रयत्नतः॥ तं नातिशीतैर्लघुभिः स्निग्धैः शोणितवर्धनैः। ईषदम्लैरनम्लैर्वा भोजनैः समुपाचरेत्॥' (सु. सू. अ. १४, ३७-३८)। रक्त-पीने के लिये एण, हरिण, शश, महिष और वराह का देना चाहिये।

रक्तस्य स्रवणादनंतरं यद्विधेयं तदाह—

उन्मार्गगा यन्त्रनिपीडनेन
स्वस्थानमायान्ति पुनर्न यावत्।
दोषाः प्रदुष्टा रुधिरं प्रपन्ना
स्तावद्धिताहारविहारभाक् स्यात्॥ ५१॥

स०—यंत्रनिपीडनेनोन्मार्गगाः स्वमार्गमुल्लंध्य मार्गांतरसमाश्रयणेनोत्पथं प्रतिपन्ना दोषाः। किंभूताः। प्रदुष्टाः। तथाविधं रक्तं प्राप्ताः पुनर्यावत्स्वाश्रयं न प्रतिपद्यंते तावद्धिताहारविहारभाक् स्याद्धितावाहारविहारौ भजेत्। भजो ण्विरिति ण्विः। इंद्रवज्रा वृत्तम्॥ ५१॥

रक्तस्राव के पश्चात् कर्तव्य—

वि०—यन्त्र के दबाव के कारण अपने स्वाभाविक मार्ग को छोड़ कर दूसरे मार्ग में पहुँचे हुए तथा दूषित एवं रक्त में आये दोष जब तक अपने स्वाभाविक स्थान पर न आ जायें तब तक हितकारी आहार एवं विहार का सेवन करे॥ ५१॥

नात्युष्णशीतं लघु दीपनीयं
रक्तेऽपनीते हितमन्नपानम्।
तदा शरीरं ह्यनवस्थितासृ-
गग्निर्विशेषादिति रक्षितव्यः॥ ५२॥

स०—रक्ते स्राविते ऽन्नपानं नात्युष्णशीतं हितम्। अत्युष्णं ह्यन्नपानं रक्तं प्रदूषयेत्। अतिशीतं त्वग्निं सादयेत्। तथा लघु स्वभावतो मात्रादिना च। दीपनीयं संस्कारादिना। कुत एवमन्नपानं हितमित्याह। यस्मात्तस्मिन् काले शरीरमनवस्थितं चलितवृत्ति रक्तं यस्य शरीरस्य तदेवंभूतं भवति। तथाऽसृक् शरीरस्याऽऽधारो रक्तस्य च पित्तं पित्तस्य च वह्निः। तथा च वक्ष्यति। पित्तं वह्निरिति। तस्माद्विशेषेण महता यत्नेन वह्निर्नात्युष्णशीतादिनाऽऽहारविहारेण रक्षितव्यः॥ ५२॥

अग्निरक्षा की आवश्यकता—

वि०—पथ्य—रक्त के निकालने के बाद न तो बहुत उष्ण, बहुत शीतल खान-पान उत्तम है। खान-पान लघु और अग्निदीपक होना चाहिये। क्योंकि इस समय शरीर के धातु और दोष अस्थिर (चलायमान) होते हैं, इस समय रक्त तथा अग्नि की विशेष रूप से रक्षा करनी चाहिये॥ ५२॥

कृतसिराव्यधस्य पुरुषस्य लक्षणमंतरेणोन्मार्गगामिनां दोषाणां स्वस्थानप्रतिपत्तौ कालो नावगम्यते। न च निर्हृतदुष्टरक्तः पुरुषो लक्षणं विना ज्ञायत इति द्वयस्य परिज्ञानार्थमाह—

प्रसन्नवर्णेन्द्रियमिन्द्रियार्था-
निच्छन्तमव्याहतपक्तृवेगम्।
सुखान्वितं पुष्टिबलोपपन्नं
विशुद्धरक्तं पुरुषं वदन्ति॥ ५३॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने शिराव्यधविधिर्नाम सप्तविंशोऽध्यायः॥ २७॥

स०—वर्णश्चेंद्रियाणि च वर्णेन्द्रियाणि प्रसन्नानि वर्णेन्द्रियाणि यस्य तं प्रसन्नवर्णेन्द्रियम्। तथेंन्द्रियार्थान् शब्दादीन् स्वभावाभिप्रेतानिच्छंतमभिलषंतम्। तथा पक्तुर्वेगः सामर्थ्यम्। अव्याहतोऽनभिभूतः पक्तृवेगो यस्य तमव्याहतपक्तृवेगमविनष्टपचनवेगम्। तथा सुखान्वितमारोग्ययुक्तं प्रकृतिमापन्नम्। पुष्टिबलाभ्यां युक्तम्। एवंविधं विशुद्धरक्तं पुरुषं वदन्तीति शरीरस्य लक्षणमुक्तम्। मधुरं लवणमित्यादिना तु रक्तस्यैव विशुद्धिलक्षणमभिहितमिति। उपजातिवृत्तम्॥ ५३॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वाङ्गसुन्दराख्यायां सप्तविंशोऽध्यायः॥ २७॥

विशुद्धरक्त वाले पुरुष के लक्षण—

वि०—विशुद्ध रक्त का लक्षण—जिसके वर्ण और इन्द्रियाँ निर्मल हों, इन्द्रियों के विषयों में जिसे कामना हो, जाठराग्नि की शक्ति अव्याहत हो, आरोग्य से युक्त पुष्टि एवं बल से सम्पन्न पुरुष को विशुद्ध रक्त वाला कहते हैं॥ ५३॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का शिराव्यधविधि नामक सत्ताईसवाँ अध्याय समाप्त हुआ॥२७॥

अष्टाविंशतितमोऽध्यायः

सिराव्यधविधेरनंतरं शल्याहरणविधिरारभ्यते—

अथातो शल्याहरणविधिमध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

स०—यतः सिराव्यधाऽध्याये शल्यरूपस्य रक्तस्य सकलकायव्यापिनः सिराव्यधोपायेन निर्हरणमुक्तमिदानीं प्रादेशिकस्य लोहादेः शल्यस्य प्रतिदेशस्थितस्य लक्षणं निर्हरणोपायाश्चिाऽस्मिन्नध्याये शल्याहरणविधौ निर्दिश्यत इत्याह।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—अब इसके आगे शल्य आहरण विधि नामक अध्याय का व्याख्यान करेंगे, जैसा कि आत्रेय आदि महर्षियों ने कहा था।

वक्रर्जुतिर्यगूर्ध्वाधः शल्यानां पञ्चधा गतिः।

स०—वक्रादिभेदभिन्ना शल्यानां पंचप्रकारा गतिर्गमनम्। कदाचिच्छल्यानि वक्रं कृत्वा तिर्यग्वोर्ध्वं वाऽधो वा गच्छंति। कदाचिदृजु कृत्वा। एवमुभयथा तिर्यगूर्ध्वाधोभेदगमनाच्छल्यानां पंचधा गतिः।

शल्यों की पाँच गतियाँ—

वि०—शल्यों की गति पाँच प्रकार से होती है—वक्र (टेढ़ी), ऋजु (सीधी), तिर्यक (तिरछी), ऊर्ध्व (ऊपर) और अधः (नीचे)। [शल्य का लक्षण—'शरीराबाधकरं शल्यम्। सुश्रुत. सू. अ., २६]

सशल्यः कथं वेद्य इत्याह—

श्यामं शोफरुजावन्तं स्रवन्तं शोणितं मुहुः॥ १॥
अभ्युद्गतं बुद्बुदवत्पिटिकोपचितं व्रणम्।
मृदुमांसं च जानीयादन्तःशल्यं समासतः॥ २॥

स०—एवंविधं व्रणमंतःशल्यं विजानीयात्। समासतः संक्षेपेण श्यामं श्यामवर्णम्। तथा शोफं शोफान्वितम्। रुजान्वितम्। तथा मुहुः शोणितं स्रवंतम्। तथाऽभ्युद्गतमाभिमुख्येनोर्ध्वमुच्छ्रितमुन्नतम्। तथा बुद्बुदेन तुल्यं वर्त्तते बुद्बुदवत्। तथा पिटकैरुपचितं व्याप्तं। तथा मृदुमांसं कोमलमांसम्॥ १-२॥

अन्तःशल्यज्ञान विधि—

वि०—अन्तःशल्य के लक्षण—सामान्यतः श्याम वर्ण, शोफ और पीड़ा युक्त; बार-बार रक्त को बहाने वाले; चारों ओर से ऊपर को उठे; बुलबुले के समान छोटी छोटी पिटिकाओं से भरे तथा कोमल माँस वाले व्रण को शल्ययुक्त समझना चाहिये॥ १-२॥

इति सामान्येनांतःस्थितस्य शल्यस्य लक्षणमुक्त्वा त्वगादिगतस्य लक्षणमाह—

विशेषात्त्वग्गते शल्ये विवर्णः कठिनायतः।
शोफो भवति मांसस्थे चोषः शोफो विवर्द्धते॥ ३॥
पीडनाक्षमता पाकः शल्यमार्गो न रोहति।

स०—सामान्यलक्षणं पूर्वोक्तमंतःशल्यस्य सर्वत्र विद्यते। विशेषेण पुनस्त्वग्गते शल्ये शोफो विवर्णस्तथा कठिनो दीर्घश्च स्यात्। मांसगते शल्ये चोषः स्यात्। सर्वांगीणस्तीव्रोऽरतिमान् दाहश्चोष उच्यते। तथा शोफो विवर्धते। तथा पीडनस्याऽक्षमत्वं पाकश्च। शल्यमार्गश्च रोहं न याति॥ ३॥

त्वग्गत तथा माँसगत का लक्षण—

वि०—विशेष करके त्वग्गत शल्य में तथा उसमें विवर्णता होती है। माँस-स्थित शल्य में चोष (जलन) होता है और शोफ बढ़ता है; दबाने पर असहिष्णुता (Tenderness) और पाक होता है और शल्यमार्ग भरता नहीं। [चोष-सब अङ्गों में होने वाला, बेचैनी करने वाला, तीव्र दाह चोष कहलाता है]॥ ३॥

पेश्यन्तरगते मांसप्राप्तवच्छ्वयथुं विना॥ ४॥
आक्षेपः स्नायुजालस्य संरम्भस्तम्भवेदनाः।
स्नायुगे दुर्हरं चैतत् सिराध्मानं सिराश्रिते॥ ५॥

स०—पेशीमध्यगते मांसगतेन तुल्यं लक्षणं श्वयथुं वर्जयित्वा। मांसावयवविशेषो दीर्घत्वाकृतिः पेशीत्युच्यते। स्नायुगे शल्ये स्नायुजालस्याऽऽक्षेपाद्याः स्युः। आक्षेप आकर्षणम्। संरंभः क्षोभः। स्तंभः स्तब्धता। वेदना शूलम्। तच्च स्नायुगं शल्यं दुःखेन निर्हर्तुं शक्यते। सिराश्रिते शल्ये सिराणामानाहः स्यात्॥ ४-५॥

पेशी-स्नायु-सिरागत शल्य का लक्षण—

वि०—शल्य के पेशी में होने पर—माँसस्थ शल्य की भाँति सब लक्षण होते हैं; परन्तु सूजन नहीं होती। स्नायु में शल्य होने पर-आक्षेप, स्नायुजाल में क्षोभ, जड़ता और वेदना होती है और यह शल्य कठिनाई से निकलता है। सिरा में आश्रित शल्य में सिरा में आध्मान (फूलना) होता है॥ ४-५॥

स्वकर्मगुणहानिः स्यात्स्रोतसां स्रोतसि स्थिते।

स०—स्रोतोगते शल्ये स्रोतसां स्वकर्मगुणयोर्हानिः स्यात्। यथा कण्ठस्रोतसि स्थिते शल्ये पानाभ्यवहरणस्य निरोधो जायते। गुणोपि यस्तस्याऽप्रदुष्टत्वादिलक्षणः सोऽप्यस्य हीयत इति। एवमन्येषां स्वकर्मगुणहानिर्व्याख्येया। अवाक्त्वं चेति योज्यम्।

स्रोतोगत शल्य का लक्षण—

वि०—स्रोतों में शल्य होने पर उस स्रोत के कर्म एवं गुणों की हानि होती है।

धमनीस्थेऽनिलो रक्तं फेनयुक्तमुदीरयेत्॥ ६॥
निर्याति शब्दवान् स्याच्च हृल्लासः साङ्गवेदनः।

स०—धमनिस्थे शल्ये वायुर्लोहितं सफेनं प्रेरयेत्॥ ६॥

धमनीगत शल्य का लक्षण—

वि०—धमनी में शल्य होने पर वायु झागदार रक्त को बाहर प्रेरित करती है और शब्द के साथ वायु बाहर आती है; रोगी को हृल्लास तथा अङ्गों में वेदना होती है॥ ६॥

सङ्घर्षो बलवानस्थिसन्धिप्राप्तेऽस्थिपूर्णता॥ ७॥
नैकरूपा रुजोऽस्थिस्थे शोफः—

स०—तथा सशब्दो मरुन्निर्याति। हृल्लासश्चांगपीडायुक्तः स्यात्। अस्थिसंधिप्राप्ते शल्ये बलवान् संघर्षः क्षोभः स्यात्। तथाऽस्थिपूर्णता च जायते। अस्थिस्थे शल्येऽनेकाकारा नानाविधा रुजो भग्नरुग्णमृदितपीडितावनुन्नप्रायाः स्युः शोफश्च॥ ७॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि०—अस्थि-सन्धि में शल्य होने पर बलवान क्षोभ होता है और अस्थि भरी अनुभव होती है, अस्थि में शल्य होने पर नाना प्रकार की (भग्न, रुग्ण, मृदित, पिच्चित, पीडित आदि) वेदनायें होती हैं और सूजन होती है ॥ ७ ॥

—तद्वच्च सन्धिगे ।

चेष्टानिवृत्तिश्च भवेत्—

स०—संधिगते शल्ये तद्वदेवाऽस्थिस्थशल्येन तुल्यं लक्षणं संधिस्थशल्याक्रांतावयवस्य । तथा चेष्टाया व्यापारस्य निवृत्तिरुपरमश्च स्यात् । पूर्वमस्थिसंधिगतस्य शल्यस्य लक्षणमुक्तम् । अधुनाऽनस्थिशरीरसंधिगतशल्यस्य लक्षणम् । अन्यो हि शरीरसंधिः । तथा च राजयक्ष्मनिदाने वक्ष्यति । शरीरसंधीनाविश्येति ।

सन्धिगत शल्य का लक्षण—

वि०—सन्धिगत शल्य में (अस्थिसन्धि से अन्य संधियों में) अस्थिगत शल्य के लक्षण तथा चेष्टा का न होना लक्षण होता है ।

आटोपः कोष्ठसंश्रिते ॥ ८ ॥

आनाहोऽन्नशकृन्मूत्रदर्शनं च व्रणानने ।

स०—कोष्ठमुदरमाश्रिते शल्य आटोपः क्षोभस्तथाऽऽनाहो जठराध्मानम् । तथा व्रणमुखेऽन्नशकृन्मूत्रदर्शनं स्यात् ॥ ८ ॥

कोष्ठगत शल्य का लक्षण—

वि०—कोष्ठ में आश्रित शल्य में—आटोप, आनाह तथा व्रण के मुख से (भिन्न अवयव के अनुसार) अन्न, मल और मूत्र का दर्शन (निकलना) होता है ॥ ८ ॥

विद्यान्मर्मगतं शल्यं मर्मविद्धोपलक्षणैः ॥ ६ ॥

स०—मर्मस्थं शल्यं मर्मविद्धोपलक्षणैर्विद्यात् । मर्मविद्धस्य च लक्षणं संग्रहे कथितम् । यथा । देहप्रसुप्तिर्गुरुता संमोहः शीतकामता । स्वेदो मूर्च्छा वमिः श्वासो मर्मविद्धस्य लक्षणमिति ॥ ९ ॥

मर्मगत शल्य का लक्षण—

वि०—मर्मगत शल्य को मर्म के विद्ध होने के लक्षणों से पहचानना चाहिये । [मर्म के विद्ध होने के लक्षण-देहप्रसुप्तिर्गुरुता सम्मोहः शीतकामिता । स्वेदो मूर्च्छा वमिः श्वासो मर्मविद्धस्य लक्षणम्] ॥ ९ ॥

यथास्वं च परिस्रावैस्त्वगादिषु विभावयेत् ।

स०—न केवलं सामान्यलक्षणेन जठराध्मानादिना तथा त्वगादिस्थशल्यविशेषलक्षणेन त्वगादिस्थं शल्यं लक्षयेत् यावद्यथास्वं परिस्रावैस्तथारूपैर्विभावयेत् ।

त्वगादिस्थ शल्यज्ञान के अन्य उपाय—

वि०—त्वचा आदि में स्थित शल्य को उनके अपने-अपने स्रावों से भी पहचाने [यथा=त्वग्गत में लसीका; सिरादिगत में रक्त, अस्थिगत में मज्जा का स्राव होता है] ।

रुह्यते शुद्धदेहानामनुलोमस्थितं तु तत् ॥ १० ॥

स०—तत्प्राङ्निर्दिष्ठ शल्यं रुह्यते रोहं याति । किंभूतानां पुंसाम् । वमनविरेचनादिभिः शुद्धदेहानाम् । रुह्यत इति कर्मकर्तरीति केचित् । तच्च न युक्तम् । यतः कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवति । न कर्मस्थभावकानां न च कर्तृस्थक्रियाणामित्युक्तम् । रुहिश्च कर्तृस्थक्रियः । तस्माद्रोहतीतिरुट् । रुहिवाचरतीति क्वंतोऽयम् । रूढाभासो ह्ययं न तु सम्यग्रूढः । तथाच वक्ष्यति । दोषकोपेत्यादि । तस्मादस्य रूढाभासत्वादेषा व्युत्पत्तिर्युक्ता ॥ १० ॥

शल्य का रोहणादि—

वि०—वमन, विरेचनादि से (या स्वभावतः) शुद्ध शरीर वाले पुरुषों में अनुलोम रूप में स्थित शल्य स्वयमेव भरा हुआ प्रतीत होता है (वास्तव में भरता नहीं[1]) ॥१०॥

दोषकोपाभिघातादिक्षोभाद् भूयोऽपि बाधते ।

स०—यतस्तच्छल्यमसम्यग्रूढत्वाद् भूयोऽपि बाधते । प्राक्कृतबाधमपि पीडां जनयति । कुतो हेतोरित्याह । दोषकोपश्चाऽभिघातश्च तावादी येषां कर्मणां धावनलंघनादिशीलानां त एवं तैः क्षोभः संरंभस्तस्माद्दोषकोपक्षोभादभिघातादिक्षोभाद्बाधते ।

रूढ अन्तःशल्य से भी पुनः पीडा—

वि०—दोष के प्रकोप से या चोट आदि के लगने से उत्पन्न विक्षोभ के कारण वह (रूढ) शल्य पुनः पीडा करने लगता है ।

त्वगादिनष्टे शल्ये मिथ्यारूढत्वाददृश्यतां प्राप्ते सति परिज्ञानार्थमिदमाह—

त्वङ्नष्टे यत्र तत्र स्युरभ्यङ्गस्वेदमर्दनैः ॥ ११ ॥

रागरुग्दाहसंरम्भा यत्र चाज्यं विलीयते ।

आशु शुष्यति लेपो वा तत्स्थानं शल्यवद्वदेत् ॥ १२ ॥

स०—तत्र तेषु त्वङ्नष्टादिषु शल्येषु मध्येषु त्वङ्नष्टं यत्र प्रदेशे स्यात्तत्स्थानेऽभ्यंगादिभिर्लौहित्यशूलदाहक्षोभाः स्युः । यत्र वा स्थाने घृतं स्त्यानं यौजितं विलीयते तत्स्थानं शल्यवत् सत्यं वदेत् । अथवा लेपश्चंदनादिना दत्तो यत्राशुेव शुष्यति तत्स्थानं त्वग्देशं शल्यवज्जानीयात् ॥ ११-१२ ॥

त्वङ्नष्ट शल्य का ज्ञान—

वि०—त्वचा आदि में शल्य नष्ट हो (छिपा हो) तो अभ्यंग, स्वेदन या मर्दन करने से जहाँ पर लालिमा, वेदना दाह या सूजन का अनुभव हो; और जहाँ पर लगाया हुआ

---

१. जब कभी शल्य में संक्रमण का सम्बन्ध नहीं होता जिसे अंग्रेजी में असेप्टिक फारेन बाडीज (Aseptic Foriegn bodies) कहते हैं—तथा रोगी का शरीर भी शुद्ध अर्थात् स्वस्थ और रोगक्षम रहता है तो शल्य के चारों ओर रोहण धातु बन जाती है और वह शल्य बिना किसी कष्ट के धातु में लीन पड़ा रहता है । किन्तु उत्तेजक कारण या अनुकूल परिस्थिति में पुनः शोथ, पाक आदि द्वारा कष्ट देता है । ऐसे ही छिपे हुए शल्यों को 'व्रणशल्य' कहते हैं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घी पिघल जाये; अथवा जहाँ का लेप जल्दी सूख जाये; उस स्थान को शल्य से युक्त समझना चाहिये ॥ ११-१२ ॥

मांसप्रणष्टं संशुद्ध्या कर्शनाच्छ्लथतां गतम् ।
क्षोभाद्रागादिभिः शल्यं लक्षयेत्—

स०—मांसप्रनष्टमदृश्यतां प्राप्तं संशुद्ध्या वमनविरेचनादिकया यत्कर्शनं कृशत्वं तस्मात् श्लथतां शिथिलत्वं प्राप्तं क्षोभादनेकप्रकाराद्वेदनारूपात्तथा रागादिभिर्लक्षयेत् ।

मांस में नष्ट शल्य का ज्ञान—

वि०—मांस में नष्ट हुए शल्य को वमन आदि शुद्धि के द्वारा रोगी के कृश हो जाने से ढीले हुए शल्य द्वारा होने वाले विक्षोभ, रक्तिमा आदि से जाने।

—तद्वदेव च ॥ १३ ॥
पेश्यस्थिसन्धिकोष्ठेषु नष्टम्—

स०—तेन मांसप्रनष्टेन तुल्यं वर्तते । यया शुद्ध्या कर्शनात् श्लथतां गतं क्षोभाद्रागादिभिर्लक्षयेदिति ॥ १३ ॥

पेश्यादि में नष्ट शल्य का ज्ञान—

वि०—पेशी, अस्थि, सन्धि और कोष्ठ में छिपे शल्य को मांस में छिपे शल्य की भाँति पहचाने ॥ १३ ॥

—अस्थिषु लक्षयेत् ।
अस्थ्नामभ्यञ्जनस्वेदबन्धपीडनमर्दनैः ॥ १४ ॥

स०—अस्थिषु नष्टं शल्यमस्थ्नामभ्यंजनस्वेदनबंधनपीडनमर्दनैः ॥ १४ ॥

अस्थियों में नष्ट शल्य का ज्ञान—

वि०—अस्थि में छिपे शल्य को अस्थियों के अभ्यंग, स्वेदन, बन्धन-पीडन और मर्दन से होने वाले क्षोभ, पीड़ा आदि से पहचाने ॥ १४ ॥

प्रसारणाकुञ्चनतः सन्धिनष्टं तथाऽस्थिवत् ।

स०—प्रसारणाऽऽकुंचनतो लक्षयेत् । संधिनष्टं शल्यमस्थिदृष्टवल्लक्षयेत् ।

सन्धियों में नष्ट शल्य का ज्ञान—

वि०—सन्धि में नष्ट शल्य को प्रसारण एवं संकोचन तथा अभ्यंग-स्वेदन आदि से तथा अस्थि में नष्ट शल्य की भाँति पहचाने।

नष्टे स्नायुसिरास्रोतोधमनीष्वसमे पथि ॥ १५ ॥
अश्वयुक्तं रथं खण्डचक्रमारोप्य रोगिणम् ।
शीघ्रं नयेत्ततस्तस्य संरम्भाच्छल्यमादिशेत् ॥ १६ ॥

स०—स्नायुशिरास्रोतोधमनीषु नष्टे शल्येऽसमे पथि विषमे मार्गे रथमारोप्य रोगिणं शल्यवंतं शीघ्रं नयेदाश्वेव देशांतरं प्रापयेत् । किंभूतं रथम् । खंडं चक्रं यस्य स खंडचक्रस्तं खंडचक्रम् । ततस्तस्य रथस्य संरंभात् क्षोभाच्छल्यमादिशेल्लक्षयेत् ॥ १५-१६ ॥

स्नायु-सिरादि में नष्ट शल्य का ज्ञान—

वि०—स्नायु, सिरा, स्रोत एवं धमनी में छिपे शल्य को पहचानने के लिये रोगी को टूटे पहिये वाले रथपर बिठाकर विषम मार्ग में घोड़ों द्वारा तेजी से ले जाये । इस प्रकार ले जाने से उसे जहाँ पर शोथ; या विक्षोभ हो, वहाँ शल्य समझे ॥ १५-१६ ॥

मर्मनष्टं पृथङ्नोक्तं तेषां मांसादिसंश्रयात् ।

स०—मर्मनष्टं शल्यं पृथङ्नाभिहितम् । कुतः तेषां मर्मणां मांसादौ एव प्राङ्निर्दिष्टो यतः संश्रयो न तु पृथङ् मर्माणि विद्यन्ते । तथा च संग्रहे । मर्मप्रनष्टेऽप्यनन्यभावान्मांसादिभ्यो मर्मणामुक्तं परीक्षणं भवतीति ।

मर्मों में नष्ट-शल्य की पृथक् अनुक्ति का हेतु—

वि०—मर्मों में नष्ट शल्य के लक्षण अलग नहीं कहे, क्योंकि मर्म, मांस सिरा, स्नायु आदि से पृथक् नहीं हैं (इसलिये इन से ही मर्म के लक्षण भी समझना।)

एवं विशेषेण नष्टशल्यलक्षणमुक्त्वा सामान्येन नष्टशल्यं लक्षयितुमाह—

सामान्येन सशल्यं तु क्षोभिण्या क्रियया सरुक् ॥ १७ ॥

स०—सामान्येन सशल्यं तु क्षोभिण्या क्रियया संरंभोत्पादकेन कर्मणा श्वसनप्राणायामादिकेन यत्सरुक्स्थानं तत्सशल्यं जानीयात् ॥ १७ ॥

नष्ट शल्य का सामान्य ज्ञान—

वि०—सामान्यतः विक्षोभ वाली क्रिया से जिस स्थान पर वेदना हो उस स्थान को शल्य-युक्त समझना चाहिये ॥ १७ ॥

वृत्तं पृथु चतुष्कोणं त्रिपुटं च समासतः ।
अदृश्यशल्यसंस्थानं व्रणाकृत्या विभावयेत् ॥ १८ ॥

स०—वृत्तं वर्तुलम् । पृथु पार्श्वाभ्यां यत्परिच्छिद्यते । चतुष्कोणं चतुरस्रम् । त्रिपुटं त्र्यस्रम् । समासतः संक्षेपेणाऽदृश्यस्यानुपलब्धस्य शल्यस्य संस्थानमाकृतिं व्रणाकृत्या व्रणसंस्थानेन विभावयेद्विद्यात् ॥ १८ ॥

व्रणाकृति से शल्याकृति का ज्ञान—

वि०—संक्षेप से शल्य-गोल, चिपटा, चौकोर या त्रिकोण होता है । अदृश्य शल्य के आकार को व्रण की आकृति से जाने ॥ १८ ॥

अधुनैषामाकर्षणोपायं निरूपयन्नाह—

तेषामाहरणोपायौ प्रतिलोमानुलोमकौ ।
अर्वाचीनपराचीने निर्हरेत्तद्विपर्ययात् ॥ १९ ॥
सुखाहार्यं यतश्छित्त्वा ततस्तिर्यग्गतं हरेत् ।

स०—तेषामदृश्यानां शल्यानामाकर्षणोपायौ द्वौ प्रतिलोमानुलोमकौ । प्रतिलोमः शरीरांतःप्रवेशविपर्ययः । अनुलोमः शरीरांतःप्रवेशानुगतः । प्रतिलोमानुलोमयोर्विनिर्हरणविषयमाह—तयोः प्रतिलोमानुलोमयोर्विपर्ययस्तद्विपर्ययस्तस्माद्विपर्ययादर्वाचीनपराचीने निर्हरेत् । प्रतिलोमेऽर्वाचीनमानयेदनुलोमे पराचीनमानयेदित्यर्थः । तिर्यग्गतं शल्यं यतो यस्माद्देहदेशाच्छित्त्वा विलुब्ध्य सुखाहार्यं संपद्यते सुखेनाहर्तुं शक्यते ततस्तस्माद्देहदेशाच्छित्त्वोद्धरेत् । छित्त्वेत्यत्र यद्यपि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कर्म किंचिन्न निर्दिष्टं तथापि त्वङ्मांसादीनां योग्यत्वात्तेषामेव कर्मत्वं बोध्यम् । मांसादि छित्वोद्धरेदित्यर्थः ॥ १९ ॥

शल्यकर्षण के उपाय—

वि०—शल्य को निकालने के उपाय—प्रतिलोम लाना और अनुलोम लाना है। [शरीर में जाने के मार्ग से विपरीत मार्ग से लाना प्रतिलोम (पीछे की ओर खींच लेना) और शरीर के अन्दर जाने के मार्ग से भी निकालना (जिस दिशा में शल्य घुसा है उसी दिशा में उसे और बढ़ाकर दूसरी ओर से निकालना) अनुलोम है]।

अर्वाचीन रूप से गया हो उसे प्रतिलोम गति से बाहर निकाले, प्रतिलोम को अर्वाचीन गति से निकाले। (हेमाद्रि-के अनुसार-अर्वाचीन-अधोगत—इससे विपरीत ऊर्ध्वगति से निकाले। पराचीन-ऊर्ध्वगति-इससे विपरीत अधोगति से निकाले। ऊर्ध्व निर्हरण का नाम प्रतिलोम; अधोमार्ग का नाम अनुलोम है।)

तिर्यग्—तिरछा गये शल्य को सुखपूर्वक निकालने के लिये मांस आदि का छेदन जैसा योग्य हो वैसा करके उसे निकाले ॥ १९ ॥

शल्यं न निर्घात्यमुरःकक्षावङ्क्षणपार्श्वगम् ॥ २० ॥
प्रतिलोममनुत्तुण्डं छेद्यं पृथुमुखं च यत् ।

स०—शल्यमुरोगतमुरःस्थं कक्षास्थं वंक्षणस्थं पार्श्वस्थं न निर्घात्यं तन्न निर्घातनीयम् । तथा प्रतिलोममननुलोमगतं तथानुत्तुण्डं बाह्ये बुद्बुदवन्नोन्नतं तथा छेद्यं शल्यं न निर्घात्यमहार्यम् । तथा पृथुमुखं विस्तीर्णाननं च न निर्घातनीयम् ॥ २० ॥

अनिर्घातनीय शल्य—

वि०—छाती, कक्षा, वंक्षण और पार्श्वगत प्रतिलोम और अनुतुण्ड (जो पानी के बुलबुले की भाँति उन्नत न हो अथवा जिनका मुख दिखाई न देवे) छेदन योग्य तथा विस्तीर्ण मुख वाले शल्य पर चोट नहीं करनी चाहिये ॥ २० ॥

न च सर्वमेव शल्यमाहरणीयमित्याह—

नैवाहरेद्विशल्यघ्नं नष्टं वा निरुपद्रवम् ॥ २१ ॥

स०—विशल्यं हंतीति विशल्यघ्नम् । तावज्जीवति यावत्सशल्यः । शल्यापाये तु म्रियते तन्नाहरेदेव । विशल्यस्य प्राणहरत्वात् । एतत्स्वरूपं च मर्मविभागे स्पष्टं कृत्वा वक्ष्यते । नष्टं वेति वाशब्दश्चार्थे । नष्टमदृश्यतां प्राप्तं च यन्निरुपद्रवं तन्निमित्तरोगरहितं नाहरेत् । प्रत्यवायभयात् । करप्राप्यं हस्तप्राप्यं शल्यं करणैवाऽऽहरेन्नापरेण कंकमुखादिना ॥ २१ ॥

निकालने के अयोग्य शल्य—

वि०—विशल्यघ्न मर्म में स्थित, वा जो शल्य अदृश्य और उपद्रव रहित हो उसे भी न निकाले (विशल्यघ्न कर्म-जिन अङ्गों में शल्य रहने पर रोगी जीता है; किन्तु निकालने से मर जाता है। यथा—'उत्क्षेपौ स्थपने त्रीणि विशल्यघ्नानि') ॥ २१ ॥

अथाहरेत्करप्राप्यं करेणैवेतरत्पुनः ।
दृश्यं सिंहाहिमकरवर्मिकर्कटकाननैः ॥ २२ ॥

स०—इतरदकरप्राप्यं तु शल्यं दृश्यं सिंहमुखादिभिर्यंत्रैराहरेत् ॥ २२ ॥

हस्तप्राप्यादि दृश्य शल्यों का निकालना—

वि०—हाथ से पकड़े जाने योग्य शल्य को हाथ से ही पकड़ कर निकाले। दूसरी प्रकार का शल्य जो हाथ से न पकड़ा जा सके परन्तु आँख से दीखता हो उसे सिंह, अहि, मकर, वर्मि और कर्कटक मुख वाले यन्त्रों से पकड़कर निकाले ॥ २२ ॥

अदृश्यं व्रणसंस्थानाद् ग्रहीतुं शक्यते यतः ।
कङ्क-भृङ्गाह्व-कुरर-शरारी-वायसाननैः ॥ २३ ॥

स०—अदृश्यं पुनः शल्यं व्रणस्य संस्थानादाकलय्य कंकमुखादिभिर्ग्रहीतुं शक्यते यतस्ततस्तच्छस्त्रैर्हरेत्। यत्तदोर्नित्यसंबंधात्तदो लाभः ॥ २३ ॥

अदृश्य शल्यों का निकालना—

वि०—अदृश्य शल्य को कंक, भृङ्ग, कुरर, शरारि एवं वायसमुख यन्त्रों से व्रणमुख में से पकड़ सकते हैं—अतः इनसे पकड़कर निकाले ॥ २३ ॥

सन्दंशाभ्यां त्वगादिस्थं तालाभ्यां सुषिरं हरेत् ।
सुषिरस्थं तु नलकैः शेषं शेषैर्यथायथम् ॥ २४ ॥

स०—त्वगादिस्थं शल्यं संदंशाभ्यां निर्हरेत्। आदिग्रहणात्त्वक्सिरास्नायुमांसादीनां ग्रहणम् । सुषिरं यच्छल्यं त्वगादिस्थं तत्तालाभ्यां हरेन्न संदंशाभ्याम् । शुषिरस्थं पुनः शल्यं नलकैर्नाडीयंत्रैराकर्षेत्। शेषं शल्यं शेषैर्यंत्रैर्यथायोगमाहरेत् ॥ २४ ॥

त्वक् आदि में स्थित शल्यों का निकालना—

वि०—त्वचा आदि में स्थित शल्य को सन्दंशों से पकड़कर निकाले। पोले शल्य को तालयन्त्रों से निकाले। खोखले स्थानों में स्थित शल्य को नाड़ीयन्त्रों से निकाले। शेष शल्यों को यथायोग्य शेष यन्त्रों से निकाले ॥ २४ ॥

शस्त्रेण वा विशस्यादौ ततो निर्लोहितं व्रणम् ।
कृत्वा घृतेन संस्वेद्य बद्ध्वाऽऽचारिकमादिशेत् ॥ २५ ॥

स०—शस्त्रेण वा पूर्वं विशस्य मांसादींश्छित्वा ततोऽनंतरमपनीतरक्तं व्रणं विधाय सर्पिषा स्वेदयित्वा वस्त्रपट्टादिना सर्पिर्मधु बद्ध्वा आचारिकं स्नेहविध्युक्तमुष्णोदकोपचारी स्यादित्याचारिकमादिशेत् कथयेत् ॥ २५ ॥

शस्त्रद्वारा छेदन—

वि०—अथवा प्रथम शस्त्र से माँस आदि को काटकर (शल्य को निकाले)। पीछे रक्त को साफ कर व्रण को स्वच्छ बनाकर घी से व्रण पर स्वेद देवे। स्वेद देकर व्रण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पर (घी-मधु लगाकर) पट्टी बाँध दे और आचार-नियम (पथ्यापथ्य-आहार-विहार) को कहे ॥ २५ ॥

सिरास्नायुविलग्नं तु चालयित्वा शलाकया ।

स०—सिरास्नायुविलग्नं पुनः शल्यं शलाकया चालयित्वा शिथीलीकृत्याहरेत् ।

सिरा-स्नायुगत शल्य का निकालना—

वि०—सिरा-स्नायु में फँसे शल्य को शलाका से हिला-डुला कर ढीला करके निकाले ।

हृदये संस्थितं शल्यं त्रासितस्य हिमाम्बुना ॥ २६ ॥
ततः स्थानान्तरं प्राप्तमाहरेत्तद्यथायथम् ।
यथामार्गं दुराकर्षमन्यतोऽप्येवमाहरेत् ॥ २७ ॥

स०—हृदये यदाश्रितं शल्यं तच्छीतजलेन त्रासितस्य स्थानांतरगतं ज्ञात्वा यथायथं यथास्वं विशिष्टयंत्रनिर्हरेत् । अन्यतोऽप्यन्यदेशस्थमपि शल्यं दुराकर्षं दुःखेनाकृष्टुं शक्यते तत्स्वमार्गं नयेत् तदेवमेवाहरेत् । यथा हृदयस्थं शल्यं स्थानांतरं प्राप्तं निर्हार्यं तथा यथामार्गं मार्गानतिक्रमेणान्यदेशस्थमपि शल्यमाकर्षणीयम् ॥ २६-२७ ॥

हृदयगत शल्य का निकालना—

वि०—हृदय में आश्रित कठिनाई से खींचने योग्य शल्य में, रोगी को शीतल जल से भयभीत (उद्विग्न) बनाकर जब शल्य दूसरे स्थान पर पहुँच जाये तब यथायोग्य यन्त्रों से मार्गानुरूप शोधन से निकाले । कठिनाई से खींचने योग्य अन्य शल्यों को भी इसी प्रकार अपने मार्ग में लाकर निकाले ॥ २६-२७ ॥

अस्थिदष्टे नरं पद्भ्यां पीडयित्वा विनिर्हरेत् ।
इत्यशक्ये सुबलिभिः सुगृहीतस्य किङ्करैः ॥ २८ ॥

स०—अस्थिदष्टेऽस्थ्नि दष्टे स्पष्टे सति शल्ये नरं बलवंतं पद्भ्यां पीडयित्वा आक्रम्य तच्छल्यं विनिर्हरेत् । अस्थिनष्ट इति वा पाठः ॥ इत्यशक्येऽनेनाऽपि प्रकारेणाक्रष्टुमशक्ये शल्ये किंकरैर्भृत्यैर्महाबलैः संगृहीतस्य सुष्ठ्ववष्टब्धस्य नरस्य शल्यं वैद्यः कंकमुखादिना निर्हरेत् ॥ २८ ॥

अस्थ्यादिगत शल्यों का निकालना—

वि०—अस्थि में लगे शल्य में पाँव से मनुष्य को दबाकर शल्य खींचे यदि इस प्रकार से भी शल्य न निकले तो बलवान नौकरों से रोगी को पकड़वाकर तब खींच कर निकाले ॥२८॥

तथाऽप्यशक्ये वारङ्गं वक्रीकृत्य धनुर्ज्यया ।
सुबद्धं वक्त्रकटके बध्नीयात्सुसमाहितः ॥ २९ ॥
सुसंयतस्य पञ्चाङ्ग्या वाजिनःकशयाऽथ तम् ।
ताडयेदिति मूर्धानं वेगेनोन्नमयन् यथा ॥ ३० ॥
उद्धरेच्छल्यम्—

स०—तथाप्यशक्य एवमपि शल्यं आहर्तुमशक्ये वारंगं शस्त्रादिमयस्य शल्यस्य शिखाकारं तद्वक्रीकृत्य कुटिलतां प्रापय्य ततो धनुर्ज्यया स्नाय्वादिमय्या सुबद्धं कृत्वाऽनंतरं वाजिनोऽश्वस्य वक्त्रकटके बध्नीयाद्वैद्यः । किंभूतः । सुसमाहितस्तद्गतमनाः । किंभूतस्य वाजिनः । सुसंयतस्य सुष्ठु शोभनं कृत्वा बद्धस्य । कथं सुसंयतस्य । पंचांग्या पंचानामंगानां चतुर्णां पादानां मुखसहितानां समाहारः पंचांगी बंधविशेषस्तया पंचांग्या बद्धस्यानंतरं वाजिनं कशया चर्मबध्र्या इत्येवं ताडयेत् । यथा स वाजी मूर्धानमुन्नमयन्नुत्क्षिपन् वेगेन बलेनाऽऽक्रांत्या शल्यमुद्धरेत् ॥ २९-३० ॥

धनुष की डोरी आदि बाँधकर शल्य का निकालना—

वि०—इससे भी यदि शल्य न निकले तब लोहे आदि के बने हत्थे (आदि शल्य) को टेढ़ा करके धनुष की ज्या के साथ भली प्रकार बाँध दे । अब इसको घोड़े की लगाम में वैद्य भली प्रकार सावधानी से बाँध देवे । घोड़े के चारो पैर और मुख इन पाँचों को पंचांगी बन्धन से भली प्रकार बाँधकर वैद्य उस घोड़े को इस प्रकार चाबुक मारे जिससे घोड़ा वेग से मुख को ऊँचा उठाये इस प्रकार करने से शल्य बाहर निकल आयेगा ॥ २९-३० ॥

—एवं वा शाखायां कल्पयेत्ततः ।

स०—अथवैवमनेन प्रकारेण वारंगं वक्रतां नीत्वा धनुर्ज्यया सुबद्धं संपाद्य सुसमाहितो भिषग्वृक्षस्य शाखामानमय्य धनुर्ज्यया सुबद्धं तस्यां बध्नीयाच्छल्याकर्षणार्थम् । अत्र च या शाखा किंकरहस्तादिमुक्तमात्रोर्ध्वमुन्नमय्य मनाक् शल्यमुद्धरति तादृशी कल्पनीया ।

वि०—यही क्रिया वृक्ष की शाखा में करे (अर्थात् शाखा को झुकाकर उसकी रस्सी द्वारा शल्य के हत्थे में बाँध देवे । अच्छी प्रकार बँध जाने पर शाखा को छोड़ दे । शाखा झटके में जब ऊपर जायेगी, तो शल्य भी निकल आयेगा) ।

बद्ध्वा दुर्बलवारङ्गं कुशाभिः शल्यमाहरेत् ॥ ३१ ॥
श्वयथुग्रस्तवारङ्गं शोफमुत्पीड्य युक्तितः ।

स०—दुर्बलं तनु वारंगं यस्य शल्यस्य तच्छल्यं कुशाभिर्वंशादिकंबिकाभिर्बद्ध्वा शल्यमाहरेत् । श्वयथुना ग्रस्तमाच्छादितं वारंगं यस्य शल्यस्य तच्छल्यमाहरेत् । कथम् । युक्तितो यथा युज्यते तथा शोफमुत्पीड्योर्ध्वं पीडयित्वा ॥३१॥

वि०—निर्बल हत्थे वाले शल्य को बाँस की खपची आदि से बाँधकर निकाले । सूजन से छिपे हुये—हत्थे वाले शल्य को, युक्तिपूर्वक सूजन को दबाकर निकाले ॥ ३१ ॥

मुद्गराहतया नाड्या निर्घात्योत्तुण्डितं हरेत् ॥ ३२ ॥
तैरेव चानयेन्मार्गममार्गोत्तुण्डितं तु यत् ।

स०—उत्तुंडितं शल्यं बुद्बुदवदभिमुखीभूतं नाड्या निर्घात्य चालयित्वा हरेत् । किंभूतया । मुद्गरेणाहतया मुद्गरग्रहणमुपलक्षणार्थम् । पाषाणादिभिरप्याहतयोत्तुण्डितमाहरेदिति वेद्यम् । तैरेव मुद्गरादिभिराहतैरमार्गेणोत्तुंडितममार्गोत्तुंडितं मार्गमानयेत् प्रापयेत् ॥ ३२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फूले हुए शल्यों का निकलना—

वि०—ऊपर को मुख निकाले हुए शल्य को मुद्गर-पत्थर आदि द्वारा नाड़ी से हिलाकर निकाले। अनुचित मार्ग में मुख निकाले हुए शल्य को मुद्गर-पत्थर आदि से आघात करके मार्ग में ले आये (फिर निकाले) ॥ ३२ ॥

मृदित्वा कर्णिनां कर्णं नाड्यास्येन निगृह्य वा ॥ ३३ ॥
अयस्कान्तेन निष्कर्णं विवृतास्यमृजुस्थितम् ।

स०—कर्णः कर्णौ वा विद्येते येषां ते कर्णिनो भल्लादयस्तेषां कर्णं मृदित्वा भङ्क्त्वा शल्यं निर्हरेत्। अथवा नाड्यास्येन नाडीमुखेन निगृह्य निर्हरेत्। नाडी पंचमुखच्छिद्रेत्येवमादिग्रंथनिर्दिष्टैर्नाडीयंत्रैर्निर्हरेदित्यर्थः। अयस्कांतेन लोहाकर्षकमणिविशेषेण निष्कर्णं शल्यं तथा विवृतमुखम् ऋजु स्पष्टं कृत्वाऽवस्थितं निर्हरेत् ॥ ३३ ॥

अन्य प्रकार—

वि०—जिन शल्य में कर्ण[1] हो (जैसे भाला आदि) उनके कर्ण को (आघात से) तोड़कर या नाड़ीमुख से (तोड़कर) पकड़कर निकाले। जिन शल्यों में कर्ण न हों, व्रणमुख फैला हो और शल्य सीधी दिशा में हो तो उसे अयस्कान्त(चुम्बक) से खींच ले ॥ ३३ ॥

पक्वाशयगतं शल्यं विरेकेण विनिर्हरेत् ॥ ३४ ॥
दुष्टवातविषस्तन्यरक्ततोयादि चूषणैः ।

स०—पक्वाशये स्थितं शल्यं विरेचनैर्विशेषेण निर्हरेत्। दुष्टवातादीनि चूषणैर्निर्हरेत्। चूषणैरिति बहुवचननिर्देशाच्छृङ्गादिभिरिति बोध्यम् ॥ ३४ ॥

पक्वाशयगत शल्य का निकालना—

वि०—पक्वाशय में पहुँचे शल्य को विरेचन से निकाले। दूषित वायु, विष-दूषित स्तन्य, दूषित रक्त, पानी आदि को सींग आदि से चूस कर निकाले ॥ ३४ ॥

कण्ठस्रोतोगते शल्ये सूत्रं कण्ठे प्रवेशयेत् ॥ ३५ ॥
बिसेनाक्ते ततः शल्ये बिसं सूत्र-समं हरेत् ।

स०—कंठस्रोतःस्थे शल्ये सूत्रं कार्पासादिजं बिसेन कंठे प्रवेशयेत्। बिससंलग्नं सूत्रं कृत्वा शल्यनिर्हरणाय प्रवेशयेदित्यर्थः। आक्ते गृहीते शल्ये बिससंलग्नेऽनंतरं शल्यं बिससूत्रं समं तुल्यकालमाहरेत् ॥ ३५ ॥

कण्ठादिगत शल्य का निकालना—

वि०—गले में फँसे शल्य में रूई आदि के धागे को बिस के साथ (बिस-मृणाल) बाँधकर गले में डाले। जब शल्य धागे में फँस जाये तब सूत्र को बिस के साथ खींच ले ॥३५॥

नाड्याऽग्नितापितां क्षिप्त्वा शलाकामस्थिरीकृताम् ।
आनयेज्जातुषं कण्ठाज्जतुदिग्धामजातुषम् ॥ ३६ ॥

स०—जातुषे शल्ये कंठस्रोतःप्रविष्टे तज्जातुषं शल्यं कंठादानयेत्। कथमित्याह। शलाकां कंठे क्षिप्त्वा। कथम्। नाड्या नाडीयंत्रेण प्रक्षिप्य कंठदाहपरिहरणार्थम्। कीदृशं शलाकाम्। अद्भिः स्थिरीकृतां निर्वापणद्वारेण। तां तथाविधां शलाकां कृत्वा नाड्यैव जातुषं शल्यं कंठादानयेदाकर्षयेत्। जातुषमित्यत्र त्रपुजतुनोः षुगित्यण् षुगागमश्च। अजातुषं दार्वेण्वादिमयं शल्यं कंठस्रोतःस्थितं जतुदिग्धां लाक्षालिप्तां शलाकामग्नितापितां नाड्या क्षिप्त्वा पूर्ववदपहरेत्। जतुदिग्धामित्युपलक्षणार्थम्। सिक्थादिदिग्धामपि। यथा शलाकया हर्तुं प्रयुज्यते तथा कृत्वेति वेद्यम् ॥ ३६ ॥

लाक्षामयादि शल्य का निकालना—

वि०—लाख के बने या लाख जैसी वस्तु (मोम आदि) का कोई शल्य गले में फँसा हो तो अग्नि से तप्त शलाका को नालिका के अन्दर रखकर पहुँचाये। जब शल्य (पिघलकर) उस नलिका में फँस जाये तब जल से उसे (ठण्डा कर) स्थिर करके खींच ले। इसी प्रकार यदि लाख आदि का शल्य न हो तो गरम शलाका में लाख, मोम आदि लगाकर गले में ले जाये, शल्य जब उसमें चिपक जाये तब शलाका को खींच ले ॥ ३६ ॥

केशोन्दुकेन पीतेन द्रवैः कण्टकमाक्षिपेत् ॥ ३७ ॥
सहसा सूत्रबद्धेन वमतस्तेन चेतरत् ।

स०—कंटकं मत्स्यादिकमांससंगेन मुक्तं कंठस्रोतसि स्थितं द्रवैः पानीयादिभिः सह पीतेन। केशोंदुकेनाऽऽक्षिपेत्। केशानां समूहः केशोंदुकं तेन। किंभूतेन केशोंदुकेन। सूत्रबद्धेन सूत्रग्रथितेन। वमतो वमनमाचरतः। कंटकमेकदेशसक्तसूत्रं सहसैवाऽऽक्षिपेत्। एवं च वमनद्रव्यसंस्कृतैर्द्रवैः केशोंदुकं पातव्यमित्यवतिष्ठते। तेन कंटकेनेतरत् केशोंदुकं प्रमादपीतमाहरेत्। क्षतकंठश्च त्रिफलां मधुघृतसितोपेतामनुकंठं लिह्यात्। सुश्रुते चोक्तम्। अस्थिशल्यमन्यद्वा तिर्यक्कंठासक्तमवेक्ष्य केशोंदुकं दृढैकसूत्रबद्धं द्रवभक्तोपहितं पाययेदाकंठाच्च पूर्णकोष्ठं वामयेद्वमतश्च शल्यैकदेशसक्तं ज्ञात्वा सूत्रं सहसा त्वाक्षिपेत्। मृदुना वा दंतधावनकूर्चकेनापहरेत् प्रणुदेद्वेति ॥ ३७ ॥

कण्ठगत मत्स्यकण्टकादि शल्य का निकालना—

वि०—मछली आदि का कोई काँटा गले में फँस गया हो तो बालों की गुच्छी को एक लम्बे धागे में बाँधकर वामक द्रव्ययुक्त द्रव के साथ निगला देना चाहिये। फिर वमन होने पर बालों की गुच्छी को अकस्मात् खींचने से शल्य निकल जायेगा।

इसी प्रकार गले में फँसी केशोन्दुक (बालों की गुच्छी आदि) को द्रव के साथ काँटा निगलाकर उसमें फँसाकर निकाले।

(यदि गले में क्षत हो जाये तो त्रिफला को मधु, घी, चीनी के साथ मिलाकर धीरे-धीरे निगलते हुए चाटे) ॥३७॥

---

१. कुछ शस्त्रों में फलक के पीछे छोटे अंकुश की सी रचना होती है जो शल्य को निकालने में अवरोधक होती है, उसी को 'कर्ण' कहते हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अशक्यं मुखनासाभ्यामाहर्तुं परतो नुदेत् ॥ ३८ ॥

स०—मुखनासागतं शल्यं मुखनासाभ्यामाकृष्टुमशक्यमाहर्तुं यन्न शक्यते तत्परतो नुदेत्प्रकृतत्वान्मुखात् परतो नासायाश्च परतः। तस्माद्येन केनचिदुपायेन कोष्ठं नयेदिति गम्यते ॥ ३८ ॥

मुख-नासागत शल्य का निकालना—

वि०—मुख या नासा का शल्य जो मुख या नासा से खींचा न जा सके, उसे आगे ढकेल देना ॥ ३८ ॥

अप्पानस्कन्धघाताभ्यां ग्रासशल्यं प्रवेशयेत्।

स०—ग्रासः शल्यमिव ग्रासशल्यं कंठासक्तमंतःकोष्ठांतं नयेत्। कथम्। अपां पानमप्पानं तेन। तथा स्कंधघातेन। स्कंधस्य मुष्ट्यादिना हननं स्कंधघातः।

कण्ठगत ग्रासशल्य का निकालना—

वि०—भोजन का शल्य (रोटी आदि) गले में फँसा हो तो उसे पानी पिलाकर या स्कन्ध आदि पर मुक्के से मार कर अन्दर प्रविष्ट करे।

सूक्ष्माक्षिव्रणशल्यानि क्षौमवालजलैर्हरेत् । ३६ ।

स०—अक्षिणी च व्रणश्च तत्र शल्यान्यक्षिव्रणशल्यानि सूक्ष्माणि च तान्यक्षिव्रणशल्यानि च सूक्ष्माक्षिव्रणशल्यानि तानि क्षौमादिभिर्निर्हरेत्। योग्यतावशात् कदाचित् क्षौमेन कौशेयेन कदाचिद्वालेन कदाचिज्जलेन च निर्हरेत् ॥ ३९ ॥

नेत्र-व्रणादिगतसूक्ष्म शल्य का निकालना—

वि०—आँख में या व्रण में कोई सूक्ष्म शल्य हो तो उसे रेशम से, बाल से अथवा जल से पोंछकर या साफ करके निकाले ॥ ३९ ॥

नदीतडागादिपतितस्याऽकस्मान्नरस्यावश्यं यज्जलमंतरे प्रविशेत्तज्जलं शल्यवदंतः स्थितं निर्हार्यमिति तदुपायं दर्शयितुमाह—

अपां पूर्णं विधुनुयादवाक्शिरसमायतम्।
वामयेच्चासुखं भस्मराशौ वा निखनेन्नरम् ॥ ४० ॥

स०—अपां पूर्णं नरं विधुनुयात्। किंभूतम्। अवाक्शिरसमवागधः शिरो मूर्धा यस्य तम्। तथा आयतं दीर्घं कृत्वा। तथा तं नरं वामयेद्वैद्यः। अथवा आमुखं मुखं यावद्भस्मराशौ न्यसेत्। तथोक्तम्। उदकपूर्णस्य चक्राद्यारोपणेनोदकनिःसारः कार्य इति ॥ ४० ॥

नद्यादि में डूबने से उदरगत जलशल्य का निकालना—

वि०—पानी पीये हुए (डूबने से या अन्य रूप में) मनुष्य का शिर नीचा करके लम्बा लटकाये, खूब हिलाये, वमन कराये तथा मुख तक राख के ढेर में गाड़ देवे ॥ ४० ॥

कर्णेऽम्बुपूर्णे हस्तेन मथित्वा तैलवारिणी।
क्षिपेदधोमुखं कर्णं हन्याद्वाऽऽचूषयेत वा ॥ ४१ ॥

स०—कर्णेऽम्बुना पूर्णे सति तैलवारिणी क्षिपेत्। किं कृत्वा। हस्तेन मथित्वा विलोड्य। तथाऽधोमुखं कर्णं हन्याद्वा। अथवा चूषयेच्छृङ्गादिभिः ॥ ४१ ॥

कर्णगत जलरूप शल्य का निकालना—

वि०—कान में पानी भर जाने पर—तैल और पानी को हाथ से मथ कर कान में डाल देवे। मुख को (कान की ओर) नीचा करके दूसरे कान पर हलकी चोट करे (इस प्रकार जल निकल जायगा)। अथवा सींग आदि से पानी को चूस ले ॥ ४१ ॥

कीटे स्रोतोगते कर्णं पूरयेल्लवणाम्बुना।
शुक्तेन वा सुखोष्णेन मृते क्लेदहरो विधिः ॥ ४२ ॥

स०—कीटे पिपीलिकाशतपद्यादौ स्रोतःस्थिते तोदगौरववेदनादिभिरनुमिते कर्णं लवणांबुना पूरयेत्। अथवा शुक्तेन पूरयेत्। किंभूतेन। सुखोष्णेन। मृते पुनस्तस्मिन् कीटे क्लेदहरो विधिः कार्यः ॥ ४२ ॥

कान से कीड़ा निकालना—

वि०—चींटी आदि कीट यदि कान के स्रोत में पहुँच जायें तो कान को नमक के पानी से या शुक्त से अथवा गरम पानी से भर देवे। कीड़े के मर जाने पर मैल के समान निकालने का उपचार करना चाहिये ॥ ४२ ॥

जातुषं हेमरूप्यादि धातुजं च चिरस्थितम्।
ऊष्मणा प्रायशः शल्यं देहजेन विलीयते ॥ ४३ ॥

स०—जातुषादिशल्यं देहजेनोष्मणा चिरं स्थितं प्रायशो विलीयते ॥ ४३ ॥

जातुषादि शल्य का शरीर की गर्मी से नाश—

वि०—लाख—स्वर्ण, चाँदी आदि धातु के शल्य देर तक शरीर में रहने पर शरीर की गर्मी से प्रायः घुल जाते हैं ॥ ४३ ॥

मृद्वेणुदारुशृङ्गास्थिदन्तवालोपलानि न।
विषाणवेण्वयस्तालदारुशल्यं चिरादपि ॥ ४४ ॥
प्रायो निर्भुज्यते तद्धि पचत्याशु पलासृजी।

स०—मृद्वेणुदार्वादिशल्यं देहोष्मणा न विलीयते। उपलशब्दस्य नपुंसकत्वं चिंत्यम्। विषाणादिशल्यं प्रायो देहजेनोष्मणा न विलीयते। अपि निर्भुज्यते पृथग्भवति। चिरादपि न पच्यते। कुत इत्याह। तद्यस्माद्विषाणादिशल्यं शीघ्रमेव पलासृजी पचति। अतो मांसरक्तपाकाद्देहजेन चोष्मणा प्रायो निर्भुज्यते ॥ ४४ ॥

मिट्टी, बाँस आदि शल्य का स्वयं निकालना—

वि०—मिट्टी, बाँस, लकड़ी, सींग, अस्थि, दाँत, बाल, पत्थर इनके शल्य शरीर में बिलीन नहीं होते। सींग, बाँस, लोहा, ताल (काँच), लकड़ी इनके शल्य देर तक रहने से प्रायः करके शरीर धातु या अंग से पृथक् हो जाते हैं क्योंकि ये मांस और रक्त को शीघ्र पचा देते हैं। (कभी-कभी मांस और रक्त के पकने से पूय के साथ शल्य बाहर आ जाता है अन्यथा विद्रधि की चिकित्सा में शस्त्र-कर्म के द्वारा शल्य भी आसानी से निकल जाता है) ॥ ४४ ॥

शल्ये मांसावगाढे चेत्स देशो न विदह्यते ॥ ४५ ॥
ततस्तं मर्दनस्वेदशुद्धिकर्षणबृंहणैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तीक्ष्णोपनाहपानान्नघनशस्त्रपदाङ्कनैः ॥ ४६ ॥
पाचयित्वा हरेच्छल्यं पाटनैषणभेदनैः ।

स०—मांसावगाढे मांसांतर्निगूढे शल्ये सति यदि स देशो न विदह्यते पच्यते । यत्र तु तिष्ठति शल्यं ततस्तं मर्दनेन स्वेदेन वा कदाचित् शुद्ध्या वमनादिकया कदाचित्कर्षणेन कदाचिद्बृंहणेन कदाचित्तीक्ष्णोपनाहेन कदाचित्तीक्ष्णान्नपानेन । तीक्ष्णशब्दस्य प्रत्येकं संबंधः । कदाचिद्घनशस्त्रपदांकनैः । शस्त्रस्य पदानि । घनानि संहतानि च तानि शस्त्रपदानि च तेषामंकनं लक्षणं तैः मर्दनादिभिरेकेन द्वाभ्यां सर्वैर्वा यथाक्रमं पूर्वं शल्यं पाचयित्वा ततः पाटनैर्व्रणभेदनैर्हरेत् ॥ ४५-४६ ॥

मांस में छिपे शल्य का निकालना—

वि०—यदि मांस के अन्दर गहरा छिपा होने से शल्य का स्थान स्वयं न पके तो उसके लिये मर्दन, स्वेदन, वमनादि क्रम, कृशता करना, बृंहण करना, तीक्ष्ण उपनाह, तीक्ष्ण खान-पान, पास-पास में गहरा पोछना आदि कर्म करके उसे पकाये। पकाने पर पाटन, एषण और भेदन क्रिया से शल्य को निकाले ॥ ४५-४६ ॥

शल्यप्रदेशयन्त्राणामवेक्ष्य बहुरूपताम् ॥ ४८ ॥
तैस्तैरुपायैर्मतिमान् शल्यं विद्यात्तथाऽऽहरेत् ।

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने शल्याहरणविधिर्नामाष्टाविंशोऽध्यायः ॥ २८ ॥

स०—शल्यानि धातुविषाणवेण्वादिजानि । प्रदेशास्त्वङ्मांसादयः । यंत्राणि स्वस्तिकादीनि । तेषां बहुरूपतामवेक्ष्य नानाकारतां ज्ञात्वा तैस्तैरुपायैरुक्तानुक्तैर्विज्ञानसाधनैः कारणैर्मतिमान् भिषक् जानीयात् शल्यं तथाऽऽकर्षेदिति । संग्रहे चोक्तम् । व्रणे प्रसन्ने प्रांतेषु नातिस्पर्शासहिष्णुषु । अल्पे शोफे च तापे च निःशल्यमिति निर्दिशेदिति शल्याहरणविधिः ॥ ४७ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुन्दराख्यायामष्टाविंशोऽध्यायः ॥ २८ ॥

शल्य निकालने में ज्ञान—

वि०—शल्य की, स्थान की तथा यन्त्रों की अनेकरूपता को देखकर बुद्धिमान वैद्य यथायोग्य साधनों से शल्य को जाने और निकाले ॥ ४७ ॥

वक्तव्य—निःशल्य का लक्षण—'व्रणे प्रसन्ने प्रान्तेषु नातिस्पर्शासहिष्णुषु । शल्ये शोफे च तापे च निःशल्यमिति निर्दिशेत् ॥' (संग्रह सू. अ. ३७)

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का शल्याहरणविधि नामक अट्ठाइसवाँ अध्याय समाप्त हुआ ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

अस्मादनंतरं शस्त्रकर्मविध्यध्यायः प्रस्तूयते । यतोऽनंतरातीतेऽध्याये शस्त्रेण वा विशस्यादावित्युक्तमतस्तस्यैव शस्त्रकर्मणो विधानं वक्तुं युक्तमित्याह—

अथातः शस्त्रकर्मविधिमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

स०—शस्त्रस्य कर्म शस्त्रकर्म शस्त्रावधारणाय क्रिया तस्य विधिरितिकर्तव्यता शस्त्रकर्मविधिस्तम् । शेषं पूर्ववत् ।

वि०—अब इसके आगे शस्त्रकर्मविधि नामक अध्याय का व्याख्यान करेंगे, जैसा कि आत्रेय आदि महर्षियों ने कहा था।

अथ ग्रन्थारम्भे निर्देष्टुं युक्तस्यापि शस्त्रविधेः पश्चाद्वचयं शस्त्रकर्मविधिस्ततः शस्त्रकर्मग्रन्थ एवाऽऽदौ निर्देष्टुं युक्तः प्राक् शस्त्रकर्मणश्चेष्टं भोजयेदन्नमातुरमित्यादि न तु व्रणः संजायते प्राय इत्यादि तत्रोच्यते । शस्त्रकर्मविधेः पूर्वं विषयो निर्देष्टुं युक्तो यः शस्त्रकर्मविधेरुपाय इत्यस्यैव पूर्वमुपन्यासो युक्त इत्याह—

व्रणः सञ्जायते प्रायः पाकाच्छ्वयथुपूर्वकात् ।
तमेवोपचरेत्तस्माद्रक्षन् पाकं प्रयत्नतः ॥ १ ॥
सुशीतलेपसेकास्रमोक्षसंशोधनादिभिः ।

स०—प्रायो व्रणः पाकात्संजायते । किंभूतात् श्वयथुः पूर्वो यस्य पाकस्य स श्वयथुपूर्वकस्तस्मात् । श्वयथुपाकमंतरेणाऽपि शस्त्राद्यभिघाताद्व्रणो जायत इति प्रायोग्रहणम् । यस्माच्छ्वयथुपूर्वकात्पाकाद्व्रणः संजायतेऽतस्तमेव श्वयथुमुपचरेदुपक्रमेत् । किंकुर्वन् । पाकं प्रयत्नेन रक्षन् । कथम् । सुशीतलेपादिभिः सुशीताभ्यां स्पर्शतो वीर्यतश्च लेपसेकाभ्यां तथाऽस्रमोक्षणेन तथा संशोधनेन वमनेन विरेचनेन वा । आदिग्रहणात्कषायपानघृतपानादीनां ग्रहणम् ॥ १ ॥

सूजन की चिकित्सा—

वि०—प्रायः करके व्रण पाक से उत्पन्न होता है; पाक से भी पहले सूजन होती है; इसलिये पहले शोथ की ही चिकित्सा करे और जहाँ तक सम्भव हो पाक से बचाये। इसके लिये अतिशीतल लेप, शीतल परिषेक; रक्तमोक्षण, वमन-विरेचन आदि करे ॥ १ ॥

तस्य च शोफस्याऽऽमपच्यमानपाकाख्या अवस्थास्तिस्रो भवंतीत्याह—

शोफोऽल्पोऽल्पोष्मरुक् सामः सवर्णः कठिनः स्थिरः॥२॥

स०—आमो यः शोफः सः प्रमाणतोऽल्पस्तथाऽल्पोष्णस्तथाऽल्परुगल्पशूलस्तथा सवर्णस्त्वक्समानवर्णस्तथा कठिनो न मृदुः पक्ववत्तथा स्थिरो न पक्ववच्चलः । स आमः साम इति सोऽपि लोपे चेत्पादपूरणमिति सुलोपः ॥ २ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आम शोफ का लक्षण—

वि०—अपक्व शोथ-प्रमाण में थोड़ा, थोड़ी उष्णता वाला, थोड़ी वेदना युक्त, त्वचा के समान वर्ण वाला, कठिन और स्थिर (पूय न होने से गतिहीन अथवा धीरे से बढ़ने वाला) होता है ॥ २ ॥

पच्यमानो विवर्णस्तु रागी वस्तिरिवाततः।
स्फुटतीव सनिस्तोदः साङ्गमर्दविजृम्भिकः ॥ ३ ॥
संरम्भारुचिदाहोषातृड्ज्वरानिद्रतान्वितः।
स्त्यानं विष्यन्दयत्याज्यं व्रणवत्स्पर्शनासहः ॥ ४ ॥

स०—सशोफः पच्यमानो विवर्णो न त्वक्समानवर्णः। तथा रागी लोहितवर्णः। तथा बस्तिरिवाततस्तब्धो वातपूर्णदृतिवत्। छागादीनां मूत्राधारो बस्तिरित्युच्यते। तथा स्फुटतीव सनिस्तोदः सह निस्तोदेन वर्तते सनिस्तोदः। नियतप्रबन्धप्रवृत्ता रुङ् निस्तोदो भेदो विच्छिन्ना तु शूलमित्युच्यते। सांगेत्यादि। अंगानां मर्दः क्षोभः सहांगमर्दविजृंभिकाभ्यां वर्तते सांगमर्दविजृंभिकः। तथा संरंभादिभिर्युतः। अन्वितशब्देन प्रत्येकं संरंभादीनां संबंधः। संरंभो वाग्विषयातीतानां स्वसंवेद्यानामनेकरूपाणां सांगपीडनविघट्टनच्छेदनदंशनादीनां रुजां प्रादुर्भावः। सर्वांगीणस्तीव्रो दाहः। अरतिमान् दाह उषा उच्यते। तथा स पच्यमानो घृतं स्त्यानमुपयुक्तं विलीनयति। तथा स्पर्शनं न सहते व्रणवत् ॥ ३-४ ॥

पच्यमान शोफ का लक्षण—

वि०—पच्यमान शोथ—(वही अपक्व शोथ जब पकने लगता है), तब विवर्ण; रक्तवर्ण; भरी बस्ति के समान फैला होता है। इसमें फटने के समान या चुभने के समान वेदना रहती है। अंगमर्द; जम्भाई का आना; अनेक प्रकार की (पीडन, विघट्टन, छेदन, भेदन आदि) वेदनाओं का उत्पन्न होना; अरुचि, दाह, आँच, प्यास तथा ज्वर होता है। इस शोथ पर यदि जमा घृत रखें तो वह पिघल जाता है; एवं व्रण की भाँति यह स्पर्श का सहन नहीं करता है। (निस्तोद-वेदना का लगातार बना रहना; शूल रह-रह कर दर्द होना) ॥ ३-४ ॥

पक्वेऽल्पवेगता म्लानिः पाण्डुता वलिसम्भवः।
नामोऽन्तेपून्नतिर्मध्ये कण्डूशोफादिमार्दवम् ॥ ५ ॥
स्पृष्टे पूयस्य सञ्चारो भवेद्वस्ताविवाम्भसः।

स०—पक्वे सत्यल्पवेगता भवति ननु संरंभः। तथा म्लानिर्म्लानत्वम्। तथा पांडुत्वम्। वलीनां चोद्भवः। तथांऽतेषु पर्यंतेषु नामो निम्नत्वं मध्य उन्नतिः। नामोंऽतेष्वित्युक्त्यैव मध्य उन्नतत्वं लब्धमेव पुनरुन्नतिग्रहणं त्वतिशयार्थम्। तेनोत्तुंगत्वं गम्यते। तथा कंड्वादिमृदुत्वं स्यात्। तथा स्पृष्टे तस्मिन् सति पूयस्य संचारो भवति। बस्तेरंतःस्थितस्य यथांऽभसः संचारः ॥ ५ ॥

पके हुए शोफ का लक्षण—

वि०—शोथ के पक जाने पर-उपद्रवों की कमी, ग्लानि (ग्लानि मुरझाना—लाली में कमी आना); पाण्डुता; झुर्रियों का उत्पन्न होना; किनारों पर से दबना और मध्य से ऊपर को उठना, कण्डू-सूजन आदि का कम हो जाना; छूने पर बस्ति में भरे पानी की भाँति पूय की गति दीखती है अर्थात् तरंग या लहर सी चलती है ॥ ५ ॥

शूलं नर्तेऽनिलाद्दाहः पित्ताच्छोफः कफोदयात् ॥ ६ ॥
रागो रक्ताच्च पाकः स्यादतो दोषैः सशोणितैः।

स०—अनिलं विना शूलं न भवति। पित्तमंतरेण दाहो न स्यात्। कफोदयाद्विना शोफो न स्यात्। शोफः कफादिति वक्तव्य उदयग्रहणं विशेषद्योतनार्थम्। रक्ताद्दते रक्तं विना रागस्य लौहित्यस्य संभवो न। तेन कफाधिकैः सर्वैर्दोषैः शोणितसहितैः श्वयथुपाकः स्यादिति गम्यते ॥ ६ ॥

शूलादि का कारण—

वि०—वायु के विना शूल नहीं; पित्त के विना दाह नहीं, कफ के विना सूजन नहीं, तथा रक्त के विना लालिमा नहीं हो सकती। इसलिये रक्तयुक्त सब दोषों के योग से पाक होता है ॥ ६ ॥

वक्तव्य—सुश्रुत में इसको दो मतों से कहा है—यथा—'कालान्तरेणाभ्युदितं तु पित्तं, कृत्वा वशे वातकफौ प्रसह्य। पचत्यतः शोणितमेव पाको मतोऽपरेषां विदुषां द्वितीयः॥' सु. सू. अ. १७।८। अर्थात् समय पाकर बढ़ा हुआ पित्त, वायु और कफ को दबा कर रक्त को पकाता है, किन्तु कुछ लोग यह मानते हैं कि रक्त ही पकाता है।

पाकेऽतिवृत्ते सुषिरस्तनुत्वग्दोषभक्षितः ॥ ७ ॥
वलीभिराचितः श्यावः शीर्यमाणतनूरुहः।

स०—पाके चातिवृत्तेऽतिक्रांते सुषिरोऽतस्थः शोफदेशः संपद्यते। तथा तनुस्त्वगस्मिन् स तनुत्वक्। तथा दोषभक्षितः। दोषशब्देनेह पूय उच्यते। तेन भक्षितत्वात्सुषिरत्वं तनुत्वक्त्वं चाऽस्य। तथा वलीभिराचितो व्याप्तः। तथा श्यामवर्णः। तथा शीर्यमाणतनूरुहः पतद्रोमा ॥ ७ ॥

अत्यन्त पाक में छिद्रादि होना—

वि०—अतिशय पाक होने पर—माँस आदि पूय से खाये जाने अर्थात् पूय रूप में परिणत हो जाने से शोथ खोखला हो जाता है; त्वचा पतली हो जाती है; झुर्रियों से भर जाता है; रङ्ग काला हो जाता है; और रोम गिरने लगते हैं ॥ ७ ॥

कफजेषु तु शोफेषु गम्भीरं पाकमेत्यसृक् ॥ ८ ॥
पक्वलिङ्गं ततोऽस्पष्टं यत्र स्याच्छीतशोफता।
त्वक्सावर्ण्यं रुजोऽल्पत्वं घनस्पर्शत्वमश्मवत् ॥ ९ ॥
रक्तपाकमिति ब्रूयात्तं प्राज्ञो मुक्तसंशयः।

स०—यद्यपि त्रिभिरेव दोषैः शोणितान्वितैः पाको जायते तथाऽपि कफजेष्वित्युक्तेरधिकतरकफेष्विति गम्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कफजेष्विति बहुवचननिर्देशाद्देहदेशबहुत्वाद्येषु देहदेशेषु कफो जायते तेषु कफजेषु शोफेषु गंभीरं दुर्लक्ष्यमतिशयेनांतर्निगूढत्वादसृक् पाकमेति। अत एव पक्वलिंगं पक्वलक्षणमस्पष्टं दुर्लक्ष्यं स्यात्। यत्र शीतगुणयोगाच्छीतश्चासौ शोफश्च तस्य भावः शीतशोफता। तथा त्वक्समानवर्णत्वम्। तथा रुजः स्तोकत्वम्। तथा घनस्पर्शत्वं निविडस्पर्शता स्यादश्मवत्। हस्तादिना स्पृष्टे पाषाणतुल्यः स्पर्श उपलभ्यते। तं तथाभूतं श्वयथुपाकं रक्तपाकमित्येवं प्राज्ञो धीमान् ब्रूयान्न तु शोफं पक्वमिति कथयेत्। कथम्। मुक्तसंशयः शोणितपाको नाऽत्र शोफ इत्येवं वदेदित्यर्थः ॥ ८-९ ॥

रक्तपाक का लक्षण—

वि०—रक्तपाक—कफजन्य शोफों में (त्वचा-मांस आदि का पाक नहीं होता-अपितु) रक्त का गहराई में पाक होता है; इसलिये इस शोफ में पकने के लक्षण अस्पष्ट रहते है। इसलिये जिस शोफ में शीतलता, त्वचा के समान वर्ण; वेदना की न्यूनता; तथा पत्थर के समान कठोर स्पर्श का अनुभव हो, उस शोथ को बुद्धिमान् वैद्य बिना सन्देह के रक्तपाक तथा अप्रमाद (सूक्ष्मबूझ) ये कहे, पक्व शोथ नहीं ॥ ८-९ ॥

अल्पसत्त्वेऽबले बाले पाकाद्वाऽत्यर्थमुद्धते ॥ १० ॥
दारणं मर्मसन्ध्यादिस्थिते चान्यत्र पाटनम्।

स०—अल्पसत्त्वे सति तथा दुर्बले तथा बाल एतेषु जाते श्वयथौ तथा पाकाद्वात्यर्थमुद्धतेऽतिक्रांते च श्वयथौ दारणं कार्यं व्रणप्रतिषेधदृष्टैर्दारणद्रव्यैः यथा गुग्गुल्वतसिगोदंतस्वर्णक्षीरीकपोतविट्। क्षारौषधानि क्षाराश्च पक्वशोफविदारणमिति न केवलमल्पसत्त्व इत्यादिके श्वयथौ दारणं कार्यं यावन्मर्मसंध्यादिस्थितेऽपि। पाटनं शस्त्रेण। अन्यत्रेति दारणविषयानिर्दिष्टे स्थाने शस्त्रेण पाटनं कार्यम् ॥ १० ॥

निर्बलादि के पाक का दारणादि—

वि०—दुर्बल मन (छोटे दिल), दुर्बल, बालक, अथवा अतिशय पाक हो जाने पर या मर्म सन्धि आदि में शोफ होने पर (जहाँ शस्त्र लगाना युक्तिपूर्वक न हो) क्षार आदि से दारण (मुख बनाना या फोड़ना) करना चाहिये; अन्य अवस्थाओं में शस्त्र से पाटन (चीरा देकर मुख बनाना) करे ॥ १० ॥

आमच्छेदे सिरास्नायुव्यापदोऽसृगतिस्रुतिः ॥ ११ ॥
रुजोऽतिवृद्धिर्दरणं विसर्पो वा क्षतोद्भवः।

स०—आमस्य शोफस्य शस्त्रेण छेदे सति सिरास्नायुव्यापदो भवन्ति। तथाऽसृजोऽतिस्रावः स्यात्। तथा रुजाया अतिवृद्धिस्तथा विदरणं विसर्पो वा क्षतोत्थः स्यात् ॥ ११ ॥

अपक्व शोफ के छेदन से उपद्रव—

वि०—आम—अपक्व शोथ के काटने से सिरा और स्नायु के विकार, रक्त का अधिक बहना, दर्द का बढ़ना, त्वचा-माँस आदि का फटना, तथा क्षतजन्य विसर्प होता है ॥ ११ ॥

तिष्ठन्नतः पुनः पूयः सिरास्नाय्वसृगामिषम् ॥ १२ ॥
विवृद्धो दहति क्षिप्रं तृणोलपमिवानलः।

स०—अंतरंतरे तु पूयस्तिष्ठन् सन् सिरादीन् दहति। कः कमिव। अनलस्तृणोलपमिव ॥ १२ ॥

भीतर बचे हुए पीब से हानि—

वि०—शोफ के अन्दर रही पूय बढ़ कर सिरा, स्नायु रक्त और माँस को जल्दी से जला (नष्ट कर) देती है, जिस प्रकार तिनकों के ढेर के अन्दर की अग्नि तिनकों को जला देती है। अपक्व में छेदन तथा पक्व में उपेक्षा करनेवाले वैद्य की निन्दा—॥ १२ ॥

यश्छिनत्त्याममज्ञानाद्यश्च पक्वमुपेक्षते ॥ १३ ॥
श्वपचाविव विज्ञेयौ तावनिश्चितकारिणौ।

स०—यः पुरुषोऽज्ञानान्मोहादामं छिनत्ति। योऽपि पक्वमुपेक्षते न पाटयति। तौ नरौ श्वपचतुल्यावातुरव्यापादनात्। तद्व्यापादनं तु कुतो विषक्त इत्याह। अनिश्चितकारिणावसमीक्ष्यविधायिनौ यतः ॥ १३ ॥

वि०—अज्ञान के कारण जो अपक्व को काटता है अथवा पक्व की उपेक्षा करता है; इन दोनों को ही सोचकर काम न करने के कारण अथवा उनके कर्म का परिणाम निश्चित न होने के कारण चाण्डाल की भाँति समझना चाहिये—इनसे दूर ही रहना चाहिये ॥ १३ ॥

प्राक् शस्त्रकर्मणश्चेष्टं भोजयेदन्नमातुरम् ॥ १४ ॥
पानपं पाययेन्मद्यं तीक्ष्णं यो वेदनाक्षमः।
न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न बुध्यते ॥ १५ ॥

स०—शस्त्रकर्मणः प्राक् पूर्वमातुरमिष्टमन्नं यद् व्रणेऽपथ्यमपि तद्बलाधानार्थं भोजयेत्। तथा यो वेदनाक्षमः शस्त्रव्यथामसहिष्णुस्तमातुरं मद्योचितं तीक्ष्णं तीव्रमदं मद्यं पाययेत्। एवं सति यत्स्यात्तदाह—न मूर्च्छत्यन्नसंयोगादन्नोपयोगान्न मुह्यति। तीक्ष्णमद्यपानान्मत्तः सन् शस्त्रं न्यस्तमंगे न बुध्यते। न चेतयते। तत्कदर्थनया न कंपत इत्यर्थः ॥ १४-१५ ॥

शस्त्रप्रयोग के पहले कर्त्तव्य—

वि०—शस्त्र-कर्म करने से पूर्व रोगी को प्रिय अन्न खिलाना चाहिये। मद्य पीने वाला जो वेदना का सहन न कर सके उसे तीक्ष्ण मद्य पिलाये। अन्न के उपयोग से रोगी को घातक मूर्च्छा नहीं आती और नशे में होने से शस्त्र का अनुभव नहीं करता ॥ १४-१५ ॥

अन्यत्र मूढगर्भाश्ममुखरोगोदरातुरात्।

स०—अश्मशब्देनाश्मरी गृह्यते। मूढगर्भादिभिर्य आतुरस्तं वर्जयित्वेष्टभोजनं मद्यपानं च कारयितव्यम्।

मूढगर्भादि में उक्त कर्म का निषेध—

वि०—अपवाद—मूढगर्भ, अश्मरी, मुखरोग और उदर

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रोग के शस्त्रकर्म में रोगी को मद्य या अन्न नहीं देना चाहिये।

अथाहृतोपकरणं वैद्यः प्राङ्मुखमातुरम् ॥ १६ ॥
सम्मुखो यन्त्रयित्वाऽऽशु न्यस्येन्मर्मादि वर्जयन्।
अनुलोमं सुनिशितं शस्त्रमापूयदर्शनात् ॥ १७ ॥
सकृदेवाहरेत्तच्च—

स०—अथशब्देन मंगलवाचिना संग्रहोक्तमर्थं सूचयति। यथा सुमुहूर्ते च दध्यक्षतान्नपानरत्नमरत्नार्चितविप्रं प्रणतेष्टदेवतमित्यादि आहृतं ढौकितं समीपानीतमुपकरणं तत्कालयोग्यं यन्त्रशस्त्राग्निजांबवौष्ठपिचुप्लोतस्नेहनमधुकल्कादिकं यस्य तमातुरं प्राङ्मुखं पूर्वाभिमुखं वैद्यः संमुखः प्रत्यङ्मुखो यन्त्रयित्वा "शस्त्रमाशु न विलंबितं न्यस्येन्निक्षिपेत्। मर्मादि वर्जयन् मर्मसिरासंध्यादीन् परिहरन्। तथाऽनुलोमं कृत्वा न प्रातिलोम्येन। किंभूतं शस्त्रम्। सुनिशितमतितीक्ष्णम्। तच्च शस्त्रमापूयदर्शनादाहरेन्न त्वधिकं तत्रैव स्थाप्यम्। तच्च सकृदेव न बहून् वारान्न्यस्येत् ॥ १६-१७ ॥

शस्त्र कर्म की विधि—

वि०—शस्त्रकर्म विधि—शस्त्रकर्म के लिये उपयोगी सब साधनों को जुटाकर वैद्य रोगी को पूर्व दिशा की ओर मुख करके बिठाये और अपने आप उसके सामने (पश्चिम की ओर मुख करके) होकर रोगी का भली प्रकार नियन्त्रण करके मर्म आदि को बचाते हुए जल्दी से अनुलोम रूप में तेज धार वाले शस्त्र को एक ही बार में पूय के दीखने की गहराई तक लगाये ॥ १६-१७ ॥

—पाके तु सुमहत्यपि।
पाटयेद् द्व्यङ्गुलं सम्यग्द्व्यङ्गुलत्र्यङ्गुलान्तरम् ॥ १८ ॥
एषित्या सम्यगेषिण्या परितः सुनिरूपितम्।
अङ्गुलीनालवालैर्वा यथादेशं यथाशयम् ॥ १९ ॥
यतो गतां गतिं विद्यादुत्सङ्गो यत्र यत्र च।
तत्र तत्र व्रणं कुर्यात्सुविभक्तं निराशयम् ॥ २० ॥
आयतं च विशालं च यथा दोषो न तिष्ठति।

स०—पाके तु सुमहत्यपि पाटयेत् द्व्यङ्गुलं द्व्यङ्गुलपरिमाणं व्रणं सम्यक्कुर्यान्नाधिकम्। द्व्यंगुलेत्यादि अंगुलद्वयमथवाऽङ्गुलत्रयमंतरीकृत्य पुनरन्यं व्रणं कुर्यान्न त्वासन्नम्। तयैषिण्या सम्यगेषित्वा परितः समंतात्सुनिरूपितं सुपर्यालोचितम्। न केवलमेषिण्या यावदंगुल्या नालेन पद्मोत्पलादिजेन बालैर्वा वराहादिसंबंधिभिरन्वेष्य यथादेशं यथाशयं व्रणं कुर्यात्। तं च प्रदेशं दर्शयितुमाह—यतो यस्मिन्प्रदेशे गतां दूरयातां गतिं नाडीं आनीयात्तस्मिन् प्रदेशे व्रणं कुर्यात्। यत्र यत्र श्वयथप्रदेश उत्संगमुन्नतिं विद्यात्तत्र तत्र प्रदेशे व्रणं कुर्यात्। किंभूतं व्रणम्। सुष्ठु विभक्तौ पार्श्वापरपार्श्वादिविभागौ यस्य तं तथाविधम्। तथा निराशयम्। न विद्यत आशयः पूयादेर्दोषस्य स्थानं यस्य तथाभूतं निराशयं कुर्यात् तथाऽऽयतं दीर्घम्। तथा विशालं विस्तीर्णं कुर्यात्। एवं कृते सति दोषः पूयाख्यो न तिष्ठति न संस्थानं लभते ॥ १८-२० ॥

वि०—पाटन प्रमाण—बहुत बड़ा पाक होने पर भी दो अङ्गुल से अधिक लम्बा चीरा नहीं देना चाहिये। ऐसी अवस्था में दो या तीन अङ्गुल के अन्तर से दूसरा व्रण (चीरा) कर लेना चाहिये (समीप में व्रण न करे) एषणी के द्वारा भली प्रकार ढूँढकर चारो ओर भली प्रकार देखकर अथवा अङ्गुली या नाल अथवा बाल से जैसा स्थान हो और जैसा आशय हो—उसके अनुसार अङ्गुली आदि से भली प्रकार देखकर—जहाँ-जहाँ भी गति (मार्ग) दिखाई देवे और जहाँ-जहाँ पर उभार या पूय सञ्चय दीखता हो वहाँ वहाँ पर अच्छी प्रकार विभक्त हुआ तथा पूयादि आशय से रहित व्रण को बनाये। व्रण-लम्बा और फैला हुआ करे, जिससे कि व्रण में पूय रूपी दोष न रहे। उत्सङ्ग = मुख्य पूय सञ्चय स्थान के अतिरिक्त पूय-सञ्चय के छोटे स्थान जिसे जिसे अंग्रेजी में 'पस पाकेट्स' (Pus pockets) कहते हैं ॥ १८-२० ॥

शौर्यमाशुक्रिया तीक्ष्णं शस्त्रमस्वेदवेपथू ॥ २१ ॥
असम्मोहश्च वैद्यस्य शस्त्रकर्मणि शस्यते।

स०—वैद्यस्य शस्त्रकर्मणि पाटनादौ शौर्यं धैर्यं शस्यते। तथा आशुक्रिया चतुरहस्तता। तथा तीक्ष्णं शस्त्रम्। तथा स्वेदश्च वेपथुश्च न विद्यमानौ तौ यस्य स एवम्। स्वेदाभावः कंपाभावश्चेत्यर्थः। असंमोहस्तत्कालोचितकार्यकरणे सम्यक्प्रवृत्तिः। ननु शौर्यं वैद्यस्य शस्यत इत्युक्त्यैव स्वेदकंपाभावः प्रत्यपादि। तथा च स्वेदवेपथू भीरोरेव संभवतो न सुरस्येत्यनर्थकमस्वेदवेपथुरिति। अत्राचक्ष्महे। सत्यमेवैतौ भीरुगुणौ किंतूष्णकालवशात् प्रकृतिवशाद्वा यस्य स्वेदो वेपथुश्च भवतस्तत्परिहारार्थमेतदुक्तम्। सस्वेदस्य हि वैद्यस्य शस्त्रकर्म कर्तुमुद्यतस्य शस्त्रग्रहणमेव न तथा संपद्यते तद्वत्सकंपस्यापि। तस्मात्तत्परिहारो युक्तः ॥ २१ ॥

शस्त्रकर्म में वैद्य के शौर्यादि की प्रशंसा—

वि०—शस्त्रकर्म में वैद्य में शौर्य, शीघ्रकारिता (चतुर हाथ), शस्त्र का तीक्ष्ण होना, पसीना और कम्पन (घबराहट) का न होना तथा अप्रमाद (सूझ-बूझ) ये गुण (शस्त्रकर्म के लिये वैद्य में होने आवश्यक हैं) ॥ २१ ॥

तिर्यक्छिन्द्याल्ललाटभ्रूदन्तवेष्टकजत्रुणि ॥ २२ ॥
कुक्षिकक्षाक्षिकूटौष्ठकपोलगलवङ्क्षणे।

स०—ललाटादिदेशेषु तिर्यक्छेदः कार्यः। दंतवेष्टको दंत पिंडिका दंताधार मुच्यते ॥ २२ ॥

छेदन की दिशा—

वि०—ललाट, भ्रू, मसूड़े, जत्रु, कुक्षि, कक्षा, अक्षिकूट

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(जिस गड्ढे में आँख रहती है), ओठ, कपोल, गला और वंक्षण में तिरछा छेदन करना चाहिये ॥ २२ ॥

अन्यत्र छेदनात्तिर्यक् सिरास्नायुविपाटनम् ॥ २३ ॥

स०—अन्यत्र प्रदेशे तिर्यक्छेदनात् सिराणां स्नायूनां च व्यापत्तिः स्यात् ॥ २३ ॥

अन्यत्र तिर्यक् छेदन से हानि—

वि०—इन स्थानों के सिवाय दूसरे स्थानों पर तिरछा छेदन करने से सिरा-स्नायु को नुकसान पहुँचाता है ॥२३॥

शस्त्रेऽवचारिते वाग्भिः शीताम्भोभिश्च रोगिणम् ।
आश्वास्य परितोऽङ्गुल्या परिपीड्य व्रणं ततः ॥ २४ ॥
क्षालयित्वा कषायेण प्लोतेनाम्भोऽपनीय च ।
गुग्गुल्वगुरुसिद्धार्थहिङ्गुसर्जरसान्वितैः ॥ २५ ॥
धूपयेत्पटुपड्ग्रन्थानिम्बपत्रैर्घृतप्लुतैः ।
तिलकल्काज्यमधुभिर्यथास्वं भेषजेन च ॥ २६ ॥
दिग्धां वर्तिं ततो दद्यात्तैरेवाच्छादयेच्च ताम् ।
घृताक्तैः सक्तुभिश्चोर्ध्वं घनां कवलिकां ततः ॥ २७ ॥
निधाय युक्त्या बध्नीयात्पट्टेन सुसमाहितम् ।
पार्श्वे सव्येऽपसव्ये वा नाधस्तान्नैव चोपरि ॥२८॥

स०—शस्त्रेऽवचारिते न्यस्ते सति वाग्भिस्तत्कालोचिताभिर्मधुराभिः स्वस्थो जातोऽसीत्येवंप्रायाभिस्तथा शीतांभोभिः परिषेकाभिरातुरमाश्वास्याऽनंतरं व्रणं परितः समंतादंगुल्या परिपीड्य पूयादिदोषनिर्हारायाऽनंतरं कषायेण मधुयष्ट्यादिसाधितेन क्षालयित्वा ततः प्लोतेन कार्पासादिजवस्त्रखंडेन जलमपनीय पानीयार्द्रतां निर्हृत्याऽनंतरं व्रणं गुग्गुल्वादिभिर्निम्बपत्रांतैर्धूपयेत् । किंभूतैः । घृतप्लुतैः । प्लुतग्रहणाद्बहुघृतैरिति द्योतयति । संग्रहे चोक्तम् । गुग्गुल्वादिभिरेवं शयनासनादि द्विरह्नो धूपयेदिति । ततोऽनंतरं वर्तिं कार्पासादिमयीं व्रणांतः प्रवेशयेद्वैद्यः । किंभूताम् । दिग्धाम् । कैः तिलकल्काज्यमधुभिः । वातव्रणे तिलपिष्टदिग्धां पित्तव्रणे घृतदिग्धां कफव्रणे मधुदिग्धाम् । केचित्तु सर्वैरेव तैर्युगपद्दिग्धामित्याहुः । न च केवलं तिलादिभिर्यावद्यथास्वं यद्यस्य दोषस्य स्वं भेषजं तेन च दिग्धाम् । तैरेव तिलकल्कादिभिर्व्रणांतःप्रविष्टां तां वर्तिमाच्छादयेत्स्थगयेत् । ऊर्ध्वं तदुपरिष्टाद्घृतयुक्तैःसक्तुभिराच्छादयेत् । संग्रहे चोक्तम् । नातिभृष्टयवसक्तुभिर्घृताक्तैर्भोजनांतेऽभसा दक्षिणांगुलिभिः सुमृदितैरवच्छाद्येति । ततो व्रणांतःप्रविष्टवर्तिच्छादनानंतरं कवलिकां बहुवस्त्रखंडपुटनिर्वर्तितां निधाय संस्थाप्य पट्टेन निबिडवस्त्रखंडेन प्रकृतत्वाद् व्रणं बध्नीयात् । कथम् । युक्त्या दोषकालानुगुणया । अत एव संग्रहे जगाद । वातश्लेष्मोद्भवांस्तत्र द्विस्त्रिर्वा वेष्टयेद्व्रणान् । सकृदेव परिक्षिप्य पित्तरक्ताभिघातजान् । तथोक्तम् । शस्त्रक्षतरुजायां तु प्रततायां यष्टीमधुकसर्पिषोष्णेन व्रणं सिंचेत् । उदकुंभादपो गृहीत्वा पोक्षन् परित इति । कथं बध्नीयात् । सुसमाहितं कृत्वा च न हेलया । वामपार्श्वे दक्षिणपार्श्वे वाऽधस्ताच्च न बध्नीयान्नैव चोपर्यूर्ध्वं बध्नीयात् ॥ २४–२८ ॥

शस्त्रकर्म में रोगी को आश्वासनादि कर्तव्य—

वि०—शस्त्रकर्म करने के उपरान्त शीतल जल से और वचनों से रोगी को आश्वासन देकर व्रण को अङ्गुली द्वारा चारों ओर से दबाये, फिर से कषाय से धोकर रुई के फोये से पानी को सुखा देवे। फिर गुग्गुल, अगुरु, सरसों, हींग, राल, नमक, वच; नीम के पत्ते इनको घी में मिलाकर (आग में जलाकर) व्रणपर धूप देवे। इसके उपरान्त तिलकल्क (वातज व्रण में), घी (पीत्त व्रण में), और मधु से (कफ व्रण में) अथवा दोषों के अनुसार औषध से लिप्त वर्ति को व्रण में रख देवे और उन्हीं औषधियों से वर्त्ति को ढाँप देवे। इसके उपर घृत मिश्रित सत्तू को रखकर ऊपर एक मोटी गद्दी रख कर सावधानी से तथा युक्तिपूर्वक पट्टी से वाम पार्श्व में या दक्षिण पार्श्व में गाँठ देते हुए बाँध दे। व्रण के नीचे या ऊपर गाँठ न बाँधे ॥ २४–२८ ॥

शुचिसूक्ष्मदृढाः पट्टाः कवल्यः सविकेशिकाः ।
धूपिता मृदवः श्लक्ष्णा निर्वलीका व्रणे हिताः ॥ २९ ॥

स०—तथा शुचयः सूक्ष्मसूत्रा दृढाश्च पट्टा हिताः । तथा कवलिकाः सविकेशिकाश्च व्रणे हिताः । किंभूताः । धूपितास्तथा मृदवस्तथा श्लक्ष्णास्तथा वलीरहिताः ॥ २९ ॥

पट्टी आदि का वर्णन—

वि०—व्रण के लिये—पवित्र, पतली और मजबूत पट्टियाँ, कवलिकायें (गद्दियाँ) और विकेशिकायें (वर्त्तियाँ), धूप दी हुई कोमल, चिकनी और वली (सिकुड़न) रहित होनी चाहिये ॥ २९ ॥

कुर्वीतानन्तरं तस्य रक्षां रक्षोनिषिद्धये ।
बलिं चोपहरेत्तेभ्यः—

स०—अनंतरं रोगिणः कृतशस्त्रकर्मणो व्रणे रक्षां कुर्यात् । किमर्थम् । रक्षोनिषिद्धये पिशिताशनराक्षसादिनिषेधाय । तेभ्यश्च रक्षोभ्यो बलिमुपहरेद्दद्यात् ।

शस्त्रकर्म के बाद व्रणरक्षार्थ कार्य—

वि०—इसके पीछे-पिशिताशन-मांस खाने वाले राक्षसों से रोगी की रक्षा के लिये राक्षसों को बलि देवे।

सदा मूर्ध्ना च धारयेत् ॥ ३० ॥
लक्ष्मीं गुहामतिगुहां जटिलां ब्रह्मचारिणीम् ।
वचां छत्रामतिच्छत्रां दूर्वां सिद्धार्थकानपि ॥ ३१ ॥
ततः स्नेहादिनेहोक्तं तस्याचारं समादिशेत् ।

स०—सर्वकालं चौषधीर्मूर्ध्ना धारयेत् । ता एवाह लक्ष्मीमित्यादि । लक्ष्मीं पद्मचारिणीम् । गुहां पृश्निपर्णीम् । अतिगुहां शालिपर्णीम् । जटिलां मांसीम् । ब्रह्मचारिणीं ब्रह्मयष्टिकाम् । वचामुग्रगंधाम् । छत्रां शतपुष्पाम् । अतिच्छत्रां विषाणिकाम् । ततोऽनंतरं तस्य व्रणिन आचार-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मादिशेत्। कतमम्? स्नेहदिनेहोक्तम् स्नेहस्य दिनं स्नेहदिनं स्नेहपानोपलक्षितमहस्तत्रेहा चेष्टा तस्यामुक्तं स्नेहपानविध्युपदिष्टमुष्णोदकोपचारी स्यादित्यादिकम् ॥ ३०-३१ ॥

वि०—हमेशा-लक्ष्मी (ब्राह्मी या शमी), पृश्निपर्णी, शालपर्णी, जटामांसी, ब्रह्मयष्टिका, वच, छत्रा, अतिछत्रा (शतपुष्पा कुल के द्रव्य), दूब, सरसों-इन ओषधियों को सिर पर धारण करे।

इसके उपरान्त स्नेह बिधि में कही आचार विधि को (उष्णोदकोपचारी स्यात् इत्यादि) बरतने के लिये कहे।

दिवास्वप्नो व्रणे कण्डूरागरुक्शोषपूयकृत् ॥ ३२ ॥
स्त्रीणां तु स्मृतिसंस्पर्शदर्शनैश्चलितस्रुते।
शुक्रे व्यवायजान् दोषानसंसर्गेऽप्यवाप्नुयात् ॥ ३३ ॥
(व्रणे श्वयथुरायासात् स च रागश्च जागरात्।
तौ च रुक् च दिवास्वापात्ताश्च मृत्युश्च मैथुनात् ॥)

स०—दिवास्वप्नो व्रणे कंड्वादिकृत्। तस्माद् व्रणिनाऽहःस्वप्नो न सेव्यः। स्त्रीणां तु स्मृतिसंस्पर्शदर्शनैः पूर्वं स्वस्थानाच्चलितं पश्चात्स्रुतं तस्मिंश्चलितस्रुते शुक्रे सत्यसंसर्गेऽपि तासामसंबंधेऽपि मैथुनमंतरेणाऽपि व्यवायजान्मैथुनोत्थान् दोषानवाप्नुयात्। तस्मात्स्त्रीस्मरणसंस्पर्शदर्शनादि वर्जनीयमित्यर्थः ॥ ३२-३३ ॥

शस्त्रकर्म के बाद त्याज्य कर्म—

वि०—दिन में सोने से व्रण में कण्डू, लालिमा, वेदना, शोफ और पूय उत्पन्न होता है। स्त्रियों के स्मरण से, स्पर्श से या देखने से शुक्र के क्षरण हो जाने पर-सम्भोग के विना भी-सम्भोगजन्य दोष होते हैं ॥३२-३३॥

(परिश्रम से व्रण में शोथ होता है; रात्रि में जागरण से लालिमा होती है; दिन में सोने से शोथ, लालिमा और दर्द होता है, और मैथुन से शोथ, लालिमा, दर्द के साथ मृत्यु भी होती है ॥ १ ॥)

भोजनं च यथासात्म्यं यवगोधूमषष्टिकाः।
मसूरमुद्गतुवरीजीवन्तीसुनिषण्णकाः ॥ ३४ ॥
बालमूलकवार्ताकतण्डुलीयकवास्तुकम् ।
कारवेल्लककर्कोटपटोलकटुकाफलम् ॥ ३५ ॥
सैन्धवं दाडिमं धात्री घृतं तप्तहिमं जलम्।
जीर्णशल्योदनं स्निग्धमल्पमुष्णोदकोत्तरम् ॥ ३६ ॥
भुञ्जानो जाङ्गलैर्मांसैः शीघ्रं व्रणमपोहति।

स०—भोजनं तु यथासात्म्यं यद्यस्य सात्म्यं यवादि। तथा जीवंत्यादिशाकं च तथा सैंधवादिकम्। पुराणशालिभक्तं स्निग्धं सस्नेहं तथाऽल्पं जांगलैर्मांसैः सह भुंजान उष्णोदकोत्तरं यथा भवत्येवं व्रणी शीघ्रं व्रणमपोहति ॥ ३४-३६ ॥

भोजन द्रव्य—

वि०—भोजन—रोगी को अभ्यास के अनुसार गेहूँ, साठी, मसूर, मूंग, तुवर (अरहर), जीवन्ती, चौपतिया, कच्ची मूली, बैंगन, तण्डुलीयक (चौलाई), बथुआ, करेला, ककोड़ा, पटोल, तरोई का फल, सैन्धव, अनार, आँवला, घी और गरम करके ठण्डा किया पानी पथ्य हैं। पुरातन शालि के भात को घृत से स्निग्ध करके थोड़ीमात्रा में जांगल मांसरस के साथ खाकर पीछे से गरम पानी पीये। इस प्रकार करने से व्रण शीघ्र भर जाता है ॥ ३४-३६ ॥

अशितं मात्रया काले पथ्यं याति जरां सुखम् ॥ ३७ ॥
अजीर्णात्त्वनिलादीनां विभ्रमो बलवान् भवेत्।
ततः शोफरुजापाकदाहानाहानवाप्नुयात् ॥ ३८ ॥

स०—मात्रया काले भुक्तं पथ्यं सुखेन जरां याति। तस्मात् पथ्यं मात्रया काले भोक्तव्यम्। अजीर्णं तु कथंचिन्न कार्यम्। यतोऽजीर्णाद्वातादीनां बलवान् विभ्रमः क्षोभः स्यात्। तस्मात्क्षोभाच्छोफादीन् प्राप्नुयात् ॥ ३७-३८ ॥

पथ्य भोजन से लाभ तथा अजीर्ण से हानि—

वि०—समय पर मात्रा में खाया पथ्य भोजन सुख से जीर्ण हो जाता है। अजीर्ण के कारण वात आदि दोषों का क्षोभ बलवान् होता है और इस क्षोभ से शोफ, वेदना, पाक, दाह एवं आनाह उत्पन्न हो जाते हैं ॥ ३७-३८ ॥

नवं धान्यं तिलान् माषान् मद्यं मांसमजाङ्गलम्।
क्षीरेक्षुविकृतीरम्लं लवणं कटुकं त्यजेत् ॥ ३९ ॥
यच्चान्यदपि विष्टम्भि विदाहि गुरु शीतलम्।
वर्गोऽयं नवधान्यादिर्व्रणिनः सर्वदोषकृत् ॥ ४० ॥
मद्यं तीक्ष्णोष्णरूक्षाम्लमाशु व्यापादयेद् व्रणम्।

स०—नवधान्यादि त्यजेत्। यतोऽयं नवधान्यादिवर्गो व्रणिनः सर्वान् दोषान् करोति। संग्रहे चोक्तम्। नवधान्यं विष्टंभि माषकलायकुलत्थनिष्पावशिंबीशीतांबुमद्येक्षुक्षीरपिष्टतिलविकृतिशुष्कशाकपिशितहरितकाम्ललवणकटुकक्षारानूपामिषाणि वर्जयेदिति। शीतलं शीतांब्वादि। मद्यं तीक्ष्णोष्णादिगुणं द्राग्व्रणं व्यापादयेत्। तस्मान्मद्यमीदृशं वर्ज्यं नापरम्। तथा च तंत्रांतरे। सस्नेहं मधुरप्रायं नातितीक्ष्णमकर्कशम्। तनु यत्सुखपेयं च माद्वींकेषु तदुत्तममित्युक्तम्। तस्मान्माद्वींकादिप्रायं रोध्रासवादिकं वा यन्मद्यं तत्सात्म्यत्वात्किंचित्पेयमेव ॥ ३९-४० ॥

व्रण में नये धान्यादि का त्याग—

वि०—अपथ्य—नूतन धान्य (एक वर्ष से कम के), तिल, उड़द, मद्य, जांगल से अतिरिक्त मांस, दूध और गन्ने की विकृति, अम्ल, लवण और कटु रस इनको छोड़ देवे। इसके सिवाय जो भी पदार्थ विष्टम्भ करने वाले, बिदाही, गुरु और शीतल हों-उनको छोड़ दे। यह नव धान्यादि वर्ग व्रण रोगियों के लिये सर्व दोष-कोपक होता है।

जो मद्य तीक्ष्ण, उष्ण, रूक्ष और अम्ल होता है वह मद्य व्रण को विकृत कर देता है ॥ ३९-४० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वक्तव्य—इसलिये 'सस्नेहं मधुरप्रायं नातितीक्ष्णमकर्कशम्। तनु यत्सुखपेयं च मार्द्वीकेषु तदुत्तमम्' ऐसा मद्य पीने में दोष नहीं।

वालोशीरैश्च वीज्येत न चैनं परिघट्टयेत् ॥ ४१ ॥
न तुदेन्न च कण्डूयेच्चेष्टमानश्च पालयेत्।
स्निग्धवृद्धद्विजातीनां कथाः शृण्वन्मनःप्रियाः ॥४२॥
आशावान् व्याधिमोक्षाय क्षिप्रं व्रणमपोहति।

स०—वालोशीरैश्चैनं व्रणं वीजयेत्। न चैनं परिघट्टयेत्। तथा न व्यथयेत्। नापि कंडूयेत्। व्यापारं च कुर्वन् व्रणिनं पालयेद्रक्षेत्। तथा स्निग्धादीनां कथाश्चित्तप्रिया आकर्षयन् रोगमुक्तये विहिताशोऽह्नाय व्रणमपोहति ॥४१-४२॥

व्रणयुक्त की शुश्रूषा—

वि०—बाल या खस की बनी चौंरी अथवा पंखी से व्रण पर हवा करे; इस व्रण को रगड़े नहीं। न खोदे, न खुजाये; कोई चेष्टा करने पर व्रण की रक्षा करे, स्नेही वृद्ध ब्राह्मणों से मन के अनुकूल कथाओं को सुनते हुए तथा रोग-शान्ति की आशा रखने से व्रण शीघ्र भर जाता है ॥ ४१-४२ ॥

तृतीयेऽह्नि पुनः कुर्याद् व्रणकर्म च पूर्ववत् ॥ ४३ ॥
प्रक्षालनादि दिवसे द्वितीये नाचरेत्तथा।
तीव्रव्यथो विग्रथितश्चिरात्संरोहति व्रणः ॥ ४४ ॥

स०—तृतीये दिवसे पुनरपि प्रक्षालनादि कर्म पूर्ववत् पूर्वेण व्रणकर्मणा तुल्यं कुर्यात्। द्वितीये तु दिवसे प्रक्षालनादि नाचरेत् किमित्याह—तथा तेन प्रकारेण व्रणस्तीव्रव्यथः संपद्यते। तथा विग्रथितः स प्रदेशो बहुभिर्युक्तः स्यात्। तथा चिराच्चिरेण संरोहं याति रूढः संपद्यते ॥ ४३-४४ ॥

व्रण धोने का विधान—

वि०—तीसरे दीन फिर पूर्ववत् (कषाय में धोना आदि) व्रणकर्म करे (पट्टी बदले)। इस कर्म को दूसरे दिन न करे क्योंकि दूसरे दिन (जल्दी) करने से व्रण में तीव्र व्यथा और ग्रन्थियाँ उत्पन्न होती हैं; तथा व्रण देर से भरता है।

स्निग्धां रूक्षां श्लथां गाढां दुर्न्यस्तां च विकेशिकाम्।
व्रणे न दद्यात् कल्कं वा—

स०—व्रणे व्रणाख्ये आधारे स्निग्धादिगुणयुक्तविकेशिकां व्रणांतःप्रवेशयोग्यां वर्तिं न दद्यात्। श्लथां शिथिलां गाढां निबिडां दुर्न्यस्तां विषमन्यस्ताम्। अत्र चातिशब्दोऽर्थवशाद्गम्यमानो बोध्यत एव। संग्रहे स्पष्टं कृत्वोवाच। अतिस्नेहात्क्लेद इति। कल्कमप्यतिस्निग्धादिगुणयुक्तं व्रणे न योजयेत्। पिष्टमौषधं द्रवाप्लुतं कल्क इत्युच्यते।

व्रण में अतिस्निग्धादि वर्तियों का निषेध—

वि०—व्रण में अतिस्निग्ध, अतिरूक्ष, ढीली, कठिन और बुरी तरह रक्खी वर्त्ति प्रविष्ट नहीं करनी चाहिये। अथवा इस प्रकार का कल्क (पानी से भीगी पीसी हुई औषध) व्रण पर नहीं रक्खे। क्योंकि—

किमिति स्निग्धादिगुणयुक्तां विकेशिकां कल्कं वा न दद्यादित्याह—

स्नेहात्क्लेदो विवर्द्धते ॥ ४५ ॥
मांसच्छेदोऽतिरुग्रौक्ष्याद्दरणं शोणितागमः।
श्लथातिगाढदुर्न्यासैर्व्रणवर्त्मावघर्षणम् ॥ ४६ ॥

स०—यतः स्नेहात् क्लेदवृद्धिः। अतिरूक्षत्वाच्च मांसच्छेदोऽतिव्यथा दरणम्। तथा विशेषाद्रक्तस्रावश्च। श्लथादिगुणयुक्तेन च व्रणमार्गस्याऽवघर्षणं स्यात् ॥ ४५-४६ ॥

अतिस्नेह से हानि—

वि०—स्निग्धता से क्लेद बढ़ता है; अति रूक्षता से मांस कटता है और बहुत दर्द होता है एवं विदीर्ण होकर रक्त आता है। अति ढीला या अति कठिन अथवा बुरी तरह रक्खी वर्त्ति से व्रणों के किनारों पर रगड़ पड़ती है (जिससे घाव नहीं भरता) ॥ ४५-४६ ॥

विकेशिका व्रणे कस्माद्दीयत इत्याह—

सपूतिमांसं सोत्सङ्गं सगतिं पूयगर्भिणम्।
व्रणं विशोधयेच्छीघ्रं स्थिता ह्यन्तर्विकेशिका ॥ ४७ ॥

स०—विकेशिका व्रणांतरे स्थिता पूत्यादियुक्तं व्रणं विशोधयेद्यतस्तस्माद् व्रणेऽसौ योज्या। उत्संग उन्नतिः। पूयादिभक्षितमांसादिप्रदेशः शून्यो देहस्य गतिरुच्यते। पूयश्चासौ गर्भश्च स विद्यते यस्य स पूयगर्भी तम् ॥ ४७ ॥

व्रण में वर्तिप्रवेश का कारण—

वि०—व्रण के अन्दर रक्खी वर्त्ति—पूतियुक्त मांस (सड़े मांस) को; व्रण के अन्दर के खोखलेपन को (पूयसंचय स्थान को), गति (मार्ग) को, तथा पूय से भरे हुए व्रण को शीघ्र ही शुद्ध कर देती है ॥ ४७ ॥

व्यम्लं तु पाटितं शोफं पाचनैः समुपाचरेत्।
भोजनैरुपनाहैश्च नातिव्रणविरोधिभिः ॥ ४८ ॥

स०—व्यम्लं विदग्धम् अपक्वं व्रणं पक्वमितिज्ञानात्पाटितम्। तथाविधैः श्वयथुपाचनैरन्नपानैस्तथाविधैश्चोपनाहैः सालवणकिण्वादिकलिपतैरुपाचरेत्। न च सर्वैरेवाविशेषात्तैरुपाचरेदित्याह। नातीत्यादि। न व्रणातिविरोधीन्यतिश्वयथुपाचनान्यम्लकटुकतीक्ष्णोष्णलवणप्रायाणि द्रव्याणि तथैवंप्रायाणि भोजनानि तैरुपचारैरपि तु किंचिदेव व्रणविरोधीनी यानि तैरुचितैरुपक्रमेदिति बोध्यम्। नातिशब्दप्रयोगात् ॥ ४८ ॥

कच्चे व्रण में शस्त्रच्छेदन करने पर कर्तव्य—

वि०—जो विदग्ध (अर्धपक्व) शोथ—अज्ञान से चीरा गया हो, उस शोथ की पाचन औषधों से चिकित्सा करे। इस प्रकार के भोजन और उपनाह द्रव्य व्रण के लिये अतिशय विरोधी नहीं होने चाहिये; [अर्थात् अम्ल, कटु, तीक्ष्ण, उष्ण, लवण इस प्रकार के भोजन या द्रव्य नहीं बरतने चाहिये] ॥ ४८ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सद्यः सद्योव्रणान् सीव्येद्विवृतानभिघातजान् ।
मेदोजांल्लिखितान् ग्रन्थीन् ह्रस्वाः पालीश्च कर्णयोः ॥ ४९॥
शिरोऽक्षिकूटनासौष्ठगण्डकर्णोरुबाहुषु ।
ग्रीवाललाटमुष्कस्फिङ्मेढ्रपायूदरादिषु ॥ ५० ॥
गम्भीरेषु प्रदेशेषु मांसलेष्वचलेषु च ।

स०—सद्योव्रणानभिघातजान विस्तीर्णमुखान् सद्यस्तत्क्षणादेव सीव्येत् । संकुचितवदनास्तु ते न सीव्याः । अभिघाताज्जन्म येषां ते । सद्योव्रणानित्यभिघातजेष्वपि चिरकालस्थितेषु नायं विधिरिति द्योतयति । मेदोजान् ग्रंथीनालिख्य सूच्या सीव्येत् ॥ ४९-५० ॥

सीने योग्य व्रण—

वि०—सीवन विधि—चोट लगने से मुख खुले हुए तुरन्त के व्रणों को तुरन्त सीना चाहिये । मेदजन्य ग्रन्थियों में तथा कानों की छोटी पालियों को भी लेखन कर सीना चाहिये । शिर, अक्षिकूट, नासिका, ओष्ठ, गण्ड, कर्ण, ऊरु, बाहु, ग्रीवा, मस्तक, मुष्क, नितम्ब, मेहन, पायु और उदर आदि में तथा गहरे भागों में मांसल एवं अचल स्थानों में व्रण को सीना चाहिये ॥ ४९-५० ॥

न तु वङ्क्षणकक्षादावल्पमांसे चले व्रणान् ॥ ५१ ॥
वायुनिर्वाहिणः शल्यगर्भान् क्षारविषाग्निजान् ।

स०—वङ्क्षणादिस्थितानां व्रणानां गंभीरादिप्रवेशस्वात्सीवनं प्राप्तं तन्निषिध्यते । मांसलेषु स्थिरेषु च व्रणान् सीव्येदित्युक्तवैवाऽल्पमांसे चले स्थाने व्रणान्न सीव्येदित्यर्थे लब्धेऽल्पमांसांश्चलांश्च व्रणान्न सीव्येदिति वचनमतिशयार्थम् । जातुचिदभिघातजान्विवृतानप्येवंविधान् व्रणान्न सीव्येदिति गमयति । तथा वायुं निर्वहंति निःश्वसंति तान् वायुनिर्वाहिणो न सीव्येत् । तथा शल्यं गर्भे येषां तान् शल्यगर्भांस्तथा क्षारविषाग्निभ्यो जातान् व्रणान्न सीव्येत् ॥ ५१ ॥

सीने के अयोग्य व्रण—

वि०—वंक्षण-कक्षा आदि में तथा थोड़े मांस वाले किन्तु गतिशील स्थानों के व्रणों को नहीं सीना चाहिये । जिन व्रणों में से वायु निकलती हो; जिनमें शल्य हो या व्रण क्षार, विष अथवा अग्नि से पैदा हुए हों—उनको भी नहीं सीना चाहिये ॥ ५१ ॥

सीवनात्पूर्वं यत्क्रियते तद्दर्शयति—

सीव्येच्चलास्थिशुष्कास्रतृणरोमापनीय तु ॥ ५२ ॥
प्रलम्बि मांसं विच्छिन्नं निवेश्य स्वनिवेशने ।
सन्ध्यस्थि च स्थिते रक्ते स्नाय्वा सूत्रेण वल्कलैः ॥५३॥
सीव्येन्न दूरे नासन्ने गृह्णन्नाल्पं न वा बहु ।

स०—स्थानाच्चलितमस्थ्यपनीय निरस्य तथा शुष्करक्तं तृणानि रोमाणि चाऽपास्य तथा शस्त्रादिना प्रकर्षेण लंबि व्रणे यद्विद्यते मांसं तत्स्वनिवेशन आत्मीये स्थाने निवेश्य संस्थाप्य संध्यस्थि स्वे स्थाने संस्थाप्य स्थिते रक्तेऽस्रवद्रूपत्वं प्राप्ते सति व्रणं सीव्येत् । केन । स्नाय्वादिना तथा वल्कलैः । वल्कलान्यश्मंतकादित्वगुद्भवानि तैः कथं सीव्येत् । न दूरे न विप्रकृष्टे न चासन्ने नाऽतिनिकटे गृह्णन्नाल्पं व्रणांशं नच बहु गृह्णन् ॥ ५२-५३ ॥

व्रणों को सीने के पूर्व कर्तव्य—

वि०—सीवन विधि—स्थान से खिसकी अस्थि (के टुकड़ों), शुष्क रक्त, तिनके और रोम को हटा या साफ करके; कट जाने से लटकते हुए मांस को उसके स्थान पर रखकर, सन्धि और अस्थि को स्थान पर बिठा कर, रक्त के रुक जाने पर व्रण को स्नायु, सूत्र या वल्कल के रेशे से सीना चाहिये । सीते समय न तो व्रण के बहुत दूर-दूर और न बहुत समीप में सीना चाहिये एवं न तो बहुत अधिक और न बहुत कम मांस या त्वचा पकड़नी चाहिये ।

[सीवन विधि—गोफणिका, तुन्नसेवनी; वेल्लितक और ऋजुग्रन्थि (राजग्रन्थि) भेद से चार प्रकार की है] ॥५२-५३॥

सान्त्वयित्वा ततश्चार्तं व्रणे मधुघृतद्रुतैः ॥ ५४ ॥
अञ्जनक्षौमजमषीफलिनीशल्लकीफलैः ।
सरोध्रमधुकैर्दिग्धे युञ्ज्याद्बन्धादि पूर्ववत् ॥ ५५ ॥

स०—ततः सीवनादनंतरमातुरं सांत्वयित्वा समाश्वास्य शीतांबुस्पर्शाऽथजनादिभिरनंतरमुक्तैर्लिप्ते व्रणे सति । कैः । अंजनादिभिः । किंभूतैः । मधुघृताभ्यां द्रुतैरालोडितैः । पूर्ववद्बंधादि युंज्यात् । तृतीयान्ताद्वतिः । पूर्वोद्दिष्टेन कर्मणा तुल्यं कषायक्षालनादि कवलिकादिकं च योजयेदित्यर्थः ॥५४-५५॥

व्रण को सीने के बाद कर्तव्य—

वि०—सीवन के उपरान्त रोगी को सान्त्वना देकर व्रण में अञ्जन, अलसी की राख, प्रियङ्गु, शल्लकी फल, लोध, मुलहठी इनके चूर्ण को मधु और घृत में मिलाकर व्रण पर लगाये, फिर पूर्व की भाँति पट्टी आदि बाँधे ॥ ५४-५५ ॥

व्रणो निःशोणितौष्ठो यः किञ्चिदेवावलिख्य तम् ।
सञ्जातरुधिरं सीव्येत्सन्धानं ह्यस्य शोणितम् ॥५६॥

स०—अविद्यमानशोणितौष्ठो यः स्यात्तमेवंभूतं व्रणं किंचिदेवेषन्मात्रमेव शस्त्रेणावलिख्य ततः संजातरुधिरं संतं सीव्येन्न त्वेवमेव । यस्मादस्य व्रणस्य संधानं शोणितमेव ॥५६॥

रक्तहीन व्रण को सीने की विधि—

वि०—जिस व्रण के ओठों से रक्त न आता हो उस व्रण के किनारों में थोड़ा सा लेखन करके रक्त निकालने पर सीना चाहिये, इस व्रण का सन्धान रक्त ही है अर्थात् रक्त से ही व्रण जुड़ता है ॥ ५६ ॥

तेषां च बंधनानां स्वरूपमाह—

बन्धनानि तु देशादीन् वीक्ष्य युञ्जीत तेषु च ।
आविकाजिनकौशेयमुष्णं क्षौमं तु शीतलम् ॥ ५७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शीतोष्णं तूलसन्तानकार्पासस्नायुवल्कजम् ।
ताम्रायस्त्रपुसीसानि व्रणे मेदःकफाधिके ॥ ५८ ॥
भङ्गे च युञ्ज्यात्फलकं चर्मवल्ककुशादि च ।

सु०—बध्यते व्रण एभिरिति बंधनान्याविकाजिनादीनि तेषु व्रणेषु देशकालसात्म्यादीन् वीक्ष्य निरूप्य यथायोगमाविकाद्यन्यतमं युंज्यात्। अविरेवाविकस्तस्येदमाविकम्। अवेः क इति कस्तस्येदमित्यण्। अजिनं चर्म। कोशात्संभूतं कौशेयम्। कोशाड्ढञिति ढञ्। आविकादिकं बंधनत्रयमुष्णवीर्यम्। क्षौमं तु बंधनं शीतलं शीतवीर्यम्। तूलसंतानादिजं शीतोष्यमुभयस्वभावम्। तूलं शाल्मलादिजं तस्य संतानः संततिः सूत्ररूपता तेन निष्पादितम्। मेदःकफाधिके व्रणे ताम्रादीनि लेखनार्थं युंज्यात्। भंग इत्यादि। न केवलं ताम्रादीनि मेदःकफाधिके व्रणे युंज्याद्यावच्चशब्दात्तानि भंगेऽपि युंज्यात्। न च केवलं भंगे ताम्रादीनि युंज्याद्यावत्फलकादि च युंज्यात्। कुशाशब्देन वंशादिकंविकोच्यते ॥ ५७-५८ ॥

व्रण को बाँधने के पदार्थ—

वि०—बन्धन विधि—देश आदि का विचार करके बन्धन द्रव्यों को बरतना चाहिये। इसमें भेड़, हरिण के रोम से बनी और रेशम की पट्टियाँ उष्ण हैं। क्षौल-अलसी की पट्टी शीतल है। सेमल आदि की रूई के सूत्र से बना या कपास के अन्य स्नायु या वल्कल का वस्त्र शीत-उष्ण दोनों प्रकार के (योगवाही) होते हैं। मेद और कफकी अधिकता वाले व्रणों में तथा भग्न में ताम्र, लोह, रांगा या सीसा इनको बन्धन के लिये बरते। अस्थिभङ्ग में (ताम्र आदि के अतिरिक्त) फलक (पट्टिका), चर्म, वल्कल, कुशादि (बाँस आदिकी खप्पच) को भी बाँधनेके लिये बरते ॥५७-५८॥

अधुना बंधप्रकारान्निर्दिशति—

स्वनामानुगताकारा बन्धास्तु दश पञ्च च ॥ ५९ ॥
कोशस्वस्तिकमुत्तोलीचीनदामानुवेल्लितम् ।
खट्वाविबन्धस्थगिकावितानोत्सङ्गगोष्फणाः ॥ ६० ॥
यमकं मण्डलाख्यं च पञ्चाङ्गी चेति योजयेत् ।
(विदध्यात्तेषु तेष्वेव कोशमङ्गुलिपर्वसु ।
स्वस्तिकं कर्णकक्षादिस्तनेषूक्तं च सन्धिषु ॥ १ ॥
मुत्तोली मेढ्रग्रीवादौ युञ्ज्याच्चीनमपाङ्गयोः ।
सम्बाधेऽङ्गे तथा दाम शाखास्वेवानुवेल्लितम् ॥ २ ॥
खट्वां गण्डे हनौ शङ्खे विबन्धं पृष्ठकोदरे ।
अङ्गुष्ठाङ्गुलिमेढ्राग्रे स्थगिकामन्त्रवृद्धिषु ॥ ३ ॥
वितानं पृथुलाङ्गादौ तथा शिरसि चेरयेत् ।
विलम्बिनि तथोत्सङ्गं नासौष्ठचिबुकादिषु ॥ ४ ॥
गोष्फणं सन्धिषु तथा यमकं यमिके व्रणे ।
वृत्तेऽङ्गे मण्डलाख्यं च पञ्चाङ्गी चोर्ध्वजत्रुषु ॥ ५ ॥)
यो यत्र सुनिविष्टः स्यात्तं तेषां तत्र बुद्धिमान् ॥ ६१ ॥

सु०—स्वं च तन्नाम च स्वनाम तेनानुगतोऽनुबद्ध आकारः संस्थानविशेषो येषां ते पंचदश बंधा वक्ष्यमाणाः। तुशब्दोऽवधारणार्थः। पंचदशैवेति न न्यूनाः। कोशादयः पंचांग्यंतास्तेषां बंधानां मध्ये यो बंधविशेषो यत्र यस्मिन्देहदेशे सुनिविष्टो भवेत्तं बंधं कोशादिकं तत्र तस्मिन्देशे योजयेत्। तत्र कोशोंऽगुलीपर्वसु चर्मादिकृतः। स्वस्तिकं संधिकूर्चभ्रूस्तनांतरकक्षाक्षिकपोलकर्णेषु। मुत्तोली ग्रीवामेढ्रयोः। चीनमपांगयोः। दाम संधिवंक्षणादौ। अनुवेल्लितं शाखासु। खट्वा हनुसंधिगंडेषु। विबंधमुदरोरुपृष्ठेषु। स्थगिकांगुष्ठांगुलीमेढ्रांत्रमूत्रवृद्धिषु। वितानं मूर्धादौ पृथुलांगे। उत्संगमंगविशेषे लंबिनि बाह्वादौ। गोफणः नासौष्ठचिबुकसक्थिषु। यमकं यमलव्रणयोः। मंडलं वृत्तेऽगे। पंचांगी जत्रूर्ध्वमिति योजना कार्या ॥ ५९-६१ ॥

व्रण को बाँधने के प्रकार—

वि०—बन्धन के भेद—बन्ध (पट्टियाँ) पन्द्रह प्रकार के हैं; इनका आकार इनके अपने नाम से ही स्पष्ट है। यथा कोश (तलवार आदि के रखने का खोल); स्वस्तिक (स्वस्तिक चिह्न के अनुसार); मुत्तोली (थैली), चीन (पताका के समान त्रिकोण), दाम (मोटी माला या रस्सी के आकार का), अनुवेल्लित (वेल के समान ऊपर को लपेटा हुआ), खट्वा (चारपाई के समान-चार पैर की पट्टी), विबन्ध (अनेक बन्धन युक्त); स्थगिका (आवरण या पगड़ी), वितान (तम्बू के आकार का), उत्संग (गोद या झोली), गोफण (गोफन की भाँति बीच में एक थैली और दोनों ओर रस्सी लगी); यमक (दो पट्टियाँ), मण्डल और पंचांगी (पाँच पुच्छवाली ये पन्द्रह बन्ध हैं, इनको स्थानके अनुसार बरते।

(इनमें से कोशबन्ध अंगुली के पर्वों में), स्वस्तिक को कान, कक्षा आदि स्तनों और सन्धियों में; मुत्तोली को मेहन और ग्रीवा आदि में; चीन को अपांग भागों में; दामको सम्बाध अङ्ग (वंक्षण आदि जहाँ आसानी से पट्टी न बँध सके) में, अनुवेल्लित को शाखाओं में खट्वा को हनु, गण्ड और शङ्ख में, विबन्ध को पीठ और उदर में, स्थगिका को अङ्गुष्ठ, अङ्गुलि और मेहन के अग्रभाग में तथा अन्त्रवृद्धि में, वितान को चौड़े अङ्ग तथा शिरपर, उत्संग को लटकनेवाले बाहु आदि में, गोष्फण को नासिका, ओठ, चिबुक और संधि में, यमकबन्ध को यमक व्रणों में, मण्डलबन्ध को गोल अङ्ग पर और पंचाँगी को जत्रु के ऊपर के भाग में बाँधना चाहिये। इनमें से जो बन्ध जिस स्थान पर ठीक तरह बैठे, बुद्धिमान् वैद्य वहीं पर उसको लगाये ॥ ५९-६१ ॥

संप्रत्येषां बंधानां गाढशिथिलादिबंधत्वं देशाद्यनुरोधाद्निरूपयति—

बध्नीयाद्गाढमूरु-स्फिक्कक्षावङ्क्षणमूर्धसु ।
शाखावदनकर्णोरःपृष्ठपार्श्वगलोदरे ॥ ६२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समं मेहनमुष्के च, नेत्रे सन्धिषु च श्लथम्।
बध्नीयाच्छिथिलस्थाने वातश्लेष्मोद्भवे समम्॥ ६३॥
गाढमेव समस्थाने भृशं गाढं तदाशये।
शीते वसन्तेऽपि च तौ मोक्षणीयौ त्र्यहात्त्र्यहात्॥६४॥
पित्तरक्तोत्थयोर्बन्धो गाढस्थाने समो मतः।
समस्थाने श्लथो नैव शिथिलस्याशये तथा॥ ६५॥
सायंप्रातस्तयोर्मोक्षो ग्रीष्मे शरदि चेष्यते।

स०—ऊरुस्फिगादिषु देशेषु गाढं बध्नीयान्न तु श्लथम्। शाखावदनादिषु समं बध्नीयात्। चशब्दान्मेहने मुष्कयोश्च सममेव। नेत्रे नयने तथा संधिषु शिथिलं बध्नीयात्। यत्र शिथिलस्थाने शिथिलो बंध उपदिष्टस्तत्र स्थाने यौ व्रणौ वातश्लेष्मोद्भवौ तौ समं कृत्वा बध्नीयान्न गाढं न शिथिलम्। यत्र स्थाने समो बंध उपदिष्टस्तत्र स्थाने वातश्लेष्मोद्भवौ व्रणौ गाढमेव बध्नीयात्। भृशमित्यादि तदित्यनेन गाढाशयः परामृश्यते। गाढबंधोद्दिष्टे स्थाने वातश्लेष्मोद्भवौ व्रणौ भृशं सुतरां गाढं बध्नीयात्। तौ वातश्लेष्मोद्भवौ व्रणौ शीते हेमंतशिशिराख्ये काले वसंते च त्र्यहात्त्र्यहात्त्रिदिनमंतरीकृत्य मोक्षणीयौ मोचितव्यौ इत्यर्थः। पित्तरक्तोत्थयोर्गाढबंधस्थाने समो बंधो मतो न शिथिलः। समस्थाने समो बंधो यत्रोपदिष्टः शाखावचनादौ तत्रस्थयोः पित्तरक्तोत्थयोर्व्रणयोः शिथिलो बंधः कार्यः। शिथिलस्य बंधस्याऽऽशये यत्र शिथिलो बंधः कार्य इत्युक्तं तत्र नैव बंधः कार्य इत्येवकारोऽवधारणार्थः कृतः। तयोः पित्तरक्तोत्थयोः सायं प्रातर्द्वौ कालौ मोच इष्यते। ग्रीष्मे शरदि चाऽन्यदोषोत्थव्रणस्याऽपि सायंप्रातर्मोच इष्यते॥ ६२-६५॥

यथादेश व्रणों को ढीला या कसकर बाँधना—

वि०—गाढ़ (कसा हुआ) बन्धन—ऊरु, स्फिक्, कक्षा, वंक्षण और शिर पर खींचकर पट्टी बाँधनी चाहिये। हाथ, पैर, मुख, कान, छाती, पीठ, पार्श्व, गला, उदर, मेहन और मुष्क पर समान नेत्र तथा सन्धियों में ढीली बाँधनी चाहिये। शिथिल स्थान में यदि वात-कफ का व्रण हो तो सम बन्ध बाँधे किन्तु सम स्थान में वात-कफजन्य व्रण हो तो गाढ़ बन्ध बाँधे, और गाढ़ बन्धन के ऊरु स्थान पर वात-कफज व्रण हो तो अतिशय गाढ़ बन्ध बाँधे। वात-कफजन्य व्रणों को शीतकाल में और वसन्त में तीन-तीन दिन के अन्तर से खोलना (पट्टी बदलना) चाहिये। पित्त-रक्तजन्य व्रणों में गाढ़ बन्ध के स्थानों में सम, समबन्ध के स्थान पर शिथिल और शिथिल बन्ध के स्थान पर बिलकुल नहीं बाधना चाहिये। पित्तरक्तजन्य व्रणों में सायं, प्रातः दोनों समय तथा ग्रीष्म और शरद् में अन्य व्रणों में भी दोनों समय पट्टी बदलनी चाहिये। तीन-तीन दिन पर तथा सायं-प्रातः पट्टी बदलने का स्पष्ट उल्लेख है अतः दोष, ऋतु, अवस्थाविशेष की दृष्टि से यदि आवश्यक हो तो वैद्य अपनी बुद्धि से विचार कर प्रति दिन भी पट्टी बदल सकता है॥ ६२-६५॥

ननु बंधेन विना व्रणो धार्य इत्याह—

अबद्धो दंशमशकशीतवातादिपीडितः॥ ६६॥
दुष्टीभवेच्चिरं चात्र न तिष्ठेत्स्नेहभेषजम्।
कृच्छ्रेण शुद्धिं रूढिं वा याति रूढो विवर्णताम्॥६७॥

स०—अबद्धो व्रणो दंशादिभिः पीडितो व्यथितस्तथा आदिशब्दाद्रजोधूमादिभिर्व्यथितोऽदुष्टोऽपि व्रणो दुष्टीभवति। अत्र च व्रणे बंधमंतरेण व्रणघ्नः स्नेह उपयोजितो भेषजं वा योजितं चिरं न तिष्ठेत्। बंधं च विना सम्यगुपचर्यमाणोऽपि व्रणः कष्टेन शुद्धिं याति रूढिं च कृच्छ्रेण याति। रूढोऽपि सन्विवर्णतां याति न शरीरवर्णतामित्यबंधनादोषाः॥६६-६७॥

व्रण को नहीं बाँधने से हानि—

वि०—पट्टी न बाँधने से—दंश, मच्छर, शीतल वायु आदि से पीड़ित होने के कारण व्रण दूषित हो जाता है तथा वहाँ स्नेह औषध देर तक नहीं टिकती एवं बन्धन के बिना व्रण कठिनाई से शुद्ध होता है या कठिनाई से भरता है अथवा भरकर विकृत रंग का होता है॥ ६६-६७॥

इदानीं बंधनाद् गुणानाह—

बद्धस्तु चूर्णितो भग्नो विश्लिष्टः पाटितोऽपि वा।
छिन्नस्नायुसिरोऽप्याशु सुखं संरोहति व्रणः॥६८॥
उत्थानशयनाद्यासु सर्वेहासु न पीड्यते।
उद्वृत्तौष्ठः समुत्सन्नो विषमः कठिनोऽतिरुक्॥ ६९॥
समो मृदुररुक् शीघ्रं व्रणः शुध्यति रोहति।

स०—तुरवधारणे। बद्ध एवं व्रणो बंधनमाहात्म्याच्चूर्णितोऽस्थिसमाश्रितो व्रणस्तथा भग्नोऽस्थिसमाश्रित एव व्रणस्तथा विश्लिष्टः संधिस्थानादन्यस्थानगतो व्रणो नेत्रादिस्तथा पाटितः सर्वदेशस्थितोऽपि तथा छिन्नस्नायुसिरोऽप्याशु व्रणः सुखं सम्यग्रोहति तथोत्थानशयनाद्यासु सर्वास्वीहासु चेष्टासु न पीडयेन्न व्यथयेत्। ऊर्ध्वं वृत्तौ वर्तुलावोष्ठौ यस्य स उद्वृत्तौष्ठो न समः। तथा समुत्सन्नः समंतादुत्सन्न उन्नतो यो व्रणो न समः। तथा विषम उद्वृत्तौष्ठसमुत्सन्नाभ्यां व्यतिरिक्तो विषमसंस्थानः। तथा कठिनो यो व्रणो न मृदुः। तथाऽतिरुग्यो व्रणः। स सर्व उद्वृत्तौष्ठादिपंचप्रकारोऽपि बंधमाहात्म्यादशुभरूपतां हित्वा व्रणः शीघ्रं शुद्धिं याति रोहति। ननूद्वृत्तौष्ठसमुत्सन्नावपि विषमशब्देनैव ग्रहीष्येते किमेताभ्यामुपात्ताभ्याम्। अस्त्येवैतत् किंत्वनयोः पृथङ्निर्देशेनाऽतिदुश्चिकित्स्यतरत्वं गमयति॥ ६८-६९॥

व्रण को बाँधने से लाभ—

वि०—बन्धन के गुण—अस्थि के चूर्णित होने से या टूटने से अथवा विश्लेष से हुआ व्रण, विदीर्ण हुआ तथा जिसमें सिरास्नायु छिन्न हो गए हों ऐसा भी व्रण बन्धन से सुख-पूर्वक भरता है। उठने सोने आदि सब चेष्टाओं में पिड़ित नहीं होता। ऊपर को निकले किनारों वाला, सम्पूर्ण रूप में ऊपर को उठा हुआ, विषम (ऊंचा-नीचा), कठिन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथा अतिशय वेदना वाला (इन पाँचों प्रकार का अशुद्ध व्रण) तथा समान, कोमल एवं वेदना रहित (शुद्ध) व्रण बन्धन से शीघ्र भर जाता है और शीघ्र शुद्ध होता है ॥ ६८-६९ ॥

स्थिराणामल्पमांसानां रौक्ष्यादनुपरोहताम् ॥ ७० ॥
प्रच्छाद्यमौषधं पत्रैर्यथादोषं यथर्तु च।
अजीर्णतरुणाच्छिद्रैः समन्तात्सुनिवेशितैः ॥ ७१ ॥
धौतैरकर्कशैः क्षीरिभूर्जार्जुनकदम्बजैः।

स०—स्थिराणां व्रणादीनां दीर्घकालानुबंधिनां तथाऽल्पमांसानामनुपचितपललानामत एव हेतोस्तथा रौक्ष्यादनुपरोहतां रूढिमगच्छतामौषधं कल्कस्नेहादिकं यदुपयुज्यते तत्पत्रैः क्षीरिभूर्जार्जुनकदंबजैः प्रच्छाद्य स्थगितव्यं यथादोषं दोषानतिक्रमेण ऋत्वनतिक्रमेण च तद्वशाद्यथायोगम्। यथा वातव्रणे शीतर्तौ स्निग्धोष्णैः पित्तव्रणे घर्मकाले शीतस्वभावैः कफव्रणे उष्णकाले रूक्षोष्णप्रायैः। एवं साधारणेऽपि काले मिश्रदोषे च कल्पनीयम्। किंभूतैः पत्रैः। अजीर्णान्यजर्जराणि तरुणानि प्रत्यग्राण्यच्छिद्राणि छिद्ररहितानि तैरजीर्णतरुणाच्छिद्रैः। समंतात्सुनिवेशितैः। तथा धौतैर्जलादिना निर्मलीकृतैः। तथाऽकर्कशैरकठिनैः॥ ७०-७१ ॥

स्थिरादि व्रणौषधों पर पत्राच्छादन—

वि०—पत्रदान—जो व्रण स्थिर (चिर काल तक बने रहने वाले) एवं थोड़े मांस वाले हों तथा रूक्षता के कारण जो नहीं भरते, उनमें औषध को दोष एवं ऋतु के अनुसार पत्रों से ढांप देना चाहिये। ये पत्ते-अजर्जरित, नूतन, छेद-रहित होने चाहियें, इनको चारों ओर से भली प्रकार रखना चाहिये। ये पत्ते जलादि से धोकर निर्मल करने चाहिये यथा इनमें खुदरापन नहीं होना चाहिये। ये पत्ते-बरगद आदि क्षीरिवृक्षों के, भोजपत्र, अर्जुन और कदम्ब के लेने चाहिये ॥ ७०-७१ ॥

(वात व्रण में—शीत ऋतु में स्निग्ध एवं उष्ण पत्र, पित्तव्रण में-ग्रीष्म में शीतस्वभाव के, कफ व्रण में-उष्ण काल में रूक्ष एवं उष्ण पत्र तथा प्रावृट् काल में और मिश्र दोष में साधारण पत्र बरतने चाहिये)।

कुष्ठिनामग्निदग्धानां पिटिकामधुमेहिनाम् ॥ ७२ ॥
कर्णिकाश्चोन्दुरुविषे क्षारदग्धा विषान्विताः।
बन्धनीया न मांसपाके गुदपाके च दारुणे ॥ ७३ ॥
शीर्यमाणाः सरुग्दाहाः शोफावस्थाविसर्पिणः।

स०—कुष्ठ्यादीनां ये व्रणास्ते न बंधनीयाः। तथोंदुरुविषे याः कर्णिकाः कोठरूपास्ताश्च न बध्नीयात्। तथा क्षारदग्धा ये व्रणास्ते न बंधनीयाः। तथा मांसपाके व्रणास्तथा दारुणे च गुदपाके व्रणास्ते न बंधनीयाः। मांसपाक इति मांसस्य पचि युङ्घञोरित्यलोपः। तथा शीर्यमाणाः शदनावस्थां भजमानाः। तथा सरुग्दाहास्तथा शोफावस्था अनेकावस्था भजन्तोऽपि ये शोफावस्थावस्थितास्तथा विसर्पिणो विसर्पावस्थास्थिता ये व्रणास्ते च न बन्धनीयाः॥ ७२-७३ ॥

नहीं बांधने योग्य व्रण—

वि०—बन्धन-निषेध—कुष्ठ रोगियों के और अग्नि से जलने से हुए व्रण, मधुमेह रोगियों की पिटिकायें, चूहे के विष में कर्णिका क्षार से जले, विष से युक्त, मांस के पाकजन्य व्रण, दारुण गुदपाक व्रण जिनसे मांस गिरता हो, वेदना तथा दाहयुक्त एवं शोफ की अवस्था में ही जो व्रण फैलते हों उन पर पट्टी नहीं बांधनी चाहिये ॥ ७२-७३ ॥

इदानीं सकृमीणां व्रणानां चिकित्सामाह—

अरक्षया व्रणे यस्मिन् मक्षिका निक्षिपेत्कृमीन् ॥ ७४ ॥
ते भक्षयन्तः कुर्वन्ति रुजाशोफास्रसंस्रवान्।
सुरसादिं प्रयुञ्जीत तत्र धावनपूरणे ॥ ७५ ॥
सप्तपर्णकरञ्जार्कनिम्बराजादनत्वचः।
गोमूत्रकल्कितो लेप सेकः क्षाराम्बुना हितः ॥ ७६ ॥
प्रच्छाद्य मांसपेश्या वा व्रणं तानाशु निर्हरेत्।

स०—अरक्षयाऽपालनेन यस्मिन् व्रणे मक्षिका कृमीन्निक्षिपेत्। ते तत्रस्थाः कृमयो व्रणं भक्षयन्तो रुजादीन् कुर्वन्ति। तत्र तस्मिन् व्रणे सुरसादिगणं धावने पूरणे च तन्निमित्तं प्रयुञ्जीत। धावनं च पूरणं च तस्मिन्। तथा तस्मिन्व्रणे सप्तपर्णादीनां त्वचो गोमूत्रकल्कितः पिष्टलेपो हितः। तथा क्षाराम्बुना सेको हितः। अथवा मांसपेश्या व्रणं प्रच्छाद्य पिधाय तान् कृमीनाशु निर्हरेत् ॥ ७४-७६ ॥

अरक्षा से कृमियुक्त व्रणों की चिकित्सा—

वि०—जिस व्रण में रक्षा न करने से (उचित संशोधन और बन्धन न करने से) मक्खियां कृमियों को उत्पन्न कर देती है और वे कृमि मांस आदि को खाते हुए वेदना, शोफ और रक्तस्राव को उत्पन्न कर देते हैं। उन व्रणों को धोने और व्रण में भरने के लिये सुरसादि गण को बरते। सप्तपर्ण, करञ्ज, आक, नीम और राजादन (खिरनी) इनकी छाल को गोमूत्र के साथ पीसकर कल्क बनाकर लेप और क्षार के जल से परिषेक करना हितकारी है। अथवा व्रण को मांसपेशी से ढांप कर इन कृमियों को शीघ्र निकाल देवे ॥ ७४-७६ ॥

न चैनं त्वरमाणोऽन्तः सदोषमुपरोहयेत् ॥ ७७ ॥
सोऽल्पेनाप्यपचारेण भूयो विकुरुते यतः।

स०—नचैनं व्रणमन्तः सदोषं त्वरमाणो वैद्य उपरोहयेत्। कस्मादित्याह। स इत्यादि। यतो यस्मात्सोऽन्तःस्थितदोषो व्रणो रूढोऽपि भूयः पुनस्तोकेनाऽप्यचारेण विकृतिं याति ॥ ७७ ॥

भीतर से दूषित व्रणों में शीघ्रता से रोहणनिषेध—

वि०—जल्दी में अन्दर से दोषयुक्त व्रण का रोहण नहीं करना चाहिये। क्योंकि यह व्रण थोड़े से भी अपचार से फिर (भरने पर भी) विकृत हो जाता है ॥ ७७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् ॥ ७८ ॥
हर्षं क्रोधं भयं चापि यावदास्थैर्यसम्भवात् ।
आदरेणानुवर्त्योऽयं मासान् षट् सप्त वा विधिः ॥ ७९ ॥

स०—रूढेऽपि सत्यजीर्णादीन् विवर्जयेत् । अयमजीर्णव्यायामादिपरिवर्जनलक्षणो विधिः षट् सप्त वा मासानादरेण रक्षणीयः ॥ ७८-७९ ॥

रोपित व्रणों में त्याज्य कर्म—

वि०—व्रण के भर जाने पर भी अजीर्ण, व्यायाम, व्यवाय (मैथुन) आदि छोड़ देवे तथा अत्यधिक प्रसन्नता, क्रोध एवं भय भी छोड़ दे, जब तक व्रण में स्थिरता उत्पन्न न हो। यह नियम आग्रहपूर्वक छः या सात महीने तक बरतना चाहिये ॥ ७८-७९ ॥

उत्पद्यमानासु च तासु तासु
वार्तासु दोषादिबलानुसारी ।
तैस्तैरुपायैः प्रयतश्चिकित्से-
दालोचयन् विस्तरमुत्तरोक्तम् ॥ ८० ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने शस्त्रकर्मविधिर्नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

स०—तासु तासु वार्तास्ववस्थास्वनिर्दिष्टस्वरूपाभिधानासूत्पद्यमानासु जायमानासु तैस्तैरुक्तैरुपायैः साधनैश्चिकित्सेद्वैद्यः । यथा मक्षिकाभिः कृमिनिक्षेपात्कृमिप्राबल्ये जाते चिकित्सा विहिता । किंभूतो वैद्यः । दोषादिबलानुसारी दोषादीनां बलं दोषादिबलम् । आदिग्रहणाद्देशकालादयो गृह्यंते । तदनुसरत्येवंविधो यो वैद्यः । तथा प्रयतो यत्नपरः । तथोत्तर उत्तरतन्त्रे व्रणभङ्गविधान उक्तं निर्दिष्टं विस्तरमालोचयन् निरूपयन्न तु यदृच्छयेति भावः । इन्द्रवज्रा वृत्तम् ॥ ८० ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने शस्त्रकर्मविधिर्नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

शेष अवस्थाओं में वैद्य का कर्तव्य—

वि०—उन उन अनुक्त शिकायतों के उत्पन्न होने पर वैद्य दोष आदि के बल के अनुसार प्रयत्नपूर्वक उन उपायों द्वारा जिनका वर्णन उत्तर स्थान में विस्तार से किया गया है विचार कर चिकित्सा करे ॥ ८० ॥

इस प्रकार विद्योतिनी टीका में सूत्रस्थान का शस्त्रकर्मविधि नामक उन्तीसवाँ अध्याय समाप्त हुआ ॥ २९ ॥

त्रिंशोऽध्यायः

अतोऽनन्तरं क्षाराग्निकर्मविधिरारभ्यते यथैव हि शस्त्रेण पाटनादीनि कृत्वा तत्साध्य आमय उपक्रम्यते तथैव क्षाराग्निभ्यामित्याह—

अथातः क्षाराग्निकर्मविधिमध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

स०—क्षारश्चाऽग्निश्च क्षाराग्नी तयोः कर्म क्षाराग्निकर्म तस्य विधिः शेषं पूर्ववत् । क्षारस्य बाह्याभ्यन्तरोपयोगित्वेन पूर्वमुपन्यासः ।

वि०—अब इसके आगे क्षार-अग्निकर्म-विधि नामक अध्याय का व्याख्यान करेंगे; जैसा कि आत्रेय आदि महर्षियों ने कहा था।

सर्वशस्त्रानुशस्त्राणां क्षारः श्रेष्ठो बहूनि यत् ।
छेद्यभेद्यादिकर्माणि कुरुते विषमेष्वपि ॥ १ ॥
दुःखावचार्यशस्त्रेषु तेन सिद्धिमयात्सु च ।
अतिकृच्छ्रेषु रोगेषु यच्च पानेऽपि युज्यते ॥ २ ॥

स०—सर्वाणि च तानि शस्त्राण्यनुशस्त्राणि च तान्येवं तेषां सर्वशस्त्रानुशस्त्राणां मध्ये क्षारः श्रेष्ठो ज्यायान् कुतोऽस्य श्रेष्ठतेत्याह—यस्माद्बहूनि छेद्यभेद्यादीनि कर्माण्यसौ करोति। आदिशब्देन लेखनपाटनादिपरिग्रहः । विषमेष्वपि देहदेशेषु । दुःखावचार्यशस्त्रेषु नासार्शोऽर्बुदादिषु । दुःखेनावचारयितुं शक्यं शस्त्रं येषु तेषु । अपिशब्दात्समेषु देहेषु युज्यते । तेन च शस्त्रेण सिद्धिमयात्स्वसिध्यत्सु दुष्टव्रणेषु बहुशः प्रकोपिषु । किंभूतेष्वतिकृच्छ्रेष्वतिदुःखसाध्येषु । दुष्टव्रणेषु रोगेष्वसौ क्षारो युज्यते योभ्यः संपद्यते ततोऽपि हेतोः क्षारः श्रेष्ठः । यच्चेति । यस्माच्च क्षारः पानविषयेऽपि युज्यते शरीरांतःस्थितरोगशांत्यै । अपिशब्दाद्बाह्येऽपि बाह्यरोगस्यितिशांत्यै लेपे स युज्यते ॥ १-२ ॥

क्षारकर्म की श्रेष्ठता—

वि०—सब शस्त्र एवं अनुशस्त्रों में क्षार श्रेष्ठ है; क्योंकि यह छेदन-भेदन आदि बहुत से कर्म करता है; विषम अंगों में, जहाँ पर कठिनाई से शस्त्र चलाया जा सकता है (यथा नासार्श-अर्बुद आदि में) तथा शस्त्र से जो रोग साध्य नहीं होते उनमें; और अतिदुःखसाध्य रोगों में भी प्रयुक्त होता है। यह क्षार अन्दर पिलाने के लिये भी बरता जाता है (बाहर तो बरता ही जाता है) ॥ १-२ ॥

अधुना क्षारस्य पेयलेपविषयविभागं दर्शयति—

स पेयोऽर्शोग्निसादाश्मगुल्मोदरगरादिषु ।

स०—स क्षारः अर्शःसु विषये पेयः । तथाऽग्निसादे तथाऽश्मर्यां गुल्मादिषु च । आदिग्रहणादानाहशूलादिषु च ।

अर्श आदि में क्षारपान—

वि०—यह क्षार अर्श रोग, अग्निमान्द्य, अश्मरी; गुल्म और उदर रोगों में तथा गर आदि में पीना चाहिये।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योज्यः साक्षान्मषश्वित्रबाह्यार्शःकुष्ठसुप्तिषु ॥ ३ ॥
भगन्दरार्बुद-ग्रन्थि-दुष्टनाडीव्रणादिषु ।

स०—स क्षारो योज्यः साक्षाल्लेपनेन मषादिषु । आदिग्रहणाच्चर्मकीलासवर्त्मतिलकादिपरिग्रहः ॥ ३ ॥

मस्से आदि में क्षार का लेप करना—

वि०—मस्सा, श्वित्र, बाह्यार्श, कुष्ठ, स्पर्शनाश, भगन्दर, अर्बुद, ग्रन्थि, दुष्ट व्रण, नाडी व्रण आदि रोगों में साक्षात्—सीधा बाहर (क्षार) लगाना चाहिये ॥ ३ ॥

न तूभयोऽपि योक्तव्यः पित्ते रक्ते चलेऽबले ॥ ४ ॥
ज्वरेऽतिसारे हृन्मूर्धरोगे पाण्ड्वामयेऽरुचौ ।
तिमिरे कृतसंशुद्धौ श्वयथौ सर्वगात्रगे ॥ ५ ॥
भीरुगर्भिण्यृतुमतीप्रोद्वृत्तफलयोनिषु ।
अजीर्णेऽन्ने शिशौ वृद्धे धमनीसन्धिमर्मसु ॥ ६ ॥
तरुणास्थिसिरास्नायुसेवनीगलनाभिषु ।
देशेऽल्पमांसे वृषणमेढ्रस्रोतोनखान्तरे ॥ ७ ॥
वर्त्मरोगादृतेऽक्ष्णोश्च शीतवर्षोष्णदुर्दिने ।

स०—पानलेपनभेदेन द्विविधोऽपि क्षारः पित्तादौ न योक्तव्यः । बले बलेवति । अबले बलहीने । ज्वरे । अतिसारे । हृद्रोगे । मूर्धरोगे । पांड्वामये पांडुरोगे । अरुचावरोचके । कृतसंशुद्धौ कृतवमनविरेके । श्वयथौ सर्वगात्रगे सर्वांगोच्छूने । तथा भीरौ । गर्भिण्याम् । ऋतुमत्याम् । प्रोद्वृत्तफलयोनिवर्षयमाण। उत्तरतंत्रे गुह्यरोगज्ञाने प्रकर्षेणोद्वृत्तं फलं रजोरूपं यस्या योनेः सा प्रोद्वृत्तफलयोनिः । रज एव फलं गर्भाख्यफलसाधनोपायत्वात् । प्रोद्वृत्तफलयोनेर्लक्षणमुक्तं यथा—वेगोदावर्तनाद्योनिं प्रपीडयति मारुतः । स फेनिलं रजः कृच्छ्रादुदावृत्तं विमुंचति । इयं व्यापदुदावृत्तेत्यादि । शिशौ बाले । वृद्धे गतवयसि । तथा धमन्यादिषु शरीरदेशेषु । देशेऽल्पमांसे स्वल्पपिशिते । तथा वृषणादिषु शरीरदेशेषु । तथाक्ष्णोर्नेत्रयोर्वर्त्मरोगं वर्जयित्वाऽन्यत्र क्षारो न प्रयोज्यः । वर्त्मरोगे तु क्षारो योज्य एव । शीतवर्षोष्णदुर्दिने न च योज्यः । शीतवर्षोष्णाहानि हेमंतशिशिरप्रावृड्ग्रीष्माः । दुर्दिनं मेघाद्याकुलदिवसम् । एषु क्षारो न योज्यः ॥ ४-७ ॥

द्विविध क्षार प्रयोग का निषेध—

वि०—निषेध—पित्त में, रक्त में, वायु में, निर्बल मनुष्यों में, ज्वर, अतिसार, हृदय रोग, शिरोरोग, पाण्डु रोग, अरुचि और तिमिर में, वमन-विरेचन से शोधन करने पर; सर्वाङ्ग शोथ में, तथा डरपोक, गर्भवती, ऋतुमती, गर्भाशय या योनि बाहर निकली हो; अन्न के अजीर्ण में, बालक में, वृद्ध में, धमनी-सन्धि और मर्म में, तरुणास्थि, सिरा, स्नायु, सेवनी, गला, नाभि में, थोड़े मांस वाले देश में, वृषण एवं मेहन के स्रोत में, नखों के अन्दर, वर्त्म रोग को छोड़ कर आँख के रोगों में, शीत, वर्षा और ग्रीष्म काल में, मेघाच्छन्न दिन, (इन रोगों में, इन अवस्थाओं में, इन स्थानों पर; इन समयों में) क्षारकर्म नहीं करना चाहिये ॥ ४-७ ॥

(उद्वृत्तफलयोनि-इनमें फल-अण्ड, योनि-गर्भाशय, स्थान से ऊपर को उठा अण्ड, अपवृत्तफल-स्थान से नीचे खिसका अण्ड, उद्वृत्त योनि-स्थान से ऊपर को खिसकी योनि; अपवृत्त योनि-स्थान से नीचे खिसकी योनि । फलयोनि शब्द से कोई गर्भाशय लेते हैं; दूसरे-फल शब्द से रज को लेते हैं; यथा—'रज एव फलं गर्भाख्यफलसाधनोपायत्वात् ।' इससे उदावृत्त योनि अर्थ करते हैं । हाराणचन्द्र जी ने फल शब्द से आन्त्र लिया है) ।

अधुना क्षारक्रियामाह—

कालमुष्ककशम्याककदलीपारिभद्रकान् ॥ ८ ॥
अश्वकर्णमहावृक्षपलाशास्फोतवृक्षकान् ।
इन्द्रवृक्षार्कपूतीकनक्तमालाश्वमारकान् ॥ ९ ॥
काकजङ्घामपामार्गमग्निमन्थाग्नितिल्वकान् ।
सार्द्रान् समूलशाखादीन् खण्डशः परिकल्पितान् ॥१०॥
कोशातकीश्चतस्रश्च शूकं नालं यवस्य च ।
निवाते निचयीकृत्य पृथक् तानि शिलातले ॥ ११ ॥
प्रक्षिप्य मुष्ककचये सुधाश्मानि च दीपयेत् ।
ततस्तिलानां कुतलैर्दग्ध्वा—

स०—कालमुष्कको मोक्षः । अश्वकर्णः कुशिकः । महावृक्षः स्नुही । आस्फोतो गिरिकर्णिका । वृक्षको नंदीवृक्षः । इन्द्रवृक्षः कुटजः । पूतीकः पूतीकरंजः । नक्तमालः करंजः । अश्वमारः करवीरः । कालमुष्ककादीन् मूलादिसहितान् खंडंखंडं कल्पितान् परश्वादिना छिन्नान् । तथा कोशातकीश्चतस्रो यवस्य च शूको नालो द्रव इव यो भवति तांश्च निवाते देशे शिलातले शिलापृष्ठे पृथङ्मुष्ककादीन्निचयीकृत्य मुष्ककचये च सुधाश्मानि सुधाशर्कराः प्रक्षिप्य दीपयेज्ज्वालयेत् । कैः । तिलानां कुंतालैः पलालैः कांडैः । सुधाश्मानि चेति नपुंसकत्वं चिंत्यम् । पृथग्दीपनं चैषामचिंत्यप्रभावम् । एवं तानि दग्ध्वा ॥ ८-११ ॥

क्षार—कल्पना

वि०—क्षार विधान—कालमुष्कक (काला मोखा), शम्याक (अमलतास), केला, फरहद, अश्वकर्ण, स्नुही, ढाक, आस्फोता, वृक्षक (कुटज), इन्द्रवृक्ष (अर्जुन), आक, पूतीकरञ्ज, नाटा करञ्ज, कनेर, काकजङ्घा, चिरचिटा, अग्निमन्थ, चित्रक और तिल्वक् इनको गीला ही मूल और शाखाओं के साथ लाकर टुकड़े-टुकड़े बना ले तथा चारों कोशातकी (चवेड, धामार्गव, पटोली और देवदाली), जौ के शूक (बाल) और नाल इनको वायु रहित स्थान पर एकत्रित करके शिलापृष्ठ पर अलग-अलग ढेर लगाकर मुष्कक के ढेर में चूने के पत्थर डालकर तिलों के कुतलों से (मूल एवं नाल समेत शुष्क तिलकाण्डों से) जलाये ॥ ८-११ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

—अग्नौ विगते पृथक् ॥ १२ ॥
कृत्वा सुधाश्मनां भस्म द्रोणं त्वितरभस्मनः ।
मुष्ककोत्तरमादाय प्रत्येकं जलमूत्रयोः ॥ १३ ॥
गालयेदर्धभारेण महता वाससा च तत् ।
यावत्पिच्छिलरक्ताच्छस्तीक्ष्णो जातस्तदा च ताम् ॥१४॥
गृहीत्वा क्षारनिष्यन्दं पचेल्लौह्यां विघट्टयन् ।
पच्यमाने ततस्तस्मिंस्ताः सुधाभस्मशर्कराः ॥ १५ ॥
शुक्तीः क्षीरपङ्क-शङ्खनाभीश्चायसभाजने ।
कृत्वाऽग्निवर्णान्बहुशः क्षारोत्थे कुडवोन्मिते ॥ १६ ॥
निर्वाप्य पिष्ट्वा तेनैव प्रतीवापं विनिक्षिपेत् ।
श्लक्ष्णं शकृद्दक्षशिखिगृध्रकङ्ककपोतजम् ॥ १७ ॥
चतुष्पात्पक्षिपित्तालमनोह्वालवणानि च ।
परितः सुतरां चातो दर्व्या तमवघट्टयेत् ॥ १८ ॥
सबाष्पैश्च यदोत्तिष्ठेद् बुद्बुदैर्लेहवद्घनः ।
अवतार्य तदा शीतो यवराशावयोमये ॥ १९ ॥
स्थाप्योऽयं मध्यमः क्षारः—

स०—अनंतरमग्नौ विगते सुधाश्मनां भस्म द्रोण पृथक्कृत्वा न्यस्ते संस्थाप्येतरभस्मनः शम्याकादिद्रव्यभस्मनो द्रोणमादाय गृहीत्वा । किंभूतं द्रोणम् । मुष्कक उत्तरोऽधिको यस्य तमादाय जलमूत्रयोः प्रत्येकमर्धभारेण तद्भस्म गालयेत् । कथं गालयेत् । महता विस्तीर्णेन वाससा । कियंतं कालम् । यावत् क्षारनिष्यंदः क्षारस्रावः पिच्छिलरक्ताच्छस्तथा तीक्ष्णो जातः संपन्नस्तदा तस्मिन्काले तं क्षारनिष्यदं गृहीत्वा लौह्यां स्नेहपाकविधिना पचेत् । किं कुर्वन् । दर्व्या कुंडलसंज्ञया विघट्टयन्नालोडयन् । ततोऽनंतरं तस्मिन्क्षारनिष्यंदे पच्यमाने ताः स्थापिताः सुधाभस्मशर्करा या मुष्ककमध्ये प्रक्षिप्य दत्तास्तथा शुक्तीः प्राणिविशेषास्थीनि तथा क्षारपंकं प्रलेपकं खटिकासंज्ञं तथा शंखनाभीश्चाग्निवर्णान् कृत्वा क्षारोत्थे क्षारनिष्यंदे पलाष्टकपरिमाणे क्वथितक्षारोत्थ आयसभाजने तीक्ष्णलोहपात्रगते बहून् वारान्निर्वाप्य शीतीकृत्य तेनैव क्षारनिष्यंदेन दृषदि पिष्ट्वा तस्मिन्पच्यमाने क्षारनिष्यंदे प्रतीवापं विनिक्षिपेत् । द्रवद्रव्ये द्रव्यांतरं श्लक्ष्णपिष्टं दीयते स प्रतीवाप उच्यते । नच केवलमेष एव प्रतीवापत्वेन क्षेप्यो यावद्दक्षादीनामपि शकृत् श्लक्ष्णं कृत्वा विनिक्षिपेत् । दक्षः कुक्कुटः । शिखी मयूरः । गृध्रः श्येनः । कंककपोतकौ पक्षिणौ । तथा चतुष्पदां गवादीनां तथा पक्षिणां पित्तं तथा अलमनोह्वालवणानि च । अलं हरितालम् । मनोह्वा मनःशिला । लवणं सैंधवादि । एतानि श्लक्ष्णानि कृत्वा प्रतीवापं विनिक्षिपेत् । अथ प्रतीवापादनंतरं परितः समंताद्दर्व्याऽवघट्टयेत् । सबाष्पैरित्यादि । यदा यस्मिन् काले स क्षारनिष्यंदः सबाष्पैः सोष्मभिर्बुद्बुदैर्घनो लेह इवोत्तिष्ठेदुद्गच्छेत् । यदा सांद्रतया पच्यमानः सन् लेहतुल्यो दर्वीप्रलेपी स्यादित्यर्थः । तदा तस्मिन् कालेऽवतार्याऽयोमये लोहभांडे स्थितो यवराशौ स्थाप्यः । किं कृत्वा । अवतार्य चुल्लीतः । तथा शीतः सन् । अयं मध्यमः क्षारः ॥ १२-१९ ॥

वि०—गालन विधि—अग्नि के शान्त हो जाने पर चूने के पत्थरों की भस्म को अलग कर ले । अब अमलतास आदि की भस्म एक द्रोण और मुष्कक की भस्म कुछ अधिक (शम्याक आदि की मिलित भस्म चार आढक; मुष्कक की अकेले की एक आढक भस्म-हेमाद्रि) लेवे । आधे भार (१००० पल) गोमूत्र एवं आधे भार जल इन दोनों को मिला कर (एक भार = २००० पल) इसमें घोल कर मोटे वस्त्र से छाने । इस प्रकार तब तक छानता रहे जब तक कि इस जल में पिच्छिलता, लालिमा, निर्मलता और तीक्ष्णता आये । फिर इस छने पानी को लोहे के पत्र में डाल कर कलछी से चलाते हुए पकाये । पकाते समय चूने के पत्थरों की भस्म, सीप, क्षीरपंक (खड़िया मिट्टी), शंखनाभि, इनको लोहपात्र में अग्नि पर लाल वर्ण करके इसी क्षारजल के एक कुडव (८ पल) में कई बार बुझाये तथा इसी क्षारजल से इनको पीस कर पकते हुए क्षारजल में इनका प्रतिवाप देवे । इनके सिवाय-मुर्गा, मोर, गीध, कंक और कबूतर की बीट तथा गौ आदि पशुओं तथा पक्षियों के पित्त तथा हरताल, मैनसिल और लवण इनको भी बारीक पीस कर कलछी से चलाते हुए मिला देना चाहिये । जब इसमें से भाप निकलने लगे, बुलबुले उठें और लेह के समान घट्ट बन जाये, तब इसे आग पर से उतार ले । तब ठण्डा होने पर लोहे के पात्र में रखकर जौ के ढेर में इस पात्र को रख देवे । यह मध्यम क्षार है ।

(प्रतिवाप-द्रव द्रव्य में बारीक पिसा दूसरा द्रव्य मिलाना प्रतिवाप कहा जाता है) ॥ १२-१९ ॥

—न तु पिष्ट्वा क्षिपेन्मृदौ ।
निर्वाप्यापनयेत्तीक्ष्णे पूर्ववत् प्रतिवापनम् ॥ २० ॥
तथा लाङ्गलिकादन्तिचित्रकातिविषावचाः ।
स्वर्जिकाकनकक्षीरिहिङ्गुपूतीकपल्लवाः ॥ २१ ॥
तालपत्री बिडं चेति सप्तरात्रात्परं तु सः ।
योज्यः—

स०—मृदौ क्षारे सुधादीनि निर्वाप्य तस्मिन्निष्यंदे प्रक्षिप्यैवापनयेन्निसर्जयेन्न तु पिष्ट्वा विनिक्षिपेत् । तीक्ष्णे क्षारे पूर्ववन्मध्यमक्षारतुल्यं प्रतिवापनं निर्वाप्य पिष्ट्वा विनिक्षिपेदिति । नचैतावदेवाऽत्र प्रतिवापनमित्याह । तथेत्यादि लांगलिकादीनि बिडपर्यंतानि च तत्र प्रतिवापं विनिक्षिपेत । सप्तरात्रात्परमनंतरं स क्षारो योज्यः ॥ २०-२१ ॥

मृदु और तीक्ष्ण क्षार—

वि—मृदु क्षार में—पीस कर डालने वाले-चूने के पत्थरों की भस्म, सीप, कौड़ी आदि का प्रतिवाप नहीं दिया जाता । अपितु इन द्रव्यों को क्षार में बुझा कर निकाल लिया जाता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

है (केवल जिस द्रव में चूना आदि बुझाये गये थे वही द्रव मिलाया जाता है)। तीक्ष्ण क्षार में—पूर्वोक्त द्रव्यों का प्रतिवापन करने के साथ-साथ कलिहारी, दन्ती, चित्रक, अतीस, वच, सर्जिक्षार, स्वर्णक्षीरी, हींग, पूतीकरञ्ज के पत्ते; तालपत्री (स्याह मुसली) और विड नमक इनका भी निक्षेप करे—इनको भी पीस कर मिलावे। सात दिन के पीछे इस क्षार का उपयोग करे ॥ २०-२१ ॥

इति क्षारत्रैविध्यमुक्त्वा विषयं निर्दिदिक्षुराह—

—तीक्ष्णोऽनिलश्लेष्ममेदोजेष्वर्बुदादिषु। २२॥
मध्येष्वेव मध्योऽन्यः पित्तास्रगुदजन्मसु।
बलार्थं क्षीणपानीये क्षाराम्बु पुनरावपेत् ॥ २३॥

स०—तीक्ष्णः क्षारो वातश्लेष्ममेदःसमुत्थेष्वर्बुदादिषु योज्यः। मध्येष्वेव योज्यः। मध्येषु क्षारांतरविधानम्। आदिग्रहणादन्येष्वपि तत्साध्येषु रोगेष्वयं क्षारो योज्यः। एवमेवाऽनिलकफमेदोजेषु विकारेष्वर्बुदादिषु मध्येषु नोत्कृष्टेषु नाऽपि हीनेषु मध्यः क्षारो योज्यः। अन्यो मृदुः क्षारः पित्तरक्तसमुत्थेष्वर्शःसु योज्यो न तीक्ष्णमध्यौ क्षारौ। तस्मिन् क्षारे क्षीणपानीये घनीभूते क्षारे बलाधानार्थं पुनर्भूयः क्षारांबु क्षारविधिसृतं जलमावपेद्दद्यात् ॥ २२-२३ ॥

त्रिविध क्षार का रोगानुसार प्रयोग—

वि०—तीक्ष्ण क्षार—वात, कफ या मेदजन्य अर्बुद आदि में बरते। अर्बुद आदि मध्यम हों तो मध्यम क्षार बरते। पित्त रक्तजन्य अर्बुद आदि तथा सभी अर्शों में मृदु क्षार बरतना चाहिये। जिस क्षार में जलीयांश कम होने से घनता आ गयी हो उसमें बल-शक्ति लाने के लिये क्षार का जल फिर से डालना चाहिये[1] ॥ २२-२३ ॥

अधुना क्षारगुणानाह—

नातितीक्ष्णमृदुः श्लक्ष्णः पिच्छिलः शीघ्रगः सितः।
शिखरी सुखनिर्वाप्यो न विष्यन्दी न चातिरुक् ॥
क्षारो दशगुणः शस्त्रतेजसोरपि कर्मकृत्।
आचूषन्निव संरम्भाद्गात्रमापीडयन्निव ॥ २५ ॥
सर्वतोऽनुसरन् दोषानुन्मूलयति मूलतः।
कर्म कृत्वा गतरुजः स्वयमेवोपशाम्यति ॥ २६ ॥

स०—क्षारे नातितीक्ष्णादयो दश गुणा भवंति। शीघ्रं गच्छति प्रसरत्याशु व्याप्नोतीति शीघ्रगः। शिखरी शिखरसुपरिष्ठात्पीटिकोत्थानं तद्वान्। सुखेन कांजिकादिना निर्वाप्यते शीतीक्रियते सुखनिर्वाप्यः। विष्यंदोऽस्यास्तीति विष्यंदी स्रुतिमान् न विष्यंदी न स्रुतिमान्। न चातिरुक् न चातिमान्। नातितीक्ष्णादयो दश गुणा यस्य स दशगुणः क्षारः। संग्रहे चाऽस्य दशैव दोषा गदिताः। तद्यथा। अत्युष्णोऽतिशीतोऽतितीक्ष्णोऽतिमृदुरतितनुरतिघनोऽतिपिच्छिलो विसर्पी हीनौषधो हीनपाकश्चेति। शस्त्रे यत्कर्म छेदनपाटनलेखनादि तथा तेजसो वह्नेरपि यत्कर्म तत्साध्यव्याध्युपशमलक्षणं तत्करोति। अधुना त्वंतरानुभवद्वारेण क्षारस्य गुणान्निर्दिशति—संरंभात्क्षोभाद्गात्रमाचूषन्निव तथाऽऽपीडयन्निव तथा सर्वतः सर्वस्मिन्ननुसरन् गच्छन् दोषान् शस्त्रसाध्यान् मूलत उन्मूलयत्युद्धरति। तथा कर्म स्वीयं दाहादिकं कृत्वा गतरुजः पुरुषस्य स्वयमेव यत्नं विनैवोपशाम्यति ॥ २४-२६ ॥

क्षार के गुण—

वि०—क्षार के दस गुण—क्षार न तो बहुत तीक्ष्ण, न बहुत मृदु, श्लक्ष्ण, पिच्छिल, शीघ्रगामी, श्वेत, शिखरी (द्रव्य के ऊपर रखने से पिडकाकार बनता है); सुखपूर्वक शान्त किया जाये; क्लेद को उत्पन्न न करे; अतिपीड़ा न करे-क्षार के ये दस गुण हैं। क्षार-शस्त्र और अग्नि के भी कार्य को कर देता है। चूसने की भाँति चारों ओर से, वेग के साथ शरीर के अंग को दबाता हुआ-सा सब ओर फैलता हुआ दोषों को जड़ से उखाड़ देता है। कर्म करके विकार के शान्त होने पर अपने आप ही शान्त हो जाता है ॥२४-२६॥

(क्षार में दस दोष भी है, यथा-अत्युष्णोऽतिशीतोऽतितीक्ष्णोऽतिमृदुरतितनुरतिघनोऽतिपिच्छिलोऽतिविसर्पी हीनौषधो हीनपाकश्चेति ॥ संग्रह. सू. अ. ३९)।

क्षारसाध्ये गदे छिन्ने लिखिते स्राविते ऽथवा।
क्षारं शलाकया दत्त्वा प्लोतप्रावृतदेहया ॥ २७ ॥
मात्राशतमुपेक्षेत तत्रार्शःस्वावृताननम्।
हस्तेन यन्त्रं कुर्वीत—

स०—क्षारसाध्ये व्याधावर्शोऽर्बुदादौ छिन्ने द्विधाकृते लिखिते शस्त्रेण विघृष्टे स्राविते प्रच्छाद्य निर्हृतशोणिते कर्मणि कृते क्षारो योज्यो नाकृते च्छेदादाविति क्षारस्य विषयो दर्शितः क्षारं शलाकया दत्त्वा मात्राशतमुपेक्षेत न कांजिकादिना निर्वापणं कार्यमित्यर्थः। किंभूतया शलाकया। प्लोतेन चैलखंडेन प्रावृतः स्थगितो देहः परिग्रहो यस्याः। तत्र क्षारसाध्येष्वर्शःसु क्षारपातं कृत्वा मात्राशतं यावत्तावद्धस्तेन यंत्रमावृताननं छादितमुखं कुर्यात् ॥ २७ ॥

क्षारप्रयोग विधि—

वि०—क्षारसाध्य रोग में छेदन करके या शस्त्र से लेखन करके अथवा रक्त का स्राव करके शलाका से क्षार प्रयुक्त करे। शलाका को कपड़े से ढाँपकर क्षार बरते। इस क्षार की एक सौ मात्रा तक उपेक्षा करे। (इसके पीछे इस पर काँजी आदि बरते)।

अर्श रोग में क्षारप्रयोग करके एक सौ मात्रा तक यन्त्र के मुख को हाथ से ढाँप कर रखे ॥ २७ ॥

१. क्षार द्रव्य जलहीन होने पर निर्मल हो जाता है। जैसे बुझा हुआ चूना जल सूख जाने पर निस्तेज हो जाता है और मरा चूना कहलाता है। अतः क्षार को पूर्णतया सूखने नहीं देना चाहिए बल्कि बीच-बीच में क्षार द्रव डालते रहना चाहिए।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

—वर्त्मरोगेषु वर्त्मनी ॥ २८ ॥
निर्भुज्य पिचुनाऽऽच्छाद्य कृष्णभागं विनिक्षिपेत् ।
पद्मपत्रतनुः क्षारलेपो घ्राणार्बुदेषु च ॥ २९ ॥
प्रत्यादित्यं निषण्णस्य समुन्नम्याग्रनासिकाम् ।
मात्रा विधार्याः पञ्चाशत् तद्वदर्शसि कर्णजे ॥ ३० ॥

स०—क्षारसाध्येषु वर्त्मरोगेषु वर्त्मनी निर्भुज्य कुटिलीकृत्य ततः क्षारस्पर्शपरिहाराय पिचुना कार्पासादिमयेन कृष्णभागं तारकप्रदेशमाच्छाद्य क्षारं विनिक्षिपेत् । तत्र च पद्मपत्रप्रमाणः क्षारलेपो देयो न गुदार्शःस्विव घनः । पद्मपत्रतनुरित्युपमानानि सामान्यवचनैरिति समासः । घ्राणार्बुदेषु च पद्मपत्रतनुः क्षारलेपः । कथं तत्र लेपो देयस्तत्राह—घ्राणजेष्वर्बुदेषु प्रत्यादित्यं रविसंमुखं निषण्णस्य संस्थितस्य तथाऽग्रे नासिकाऽग्रनासिका तामुन्नम्योत्क्षिप्य । कियंतं कालं लेपो धार्य इत्याह । मात्राः पंचाशद्विधार्याः । वर्त्मसु चाल्पतरा मात्राः । स्थानस्य सुकुमारत्वात् । कर्णजेऽर्शसि तद्वत्तेन घ्राणार्बुदेन तुल्यं स एव पद्मपत्रतनुः क्षारलेपस्ता एव पंचाशन्मात्रा धार्याः ॥ २८-३० ॥

वि०—वर्त्म के रोगों में—पलकों को उलटा करके रूई के फोये से काले भाग को ढाँपकर कमल के पत्र के बराबर पतला लेप क्षार का करे । नासार्बुद में भी कमल के पत्र के समान पतला लेप करना चाहिये । इसके लिये रोगी को सूर्य के सामने बिठा कर नासिका के अग्र भाग को ऊँचा उठाकर क्षार प्रयोग करे और पचास मात्रा तक प्रतीक्षा करे । कान के अर्श में भी पचास मात्रा तक प्रतीक्षा करे । (लेप भी नासार्बुद की भाँति करे) ॥ २८-३० ॥

क्षारं प्रमार्जनेनानु परिमृज्यावगम्य च ।
सुदग्धं घृतमध्वक्तं तत्पयोमस्तुकाञ्जिकैः ॥ ३१ ॥
निर्वापयेत्ततः साज्यैः स्वादुशीतैः प्रदेहयेत् ।
अभिष्यन्दीनि भोज्यानि भोज्यानि क्लेदनाय च ॥ ३२ ॥

स०—अनु पश्चात् क्षारलेपदाननियमितात्कालादनंतरं क्षारं प्रमार्जनेन चैलादिना परिमृज्य शोधयित्वा सुदग्धं क्षारस्थानमर्शोऽर्बुदाद्यधिष्ठानमवगम्य सम्यग्दाहलक्षणेन ज्ञात्वा तत्क्षारदग्धस्थानं घृतमधुलेपितं कृत्वा पयःप्रभृतिभिः साज्यैः सघृतैर्लेपयेत् । अभिस्यंदीनि स्रुतिरूपश्लेष्मकारीणि भोज्यान्यन्नपानानि माषदध्यादीनि भोज्यानि भक्षयितव्यानि । किमर्थम् । क्लेदनाय क्षारदग्धस्थानविशरणाय । यतः क्षारदग्धं क्लिन्नं सच्छीर्यते ॥ ३१-३२ ॥

क्षारप्रयोग के बाद कर्तव्य—

वि०—क्षारप्रयोग कर नियमित समय तक प्रतीक्षा के बाद वस्त्र आदि से क्षार को साफ करके धोकर स्थान को भली प्रकार जला हुआ समझकर जले हुए स्थान पर घी और मधु का लेप करे; फिर दूध मस्तु या कांजी से क्षार को शान्त करे । फिर मुलहठी आदि मधुर-शीतल द्रव्यों को घी में मिलाकर लेप कर दे । अभिष्यन्दी (उड़द, दही आदि) तथा क्लेदन खानपान खाने के लिये देवे ॥ ३१-३२ ॥

यदि च स्थिरमूलत्वात्क्षारदग्धं न शीर्यते ।
धान्याम्लबीजयष्ट्याह्वतिलैरालेपयेत्ततः ॥ ३३ ॥
तिलकल्कः समधुको घृताक्तो व्रणरोपणः ।

स०—यदि च क्षारदग्धमभिष्यंदिभिर्भोज्यैरुपयुक्तैः स्थिरमूलत्वाद्दृढमूलत्वाद्रोगाधिष्ठानं न शीर्यते ततो धान्याम्लस्य बीजमवयवविशेषस्तेन तथा मधुकतिलाभ्यामालेपयेत् । तिलकल्को मधुयष्टियुक्तो घृतान्वितो व्रणस्य रोपणः ॥ ३३ ॥

क्षारदग्ध स्थान पर लेप—

वि०—यदि अभिष्यन्दी भोजनों से भी क्षारदग्ध स्थान दृढमूल होने के कारण गलकर गिरे नहीं तब काँजी के तलस्थ बीज (किण्व) को मुलहठी और तिल में मिलाकर लेप करे । तिल का कल्क मुलहठी के साथ घी में मिलाकर लगाने से व्रणरोपक होता है ॥ ३३ ॥

पक्वजम्ब्वसितं सन्नं सम्यग्दग्धम्—

स०—पक्वजंबूफलवदसितं कृष्णं तथा सन्नं निम्नं सम्यग्दग्धं स्थानं विद्यात् ।

सम्यक् दग्ध का लक्षण—

वि०—सुदग्ध का लक्षण—भली प्रकार जलने पर स्थान पके हुए जामुन के समान काला, निम्न हो जाता है ।

—विपर्यये ॥ ३४ ॥
ताम्रतातोदकण्ड्वाद्यैर्दुर्दग्धं तं पुनर्दहेत् ।

स०—विपर्यये पक्वजंब्वसिताद्विलक्षणविपर्यये तथा ताम्रतातोदकंड्वाद्यैरादिग्रहणात् शोफविस्फोटादिभिर्दुर्दग्धं स्थानं विद्यात् । तं तथाभूतं ज्ञात्वा पुनर्दहेत् भूयस्तत्र क्षारं पातयेद्धीमान् ॥ ३४ ॥

दुर्दग्ध का लक्षण तथा उसमें कर्तव्य—

वि०—दुर्दग्ध का लक्षण—भली प्रकार न जलने पर स्थान ताम्रवर्ण का होता है तथा इसमें तोद, कण्डू आदि (शोफ, विस्फोट आदि) होते हैं । इसको पुनः जलावे ॥ ३४ ॥

अतिदग्धे स्रवेद्रक्तं मूर्च्छादाहज्वरादयः ॥ ३५ ॥

स०—अतिदग्धे सति रक्तं स्रवेत् । तथा मूर्च्छादयो जायेते । आदिग्रहणाद्विसर्पशोफोपविस्फोटादयोऽपि ॥ ३५ ॥

अतिदग्ध का लक्षण—

वि०—अतिदग्ध में—रक्त बहता है; रोगी को मूर्च्छा, दाह, ज्वर आदि हो जाते हैं ॥ ३५ ॥

गुदे विशेषाद्विण्मूत्रसंरोधोऽतिप्रवर्तनम् ।
पुंस्त्वोपघातो मृत्युर्वा गुदस्य शातनाद्ध्रुवम् ॥ ३६ ॥
नासायां नासिकावंशदरणाकुञ्चनोद्भवः ।
भवेच्च विषयाज्ञानं तद्वच्छ्रोत्रादिकेष्वपि ॥ ३७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स०—गुदेऽतिदग्धे विशेषेण विण्मूत्रयोः संरोधस्तथा तयोरेवातिप्रवर्तनं कदाचिद्भवति। विशेषग्रहणात्पूर्वोक्ता रक्तस्रावादयोऽपि। तथा पुंस्त्वोपघातः शुक्रक्षयात्कांतागमनासामर्थ्यम्। अथवा गुदस्य शातनाच्छिदारणान्निश्चयेन मृत्युर्भवति। नासायां क्षारातिदग्धायां नासिकावंशस्य दरणाकुंचने उद्भवतस्तथा विषयाज्ञानं गंधस्यावेदनं च भवेत्। तद्वत्तेन क्षारातिदग्धेन नासिकाविषयाज्ञानेन तुल्यं क्षारातिदग्धेषु श्रोत्रादिषु श्रोत्रचक्षूरसनेषु स्थानेषु विषयाज्ञानं स्यात्॥ ३६-३७॥

गुदादि के अतिदग्ध का लक्षण—

वि०—गुदादि में अतिदग्ध होने पर—मुख्यतः मल-मूत्र का अवरोध अथवा मल मूत्र की अतिशय प्रवृत्ति और क्लीबता होती है; अथवा गुदा के विदीर्ण होने से अवश्य मृत्यु हो जाती है।

वि०—नासा में अतिदग्ध होने पर नासा का वंश फट जाता है एवं सिकुड़ जाता है तथा गन्ध का ज्ञान नहीं होता। यही लक्षण श्रोत्र, चक्षु, जिह्वा आदि के अतिशय जलने में होते हैं॥ ३६-३७॥

विशेषादत्र सेकोऽम्लैर्लेपो मधु घृतं तिलाः।
वातपित्तहरा चेष्टा सर्वैव शिशिरा क्रिया॥ ३८॥
अम्लो हि शीतः स्पर्शेन क्षारस्तेनोपसंहितः।
यात्याशु स्वादुतां तस्मादम्लैर्निर्वापयेत्तराम्॥ ३९॥

स०—तस्मिन्नतिक्षारदग्धे विशेषेणाम्लैः कांजिकाविभिः सेको हितः। मधुघृततिलाश्च लेप इष्टः। तथा सर्वैव च शिशिरा क्रिया वातपित्तहरेष्टा। संग्रहे चोक्तम्। पाययेतातियोगेऽतस्तं शीघ्रं सघृतं दधि। सगुडं वा दधिसरं तैलं वाससितोपलमिति। तस्माद्धेतोः क्षारदग्धमम्लैः कांजिकादिभिर्निर्वापयेत्तराम्। यस्मादम्लः शीतः स्पर्शेन। तेन चाम्लेन क्षार उपसंहितो युक्त आश्वेव कटुकलवणभूयिष्ठतां त्यक्त्वा स्वादुतां याति। तरांग्रहणमतिशयेनाम्लैर्निर्वापयेत् देशसात्म्याद्यनुरोधात्कदाचित्क्षीरादिभिरपीति गमयति। इति क्षारविधिः॥३८-३९॥

अतिदग्ध में कर्तव्य—

वि०—अतिदग्ध की चिकित्सा-इस अतिदग्ध की अवस्था में विशेष कर कांजी आदि अम्ल द्रव्यों से परिषेक करना चाहिये। मधु, घी और तिल का लेप करे। वातपित्तनाशक सम्पूर्ण शीतल उपचार करना चाहिये। अम्ल स्पर्श में शीतल होता है; इससे मिलकर क्षार तुरन्त ही मधुर (उदासीन-अक्रिय) बन जाता है; इसलिये विशेषतः अम्ल द्रव्यों से क्षार को शान्त करे[1]॥ ३८-३९॥

वक्तव्य—पानीय क्षार के अतिदाह में—'पाययेताऽतियोगेऽत्र तं शीघ्रं सघृतं दधि। सगुडं वा दधिसरं तैलं वा ससितोपलम्॥' संग्रह० सू० ३९।

अग्निकर्मविधिमाह—

(विषाग्निशस्त्राशनिमृत्युतुल्यः
क्षारो भवेदल्पमतिप्रयुक्तः।
स धीमता सम्यगनुप्रयुक्तो
रोगान्निहन्यादचिरेण घोरान्॥ १॥)

वि०—(अल्पज्ञ द्वारा प्रयुक्त क्षार विष, अग्नि, शस्त्र और बिजली की मृत्यु के समान (तात्कालिक) मृत्यु का कारण होता है। वही क्षार बुद्धिमान द्वारा भली प्रकार प्रयुक्त किये जाने पर जल्दी ही भयंकर रोगों को नष्ट करता है॥ १॥)

अग्निः क्षारादपि श्रेष्ठस्तद्दग्धानामसम्भवात्।
भेषजक्षारशस्त्रैश्च न सिद्धानां प्रसाधनात्॥ ४०॥

स०—क्षारादप्यग्नेः प्रशस्यतरत्वम्। कुतः। तेनाग्निना दग्धानां रोगाणामर्शःप्रभृतीनामसंभवात्। भूयोऽग्निदग्धो रोगः प्ररोहं न याति। मूलादुन्मूलनादित्यर्थः। [भेषजक्षारशस्त्रैश्च ये रोगा न शांतास्तेषां प्रसाधनाज्ज्वलनो उपायात्॥ ४०॥

क्षार से अग्निकर्म की श्रेष्ठता—

वि०—अग्नि क्षार से भी अधिक श्रेष्ठ है; क्योंकि अग्नि से जलाये रोगों का फिर उत्पन्न होना असम्भव होता है और जो रोग औषध, क्षार एवं शस्त्रों से सिद्ध नहीं होते; वे अग्नि से अच्छे हो जाते हैं॥ ४०॥

त्वचि मांसे सिरास्नायुसन्ध्यस्थिषु स युज्यते।

स०—सोऽग्निदाहस्त्वगादिषु युज्यते।

त्वचादि में अग्निदाह—

वि०—अग्निकर्म त्वचा, मांस, सिरा, स्नायु, सन्धि और अस्थि में बरता जाता है।

मषाङ्गग्लानिमूर्धार्तिमन्थकीलतिलादिषु ॥ ४१॥
त्वग्दाहो वर्तिगोदन्तसूर्यकान्तशरादिभिः।

स०—तत्र मषादिषु रोगेषु त्वग्दाहः कार्यो वर्त्यादिभिः। वर्तिः पिचुवर्तिः। आदिग्रहणादन्येष्वपि क्षुद्ररोगाध्यायोक्तेषु त्वग्दाहो योज्यः। शरादिभिरित्यादिग्रहणादन्यैरपि देशांतरप्रसिद्धैस्त्वग्दाहः कार्यः॥ ४१॥

मषादि रोग में वर्ति आदि से त्वग्दाह—

वि०—मषक, अंगग्लानि; शिर-पीड़ा, अधिमन्थ, चर्मकील, तिलादि अन्य क्षुद्र रोगों में त्वचा में दाह करना चाहिये। वर्त्ति (गुग्गुल आदि की बनाई), गाय का दाँत; सूर्यकान्त मणि अथवा शर आदि से त्वचा में दाह करना चाहिये॥ ४१॥

अर्शोभगन्दरग्रन्थिनाडीदुष्टव्रणादिषु ॥ ४२॥
मांसदाहो मधुस्नेहजाम्बवौष्ठगुडादिभिः।

स०—अर्शःप्रभृतिषु रोगेषु मधुस्नेहादिभिर्मांसदाहः कार्यः। आदिग्रहणेनार्बुदगंडमालादयो गृह्यंते। तत्र कदाचि-

[1] अम्ल और क्षार के संयोग से रासायनिक क्रिया होकर उदासीन बन जाता है तथा अम्ल और क्षार दोनों की दाहकता शान्त हो जाती है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न्मधुना कदाचित्पृथक्स्नेहैः कदाचिज्जांबवोष्ठेन। जांबवोष्ठः शलाकाविशेषो यंत्रविधावुक्तो येन क्षारो दीयते कदाचिद्गुडेन कदाचिदेवंप्रायेणान्येनापि देशविशेषप्रसिद्धेन ॥ ४२ ॥

अर्श आदि में मधु आदि से मांसदाह—

वि०—अर्श, भगन्दर, ग्रन्थि, नाडीव्रण, दुष्ट व्रण आदि में, मधु, स्नेह, जाम्बवौष्ठ और गुड़ आदि से माँस में दाह करना चाहिये ॥ ४२ ॥

शिलष्टवर्त्मन्यसृक्स्रावनीलयसम्यग्व्यधादिषु ॥ ४३ ॥
सिरादिदाहस्तैरेव—

स०—तैरेव श्लिष्टवर्त्मादिषु सिरादाहः कार्यः। तैरेव मधुस्नेहादिभिः ॥ ४३ ॥

श्लिष्टादि रोगों में मध्वादि से ही सिरादाह—

वि०—श्लिष्टवर्त्म, रक्तस्राव और असम्यग् सिराबेधन में स्नेह, जाम्बवौष्ठ और गुड़ आदि से ही सिरा आदि में दाह करना चाहिये। (सिरादि में आदि से धमनी, नाड़ी, स्नायु, सन्धि; अस्थिच्छेद, दन्तनाड़ी, उपपचम, आदि का ग्रहण करना चाहिये) ॥ ४३ ॥

—न दहेत्क्षारवारितान्।
अन्तःशल्यासृजो भिन्नकोष्ठान् भूरिव्रणातुरान् ॥४४॥

स०—क्षारवारितान्न दहेत्। न केवलं क्षारो वारितस्तान् दहेद्यावदंतःशल्यं तथांतर्लोहितं येषां तान् ॥ ४४ ॥

अग्निदाह के अयोग्य

वि०—निषेध—जो व्यक्ति क्षार के लिये अयोग्य हैं—उनमें अग्निकर्म नहीं करना चाहिये; जिनके व्रणादि के अन्दर शल्य या रक्त हो; जिनका कोष्ठ विदीर्ण हो गया हो और जिनमें बहुत से व्रण हों, उनमें दाह नहीं करना चाहिये ॥४४॥

सुदग्धं घृतमध्वक्तं स्निग्धशीतैः प्रदेहयेत्।

स०—सुदग्धमग्निना रोगाधिष्ठानं ज्ञात्वा घृतमधुभ्यामभ्यक्तं कृत्वा स्निग्धशीतैर्मधुयष्टिशालिमूलादिभिः प्रलेपयेत्।

सम्यग्दग्ध में कर्तव्य—

वि०—भली प्रकार दाह हो जाने पर घी और मधु का लेप करके (मुलहठी, शालीमूल आदि) स्निग्ध एवं शीतल द्रव्यों का लेप कर देना चाहिये।

तस्य लिङ्गं स्थिते रक्ते शब्दवल्लसिकान्वितम् ॥४५॥
पक्वतालकपोताभं सुरोहं नातिवेदनम्।

स०—तस्येत्यनेन सुदग्धं स्थानं परामृश्यते। तस्य सुदग्धस्य स्थानस्य लिंगं लक्षणं स्थिते रक्ते दह्यमानावस्थाप्रवृत्तासृजि निवृत्ते सति शब्दवद्बुद्बुदशब्दवत् स्थानं भवेत्। तथा लसिकान्वितम्। लसिका कुशशस्त्रादिविक्षते प्रथमं या दृश्यते जललवाकृतिः। तथा पक्वतालसदृशम्। सुखेन रोहति सुरोहम्। तथा नातिवेदनं नातितीव्ररुक् ॥ ४५ ॥

सम्यग्दग्ध के लक्षण—

वि०—सुदग्ध का लक्षण—भली प्रकार जलने पर रक्त के बन्द हो जाने पर स्थान बुद्-बुद् शब्द तथा लसीका युक्त हो जाता है या पके हुए लाल तालफल के समान अथवा कबूतर के रंग के समान हो जाता है; सुगमता से भरता है और इसमें अतिशय वेदना, नहीं होती'[1] ॥ ४५ ॥

प्रमाददग्धवत्सर्वं दुर्दग्धात्यर्थदग्धयोः ॥ ४६ ॥
चतुर्धा तत्तु तुच्छेन सह तुच्छस्य लक्षणम्।
त्वग्विवर्णोष्यतेऽत्यर्थं नच स्फोटसमुद्भवः ॥ ४७ ॥
सस्फोटदाहतीव्रोषं दुर्दग्धम्, अतिदाहतः।
मांसलम्बन-सङ्कोच-दाह-धूपन-वेदनाः ॥ ४८ ॥
सिरादिनाशस्तृण्मूर्च्छाव्रणगाम्भीर्यमृत्यवः।

स०—दुर्दग्धात्यर्थदग्धयोः प्रमाददग्धेन तुल्यं सर्वं लक्षणं बोध्यम्। नच लक्षणमंतरेणैतत्सम्यग्ज्ञायत इति तल्लक्षणार्थं भेदांतरदर्शनार्थमाह—तत्प्रमाददग्धं चतुष्प्रकारम्। कथम्। तुत्थेन तुत्थदग्धलक्षणेन सह। अविमृश्यदग्धं हि कदाचित्सम्यग्दग्धलक्षणं कदाचिद्दुर्दग्धलक्षणं कदाचिदतिदग्धलक्षणं कदाचिच्च तुत्थदग्धलक्षणं स्यात्। तुत्थस्य तुत्थदग्धस्य लक्षणमिति कार्ये कारणमुक्तम्। त्वगित्यादि त्वग्विवर्णा सत्यत्यर्थमुष्यते रुष्यते नच स्फोटानां समुद्भूतिरिति तुत्थदग्धस्थानस्य लक्षणम्। यत्किंचिन्मात्रमेवाग्निना स्पृष्टं तत्तुत्थदग्धमित्युच्यते। यत्र प्रदेशे स्फोटानामुद्भवो दाहयुक्ता तीव्रा उषा जायते तद्दुर्दग्धं रोगाधिष्ठानं विद्यात्। अतिदाहाद्रोगाधिष्ठानस्य मांसलंबनादयः स्युः। संकोचः सिरादीनाम्। धूपनं धूमनिर्गमनमिव भवनम्। वेदना रुजा। सिरादीनां नाशो व्यापद्। व्रणगांभीर्यं गंभीरव्रणता। मृत्युर्मरणं च। सम्यग्दग्धलिंगं तूक्तमेव तस्य लिंगं स्थिते रक्त इत्यादिना तस्मात्तत्पुनर्न निर्दिष्टम् ॥ ४६-४८ ॥

दुर्दग्ध तथा अतिदग्ध के लक्षण और भेदादि—

वि०—दुर्दग्ध और अतिदग्ध में प्रमाद से हुए दग्ध के सभी लक्षण होते हैं। प्रमाददग्ध (असावधानी से जल जाना) तुच्छ के साथ मिलाकर चार प्रकार का होता है; यथा—तुच्छ; दुर्दग्ध, अतिदग्ध तथा सम्यग्दग्ध।

तुच्छ का लक्षण—त्वचा में विवर्णता एवं अतिशय जलन होती है और छाले नहीं उत्पन्न होते, यह तुच्छ दग्ध है।

दुर्दग्ध में छालों का उत्पन्न होना, दाह और तीव्र जलन ये लक्षण होते हैं।

अतिदग्ध में मांस का लटकना, सिरा आदि का संकोच, दाह, धूमदर्शन, अत्यन्त वेदना; सिरा आदि का नष्ट होना, प्यास, मूर्च्छा, गम्भीर व्रण और मृत्यु हो जाती है। (सम्यक् दग्ध के लक्षण पहले कह दिये हैं) ॥ ४६-४८ ॥

१. पूर्वोक्त विभिन्न लक्षण तथा कुछ अन्य लक्षण भी भिन्न-भिन्न स्थानों के दग्ध में होते हैं। यथा—'सशब्दं दहनं दुर्गन्धित्वं त्वक्संकोचश्च त्वग्दग्धे, कपोतवर्णत्वमल्पशोफरुजता शुष्कसंकुचितवर्णता च मांसदग्धे. कृष्णोन्नतव्रणत्वं स्थिते च रक्ते लसीकास्रुतिः शिरादग्धे, कृष्णारुणकर्कशस्थिरव्रणता स्नाय्वादिदग्धे च।'
(अ. सं. सू. अ. ४०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अधुना चतुर्विधस्याऽस्य चिकित्सितमाह—

तुच्छस्याग्निप्रतपनं कार्यमुष्णं च भेषजम् ॥ ४९ ॥
स्त्याने ऽस्रे वेदनाऽत्यर्थं विलीने मन्दता रुजः ।

स०—तुत्थदग्धस्याऽग्निना प्रतपनं कार्यम। तथोष्णं भेषजमौषधम्। रक्तस्य विलयनार्थमेतत्। यतो हि तुत्थदग्धे त्वश्यं स्त्यामसृग्भवतीति युक्त्या प्रतिपादयन्नाह—लोहिते स्त्याने सत्यतिशयेन रुग्भवति विलीने रक्ते पीडाया मंदता मंदत्वं भवति। अतो हि तुत्थदग्धेऽग्निप्रतपनं योज्यम् ॥४९॥

तुच्छदग्ध की चिकित्सा—

वि०—चिकित्सा—तुच्छ दाह में अग्नि से सेकना चाहिये और उष्ण औषध लगानी चाहिये क्योंकि रक्त के जम जाने से अतिशय वेदना होती है और रक्त के पिघलने से वेदना कम हो जाती है ॥ ४९ ॥

दुर्दग्धे शीतमुष्णं च युञ्ज्यादादौ ततो हिमम् ॥ ५० ॥

स०—शीतमुष्णं च पर्यायेणौषधं तत्रादौ प्रथमं भेषजं युंज्यात् ॥ ५० ॥

दुर्दग्ध की चिकित्सा—

वि०—दुर्दग्ध में आरम्भ में बारी-बारी से शीत और उष्ण उपचार करे और अन्त में केवल शीतोपचार करे ॥ ५० ॥

सम्यग्दग्धे तवक्षीरिप्लक्षचन्दनगैरिकैः ।
लिम्पेत्साज्यामृतैरूर्ध्वं पित्तविद्रधिवत्क्रिया ॥ ५१ ॥

स०—सम्यग्दग्धे तवक्षीर्यादिभिर्लेपयेत्। किंभूतैः। साज्यामृतैर्घृतगुडूचीयुक्तैः। आदावित्यत्राऽपि योज्यम्। आदौ तैर्लेपयेदूर्ध्वमनंतरं पित्तविद्रधिवत् क्रिया कार्येति शेषः ॥ ५१ ॥

सम्यग्दग्ध की चिकित्सा—

वि०—सम्यग्दग्ध होने पर प्रथम वंशलोचन, पिलखन, चन्दन, गेरू, इनको गिलोय और घी में मिलाकर लेप करे; बाद में पित्त विद्रधि की भाँति चिकित्सा करे ॥ ५१ ॥

अतिदग्धे द्रुतं कुर्यात्सर्वं पित्तविसर्पवत् ।

स०—अतिदग्धे द्रुतं शीघ्रमेव सर्वं बहिरंतश्च भेषजं पित्तविसर्प इव कुर्यात् ।

अतिदग्ध की चिकित्सा—

वि०—अतिदग्ध में-तुरन्त पित्तविसर्प की भाँति सब चिकित्सा करे।

वक्तव्य—अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलाम् ।
क्रियां कुर्यात्ततः पश्चाच्छालितण्डुलकण्डनैः ॥
तिन्दुकीत्वक्कषायैर्वा पिष्टैः साज्यैः प्रलेपयेत् ।
गुडूच्याश्छादयेत् पत्रैरथवोपोदकैर्व्रणम् ॥

भेषजं वास्य कुर्वीत सर्वं पित्तविसर्पवत् ।
(अ. सं. सू. अ. ४०)

स्नेहदग्धे भृशतरं रूक्षं तत्र तु योजयेत् ॥ ५२ ॥

स०—स्नेहदग्धेऽनितरां रूक्षं योजयेत्। भृशतरं रूक्षं चाऽत्र भेषजं तत्र तु योजयेत्। तुशब्दान्न केवलं भृशतरग्रहणाच्च बाहुल्येन रूक्षं प्रलेपादि तत्र योजयेत् किंतु देहदेशादिसात्म्यवशात्स्निग्धमपि यथावस्थं यथावद्योजयेत् ॥ ५२ ॥

स्नेहदग्ध की चिकित्सा—

वि०—स्नेह से जलने पर अतिशय रूक्ष उपचार करना चाहिये ॥ ५२ ॥

(शस्त्रक्षाराग्नयो यस्मान्मृत्योः परममायुधम् ।
अप्रमत्तो भिषक् तस्मात्तान् सम्यगवचारयेत् ॥ १ ॥)

वि०—(क्योंकि शस्त्र, क्षार, और अग्नि मृत्यु के परम साधन हैं; इसलिये वैद्य सावधान होकर इनको भली प्रकार प्रयोग में लाये ॥ १ ॥

समाप्यते स्थानमिदं हृदयस्य रहस्यवत् ।
अत्रार्थाः सूत्रिताः सूक्ष्माः प्रतन्यन्ते हि सर्वतः ॥५३॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां सूत्रस्थाने क्षाराग्निकर्मविधिर्नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥

स०—वक्तव्यं यद्वस्तु तस्य सर्वस्यैवोक्तत्वादिदं स्थानं समाप्यते निष्पाद्यते। किंभूतं स्थानम्। रहस्यवत् रहस्यमत्यर्थं गुह्यरूपं तदास्याऽस्ति तद्रहस्यवत्। कस्य स्थानम्। हृदयस्य। हृदयमिव हृदयम्। हृदयशब्देनाष्टांगहृदयमुपलक्ष्यते यथा सत्यभामा भामेति। कुत एतत्स्थानं रहस्यवदित्याह—यस्मादत्र स्थानेऽर्थाः सूत्रिताः सूचिताः सूचनमात्रेणोक्ताः। किंभूताः। सूक्ष्मास्तीक्ष्णतरमतिसमधिगम्याः यतस्ते एवार्थाः सर्वस्मिंस्तंत्रे प्रतन्यंते विस्तार्यंते। अस्मादिदं स्थानं तंत्रसंबंधिनामन्यस्थानानां रहस्यवदित्युक्तमिति ॥ ५३ ॥

इति श्रीमृगांकदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टांगहृदयटीकायां सर्वांगसुंदराख्यायां क्षाराग्निकर्मविधिस्त्रिंशत्तमोऽध्यायः ॥ ३० ॥

सूत्रस्थान की समाप्ति—

वि०—रहस्य युक्त अष्टाङ्गहृदय का यह (सूत्र) स्थान समाप्त किया जाता है। इसमें जो सूक्ष्म रूप से विषय सूत्रित किये (गूँथे) गये हैं; वे ही विषय सारे तन्त्र में फैले हुए हैं ॥ ५३ ॥

इस प्रकार विद्योतिनी टीका में क्षार-अग्निकर्मविधि नामक तीसवाँ अध्याय समाप्त हुआ ॥ ३० ॥

इति सूत्रस्थानं समाप्तम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ शारीरस्थानम्

प्रथमोऽध्यायः

अथातो गर्भावक्रान्ति शारीरं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

अब इसके आगे गर्भावक्रान्ति शारीर का व्याख्यान करेंगे—जैसा कि आत्रेय आदि महर्षियों ने कहा था।

वक्तव्य—अवक्रान्ति (अवक्रमण) आना-जिस प्रकार से अगर्भ गर्भत्व को प्राप्त होता है।

गर्भस्थिति का परिचय—

शुद्धे शुक्रार्तवे सत्त्वः स्वकर्मक्लेशचोदितः।
गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ॥ १॥

शुक्र और आर्त्तव के शुद्ध (गर्भोत्पादन योग्य) होने पर अपने कर्मों के अनुसार क्लेश से प्रेरित हुआ सत्त्व (मन) युक्ति (सामर्थ्य) के अधीन बनकर गर्भरूप हो जाता है, जिस प्रकार कि अरणी में अग्नि (युक्ति से) बन जाती है॥

वक्तव्य—क्लेश-'अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः'-इनमें बंधा हुआ ही मन जन्म के बन्धन में आता है। कर्मक्लेश से रहित-वीतराग पुरुषों का जन्म नहीं होता। इसी से कहा है—'चित्तमेव हि संसारि रागादिक्लेशदूषितम्। तदेव तैर्विनिर्मुक्तं मुक्तमित्यभिधीयते॥' युक्तिवशात जिस प्रकार मथ्य-मन्थन-मन्थक आदि सम्पूर्ण सामग्री के बिना आग नहीं बनती, उसी प्रकार आवश्यक सामग्री के बिना गर्भ भी नहीं बनता, सम्पूर्ण साधन होने पर ही गर्भ बनता है। इसी से चरक ने कहा है 'एवमयं नानाविधानामेषां गर्भकराणां भावानां समुदायादभिनिर्वर्तते गर्भः यथा-कूटागारं नानाद्रव्यसमुदायात्; यथा वा-रथो नानारथाङ्गसमुदायात्; तस्मादेतदवोचाम-मातृजश्चायं गर्भः; पितृजश्च, आत्मजश्च, सात्म्यजश्च, रसजश्च, अस्ति च सत्त्वमौपपादुकमिति' (होवाच भगवानात्रेयः)-चरक. शा. अ. ३।१४।

गर्भ की वृद्धि—

बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः।
मातुश्चाहाररसजैः क्रमात्कुक्षौ विवर्द्धते॥ २॥

शुक्र आर्त्तव रूप में परिणत-गर्भजनन स्वभाव वाले (सत्त्व-रज और तमोमय) सूक्ष्म एवं सत्त्व का अनुगमन करने वाले आकाशादि महाभूतों से और माता के आहार-रसजन्य भूतों से गर्भ क्रमशः कुक्षि में बढ़ता है॥ २॥

वक्तव्य—सूक्ष्म महाभूत सत्त्व और आत्मा इस गर्भ को बनाते हैं-यथा (१) 'भूतैश्चतुर्भिः सहितः स सूक्ष्मैर्मनोजवो देहमुपैति देहात्॥' चरक, (२) जब तक मुक्ति नहीं हो जाती आत्मा सत्त्व एवं सूक्ष्म महाभूतोंसे वियुक्त नहीं होता। 'अतीन्द्रियैस्तैरतिसूक्ष्मरूपैरात्मा कदाचिन्न वियुक्तरूपः। न कर्मणा नैव मनोमतिभ्यां न चाप्यहङ्कारविकारदोषैः॥' च.शा.अ.२-३७

गर्भस्थ अदृश्य जीव का निदान—

तेजो यथाऽर्करश्मीनां स्फटिकेन तिरस्कृतम्।
नेन्धनं दृश्यते गच्छत्सत्त्वो गर्भाशयं तथा॥ ३॥

जिस प्रकार कि सूर्य की किरणों का तेज स्फटिक (सूर्यकान्तमणि) के बीच से इन्धन में जाता हुआ (आँख से) दिखाई नहीं देता, उसी प्रकार गर्भाशय में जाता हुआ सत्त्व दिखाई नहीं देता॥ ३॥

वक्तव्य—लैन्स में से गुजरती हुई सूर्य की किरणें नहीं दीखतीं, परन्तु रूई या तिनकों को जलते देखकर किरणों का आना प्रतीत होता है, उसी प्रकार गर्भाशय में सत्त्व का आना (चेतना के लक्षण-गर्भ की वृद्धि आदि) कार्यों से देखा जाता है।

एक ही प्रकार की सामग्री से विभिन्न जाति की उत्पत्ति—

कारणानुविधायित्वात्कार्याणां तत्स्वभावता।
नानायोन्याकृतीः सत्त्वो धत्तेऽतो द्रुतलोहवत्॥ ४॥

सब कार्य कारण के समान ही होते हैं; इसलिये कार्यों में कारणों की समानता रहती है जिस प्रकार कि पिघलाया सीसा या लोह धातु जैसे भी साँचे में ढाला जाता है; वैसे ही आकार का बन जाता है, उसी प्रकार मन भी (गर्भधारक योनि के अनुसार) नाना प्रकार की जाति एवं आकृति को धारण करता है॥ ४॥

वक्तव्य—चरक में—'यथा-कनकरजतताम्रत्रपुसीसकान्यासिच्यमानानि तेषु तेषु मधूच्छिष्टविग्रहेषु, तानि यदा मनुष्यबिम्बमापद्यन्ते, तदा मनुष्यविग्रहेण जायते।' चरक-शा. आ. ३।१६।

गर्भ में स्त्री-पुंसादि का निदान—

अत एव च शुक्रस्य बाहुल्याज्जायते पुमान्।
रक्तस्य स्त्री तयोः साम्ये क्लीबः—

(कारणानुसार कार्य होता है) इसलिये शुक्र की अधिकता से पुरुष उत्पन्न होता है और रक्त (आर्त्तव) की अधिकता से स्त्री और दोनों की समानता से नपुंसक उत्पन्न होता है॥

वक्तव्य—पुरुष और स्त्री की उत्पत्ति के विषय में कई विचार हैं-आयुर्वेद में सौम्य-शुक्र की अधिकता से पुत्र और स्त्रियाँ आग्नेय-रक्त की अधिकता से उत्पन्न होती हैं—यह कल्पना है। स्त्री में स्त्रीबीज अन्दर रहने से आग्नेय हैं; पुरुष में पुंबीज शरीर के बाहर रहने के सौम्य हैं। आग्नेय और सौम्य तत्त्व ही सृष्टि को उत्पन्न करते हैं। इसी के आधार पर दारुवाहि ने कहा है—(१) 'स्त्रीपुंसयोस्तु संयोगे यद्यादौ विसृजेत् पुमान्। शुक्रं, ततः पुमान् वीरो जायते बलवान् दृढः॥ अथ चेद् वनिता पूर्वं विसृजेद् रक्तसंयुतम्। ततो रूपान्विता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कन्या जायते दृढसंहता ॥' (२) स्त्री और पुरुष दोनों में पुंबीज और स्त्रीबीज होते हैं। जिसमें जिस बीज की अधिकता होती है; उसी से वह पुरुष या स्त्री यह संज्ञा होती है। (३) स्त्रियों में भी शुक्र है—परन्तु उनमें पुंशुक्र का अभाव रहने से गर्भ की उत्पत्ति नहीं होती। इसी से 'योषितोऽपि स्रवन्त्येव शुक्रं पुंसां समागमे। न गर्भस्य हि तत्किञ्चित् करोतीति न चिन्त्यते ॥' रसादिसप्तधातुगत शुक्र धातु (पुरुष-बीज का न होने पर भी) स्त्री-शरीर की पुष्टि के लिये आवश्यक है। कई विद्वानों की मान्यता है कि स्त्रियों में होने वाला सोमरोग इसी शुक्र की दुष्टि का परिणाम है और इसकी चिकित्सा से वह ठीक भी होता है।

एक काल में अनेक गर्भ का निदान—

- शुक्रार्तवे पुनः ॥ ५ ॥

वायुना बहुशो भिन्ने यथास्वं बह्वपत्यता।

वायु के कारण शुक्र और आर्त्तव के बहुत-से विभाग होने पर विभाग की संख्या और उन विभागों में शुक्र या रज की बहुलता के अनुसार एक से अधिक बहुत पुरुष या स्त्री संतान उत्पन्न होती हैं (जैसे—कुत्ती में) ॥ ५ ॥

विकृत गर्भ का कारण—

वियोनिविकृताकारा जायन्ते विकृतैर्मलैः ॥ ६ ॥

विकृत (दूषित या उन्मार्गगामी) वातादि मलों से विकृत योनि और विकृत आकार का गर्भ उत्पन्न होता है ॥६॥

मासिक धर्म का प्रारम्भ और अवसान—

मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम्।
वत्सराद् द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ॥ ७ ॥

प्रतिमास स्त्रियों का रसजन्य रज तीन दिन तक बहता है, यह रजःस्राव बारह वर्ष से आरम्भ होता है और पचास वर्ष की आयु में नष्ट हो जाता है ॥ ७ ॥

वक्तव्य—वह रज आहार-रस से उत्पन्न होता है; न कि रस धातु से। देश एवं परिस्थिति भेद से यह रजःस्राव बारह साल से आगे-पीछे एवं कभी पचास वर्ष के बाद भी देखा गया है। इसी प्रकार तीन दिन से अधिक भी चार या पाँच दिन अथवा एक-दो दिन भी स्वस्थ रूप में मिलता है।

मेधावी सन्तानोत्पत्ति का कारण—

पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥ ८ ॥
वीर्यवन्तं सुतं सूते—

जिस स्त्री के सोलह वर्ष पूर्ण हो गये हैं; वह बीस वर्ष पूरे हुये पुरुष के साथ-गर्भाशय, अपत्यमार्ग, रक्त, शुक्रवायु और हृदय के शुद्ध वायु आदि से अदूषित या अनावृतहोने पर जब मैथुन करती है, तब वीर्यशाली पुत्र को उत्पन्न करती है ॥८॥

वक्तव्य—पुत्रोत्पत्ति के लिये सबसे उत्तम वय स्त्री के लिये सोलह से इक्कीस और पुरुष के लिये बीस से अट्ठाईस है। पूर्वोक्त सोलह और बीस प्रायिक है। इसीलिए संग्रह में 'षोडशवर्षायां पञ्चविंशतिवर्षः पुत्रार्थं प्रयतेत।' पाठ है। सुश्रुतमें भी 'अथास्मै पञ्चविंशतिवर्षाय षोडशवर्षां पत्नीमावहेत। ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्। यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥ जातो वा न चिरं जीवेज्जीवेद्वा दुर्बलेन्द्रियः। तस्मादत्यन्तबालायां गर्भाधानं न कारयेत् ॥' सु. शा. अ. १०।५३-५४।

अस्थिर अल्पायु गर्भ का कारण—

—ततो न्यूनाब्दयोः पुनः।

रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥ ९ ॥

इससे छोटी आयु में मैथुन करने से संतान रोगी, अल्पायु, अभाग्यशाली होती है अथवा गर्भ में नहीं ठहरती ॥ ९ ॥

गर्भ न होने का कारण—

वातादिकुणपग्रन्थिपूयक्षीणमलाह्वयम्।
बीजासमर्थं रेतोस्रम्—

सन्तानोत्पत्ति में असमर्थ वीर्य और आर्त्तव बीज (विकृति के अनुसार) वायु आदि दोष, कुणप, ग्रन्थि, पूय, क्षीण तथा मल (मूत्र तथा पुरीष) नामों से कहा जाता है। (इस प्रकार का वीर्य और आर्त्तव बीज के लिये असमर्थ होता है।)

वक्तव्य—दूषितशुक्र, वातशुक्र, पित्तशुक्र, कफशुक्र, कुणपशुक्र, ग्रन्थिशुक्र, पूयशुक्र, क्षीणशुक्र, मूत्रशुक्र, मलशुक्र तथा दूषित आर्त्तव भी इसी प्रकार के नामों का होता है।

वातादिदोषज शुक्र का लक्षण—

—स्वलिङ्गैर्दोषजं वदेत् ॥ १० ॥

रक्तेन कुणपं श्लेष्मवाताभ्यां ग्रन्थिसन्निभम्।
पूयाभं रक्तपित्ताभ्यां क्षीणं मारुतपित्ततः ॥ ११ ॥

वातादि अपने लक्षणों से दूषित शुक्र को वात, पित्त या कफ से दूषित समझो। रक्तदोष से कुणप, कफ और वात से ग्रन्थि के समान; रक्त-पित्त से पूय की भाँति, वात-पित्त से क्षीण शुक्र होता है ॥ १०-११ ॥

वक्तव्य—रूक्ष-श्यावारुण आदि से वायु से दूषित; विस्रगन्धि, उष्णिमा आदि से पित्त से दूषित; स्निग्ध-पाण्डु-पिच्छिल आदि से कफदूषित जानना चाहिये। चरक में-'फेनिलं तनु रूक्षं च विवर्णं पूति पिच्छिलम्। अन्यधातूपसंसृष्टमवसादि तथाष्टमम् ॥' चरक चि. अ. ३०। क्षीणशुक्र पित्तवायु से एवं मूत्रपुरीषगन्धी सन्निपात से होता है। क्षीणशुक्र का लक्षण—'शुक्रक्षये मेढ्रवृषणवेदनाऽशक्तिर्मैथुने, चिराद्वा प्रसेकः प्रसेके चाल्परक्तशुक्रदर्शनम् ॥' आर्त्तव को भी दोष के वर्ण एवं लक्षणों से पहचानना चाहिये।

शुक्रार्त्तव की साध्यसाध्यता—

कृच्छ्राण्येतान्यसाध्यं तु त्रिदोषं मूत्रविट्प्रभम्।

इनमें कुणप, ग्रन्थि, पूति, पूय और क्षीण शुक्र या आर्त्तव कष्टसाध्य हैं। मूत्र-मलदूषित शुक्र और आर्त्तव सन्निपातज होने से असाध्य हैं।

वक्तव्य—अरुणदत्त ने वातादि शुक्रार्त्तव से लेकर क्षीणशुक्रार्तव तक सब को कष्टसाध्य माना है। परन्तु सुश्रुत ने

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वातादि दोष को कष्टसाध्य नहीं कहा। अपितु आर्त्तव के सम्बन्ध में 'तेषु कुणपग्रन्थिपूतिपूयक्षीणमूत्रपुरीषप्रकाशमसाध्यम् । साध्यमन्यच्चेति ॥' सु. शा. अ. २।५।

दूषित शुक्रार्त्तव की चिकित्सा—

कुर्याद्वातादिभिर्दुष्टे स्वौषधम्—

वायु आदि दोष से दूषित होने पर इनकी अपनी-अपनी औषध करे।

